Amaracandrayati's

KĀVYAKALPALATĀVṚTTIḤ

(With two commentaries — **PARIMALA** and **MAKARANDA**)

L. D. SERIES 117

General Editor
JITENDRA B SHAH

Edited By
R. S. BETAI

L. D. INSTITUTE OF INDOLOGY, AHMEDABAD-9

Amaracandrayati's

KĀVYAKALPALĀTAVṚTTIḤ

(With two commentaries — **PARIMALA** and **MAKARANDA**)

L. D. SERIES 117

Edited By
R. S. BETAI

General Editor
JITENDRA B. SHAH

L. D. INSTITUTE OF INDOLOGY, AHMEDABAD-9

Published by :

Jitendra B. Shah
L. D. Institute of Indology
Ahmedabad-380 009.

Printed by :

Naidunia Printery
60/1, Babu Labchand Chhajlani Marg,
Indore-452 009.

First Edition : July 1997

Published with the financial assistance of the Government of India, Ministry of Education & Culture, Department of Education, under the scheme of financial assistance for preservation of manuscripts.

Price : Rupees 225/-

श्री अमरचन्द्रयति विरचिता

काव्यकल्पलतावृत्तिः

(परिमल - मकरन्द - टीकाद्वयसमेता)

सम्पादक

र. सुं. बेटाई

लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर, अहमदाबाद-९

PREFACE

We have pleasure in publishing two hitherto unpublished commentaries on the *Kāvyakalpalatā* of the poet Amaracandra (of Vāyaṭa-gaccha). The first commentary, called the *Parimala*, is an autocommentary (13th Cent.) and the second, styled as the *Makaranda*, is by Śubhavijaya gaṇi (of Tapāgaccha, 17th Cent. A. D.). The original work concerns itself with poetics and therein have been discussed such related topics as meter, word, pun, and meaning. We hope and believe that this volume will be useful to scholars and students of Indian poetics.

Prof. Ramesh Betai has edited these commentaries. L. D. Institute is indebted to him for this fine edition.

L. D. Institute of Indology
Ahmedabad - 380 009
September 1997

Jitendra Shah
Director, Research

अनुक्रमः -

INTRODUCTION

The Work

Right from the oldest days, the काव्यकल्पलतावृत्ति or काव्यकल्पलता-कविशिक्षावृत्ति of Amara Candra Yati (V. S. 12th century) is known, both for its original subject-matter and for the deep scholarship of the author reflected in it. So many mss. of the work are listed to be found in different manuscript libraries, mainly in western India. The author has written another very elaborate and detailed Vṛtti on his own work. This Vṛtti, परिमल by name, is unfortunately available only upto 2.1 and a part of 2.2, i. e., only on the first six stabakas and a part of the seventh, in a work of total 21 stabakas. He is also said to have written a third Vṛtti, 'Manjari'[1] by name on his work, thus betraying his constant, unending thinking on the training and equipment of a poet seeking literary perfection. It also seems that during the course of writing of the 'Parimala', the author has revised his 'Vṛtti' at places. This is evidenced from the fact that he asks the reader atleast at three places in his 'Parimala' to refer to his 'Vṛtti'. The reason of the non-completion of 'Parimala' is not known. Later writers also seem to know it upto a part of 2.2 at the most, as mentioned above. It is very much likely that this his work on 'training and equipment of a poet' is one of his later and mature works, and, in all probability, he could not complete his 'Parimala' before his death. This is, however, only a conjecture.

Another scholar of high order Śubhavijayagaṇi (V. S. 17th century) has written a Vṛtti, मकरन्द by name. He, however, makes a very humble claim in his Vṛtti. He only supplements 'Parimala' in all respect, and refers to the 'Parimala' at several places in his Vṛtti for matters that he would not repeat. Even though claimed to be just a supplement, the Vṛtti is scholarly and adds quite a few valuable points not to be found even in the very elaborate 'Parimala'.

काव्यकल्पलतावृत्ति is published twice and translated into Marathi once. The first edition was published about 95 years back and the second edition came out in 1931. The Marathi translation is also very old. The 'Parimala' and 'Makaranda' are available only in mss. and await publication[2]. Again, the latest printed Vṛtti edited by Pundit Jagannath Shastri Hoshing, is very much faulty, corrupt, hurried and full of misprints[3]. It therefore needs a thorough revision with the help of several authentic and valuable mss. that were perhaps not available to Pundit Hoshing. Except for the Sūtra or Kārikā part, it is likely more to misguide rather than guide

its readers. It seems that the editor did not have access to so many mss. available to us to-day.

We have therefore undertaken this ambitious programme of preparing a thoroughly revised critical edition of काव्यकल्पलतावृत्ति **together with** the 'Parimala' as also the 'Makaranda', the latter two seeing the light of publication for the first time. This would be a fit tribute to the tireless scholarship and erudition of Amara Candra Yati, whose life-time work now fully appears in print. We have made use of so many very valuable and old mss. and referred to several others[4] for revision of the printed text and a critical editing of the 'Parimala' and 'Makaranda'.

A word, to be elaborated later in its proper place, may be added about the value of the subject-matter of the work to justify this patient, hard and long-time effort and publication of the work. The work, as its name shows, is on the training and equipment of a poet, व्युत्पत्ति and अभ्यास of traditional writers. All topics therefore, associated with the two are discussed by the author. He expects the poet to be well- equipped on the lines laid down by him and then to train himself in the composition of poetry so that he progresses step by step and constantly evolves into a greater poet by scaling higher and higher heights. The sum-total of all this discussion is that the poet should be a सर्वज्ञ. But important is the fact that he shows how he can become a सर्वज्ञ; this सर्वज्ञता that comes by stages is also expected to be well-planned systematic. This brings in the discussion of four main topics छन्दःसिद्धि, शब्दसिद्धि, श्लेषसिद्धि and अर्थसिद्धि in four प्रतान[s]. Other important topics discussed and analysed are वर्णनं, अद्भुतविधि, चित्रप्रपञ्च, अलंकार and समस्याक्रम' etc. All these are of importance on the art-side (Kalāpakṣa) of Kāvya and therefore the poet is expected to master these. We do not come across such detailed discussion on the topics and the problem posed in any work accepted by tradition. Thus, the work is original in its own way and so is the subject-matter that perhaps no other author could analyse and elaborate better, not even Vinaya Candra Sūri, the writer of काव्यशिक्षा[5]. The work of Amara Candra Yati would therefore be a positive addition to knowledge in general and add substantially to the wealth of knowledge of poetics in particular[6].

S. K. De, in his 'Sanskrit Poetics' gives a rather small but separate chapter entitled "writers on Kavi-śikṣā" and pays a fine tribute to this work of Amara Candra Yati. He is, however, not clear on the value of works on training of poets. He states-

"These treatises do not deal with the conventional topics of Poetics, with its theories, dogmas and definitions, but they are meant chiefly as manuals to guide the poet in his profession, their primary object being **Kavi-śikṣā** or instruction of the aspiring poet in the devices of the craft"[7].

Here, it may be added that the work of the type that Amara Candra writes, has the capacity to guide even poets of high merit and level who desire to go higher and higher towards literary or poetic perfection. The words, 'aspiring poets' therefore, should mean not only persons who aspire to become poets, but also those who are bent upon going higher and higher in their realm of poetic heights. Thus, works of the type written by Amara Candra can guide poets throughout their life. De is right when he adds-

"At the same time, the fact must not be overlooked that works of this nature in Sanskrit, ostensibly meant as they are for the guidance of the aspiring poet, display, in their discussion of what is right and proper in poetry, a tendency towards genuine criticism, taken apart from the beaten paths of orthodox poetics; and they set up in their native way, a standard, whatever it may be, of taste and critical judgement"[8].

As we will note at a later stage, Amara Candra's standard of poetic taste is very high, and the work is written with that standard in view.

The authors - Arisiṁha and Amara Candra

We may take here a brief note of the biographical details of the two authors, as available to us.

Arisiṁha

Arisiṁha was patronised by Vastupala (A. D. 1242), the minister at the court of Rana Viradhavala, at Dholka in Gujarat. He was a Jaina of the Śvetāmbara sect and wrote सुकृतसंकीर्तन in a eulogy of his patron. His father's name is Āsaḍa, the writer of विवेकमञ्जरी[9]. His mother's name is पृथ्वीदेवी, the second wife of Āsaḍa. One opinion, not confirmed is that he was the teacher of Amara Candra. It is also believed that they were pupils of the same teacher.

Amara Candra Yati

Amara Candra is a yati of the Śvetāmbara sect. He is the pupil of Jinadattasūri, who belonged to the Vāyaḍagaccha and had written the famous work

'Vivekavilāsa'. He was also a later contemporary of Vastupāla. He has written works on a variety of subjects. In his वृत्ति on काव्यकल्पलता, he claims authorship of परिमलवृत्ति, अलङ्कारप्रबोध and छन्दोरत्नावली. Other important works attributed to him are पद्मानन्दचरित; स्यादिशब्दसमुच्चय; बालभारत; द्रौपदीस्वयंवर etc. Telang's conjecture is that he is also a कोशकार. Whatever be the truth of authorship of these works, it is a fact that he is one of the most important scholars that the Jaina world has given.

The Work

Traditionally it is believed and Amara Candra Yati (V. S. 12th century) has acknowledged that originally काव्यकल्पलता was a sūtra work composed by Arisiṁha (son of Āsaḍa and V. S. 12th century). But Amara Candra has claimed that part of the sūtras are composed by him. He says :

> सारस्वतामृतमहार्णवपूर्णिमेन्दोः मत्वाऽरिसिंहसुकवेः कवितारहस्यम् ।
> किञ्चिच्च तद्रचितमात्मकृतं च किञ्चिद्व्याख्यास्यते त्वरितकाव्यकृतेऽत्र सूत्रम् ॥

The statement is very clear and it shows that, while some sūtras were composed by Arisiṁha, some others were added by Amara Candra, who later added his Vṛtti on the entire work. 'Makaranda'[10] also accepts the same line of thought. Thus, Amara Candra Yati has written some of the sūtras, has edited all the sūtras and has composed his 'Vṛtti' on all the sūtras. It would therefore not be surprising that the whole work काव्यकल्पलतावृत्ति is attributed by many scholars exclusively to Amara Candra Yati and they add that he later wrote परिमल and मञ्जरी on it. But it would be more reasonable to accept Amara Candra's acknowledgement and accept the fact of the dual authorship of the sūtras. However, there is so far no evidence to find out the part of the sūtras composed by Arisiṁha and the part to the credit of Amara Candra. It is now traditionally accepted that the sūtras and the Vṛtti are to be adjudged as those of Amara Candra. Most of the mss. available are with Vṛtti[11].

Once that Amara Candra composed the 'Vṛtti', it seems that he began to feel like bettering and further elaborating his work in order to make it more comprehensive. He seems to have felt that -

(a) some of the sūtras that were not originally explained and interpreted, need to be explained and interpreted;

(b) some matter in the Vṛtti needed further analysis, elucidation and elaboration;

(c) some matter that was left out by him or that did not strike to his mind then, needed to be added and incorporated.

Amara Candra composed the second Vṛtti 'Parimala' to fulfil these three principal needs. Thus, the 'Vṛtti' and 'Parimala' are composed by the same author. One more purpose fulfilled by the 'Parimala' is to give many more elaborate illustrations, rules of grammar and other śāstras in order to make his doctrines stand on firm ground. Incidentally he also picks up this opportunity to exhibit his all-sided knowledge, the knowledge of all śāstras in particular.

We have noted earlier that Amara Candra asks his readers of the 'Vṛtti' to refer to his 'Parimala' atleast at three places. To cite one of the three remarks, he states at the end of 1.5, i. e., वर्ण्यस्थितिस्तबक that -

एतत्श्लोकोक्तभावान् वर्ण्यानां विशेषान्तराणि कविसमयोदाहरणानि मत्कृतकाव्यकल्पलतापरिमलात् ज्ञेयानि।

This raises one question. Did the author compose the 'Vṛtti' and 'Parimala' at the same time ? The care with which he composes the Vṛtti and systematises the sūtras and the care with which he illustrates the doctrines and systematises further the sūtras and Vṛtti in the 'Parimala', show that in all probability the abovementioned remarks are added later in the 'Vṛtti'. It is also possible that the 'Parimala' immediately followed the 'Vṛtti' or even that the later part of the 'Vṛtti' and former part of the 'Parimala' might have been written at the same time.

It was much later that Śubhavijayagaṇi (17th century V. S.) added yet another Vṛtti, 'Makaranda'. The Vṛtti is entitled काव्यकल्पलता-मकरन्दवृत्ति but the Vṛtti further elaborates the 'Vṛtti' of Amara Candra at a few places. The author has, however, no pretensions of writing anything on the 'Parimala' of which he is very much enamoured[12]. This is clear from the fact that he refers to it, in all respects, at 4 places in the 'Makaranda'. To cite one such reference, he states -

सर्वच्छन्दसां सिद्ध्यर्थमेकाक्षरादिकाः सामान्यशब्दाः परिमलान्मन्तव्याः ।

Thus, his humble claim is only to supplement the 'Parimala'. He seems to feel that even after the 'Parimala' is written as a स्वोपज्ञावृत्तिः there is some scope to add a few points and many more illustrations, as also several words to the different lists, both in the 'Vṛtti' and the 'Parimala', which will ultimately strengthen the two Vṛttis of Amara Candra. He also quotes some more doctrines of Vyākaraṇa and some other Śāstras.

Again, just as he does not analyse in details, problems that 'Parimala' has already dealt with and analysed, he does not give his comments on matters that are too simple. Thus, while coming to the सकलक्रियास्तबक (4-4), he states that he does not comment upon it because it is easy to understand सुगमोऽस्तीति न व्याख्यातः. Again, in his comments on श्लेषव्युत्पादन, the author prefers to comment only on अङ्गभङ्गश्लेषव्युत्पादनप्रकार. Thus, what is easy to grasp and what is fully analysed by the 'Parimala' does not come within the purview of the 'Makaranda'. This shows the author's understanding of and great regard for 'Parimala' and his thorough grasp over what must be added and what not.

Study in Details

Let us now note a few details, critically and analytically, of the work and the Vṛttis on it.

काव्यकल्पलताकविशिक्षा

The work is divided into four broad groups known as प्रतान॰ and each Pratāna is sub-divided into several sub-sections known as स्तबक॰. Each Pratāna and each Stabaka is given a specific title. Thus,

The first Pratāna is known as छन्दःसिद्धिप्रतान and consists of these स्तबक :-

(i) अनुष्टुप्शासनम्
(ii) छन्दोऽभ्यासः
(iii) सामान्यशब्दाः
(iv) वादः
(v) वर्ण्यस्थितिः

The second Pratāna is entitled शब्दसिद्धिप्रतान and consists of these stabakas :

(i) रूढयौगिकमिश्राख्यः
(ii) यौगिकनाममालाख्यः
(iii) अनुप्रासाख्यः
(iv) लाक्षणिकाख्यः

The third Pratāna is श्लेषसिद्धिप्रतान and consists of these stabakas :

(i) श्लेषव्युत्पादनम्
(ii) सर्ववर्णनम्
(iii) उद्दिष्टवर्णनम्

(iv) अद्भुतविधिः

(v) चित्रप्रपञ्च

The fourth and the last Pratāna, known as अर्थसिद्धिप्रतान, consists of these stabakas :

(i) अलङ्काराभ्यासः

(ii) वर्ण्योपस्थितिः

(iii) आकारार्थोपस्थितिः

(iv) क्रियार्थोपस्थितिः

(v) प्रकीर्णकः

(vi) संख्याख्यः

(vii) समस्याक्रमः

The number of Kārikās are as follows :

First	-	113
Second	-	206
Third	-	189
Fourth	-	290
Total	-	798

From the titles, the nature of the contents of the work is clear. It is not traditional in its contents in so far as it does not follow any particular Vāda or deal with the Alankaraṇas of Kāvya such as Rasa and Dhvani, Guṇa and Alaṅkāra, Rīti and Adoṣatā, Vakrokti and Atiśaya etc. It does not strictly follow the method and contents of the works even of Rajasekhara, Kṣemendra etc., who partially deal with the problems dealt with by Amara Candra. Its main topics of detailed discussion and analysis, from the point of view of training and equipment of a poet are - छन्दस्, शब्द, अर्थ and श्लेष in Kāvya, while along with these some figures, place of metre in Kāvya, Kavisamaya, topics of description, Adbhuta etc. are discussed. One important feature of the sūtra work is that it lays down a rule or a thought or a doctrine, partially analyses it and illustrates it by suitable terse examples — all in verse. In a way we can say that even the sūtra work as it is, is specific in the purpose accepted.

Actually the present work fully justifies the other title कविशिक्षा which is less popular. It is natural that the poet, after he is blessed with the necessary प्रतिभा

must cultivate व्युत्पत्ति and अभ्यास as Mammata states ( ) and श्रुतं च बहुनिर्मलं and अमन्द अभियोग as Dandin lays down. ( ) Along with these two and even for the sublimation of the प्रतिभा of the poet, come the thorough grasp of the topics dealt with by Amara Candra, and this is the poet's training and equipment in his profession. Even though most of the best of our Ācāryas have not dealt in details with these problems, this part of criticism is also important[13]. It is mainly the credit of Jaina writers on poetics in general and Amara Candra Yati in particular, that this कविशिक्षा part of criticism developed.

काव्यकल्पलतावृत्ति

The whole Vṛtti is written by Amara Candra. He also knows it as काव्यकल्पलता and काव्यकल्पलताकविशिक्षा. When he states -

विमृश्य वाङ्मयं ज्योति-रमरेण यतीन्दुना ।

काव्यकल्पलताख्येयं कविशिक्षा प्रतन्यते ॥

In the second verse of the Vṛtti, he very humbly submits that he explains and analyses the Kārilās, so that this can guide poets to quick poetic composition —

व्याख्यास्यते त्वरितकाव्यकृतेऽत्र सूत्रम् ।

In the last stanzas of the Vṛtti and the colophon to 4.7, we have the following information about Amara Candra Yati.

(i) He belongs to Vāyada Gaccha and is a pupil of Śri Jinadatta Sūri.

(ii) He claims that the Vṛtti composed by him is approved by the learned.

(iii) He claims these titles for himself - श्वेताम्बरमौलिरत्न; श्रीवीरतीर्थंकरप्रहृवात्मा; महाकवि; पण्डित

The very first fact to be noted is that in the Vṛtti, explanations and analysis are not balanced.

Stabakas with no comments :

1.5 (79 Kārikās) and 2.2 (53 Kārikās)[14]

Stabakas with little comments

2.3 (104 Kārilās) - Here we get comments only on sūtras 173 and 174, while the other 102 Kārilās remain uncommented upon.

Stabakas with fairly long comments

2.4 (32 Kārilās). Here, the three word-powers are discussed mainly on the basis of the views of Mammaṭa and Hemacandra. Here also, only the first 8 Kārilās are commented upon, though elaborately.

3.4 (89 Kārilās). Here again, detailed comments are given only on 101, 102, 184, 187 and 188.

Stabakas with very elaborate comments

Stabakas 1.2; 1.3; 1.4; 2.1; 3.1 to 3.4; 4.1 to 4.7. In 4.5, Kārilās 164 to 248 have no Vṛtti.

The following other traits of the Vṛtti may be noted —

(1) Amara Candra writes the Vṛtti to give a fairly elaborate treatment in a critical and analytical manner, so that it can further elaborate and exemplify the discussion in the Kārilās and help us to understand them in the proper perspective.

(2) He cites so many rules and usages of grammar, metre, etc. to throw full light on the Kārilās.

(3) He gives so many more and elaborate illustrations, further to support the doctrines and discussion in the Sūtras.

(4) The Vṛtti is written also to reveal the fact that Amara Candra is शास्त्रपारग, a सर्वज्ञ in his treatment.

(5) The Vṛtti also proves that the author's thinking on the topic of training and equipment of a poet in constant and unending.

Some other traits of Amara Candra may be noted as under in his Vṛtti -

(6) In 2.3, Amara Candra gives very limited comments only on Kārilās 173 and 174 and has the following remark at the end.

एते शब्दाश्छन्दोऽभ्यासस्तबके शब्दभेदजशब्दविवरणात् ज्ञेयाः । He thus consciously tries to avoid repetition.

(7) His comments on 4.1 are fairly long and elaborate. But even with this he is not satisfied and therefore states at the end -

शेषानलङ्कारान् मत्कृतादलङ्कारप्रबोधादवबुद्धयाऽभ्यसेत् ।

This way also he avoids repetition and associates the present work with अलङ्कारप्रबोध and wants poets to study it. It is also proof of the fact that he has positively written this work on figures, but it is unfortunately lost.

'Parimala' Vṛtti

As we have noted earlier, this Vṛtti is available only upto a part of the seventh Stabaka. No available ms. goes further than this. But this commentary only on the 1/3rd of the work, is very wide, elaborate and detailed. Amara Candra adds so many things as follows :

(i) He adds detailed analytical comments on so many Kārilās that he did not touch upon earlier. Thus, in the Vṛtti on 1.5, his note in the Vṛtti is स्तबकोऽयं गतार्थः in the Vṛtti. But before adding this last remark, he has asked his readers and the aspiring poets to consult his 'Parimala' for his comments on this stabaka. Here, we have very elaborate comments on this stabaka. This fills up the vacuum in the Vṛtti. Similarly, he proceeds to write long comments on 2.2 on which his remark in the 'Vṛtti' is only this स्तबकोऽयं निगदसिद्धः

(ii) But, it seems that Amara Candra desires to give expression to all that he knew and grasped on the subject. That explains the elaborateness of the 'Parimala' Vṛtti. Here, he names his sub-sections as प्रसर and gives as many as 17 प्रसर to the first प्रतान, i.e., first five स्तबक of the work. Here also, he gives as many as six प्रसर to the second stabaka and as many as 7 प्रसर to the fifth.

(iii) Thus, in his 'Parimala', the author adds whatever he feels he has missed or omitted in his 'Vṛtti'. To take one example, he analyses with illustrations, these added metres - अष्टादशाक्षर, विंशत्यक्षर, द्वाविंशत्यक्षर to षड्विंशत्यक्षर He gives more elaborate details of आर्यवृत्त and अर्धसमं छन्दः and विषमछन्द all with suitable illustrations. He also takes up some मात्राछन्द as his command over metres goes from good to better to best.

(iv) He deals with many new points in his 'Parimala' Vṛtti on वर्ण्य स्तबक (1.5), and gives so many long and longer lists of different types of words and shows their usage in poetry.

(v) He gives a brief but scholarly summary of as many as 14 śāstras, touches upon the basic elements and doctrines of these and shows how a knowledge of these is essential to a poet.

(vi) He further exhibits his authentic knowledge of various śāstras, — grammar, word-power, metres and figures in particular. To cite an illustration, with the analysis of the word देव, the author refers in full details to the Gods in the Hindu pantheon as also to the Jaina Tirthankaras and so on. Again, while explaining the word रतं, the author describes in full details the various आसन, embraces etc., mutual approach of man and woman, and so on.[15]

The 'Parimala', with patient, extensive effort, thus acts as a further extension of the 'Vṛtti' and it is useful in many respects. The effort decisively proves the deeper thinking, analysis and grasp of the doctrines propounded and laid down. It is therefore really unfortunate that Amara Candra could give his 'Parimala' Vṛtti only on 1/3rd of the work.

Scholarship of Amara Candra

In the Kārilās, Vṛtti and Parimala, the following traits of Amara Candra's scholarship may be laid down :

(i) Amara Candra Yati has a thorough grasp over Sanskrit poetics upto his time and he knows very well what he should contribute. Again, he has read, fully grasped and thoroughly mastered, not only Jaina śāstras and works but also Hindu and Bauddha śāstras and works. That explains his brief but basic and subtle analysis of 14 śāstras in which even 'Nāṭya' and 'Kāma' are included. His understanding and grasp of these śāstras is full, deep, thorough, all-sided and all-pervasive.

(ii) His understanding of Indian culture, its traditions, mythology, history etc., is thorough and deep, minute and precise.

(iii) His concept of poetic taste is very high and his ideal poets are Kālidāsa etc., his inspirers are Vyāsa, Vālmīki etc.[16].

(iv) His expression is clear, smooth, flowing, effortless and never going irrelevant or astray. This is quite natural of a poet, scholar, philosopher and pundit that he is.

(v) He is a wonderful lexicographer. His mastery over word and sense, synonyms and homonyms, and all varied experiments that a poet can possibly make with word and meaning is unique.

(vi) His command over śleṣa in all its varieties found in poetry is also

unique.

(vii) Nowhere does he create the impression that he is a begotted sādhu of the Jaina order; he writes dispassionately as a scholar and that only.

(viii) By his constant thinking on and analysis of the same topic for years, he proves two facts : (a) there is no perfection in knowledge to be had, and, (b) with every new theory or step to knowledge, we come to derive greater and greater understanding and grasp of reality.

This scholarship of Amara Candra fully and ably supplements what was almost missing or dismissed as minor in Sanskrit poetics. It is happy that Amara Candra does not discuss, atleast in the present work, the vast conventional problems of poetry that scholars from Bharata down to Jagannatha take up. He is yet a poet of no mean order and accepts आस्वाद of काव्य leading to ब्रह्मानन्दसहोदर आनन्द as the ideal of poetic composition. If delight that stands equal to the Ānanda of परब्रह्मास्वाद is the aim of poetic composition, and if a poet is expected to scale the heights of the poetic greatness of Kālidāsa, Vyāsa and Vālmīki, it is natural that his equipment must be unique. This uniqueness of the poet's equipment, how he can train himself, what he should study, what depth of scholarship he should acquire — all this is revealed in this work with the two Vṛttis. Even the preliminary mastery over the śāstras, word and meaning, the vast realm of metres, the topics of descriptions, śleṣa, adbhuta and so on must in no way be of mean order. Even though the topics are partially discussed by Kṣemendra, Rājaśekhara, Vinaya Candra, Deves'vara, Keśava Miśra etc., no other work than the present one can claim to show almost a full and all-sided grasp of the topic of कविशिक्षा.

'Makaranda' Vṛtti of Śubhavijayagaṇi

Pundit Śubhavijayagaṇi, a famed scholar and writer of several valuable works, composed the Vṛtti known as 'Makaranda' on the काव्यकल्पलतावृत्ति of Amara Candra Yati. We get the following information about the author and his work from the mss. and from the eulogy at the end in his प्रश्नरत्नाकरः.

(i) Punḍitaśrī Śubhavijayagaṇi, a pupil of Āchāryaśri Hiravijayasūri, composed the present Vṛtti at the instance of Ācāryaśri Vijayadevasuri during a चातुर्मास.

(ii) The Vṛtti was composed in V. S. 1665[17] when Shri Vijayadevasūri was in चातुर्मास at Rājanagar (= modern Ahmedabad)[18].

(iii) Śri Śubhavijayagaṇi, a versatile genius, composed several works, the most important of which were -

(a) तर्कभाषावार्तिक; (b) स्याद्वादभाषासूत्र (c) वृत्ति on (b) (d) प्रश्नोत्तरमाला[18]

The author gives this information about his guru Śri Hiravijayasuri -

He had the capacity and respect to tender advice to King Akbar. He won the title जगद्गुरु from him. He rendered all beings fearless in a very short time[19]. He got the places of pilgrimage like Raivata, Śatrunjaya etc., made tax free.

The following features of his Vṛtti 'Makaranda' may be noted :

(i) While the author writes his Vṛtti on the काव्यकल्पलतावृत्ति as he has specified in his colophons, he comments on some sūtras and Vṛtti that 'Parimala' leaves untouched. Sometimes he gives his comments even to throw greater light on 'Vṛtti' and 'Parimala', detailed by Amara Candra.

(ii) He accepts 'Parimala' as a very scholarly and valuable Vṛtti and refers to it at some places in his own work. Mostly he accepts it as authentic and asks his readers to refer to it for full clarification. With these remarks, he mostly prefers not to repeat what 'Parimala' has added. His work thus acts also as a supplement to 'Parimala', but it is a supplement of no mean order.

(iii) Mostly he is very brief and perfectly to the point in his comments on the stabakas, the only exception being 3.1, on which he is very elaborate. Again, he gives no comments on योगार्हनामानि (2.2) and goes straight to अनुप्रासोपाय in 2.3. In his treatment of श्लेषसिद्धिप्रतान, he prefers to comment only on अङ्गभङ्गश्लेषव्युत्पादनप्रकार. Again, when he comes to सकलक्रियास्तबक (4.4), he just states that सुगमोऽस्तीति न व्याख्यातः and proceeds to 4.5, where his comments are only half a printed page.

(iv) He is thus a very balanced writer, knowing fully well, both the purpose of his work and the limits that he has set for himself. He is mostly to the point. He scrupulously follows the stabakas and the words of the Sūtras and 'Vṛtti', and he goes on adding his supplementary remarks.

(v) Some of his contribution is highly scholarly and original. To illustrate, his study and treatment of powers of words [शब्दशक्ति] is very much interesting, though based on the views of Mammaṭa and Hemacandra.

(vi) So are his lists of different types of words that a poet can use.

(vii) He expects poets to be well-versed in 18 śāstras instead of 14. He has added four śāstras expected to be studied by poets.

(viii) In his whole Vṛtti, he is mostly systematic and to the point, though in exceptional cases, which are very few, he makes an exhibition of his knowledge and scholarship.

(ix) His 'Yatīmimāṁsā' is very elaborate and highly scholarly. His discussion on the meaning of words gives further clarification and analysis. He therefore gives popular synonymous words from Apabhraṁśa and old Gujarati. He has further elaborated the different lists of words in 'Parimala' and has also given more words in a new way. He adds so many words to the different lists of 'Parimala'. Again, even though he too mainly follows Hemacandra and Mammata, his mimāṁsā of 'Lakṣaṇā' is more elaborate, more detailed and more subtle.

(x) On the whole, 'Makaranda' makes us more conscious about how wide, constant and deep the training of a poet should be, so that he goes nearest to the secret of poetic beauty and thoroughly grasps it. Again, his 'Rītimimāṁsā' and 'Arthotpatt:prakāraprapañca' stand out as his own original contribution.

Thus, Amara Candra's work with his two Vṛttis stands in better light with the scholastic though humble contribution of the 'Makaranda' of Paṇḍita Śubhavijayagaṇi.

काव्यशिक्षा and काव्यकल्पलताकविशिक्षा

A brief comparison of Amara Candra's work with the काव्यशिक्षा of Vinaya Candra Sūri[20] (13th century) will not be out of place in this Introduction because, after the work of Amara Candra, the work of Vinaya Candra is the most important. The work in six Paricchedas, is incomplete. The topics are betrayed by the titles as follows :

1st शिक्षा

2nd क्रिया

3rd लोककौशल

4th बीजव्यावर्णन

5th अनेकार्थशब्दसंग्रह

6th रसभावनिरूपण

If we take up some details of each Pariccheda, we find that they deal with the following topics—

1st - Definition of Kāvya, its purposes, काव्यशिक्षा and its benefits, वर्ण्यविषयः.

2nd - Different types of verbs together with their roots and meanings that a poet can use, in the different lists.

3rd - लोककौशल, संस्कृत and प्राकृत आभाणिकः - sayings, branches of knowledge, Anuprāsa, Upamā etc.

4th - बीजव्यावर्णन, रूपक, अतिशयोक्ति

5th - अनेकार्थः or homonyms and their lists from different points of view.

6th - Treatment of Rasa and Bhāva in the method of सूत्र, वृत्ति and उदाहरण.

It is clear that with the exception of the 6th Pariccheda, which is traditional in its content and treatment, others deal directly with training and equipment of a poet, not only the aspiring one, but also one who tries to improve his poetic faculty and to scale far higher heights as a poet. Dr. H. G. Shastri states :

"The study of poetics may make him proficient in the theoretical discourse on poetry, but these instructions could serve him directly in the practical procedure of poetic compositions. Hence the subject of Instructions to Poets in the composition of Poetry developed side by side with Poetics. In course of time the subject was styled कविशिक्षा or काव्यशिक्षा"[21].

With regard to the achievement of Vinaya Candra, he adds—

"On the whole, काव्यशिक्षा by Ācārya Vinayacandra seems to be a lucid and comprehensive treatise on the subject and would serve as a valuable manual to the aspiring poet for making literary compositions in prose as well as verse "[22].

If we were to compare the contents of the two works of Amara Candra and Vinaya Candra, the very first fact to be noted is that the purpose of both works is the same. Both claim to supply due guidance to an aspiring poet as also a poet in progress, with regard to his equipment to be, as also with regard to how he

can widen the sphere of his knowledge, get thorough training and make his effort at poetic composition fruitful. Again, when a poet accepts that he can improve upon his own work by revision, these works are all the more useful to him. Similar topics are those of metre, subjects to be described, lists of different types of words and so on. But the work of Amara Candra, especially with his 'Parimala', is far wider in scope, more detailed, more analytical, more exhaustive.[23] His lists of words have greater variety; they are more scientific, more detailed and are longer. His treatment of the powers of words, spheres of knowledge that a poet should conquer, Alankāras, Adbhuta etc., are his own contribution. The works differ in their methodology also. Amara Candra only casually deals with some conventional topics and writes hardly anything on Rasa. Dr. Shastri is therefore right when he states —

"काव्यशिक्षा by Ācārya Vinayacandra bears close proximity to कविशिक्षा by Amaracandrasūri in time and space, but the two works widely differ from each other in the selection, sequence and treatment of their topics. The former seems to have inherited the bearing of Bappa Bhatti and Ācārya Hemacandra through a different line of preceptors"[24].

It can safely and as a matter of fact, be accepted that Amara Candra's work is the widest, most scholarly and most important in the sphere of कविशिक्षा.

Kalpalatāviveka

A work with a similar title may here be referred to casually and in brief. It is 'Kalpalatāviveka' by an anonymous author. As the Preface to the published edition of the work tells us -

"This 'Viveka' is a super-commentary on the 'Pallava' which is a commentary on the 'Kalpalatā'. Though the author of the 'Kalpalatā' and 'Pallava' is certainly Ambāprasāda—the chief minister of Siddharāja Jaisiṁha (1094-1143 A. D.) of Patan, we are not in a position to say definitely as to who composed the 'Viveka'. It is really a misfortune that the first two works are lost to us"[25].

The lost works are, again, very near in time to the work of Amara Candra. Prof. Vora, in his learned Introduction to the publication[26], gives detailed evidences about the title of the work and its author. The conclusion is that the work, together with the Vṛtti are by the same author.

Here, however, we are concerned mainly with the contents of the work so

that we can compare the same with the contents of the work of Amara Candra. The very first fact to be noted is, that unlike the work of Amara Candra - Kavyakalpalatāvṛtti and Parimala - the 'Viveka' is traditional in its contents. In four Paricchedas, it deals with these topics - दोषदर्शनम्; गुणविवेचनम्; शब्दालङ्कारदर्शनम्; अर्थालङ्कारदर्शनम्. The main sub-titles in each are as follows :

दोषदर्शनम् – पददोषाः; वाक्यदोषाः; अर्थदोषाः; रसदोषाः

गुणविवेचनम् – श्रव्यत्वादिशब्दगुणः; अर्थगुणाः

शब्दालङ्कारदर्शनम् – पाठ्यगुणाः; ध्वनि; रसादिः; गुणीभूतव्यङ्ग्यः; चित्रकाव्य

अर्थालङ्काराः – औपम्य and उपमा; उपमादोषाः; अन्येऽलङ्काराः; रसनिष्पत्तिः

Prof. Vora's following remark is pertinent in the matter -

"It is interesting to note that the names of these chapters are all very significant. **Doṣas** or blemishes are to be pointed out so as to enable the aspiring poets to avoid them. **Guṇas** are to be critically discerned from the apparent qualities of Kāvya, which can be achieved by the mere avoidance of some **doṣas**. Figures of sound are to be actually paraded while the figures of sense offer a source of controversies as to their number, names, varieties etc., and therefore they are to be settled"[27].

But another interesting feature is that along with 3 and 4 in particular, Dhvani, Dhvani and other Kāvyas, Rasa, the 3 powers of word, views about Rasaniṣpatti etc., are also studied and discussed. The author has, at places, analysed and even criticised Vāmana and, on the whole he follows Mammaṭa and Ānandavardhana in his views; at places he follows Bhoja. His illustrations are exact and precise, his discussion in prose is, at places scholarly.

The writer has, however, not anything particular to state about the training and equipment of a poet that is the be all and end all of the work of Amara Candra. The three powers of word that Amara Candra takes up for discussion and the 3 śabdaśaktis that are discussed here, are very much similar, though the method and approach differ. The 'Viveka' gives great importance to Dhvani, not so Amara Candra. Similarly the figures of word and sense can be compared with the treatment of figures in 4.1 of the work of Amara Candra. But here also, the method and approach differ.

Actually it seems that the Jaina authors of those days have a fascination for

the title 'Kalpalatā'. Besides the काव्यकल्पलता of Amara Candra, we also have the कविकल्पलता of Vinayacandra Sūri, the कविकल्पलता of Devasena, the कल्पलता of Ambāprasāda, and the कल्पलताविवेक of our anonymous author, and so on. Incidentally we may also add that the work of Amara Candra is also known as कविशिक्षा and we also have one कविशिक्षा attributed to Jayamangalāchārya.

Thus, the similarity in name in our present context should not misguide us; the present work has only some similarity with the work of Amara Candra.

Kavikalpalatā of Deveśvara

One very old printed edition of the work of Deveśvara, the one that I have consulted, is the one edited by Rāmagopāla Kaviratna Bhaṭṭācārya and is published by him from Calcutta in 1900. De refers to this edition[28]. There is not a word about how Bhaṭṭācārya edited and what mss. he had made use of. The editor, following Deveśvara's own words in 1.1.2[29], states that the author is the son of Vāgbhaṭa and the Mahāmātya of Mālavādhīśa. De is right to remark that we do not know who this Mālavādhīśa is[30]. The editor gives no other information. He however writes rather eulogistically, when he states —

"If even novices were to (read through and) analyse the work, just with a little effort, poetic instinct will arise in them. What then to talk of scholars"[31]?

The work is in four stabakas and in 4, 5, 6 and 7 Kusumas respectively; the total Kusumas or Stabakas come to 22[32]. Each sub-section is given a suitable title, as follows :

First Stabaka - शब्दः

छन्दोऽभ्यासः; सामान्यशब्दः; वर्ण्यस्थितिः and अनुप्रासः

Second Stabaka - श्लेषः

उद्दिष्टवर्णनं; वर्ण्यवर्णनं; प्रकीर्णं; संख्या and रूढयौगिकमिश्राख्याः

Third Stabaka - कथा

राजदर्शनं; गङ्गास्तुतिः; भगवत्पादानुभाषणं; विप्रसम्भाषणं; तडागादिवर्णनं; and वादितर्जनम्

Fourth Stabaka - अर्थः

अर्थोत्पादनं; अद्भुतं; चित्रं; सादृश्यं; रूपकादिकं; समस्यापूरणोपायः and समस्या.

Now, as we know, Amaracandra's work is in four Pratānas of which the

title of two are similar to those in the work of Deveśvara :

काव्यकल्पलतावृत्ति	कविकल्पलता
२. शब्दप्रतानः	१. शब्दस्तबकः
४. अर्थप्रतानः	४. अर्थस्तबकः

Again, in the 22 Kusumas or sub-titles of Deveśvara, some ten are similar to those in Amara's work :

काव्यकल्पलतावृत्ति	कविकल्पलता
१.२ छन्दोऽभ्यासः	१.१
१.३ सामान्यशब्दाः	१.२
१.५ वर्ण्य-र्णस्थितिः	१.३
२.३ अनुप्रासाख्यः सः	१.४
३.३ उद्दिष्टवर्णनम्	२.१
४.२ वर्ण्योर्थोत्पत्तिः वर्ण्यवर्णन	२.२
४.५ प्रकीर्णकः-कम्	२.३
४.६ संख्याख्यः-ख्या	२.४
२.१ रूढयौगिकमिश्राख्यः श्राः	२.५
३.४ अद्भुतविधिः-तम्	४.२
३.५ चित्रप्रपञ्चः-चित्रम्	४.३
४.७ समस्याक्रमः-स्योः	४.७

Many Kārikās, illustrations or parts thereof in Amara are repeated, very often verbatim by Deveśvara. In some, a large number of these in Amara are repeated in Deveśvara. To illustrate —

From 4.7 of Amara, atleast 30 verses or parts thereof are repeated in 4-7 of Deveśvara.

From 1.5 of Amara, atleast 43 verses or parts thereof are repeated in 1.3 of Deveśvara.

In all others there are glaring repetitions though their number is small. This inspires De to state that —

"....it closely follows, in its treatment of subjects and general arrangement, Arisiṁha's and Amaracandra's work; and it is not difficult to show that he copies wholesale from the text of his predecessors. He borrows literally most of the rules

and definitions, and even repeats the illustrative stanzas"[33].

While conceding that De is partly right, it must be stated that the present author has his own noted contribution also in the 12 topics in which he does not borrow much from Amara. These parallel verses etc. prove that, in all probability, Deveśvara copied these verses from Amara, or, they both had a common source that has not come down to us. Be it as it may, Deveśvara definitely seems to know the work of Amara Candra and follows it, though certainly not blindly. This is proved by the separate topics and their fairly independent and scholarly treatment in the work; it reveals, partially atleast, the independent outlook of Deveśvara. In some verses again, he specifically refers to **Kavikarma** and it is here that he tries to become more clear than Amaracandra, though the latter is, in many respects, more scholarly, deeper and wider in his treatment both in 'Vṛtti' and in 'Parimala'. We have one more and an important proof of Amara preceding Deveśvara when he states —

यत्किञ्चिदथ न मया गदितं
ग्रन्थस्य गौरवत्रासात् ।
मत्कृतकविकल्पलतापरिमलतः
तद् बुधैर्ज्ञेयम् ॥

The remark is repeated by the author at the end of 4.6, showing that like Amara, he too composed a Vṛtti entitled 'Parimala'. The Bibl. states in a different reading that the author wrote a commentary चन्द्रकलाप by name[34]. The title परिमल following Amara is more probable.

Before we refer to his contribution and thought-content in the other topics, it would be proper to refer to (i) his general remarks about poetry and poets at the commencement of the work and 'the submission of the writer', (ii) his positive reference to the topics discussed, in most of the sub-topics, and, (iii) the eulogy of the work at the end. This will give to us Deveśvara's own idea about the value of the work. At the commencement he states —

(i) Poets, whose souls are shining forth with Pratibhā, no doubt compose poetry in their own way. Others, i. e., those who are clever in composing poetry are rare to come across.

(ii) However, the author proceeds on the very difficult path of guiding both these, by writing a work on the training and equipment of a poet.

(iii) In his task of writing a work, Deveśvara depends upon innumerable works of कविशिक्षा and poetic compositions of the best of poets.

Here, Deveśvara refers to his very difficult task and his own equipment when he writes this work. One very important fact is his acceptance of the very great importance of **Pratibhā** and at the same time, his acceptance that in rare cases, without **Pratibhā** also clever poetic composition is possible[35]. He claims to compose his work for the guidance and benefit of both. At several places in the work he begins by referring to the topic that he is discussing, unlike Amara Candra.

In his rather long summing up, Deveśvara makes the following important statements :

(iv) He has written the work, not through pride or with a desire to win fame, but simply to satisfy the genuine curiosity of those who desire to compose poetry and to scale higher and higher heights of success in their sphere.

(v) With the study of the work of Deveśvara, and the guidance that it gives, the speech and poetry of poets would definitely grow sweeter, more charming, more effective and greatly respected.

(vi) If poets use words and speech, potent and sweet like the milk of Kāmadhenu; words which are tinkling and musical and will certainly command respect in the assemblies of the learned by their nectar-like poetry.

(vii) Good poets should study कविकल्पलता for enriching their poetry in all respects. They should know fully well that everything except poetry is mortal and every good poet is expected to make conscious effort to scale the unique heights of immortality.

Let us now turn to the other topics which are not glaringly under the influence of Amara Candra and examine Deveśvara's contribution to the subject.

As we proceed with 2.3 (प्रकीर्णम्), where some verses are common to those in Amara, the treatment is systematic and to the point and deals with some six topics in which illustrative variants of descriptions are given. It throws light on the wide scope that a poet would have in his descriptions and it hints at the extreme variety of things to be described. Here also, he gives fine illustrative samples of descriptions in the latter half with the examples of पादाग्रादि, देहवर्णनं, उपमा, वनवर्णनं etc.

It seems that शुभविजयगणि the author of मकरन्द on Amara Candra's work has taken some inspiration from Deveśvara.

In 2.4, संख्या, the illustrative treatment is a little too brief, though it is well-planned, effective and to the point.

The third, कथास्तबक with its six Kusumas, lays down practical model illustrations of the description of six different topics on which a poet can write. These topics, राजदर्शनं, गङ्गास्तुतिः, भगवत्पादानुभाषणं, विप्रसम्भाषणं, तडागादिवर्णनं, and वादितर्जनं give excellent guidance to the poets on what and how to write. Even the two types of Kathā mentioned in the beginning वीतरागकथा and विजिगीषुकथा and the details that follow are very much interesting indeed. The topics of गङ्गास्तुति etc., are also nicely dealt with, and they give so many possible options of addresses and traits of गङ्गा etc., that a poet can possibly make use of even, in his own composition. This whole topic can be adjudged as the best in the work and a fairly remarkable contribution of Deveśvara to the problem of कविशिक्षा. We may also stress again that many Kārilās and of course illustrations that Deveśvara seems to take from Amara Candra, probably come from a common source made use of by both.

Footnotes :

1. Might be the same as 'Vṛtti'.
2. Details are given in the pages that follow.
3. Published by 'Chowkhamba Sanskrit Series', Benaras - 1931.
4. Detailed description of mss. used follows.
5. Ed. by Dr. H. G. Shastri and published by L. D. Bharatiya Prāchya Vidyā Mandir, Ahmedabad 9. Vide also a comparison with this work given later.
6. It may be noted that the value of this type of criticism is now being recognised in the west as will be proved by some works of known authors.
7. 'Sanskrit Poetics', Vol. 2, p. 283.
8. 'Sanskrit Poetics', Vol. 2, p. 285.
9. Others works attributed to Āsaḍa are उपदेशकन्दली; आह्वानप्रकरण; मेघदूतटीका 'सरसा'.
10. Vide : किञ्चिदरिसिंहकविकृतं किञ्चिदात्मकृतं च सूत्रं मयाऽमरेण व्याख्यानपद्धतिमानयिष्यते ।
11. A similar example may be stated to be that of Vāmana, who composed first the

काव्यालङ्कारसूत्राणि and then added the Vṛtti and now the whole work available is काव्यालङ्कारसूत्रवृत्ति.

12. He refers to 'Parimala' in all respect.

13. Actually Mammaṭa and his predecessor Daṇḍin take प्रतिभा, व्युत्पत्ति and अभ्यास as one cause of Kāvya and Mammaṭa gives a long list of what a poet should study.

14. The Vṛtti has this note on Stabaka 2.2 - स्तबकोऽयं निगदसिद्धः and on 1.5 the note is स्तबकोऽयं गतार्थः ।

15. Surprisingly a yati deals with this topic too and in overdrawn details !

16. Vide verse at the end of the 'Vṛtti' —

    काव्यमेव परब्रह्मास्वादसोदरशर्मदम् ।
    आलोकं पालयामास कालिदासकवेर्यशः ॥
    वाल्मीकिव्यासयोर्विश्वे विश्वदिङ्गमूलकूलगा ।
    कल्पान्तोल्लङ्घिनी कीर्तिः काव्यादेव विजृम्भते ॥

17. रसरसरसशशलक्ष्मप्रमिते श्रीविक्रमाद्वर्षे ।

18. श्री हीरविजयसूरीश्वरपट्टालङ्कारहारभट्टारकश्रीविजयसेनसूरीशप्रसादीकृतप्रश्नोत्तरसंग्रहे तत्पट्टपूर्वशिखरिशिखरसहस्रकिरणायमान–आचार्यविजयदेवसूरीणामनुशिष्याभट्टारकश्रीहीरविजयसूरीप्रशिष्य-तर्कभाषावार्तिक (१), काव्यकल्पलतामकरन्द (२), स्याद्वादभाषासूत्र (३), तद्वृत्ति (४), काव्यकल्पलतावृत्त्यादिग्रन्थनिष्पादकपण्डितशुभविजयगणिसंग्रहीते प्रश्नोत्तररत्नाकरापरनाम्नि श्रावककृतप्रश्नाख्यश्चतुर्थोल्लासः ।

    (Eulogy on folio 180. MS. No. 481 of the Dāyarā Bhandâr, Palanpur)

19. Vide colophon of ms. No. 12958 from Patan.

20. Edited by Dr. H. G. Shastri and published by L. D. Institute of Indology, Ahmedabad, 1964.

21. Vide, work edited by him, p. 16 Intro.

22. Vide, work edited by him, p. 20 Intro.

23. For comparison, vide Introduction. p. 12-13.

24. Vide Intro. to the work.

25. Kalpalatāviveka - Ed. Murari Lal Nagar and Harishanker Shastri; Intro. by Prof. P. R. Vora, Published by L. D. Institute of Indology, Ahmedabad-1968.

26. Preface, p. i

27. Vide Preface.

28. Vide, 'Sanskrit Poetics', Vol. 1, p. 260.

29. मालवेन्द्रमहामात्यः श्रीमद्वाग्भटनन्दनः ।
देवेश्वरः प्रतनुते कविकल्पलतामिमाम् ॥

30. Vide, 'Sanskrit Poetics', Vol. 1, p. 260.

31. Vide in विज्ञापनम्-
आलोच्यैतामल्पेनाप्यायासेन मुग्धानामपि कवित्वं जायते का कथा पण्डितानाम् ।

32. Vide Deveśvara
शब्दश्लेषकथार्थाख्याश्चत्वारः स्तबका इह ।
ते चतुःपञ्चषट्सप्तकुसुमैरन्विताः क्रमात् ॥

33. 'Sanskrit Poetics', Vol. 1, p. 259

34. मत्कृतचन्द्रकलापेऽमलमतिभिस्तद्बुधैर्ज्ञेयम् ।

35. Also vide काव्यादर्श 1.104

श्रीमदरिसिंहनिर्मित-सूत्रसहिता

श्रीमदमरचन्द्रविरचिता

काव्यकल्पलतावृत्तिः

॥ श्री ॥

श्रीमदरिसिंहनिर्मित सूत्र सहिता

श्रीमदमरचन्द्रविरचिता

काव्यकल्पलतावृत्तिः

विमृश्य वाङ्मयं ज्योतिरमरेण यतीन्दुना । काव्यकल्पलताख्येयं कविशिक्षा प्रतन्यते ॥१॥

सारस्वतामृतमहार्णवपूर्णिमेन्दोर्मत्वाऽरिसिंहसुकवेः कवितारहस्यम् ।
किञ्चिच्च तद्रचितमात्मकृतं च किञ्चिद्व्याख्यास्यते त्वरितकाव्यकृतेऽत्र सूत्रम् ॥२॥

शास्त्रारम्भे शास्त्रकारः समुचितेष्टदेवतानमस्कारपूर्वं शास्त्रस्याख्यां प्रेक्षावत्प्रवृत्त्यङ्गप्रयोजनयुक्तमभिधेयं चाह—

वाचं नत्वा महानन्दकरसत्काव्यसम्पदे ।

अथ मकरन्द टीका

।।६०।। श्रीहीरविजयसूरिगुरुभ्यो नमः ।।

श्रीमद्घोषवतीविभूषितकरां श्रीशारदां सारदां ध्यात्वा श्रीगुरुहीरसूरिचरणाम्भोजन्मसेवाफलम् ।
प्राप्य श्रीविजयादिदेवसुगुरोर्निर्देशतस्तन्यते बोधार्यं खलु काव्यकल्पलतिकावृत्तेर्विशेषः कियान् ।।१।।

इह हि ग्रन्थारम्भे सकलमतसम्मततया निखिलविघ्नविघातकत्वेन च शास्त्रसमाप्त्यर्थं वाङ्मयज्योतिःस्मरणरूप-मङ्गलाचरणपूर्वकं ग्रन्थप्रस्तावनामाह––

विमृश्येति[1] । अमरनाम्ना कविना काव्यकल्पलतानाम्नी इदमः (हे. व्या-२.१-३४) प्रत्यक्षगते इतिवचनादियं प्रत्यक्षा कविशिक्षा प्रतन्यते विस्तारं नीयते, वृत्त्या विस्तार्यत इत्यर्थः । अन्याऽपि या कल्पलता भवति साऽप्यमरेण देवेन वृद्धिं नीयते सुपर्वपर्वतपृथिवीप्ररोहणशीलतया तदायत्तत्वादिति क्रियासण्टङ्कः । अत्राऽन्यकविशिक्षाशास्त्रेभ्यः सद्यः काव्यकरणशक्तिफललक्षणो विशेषः काव्यकल्पलतेति नाम्नैव सूचित इति । अमरेण कथम्भूतेन ? यतीन्दुना इन्दुरिवा-ह्लादकत्वादिन्दुर्यतीनां यतिनां वा मध्ये इन्दुर्यतीन्दुस्तेन । यतैङ् प्रयत्ने, यत् यतते इति यतिः, पदि पठीत्यादिना इः इन वा । यन्नाश्रयणं हि काव्यकरणकारणमिन्दुरपि पीयूषमरीचिचयसेवनेन[2] लतोपचयनिबन्धनमिति सूचितम् अथवाऽनेनाऽऽत्मनः सुविहितत्वमसूचितं तु स्वोत्कर्षः । किं कृत्वा ? विमृश्य निःशेषविशेषोल्लेखितया परामृश्य, ध्यात्वा, स्मृत्वेति यावत् । किं कर्मतापन्नं ? ज्योतिः । वाङ्मयं ? शास्त्ररूपमित्यर्थः ।।१।।

पूर्वश्लोकार्थमेव सविस्तरमुपदर्शयन्नाह––

सारस्वतेति । सरस्वत्या इदं सारस्वतं शास्त्रं तस्यास्तदधिष्ठायकत्वात्तद्रूपो योऽमृतमहार्णवः सुधासमु-द्रस्तत्र । पूर्णिमेन्दोः पूर्णिमाचन्द्रसमानात् । अरिसिंहश्चासौ सुकविश्चारिसिंहसुकविस्तस्मात् । कवेः कर्म कविता, तस्या रहस्यं तात्पर्यं ज्ञात्वा । किञ्चिदरिसिंहकविकृतं किञ्चिदात्मकृतं च सूत्रं मयाऽमरेण व्याख्यानपद्धतिमानयिष्यते । कस्यै ? त्वरितकाव्यकृते, करणं कृत् क्विप्, काव्यानां कृत् काव्यकृत्; त्वरिता चासौ काव्यकृच्च सा तथा, तस्यै ।

यद्वा कृते इत्यव्ययमपि भवतीति २ समुचितेति । इह कविसमये त्रिविधाः देवताः-समुचिता १ इष्टा २ समुचितेष्टा च ३ । क्वचित्समुचितायाः देवतायाः ३ स्तुतिर्यथा नीतिकामशास्त्राद्यारम्भे महीपतिमन्मथादेः १ । क्वचिदिष्टदेवतायाः स्तुतिर्यथा रघुवंशमहाकाव्याद्यारम्भे महेश्वरादेः २ । तयोरुदाहरणानि तद्ग्रन्थतो ज्ञेयानि । क्वचित्समुचितेष्टदेवतायाः स्तुतिः । सा पुनरत्रैव ज्ञेया । तथाहि––यत् किल काव्यलक्षणं वस्तुप्रस्तुतं तदधिदैवतरूपा भारतीति समुचिता, समस्तमतसम्मतत्वादिष्टाऽपि च । तद्युक्तमुक्तमत्र समुचितेष्टदेवतायाः स्तुतिरिति ।

कविशिक्षामिमां वच्मि काव्यकल्पलताह्वयाम् ।। १ ।।

वाचं नत्वेति श्रेयोहेतुः, श्रेयसोह्यविघ्नेन शास्त्रसमाप्तिर्भवति । महानन्दकरं यत्सत्काव्यं तस्य या सम्पद्वृद्धिस्त-दर्थम् । सद्यो रसास्वादजन्मा विगलितवेद्यान्तरा परब्रह्मास्वादसोदरा परमप्रीतिर्महानन्दः । इदं सर्वप्रयोजनोपनिषद्भूतं कविसहृदययोः काव्यप्रयोजनम् । कल्पलताऽपि सङ्कल्पमात्रलभ्यत्वेन महानन्दकरी, सत्काव्या सद्भिर्वर्ण्या या सम्पत् तदर्थं स्यात् । महानन्दः प्रयोजनं, तद्युक्तं सत्काव्यमभिधेयं, शास्त्रमभिधायकं, तयोरभिधानाभिधेयलक्षणः सम्बन्धः । शेषं सुगमम् ।

---

१. 'चरणाम्भोजन्मसेवाफलं' वस्तुतस्तु 'चरणाम्भोजजन्मसेवाफलं' भवितुमर्हति, किन्तु तन्न छन्दसि समीचीनम् ।
२. सेचनेन–ला. म. २

शास्त्रसङ्ग्रहमाह—

चत्वारोऽत्र च्छन्दःशब्दश्लेषार्थसिद्धिनामानः ।
क्रमशस्तताः प्रतानाः पञ्चचतुःपञ्चसप्तभिः स्तबकैः ।। २ ।।

सिद्धिशब्दः प्रत्येकं योज्यः । स्तबकसंख्या यथासंख्यम् । अत्र काव्यकल्पलतायां छन्दःसिद्धिप्रतानः पञ्चभिः स्तबकैः, शब्दसिद्धिप्रतानश्चतुर्भिः स्तबकैः, श्लेषसिद्धिप्रतानः पञ्चभिः स्तबकैः, अर्थसिद्धिप्रतानः सप्तभिः स्तबकैः, इत्येते तता विस्तीर्णाः । लताधर्मत्वात्प्रतानस्तबकारोपः ।

क्रमेण स्तबकानां नामान्याह—

अनुष्टुप्शासनं छन्दोऽभ्यासः सामान्यशब्दकः ।
वादो वर्ण्यस्थितिः पूर्वप्रताने स्तबकाः मताः ।। ३ ।।

रूढयौगिकमिश्राख्या यौगिकाह्वानमालिका ।
अनुप्रासो लाक्षणिको द्वितीये स्तबकाः स्मृताः ।। ४ ।।

श्लेषव्युत्पादनं सर्ववर्णनोद्दिष्टवर्णने ।
अद्भुतं चित्रमित्येते तृतीये स्तबकाः कृताः ।। ५ ।।

तुर्ये पुनरलङ्काराभ्यासवर्णाकृतिक्रियाः ।
प्रकीर्णकाभिधः संख्यासमस्ये स्तबकाः स्थिताः ।। ६ ।।

म. टी. सद्यो रसेति-सद्यः शीघ्रं, यो रसोऽर्थात्काव्यरसस्तस्य य आस्वादस्तस्मादुत्पत्तिर्जन्म यस्याः सा । तथा काव्यरसज्ञानानन्तरं त्वरितमेवोत्पत्तेरित्यर्थः ।

विगलितेति । एकस्माद् वेद्यादन्यद् वेद्यं वेद्यान्तरं, विगलितं गतं वेद्यान्तरं यस्याः सा तथा । यस्यां प्रीतौ सत्यां किमप्यन्यन्न वेद्यते किं तु सैवैका धारावाहितया वेद्यते इति भावार्थः ।

परब्रह्मेति । परब्रह्म मोक्षस्तस्य य आस्वादस्तत्सुखानुभवनं तस्य सोदरा तत्समानेत्यर्थः । एवंविधा परमा प्रकृष्टा प्रीतिर्महानन्द उच्यते ।

इदमिति । इदं महानन्दरूपं काव्यस्य प्रयोजनं कविसहृदययोः कर्तृश्रोत्रोः सर्वेषां प्रयोजनानां मध्ये सारभूतमिति निर्गलितार्थः ।

सत्काव्येति । कदृङ् वर्णे वर्ण्यते इति ध्यणिका व्यावर्ण्या, सद्भिः काव्या सत्काव्या । तता इति वक्ष्यमाणसंकैः स्तबकैः क्रमशो विस्तीर्णाः । अथ स्तबकनामान्याह—अनुष्टुप्रशासनमित्यादिकार्यकारणयोर भेदोपचारादनुष्टुप्शासनहेतुः । स्तबकोऽप्यनुष्टुप्रशासनं छन्दोऽभ्यासहेतुः । स्तबकोऽपि छन्दोभ्यास, इत्यनया दिशा सर्वत्र स्तबकनामानि ज्ञेयानि ।

रूढयौगिकेति । रूढयौगिकमिश्राणामाख्यानमाख्या, तद्धेतुः स्तबकोऽपि । रूढयौगिकमिश्राख्यायौगिकानि च तान्याह्वानानि नामानि च । तेषां मालिका यौगिकाह्वानमालिका । यौगिकनाममाला; लाक्षणिको लक्षणाविचारयुक्तः । तुर्येति—अलंकाराभ्यासस्तबकः १, वर्णस्तबकः २, आकृतिराकारस्तबकः ३, क्रिया ४, प्रकीर्णक ५, संख्या ६, समस्यालक्षणाः स्तबका इति । इति शास्त्रसङ्ग्रहः ।

का. क. काव्यस्य छन्दोमूलत्वात् प्रथमं छन्दःसिद्धिप्रतानः । तत्र पूर्वमनुष्टुपशासनं यथा—

आदौ साध्यपदं स्थाप्यं

आदौ प्रथमं साध्यमवश्यप्रयोज्यं पदं कार्यम् । एकाक्षरादीनि साध्यपदानि यथा—श्रीः, लक्ष्मी; कमला, जलधिजा, दुग्धाब्धिपुत्री, दुग्धाब्धितनया, दुग्धाम्भोनिधिपुत्री, दुग्धाम्भोनिधिसम्भूता ।

एकादिद्विलघु द्वयात् ।

एको ह्रस्वो दीर्घो वा वर्ण आदौ यथोस्तौ एकादी, द्वौ लघू यत्र पदे तदेकादिद्विलघुपदं, जलधिजा-वारिधिजादि द्वयाद्वर्णद्वयात् स्थाप्यम् । यथा—असौ जलधिजा देवी, इयं वारिधिजा देवी ।

ह्रस्वादिद्विलघुपदस्यादौ लघू गुरुलघू च न प्रयोज्यौ यथा–इह जलधिजा देवी, अत्र जलधिजा देवी ।

पञ्चाक्षरं समासे के विभक्तिभ्रंशिनि स्वरे ।। ७ ।।

पञ्चाक्षरं पदं कुमारपाल-क्षीराब्धिपुत्रीप्रभृति समासेन केन वा विभक्तिभ्रंशहेतुना पुरःस्थस्वरेण वा स्थाप्यम् । यथा–कुमारपालभूपालः, क्षीराब्धिपुत्रिका सेयं, कुमारपालको राजा, कुमारपाल उल्लासी ।

स्याच्चतुःपञ्चषड्ह्रस्वं प्रान्ते विषमपादयोः ।

चतुर्ह्रस्वाक्षरं पदं दशरथादिकं, पञ्चह्रस्वाक्षरं पदं कमलवनादिकं, षड्ह्रस्वाक्षरं पदं समवसरणादिकं, प्रथमतृतीय-पादयोः प्रान्ते चतुस्त्रिद्विवर्णेभ्यः प्रायः सर्वगुरुभ्यो निश्चितान्तगुरुभ्यो वा परतः प्रयोज्यम् । यथा पृथ्वीनाथो दशरथः, अथवा-तदा नृपो दशरथः । विस्मेरं कमलवनं, रम्यं समवसरणम् ।

शेषं विशेषणैः पूर्णं

शेषं काव्यं विशेषणैः पूर्णं क्रियते ।

तूर्णं काव्यप्रदं पदम् ।। ८ ।।

इत्युक्तप्रकारेण प्रयुज्यमानं पदं शीघ्रं काव्यप्रदं भवति । अनुष्टुभि प्रायः पथ्यावक्त्रेणाभ्यासः क्रियते ।

अनुष्टुभि सनौ नाद्यात् तुर्यात्स्याद्योऽक्षराद्वक्त्रम् ।
पथ्यावक्त्रं भवेत्तुर्याद्वर्णाज्जे युग्मपादयोः ।। ९ ।।
ओजे तुर्यान्नतभरमसैर्नविपुलादयः ।
आस्वोजे प्रायस्तुर्या गुर्युजि षड्भ्यो लघुध्रुवम् ।।१०।।
वर्णमात्राभिधं त्वेधा छन्दः पद्यं चतुष्पदी ।
मयौ रसौ तजौ भ्नौस्युरष्टौ वर्णगणास्त्रिकाः ।।११।।

म. टी. प्रथमेति । प्रथम-तृतीयपादयोः प्रान्ते चतुर्ह्रस्वाक्षरं पदं चतुर्वर्णेभ्यः परतः प्रयोज्यम् । कथम्भूतेभ्यः ? प्रायः सर्वगुरुभ्यः । प्रायोग्रहणान्निश्चितांतगुरुभ्यो वा । एवं पञ्चह्रस्वाक्षरं पदं सर्वगुरुभ्यो निश्चितांतगुरु भ्यो वा त्रिवर्णेभ्यः । तथैव षट्ह्रस्वाक्षरं पदं द्विवर्णाभ्यामिति ।

का. क. अनुष्टुभीति—अनष्टुभि अष्टाक्षरायां जातौ यत्राद्यात्प्रथमाक्षरात् परतः सगणनगणौ न स्यातामन्ये तु षड्गणा यथेष्टं भवन्ति; तुर्याच्चतुर्थाक्षरात् परतो यगणो भवति । तच्छन्दो वक्त्रमाख्यातम् । उदाहरणं यथा—

तस्यास्त्रस्तकुरङ्गाक्ष्या वक्त्रेण त्वं पराभूतः ।
हिमांशोः क्षीयसे युक्तं लज्जसे तु न किं वृद्धया ॥१॥

इत्येवमन्यदप्युदाहार्यम् ।

तथा युग्मपादयोर्द्वितीयचतुर्थपादयोस्तुर्याक्षरात् परतो जगणेन पथ्यावक्त्रं भवति । उदाहरणं यथा—

आलानितगजस्कन्धघृष्टाः पथ्यायतद्रुमाः ।
अद्यापि कथयन्त्येते राजेन्द्र तव दिग्जयम् ॥२॥

इत्यादि ध्येयम् ।

ओजे इत्यादि—विषमे पादे तुर्याक्षरात् परतो यगणजगणवर्जं नगणादिभिः षड्गणैर्नविपुलादयः षड्भेदाः भवन्ति । तथाहि-नविपुला १, तविपुला २, भविपुला ३, रविपुला ४, मविपुला ५, सविपुला ६ च । तुर्याद् यगणेन पथ्या वक्त्रं, जगणस्तु समपादयोरेव भवति । आसु नविपुलाद्यासु विषमपादे बन्धदार्ढ्याय प्रायस्तुर्यो गुरुः क्रियते ।तथा चाहु : श्री हेमचन्द्रसूरयः छन्दश्चूडामणौ—'सर्वासां विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवति' इत्याम्नाय इति । समपादयोः षड्वर्णेभ्यः परतो ध्रुवं निश्चितं लघुः क्रियते, लक्ष्म्या स्वेतदिति । एता नविपुलाद्या जातिपक्षे व्यक्तिपक्षे च स्युः । ततो जातिपक्षे आसु नविपुलाद्यासु । एतत्पूर्वोक्तं लक्ष्म लक्षणं द्वयोरप्योजयोः प्रथमतृतीयपादयोः स्यात् । व्यक्तिपक्षे त्वेकस्मिन्नेव प्रथमेऽथवैकस्मिन्नेव तृतीये । एतन्नविपुलादिलक्षणं भवति समे पथ्या । वक्त्रलक्षणं भवतीत्यत्र नविपुला । जातिपक्षे यथा—

पश्यन्ति देव चरणद्वन्द्वं ये तव भक्तितः ।
तेषां भवन्ति विपुलाः सद्यः कल्याणसम्पदः ॥१॥

व्यक्तिपक्षे यथा—

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ॥२॥

तव मन्त्रकृतो मन्त्रैर्दूरात् संयमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्षभिदः शराः ॥३॥

एवं सर्वासामप्युदाहरणावलिः काव्यकल्पलतापरिमलाद् ज्ञेयेति तथा ।आसां विपुलानां संकरोऽपि यथा—

का. क.

मस्त्रिगुरुर्यो मुखलो मध्यलघू रस्तथान्तगुरुभाक् सः ।
तोऽन्तलघुर्जो मध्यगुरादिगुरुर्भश्च नस्त्रिलघुः ॥१२॥

नाम्ना दतचपषा द्वित्रिचतुष्पञ्चषट्कलाः ।
मात्रागणाः स्युर्भेदैस्त्रिपञ्चाष्टत्रयोदशैः ॥१३॥

पूर्वं सर्वगुरोः पादालघुराद्यगुरोरधः ।
अग्र्यं तूपरिवद् भूयो लघुराद्यगुरोरधः ॥१४॥

म.टी. क्वचित्काले प्रसरता क्वचिदापत्यनिघ्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम् ॥१॥ इत्यादि ।

वर्णमात्रेति । छन्दो द्विभेदं वर्णछन्दो मात्राछन्दश्च । पद्यं चतुःपदी इति द्वावपि छन्दःपर्यायौ । छन्दोव्यतिरिक्तं गद्यम् । मर्याविति मन्दारं १, यकारं २, राजिरा ३, सहितं ४, तीर्थेश ५, जयन्त ६, भावत ७, नयन ८, लक्षणा अष्टौ गणाः त्रिकाः । त्रिका इति—त्र्यवयवा, यद्वा त्रयः प्रमाणमेषां ते । मानमिति सूत्रेण के त्रिका संक्षेपार्थः । एतेषां स्वरूपमाह—मस्त्रि गुरुरित्यादि । एतस्यैव विवरणं यथा—

पूर्वं सर्वगुरुः पादो लघुराद्यगुरोरधः ।
अग्र्यं तूपरिवद्भूयो लघुराद्यगुरोरधः ॥१॥ (का. १-१४)
आदौ स्युर्गुरवो यावत्पादः सर्वलघुर्भवेत् ।
प्रस्तारः कथितो वर्णच्छन्दसामिति कोविदैः ॥२॥ (का. १-१५)

अस्य व्याख्या । सर्वे गुरवो यस्मिन्नसौ सर्वगुरुः, पादः पूर्वं स्थाप्यते, तदनु आद्यगुरोरधः लघुः स्थाप्यते, अग्रेतनः पाद उपरितनवत् स्थाप्यते । ऊने गुरुं दद्यादित्यध्याहार्यम् । एवं भूयो भूयः क्रियते यावदादौ गुरवः, प्रान्ते सर्वे लघवश्च स्युरिति स्थापना । यथा---

ऽ ऽ ऽ ऽ — — — —
ऽ ऽ — — ऽ ऽ — —
ऽ — ऽ — ऽ — ऽ —

नाम्नेति--नाम्ना अभिधानेन, दतचपथा द्वित्रिचतुष्पञ्चषट्कलायुक्ताः पञ्चमात्रागणाः प्रत्येकं द्वित्रिपञ्चाष्टत्रयोदश-भेदभाजश्च स्युःतथाहि---द्विकलोदनामा द्विभेदो यथा श्री १, रिह २ । त्रिकलः तनामा त्रिभेदो यथा--जिनो १ भाति २ जयति ३ । चतुष्कलः च नामा । पञ्चभेदो यथा--वीरान् १ वसुधा २ प्रशस्ति ३ भूध्रव ४ घृतनस ५ पञ्चकलः ५ नाम । अष्टभेदो यथा---प्रकामं १ क्ष्मापते २ विजयसे ३ युद्धेषु ४ विपुलेषु ५ कुलोत्तम ६ सारतम ७ सकलकल ८ षट्कलः ९ नामा । त्रयोदशभेदो यथा--त्वद्वांछा १ विधुवक्त्रा २ सुलोचना ३ प्रोच्चकुचा ४ घनजघना ५ अप्सराकार ६ सौर्यसार ७ नयसमुद्र ८ धैर्याश्रय ९ दृढविक्रम १० कलासदन ११ संकलयति १२ विनयनिलय १३ इति ।

स्थापना यथा---

दगण	S	२
मात्रा	II	
त	IS	
ग		
ण	SI	३
मात्रा	III	
च	SS	
ग	IIS	
ण	ISI	५
मा	SII	
त्रा	IIII	
प	ISS	
ग	SIS	
ण	IIIS	८
मा	SSI	
त्रा	IISI	
	ISII	
	SIII	
	III	

	SSS	
	IISS	
	ISIS	
ष	SIIS	
ग	IIIIS	
ण	ISSI	
मा	SISI	
त्रा	IIISI	
	SSII	
	IISII	
	ISIII	
	SIIII	
	IIIIII	१३

आदौ स्युर्गुरवो यावत् पादः सर्वलघुर्भवेत् ।
प्रस्तारः कथितो वर्णच्छन्दसामिति कोविदैः ॥१५॥

आद्याद्गुरोरधो ह्रस्वमग्र्यं तूपरिवल्लिखेत् ।
आदौ लघुं गुरुं तूनें मात्राजातिषु सम्भवेत् ॥१६॥

एकमात्र ऋजुर्ह्रस्वो लघुर्ज्ञेयो गुरुः पुनः ।
वक्रो दीर्घो विसर्गान्तः सानुस्वारो द्विमात्रकः ॥१७॥

अह्लादिसंयुते वर्णे व्यञ्जने चाग्रगे लगुरुः ।
पादान्ते वा लघोर्गत्वं वंशस्थादिषु नो पुनः ॥१८॥

अह्लादिर्यथा--

तव ह्रियाऽपह्रियो मम ह्रीरभूच्छशिग्रहेऽपि व्रतं न धृता ततः ।
बहुलभ्रामरमेचकतामसं मम प्रिये क्व समेष्यति तत्पुनः ॥

तीव्रप्रयत्नोच्चारेण ह्रादावपि लघुर्गुरुः ।
बर्हभारेषु केशान्वा सुप्तमीन इव ह्रदः ॥१९॥

विशेषणोपायमाह--

विशिष्टोऽर्थो वर्णाकाराधाराधेयक्रियादिभिः ।

वर्ण्यः पदार्थो वर्णेन, आकारेण, आधारेण, आधेयेन, क्रियया; आदिशब्दात् परिवारादिभिः सविशेषणः क्रियते ।

यथा--

पूर्णिमेन्दुः सितच्छायः सद्वृत्तोऽम्बरभूषणम् ।
कलाकलापकलितो नयनानन्दनो बभौ ॥

तथा तुल्यश्रिया चारुर्बन्धुश्चौरो रिपुः सुहृत् ॥२०॥

तथा वर्ण्योऽर्थो वर्णादिभिस्तुल्यानां शोभया चारुर्बन्धुर्वा चौरो वा शत्रुर्वा मित्रं वा भणनीयः । यथा--

भवधशोभरो भाति स्मेरकुन्देन्दुसुन्दरः ।
हरतारकमन्दारकैलासोदरसोदरः ॥

कर्पूरपूररुक् चौरः शरदभ्रप्रभारिपुः ।
ऐरावततुषाराद्रिशेषमित्रं क्षमापते ॥

पुनर्विशेषणोपायमाह--

गुणात् श्रिया युतभ्राजिरोचिष्णुद्योतितादयः ।

म. टी. स्थापनाप्रकारश्लोकश्चायम्--

आद्याद् गुरोरधो ह्रस्वमग्र्यं तूपरिवल्लिखेत् ।
आदौ गुरुं लघुं तूनें मात्राजातिषु सम्भवात् ॥१॥ (सू. १-१६)

व्याख्या । आद्यात् प्रथमपंक्तिगतप्राथमिकगुरोर्वक्ररेखारूपादधो द्वितीयादिपंक्तिषु ह्रस्वं ऋजुरेखारूपं लिखेत् ।

अग्र' तूपरिवदिति–अग्रेतनमुपरितनपंक्तिवद् द्वितीयादिपंक्तिषु लिखेत् । तथाऽपि कृते यत्र द्वितीयादिपंक्तिष्वेक-मात्रावशिष्यमाणा स्यात् तत्र 'लघुं तूने' इतिवचनात् ह्रस्वादिपृष्ठे ह्रस्वं लिखेत् । यत्र तु मात्राद्वयमवशिष्यमाणं तत्र 'आदौ गुरु' इति वचनाद् ह्रस्वात् पृष्टे आदिभूतं वक्ररेखारूपं गुरुमेव । यत्र च मात्रात्रयमवशिष्यमाणं, तत्र 'आदौ गुरुं लघुं तूने' इतिवचनाद् ह्रस्वात् पृष्ठे गुरुं, तद्गुरोः पृष्ठे च ह्रस्वम् । यत्र मात्राचतुष्टयमवशिष्यमाणं तत्राऽप्यादौ गुरुमिति वचनाद् ह्रस्वात् पृष्ठे गुरुद्वयमेव । यत्र च मात्रापञ्चकमवशिष्यमाणं तत्र पूर्ववद् ह्रस्वात् पृष्ठे गुरुद्वयं, तत्पृष्ठे च ह्रस्वम् । एवमग्रेऽप्यनया रीत्या मात्राजातिषु सम्भवाद् यथासम्भवाल्लिखेत् स्थापयेदित्यर्थः । अत्र द्विमात्राद्याद्यपंक्ति स्थापनरीतिर्यथा––सममात्रायां प्रथमपंक्तौ गुरुं वक्ररेखारूपं गुरून् वक्ररेखारूपांश्च; विषममात्रायामाद्यपंक्तौ चाद्यह्रस्वा-परगुरूंऋजुवक्ररेखारूपौ, आद्यह्रस्वापरगुरूंश्च ऋजुवक्ररेखारूपान् स्थापयेदिति दिग् ।

अथ लघुगुरुस्वरूपमाह––

एकमात्रेति स्पष्टम् । स्थापना यथा– अह्लादीति-समस्तव्यस्तसंग्रहात् ह्रसंयोगे हसंयोगे रसंयोगे च न गुरुः । आदिशब्दाद्यथादर्शनम् । क्लादिसंयोगे च यथा "तव ह्रियापह्रियो मम ह्रीरभू" तृइत्यस्य व्याख्या । चन्द्रग्रहणे तमसि जातेऽपि हे प्रिये ! त्वं मया न धृता न गृहीता, पुनस्तत्त(त्स ?)मः क्व कदा समागमिष्यतीति कन्दर्पदर्पपीडितवचः । तथा धनं(न)प्रदानेन श्रुतेन कर्णावित्यादि । तथा––

लीलासिताब्जमुत दर्पणमानपत्रं किं दन्तपत्रमथ किंशुकमौलिरत्नम् ।
किं चामरं तिलकबिन्दुरथेन्दुबिम्बमेतद्दिवोऽनिह्नुतदीप्तिमुदेन कस्य ॥१॥

अत्र दर्पणशब्दः क्लीबेऽपि दृश्यते; दन्त्रपत्रं ताडंकः कर्णाभरणमिति यावत् । आकाशवाचकस्य दिवः स्त्रीत्वा-ल्लीलासिताब्जादयो धर्मा अत्र वर्णिताः । अनिह्नुतदीप्ति प्रकटदीप्ति इन्दुबिम्बं कस्य मुदे हर्षाय न भवति इत्यर्थोऽत्र ह्लिग्रभ्राप्रि शुक्ल ह्रण्हादिवर्णेभ्यः पूर्ववर्णस्य लघोर्गुरुता न जातेत्यभिप्रायः । तीव्रप्रयत्नोच्चारे तु ह्लादावपि प्राग् लघुर्गुरुर्भ-वति । यथा––बर्हभारेषु केशान् वा, सुप्तमीन इव ह्रदः, इत्यादि प्राकृतेऽपि यथा––

जह ण्हाउं ओइन्ने अब्भुत्तमुल्लसियमंसुयद्धंते ।
तह य न ण्हाओसि तुमं सत्थे गोलानई तूहे ॥१॥

व्याख्या । जह यथा ण्हाउं स्नातुं ओइण्णे अवतीर्णः, अब्भुत्तं अभिषिक्तं, उल्लसियमुत्सृष्टं, तूहे तीर्थे, अंसुयद्धंतं अंशुकपर्यन्तं 'अद्धंतो पेरंते' इतिवचनात् । सात्त्विकभावादुद्वृत्तशफरीं दृष्ट्वा चकितो न स्नात इति सण्टंकः । पादान्ते इति––कतिपयेष्विन्द्रवज्रा वसन्ततिलकादिछन्दस्सु पादान्ते लक्षणोक्तगुरोः स्थाने लघुरपि प्रयुज्यते तस्य च लघो-र्गुरुत्वं वा प्रतिपद्यन्ते । वंशस्थादिषु छन्दस्सु पुनः पादान्ते गुरुस्थाने प्रयोजितलघोर्गुरुत्वं न स्यात् । यदाह––

वंशस्थकादिचरणान्तनिवेशितस्य गत्वं लघोर्न हि तथा श्रुतिशर्मदायि ।
श्रोतुर्वसन्ततिलकादिपदान्तवर्त्ति लोर्गत्वमत्र विहितं विबुधैर्यथावत् ॥१॥

एवं मात्राछन्दःस्वपि ज्ञेयम् । यत्तु प्राकृते इंहिंउं हुं हंकाराणां नित्यं तदेकारौ कारयोर्वा पादान्ते लत्वं वदन्ति अपभ्रंशे चापदान्तयोरपि वर्णस्यैकारौकारयोरुच्चारणवशाल्लाघवं वदन्ति तदेतदत्र; वा पादान्ते इत्यत्र वेति व्यवस्थितविभाषा-स्मरणादवमतमिति । विशिष्टोऽर्थो वर्णाकारेत्यादि, वर्णनेत्यादिष्वेकं पदार्थमाश्रित्यैकवचनं, सर्वपदार्थापेक्षया तु बहुत्वं ज्ञेयम् । परिवारादिभिरित्यत्र–पितृमातृभ्रातृपतिपत्नीपुत्रादिसम्बन्धिनः स्वामिमित्रपार्श्वस्थवाहनादिसंपर्किणश्च परिवारः । आदिशब्दादुष्णत्वं शिशिरत्वं, कटुत्वं मधुरादिरसत्वं, दुर्गन्धत्वं सुगन्धत्वं; कुरूपत्वं सुरूपत्वं; लघुत्वं गुरुत्वं; दूरस्थत्वं समीपस्थत्वं; कर्कशत्वं कोमलत्वं; तुच्छत्वं प्रचुरत्वं; मलिनत्वं शुद्धत्वं; पराङ्मुखत्वं सम्मुखत्वं; पुराणत्वं नवीनत्वं; त्रसत्वं स्थावरत्वं; वामत्वं दक्षिणत्वं; चलत्वं स्थिरत्वं; शत्रुत्वं मित्रत्वं; मूर्खत्वं वैदुष्यं; दुःखित्वं सुखित्वं; संसारि-त्वं मुक्तत्वमित्यादयो भावा वर्ण्यस्य यथौचित्यं ज्ञेयाः ।

पूर्णिमेन्दुरिति, सितच्छाय इति-वर्णेन सद्वृत्त इत्याकारेण, अम्बरभूषणमित्याधारेण, कलाकलित इत्याधेयेन, नयनानन्दन इति क्रिया च विशेषणमिति । तथा 'तुल्यश्रिये' त्यस्य श्लोकस्यार्थेन कृतानि विशेषणानि परिमलाद् ज्ञेयानि ।

का.क. गुणाद्वर्ण्यवर्णादेः परतः श्रीशब्दस्तथैतदुपलक्षणात् लक्ष्मीच्छायाशोभाकलाकान्तिभावप्रत्ययादयः कार्याः । ततस्तत्परतः समासेन युतार्था भ्राजिरोचिष्णुद्योतितार्थादयश्च । क्वापि श्रीप्रभृतिशब्दान् विनापि केवलगुणादेव परतः, तथा क्वचिदसमासेनापि युतार्थादयो योज्याः । यथा——

शोणश्रीसंयुतो भानुर्वृत्तलक्ष्मीसमन्वितः ।
अंशूनां शोभया कीर्णो गगनस्थितिसङ्गतः ।।

श्यामलद्युतिविभ्राजी गर्जिरोचिष्णुवैभवः ।
विद्युता द्योतितः प्रीतिं स्तनयित्नुस्तनोत्ययम् ।।

तुल्यादमी सदृग्जिष्णुमुख्याः पूर्वं जितादयः ।।२१।।

तुल्याद् वर्ण्यस्य वर्णादिभिः समानात्, परतोऽमी पूर्णोक्तरीत्या युतार्थाद्यास्तथा सदृगर्थाश्च जिष्णुजैत्रजयिजित्वरजिन्मुख्याश्च, तथैतदुपलक्षणात् स्पर्धिधिक्कारिनिर्भर्त्सकपिडम्बनतर्जकादयो योज्याः । तथा तुल्यात्पूर्वं जित-भत्सित-विडम्बित-धिक्कृतन्यक्कृत-निःकृत-पराभूत-अवहेलितअवगणित-अपमानित-तिरस्कृत-अधःकृततर्जितादयो योज्याः ।

यथा——

चन्द्रश्रीसंयुता कीर्त्तिः कर्पूरभ्राजिवैभवा ।
यस्य गङ्गोर्मिरोचिष्णुः कुन्दश्रीद्योतिता बभौ ।।

कैलाससदृशं रेजे विष्णुशङ्खांशुजिष्णुभम् ।
यद्यशो विधुधिक्कारि तुषाराद्रिविडम्बनम् ।।

जितपार्वणशीतांशु पराभूतभवाचलम् ।
निर्भर्त्सिततुषाराद्रि भा(र्भा)ति भूप भवद्यशः ।।

इति श्री जिनदत्तसूरिशिष्यमहाकविश्रीमदमरचन्द्रविरचितायां काव्यकल्पलताकविशिक्षावृत्तौ छन्दःसिद्धिप्रताने प्रथमेऽनुष्टुप्शासनः स्तबकः प्रथमः ।

म.टी. एकस्मिन्नपि वर्ण्ये पृथक् तुल्यपदार्थेभ्यः प्रयोजितैरेभिः चार्वादिपदैर्विशेषणानि स्युः । यथा——'भवद्यशोभरो भाति' इत्यत्र 'तुषाराद्रिर्हिमाचलः', 'शेषमित्रं नागराजमित्रं' इति । गुणादिति-युतार्थाः समन्विताद्याः । शोणश्रीत्यादि-अत्र पूर्वाङ्घ्रिद्वये वर्णाकारविशेषणरूपे वर्णाकारपुरःस्थात् श्रीशब्दात् लक्ष्मीशब्दात्, संयुतसमन्वितशब्दौ योज्यौ । तृतीयां ह्लावाधेयविशेषणरूपे त्वसमासे, तच्चतुर्थां (र्थ्याः) ह्लावाधारविशेषणरूपे केवलाधेयात् । श्यामलेत्यादि-अत्रपूर्वाङ्घ्रौ समासेन गुणपुरस्थद्युतिशब्दाद् विभ्राजी; द्वितीयांह्रौ केवलगुणात्समासेन; तृतीयां ह्लावसमासेन । तुल्यादमी इति——उपमानादपि अमी पूर्णोक्ता युत्तभ्राजिप्रमुखाः । यथा——'चन्द्रश्रीसंयुते' त्यत्र श्लोके तुल्यात् सदृगर्थाः । यथा——'कैलाससदृशंरेजे' ।। छ ।।

तुल्या जिष्णुमुखा, यथा——'विष्णुशंखांशुजिष्णुभं' इत्यादि । पादत्रये तुल्यात्पूर्वं जितादयो, यथा——'जितपार्वणशीतांशु' श्लोके——पार्वणशीतांशुः पूर्णिमेन्दुः, भवाचलः कैलासः ।

इति श्रीतपागच्छाधिनायकपातसाहिश्रीअकब्बरप्रतिबोधदायक पुरन्दरभट्टारक श्री पू. हीरविजयसूरीश्वरशिष्य पण्डितशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे छन्दःसिद्धिप्रतानप्राप्तानुष्टुप्शासनस्तबकोद्योतकः प्रथमः प्रसरः ।।१।। छ ।।

॥ १.२ ॥

अथ छन्दोऽभ्यासविधिः।

अआ इई उऊ अंअः ह्रस्वदीर्घव्यवस्थया ।
काद्येकव्यञ्जनोक्तेन छन्दसां परिपाटिका ॥२२॥

अआ प्रथमे पादे, इई द्वित्तीये पादे, उऊ तृतीये पादे, अनुस्वाराकारौ चतुर्थे पादे; लघुस्थाने ह्रस्वो, गुरुस्थाने दीर्घ–इत्यनया व्यवस्थया ककारादिहकारान्तानां मध्यादेकव्यञ्जनोच्चारितेन पद्येन पुनः पुनः परिवर्तनं क्रियते। एकाक्षरादि सप्ताक्षरान्तं छन्दः कविभिर्बाहुल्येनाऽप्रयुक्तत्वान्नात्र लिखितम् । अष्टाक्षरं पथ्यावक्त्रं यथा—

काकाकाकाककाकाका कीकीकीकीकिकीकिकी
कूकूकूकूकुकूकुकू कंकंकंकंककंककम् ॥

एवं सर्वव्यञ्जनैः ।

रो नरौ भवति भद्रिका
रेण जेन रेण कामिनी ।

दशाक्षरम्—

वेदैर्मत्ता मभसगयुक्ता (ता?) । मान्यौ गो यदि पणवो वाणैः ।

एकादशाक्षरम्–

स्यादिन्द्रवज्रा ततजागुरू चेत् ।

काकाककाकाकाककाककाका कीकीकिकीकीकिकिकीकिकीकी ।
कूकूकुकूकूकुकुकूकुकूकू कंकंककंकंककककंककंकम् ॥
कूकूकुकूकूकुकुकूकुकूकू कंकंककंकंककककंककंकम् ॥

एवं सर्वत्र छन्दःसु ज्ञेयम् । उपेन्द्रवज्रा जतजागयुग्मम् । इन्द्रवज्रोपेन्द्रवज्रयोरन्योन्याङ्घ्रिमेलने उपजातिर्भवेत्, इन्द्रवंशावंशस्थयोरपि । रान्नरौ लघुगुरू रथोद्धता । स्वागता तु रनभाद्गुरुयुग्मम् । वेदैश्छिन्ना शालिनी मात्ततौ गौ । उत्थापिनी तभजला गयुता । तानां त्रयं गौ लयग्रहिसंज्ञम् । दोधकमुक्तमिदं भभभाद्गौ । ससजालगुरू विदुषी मता । तो जौ लगुरू यदि मोटनकम् । म्भौ न्लौग्वेदैर्भ्रमरविलसितम् ।

द्वादशाक्षरम्—

स्यातेन्द्रवंशा ततजैरसंयुतैः । वदन्ति वंशस्थमिदं जतौजरौ । द्रुतविलम्बितमत्र नभौभरौ । इह तोटकमम्बुधिसैः प्रथितम् । चतुर्भिर्यकारैर्भुजङ्गप्रयातम् । सम्मत्ता स्रग्विणी रैश्चतुर्भिर्युता । त्भौ ज्रौ यदा तु ललिताभवेत्तदा । प्रमिताक्षरा सगणतो जससैः । परिकीर्त्तितं केकिरवं सयौ स्यौ ।

त्रयोदशाक्षरम्—

त्रिच्छेदा मनजरगैः प्रहर्षिणीयम् । जतौ सजौ गो भवति मञ्जुभाषिणी । सजसा जगौ यदि तदा तु नन्दिनी । सजसाः सगौ यदि तदा कुटजं स्यात् । गदितं सुदन्तं सयसा जगौ यदा ।

चतुर्दशाक्षरम्—

ख्याता वसन्ततिलका तभजा जगौ गः । अश्वैर्लक्ष्मीर्मतेयं म्भौ ततौ गद्वयञ्चेत् ।

पञ्चदशाक्षरम्—

वसुयतिरियमुक्ता मालिनी नौ मयौ यः ।

सप्तदशाक्षरम्—

गुहास्यैर्विश्रान्तियमनसभलागः शिखरिणी । यतिर्वसुकृताजसौ जसयलाश्च पृथ्वी गुरुः ।
मन्दाक्रान्ता मभनततगा गोयतिर्वेदषड्भिः । नसमरसलागः षड्वेदैर्यतौ हरिणी मता ।।

एकोनविंशत्यक्षरम्—

आदित्यैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।

एकविंशत्यक्षरम्—

विज्ञेया स्रग्धराऽसौ मरभनययया वाहवाहैर्यतिश्चेत् ।

अर्धसमच्छन्दः—

अयुजि ननरया भवन्ति पादे युजि च नजौ जरगाश्च पुष्पिताग्रा । विषमे ससजा गुरू समे स्युः । सभरा यो यदि मालभारिणी सा । एतावौपच्छन्दसिकभेदौ । विषमे ससजा गुरुः समे सभरालगौ तु तदा प्रबोधिता । अयं वैतालीयभेदः ।

म. टी. अथ छन्दोभ्यामविधिमाह—

अत्र सर्वेषां छन्दसामुदाहरणानि परिमलाद् ज्ञेयानि । इन्द्रवज्रोपेन्द्रवज्रयोरिति-अन्योन्यांह्रिमीलने उपजातिस्तस्याः प्रस्तारे चतुर्दश भेदा भवन्ति

। S S ।	S । S ।	S S । ।	S । । S	। S । S	। । S S	। S S S
S । S S	S S । S	S S S ।	S । । ।	। S । ।	। । S ।	। । । S

स्थापना यथा—

अत्रेन्द्रवज्रायाः प्रथमपादो वक्ररेखारूपः; उपेन्द्रवज्रायाश्च त्रयः पादा ऋजुरेखारूपाः । अनया रीत्या सर्वेऽपि भेदा ज्ञेयाः । अत्राद्यभेदोदाहरणं यथा—

प्रायः पुमांसोऽभिनवार्थलाभे गुणोज्ज्वलेऽप्यकृतादराः स्युः ।
अवाप्य कुन्दं मधुपो हि जज्ञे गतोपजाति(भ्र ?)मणाभिलाषः ।।१।।

एवमन्यभेदोदाहरणान्यपि ज्ञेयानि । तथेन्द्रवंशावंशस्थयोरपि योगे चतुर्दश भेदा भवन्ति तेऽप्युक्तप्रकारेणैव ज्ञेयाः । इत्थमन्यास्वपि कासुचिज्जातिषु परस्परं मिलितासु उपजातयो भवन्ति । तद्भेदास्तु यथादर्शनं ज्ञेया इति ।

रान्नरौ लघुगुरू रथोद्धता इति । वैतालीये अपरान्तिका नाम छन्दः । अत्र राजिरा नयनराजिरा लघुगुरू च भवन्ति । वेदैरिति-चतुर्भिः छिन्ना चतुर्थाक्षरान्ते यतिरित्यर्थः । एवं सर्वत्र ज्ञेयम् ।

उत्थापनी नाम छन्दः, तत्र तीर्थेशभावत जयन्तगणा लघुगुरू च भवन्ति । अम्बुधिसैरिति—चतुर्भिः सकारैर्दोधकम् । मात्रासमकमित्यपि नाम त्रिच्छेदा त्रिभिर्यतिरिति । अश्वैरिति—सप्तभिर्यतिः । वसुपतिरिति-अष्टभिर्यतिः । गुहास्यैरिति—कार्तिकेयवदनसंख्याभिर्विश्रान्तिः, षड्भिर्यतिरित्यर्थः । वेदषड्भिरिति—प्रथमं चतुर्भिः पश्चात् षड्भिर्यतिरिति । आदित्यैरिति—द्वादशभिर्यतिः । वाहवाहैरिति—प्रथमं सप्तभिस्तदनु पुनरपि सप्तभिर्यतिः ।

अत्र षड्विंशत्यक्षरपर्यन्तछन्दांसि बहुष्वादर्शेषु न दृश्यन्तेऽनुपयोगित्वादस्माभिरपि न लिखितानीति ज्ञेयम् ।

अर्द्धसमच्छन्द इति—प्रथमतृतीयपादयोर्द्वितीयचतुर्थपादयोश्च तुल्यता यत्र भवति तत् अर्धसमं छन्दः । अयुजि विषमपादे युजि समपादे इत्यर्थः ।

का. क. अथ आर्यालक्षणम्—

यस्यां सप्त चतुष्कलगणा गुरुश्च जगणो न विषमे स्यात् ।
जः षष्ठोऽथ नलघुकौ पूर्वार्द्धे जगुरिमामार्याम् ॥२३॥

षष्ठे द्वितीयलात् परकेन्ले मुखलाच्च यदिह पदघटना ।
अपरार्धे पञ्चमके मुखलादिह भवति षष्ठो लः ॥२४॥

अन्यच्छन्दो मत्कृतच्छन्दोरत्नावल्यां ज्ञेयमिति । पुनश्छन्दोऽभ्यासोपायानाह—

चतुष्कतद्धिताख्यात कृत्स्यादित्यादिसम्भवैः ।
कर्तृकर्मादिसित्यादिविभक्त्युत्थविशेषजैः ॥२५॥

समाससंश्रितैर्नाममालोत्थैर्यौगिकैरपि ।
निरर्थैरर्थसंयुक्तैर्लाटानुप्राससंयुतैः ॥२७॥

षड्भाषासम्भवैः शब्दैरभ्यसेच्छस्यभेदजैः ।

शब्दैरिति सर्वत्र सम्बन्धनीयम् । चतुष्कशब्दैर्यथा—

दण्डाग्रं सा गता नारी दधीदं हि नदीयते ।
मधूदकं वधूढा सा तवेहा सेयमङ्गना ॥

तद्धितशब्दैर्यथा—

इदानीमधुना सद्यः कुत्र यत्र यथा तथा ।
सर्वथा सर्वदा धीमान् बहुधाऽनेकधा कथम् ॥

आख्यातशब्दैर्यथा—

करोति तनुते वेत्ति वक्ति जानाति पृच्छति ।
भुङ्क्ते भक्षयति प्साति स्तौति रौति न वाति च ॥

कृत् शब्दैर्यथा—

अलङ्करिष्णुवन्दारुभासुरस्पृहया लवः ।
संविधाय विधातुं स भेजिवान्कृतवानपि ॥

स्यादिशब्दैर्यथा—

हंसो हंसौ शुभौ हंसा हंसं हंसौ च हंसकान् ।
हंसेन वरहंसाभ्यां हंसैर्हंसाय शोभिने ॥

हंसाभ्यां राजहंसेभ्यो हंसात् हंसस्य हंसयोः ।
हंसानां प्रवरे हंसे हंसयोर्हंसकेष्वपि ॥

बाला बाले वरा बाला बालां बाले मनोरमे ।
बाला बालया बालाभ्यां बालाभिः प्रतिवासरम् ॥

बालायै वरबालाभ्यां बालाभ्यस्तदनन्तरम् ।
बालाया वरबालाभ्यां बालाभ्योऽपि निरन्तरम् ॥

बालाया बालयोर्नित्यं बालानां विभ्रमस्पृशाम् ।
बालायां बालयोरेव बालासु सकलास्वपि ॥

स्यादिशब्दैर्यथा—

करोति कुरुतो नित्यं ते कुर्वन्ति करोषि किम् ।
कुरुथः कुरुथ स्पष्टं करोमि वितनोमि च ।।

अथार्यालक्षणमाह । यस्यामिति यस्यां पूर्वार्द्धे सप्तचतुष्कलगणाः गुरुश्च भवन्ति, इमां बुधाः आर्यां जगुः । एतन्नियतं लक्षणम् । अत्रापवादो यथा—इहार्यायां विषमे प्रथमतृतीय—

म. टी. पञ्चमसप्तमरूपे गणे जगणो न भवति तथा, षष्ठो जगणो भवत्यथवा नलघुकौ नश्च लघुकश्च नलघुकौ, एतावता नयनलो भवतीत्यर्थः ।

अथ यतिमाह—षष्ठे गणेऽन्त्ये नयनले सति द्वितीयलादारभ्य यत्पदघटना भवति, षष्ठनलगणस्थ प्रथमे ले यतिरित्यर्थः । तथा च पुनः सप्तमे न्ले सति मुखलात् पदघटना भवति षष्ठगणान्ते यतिर्भवतीत्यर्थः । अपरार्द्धे चरमेर्द्धे पञ्चमके गणे न्ले सति तस्मान्मुखलादाद्यलघोः पदघटना भवति, चतुर्थगणान्ते यतिरित्यर्थः । इह द्वितीयेऽर्द्धे द्वितीयदले षष्ठो गणो लः एक एव लघुर्भवति । शेषं पूर्वार्द्धवत् । अत्रार्द्धग्रहणात् पादव्यवस्था नास्ति । तेन-द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् । आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ।।१।। इत्यादौ गणत्रयस्यान्ते गुरुत्वं न भवति । प्रथमे गणे चत्वारो

विकल्पा यथा—	ऽऽ	।।ऽ	ऽ।।	।। ।।	
द्वितीये गणे पञ्च	ऽऽ	।।ऽ	।ऽ।	ऽ।।	।। ।।
तृतीये गणे चत्वारः	ऽऽ	।।ऽ	ऽ।।	।।।।	
चतुर्थे पञ्च	ऽऽ	।।ऽ	।ऽ।	ऽ।।	।। ।।
पञ्चमे चत्वारः	ऽऽ	।।ऽ	ऽ।।	।। ।।	
षष्ठे द्वौ भेदौ	।ऽ।	।। ।।			
सप्तमे चत्वारः	ऽऽ	।।ऽ	ऽ।।	।।।	

अष्टमे गुरुरेक एव । अन्योन्यताडनायां उभयदलविकल्पताडनायामष्टौ कोटयः । एकोनविंशतिर्लक्षाविंशतिः सहस्राणि आर्याभेदसंख्या ८१९२००० । यदाह—

जगणविहीना विषमे चत्वारः पञ्च युजि चतुर्मात्राः ।
द्वौ षष्ठाविति जगणास्तद्घातात् प्रथमदल २२८०० संख्या ।।१।।

एवमप ६४०० रार्द्धसंख्या षष्ठे स्याल्लघुनि चैकस्मिन् । आर्यासंख्योभयदलसंख्याघाताद्विनिर्दिष्टा ।।२।।

उदाहरणम्—

उपदिश्यते तव हितं यदि वाञ्छसि कुशलमात्मनो नित्यम् ।
मा जातु दुर्जनजनेष्वार्याचरितं प्रपद्यस्व ।।१।।

आर्या संस्कृते प्राकृते तु गाथेति कथ्यते। अत्र 'नष्टोद्दिष्टादिकं, ग्रन्थान्तरादवसेयम्। ग्रन्थगौरवभयान्नेह लिखितमिति। अथार्यासु षड्विंशतिभेदभिन्नासु गुरुलघुसंख्या यथा——

तीसं वन्ना सत्तावीसं दीहा यति त्ति अट्टीहा।
जा एसा आइल्ला नायव्वा होइ एयासु ॥१॥

व्या. या त्रिंशद्वर्णात्मिका सप्तविंशतिदीर्घा ऽयदीर्घा त्रिलघुका च भवति। एषा आदिल्ला प्रथमार्या ज्ञातव्या भवति। एतासु षड्विंशतिभेदास्विति। अत्र गुरुलघ्वक्षरांकानयनाय कारणमाह——

वन्नानि राइं दुगुणा लहुआइ जुआ कहंति लहुसंखं।
वन्नविसुद्धा मत्ता फुडं पयासंति गुरुसंखं ॥२॥

व्या. इष्टार्यावर्णा, निरादय आदिवर्णरहिताः, त्रिंशद्वर्णरहिता इत्यर्थः। द्विगुणाः प्रथमार्यालघुयुक्ताः। त्रिलघुयुक्ताश्च यावन्तो वर्णा भवन्ति, तावन्त इष्टार्यायां लघवः। वर्णविशुद्धामिष्टार्या। लघुवर्णरहिता अन्या शेषां गुरुसंख्यां बुधाः प्रकाशयन्तीति षड्विंशत्यार्याभेदनामान्याह——

लच्छी १ कित्ती २ कंती ३ गंगा ४ गौरी ५ तरंगिणी ६ तारा ७।
सिद्धी ८ रिद्धी ९ बुद्धी १० गंधव्वा ११ किन्नरा १२ जुन्ना १३ ॥३॥

माला १४ वाला १५ हंसी १६ वीणा १७ वाणी १८ कुरंगिणी १९ खोणी २०।
लीला २१ ललिया २२ रंभा २३ बंमाणी २४ भागही २५ मेहा २६ ॥४॥

यन्त्रकस्थापना यथा ॥छ॥

चतुष्केत्यादि। हैमव्याकरणप्रथमपादपञ्चकस्य चतुष्केति संज्ञा ज्ञेया चतुष्कतद्धिताख्यातकृतां शब्दैरेतद्वृत्त्युदाहरणैः। स्यादीति-प्रथमादिसप्त विभक्तीनामेकविंशतिवचनैः साधितनामभिः

गाथा	लक्ष्मी	की	क	ग	गौं	त	ता	सि	ऋ	बु	गं	किं	जी
नाम	०१	२	३	४	५	६	७	८	९	१०	११	१२	१३
सर्व	३०	३१	३२	३३	३४	३५	३६	३७	३८	३९	४०	४१	१३
गुरु	२७	२६	२५	२४	२३	२२	२१	२०	१९	१८	१७	१६	४२
लघु	३	५	७	९	११	१३	१५	१७	१९	२१	२३	२५	१५

मा.	वा.	हं	वी.	वा.	कु.	खो.	भी.	ल.	रंभा	बं.	मा.	मि.	चपला
१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७
४३	४४	४५	४६	४७	४८	४९	५०	५१	५२	५३	५४	५६	५६
१३	१२	११	१०	९	८	७	६	५	४	३	२	१	१
२९	३१	३३	३५	३७	३९	४१	४३	४५	४७	४९	५१	५३	५५

त्यादीति-वर्तमानादिशविभक्तीनां प्रत्येकमष्टादशवचनैः साधितधातुभिः कर्तृकर्मादिकारकोत्था ये विशेषा, स्तदुद्भवैश्च सित्यादीति। स्यादिविभक्तिविशेषा-स्त्यादिविभक्तिविशेषाश्च ये तदुद्भवैः स्यादिशब्दाः कर्तृकर्मादिति विशेषशब्दाः स्यादिविभक्तिविशेषाः चतुष्कोक्तत्वाच्चतुष्कशब्दा ज्ञेयाः। तथा त्यादिशब्दास्त्यादिविभक्तिविशेषशब्दाश्चाख्यातोक्तत्वादाख्यातशब्दा ज्ञेयाः। परं विनेयानां क्रमपरिज्ञानाय पृथगुक्ताः कर्तृकर्मादिविशेषा यथा——

कारकाणि कर्त्ता १ कर्म २ करणं ३ संप्रदानकम् ।
अपादान ५ माधारः ६ षट् स्युः सम्बन्धश्च सप्तमः ॥१॥

उक्तानुक्ततया द्वेधा कारकणि भवन्ति षट् ।
उक्तेषु प्रथमैव स्यादनुक्तेषु क्रमादिमाः ॥२॥

कर्मणि द्वितीया कर्तृकरणयोः तृतीयिका ।
सम्प्रदाने चतुर्थी स्यादपादाने तु पञ्चमी ॥३॥

आधारे सप्तमी सम्बन्धे षष्ठीति विभक्तयः ।
इह संक्षेपतः प्रोक्ता वक्ष्यन्तेऽग्रे सविस्तराः ॥४॥

कुर्वः कुर्मो वयं कार्यं कुरुते कार्यमुत्तमम् ।
कुर्वाते कुर्वते देवाः कुरुषे त्वं रुषोज्झितः ॥
कुर्वाथे कुरुध्वे कुर्वे कुर्वहे कुर्महे वयम् ॥

एवं सर्वकालविभक्तिषु । कर्तृकर्मादिशब्दैर्यथा—

कटं करोति दत्तोऽयं तृणैर्दत्ते द्विजाय गाम् ।
वृक्षात्पतन्ति पर्णानि राज्ञो धर्मे दृढा मतिः ॥

स्यादिविभक्तिविशेषजैर्यथा—

प्रविशन्ति पुरे कुन्ता हे शिष्य पठ सर्वदा ।
मातरं मातुरस्मार्षीत् मातुरध्येति मातरम् ॥

त्यादिविभक्तिविशेषजैर्यथा—

स्म पुराधीयत्ते तेनेति ह स्म कथयत्यदः ।
वसन्तीह पुरा छात्रा राघवो भाषते तदा ॥

ऊषुरत्र पुरा छात्रा बभाषे राघवस्तदा ।
पुराऽवसन्निह च्छात्रास्तदाऽभाषत राघवः ॥

पुराऽवात्सुरिह च्छात्रास्तदाऽभाषिष्ट राघवः ।
यावद्भुङ्क्ते पुरा भुङ्क्ते पुरा श्वो भुङ्क्त इत्यपि ॥

समाससंश्रितैर्यथा— नीलोत्पलं जरद्धस्ती ।

समाससंश्रितैर्यथा—

नीलोत्पलं जरद्धस्ती केवलान्नं नवोदकम् ।
पञ्चपूली सुखप्राप्तो गोहितं ग्रामनिर्गतः ॥

आरूढवानरो वृक्षः पलाशधवपिप्पलाः ।
पीठच्छत्रोपानहं स्यादुपकुम्भमधिस्त्रि च ॥

नाममालाशब्दैर्यथा—

धात्री वसुन्धरा भूमिः काननं विपिनं वनम् ।

म. टी. अस्य विस्तारो वाक्यप्रकाशादिषु ज्ञेयः। कटं करोतीत्यत्र दत्तोऽयमिति प्रथमा १, कटमिति द्वितीया २, तृणैरिति तृतीया ३, द्विजायेति चतुर्थी ४, वृक्षादीति पञ्चमी ५, राज्ञ इति षष्ठी ६, धर्मे इति सप्तमी ।

प्रविशन्तीति--कुन्ताः प्रविशन्तीत्यादावप्युपचारमात्रकार्येभ्यः द्योतकवाचकलिङ्गार्थेभ्यः प्रथमा । अव्ययेभ्योऽपि 'कुन्तोपलक्षिताः पुरुषाः प्रविशन्ती' त्यर्थः । हे शिष्य, इत्यत्र 'आमन्त्रणे' इति कारकसूत्रेण (हे.व्या. २-२-३२) प्रथमा भवति । अदेतस्यमोर्लुक् इत्यनेन (हे.व्या. २, १, ४४) सेर्लुक् । मातरं मातुरित्यत्र स्मृत्यर्थदयेशं इति कारकसूत्रेण (हे.व्या. २,२.११) वा विकल्पेन कर्मत्वम् । तेन पक्षे शेषे इत्यनेन षष्ठी । अध्येति ध्यायति उत्कण्ठते इति स्मृत्यर्थाः । एवं मातरं मातुरध्येतीत्यादावपि ज्ञेयम् ।

अथ त्यादिविभक्तिविशेषो यथा--

वर्त्तमाने वर्त्तमाना विध्यादौ सप्तमी पुनः ।
पञ्चम्यनुमतौ कालेऽतीते ह्यस्तनिका पुनः ॥१॥

अद्यतनी परोक्षा च पुनः क्रियातिपत्तिका ।
क्रियातिपतते भूते प्रोक्ता काले भविष्यति ॥२॥

भविष्यंती श्वस्तनी चाशीराशीर्वचने सति ।
एवं विभक्तयः कालत्रययोगाद् दशोदिताः ॥३॥

विभक्तीनां च पूर्वार्द्धं परस्मैपदमुच्यते ।
उत्तरार्द्धं तु सर्वासामात्मनेपदमित्यपि ॥४॥

मध्ये द्वयोस्त्रिकं पूर्वं प्रथमः पुरुषो भवेत् ।
द्वितीयं मध्यमः प्रोक्तः तृतीयं तूत्तमो मतः ॥५॥

त्रिकमध्ये पूर्वं वचनमेकवचनं मतम् ।
द्वितीयं द्विवचनं तृतीयं बहुवचनं मतम् ॥६॥

इत्यादि ।

स्म पुरेति भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोः स्म पुराद्योर्युगपद्योगे हि 'स्मे च वर्त्तमाना' इति (हे.व्या ५.२.१६) कृदन्तसूत्रेण परत्वाद्वर्त्तमानैव स्यादेवम् । इति ह स्म कथयतीत्यादावपि वसन्तीत्यत्र केवलपुरादियोगे, वसन्तीत्यत्र ऊषुरित्यत्र, पुरा वसन्नित्यत्र, पुरा वात्सुरित्यत्र च । परोक्षे चापरोक्षे च भूते पुरादियोगतः वर्त्तमाना परोक्षा ह्यस्तनी अद्यतनी च भवन्ति । पुरादयो यथा-पुरा १ शश्वत् २ तदा ३ यावत् ४ अथ ५ इतिहाः इति । पुरा भुंक्ते यावद्भुंक्ते इत्यादिषु पुरा यावतोर्योगे 'वर्त्तमाने' ति (हे.व्या. ३.३.६) सूत्रेणाद्यतने परत्वादनद्यतनेऽपि भविष्यत्यर्थे वर्त्तमानेति समाससंश्रितैरिति ।

समासः कर्मधारयद्विगू तत्पुरुषस्तथा ।
बहुव्रीहिश्च द्वन्द्वश्चाव्ययीभावश्च षण्मताः ॥ १ ॥

पदप्राग्भावतः कर्मधारयः षड्विधो यथा ।
नीलोत्पलादिकः पूर्वपदस्थितविशेषणः ॥ २ ॥

शीतोष्णादिपदद्वन्द्वपरस्थितविशेषणः ।
शस्त्री श्यामादिकः पूर्वपदसंस्थोपमः३ पुनः ॥ ३ ॥

पुरुषव्याघ्रप्रभृतिपुरःपदगतोपमः ४ ।
गुण इव धीर्गुणधीः प्राक्स्थसम्भावनापदः५ ॥ ४ ॥

गुण एव श्रीर्गुणश्रीः प्राक्स्थावधारणापदः ६ ।
प्रकारोऽमीषु सर्वेषु विशिष्टः कर्मधारयः ॥ ५ ॥

द्विगुर्द्विधैकवद्भावी त्रिशृङ्गं पञ्चपूलिकाः ।
तथैवानेकवद्भावी त्रिजगन्ति चतुर्दश ॥ ६ ॥

प्रथमादिविभक्तीनां नामतः सप्तधा मतः ।
नञ् तत्पुरुषेण सहाष्टधा तत्पुरुषः खलु ॥ ७ ॥

प्राग्भेदः पूर्वकायस्य पूर्वकाय इति क्रमात् ।
द्वितीया तत्पुरुषाद्याः पुनरब्राह्मणोऽष्टमः ॥ ८ ॥

द्विपदो १ थ बहुपदः २ संख्योत्तरपदस्तथा ३ ।
संख्योभयपद ४ श्चैव सह पूर्वपदो५ऽपि च ॥ ९ ॥

व्यतिहार ६ श्चेति षोढा बहुव्रीहिर्बुधैर्मतः ।
आरूढवानरो वृक्षः१ क्ष्मापाः खड्गार्जितश्रियः२ ॥१०॥

व्यतिहार ५ श्चेति षोढा बहुव्रीहिर्बुधैर्मतः ।
रुद्रा उपदशा ३ द्वित्रा ४ समूलोन्मूलितस्तकः ५ ।
केशाकेशि रणं ६ जातमित्युदाहृतयः क्रमात् ॥११॥

द्वन्द्वश्चतुर्विधश्चार्थे स च चार्थश्चतुर्विधः ।
समुच्चयो १ न्वाचयश्च समाहारे ३ तरे तरौ ४ ॥१२॥

आद्यं क्रियाद्यपदानामन्योन्यमविरोधिनाम् ।
भवेत् संकल्पनामात्रं यथा पंक्ति च वक्ति च ॥१३॥

चशब्दमन्तरेणापि भेदोऽयं जायते यथा ।
षट्पदी अहरहर्नयमानो गामश्वं पुरुषं पशुम् ॥
वैवस्वतो न तृप्यति सुराया इव दुर्मदी १ ॥१४॥

प्राग्वाक्ये यत्र मुख्यत्वं गौणतोत्तरवाक्यगा ।
सोन्वाच यो यथा भिक्षामटगां चानयद्द्विजः ॥१५॥

समाहारः स विज्ञेयो यत्रैकत्वं नपुंसकम् ।
यथा वाग्दृषदं पीठछत्रोपानहमेव च ३ ॥१६॥

यत्र द्वित्वं च त्रित्वं च स भवेदितरेतरः ।
देवदत्तयज्ञदत्तौ वटप्लक्षधवा यथा ४ ॥१७॥

यस्याव्ययकारकाद्यं वाच्यं पूर्वपदं भवेत् ।
सोऽव्ययीभावो यथा स्यादुपकुम्भमधिस्त्रिच (यम्) ॥१८॥

चतुर्धा च समासः स्यान्नित्यानित्या च लुग्लुगौ ।
नित्यः कृष्णसर्पो व्यासः पाराशरस्त्वनित्यकः ॥१९॥

कण्ठे कालस्त्वलुग्नीलोत्पलं लुगुकोविदैर्मतः ।
षट्पदी नीलोत्पलं नवोदक्ककमित्यत्र कर्मधारयः ॥२०॥

पञ्चपूलीत्यत्र द्विगुः २ सुखप्राप्त इत्यादिषु तत्पुरुषः ३ आरूढेत्यत्र बहुव्रीहिः ४ पलाशधवेत्यत्र द्वन्द्वः ५ उपकुम्भमित्यत्राव्ययीभावः ६ इति :

नामेति-स्पष्टं यौगिकशब्दैरिति । यौगिकशब्दाः शब्दसिद्धिप्रताने ज्ञेयाः ॥

का. क. राजा पृथ्वीपतिर्भूपः समुद्रोऽम्बुधिवारिधी ।

यौगिकशब्दैर्यथा—

क्षितीशः क्ष्मापतिः क्ष्मापः क्षोणीनाथः क्षमापतिः ।
लक्ष्मीशः श्रीपतिः श्रीपः स्वर्नाथः स्वर्गनायकः ॥

निरर्थैर्यथा—

सकाकाचमसाराचसमासाविरहादरा ।
सगावगारगारागा मोरातोरामुधासुधा ॥

सार्थकैर्यथा—

वर्णकस्तर्णकश्चैव कर्णकश्चित्रपर्णकः ।
कुण्डं मुण्डं महालोकं स्तोकं सङ्कुलसङ्करौ ॥

लाटानुप्रासशब्दैर्यथा—

यामिनीं यामिनीनाथो मेदिनीं मेदिनीश्वरः ।
नलिनीं नलिनीकान्तस्तोषयामास तोषवान् ॥

षड्भाषासम्भवैर्यथा—

संस्कृतं प्राकृतञ्चैव शौरसेनी च मागधी ।
पैशाचिकी चापभ्रंशं षड्भाषाः परिकीर्तिताः ॥

संस्कृतं प्रस्तुतोक्तमेव । प्राकृतभवैर्यथा—

सम्पया सरिया एसा दीहाऊ धणुहं धणू ।
वीसा तीसा कुदो किम्पि केसुयं किंसुयं तहा ॥

शौरसेनीभवैर्यथा—

कुदो अन्देउरं दाव पदिञ्जापुरवं कधम् ।
नाधो भविय भोदूण भविस्सदि करिस्सदि ॥

मागधीशब्दैर्यथा—

एसे सुपुलिसे विज्जाहले जाणादि सुच्छिदे ।
कञ्जका वलणं पञ्जा पञ्जाहं पञ्जवज्झिदे ॥

पैशाचीभवैर्यथा—

कुतुम्बकं हितयकं जारिसो तारिसो गुनो ।
भारिया कसटं सक्को सङ्खा गत्तून पव्वती ॥

अपभ्रंशभवैर्यथा——

तरुहे गिरिहे जोसो जिमच्छम्मुहु संकरु ।
जहिं तहिं सामियहो कहांहुं हुतउ आगदो ॥

शब्दभेदजैर्यथा——

वर्णानिकस्य शब्दस्य सर्वान् नवनवस्वरैः ॥२७॥
संयोज्य जनिता ये ते शब्दाः स्युः शब्दभेदजाः ।
अनुप्रासेषु चित्रेषु सोपयोगा भवन्त्यमी ॥२८॥

यथा——

करः कूरः किरिः कीरः क्रूरः कुररकोरकौ ।
कुर्कुरः कर्करः कारा राका रङ्कोऽङ्कुरः करी ॥

रीरी रोरो रिराकारः

म. टी. निरर्थकैरिति—अभिधेयवियुक्तैः, सार्थकैरिति अर्थसंयुक्तैः, स्वस्वाभिधेयाभिधानसमर्थैः । लाटानुप्राससम्भवैरिति, आवृत्तिर्लाटानुप्रासे तात्पर्यमात्रभेदिनो नाम्नः परस्य चैकस्यानेकस्य वा सकृत्सकृत् कथनमिति । शेषं स्पष्टम् ।

षड्भाषासम्भवैरिति—संस्कृतं प्रस्तुतं प्राकृतादि पञ्चभाषालक्षणं श्रीहेमचन्द्राचार्यविरचितप्राकृतवृत्तितो ज्ञात्वा तदुद्भवैः शब्दभेदजशब्दानां रीतिर्वृत्तावेव विवृता । एवमेतैः शब्दैः छन्दोबद्धैरभ्यस्येत् ।

तत्र प्राकृतभवैर्यथा—संपयासरियेति सम्पत्, सरित् "स्त्रियामा दधृ विद्युतः" इति सूत्रेण (हे. प्रा. ८-१-१५) तकारस्याकारः यद्वृत्तिः । विद्युच्छब्दं वर्जयित्वा स्त्रियां वर्त्तमानस्य शब्दस्यान्त्यव्यञ्जनस्यात्वं भवति । संपयासरिया, पाडिवया । बहुलाधिकारात् अवर्णो य श्रुतिरिति आस्थाने या श्रुतिः प्रथमाऽसि "अन्त्यव्यञ्जनस्ये"ति सूत्रेण (हे. प्रा. ८-१-११) सिलोपे संपया, एवं रूपसिद्धिः सर्वत्रापि ज्ञेया । एतत् प्रथमा सि 'तदश्चतः सोऽक्लीबे' इति सूत्रेण (हे. प्रा. ८-३-८६) तकारस्य सकारः, यद्वृत्तिः तद एतदश्च, तकारस्य सोऽक्लीबे सो भवति । पुरिसो सा मल्लिला एसोऽपि उ एसा सुद्धा अन्त्यव्यञ्जनस्येति तलोपः । आत् इति आवंतता अन्त्यव्यञ्जनस्येति सिलोपे । एसा दीहाउ दीर्घायुः, धणुहं धनुः, तणू तनुः, वीसा विंशतिः, तीसा त्रिंशत्, कुदो कुतः, किंपि किमपि, केसुअं किंशुकं । किसुयं किं श्रुतं ? तहा तथा । सौरसेनीभवैरिति-कुदो कुतः, अंदेउरं अन्तःपुरं । दावतावत् पदिञ्ञा प्रतिज्ञा, पुरवं पूर्वं, कधं कथं, नाधो नाथः, भविय भूत्वा, भोदूण भूत्वा, भविस्सदि करिस्सदि भविष्यति करिष्यति; 'तो दो नादौ सौरसेन्यामिति' सूत्रेण (हे. प्रा. ८-४-२६०) तस्य दो भवति मज्ञोर्ण इति णत्वं च भवति । मागधीभवैरिति—एसे एषः सुपुलिसे सुपुरुषः, विज्जाहले विद्याधरः, जाणदि जानाति, सुच्छिदे सुस्थितः, कञ्ञगाचलणं कन्यकावरणं, पञ्ञा प्राज्ञा, पञ्ञाहं पुण्याहं, पुञ्ञवज्जिदे पुण्यवर्जिते । पुञ्ञापंजले इति पाठे तु पुण्यप्राञ्जल इत्यर्थः, 'न्यण्यज्ञञ्जां ञ्ञा' इति सूत्रेण नाणं न्यण्यज्ञञ्ज इत्येषां द्विरुक्तो ञ्ञा भवति । मागध्यां पैशाचीभवैरिति-कुतुंबकं कुटुंबकं, हितयकं हृदयकं, जारिसो यादृशः, तारिसो तादृशः, गुनो गुणः, भारिया भार्या, कसटं कष्टं, सक्को शक्रः, संखो शंखः, गंतून गत्वा, पव्वती पार्वती । पैशाच्यां णकारस्य नकारो भवति, शेषं पूर्ववत् । अपभ्रंशभवैरिति-तरुहे तरवः , गिरिहे गिरयः, जोयः सोसः, जिम यथा, छम्मुहु षण्मुखः, संकरु शंकरः, जहिं यथा, तहिं तथा, सामियहो स्वामिनः, कहां कुतः, हुंतउ भवन्, आगदो आगतः ।

शब्दभेदजैरिति-करः हस्तः, कूरः ओदनः, किरिः शूकरः, क्रूरः दुष्टः, कुररः पक्षिविशेषः, कोरकः, कोरकः कुड्मलः, कुर्कुरः श्वानः, कर्करः पाषाणादि शकलं, कारा गुप्तिगृहं, राका पूर्णिमा, रंको दीनः अंकुरः, अंकूर इत्यपि शब्दोऽस्ति । करी हस्ती, रीरी पित्तलं, रोरः दारिद्रचवान्, अरिर्वैरी, आकारः आकृतिः, करीरः घटः वृक्षविशेषश्च, आकरः खनिः,

रंकुकः मृगविशेषः, कोकः चक्रवाकः, केकी मयूरः, कंकः पक्षिविशेषः, काकः प्रसिद्धः, करकः घनोपलः, ओकः गृहं, अंकः चिन्हं, केकरः काणः इत्यादिपरा। योध्या अजेया इत्यर्थः।

का. क. करीराकुररङ्कुकाः
काककेकिककंकाककरकोङकोककेकराः ॥

पुनरुपायान्तरमाह—

कथा पुरादिसर्वार्थदिनकृत्यादिवर्णनैः ।
लोकानां दृष्टचेष्टाभिः छन्दोऽभ्यासं समर्थयेत् ॥२९॥

कथा रामायणभारतादयः । कथाभिर्यथा—

अस्त्ययोध्या पराऽयोध्या पुरी स्वर्गपुरीसमा ।
तस्यां दशरथो राजा समभूद् भूरिविक्रमः ॥

तनयाः समजायन्त चत्वारस्तस्य भूपतेः ।
रामलक्ष्मणभरतशत्रुघ्ना इति नामभिः ॥ इत्यादि ।

पुरादिवर्णनैर्यथा—

पुरनृपकुमारमन्त्रिप्रयाणरणदूतजलधिवनगिरयः ।
रविचन्द्रोदयपरिणयऋतुमधुजलकेलिरतविरहाः ॥

ध्वस्तध्वान्तभरं रत्नवेश्मविस्मेररश्मिभिः ।
राजधानी दिनस्येव तत्पुरं द्योतते सदा ॥ इत्यादि ।

स्थाली भाति विशालेयं सिद्धान्नपरिपूरिता ।
भूरिकर्पूरसौरभ्यैरम्भोभिः शोभते घटः ॥

दिनकृत्यवर्णनैर्यथा—

सर्वार्थवर्णनैः ये केऽपि पदार्था दृग्गोचरीभवन्ति ते वर्ण्याः । यथा—

अयमुद्यमवान् ब्राह्मे मुहूर्ते निद्रयोज्झितः ।
सद्यः श्यां परित्यज्य चक्रे देवगुरुस्मृतिम् ॥

नमस्कारपरावर्तपरायणमनाः क्षणम् ।
स्थित्वा बाह्यभुवं गत्वा देहचिन्तां विनिर्ममे ॥

सदनं पुनरागत्य विदधे दन्तधावनम् ।
स्नानमाधाय शुद्धात्मानर्च देवं जगद्गुरुम् ॥ इत्यादि ।

लोकानां या या चेष्टा दृश्यते सा सा काव्यबन्धेन कार्या । यथा—

पुष्पाणि पाणिदेशेऽसौ कृत्वा क्रीणाति कामुकः ।
ताम्बूलिकोऽत्र ताम्बूलमस्य पश्यायपत्यसौ ॥

मित्रेण सममालापमयमाचरयत्यहो ।
अयं हृष्टो हसत्युच्चैरयं गायति गायनः ॥

पुनरुपायमाह—

तदन्यार्थपदैः स्वान्यश्लोकार्थपरिवर्तनात् ।
तत्रैव छन्दस्यभ्यस्येदथ छन्दोऽन्तरेष्वपि ॥३०॥

स्वकृतं परकृतं वा श्लोकं तदर्थं नवनवैः पदैस्तेनैव छन्दसा छन्दोऽन्तरैर्वा परिवर्तयेत् ।

यथा तत्रैव छन्दसि—

प्रत्यर्थिपृथिवीपाल तमोजालदिवाकरः ।
नीतिव्रततिपर्जन्यो राजते पृथिवीपतिः ॥

प्रत्यनीकावनीकान्तध्वान्तविध्वंसनांशुमान् ।
नयवल्लिवनाम्भोदः शोभते भूमिवल्लभः ॥

प्रतिपक्षक्षमानाथतिमिरोन्माथभानुमान् ।
न्यायवल्लीपयोवाहः स विभाति भुवो विभुः ॥

छन्दोऽन्तरैर्यथा—

प्रत्यर्थिपृथ्वीहृदयाधिनाथध्वान्तौघविध्वंसनवासरेशः ।
सन्नीतिवल्लीवननीरवाहो विश्वम्भरायाः दयितो विभाति ॥

दुर्धरारिधरणीधवोद्धतध्वान्तमण्डलविखण्डनांशुमान् ।
नीतिवल्लिवननूतनाम्बुदो मेदिनीविभुरसौ विभासते ॥

क्रूरारातिक्ष्मापजातिप्रतानध्वान्तस्तोमध्वंसनव्योमरत्नम् ।
न्यायोन्मीलद्वल्लिनव्याम्बुवाहो भूभामिन्या वल्लभो भासतेऽसौ ॥

दृप्यद्द्विधिधरणीदयितान्धकार प्राग्भारतारमददारुणतीक्ष्णभानुः ।
स न्यायवल्लिवननूतनतोयवाहो विभ्राजते वसुमतीयुवतीभुजङ्गः ॥

मालिन्यामेव यथा—

अवनिधवकिरीटन्यस्तवैदूर्यरत्नद्युतिमिषमधुपालीसेव्यपादारविन्दः ।
निखिलनृपतिचूडामाल्यसौरभ्यलुभ्यन्मधुपयुवतिराजीनादवाचालपादः ॥

अतुलधरणिपालश्रेणिवेणीप्रसूनप्रसृमरमकरन्दरस्नातपादारविन्दः ।
प्रणमदवनिनाथोत्तंसमाणिक्यमालाकिरणघुसृणनीरस्नातपादाब्जयुग्मः ॥

नमदखिलधरित्रीनाथचूडाकिरीटस्फटिककिरणमालासेव्यमानाङ्घ्रिपद्मः ।
निजचरणनखांशुव्याजकाश्मीरपङ्कक्षणतिलकितनम्रीभूतभूपालभालः ॥

नतनृपतिकिरीटस्फारमाणिक्यमालास्फुरदरुणमयूखद्योतमानाङ्घ्रिपीठः ।
प्रणतनृपतिराजीमौलिकोटीरकोटीस्फटिकरुचिजलान्तः शोभमानाङ्घ्रिपद्मः ॥

एवं परकृतान्यपि काव्यानि पदान्तरैश्छन्दोऽन्तरैश्छन्दःसिद्धये परावर्तयेत् ।

अक्लेशेन छन्दसां ज्ञानोपायमाह—

कियन्मात्रेषु सिद्धेषु छन्दः स्वभ्यासतः सुधीः ।
शेषाणां छन्दसां सिद्ध्यै छन्दोमर्माणि चिन्तयेत् ।।३१।।

भद्रिकायामन्ते लगाभ्यां रथोद्धता । इन्द्रवज्रोपेन्द्रवज्रयोरन्त(न्त्य)गुरोः प्रागधिकलघुना इन्द्रावंशावंशस्थे भवतः । विद्युन्मालायामन्त्यवर्णद्वयात्प्राक् लघुना मोटकम् । मोटनके पूर्वगुरुस्थाने लाभ्यां तोटकम् । रथोद्धतायामादौ गुरुणा ललिता । वंशस्थे सप्ताक्षराग्रे लघुना मञ्जुभाषिणी । रथोद्धतायामादौ लाभ्यां नन्दिनी । स्वागतायां प्रथमं लाभ्यां कुटजम् । वंशस्थे पूर्वलघुना सुदन्तम् । इन्द्रवज्रायां चतुरक्षराग्रे नगणेन वसन्ततिलका । शालिन्यां चतुरक्षरान्ते चतुर्गुरुभिश्चित्रा । वसन्ततिलकायाः प्रान्तगुरोः प्राक्लघुना मृदङ्गकः । शिखरिण्यां प्रान्तगुरोः प्राक् लघुद्वयस्थाने गुरुणा जयानन्दम् । शालिन्यां चतुरक्षराग्रे नसाभ्यां मन्द्राक्रान्ता । लक्ष्म्यां सप्ताक्षरान्ते नगाभ्यां काञ्ची । मन्द्राक्रान्तायां चतुरक्षराग्रे गुरुणा कुसुमितलतावेल्लिता । मन्द्राक्रान्तायां चतुरक्षराग्रे लघुना चन्द्रलेखा । हरिण्यामादौ लघुना ललितम् । मन्दाक्रान्तायामादौ लगाभ्यां मेघविस्फूर्जिता । शार्दूले आद्यगुरुस्थाने लाभ्यां मत्तेभविक्रीडितम् । शार्दूलस्य प्रान्तचतुरक्षरस्थाने सगणेन शार्दूलललितम् । मेघविस्फूर्जितायां षडक्षराग्रे लघुना शोभा । काञ्च्यां सप्ताक्षराग्रे लाभ्यां चित्रमाला । लक्ष्म्यां सप्ताक्षरान्ते ननगैः स्रग्धरा । काञ्च्यां सप्ताक्षराग्रे नगणेन स्रग्धरायामाद्यगुरुस्थाने लाभ्यां महास्रग्धरा । शार्दूलविक्रीडितान्ते सलगैर्विभ्रमगतिः । प्रमिताक्षरायामाद्यपञ्चाक्षरैः पर्यन्तक्षिप्तैर्द्रुतविलम्बितम् । स्रग्धराया आद्यसप्ताक्षरैर्हरिण्याः प्रान्तसप्ताक्षरैर्जया । स्रग्धराया आद्यसप्ताक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैर्ज्योत्स्ना । मालिन्या आद्याष्टाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैश्चन्द्रोद्योतः । मालिन्या आद्याष्टाक्षरैर्हरिण्याः प्रान्तसप्ताक्षरैरुपमालिनी । मन्दाक्रान्ताया आद्यदशाक्षरैः शिखरिण्याः प्रान्तषडक्षरैर्मदनललिता । शालिन्या आद्यचतुरक्षरैः शार्दूलस्य प्रान्तद्वादशाक्षरैः कोमललता । मन्दाक्रान्ताया आद्यदशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैर्हरिणी । हरिण्या आद्यदशाक्षरैः शालिन्याः प्रान्तसप्ताक्षरैः पद्मम् । हरिण्या आद्यदशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैः रोहिणी । प्रान्तैकादशाक्षरैः काञ्ची । चन्द्रलेखाया आद्यैकादशाक्षरैर्हरिण्याः प्रान्तसप्ताक्षरैः चलम् । चन्द्रलेखायाः आद्यैकादशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैः केसरम् । हरिण्या आद्यैकादशाक्षरैः शालिन्याः प्रान्तसप्ताक्षरैश्चन्द्रमाला । शिखरिण्या आद्यद्वादशाक्षरैः हरिण्याः प्रान्तसप्ताक्षरैर्मकरन्दिका । शिखरिण्या आद्यद्वादशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैः छाया । स्रग्धरायाः आद्यचतुर्दशाक्षरैः शिखरिण्याः प्रान्तषडक्षरैः सुवदना । इत्यादि स्वबुद्ध्याप्यूह्यम् ।

अथ यतिशिक्षामाह––

पादान्तव्याद्यक्षरविच्छिन्नपदान्तयोर्यतिः क्रियते ।
लुप्तालुप्तविभक्तिकयोः पुनरर्धे समासमन्धी न ।।३२।।

पादान्ते यथा––

शाश्वतानन्दरूपाय तमःस्तोमैकभास्वते ।
सर्वज्ञाय नमस्तस्मै कस्मैचित्परमात्मने ।।

न त्वेवम्––

नमस्तस्मै महादेवाय शशाङ्कार्धधारिणे । इति ।।

लुप्तविभक्तिके यथा––

नमस्तुङ्गशिरश्चुम्बि चन्द्रचामरचारवे ।

अलुप्तविभक्तिके यथा—

वशीकृतजगत्कालं कण्ठेकालं नमाम्यहम् । इति ।

त्र्याद्यक्षरविच्छिन्ने लुप्तालुप्तविभक्तिके यथा—

उत्तुङ्गस्तनकलशद्वयानताङ्गी लोलाक्षी विपुलनितम्बशालिनी च ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु । इत्यादि ॥

श्लोकार्धेन समासो यथा—

सुरासुरशिरोरत्नराजिनीराजितक्रमः ।
जयत्यसारसंसारपारदृश्वा जिनेश्वरः ॥

न त्वेवम्—

सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी- ।
पिञ्जरीकृतपादाब्जद्वन्द्वं वन्दामहे शिवम् ॥

अर्धेन सन्धिर्यथा—

नमस्यामि सदोद्भूतमिन्धनीकृतमन्मथम् ।
ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम् ॥

म. टी. अथ छन्दोमर्माणि व्याख्यानयन्नाह—

भद्रिकायामिति - रोनरौ भवति भद्रिका । तस्यां प्रान्ते लघुगुरू प्रयोज्येते तदा रथोद्धता नाम छन्दो भवति । इन्द्रवज्रोपेन्द्रवज्रयोः प्रान्ते गङ्गास्थाने राजिरा योज्यते तदेन्द्रवंशा वंशस्थे स्तः । सगणत्रयं लघुगुरू च यत्र भवन्ति सा विदुषी तस्या अन्त्याक्षरद्वयात् । प्राग् लघुप्रक्षेपे तोटकछन्दो भवति । तगणो जगणो लघुगुरू च यत्र स्युस्तन्मोटनकं । तस्याद्यगणस्याद्यगुरुस्थाने लघुद्वयं प्रक्षिप्यते तदा तोटकं छन्दो भवति । रगणनगणरगणा लघुगुरू च यत्र स्युः सा रथोद्धता । तस्या आदौ गुरुः प्रक्षिप्यते तदा ललिता नाम छन्दो भवति । तल्लक्षणं तभजरगणा इति । वंशस्थछन्दसि सप्ताक्षराग्रे लघुक्षेपे मञ्जुभाषिणी भवति । रथोद्धतायामादौ लघुद्वयक्षेपे नन्दिनीछन्दो भवति । रथोद्धतालक्षणं प्राग्वत् । नन्दिनीलक्षणं यथा सगणजगणसगणजगणा गुरुश्चेति । रगणनगणभगणा गुरुद्वयं च यत्र भवन्ति सा स्वागता । तस्या आदौ लघुद्वयप्रक्षेपे कुटजं । तल्लक्षणं सगणजगणौ सगणौ गुरुश्चेति । वंशस्थे आदौ लघुक्षेपे सुदन्तं । तल्लक्षणं सगण-यगणसगणजगणा गुरुश्चेति । इन्द्रवज्रायां आद्यचतुरक्षराग्रे तगणप्रक्षेपे वसन्ततिलका । तल्लक्षणं 'ख्याता वसन्ततिलका तभजा जगौ ग' इति । मगणतगणतगणा गुरुद्वयं च प्रथमं चतुर्भिस्तदनु सप्तभिर्यतिरिति शालिनी । तस्याः प्रथम-चतुरक्षरान्ते गुरुचतुष्टयं प्रक्षिप्यते तदा चित्रा । तल्लक्षणे प्रथमं मगणत्रयं तदनु यगणद्वयं चेति । वसन्ततिलकायाः प्रान्तगुरोः प्राक् लघुप्रक्षेपे मृदङ्गकं । तल्लक्षणं तु तगणभगणजगणजगणरगणा भवन्तीति । रसै रुद्रैः छिन्ना यमनस-भलागः शिखरिणी । तस्याः प्रान्तगुरोः प्राग् लघुद्वयस्थाने गुरुरेकः प्रक्षिप्यते तदा जयानन्दं छन्दः । ततल्लक्षणं यगण-मगणनगणसगणरगणा गुरुश्चेति । शालिन्यां प्रथमचतुरक्षराग्रे नगणसगणप्रक्षेपे मन्दाक्रान्ता । तल्लक्षणं मगणभगणनगण-तगणतगणा गुरुद्वयं चेति । अश्वैर्लक्ष्मीर्मतैवं म्नौ ततौ गद्वयं चेत् । तस्यां प्रथमसप्ताक्षरप्रान्ते नगणगुरुप्रक्षेपे काञ्चीछन्दः । तल्लक्षणं मगणरगणभगणास्तदनु यगणत्रयं चेति । मन्दाक्रान्तायां प्रथमचतुरक्षराग्रे गुरुप्रक्षेपे कुसुमितलता-वेल्लिताछन्दः । तल्लक्षणं मगणतगणनगणा यगणत्रयं चेति । मन्दाक्रान्तायां चतुरक्षराग्रे लघुप्रक्षेपे चन्द्रलेखा । तल्लक्षणं मगणभगणनगणा यगणत्रयं चेति । नसमरसलागः षड्वेदैर्यतौ हरिणी मता । तस्यामादौ लघुक्षेपे ललितं । तल्लक्षणं नगण-नगणमगणतगणभगणरगणा इति । मन्दाक्रान्तायामादौ लघुगुरुप्रक्षेपे मेघविस्फूर्जिता । तल्लक्षणं यगणमगणनगणसगण-रगणरगणा गुरुश्च । प्रथमं षड्भिस्तदनु सप्तभिर्यतिरिति । शार्दूलविक्रीडिते आद्यगुरुस्थाने लघुद्वयप्रक्षेपे मत्तेभविक्रीडितं । तल्लक्षणं सगणरगणनगणमगणयगणा लघुगुरू चेति । शार्दूलविक्रीडितस्य प्रान्ते चतुरक्षरस्थाने सगणप्रक्षेपे शार्दूलललितं ।

तल्लक्षणं मगणसगणजगणसगणतगणसगणा द्वादशभिर्यतिरिति। मेघविस्फूर्जितायां षडक्षराग्रे लघुप्रक्षेपे शोभा। तल्लक्षणं यगणमगणनगणतगणतगणा गुरुद्वयं च। षड्भिः सप्तभिर्यतिरिति। काञ्च्यां सप्ताक्षराग्रे लघुद्वयप्रक्षेपे चित्रमाला। तल्लक्षणं मगणरगणनगणतगणतगणा गुरुद्वयं च। सप्तभिः षड्भिर्यतिरिति। लक्ष्म्यां सप्ताक्षरान्तेन गणद्वयैकगुरुप्रक्षेपे स्रग्धरा। तल्लक्षणं मगणरगणभगणनगणा यगणत्रयं च। सप्तभिः सप्तभिर्यतिरिति। काञ्च्यां सप्ताक्षराग्रे नगणप्रक्षेपे स्रग्धरा। तल्लक्षणं प्रागुक्तं। स्रग्धराया आद्यगुरुस्थाने लघुद्वयप्रक्षेपे महास्रग्धरा। तल्लक्षणं सगणतगणतगणतगणसगणा-रगणद्वयं गुरुश्च। अष्टभिस्सप्तभिर्यतिरिति। शार्दूलविक्रीडितस्यान्ते सगणलघुगुरुप्रक्षेपे विभ्रमगतिस्तल्लक्षणं मगण-सगणजगणसगणमगणतगणभगणरगणा इति। प्रमिताक्षरा सजससैर्गदिता, तस्या आद्यपञ्चाक्षरैः पर्यन्तक्षिप्तैः द्रुत-विलम्बितं। तल्लक्षणं नगणो भगणद्वयं रगणश्चेति। स्रग्धराया आद्यसप्ताक्षरैर्हरिण्याः प्रान्तसप्ताक्षरैर्जयाछन्दस्तल्लक्षणं मगणरगणरगणसगणा लघुगुरू चेति। स्रग्धराया आद्यसप्ताक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैर्ज्योत्स्ना। तल्लक्षणं मगण-रगणमगणयगणा लघुगुरू चेति। नगणद्वयमगणयगणत्रयाष्टसप्तयतिलक्षणाया मालिन्या आद्याष्टाक्षरैः शार्दूलस्य प्रान्त-सप्ताक्षरैः चन्द्रोद्योतं। तल्लक्षणं नगणद्वयमगणरगणरगणा इति। मालिन्या आद्याष्टाक्षरैर्हरिण्याः प्रान्तसप्ताक्षरैरुपमालिनी। तल्लक्षणं नगणद्वयतगणभगणरगणा इति। मन्दाक्रान्ताया आद्यदशाक्षरैः शिखरिण्याः प्रान्तषडक्षरैर्मदनललिता। तल्लक्षणं मगणभगणनगणमगणनगणा गुरुश्चेति। शालिन्या आद्यचतुरक्षरैः शार्दूलस्य प्रान्तद्वादशाक्षरैः कामलता। तल्लक्षणं मगणरगणसगणतगणतगणा गुरुश्चेति। मन्दाक्रान्ताया आद्यदशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैर्हारिणी। तल्लक्षणं मगण-भगणनगणमगणयगणा लघुगुरू चेति। हरिण्या आद्यदशाक्षरैः शालिन्याः प्रान्तसप्ताक्षरैः पद्मं। तल्लक्षणं नगणसगण-मगणनगणतगणा गुरुद्वयं चेति। हरिण्या आद्यदशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैः रोहिणी। तल्लक्षणं मगणभगणनगण-मगणयगणा लघुगुरू चेति। स्रग्धराया आद्यसप्ताक्षरैः शार्दूलस्य प्रान्तैकदशाक्षरैः काञ्ची। तल्लक्षणं मगणरगणभगण-यगणरगणरगणा इति। मगणभगणनगणयगणत्रयरूपायाः चन्द्रलेखाया आद्यैकादशाक्षरैः हरिण्याः प्रान्तसप्ताक्षरैः चलम् तल्लक्षणं मगणभगणनगणजगणभगणरगणा इति। चन्द्रलेखाया आद्यैकादशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैः केसरं। तल्लक्षणं मगणभगणनगणयगणरगणरगणा इति। हरिण्या आद्य एकादशाक्षरैः शालिन्याः प्रान्तसप्ताक्षरैः चन्द्रमाला। तल्लक्षणं नगणसगणमगणरगणयगणा इति। यगणमगणनगणसगणभगणलघुगुरु षडेकादशयतिरूपायाः शिखरिण्या आद्य-द्वादशाक्षरैर्हरिण्याः प्रान्तसप्ताक्षरैर्मकरन्दिका। तल्लक्षणं यगणमगणनगणसगणजगणजगणा गुरुश्चेति। शिखरिण्या आद्यद्वादशाक्षरैः शार्दूलस्य प्रान्तसप्ताक्षरैः छाया। तल्लक्षणं यगणमगणनगणसगणतगणतगणा गुरुश्चेति। स्रग्धराया आद्यचतुर्दशाक्षरैः शिखरिण्याः प्रान्तषडक्षरैः सुवदना। तल्लक्षणं मगणरगणभगणनगणयगणभगणा लघुगुरू चेति।

का. क.

यतिं कुर्यात्पदान्तस्थां पदमध्येऽपि कुत्रचित्।

यथा—

पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेतरांशौ। इत्यादि।

यथा वा—

कूजत्कोयष्टिकोलाहलमुखरभुवःप्रान्तकान्तारदेशाः। इति।

हासो हस्ताग्रसंवाहनमपि तुलिताद्रीन्द्रसारद्विषोऽस्य। इति।

वैरञ्चानां तथोच्चारितचतुरऋचां चाननानां चतुर्णाम्। इति।

खड्गे पानीयमाह्लादयति हि महिषं पक्षपाती पृषत्कः॥इति॥

स्यात्पूर्वोत्तरभागस्थैकाक्षरत्वे तु नो यतिः॥३३॥

पूर्वभागस्थैकाक्षरत्वे यथा——

एतस्या गण्डतलममलं गाहते चन्द्रकक्षाम् ।इति।
एतासां राजति सुमनसां दामकण्ठावलम्बि(म्बी) ।इति।

उत्तरभागस्थैकाक्षरत्वे यथा——

सुरासुरशिरोनिघृष्टचरणारविन्दः शिवः ।इति।

पादान्ते पदमध्ये च न प्रायः क्रियते यतिः ।

यथा——

प्रणमत भवबन्धक्लेशनाशाय नारायणचरणसरोजद्वन्द्वमानन्दहेतुम् ।इति।

सन्धौ स्वरः क्वचित्पूर्वान्तवत् क्वचित्परादिवत् ।।३४।।

पूर्वान्तरवद्यथा——

स्यादस्थानोपगतयमुनासङ्गमेवाऽभिरामा ।
जम्भारातीकुम्भोद्भवामिव दधतः ।इति।

दिक्कालाद्यनवच्छिन्नाऽनन्तचिन्मात्रमूर्तये ।
स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ।।इति।।

परादिवद्यथा——

स्कन्धे विन्ध्याद्रिबुद्ध्या निकषति महिषस्याहितोऽसूनहार्षीत् ।इति।

न पूर्वोत्तरभागस्थैकाक्षरे स्वरसन्धयः ।

म. टी. छन्दोभेदा वर्णिताः ।

अथ यतिप्रकारं प्रपञ्चयति। पादान्तेति-पादः छन्दश्चतुर्थांशस्तस्यान्तः पादान्तः । त्रीणि आदौ येषां तानि त्र्यादीनि, चतुःपञ्चादिसंख्याकानीत्यर्थः, त्र्यादीनि च तान्यक्षराणि च त्र्याद्यक्षराणि । अत्र तद्गुणसंविज्ञानो बहुव्रीहिस्तेन लम्बकर्णादिवत् त्र्यक्षरग्रहणं ज्ञेयमुपलक्षणत्वात् क्वचिद् द्व्यक्षरग्रहणमपीति । तयोरुदाहरणे छन्दोऽनुशासने यथा—त्सौगः कुमार ललिताजगणसगणौ गुरुश्च । यथा—नरेन्द्रगणसेवावृत्तः प्रथितशक्तिः दधासि नृपते ! त्वं कुमारललितानि ।१।

तथा इदं वदनपद्मं प्रिये तव विभाति इह व्रजति मुग्धे मनो भ्रमरतां ।

मेरुं इति-त्र्याद्यक्षरैर्विच्छिन्नश्चासौ पदान्तश्च त्र्याद्यक्षरविच्छिन्नपदान्तः पादान्तश्च त्र्याद्यक्षरविच्छिन्नपदान्तश्च पादान्तत्र्याद्यक्षरविच्छिन्नपदान्तौ । तयोः पादान्तत्र्याद्यक्षरविच्छिन्नपदान्तयोरेतावता पादान्ते त्र्याद्यक्षरविच्छिन्नपदान्ते च यतिः क्रियते इत्यर्थः । कथम्भूतयोः ? लुप्तालुप्तविभक्तिकयोः-लुप्ता चालुप्ता च लुप्तालुप्ते, लुप्तालुप्ते विभक्ती ययोस्तौ लुप्तालुप्तविभक्तिकौ, तयोर्लुप्तालुप्तविभक्तिकयोः । कोऽर्थः पादान्ते ? लुप्तालुप्तविभक्तिके त्र्याद्यक्षरविच्छिन्नपदान्ते च लुप्तालुप्तविभक्तिके इत्यर्थः । यमनं यतिर्विरामो विच्छेदो विश्राम इति यावत् । पुनः श्लोकार्द्धे समाससन्धी न भवतः । समासश्च सन्धिश्च समाससन्धी इति । यदुक्तं छन्दश्चूडामणौ——

यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः । गकारादि पदान्ते च लुप्तालुप्तविभक्तिके ।।१।।

इति सर्वत्र पादान्ते यतिं, यथा—शाश्वतानन्दरूपायेति । विवेकविलासाद्यश्लोकेऽयं । नन्वेवमिति महादेवायेत्यत्र तु यकारस्याग्रेतनद्वितीयपादस्यादिभूतत्वादुत्तरभागस्थैकाक्षरत्वेन पदान्ते यतिर्बाधितेति । एवं नानेयमित्यर्थः । त्र्यादीत्यत्र त्र्यक्षरविच्छिन्ने लुप्तविभक्तिके पदान्ते । यथा-उत्तुङ्गेत्यत्र समासेन विभक्तिलोपाल्लुप्तविभक्तिके त्र्यक्षरविच्छिन्ने पदान्ते यतिरिति त्र्यक्षरविच्छिन्नेऽलुप्तविभक्तिके पदान्ते । यथा—लोलाक्षी इत्यत्र प्रथमाया विभक्तेर्विद्यमानत्वेनालुप्तविभक्तिके त्र्यक्षरविच्छिन्ने पदान्ते यतिः । अत्रोत्तरार्द्धं यथा——

बिम्बोष्ठी नरवरमुष्टिमेयमध्या ।
सा नारी भवतु मनःप्रहर्षिणी ते ॥१॥

इदं वृत्तं छन्दोऽनुशासनगतौ ।

चतुरक्षरविच्छिन्ने लुप्तविभक्तिके पदान्ते यथा——'कश्चित् कान्ता' इत्यत्र । समासेन विभक्तेर्लोपाल्लुप्तविभक्तिके चतुरक्षरविच्छिन्ने पदान्ते यतिः । इदमुदाहरणं प्रत्यन्तरगतं चतुरक्षरविच्छिन्नेऽलुप्तविभक्तिके पदान्ते । यथा—'यक्षश्चक्रे' इत्यत्र स्याद्यन्तं त्याद्यन्तं त्याद्यन्तं च पदमितिवचनात् परोक्षाया विभक्तेर्विद्यमानत्वेनालुप्तविभक्तिके चतुरक्षरविच्छिन्ने पदान्ते यतिः । इदं वृत्तं मेघदूते ज्ञेयमिति । तथा-यतिं कुर्यात् पदान्तस्थां पदमध्येऽपि कुत्रचिदिति त्र्याद्यक्षरविच्छिन्नपदमध्येऽपि कुत्रचिद् यतिर्यथा—

पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेतरांशा—
वासीदस्पन्दनाश्वानुकृतिमरकते पद्मरागायमाणः ।
यः सोत्कर्षां विभूषां कुरुत इव कुलक्ष्माभृदीशस्य मेरो—
रेनांस्यह्नाय दूरं गमयतु स गुरुः का द्रवे यद् विषो वः ॥६॥

अस्य व्याख्या । शमयतु कः स गुरुः ज्येष्ठो भ्राता, कस्य का द्रवेयद्विषः । कद्रोरिमे का द्रवे, यास्तान् द्वेष्टीति गुरुत्मान् तस्य गुरुररुणः । कानि ? एनांसि पापानि । केषां ? वः युष्माकं, अह्नाय क्षिप्रं । कथं ? दूरं प्रकृष्टं कुरुत इव । कां ? विभूषां अलङ्कृतिं । कस्य ? मेरोः । कथम्भूतस्य ? कुलक्ष्माभृदीशस्य । कुलाश्च महीभृतः, तेषां ईशस्तस्य । कथम्भूतां ? सोत्कर्षां । कथं कुरुते इव ? पर्याप्तं अत्यर्थं । कीदृशः पद्मरागायमाणः पद्मरागमणिवदाचरति । क्व ? तप्तचामीकरकटकतटे तप्तश्चासौ चामीकरस्य सुवर्णस्य कटकः सानुः, तस्य तटः वप्रः, तस्मिन् । कथम्भूते श्लिष्टशीतेतरांशौ-श्लिष्टः लग्नः शीतेतरांशुरुष्णांशुः यस्मिन् । पुनरपि कथम्भूते ?

आसीदस्पन्दनाश्वानुकृतिमरकते ।

आसीदन्तः ढौकमानाः स्पन्दनाश्वाः, रथश्च अश्वाश्च, तेषामनुकृतिः प्रतिबिम्बं, सैव मरकतता यस्मिन् सः, तस्मिन् । आदित्याश्वाः तप्तचामीकरकटकतटे मरकता विद्यन्ते । यथा-सुवर्णवलयपृष्ठे पद्मरागो विभूषां करोति, पृथ्वीधरस्य एवमरुणो विभूषां करोति । निवर्तमानो वः एनांसि अह्नाय दूरं गमयतु ।५६ ।

इति सूर्यशतकेऽत्र तप्तचामी इत्यत्र त्र्याद्यक्षरविच्छिन्नपदमध्ये यतिः । तथा 'कूजत्कोयष्टिकोला' इत्यत्र; तथा 'हासो हस्ताग्रसंवा' इत्यत्र; तथा 'वैरंचानां तथोरुचा' इत्यत्र; तथा 'खड्गे पानीयमाल्हा' इत्यत्र च पूर्ववद् यतिरिति स्यात् । पूर्वोत्तरभागस्थैकाक्षरत्वे तु नो यतिरिति । पूर्वश्च उत्तरश्च पूर्वोत्तरौ, पूर्वोत्तरौ च तौ भागौ च पूर्वोत्तरभागौ । तत्र तिष्ठतीति पूर्वोत्तरभागस्थं । एकं च तदक्षरं च एकाक्षरं पूर्वोत्तरभागस्थं च, तदेकाक्षरं च पूर्वोत्तरभागस्थैकाक्षरं, तस्य भावस्तत्त्वं, तस्मिन् । पूर्वोत्तरभागस्थैकाक्षरत्वे कोऽर्थ ? पूर्वभागस्थैकाक्षरत्वे उत्तरभागस्थैकाक्षरत्वे च यतिर्न भवति । तत्र पूर्वभागस्थैकाक्षरत्वे यथा—'एतस्यागं' इत्यत्र यतिभङ्गो ज्ञेयः । तथा 'एतासां ग' इत्यत्रापि च उत्तरभागस्थैकाक्षरत्वे ' यथा 'सुरासुरशिरोनिघृष्टचरणं' त्यत्र यतिभङ्गः पादान्तेऽपि । पदमध्ये प्रायो यतिर्न क्रियते यथा——'प्रणमत भवबन्धक्लेशनाशाय नारा' इत्यत्र । प्रायोग्रहणात् क्वचित् क्रियतेऽपि चेति । सन्धौ स्वरः क्वचित् पूर्वान्तवदित्यादि यतौ क्रियमाणायां

क्वचित् स्वरः पूर्वभागस्यान्त्यावयवो भवति; क्वचित् परादिवत् परभागस्याद्यावयवो भवति। कोऽर्थः ? योऽयं पूर्वापरयोः स्वरयोरेकादेशः स्वरसन्धौ विधीयते, स क्वचित् पूर्वस्यान्तवद् भवति, क्वचित् परस्यादिवद्भवति। उभयादेशत्वाद् यथा—पित्रोः पुत्रः पितुश्च मातुश्च भवति। तत्र पूर्वान्तवद् यथा स्यादस्थानो इत्यत्र। तथा सूर्यशतके 'जम्भारातीभ कुम्भो, इत्यत्र। तथा भर्तृहरिशतके—'दिक्कालाद्यनवच्छिन्ना' इत्यत्र च यतिर्भवति, अस्या वक्त्राब्जमवर्जितपूर्णेन्दुशोभं विभाति इति।

का. क.

स्यात्सन्धौ व्यञ्जनं याद्यादेशोऽपि च परादिवत् ॥३५॥

सन्धौ व्यञ्जनं यथा—

शूलं तूलं तु गाढं प्रहर हर हृषीकेश केशोऽपि वक्र—

श्चक्रेणाकारि किन्ते—इति।

याद्यादेशो यथा—

अच्छिन्नप्रसराणि नाथ भवतः पातालकुक्षौ यशां—

स्यद्यापि क्षपयन्ति कोकिलकुलच्छायासपत्नं तमः। इति।

विततघनतुषारक्षोदशुभ्रासु दूर्वास्ववविरलपदमालामुज्ज्वलामुल्लिखन्तः। इति।

सम्बन्धानामृत्तरेण पदेनैकाक्षरस्पृशाम्।

प्रादीनां पूर्वपादान्ते यतिर्न क्रियते क्वचित् ॥३६॥

यथा—

दुःखं मे प्रक्षिपति हृदये दुःसहस्त्वद्वियोगः।

पूर्वपदसम्बद्धानामनेकाक्षराणां तु क्रियते।

पूर्वपदसम्बद्धानां यथा—

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि।

अनेकाक्षराणां तु क्रियते, यथा—

दूरारूढप्रमोदं हसितमिव परस्पृष्टमासां सखीभिः। इति।

प्राक्पदाश्रितैकाक्षरं चादेः पूर्वं तु नो यतिः ॥३७॥

यथा—

स्वादु स्वच्छं च सलिलमिदं प्रीतये कस्य न स्यात्।

प्राक्पदसम्बद्धस्यानेकाक्षरस्य तु पूर्वं भवति।

यथा—

मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः। इति।

प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्। इत्यादि।

इत्याद्यौचित्यतो ज्ञेया यतिः श्रुतिसुखा बुधैः ॥३८॥

यदुक्तं—

अव्रह्‌वर्णोऽपि मधुरा मनो हरति भारती।
तमोनिचयसङ्काशा मत्तनादेव कोकिला ॥

इति श्री जिन० छन्दः सिद्धिप्रताने छन्दोऽभ्यासस्तबको द्वितीयः ॥

म. टी. परादिवद्यथा—'स्कन्धे विंध्याद्रिबुद्ध्या निकषति महिषस्याहितो' इत्यत्र यतिर्भवतीति।

पूर्वोत्तरेति-पूर्वोत्तरभागयोरेकस्मिन् अक्षरेऽवशिष्यमाणे सति, यतौ क्रियमाणायां स्वरस्य पूर्वादिवत् परादिवद् भावौ न स्यातामिति तात्पर्यार्थः। उदाहरणानि यथा—अस्या 'वक्त्रा' इत्यत्र पूर्वपदसन्धौ ज्ज इत्येकाक्षरमवशिष्यते। अतः एवंविधा यतिर्न कर्तव्या। तथा 'गेंदु' इत्यत्रोत्तरपदस्थेकारेण 'सन्धौदु' इत्येकाक्षरमवशिष्यते। एवमपि यतिर्न कर्तव्येति। तथा सन्धौ व्यञ्जनं याद्यादेशोऽपि च परादिवत् स्यात्तत्र सन्धौ व्यञ्जनं यथा 'हर हृषीकेश' इत्यत्र हृषीकशब्द-स्यान्त्यककारईशशब्दस्यादिभूतो यतये भवति। याद्यादेशो यथा—'यशांस्यद्यापीत्यत्र, यशांसि इत्यत्र इवर्णादेर्ह्रस्वे स्वरे यवरलमिति सूत्रेण यकारे कृते, सकारः आद्यभागस्यादिभूतो यतये भवति तथा 'दूर्वास्वविरले' त्यत्रापि च सम्बद्धानामिति तथा उत्तरपदेन नित्यसम्बद्धानां प्रादीनामेकाक्षरस्पृशां पूर्वपदान्ते क्वचिद् यतिर्न क्रियते। यथा—'दुःखं मे प्र' इत्यत्र यति-भङ्गः।

प्रादयो यथा—

प्रपरापसमन्ववनिर्दुरभिव्यधिस्तदतिनिप्रतिपर्यपयः।
उप आङिति-विंशतिरेष सखे ! उपसर्गगणः कथितः कविना ॥१॥

इति अनेकाक्षराणां तु प्रादीनां यतिः क्रियते। यथा—'हसितमिव परि' इत्यत्र तथा प्राक्पदाश्रितैकाक्षरस्य चादेः पूर्वं यतिर्न भवति। यथा—'स्वादुः स्वच्छं 'इत्यत्र। चकारसम्बन्धस्तु प्राक्तनेन स्वच्छमिति पदेनातो यतिभङ्गः। तथा प्राक् पदसम्बद्धस्यानेकाक्षरस्य पूर्वं यतिर्भवति। यथा मेघदूते 'मन्दायन्ते', इत्यत्र 'न खलु', इत्यनेकस्वरमव्ययं। तथा 'प्रत्यादेशा' दित्यत्रापि चेत्यप्यनेकस्वरमव्ययं। अतो नात्र यतिभङ्गः। इत्येवं सर्वत्रापि श्रुतिसुखावहा यतिः कर्तव्या ॥छ॥ इति श्रीतपागच्छाधिनायकपातसाहि श्रीअकब्बरप्रतिबोधदायक श्री शत्रुञ्जयतीर्थादिकरमुक्तिकारकभट्टारकपुरन्दर भट्टारक श्री ५ श्री हीरविजयसूरीश्वरशिष्यपण्डितशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे छन्दःसिद्धिप्रतानप्राप्त-छन्दोभ्यासस्तबकोद्योतको द्वितीयः प्रसरः ॥छ॥ ५

॥ १-३ ॥

तृतीय : स्तबक :

अथ छन्दःपूरणाय सामान्यशब्दाः

छन्दःस्वनुष्टुब्मुख्येषु शब्दाः शीघ्रत्वसिद्धये ।
क्रमाक्रमोचिता ज्ञेयाः सामान्यैकाक्षरादिकाः ॥३९॥

प्रथमेऽनुष्टुभः पादे क्रमादेकाक्षरादयः ।
व्यतिक्रमाच्च कथ्यन्ते शब्दाः साधारण यथा ॥४०॥

प्रथमैकाक्षरं—

श्री मं तन् त्विश् आ नि स्राक् सुस्त् तत् ।

आद्याक्षरद्वयम्—

श्रीमत् श्रेष्ठं ज्येष्ठं प्रेष्ठं प्राज्यं प्रौढं मारं स्फारम् तारं रुच्यं धुर्यं वर्यं रम्यं काम्यं कम्रं कान्तं हृद्यं हारी मञ्जु चारुः वल्गुः मत्यं नित्यं कामं चञ्चत् वल्गत् स्फूर्जत् क्रीडत् सदा स्वयं स्फुरं ध्रुवं भृशं रयात् जवात् परं वरं महत् पटुः बहु स्फुरत् लसत् लुलत् ललत् ।

आद्याक्षरत्रयं—

निःशंङ्कं मुच्छायः सच्छोभं शोभाढ्यं वेगेन श्रीप्राज्यं विस्फूर्जत् विक्रीडत् प्रोद्दाम प्रोत्तुङ्ग प्रोत्ताल प्रक्रीडत् सपदि प्रकटं विकसत् विलसत् निकामं नितान्तं प्रकामं प्रसर्पत् उदञ्चि विसर्पि रयेण अयेन सर्वदा सर्वथा सर्वतः सत्वरं निश्चितं वेगतः विस्फुरत् प्रोल्लसत् ।

आद्याक्षरचतुष्टयं—

रयादेव जवादेव सर्वकालं सुनिश्चितं स्फारशोभः प्रभायुक्तः स्फुर्जच्छायः श्रियान्वितः ।

म. टी. अथ सामान्यशब्दस्तबकमाह—

छन्दस्स्विति-अनुष्टुप्मुख्येषु छन्दस्सुक्रमाक्रमोचिता इति—प्रथमादिपादेषु आदितः क्रमः अन्यतः पश्चाद्वलने चाननुक्रमस्तदुचिताः सामान्यैर्यै(नै)काक्षरादयः शब्दा ज्ञेया इति भावः। श्रीसंसदित्यादि, रम्यमित्यादि-अनयोः छन्दो विद्युन्माला। वल्लक्षणं मो मो गो गो विद्युन्मालेति। श्री संसदित्यत्र तत्तत् इत्यक्षरद्वयं चिन्त्यं, सदेत्यत्र छन्दो जरौ लगौ, प्रमाणिकेति ।

निःशङ्कमित्यत्र छन्दोमद्वन्द्वं, सावित्री प्रोद्दामेत्यत्र मो नारी, सपदीत्यत्र छन्दःसु मदनः, नितान्तमित्यत्र केशा, उदञ्चीत्यत्रानुक्तं छन्दो ज्ञेयं, सर्वदेति निश्चितमिति अनयोः छन्दः रोमृगीरयादेवेत्यत्र पथ्यावक्त्रं हि तु का चेत्यत्र जरौ लगौ। प्रमाणिकेति-हि तु इत्यत्र प्रमाणिकालक्षणं चिन्त्यं, जयन्तभङ्गात् रयेणेत्यत्र गायत्र्यामनुक्तं छन्दो ज्ञेयं, रयादेवेत्यत्र वक्त्रं छन्दः। श्री(रि)त्यत्र विद्युन्माला, उत्तालेति शोभाढ्येति सच्छोभेत्येतेषु त्रिषु नारीछन्दः ।

का.क. चतुर्णामग्रे एकाक्षरं

हि तु न स ग ।

चतुर्णामग्रेऽक्षरद्वयं––

रयात् स्वयं स्फुटं भृशं सदा अन्दहे जवात् महत् वरं परं ध्रुवं द्रुतं स्फुरत् लसत् मिलत् ललत् ।

चतुर्णामग्रेऽक्षरत्रयं––

रवेन जवेन प्रभावविभावौ सशोभसलक्ष्म्यौ, वितानप्रपञ्चौ ।

चतुर्णामग्री चतुरक्षराणि––

रयादेव जवादेव पराभोगदहृर्श्र.कौ लसच्छ्रीकसल्लक्ष्म्यौ स्फुरच्छोभवरच्छायौ । अथ व्यतिक्रमेणाक्षराणि,

अन्त्याक्षरं––

श्रीःत्विट् द्युत् जुप् ।

अन्त्याक्षरद्वयं––

सम्यक् वेगात् प्रौढं प्राज्यं सत्यं नित्यं कामं कान्तं श्रीमान् शीघ्रं श्रेष्ठं स्पष्टं स्फारं तारं वर्यं हृद्यम् ।

अन्त्याक्षरत्रयं––

उत्तालः सल्लक्ष्मीः सश्रीकः उद्दामः शोभाढ्यः लक्ष्मीवान् उच्छायः सच्छायः सच्छोभः काम्यश्रीः वर्यश्रीः रम्यश्रीः ।

शब्दाः पूर्वोदिता एवं
व्युत्क्रमे चतुरक्षराः ।

अन्त्याक्षरपञ्चकं––

प्रवरश्रीकं रुचिरच्छायं स्फुरल्लक्ष्मीकं रयतःसम्यक् वेगतःश्रीमान् कलायायुक्तः सततंकान्तः प्रकटच्छायः ।

अन्त्याक्षरषट्कं––

उदञ्चितरच्छायः चारुतरच्छायः स्फुरितलक्ष्मीकः रम्यतमश्रीकः प्रौढश्रियायुक्तः वरतराटोपः कान्ततमश्रीकः प्रकटशोभाढ्यः ।

सलकलोऽपि पादः––

समुल्लसितशोभाढ्यः चारुचञ्चत्कलाशाली उद्यदहृद्यतरस्फूर्तिः वल्गुवल्लगद्वपुर्लक्ष्मीः विभारसंभारशोभी प्रभाप्रभावसम्भाव्यः विभाप्राक्भारसारश्रीः रोचिःसञ्चयरोचिष्णुः ।

द्वितीयेऽनुष्टुभः पादे यावदेवाक्षरत्रयम् ।
विज्ञेयं पूर्वपादोक्तं कथ्यन्ते चतुराक्षराः ॥४१॥

म.टी. प्रवरेत्यत्र घनपङ्क्तिः, रागवेगत इत्यत्र रोगगौ प्रतीतिः छन्दः ।

उदञ्चितेत्यत्रोपजाति(:)जीवत्यामनुक्तं समुल्लसितेत्यत्र विभेत्यत्र च वक्त्रं, इति श्लोकस्य प्रथमपादे क्रमानन्क्रमाभ्यामेकाद्यक्षरसंकलनार्थं सामान्यशब्दाः उक्ताः ।

अथ द्वितीये पादे तानाह-सर्वेत्यत्र प्रौढेत्यत्र च वक्त्रं, रयादहो इत्यत्र प्रमाणिका, भागित्यत्र मविमला, स्फुटेत्यत्र प्रमाणिका, सर्वदेत्यत्र स्त्रग्विणी, मन्जुलेत्यत्र लर्गा । विदग्धकः, विमलेति रुचिरांचितेति नववैभवेति त्रिष्वनुक्तं, रोचिरित्यत्र विभेत्यत्र च विपुला ।

का.क. सर्वकालं सर्वदैव रयादेव जवादेव शोभायुक्तः झटित्येव रयादिह जवादिह प्रौढलक्ष्मीः स्फूर्जच्छायः बहुश्रीकः वरच्छायः पराभोगः महाभोगः प्रकटश्रीः विकटार्चिः ।

चतुर्णामग्रतः पूर्वपादस्यैवाक्षरत्रयम् ।

चतुर्णामग्रे चत्वारि—

स्यादहो जवादहो मनोरमं मनोहरं समन्ततः झटित्यपि वरद्युतिः महामहाः ।

अथ व्यतिक्रमेणान्त्याक्षरं—

भा भाक् जुष् मुष् क्रुश् रुक् हृत् भृत् वृत् मद् वद् भू हक् जाहि वै हे भो हा तत् स साथाऽथसावदो यम ये अरे ।

अन्त्याक्षरद्वयं—

स्फुरं भृशं द्रुतं ध्रुवं स्वयं स्यात् जवात् अलं सदा सनाशनैः अरं परं चिरात् शुभं वरम् ।

अन्त्याक्षरत्रयं—

सर्वदा सर्वतः सर्वथा नित्यशः सत्वरं सन्ततं निश्चितं वेगतः उच्चकैः अञ्जसा शीघ्रतः सुन्दरं पेशलं कोमलं निर्मलं मञ्जुलम् ।

व्यक्तिक्रमेऽपि चतुरक्षरशब्दाः पूर्वोक्ता एव ।

अन्त्याक्षरपञ्चकं—

मञ्जुलस्थितिः सुन्दरद्युतिः प्रवरच्छविः श्रेष्ठवैभवः कोमलक्रमः प्रसरद्रुचिः प्रभवत्प्रभः प्रसरद्रमः कान्तिमण्डितं द्युतिसुन्दरं छविराजितं प्रभयान्वितं नववैभवः विभवद्विभः स्फुरितोदयः विकटोच्छ्रयः ।

अन्त्याक्षरषट्कं—

सुन्दरदीधितिः अद्भुतवैभवः भूरितरद्युतिः उद्यतमाततिः कान्तिनिकेतनं इद्धतमक्रमः चारुतरच्छविः अक्षिमहोत्सवः ।

सकलपादः—

रोचिर्निचयरोचितः कान्तकान्तिनिकेतनं द्युतिमण्डलमण्डितः विभावैभवभासुरः विभवद्भूरिवैभवः मनोहारितमःक्रमः महामहिममन्दिरं महोदयमहोमयः ।

पादद्वयं—

चमत्कारकरस्फारप्रभाप्राग्भारभासुरः ।
मनोरमतमत्क्रीडत्कान्तिमण्डलमण्डितः ॥

मनोहरतरस्फूर्जदूर्जस्वलकलोज्ज्वलः ।
नयनानन्दनोद्दामरामणीयकमन्दिरम् ॥

विस्फुरद्रश्मिविस्मेरविस्मयाविष्टविष्टपः ।
प्रीतिस्फीतिकरप्रेङ्खत्प्रभासंहतिसंहतः ॥

मनोहारिसदोच्छ्रायकायच्छायचयान्वितः ।
अत्यद्भुतवपुःशोभासम्भ्रान्तभुवनत्रयः ॥

एवं साधारणैः शब्दैः रौचित्येन नियोजितैः ।

म. टी. अथसम्पूर्णमपि पादद्वयमाह—चमत्कारेत्यादि । एवमष्टपादद्वयरूपा चतुःश्लोका दर्शिताः ।

अथेन्द्रवज्रादिवृत्तशिक्षामाह—उद्यदित्यादितः स्रग्धरां, यावत् सर्वं स्पष्टार्थं तत्र बहुलनिबिडेति बहुलं विस्तीर्णं, निबिडार्थे तु बहुलशब्दोऽदंतह मध्यो ज्ञेयो, न तुदंतह मध्य इतिः दीर्घेति—दीर्घैकाक्षरमादिप्रयोज्यमन्तप्रयोज्यं चेति द्विधा; ह्रस्वैकाक्षरमादिप्रयोज्यमन्तःप्रयोज्यं चेति द्विधा; दीर्घह्रस्वाक्षरं द्वन्द्वस्य प्रसारतो यथा दीर्घौ ह्रस्वदीर्घौ दीर्घह्रस्वौ ३ ह्रस्वौ ४ चेति चतुर्विधत्वं, आद्यन्तप्रयोज्यत्वेनाष्टविधत्वं, गणस्य प्रस्तारतो मयौ रसौ तजौ म्नौ क्युरष्टौ वर्णगणास्त्रिकाः आद्यन्तप्रयोज्यत्वेनैकैकौ । द्विधा स्थापना यथा—इति आदिप्रयोज्यशब्दानामन्तेषु अथाग्रादिशब्दप्रयोगादन्तप्रयोज्यशब्दा ज्ञेयाः । एवं क्रमेण सर्वछन्दसां सिद्धार्थमेकाक्षरादिकाः सामान्यशब्दाः परिमलात् मन्तव्याः ।।छ।।

का.क. अथेन्द्रवज्रायां पूर्णाक्षरद्वयं—

उद्यत् माद्यत् चञ्चत् राजत् रङ्गत् सर्पत् भास्वत् ।

आद्यमक्षरत्रयं—

भ्राजिष्णु विभ्राजि रोचिष्णु बर्हिष्णु संशोभि ।

आद्यमक्षरचतुष्टयं—

स्फारस्फुरत् प्रौढोल्लसत् वर्योदयत् स्पष्टस्फुरत् ।

अक्षरपञ्चकं—

विस्मेरशोभः प्रोल्लासिलक्ष्मीः उत्सर्पिशोभः स्मेरप्ररोहत् ।

अक्षरपञ्चकात्—

बहु दृढ गुरु जव वर स्फुर घन स्मित ।

अक्षरपञ्चकाग्रेऽक्षरत्रयं—

निबिड बहुल रुचिर सुभग विमल प्रवर प्रकट प्रबल प्रचुर प्रसृत प्रसभ प्रभवत् विलसत् विकसत् विहसत् विचरत् प्रचरत् प्रसरत् ।

अन्त्याक्षरत्रयं—

प्रधान प्रशस्य प्रभाव विभाव प्रवीण शुभश्रीः परश्रीः सुशोभः स्फुरश्रीः प्रसर्पत् प्ररोहत् विसर्पत् विकासि विलासि विसर्पि विसारि ।

उपेन्द्रवज्रायां पूर्णाक्षरद्वयं—

लसत् मिलत् स्फुरत् ज्वलत् स्फुट ध्रुवम् ।

आद्यवर्णत्रयम्—

प्रधान प्रशस्य प्रवीण धुरीण प्रवेक विकासि विसर्पि विलासि ।

आद्यवर्णचतुष्टयं—

वरोदयत् स्फुरस्फुरत् परिस्फुरत् लसद्विभा मिलत्प्रभा ।

आद्याक्षरपञ्चकं—

उदारसर्पत् उदञ्चितश्रीः विसर्पिलक्ष्मीः विकासिशोभा वरप्ररोहत् ।

शेषमिन्द्रवज्रावत् । इन्द्रवज्रोपेन्द्रवज्राभ्यामुपजातिश्छन्दः ।

प्राज्य स्फार प्रौढ स्पष्ट चारु हारि तार सार हृद्य रम्य सर्पि स्मेर ।

आद्याक्षरत्रयं——

विस्फुरत् सञ्चरत् प्रोल्लसत् पेलवं सुन्दरं मञ्जुलं अद्भुत उत्कट उच्छ्रित ।

अक्षरत्रयाग्रे——

वल्गत् दृढमिलत् वरतर नवमह गुरुतर गुरुतम ।

सप्तानामग्रे——

मनोहरं महामहावरद्युतिः शुभच्छविः गुणालयः श्रियायुतः स्फुरन्महाः श्रयोच्छ्रितः गुणोज्ज्वलः ।

स्वागतायां सप्ताक्षराणि यावद्रथोद्धतावत् ।

अन्त्यवर्णचतुष्टयं यथा——

स्फुटलक्ष्मीः गुणरम्यः प्रवरश्रीः वरशोभः रुचिरश्रीः परिसर्जत् नवराजत् वरवल्गत् ।

शालिन्यां प्रथमाक्षरद्वयं——

शश्वं नित्यं कामं शश्वत् सर्पत् राजत्क्रीडत् रङ्गत् प्रेङ्खत् ।

आद्यमक्षरचतुष्टयं——

स्फारस्फूर्जत् लीलोन्मीलत् चारुदञ्चत् प्रौढप्रेङ्खत् उच्चैश्चञ्चत् वल्गद्वल्गत् चञ्चल्लक्ष्मीः स्वच्छच्छायः ।

चतुर्णामक्षराणामग्रे——चारु हारि सर्पि स्मेर स्फार वल्गु रम्य नव्य ।

चतुर्णामग्रे——

विस्फुरत् प्रोल्लसत् सञ्चरत् पेलव पेशल सुन्दर मञ्जुल प्रेङ्खित स्मेरित ।

सप्तानामग्रे——

भ्राजमानः राजमानः स्फारशोभः शोभमानः दीप्तिरूपः स्फाररूपः प्राप्तलीलः प्रौढलक्ष्मीः मञ्जुलश्रीः ।

वसन्ततिलकायां चतुर्णामक्षराणामग्रे लघ्वक्षरत्रयं——

सपदि प्रभवः प्रसरत् प्रवर विमल बहुल ।

चतुर्णामग्रे——

दृढमिलत् परिलसत् वरमहः वरगुणः नवरुचि प्रसृमर विसृमर शुचितम वरतर परिमल परिचय सुनिपिडितिपद प्रतिदिन ।

अन्यदिन्द्रवज्राप्रान्त्यषडक्षरवत् ज्ञातव्यम् ।

मालिन्यामाद्यमक्षरद्वयं——बहु दृढ स्फुर घन ।

आद्यमक्षरत्रयं——निबिड प्रसृत बहुल प्रचुर ।

आद्यमक्षरचतुष्टयं——प्रसृमर अविरल सुनिबिड घनतर ।

आद्यमक्षरपञ्चकं——

बहुलतम प्रकटतर अतिनिबिड अधिकशुभ ।

आद्यमक्षरषट्कम्——

अविरलतम प्रसृमरतम बहुलनिबिड अधिकरुचिर ।

आद्याक्षराष्टकं——

अविरलतरसर्पत् अतिरुचिरविसर्पत् बहुलनिबिडराजत् प्रसृमरतरवञ्चत् ।

अष्टानामक्षराणामग्रे—हृद्य रम्य तार सार ।

अष्टानामग्रे—सप्तमः सच्छविः प्रोत्कट विस्फुरत् ।

एकादशानामग्रे—राजमान प्रौढशोभ प्राप्तलील स्फाररूप ।

व्यतिक्रमेणान्त्याक्षरद्वयं—रम्य हृद्य सार चारु ।

अन्त्याक्षरत्रयं—

प्रधान प्रशस्य प्रवीण स्फुरश्री सशोभ वरश्रीः ।

चतुराक्षरास्त एव—राजमानप्रभृतयः ।

अन्त्याक्षरपञ्चकं—

विभ्राजमान विस्फारशोभ विस्तीर्णलक्ष्मीः संशोभमान ।

अन्त्याक्षरसप्तकं—

राजमानप्रभाव द्योतमानप्रपञ्च स्फायमानस्वरूप श्रेणिसंरम्भरम्यम् ।

अन्त्याक्षरनवकम्—

लीलारोचमानप्रपञ्चं मालाशोभमानान्तरालं शोभावैभवभ्राजमानं राजीराजमानस्वरूपम् ।

अन्त्यैकादशाक्षराणि—

परिणाहस्फीतलक्ष्मीविलासं परिणामभ्राजितोद्दामशोभं निकुरंबाडम्बरभ्राजमानं समुदायस्फायमानप्रमोदम् ।

शिखरिण्यामाद्यमक्षरद्वयं—

लसत् मिलत् चलत् ललत् स्फुरं ध्रुवं द्रुतं भृशं स्वयम् ।

आद्यमक्षरत्रयं—

विसर्पत् प्ररोहत् विराजत् नितान्तं प्रकामं स्फुरोद्यत् ।

आद्याक्षरचतुष्टयं—

स्फुटस्फूर्जत् स्फुरल्लक्ष्मीः विसर्पिश्रीः वरच्छायः नवोन्मीलत् परिक्रीडत् नवप्रेङ्खत् नवोदञ्चत् ।

आद्यमक्षरषट्कं—

प्रकामस्फूर्जत् समुन्मीलल्लीला नवप्रेङ्खल्लक्ष्मीः परिस्फूर्जच्छायः स्फुरश्रीरोचिष्णुः ।

षण्णामग्रे—

प्रसृमर विसृमर प्रकटित वरतर वरतम ।

षण्णामेवाग्रे—

परिलसित नवललित प्रसृततर निचिततर निचिततम ।

षण्णामग्रे—

प्रबलविलसत् प्रचुरविचरत् नवपरिलसत् घनतरचरत् नवपरिलसत् घनपरिचरत् ।

षण्णामग्रे—

प्रकटतरलक्ष्मीः विकसितनवश्रीः विशदतरशोभः ।

त्रयोदशानामग्रे—

नवमहाः शुभरुचिः स्फुटगुणः विकसित विलसित ।

हरिण्यां पूर्वाक्षरषट्कं—

रुचिरविचरन् विमलविलसद् नवनवमिलत् ।

पण्णामग्रे—

विभ्राजिष्णुः संवर्धिष्णुः नव्योन्मीलत् प्रौढक्रीडत् चारुदञ्चत् स्फारस्फूर्जत् ।

दशानामग्रे—

प्रधान प्रशस्य प्रवीण प्ररूढ विसर्पि विसारि विलासि विराजि ।

दशानामग्रे—

मनोहर विकस्वर नवोदित शुभोच्छ्रित प्रकाशित ।

दशानामग्रे—

वरप्रचरत् नवप्रसरत् विसर्पिरुचिः विलासिमहः ।

दशानामग्रे—

विकस्वरवैभवः स्फुटस्फुरितोदयः प्रशस्यरुचिस्थितिः श्रिया परिलासितः ।

मन्दाक्रान्तायामाद्यमक्षरद्वयं—

उद्यत् माद्यत् राजत् रङ्गत् प्रेङ्खत् क्रीडत् भ्राजत् ।

आद्याक्षरचतुष्टयं—

स्फारस्फूर्जत् वल्गुवल्गत् उच्चैश्चञ्चत् लीलोन्मीलत् चञ्चल्लक्ष्मीः ।

चतुर्णामग्रे—

बहु दृढ घन पर ।

चतुर्णामग्रे—

निबिड बहुल प्रसृत स्फुरित रुचित ।

चतुर्णामग्रे—

घनतर बहुतम सुनिबिड विसृमर ।

चतुर्णामग्रे—

प्रवरविलसत् रुचिरविचरत् स्फुटतररुचिः बहुतममहाः ।

दशानामग्रे शेषं मालिनीप्रान्त्यसप्ताक्षरवत् ।

आद्यवर्णदशकं—

उच्चैश्चेतोहरपरिलसत् विश्वानन्दप्रदसमुदयं प्रौढप्रीतिप्रदविसृमर हर्षोत्कर्षप्रकटनलसत् ।

शार्दूलविक्रीडिते आद्यवर्णत्रयं—

प्रक्रीडत् प्रोन्मीलत् प्रस्फूर्जत् उत्प्रेङ्खत् नव्योद्यत् स्फारश्रीः चारुश्रीः लक्ष्मीवान् सच्छायः शोभावान् ।

आद्याक्षरचतुष्टयं—

चञ्चच्चारु रङ्गत्तुङ्ग प्रेङ्खत्तार स्मेरोद्दाम विभ्राजिष्णु संवर्धिष्णु स्फारस्मेर ।

आद्यपञ्चाक्षराणि—

लीलोन्मीलित उच्चैश्चुम्बित स्फारस्मेरित चारुदञ्चित ।

आद्यषडक्षराणि—

उद्दामप्रसरत् प्रोल्लासप्रमिलत् प्रावीण्यप्रचलत् नव्योत्सर्पिरुचिः ।

षण्णामग्रे—

प्रचारि प्रसारि विसर्पि मनोज्ञ प्रशस्य प्रधान प्ररोहि विलासि ।

नवानामग्रे—

विलसत् विकसत् विहसत् विचरत् रुचिर सुभग बहुल विमल विभव ।

द्वादशानामग्रे—

स्फारस्फुरत् स्फूर्जन्महाः क्रीडद्गुणः प्रौढोद्यत् रम्योद्यत् ।

द्वादशानामग्रे—

प्रौढप्रसर्पत् भ्राजिष्णुलक्ष्मीः भास्वद्विभाव प्रौढप्रभाव स्फुटप्रकाश ।

पञ्चदशानामग्रे—

सारद्युति सर्पद्गुण रङ्गद्रुचि तारोद्यत विभ्राजित संशोभित ।

स्रग्धरायां पूर्वं चतुरक्षराणि—

स्फारस्फूर्जत् लीलोन्मीलत् सर्पल्लक्ष्मीः प्रोल्लासिश्रीः ।

चतुर्णामग्रे—

प्रसर्पत् विराजत् स्फुरच्छ्री वरेण्य प्रशस्य प्रधान ।

सप्तानामग्रे—

वरतर स्फुरतम प्रसृमर विसृमर विकसित विलसित प्रकटित

एकादशानामग्रे—

विलसत् विकसत् विचरत् सुभग विमल विशद बहुल रुचिर ।

चतुर्दशानामग्रे—

वल्गद्वल्गत् चारुचञ्चत् सारसर्पत् प्रौढलक्ष्मीः स्फारशोभ ।

अष्टादशानामग्रे—

प्रकामं नितान्तं विसर्पत् प्रसर्पत् इत्यादि । एवमन्यच्छन्दस्वपि ज्ञेयम् ।

का. क. दीर्घह्रस्वाक्षरद्वन्द्वगणप्रस्तारतः क्रमात् ।
ज्ञेयाः साधारणाः शब्दाः सर्वच्छन्दोऽभियुक्तये ॥४३॥

एते शब्दा मत्कृतकाव्यकल्पलतापरिमलात् ज्ञेयाः ।

इति श्री जिनद० छन्दःसिद्धिप्रताने सामान्यशब्दस्तबकस्तृतीयः ।

म. टी. इति श्री तपागच्छाधिनायक पातसाहिश्री अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक पुरन्दरभट्टारक श्री ८ श्री हीरविजयसूरीश्वरशिष्यपण्डितश्रीशुभविजयविरचिते काव्यकल्पलतावृत्तिमकरन्दे छन्दःसिद्धिप्रतानप्राप्तसामान्यशब्दस्तबकोद्योतकस्तृतीयः प्रसरः ॥ छ ॥३.

॥ १.४ ॥

चतुर्थः स्तबकः

अथ वादशिक्षा

वादेऽनुप्रासयुक्तोक्तिः स्वोत्कर्षः परगर्हणा ।
कुलशास्त्रादिसंप्रश्नः स्वशास्त्राध्ययनप्रथा ॥४४॥

अनुप्रासयुक्तोक्तिर्यथा--

जल्पामि कल्पामितश्रीर्भ्रमो भ्रमोटनाश्रिताः ।
वदामि दामि भो जल्पिष्यामि श्यामितशात्रवः ॥

जल्पामोऽनल्पसम्बोध वादसादरनादभृत् ।
एवं शब्दाः सानुप्रासाश्चिन्त्या वादोक्तियुक्तये ॥

कियन्तोऽपि सानुप्रासाः शब्दा यथा--

सूरि भूरि पूरित सूरीणां दूरी उरी क्रूरीकृतं, दम्भ जम्भ रम्भ लम्भ भम्भा, क्रूर दूर पूर सूर पूरण, क्षोभ लोभ, प्रेम स्थेम हेम क्षेम हेमया येमया खेमहः ते महान्तः, प्राज्ञ मान्य धान्य नान्य तान्यव्यवस्थापयन्, भूप स्तूप धूप यूप कूप रूप सूपकार, भूम्यां भ्रम्यां अवन्यां वन्यां गुर्वी उर्वी उर्वीधर क्षोणी श्रोणी शोणीकृत द्रोणी क्षमायां मायां छायां जायां सायान्धतमसं, व्योम सोम रोम स्तोम कोमल होम लोभ कोमया यो महान् उक्ति भक्ति शुक्ति मुक्ति सोऽहं मोहं द्रोहं दोहं कोऽहङ्कारः, दोह लोह दोहद सन्देह सन्दोह दुग्ध मुग्ध स्निग्ध विदग्ध, दात्र गात्र पात्र क्षात्र यात्र छात्र मात्र शात्रव गोत्र स्तोत्र कोऽत्र पौत्र योत्र होत्र, कुर्या माधुर्य चातुर्य तुर्य पुर्या कार्य्य श्राप्यं नाप्यं काप्यं, वाद नाद माद साद सादर छाद शाद यादः पाद अब्द शब्द ध्यान अध्यान ध्यानान ज्ञान दान स्थान पान भान मान यान घोप जोप तोप दोष शोष लोला कोला कोलाहल गोला दोला तोलन लोलुप मन्द्र चन्द्र तन्द्र चन्द्रमाः सान्द्र, पद्र, भद्र, मद्र वाचः काच प्राचलत् साच वाचि काचित् साचि वाचाल वाचाट प्राचालीत प्राणी वाणी बाणी पाणी कृत्वा भाग्यया ।

म.टी. अथ वादशिक्षामाह--वादे प्रथम चतुष्टयं मृग्यते ।
यथा-वादी १ प्रतिवादी २ सभ्यः ३ सभापति ४ श्चेति । तल्लक्षणं ग्रन्थान्तराद् ज्ञेयम्।

जल्पामीत्यादि--

अरे त्वया समं ब्रूमो भ्रमोटनपरायणाः ।
तत्कालकल्पितैः काव्यैः काव्यकल्पद्रुमा वयं ४ ।
त्वया समं वदिष्यामि श्यामिता शेषशा (श) त्रवः ।
श्लोकैः शान्तमनः श्लोकैः शुक्लीकृताम्बरः ॥२॥

इत्यादि ।

दूरी इत्यत्र-दूरीकृत १ ऊरीकृत २ क्रूरीकृतेति ध्येयं। जंभ इति-दंष्ट्रादैत्यश्च । भूम्यामिति-भूमीशब्दः सप्तम्यन्तः, भ्रमानां समूहो भ्रम्या; द्वितीयायां भ्रम्यामिति । एवमग्रेऽपि यथौचित्येनानुप्राससिद्धये योजना कार्या । रोहमिति-रुहं जन्मनि, रुहृछञि, रोह उत्पत्तिरित्यर्थः। पोत्रेति-'पोत्रं वस्त्रे मुखाग्रे, च, शूकरस्य हलस्य च', इत्यनेकार्थे। होत्रेति-होत्रं

हवनं, पद्रेति उद्वसद्ग्रामस्थानं। साचि इति तिर्यक्, साचिः तिरः साचि इत्यव्ययं। शाखेति-शाखाशब्दस्य कवर्गीयखान्तत्वादनुप्रासाभावः चिन्त्यः।

का.क. क्षारत्यागं भाषा शाखा भावो नावो, प्रस्ताव स्थावर दाव पावन भाव राव हाव, सरस्वत्या सत्यापितनत्या हत्या पत्या मत्या रत्या, गीर्वाण गीर्वाणि, कविना भविता मविता पविता रचिता पाता, नैव दैव सैव, धीर कीर क्षीर चीर जीरक तीर नीर वीर भीर हीर कोटीर कुटीर पानीर महारमण, आरब्ध लब्ध स्तब्ध, वर्ण कर्ण अर्ण वर्णक तर्णक अर्णक पर्णक, अर्णव स्वर्ण, पण्डित खण्डित दण्डित मण्डित, क्रुद्ध वृद्ध रुद्ध शुद्ध प्रबुद्ध युद्ध उद्धव, मालती भारती व्रतती कृती, कवि गवि छवि पवि रवि, रिक्त सिक्त विविक्त, द्वैधा त्रेधा वेधा मेधा मेधावी, आतुर चतुर, कोत्र क्षेत्र नेत्र वेत्र नेत्र येत्र क्षेत्र क्षेत्रज क्षेत्रज्ञ, धर्म चर्म नर्म शर्म मर्म कर्म धर्म हर्म्य, दक्ष कक्ष वक्ष यक्ष पक्ष रक्ष लक्ष भक्ष, कुशलव कल गल दल पल उपल फल बहुल हल, गेय जेय देय ज्ञेय ध्येय नेय पेय हेय मेय विधेय, पारीण प्रवीण धुरीण, दर्प कर्पर खर्पर तर्पण दर्पण अर्पण सर्पण सर्प तर्प, विनद छद पद मद रद, गान तान स्थान दान मान पान खान रान लान भान, सर्व गर्व खर्व पर्व चर्वण अथर्वण, अहङ्कार हुङ्कार ओङ्कार आकार, कोप गोप आटोप रोप, क्रोध बोध योध रोध शोध, उत्कर्ष अमर्ष अपकर्ष, काय उपाय।

स्वोत्कर्षो यथा--

ज्योतिषामिव तीक्ष्णांशु- स्ताराणामिव चन्द्रमाः ।
सैन्येशानामिव स्कन्दः कवीनामहमुत्तमः ।।

प्रशंसाहेतोः सारसङ्ग्रहो यथा—

वसूनां पावकश्चन्द्रस्ताराणां ज्योतिषां रविः ।
रुद्राणां शङ्करो यक्षरक्षसां धनदोऽपि च ।।

गन्धर्वाणां चित्ररथो बृहस्पतिः पुरोधसाम् ।
महर्षीणां भृगुर्मुनिर्देवर्षीणां च नारदः ।।

सैन्येशानां कार्तिकेयो मरीचिर्मरुतामपि ।
सिद्धानां कपिलो, व्यासो मुनीनां, योगिनां मरुत् ।।

यादसां व रुणोऽनन्तो नागानां, रूपिणां स्मरः ।
सर्पाणां वासुकिः, शुक्रः कवीनां, नृपतिर्नृणाम् ।।

सर्वशस्त्रभृतां रामः पाण्डवानां धनञ्जयः ।
सर्वायुधानां दम्भोलिः पक्षिणां गरुडस्तथा ।।

उच्चैःश्रवास्तुरङ्गाणां, गजानामभ्रमुपतिः ।
झषाणां मकरः, सिंहो मृगाणां, कामधुग् गवाम् ।।

पर्वतानां मेरुगिरिः, स्थावराणां हिमालयः ।
नदीनां जह्नुतनया सरसां सरितांपतिः ।।

विद्यानामध्यात्मविद्या, गायत्री छन्दसामपि ।
अक्षराणामकारश्च भूतानामपि चेतना ।।

वेदानां सामवेदोऽपि, मासानां मार्गशीर्षकः ।
यज्ञानां जपयज्ञश्च, श्रीवृक्षः सर्वशाखिनाम् ॥
वसन्तः सकलर्तूनामोषधीनां यवोऽपि च ।
तृणानां दर्भो, धातूनां स्वर्णं, खानां मनस्तथा ॥

म.टी. उद्धवेति-उद्धव उत्सवः, वैधेयो मूर्खः, अखर्वः संपूर्ण इति । वसूनामिति-तेजसां चित्ररथो देवगायनः, भृगुमुनिः शुक्रपिता, अनन्तः शेषनागः । अभ्रमुपतिरिति-अभ्रमुदे, व्यापतिरैरावणः । स्थावराणामिति-स्थिराणां हिमाचलो हि दक्षिणदिशि गच्छतोऽगस्तेरादेशात् सुप्त एवास्थित इति स्थावरः । सरसामिति-सरोवराणां । औषधीनामिति-औषध्यः, फलपाकान्ता इति वचनाद् । धान्यानामिति-खानामिन्द्रियाणामिति । स्थगनमित्याच्छादनं । प्रेप्सुरिति-प्राप्तुमिच्छुः प्रेप्सुः । तुमर्हादिच्छायामिति-सन् ज्ञप्यापो ज्ञीपीप् इत्येतेन ईप् आदेशः । सन् भिक्षाशंसेरुरित्यनेन उम् द्वित्वाभावे च प्रेप्सुरित्यर्थः । प्रतिश्रोतो गतिः प्रवाहे सम्मुखगमनम् ॥क॥

का. क. परगर्हणायथा—

कृष्णसर्पस्य मण्डूकश्चपेटां दातुमुद्यतः ।
रे मूढ, यन्मया सार्धं वादं कर्तुमिच्छसि ॥

एवं वृषभः सुरदन्तिनं विषाणैः प्रहर्तुं, द्विपो दन्ताभ्यां गिरिं पातयितुं, शशकः कराभ्यां सिंहस्कन्धकेसरान् क्रष्टुं, मूषकः स्वदन्तैर्मार्जारदंष्ट्रां पातयितुमुद्यत इत्यादि ।

तथा—

तुलया तोलनं मेरोः करेण स्थगनं रवेः ।
मानं व्योम्नोऽङ्गुलीभिर्यत्प्रेप्सुर्वादेन मज्जनम् ॥

एवं बाहुभ्यामब्धेस्तरणं, शिरसा गिरिर्भेदः, पद्भ्यां नद्याः प्रतिस्रोतोगतिरित्यादि ।

तथा—

इदं पाषाणदलनमन्धस्याऽऽलेख्यादर्शनम् ।
मन्त्रणं बधिरैर्मूढ त्वया वादं तनोमियत् ॥

एवं जलविलोडनं, व्योमहननं, निर्द्धनदण्डनं मृगतृष्णायां जलादानमिति । यथा—

खड्गधाराप्रसञ्चारमयश्चणकचर्वणम् ।
अङ्गारशयनं प्रेप्सुर्यत्त्वं मज्जनमीहसे ॥

एवं सिकताकणभुक्तिः, तप्तत्रपुपानं, दावानलज्वालालिङ्गनं, कृष्णसर्पमुखचुम्बनं व्यालखेलनमित्यादि ।

तथा—

करेण काङ्क्षसि क्रष्टुं भुस्थः स्वर्गद्रुमञ्जरीम् ।
वादेन यदसौ मूढ! जिघृक्षुर्मज्जयश्रियम् ॥

एवं शेखरमणिभिः, गरुडपक्षैरवतंसं, ऐरावणदन्तैस्ताटङ्कं, कृतान्तमहिषेण पानीयमानयितुं, सिंहदंष्ट्रया कण्डूमपनेतुमित्यादि ।

तथा—

सुखसुप्तस्त्वया सिंहः पादाघातेन बोधितः ।
यहंदवादवचनाद्दोपेनपरिकोपितः ॥

एवं हस्ताघ्रातेन कृष्णाहिरुत्फणीकृतः, वाताभिमुखस्थेन दा(द)वाग्निर्ज्वालितः, शरीरसौख्याय कपिकच्छलता ऽऽलिङ्गिता, दुर्वासाः दुर्वचनैः कोपित इत्यादि ।

कुलशास्त्रादिसम्प्रश्नो यथा—

कस्मिन् कुले तवोत्पत्तिः कुत्र शास्त्रे परिश्रमः ।
कस्मादकस्मात्प्राप्तोऽत्र सर्वमेतत्प्रकाश्यताम् ॥

स्वशास्त्राध्ययनप्रथा यथा—

लक्षणे मम दक्षत्वं साहित्ये संहिता मतिः ।
तर्के कर्कशतात्पर्यं क्व शास्त्रे नास्ति मे श्रमः ॥

इत्याद्यनेकोल्लेखैः सर्वच्छन्दोभिर्वादोऽभ्यसनीयः ।

इतिश्रीजिनदत्तसूरि. छन्दःसिद्धिप्रतानि वादस्तबकश्चतुर्थः ।

म.टी. इतिश्री तपागच्छाधिनायक पातसाहि श्री अकब्बरप्रतिबोधप्रदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक ४ श्री हीरविजयसूरीश्वरशिष्यपण्डित श्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे छन्दःसिद्धिप्रतानप्राप्त वादस्तबकोद्योतकश्चतुर्थप्रसरः ॥छ॥४

॥ १.५ ॥

पञ्चमः स्तबकः

अथ वर्ण्यानि

अथ वर्ण्यानि कथ्यन्ते तानि यानि कवीश्वरैः ।
महाकाव्यप्रभृतिषु प्रबन्धेषु बबन्धिरे ॥४५॥

राजा मन्त्रिपुरोहितौ नृपवधू राजाङ्गजः सैन्यपो
देशग्रामपुरःसरोऽब्धिसरिदुद्यानाद्यरण्याश्रमाः ।
मन्त्रो दूतरणप्रयाणमृगयाऽश्वेभर्त्विनेन्दूदया ।
वीवाहो विरहः स्वयंवरसुरा पुष्पाम्बुखेला रतम् ॥४६॥

नृपे विद्या नयः शक्तिः बलं तस्करताक्षयः ।
प्रजाशास्तिः प्रजारागो धर्मकामार्थतुल्यता ॥४७॥

प्रयाणरणखड्गादिशास्त्राण्यरिपराजयः ।
अरिनाशोऽरिशैलादिवासोऽरिपुरशून्यता ॥४८॥

महःश्रीदानकीर्त्याद्या गुणौघा रूपवर्णनम् ।
मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः ॥४९॥

महामात्ये नयः शास्त्रं स्थैर्यं बुद्धिर्गभीरता ।

म.टी. अथ वर्ण्यस्तबकं विवृण्वत् (न्) वर्ण्यपदार्थानाह । राजेति—राजा छत्रचामरादिविभूषितो भूपतिः१, बुद्धिमान् प्रधानं (नः ?) (२), पुरोहितः शान्तिकपौष्टिकादिकर्ता ३, नृपवधू राज्ञी ४, राजाङ्गजो राजपुत्रः ५. सैन्यपः सेनानी ६. देशः सौराष्ट्रादिः ७. ग्रामः करादिगम्यः ८. पुरी करादिरहिता ९. सरः तडागः १०. अब्धिः समुद्रः ११. सरित् नदी १२. उद्यानं नगरासन्नवनखण्डं १३. अद्रिः पर्वतः १४. अरण्यमटवी १५. आश्रमो मुनिस्थानं तापकावास इत्यर्थः १६. मन्त्रो रहो विचारः १७. दूतः संदेशहारकः १८. रणः संग्रामः १९. प्रयाणं देशसाधनाय यात्रा २०. मृगया आखेटकः २१. अश्वो घोटकः २२. इभो हस्ती २३. ऋतुर्वसन्तादिः २४. इनश्च इन्दुश्च इनेन्दू, तयोरुदय इनेन्दूदयः २५. विवाहः पाणिग्रहणं २७. विरहो भर्तृपुत्रादिसम्भवो वियोगः २८. स्वयंवरः स्वेच्छया वरणं २९. सुरा मदिरा ३०. पुष्पेति खेलनं खेलः पुष्पं चाम्बु च ३१. पुष्पाम्बुनीतयोः खेलः कोऽर्थः पुष्पावचयः जलकेलिश्च ३२. रतं मैथुनं ३३. इति द्वारकाव्यं। एतेषु पदार्थेषु वर्ण्यधर्मा यथा नृपे विद्येति चतुर्दशविद्या भवन्ति । तद्यथा––शिक्षा १. कल्पः २. व्याकरणं ३. छन्दः ४. ज्योतिः ५. निरुक्तिः ६. चत्वारो वेदाः १०. मीमांसा ११. आन्वीक्षिकी १२. धर्मशास्त्रं १३. पुराणं १४. चेत्यत्र । शिष्यते वर्णविवेकोऽनयेति शिक्षामातृकापाठः । भले शास्त्रमित्यर्थः । कर्मणां सिद्धस्वरूपः प्रयोगः कल्प्यतेऽवगम्यतेऽनेनेति कल्पः कर्मशास्त्रं । व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणं शब्दशास्त्रं । एकाक्षरादिछन्दःप्रतिपादकं शास्त्रं छन्दःशास्त्रं ज्योतिर्ज्योतिःशास्त्रं निरुक्तिः पदभञ्जनं, पञ्जिकेति यावत् । पदानि भंक्त्वा व्याख्यायन्ते यत्र तत्पदभञ्जनमित्यर्थः । इति षडङ्गानि वेदाः प्रसिद्धाः अर्थशास्त्रविचारणा-मीमांस्यते-विचार्यतेऽनयेति मीमांसा तच्छास्त्रं सांख्यादि दर्शनशास्त्रं । आन्वीक्षिकी तर्कविद्या प्रमाणशास्त्रं । अष्टादशस्मृतयो धर्मशास्त्रं । अष्टादश पुराणानि पुराणशास्त्रं । कार्य-

कारणभावसम्बन्धेनैतानि चतुर्दश विद्यास्थानानि। केचन गन्ध १. वायु २. धनुर्वेदै ३. र्थशास्त्र ४. समन्वितैरष्टादश विद्यास्थानानि कथयन्तीति ।

यदुक्तं परिमले—

ऋग्वेदादायुर्वेदोऽभूद्धनुर्वेदो यजुर्भवः
गान्धर्वं सामवेदोत्थमर्थशास्त्रमथर्वतः ॥१॥

नय इति-नीतिशास्त्रोक्तो राजव्यवहारो नयः। यदुक्तम्—

कृषिर्वणिक् पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
खन्याकरकरादानं शून्यानां च निवेशनम् ॥१॥

इति अष्टौ कर्माणि राज्ञः। तथा—सन्धिविग्रहयानासनद्वैधीभावसंश्रया षड्गुणाश्चेत्यादि स्वयमभ्युह्यम्।

शक्तिरिति—

मन्त्रशक्तिर्ज्ञानबलं कोशदण्डबलं पुनः ।
प्रभुशक्तिर्विक्रमौजश्चोत्साहशक्तिरीश्वरे ॥१॥

का.क. शक्तिःशस्तमलोभत्वं जनरागो विवेकिता ॥५०॥

मन्त्री भक्तो महोत्साहः कृतज्ञो धार्मिकः शुचिः ।
अकर्कशः कुलीनश्च स्मृतिज्ञः सत्यभाषकः ॥५१॥

विनीतः स्थूललक्षश्चाऽव्यसनो (वदान्यः) वृद्धसेवकः ।
अक्षुद्रः सत्त्वसम्पन्नः प्राज्ञः शूरोऽचिरक्रियः ॥५२॥

राज्ञा परीक्षितः सर्वोपधासु निजदेशजः ।
राजार्थस्वार्थलोकार्थकारको निस्पृहः शमी ॥५३॥

म.टी. दण्डो गजरथाश्वपत्तिलक्षणं चतुरङ्गसैन्यं । बलमिति षड्विधं बलम्। एतद्धि राज्ञो मौलाः क्रमागताः ।

भृतकानि योगिनस्तु भृत्याः सामान्यसेवकाः ॥१॥
श्रेणयो जयनैशाले, शाद्या मित्राणि बन्धयः
भिल्लाद्या आटविकास्तु जिगीषोर्विजयप्रदाः ॥२॥

एकैकरथाः अश्वापत्तिः पञ्चपदातिका ।
सेना सेनामुखं गुल्मो वाहिनी पृतना चमूः ॥३॥

अनीकिनी च पत्तेः स्यादिभाद्यैस्त्रिगुणैः क्रमात् ।
अनीकिनीभिर्दशभिः पुनरक्षौहिणी मता ॥४॥

स्यात् सेनाऽक्षौहिणी नाम खगाष्टैकद्विकैर्गजैः ।
रथैस्तैभ्यो हयैस्त्रिघ्नैः पञ्चघ्नैश्च पदातिभिः ॥५॥

स्थापना यथा ॥छ॥ खड्गादिशस्त्राणीति—

शस्त्रं चतुर्विधमुक्तं द्विधा पाणियन्त्रमुक्तं शक्तिशरादिकं
अमुक्तं शस्त्रिकादि स्याद्यष्ट्याद्यं तु द्वयात्मकम् ॥१॥

१.	पंक्ति	हस्ती	रथ १	तुरंग ३	पदाति ५
२.	सेना	गज ३	रथ ३	तुरंग ९	पदाति १५
३.	सेनामुखं	गज ९	तुरंग २७	रथ ९	पदाति ४५
४.	गुल्म	गज २७	रथ २७	तुरंग ८१	पदाति १३५
५.	वाहिनी	गज ८१	रथ ८१	तुरंग २४३	पदाति ४०५
६.	पतनी	पृतना	गज २४३	तुरंग ७२९	पदाति १२१५
७.	चमू	गज ७२९	रथ ७२९	तुरंग २१८७	पदाति ३६४५
८.	अनीकिनी	गज २१८७	रथ २१८७	तुरंग ६५६१	पदाति १९०३५
९.	अक्षौहिणी	गज २१८९०	रथ २१८७०	तुरंग ६५६१०	पदाति १०९३५०

० यदुक्तम्-ब्राह्मण १. क्षत्रिय २. वैश्य ३ शूद्र ४. मालिक ५. ताम्बूलिक ५. कुम्भकार ७. कंसारक ८. सुवर्णकार ९. रूपाणि श्रेणिनामानि इति ।

षट्त्रिंशदायुधानि चापबाण १. नाराच २. क्षुरप्रभृतीनि परिमलाद् ज्ञेयानि । गुणौघा इति अलङ्काराभ्यासस्तबके गुणसंकलनाकाव्यम् ।

मन्ध्याऽहंकृतिशौर्यसाहसमहो धीरत्वशक्तिश्रियो
विद्यादानशरण्यवाक्शमकलासत्यौचितीभक्तयः ।

न्यायस्थैर्यविवेककीर्तिविनयप्रज्ञाप्रतिष्ठादया–

ज्ञालावण्यसुदृक्गभीरगुरुतासौभाग्यसौख्योद्यमाः ॥१॥

द्वासप्ततिकलाः परिमलाद् ज्ञेयाः ।

रूपवर्णनमिति––

त्रिषु विपुलो गंभीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः ।
सप्तसु रक्तो राजा पञ्चसु सूक्ष्मश्च दीर्घश्च ॥१॥

ललाटं १ वदनं २ वक्षस्त्रितयं विपुलं वरम् ।
गम्भीरं त्रितयं नाभिः स्वरः सत्त्वं प्रशस्यते ॥२॥

नासा ग्रीवा नखाः कक्षादन्मुखान्युन्नतानि षट् ।
कण्ठो जंघायुगं पृष्ठं लिङ्गं ह्रस्वचतुष्टयम् ॥३॥

रक्तान्यक्ष्यन्त पाण्यंह्रि जिह्वातालुनखाधराः ।
सप्त पञ्च सूक्ष्माणि त्वग् नखकेशाङ्गुलीरदाः ॥४॥

पञ्च दीर्घाणि स्तनदृग् मध्यदोर्नासिका हनुः ।
त्रयस्त्रिंशत्तमं त्वेषु सत्त्वं द्वात्रिंशतोऽधिकम् ॥५॥

ऊरुजठरकं वक्षो बाहू पृष्ठं शिरस्तथा ।
अष्टाङ्गानि पुनः शेषाण्युपाङ्गानि विदुर्बुधाः ॥६॥

महामात्येति-अत्रापि नयादयो राजवद् ज्ञेयाः ।

स्थूललक्षो बहुप्रदे इतिवचनात् दाता प्रोच्यते । भिया धर्मार्थकामैश्च परीक्षाया न सोपधा इतिवचनात् सर्वोपधासु सर्वपरीक्षासु धर्मार्थकामलक्षणासु । अमोघवचनः सफलवचनः, नीरोगदक्षयोः कल्यः । आन्वीक्षिकी तर्कविद्या त्रयी च चाणक्यभग्नवात्स्यायनशास्त्रत्रयी । वार्ता कृषिः पाशुपाल्यं वणिज्या च । वृत्तिपर्यायो वार्ता ।

यदुक्तम्——

आजीवो जीवनं वार्ता जीविका वृत्तिवेतने। इति।

दण्डनीतिः यथौचित्येनापराधिनां दण्डदानम्।

का.क. अमोघवचनः कल्पः पालिताशेषदर्शनः।
पात्रौचित्येन सर्वत्र नियोजितपदक्रमः ॥५४॥

आन्वीक्षिकीत्रयीवार्त्तादण्डनीतिकृतश्रमः।
क्रमागतो वणिक्पुत्रो भवेद्राज्यविवृद्धये ॥५५॥ कुलकम्।

पुरोहिते स्मृतिर्वेदाः निमित्तापत्प्रतिक्रियाः।
दण्डनीतिज्ञता शुद्धधर्मशीलकुलक्रमाः ॥५६॥

देव्यां विज्ञानचातुर्यत्रपाशीलव्रतादयः।
रूपलावण्यसौभाग्यप्रेमशृङ्गारमन्मथाः ॥५७॥

वेणीधम्मिलसीमन्तभालश्रवणनासिकाः।
कपोलाधरनेत्रभ्रूकटाक्षदशनोक्तयः ॥५८॥

कण्ठबाहुकरोरोजनाभ्यो मध्यं वलित्रयम्।
रोमालिश्रोणिजङ्घोरूपातिक्रमनखाः क्रमात् ॥५९॥

कुमारे शस्त्रशास्त्रश्रीः कलाबलगुणोच्छ्र्याः।
बाह्याली खुरली राजभक्तिः सुभगतादयः ॥६०॥

म.टी. पुरोहिते इति—मन्वाद्यष्टादश स्मृतयः। निमित्तेति-दुर्निमित्तानां आपदां दैवीनां मानुषीणां च प्रतीकारः। मानवा मौलितो वर्ण्या इत्यनुक्रमं दर्शयन्नाह——

वेणीति-धम्मिल्लः अंबोडकः, उक्तयो वाच्यः, कुमारे इति बाह्याली, अश्वकेलिर्खुरलीश्रमः, सेनापताविति मन्त्रि-पुरोहितसैन्येष्वपि, राजवर्णनोक्ता गुणा औचित्यतो वर्ण्या इति। देशे इति-खन्यो वज्रादीनां द्रव्याणि नाणकानि, पण्यानि क्रयाणकानि, धान्यानि यवादीन्यनेकप्रकाराणि, आकरा लवणादीनामुत्पत्तिस्थानानि, दुर्गाणि जलगिरिवनदुर्गाणि।

नदीमातृकतेति-देशो नद्यम्बुजीवनः स्यान्नदीमातृक इतिवचनात् नद्यम्बुजीवनत्वमिति। ग्रामे इति——ग्रामेयी, ग्रामीणस्त्री। पुरेइति——सतीत्वरी पुंश्चली स्त्री।

का.क. सेनापत्तौ महोत्साहः स्वामिभक्तिः सुधीरधीः।
अभ्यासो वाहने शास्त्रे शस्त्रे च विजयो रणे ॥६१॥

देशे बहुखनिद्रव्यपण्यधान्याकरोद्भवाः।
दुर्गग्रामजनाधिक्यनदीमातृकतादयः ॥६२॥

ग्रामे धान्यलतावृक्षासरसीपशुपुष्टयः।
क्षेत्राऽरघट्टकेदारग्रामेयीमुग्धविभ्रमाः ॥६३॥

पुरेऽट्टपरिखः वप्रप्रतोलीतोरणालयाः।
प्रासादाध्वप्रपाऽऽरामवापी, वेश्या सतीत्वरी ॥६४॥

सरस्यम्भोलहर्यम्भोगजाद्यम्बुजषट्पदाः ।
हंसचक्रादयस्तीरोद्यानस्त्रीपान्थकेलयः ॥६५॥

अब्धौ द्वीपाद्रिरत्नोर्मिपोतयादोजगत्प्लवाः ।
विष्णुः कुल्यागमश्चन्द्राद् वृद्धिरौर्वोऽब्दपूरणम् ॥६६॥

सरित्यम्बुधियायित्वं वीच्यो जलगजादयः ।
पद्मानि षट्पदा हंसचक्राद्याः कूलशाखिनः ॥६७॥

उद्याने सारिणः सर्वफलपुष्पलताः द्रुमाः ।
पिकालिकेकिहंसाद्याः क्रीडावाप्यध्वगस्थितिः ॥६८॥

शैले मेघौषधीधातुवंशकिन्नरनिर्झराः ।
शृङ्गपादगुहारत्नवनजीवाऽध्युपत्यकाः ॥६९॥

अरण्येऽहिवराहेभयूथसिंहादयो द्रुमाः ।
काकघूककपोताद्या भिल्लतल्लदवाद्रयः ॥७०॥

आश्रमेऽतिथिपूजैणविश्वासो हिंस्रशान्तता ।

म.टी. अब्धौ इति—और्वो बडवानलः । मेघपूरणं उद्याने इति । सारणिर्जलमार्गः नीक इति प्रसिद्धाऽपि । काली कोकिलभृंगौ । शैल इति—शृङ्गाणि शिखराणि पर्यन्तपादाः पर्वताः पर्वतस्योर्द्ध्वभूमिरधित्यका, अधोभूमिरुपत्यका । अरण्ये इति अखातं सरः ।

का. क. यज्ञधूमो मुनिसताद्रुसेको वल्कलद्रुमाः ॥७१॥

मन्त्रे पंचाङ्गताशक्तः षाड्गुण्योपायसिद्धयः ।
उदयाश्चिन्तनीयाश्च स्थैर्योन्नित्यादिसूक्तयः ॥७२॥

दूते स्वस्वामितेजःश्रीविक्रमौन्नत्यकृद्वचः ।
शत्रुक्षोभकरी चेष्टा धाष्ट्यं दाक्ष्यमभीरुता ॥७३॥

युद्धे तु धर्मबलचाररजांसि तूर्यनिश्वासनादशरमण्डपरक्तनद्यः ।
छिन्नातपत्ररथचामरकेतुकुम्भिमुक्ताः सुरीःवृतभरामरपुष्पवर्षाः ॥७४॥

प्रयाणे भेरिनिस्वानभूकम्पबलधूलयः ।
करभोक्षध्वजच्छत्रवणिक्शकटवेसराः ॥७५॥

मृगयायां श्वसञ्चारो वागुरा नीलवेषता ।
भटढक्का मृगत्रासः सिंहयुक्तं त्वरागतिः ॥७६॥

अश्वे खुरखुरोत्खातरजःसल्लक्षणस्थितिः ।
गतिर्वेगवती वक्रभास्यं धाराप्रपञ्चनम् ॥७७॥

गजे सहस्रयोधित्वमुच्चत्वं कर्णचापलम् ।
अरिव्यूहविभेदित्वं कुम्भमुक्तामदालिनः ॥७८॥

म.टी. मन्त्र इति––कार्याणामारम्भोपाय: १. पुरुषद्रव्यसम्पत् २. देशकालविभाग: ३. विनिपातप्रतीकार: ४. कार्यसिद्धिश्चेति ५. पञ्चाङ्गो मन्त्रः । प्रभुत्वोत्साहमन्त्रजा शक्तिस्त्रिधा । सन्धि १. विग्रह २. यान ३. आसन ४. संश्रय ५. द्वैधीभाव इति, षड्गुणा: । साम १. दान. २. भेद ३. दण्डा ४. उपायाश्चत्वार: । भूमि १. हिरण्य २. मित्राणां तिस्र: सिद्धय: । स्थान १. वृद्धि २ क्षय ३. लक्षणास्त्रय उदया: । चयापचयरहितावस्था–स्थानं १. अनपचया वृद्धि २. चयरहिता तु सा क्षय: ३. । मृगयायामिति-श्वानसञ्चार: । वागुरा मृगजालिका । अश्वे इति––धौरितं १. वल्गितं २. प्लुति ३. उत्तेजित ४. उत्तेरितानि ५. एता: पञ्च धाराख्या अश्वानां गतय: एतल्लक्षणं त्वभिधानकोशे ज्ञेयं । गजे जित ४. उत्तेरितानि ५. एता: पञ्च धाराख्या अश्वानां गतय: एतल्लक्षणं त्वभिधानकोशे ज्ञेयं । गजे इति––

गज. परपुरामर्दी लक्ष्मीनिकेतनम् ।
कान्ताकुचाभकुम्भश्रीस्तरुशैलादिभेदकृत् ।

का.क.

सुरभौ दोलाकोकिलमारुतसूर्यगतितरुदलोद्भेदा: ।
जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझङ्कारा: ॥७९॥

ग्रीष्मे पाटलमल्लीतापसर:पथिकशोषवातोल्य: ।
सक्तुप्रपाप्रपास्त्रीमृगतृष्णाम्रादिफलपाका: ॥८०॥

वर्षासु घनशिखिविस्मयहंसगमा: पङ्ककन्दलोद्भेदौ ।
जातीकदम्बकेतकझंझाऽनिलनिम्नगा हलिप्रीति: ॥८१॥

शरदीन्दुरविपटुत्वं जलाच्छताऽगस्तिहंसवृषदर्पा: ।
सप्तच्छदपद्मसिताभ्रधान्यशिखिपक्षमदपाता: ॥८२॥

हेमन्ते दिनलघुता शीतयवस्तम्बमरुबकहिमानि ।
शिशिरे शिरीषधूमरिकुन्दाम्बुजदाहशिखिरतोत्कर्षा: ॥८३॥

सूर्येऽरुणता रविमणिचक्राम्बुजपथिकलोचनप्रीति: ।
तारेन्दुदीपकौषधिघूकतमश्चौरकुमुदकुलटार्ति: ॥८४॥

चन्द्रे कुलटा चक्राम्बुजमानविरहितमौर्तिरौज्ज्वल्यम् ।
जलधिजननेत्रकैरवचकोरचन्द्राश्मदम्पतिप्रीति: ॥८५॥

विवाहे स्नानशुभ्राङ्गभूषोलूलत्रयीरवा: ।
वेदी सङ्गीततारेक्षालाजा मङ्गलवर्तनम् ॥८६॥

विरहे तापनि:श्वासचिन्ता मौनं कृशाङ्गता ।
अब्जशय्या निशादैर्घ्यं जागर: शिशिरोष्मता: ॥८७॥

स्वयंवरे शचीरक्षा मञ्चमण्डपसज्जता।
राजपुत्री नृपकारान्वयचेष्टाप्रकाशनम् ॥८८॥

सुरापाने विकलता स्खलनं वचने गतौ।
लज्जा मानच्युतिः प्रेमाधिक्यं रक्तेक्षणभ्रमाः ॥८९॥

पुष्पावचये पुष्पावचयः पुष्पार्पणार्थने दयिते।
मालाद्यं गोत्रस्खलनेर्ष्यावक्रोक्तिसम्भ्रमाश्लेषाः ॥९०॥

जलकेलौ सरःक्षोभश्चक्रहंसापसर्पणम्।
पद्मम्लानिपयोबिन्दुग्राम्रा भूषणच्युतिः ॥९१॥

सुरते सात्त्विका भावाः सीत्कारः कुड्मलाक्षिता।

म.टी. सुरभाविति—वसन्तर्तौ जातिविनितरपुष्पाणि। ग्रीष्मे इति—मल्ली, मल्लिका। वर्षास्विति हलिप्रीतिः कृषिकप्रीतिः। शरदीति—सप्तच्छदो वृक्षविशेषः—शिखीति मयूराणां। पक्षमदयोः पातो गलनमित्यर्थः।

हेमन्तेति-स्तम्बो धान्यगुच्छः, मरुबको वृक्षः मरुओ इति प्रसिद्धः। शिशिरे इति—शिरीषो वृक्षविशेषः। सूर्ये इति-प्रीतिशब्दो रविमण्यादी(दि)षु प्रत्येकं सम्बध्यते। अस्तिशब्दस्तारादिकुलटान्तेषु प्रत्येकं योज्यते। चन्द्रे इति-अत्राधिकारान्मानिनीमानं मानशब्देनोच्यते। अस्तिशब्दः कुलटादिषु प्रत्येकं सम्बध्यते। प्रीतिशब्दो जलध्यादिषु प्रत्येकं योज्यते।

विवाहे इति—

अष्टौ विवाहा वर्णानां संस्कारार्थं प्रकीर्तिताः।
ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्तथैव च ॥

इत्यादिपरिमलाद् ज्ञेयं—

उलूलो मंगलध्वनिः। त्रयीरवा वेदत्रयीरवाः। वेदी चतुरिका। सङ्गीतं प्रेक्षणार्थं। तारेक्षा ताराया अवलोकनं लोचनमीलनमिति। स्वयंवरे इति-शचीरक्षा इन्द्राणी, रक्षां कुरुते। नृपाकारवंशचेष्टावलोकनम्। पुष्पावचये इति-भर्तरि पुष्पाणामर्पणं याचनं चेति। सुरते इति।

स्वेद १, वेपथु २, रोमांच ३, स्वरभेद ४, विवर्णता ५।
स्तम्भा ६, ऽश्रु, प्रलया, ८ श्चैतेऽष्टौ भावाः सात्त्विका मताः १॥

चिद्रूपैरिति पण्डितैः।

काञ्चीकङ्कणमञ्जीररवोऽधरनखक्षते ॥९२॥

वर्ण्येषु वर्ण्यभावनां दिङ्मात्रमिति कीर्तितम्।
चिद्रूपैश्चिन्त्यमानानां भवत्येषामनन्तता ॥९३॥

असतोऽपि निबन्धेनानिबन्धेन सतोऽपि च।
नियमेन च जात्यादेः कवीनां समयस्त्रिधा ॥९४॥

असतोऽपि निबन्धो यथा—

रत्नादि यत्रतत्राद्रौ हंसाद्यल्पजलाश्रये ।
जलेभाद्यं नभोनद्यामम्भोजाद्यं नदीष्वपि ।।९५।।

तिमिरस्य तथा मुष्टिग्राह्यत्वं सूचिभेद्यता ।
अञ्जलिग्राह्यताकुम्भोपवाह्यत्वे विधुत्विषः ।।९६।।

शुक्लत्वं कीर्तिहासादौ कार्ण्यं दुष्कीर्तिपापादिषु ।
प्रतापे रक्ततोष्णत्वे रक्तत्वं क्रोधरागयोः ।।९७।।

विभावर्यां भिन्नतटाश्रयणं चक्रवाकयोः ।
ज्योत्स्नापानं चकोराणां वर्णयेदसदप्यदः ।।९८।। चतुर्भिः कलापकम् ।

सतोऽप्यनिबन्धो यथा—

वसन्ते मालतीपुष्पं फलं पुष्पं च चन्दने ।
अशोके च फलं ज्योत्स्नाध्वान्ते कृष्णान्यपक्षयोः ।।९९।।

कामिदन्तेषु कुन्दानां कुड्मलेषु च रक्तताम् ।
प्रियङ्गुपुष्पे पीतत्वं सरोजमुकुलादिषु ।।२००।।

हरितत्वं दिवा नीलोत्पलानां स्मेरता दिवा ।
शेफालिकुसुमे भ्रंशं वर्णयेन्न सदप्यदः ।।१०१।। त्रिभिर्विशेषकम् ।

नियमो यथा—

मुक्तास्ताम्रपर्ण्यामेवाब्धिष्वेव मकरानपि ।
भूर्जद्रून् हिमवत्येव मलये ह्येव चन्दनम् ।।१०२।।

सामान्यग्रहणे वारिमुचां कृष्णत्वमेव हि ।
रक्तत्वमेव रत्नानां पुष्पाणां शौक्ल्यमेव च ।।१०३।।

तथा वसन्त एवान्यभृतानां ध्वनितोद्भवम् ।
वर्षास्वेव मयूराणां रुतं नृत्तं च वर्णयेत् ।।१०४।। त्रिभिर्विशेषकम् ।

नियमविशेषो यथा—

नीलकृष्णयोर्हरितकृष्णयोः श्यामकृष्णयोः ।
पीतपाटलयोः शुक्लगौरयोर्नागसर्पयोः ।।१०५।।

महार्णवसागरयोः क्षीरक्षारसमुद्रयोः ।
कमलासम्पदोः कामध्वजे मकरमत्स्ययोः ।।१०६।।

द्वादशानामप्यर्काणां वार्ध्यत्रिदृग्जचन्द्रयोः ।
चन्द्रे शशैणयोर्विष्णुशेषकूर्मादिकस्य च ।।१०७।।

नारायणदामोदरमाधवप्रभृतेरपि ।
दानवासुरदैत्यानामैक्यमेवाभिसंमतम् ॥१०८॥ चतुर्भिः कलापकम् ।

दानवास्तु विप्रचित्तिः शम्बरो नमुचिस्तथा ।
पुलोमादयोऽथ दैत्या हिरण्याक्षो विरोचनः ॥१०९॥
बाणो हिरण्यकशिपुर्बलिप्रह्लादकादयः ।
अथासुरा वृषपर्वबलवृत्रादयः स्मृताः ॥११०॥
स्त्रीणामक्ष्णां कटाक्षाणां शुक्लता श्यामताऽथवा ।
कृष्णताऽप्यथवा शुक्लश्यामता शुक्लकृष्णता ॥१११॥
बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता ।
मनोभवस्य मूर्त्तत्वममूर्त्तत्वं च वर्ण्यते ॥११२॥
देवदेवीस्थितिं विद्यान्नायिकानायकक्रमम् ।
स्वभावान् सर्वबीजानां व्यवस्थां देशकालयोः ॥११३॥

एतत्श्लोकोक्तभावान् वर्ण्यानां विशेषान्तराणि कविसमयोदाहरणानि मत्कृतकाव्यकल्पलतापरिमलाद् ज्ञेयानि । स्तबकोऽयं गतार्थः ।

इति श्रीजिनदत्त० वर्ण्यस्थितिस्तबकः पञ्चमः ॥
समाप्तश्चायं छन्दःसिद्धिप्रतानः प्रथमः ॥

म. टी. अथ कविसमयः——

अर्थं परम्परायातमशास्त्रीयमलौकिकं
बध्नन्ति कवयोऽयं सुकवीनां समयो मतः ॥१॥

प्रमाणं कविसमयो, वस्तुवृत्तिस्तु न क्वचित् षट्पदी । एतद्विस्तारः परिमलाद् ज्ञेयः । असतोऽपीति कस्यापि । जातिद्रव्यगुणक्रियादेरेवासतोऽपि । अविद्यमानस्यापि निबन्धेन गुम्फेन तथा कस्यापि जात्यादेरेव । सतोऽपि विद्यमानस्याप्यबन्धेनागुम्फेन जात्यादेर्नियमेनातिप्रसक्तस्यावधारणेनाथवा नियमः । कविसमयो यथा कृष्णनीलयोः कृष्णहरितयोरैक्यमित्यादि । तेन च कवीनां समयस्त्रिधा भवति यथा—रत्नादित्यादिष्वसत्या अपि जातेर्निबन्धः, तिमिरस्येत्यादिष्वसतोऽपि द्रव्यस्य निबन्धः, शुक्लत्वमित्यादिष्वसतोऽपि गुणस्य निबन्धः, विभावर्यामित्यादिष्वसत्या अपि क्रियाया निबन्धः, इत्यसतो निबन्धो जात्यादेर्वर्णितः । वसन्ते मालतीत्यादिषु सत्या अपि जातेरनिबन्धः । कृष्णान्यपक्षयोरिति कृष्णपक्षे, ज्योत्स्ना श्वेतपक्षे च, ध्वान्तं न वर्ण्यते इत्यर्थः । कामिदन्तेष्वित्यादिषु सतोऽपि द्रव्यस्यानिबन्धः, हरितत्वमित्यादिषु सतोऽपि गुणस्यानिबन्धः, शेफालिकेत्यादिषु सत्या अपि क्रियाया अनिबन्धः । शेफालीकुसुमेषु भ्रंशं पतनमिति इति सतोऽप्यनिबन्धो जात्यादेर्वर्णितः । मुक्ता इत्यादिषु जातेर्नियमः, भूर्जञ्च नित्यादिषु द्रव्यस्य नियमः । सामान्यग्रहणे वारिमुचामित्यादिषु गुणस्य नियमः, वसन्त एवेत्यादिषु क्रियाया नियम, इति जात्यादेर्नियमो वर्णितः । नियमविशेषो यथा—नीलकृष्णयोर्हरितकृष्णयोरित्यादि । तत्र नागसर्पयोरिति नव कुलनागजातयः, शेषाः सर्पजातय इति । वार्ध्यत्रिदृग्जचन्द्रयोरिति—वार्द्धिजा त्रिदृग्जचन्द्रयोरैक्यमिति दानवासुरदैत्यानामित्यत्रैक्यचिन्तनाद् व्यत्ययो न दोषायेति कवीनां समयो वर्णितः । देवेत्यादि—देवा जिनब्रह्म-

विष्णुहरादयः, देव्यः सरस्वतीलक्ष्मीगौरीप्रभृतयस्तासां स्थितिमतिशयपरिवारलाञ्छनयानादिरूपाः । नायिकानायका उत्तममध्यमादयस्तेषां क्रमं सर्वे जीवा अपदद्विपदचतुष्पदषट्पदाष्टापदामितपदादयस्तेषां स्वभावान् स्वरूपाणि देशकाल-योर्व्यवस्थां च विद्यादिति अत्र सर्वत्र चकारोऽध्याहार्यः । एतेषां सर्वेषामुदाहरणानि परिमलाद्ज्ञेयानि । एतद्विशेषो यथा-देवा मरुदेवादिचतुर्विंशतिजिनाः प्रसिद्धास्तेषामतिशयादि च । अथ—

ब्रह्मा गीतचतुर्वेदश्चतुर्वक्त्रो हिरण्यरुक् ।
ब्रह्ममूर्धा हंसरथो जगत्कर्ता चतुर्भुजः ॥१॥

अस्य पत्न्यौ तु सावित्री गायत्र्यौ भारती सुता ।
विष्णुनाऽस्याम्बुजे जन्माश्रयावृद्धदिगीशता ॥२॥

भारती शुभ्रभा हंसवाहना कमलासना ।
चतुःपाणिरक्षपद्माश्रस्तवर्वीणाकमण्डलुः ॥३॥

अथेशः—

शिवे जटा, शिरोगङ्गा चन्द्रभालेक्षणानलाः ।
विषश्यामलकण्ठत्वमाधारो भस्मगौरता ॥१॥

अङ्गेऽस्थिफणभृद्भूषा नृत्तं वृषभयानता ।
वासुकिर्मुण्डमाला च भूषा कण्ठकपर्दयोः ॥२॥

कल्पान्तकालवृत्तत्वं सर्वसंहारकारिता ।
गौरी विवाहश्चीर्ष्यापिदपातरतादयः ॥३॥

शिवस्य पञ्च मुखानि, नवशक्तयोऽष्टौ मूर्तयो, दशाऽव्ययानीति—

ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमाधृतिः ।
स्रष्टृत्वमात्मसम्बन्धोऽप्यधिष्ठातृत्वमित्यपि ।

दशाव्ययानीति—

सद्योजातो १ वामदेवो २ घोर ३ स्तत्पुरुष ४ स्तथा ।
ईशानो ५ मृत्युंजयश्च ६ विजयः ७ किरणाक्षकः ८ ॥१॥

अघोरास्त्रो ९ थ श्रीकण्ठो १० ब्रह्मदेव ११ इति क्रमात् ।
रुद्रा एकादश प्रोक्ता द्वादशस्तु सदाशिवः ॥२॥

अथ विष्णुः—

विष्णुश्चतुर्भुजः श्यामो लक्ष्मीशः कौस्तुभाङ्कितः ।
शङ्खचक्रगदाशार्ङ्गपाणिर्गरुडवाहनः ॥१॥

सनन्दकोऽम्बुधौ शेषशयनो विश्वपालकः ।
गोपीविलाससङ्कल्पनुप्तगोवर्द्धनधरोद्धृतिः ॥२॥

धरोद्धारकरो दैत्यहन्ता दशावतारकृत् । षट्पदी ।
मत्स्यः १ कूर्मो २ वराहश्च ३ नारसिंहोऽथ ४ वामनः ५ ।
रामो ६ रामश्च ७ कृष्णश्च ८ बुद्धः ९ कल्की १० च ते दश ॥१॥

लक्ष्मीश्चन्द्रेभकुम्भाभिविष्टरा कमलाश्रया ।
फलाभयाम्बुजद्वन्द्वयुतपाणिचतुष्टया ॥१॥ इति ।

अथादित्यादिग्रहाः—

रक्तवासा रथारूढः श्वेतपद्मोपरि स्थितः ।
सदा सप्ताब्जसत्पाणि द्वन्द्वोऽर्कः कनकद्युतिः ॥१॥

सूर्यकान्ता रविमणि नवाम्बुजपथिकलोचनप्रीतिः ।
तारेन्दुदीपकौषधिपृकृतमाश्चौरकुमुदकुलटार्तिः ॥२॥

एकचक्रः शंखमाली नामाश्च(श्व)रुचरयः ।
रथ्यास्तु सप्तयः सप्तनीलासूतोऽरुणः पुनः ॥१॥

इति प्रोक्तः सहस्रांशुः सूर्यो ग्रहपुरोऽपि च ।
ऋतुभेदात् पुनस्तस्यातिरिच्यन्तेऽपि रश्मयः ॥२॥

शतानि द्वादशमधौ त्रयोदशैव माधवे ।
चतुर्दश पुनर्ज्येष्ठे नभो नभस्ययोस्तथा ॥३॥

पञ्चदशैव त्वाषाढे षोडशैव तथाश्विने ।
कार्त्तिके त्वेकादश शतान्येव तपस्यपि ॥३॥

मार्गे तु दश सार्द्धानि शतान्येवं तु फाल्गुने ।
पौष एव परं मासि सहस्रं किरणा रवेः ॥४॥

रविर्योजनलक्षस्थो द्विलक्षस्थो निशाकरः ।
लक्षत्रये स्थिताः ताराः तत्परं देवतालयः ॥५॥

धातो १ ऽर्यमा च २ मित्रं च ३ वरुणेशो ४ भग ५ स्तथा ।
इन्द्रो ६ विवस्वान् ७ पूषा च ८ पर्यंशो ९ नवमस्तथा ॥६॥

ततस्त्वष्टा १० ततो विष्णु ११ रजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ॥७॥ इति रविः ।

इति रविः

सोमः श्वेतः शशारूढः समरोजकरद्वयः ।
सुधारुचिर्दशाश्वश्च श्वेताश्वः कृत्तिकाभवः ॥१॥

योगासनेन सम्भोगी बुधः सिंहासनस्थितः ।
पञ्चार्चिः शुकपिच्छाभो धनिष्ठा सूर्बुधोऽस्य तु ॥१॥
पूजायां श्वेतपुष्पाणि कुंकुमं नीलपत्रिका ॥ षट्पदी ॥

हंसारूढो गुरुः पाणिद्वयस्थाक्षकमण्डलुः ।
स्याद् द्वादशार्चिरुत्तरफाल्गुनी भूः सुवर्णरुक् ॥१॥

शुक्रस्तु दर्दुरारूढो गोक्षीरप्रतिवीररुक् ।
करद्वितयविस्फूर्जदक्षस्त्र कमण्डलुः ॥१॥
षोडशार्चिर्मघाऽसृश्च दशघोषो रथोऽस्य तु ॥षट्पदी॥

शनिर्महिषमारूढो दंष्ट्रारौ द्रुतराननः ।
कृष्णकान्तिः करद्वन्द्व क्रीडद्दण्डकमण्डलुः ॥१॥
शनैश्चरो नीलवासाः सप्तार्चो रेवतीभवः । षट्पदी

राजवर्त्मनिभो राहुरर्द्धाङ्गकुण्डमध्यगः ।
भरणीभूर्नीलपर्वा वर्णरक्तः सुमार्जनः ॥१॥

सर्पपुच्छाकृतिः केतुर्धूम्रोऽश्लेषासमुद्भवः ।
चतुः समः पञ्चवर्णपञ्चवर्यः करसंपुटी ॥१॥ इति ग्रहाः ॥

इन्द्रः सुवर्णवर्णाङ्गो गजारूढः सहस्रदृक् ।
वरदोद्यद्वज्राङ्कुश बीजपूरचतुःकरः ॥१॥ इत्यादि ।

नायिकेति—

प्रकृतिस्त्रेधा पुंनार्योरुत्तमा मध्यमाऽधमा ।

उत्तमा केवगुणा मध्यमा गुणदोषभाक् ।
दोषमय्यधमा तथाऽधमप्रकृतयोऽनुगाः ॥ षट्पदी ।

विदूषकविटश्चेट्यादयो नायकयोः पुनः ।
भवत्युत्तमप्रकृतिर्मध्यमप्रकृतिस्तथा ॥२॥

कथाव्यापी सर्वगुणालंकृतो नायकः पुनः ।
कथाव्यापी सर्वगुणो नेतृत्वादिगुणान्वितः ॥३॥ इत्यादि ।

सर्वजीवेति ।

अपदो भुजगस्तस्य श्यामता वक्रसर्पणम् ।
फूत्कारो वेणितुल्यत्वं दृक्श्रुतित्वं द्विजिह्वता ॥१॥

शिरोमणि शिवक्षेत्रपालादीनां शिरःस्थितिम् ।
बिलवासोऽनिलाशित्वं तार्क्ष्यबर्हिणखाद्यता ॥२॥

निर्मोका नादसुरभिप्रसूनप्रियता विषम् ।
शिवे भूषाकरः क्षोणीधारकः पूर्वजोऽस्य च ॥

द्विपदा देवता मर्त्याः पक्षिणश्च पकीर्तिताः ।
स्वरूपं देवमर्त्यानां पक्षिणो गरुडादयः ॥१॥

चतुष्पदा गजाद्याः, षट्पदो भ्रमरः, अष्टपदः सरभः, अमितपदाः कर्णसृगाली खर्जूरमुखाः ।

देशव्यवस्थेति—

दिवः पृथिव्यां जगती द्वे च केचन केऽपि तु ।
स्वर्गमर्त्यपातालानां भेदात् त्रीणि जगन्ति तु ॥१॥

एतान्येव भूर्भुवः स्वरिति केऽप्यपरे पुनः ।
महाजनतपः सत्यमित्येतैः सप्त तानि तु ॥२॥

यथा—भूर्लोकः १, भुवो लोकः २, स्वर्लोकः ३, महालोकः ४, जनलोकः ५, तपोलोकः ६, सत्यलोकः ७ इति ।

अन्ये तु सप्तभिर्वायुस्कन्धैस्तानि चतुर्दश ।
पातालैः सप्तभिः सार्द्धं तान्येके त्वेकविंशतिम् ॥३॥

तेषु भूर्लोक मस्तस्यां महीद्वीपाश्च सप्त तु ।
सर्वमध्ये जम्बूद्वीपः तत्र प्लक्षोऽथ शाल्मलः ॥४॥

दक्षिणोत्तरादिदेशविभागश्च—

ब्रह्मावर्त्तः सरस्वत्याः दृषद्वत्याश्च मध्यतः ।
ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम् ॥

इत्यादि द्वीपा अष्टादशेत्यादि ।

प्राच्यपाची प्रतीच्युदीची चतस्रो दिशः किल । ऐन्द्र्याग्नेयी याम्यानैऋती वारुणी वायव्यकौबेर्यैशानी चाष्टौ दिशस्तथा ब्राह्मी नागीयाद्वैताभ्यां सार्द्धं दशदिशोऽपरे ब्राह्मी तूर्द्धं नागी त्वधः ।

कालव्यवस्था यथा—

स्वस्थेतरे सुखासीने यावत् स्पन्दति लोचनम् ।
तस्य त्रिंशत्तमो भागः त्रुटिरित्यभिधीयते ॥१॥

त्रिंशत्त्रुटिनिमेषैस्तैः काष्ठा सदशपञ्चभिः ।
त्रिंशत्काष्ठाः कलास्ताभिर्मुहूर्त्तः त्रिंशता मताः ॥२॥

त्रिंशता तैरहोरात्रो मतान्तरमथोच्यते ।
अष्टादशनिमेषाः स्युः काष्ठा, काष्ठाः द्वयं लवः ॥३॥

कला तैः पञ्चदशभिर्लेशस्तत् द्वितयेन च ।
क्षणस्तैः पञ्चदशभिः, षट्क्षणा घटिका पुनः ॥४॥

मुहूर्तस्तद्द्वयेनाहोरात्रस्तैस्त्रिशता भवेत् ।
पक्षस्तैः पञ्चदशभिः, मासः पक्षद्वयेन च ॥५॥

द्वौ मासावृतुः षट् च षड्भिः संवत्सरश्च तैः । षट्पदी ।

इत्यादि ॥छ॥

इति श्री तपागच्छाधिनायकपातसाहिश्रीअकब्बरप्रतिबोधदायक श्रीशत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री५ श्री हीरविजयसूरीश्वरशिष्यपण्डित श्रीशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे छन्दःसिद्धिप्रतानान्तर्गतवर्णस्तबकोद्योतकः पञ्चमप्रसरः समाप्तस्तत्समाप्तौ च समाप्तोऽयं छन्दःसिद्धिप्रतानः प्रथमः ॥छ॥ १

————

॥२.१॥

अथ शब्दसिद्धिप्रतानः द्वितीयः

का.क. तत्र पूर्वं रूढयौगिकमिश्रशब्दाख्यानं यथा—

रूढयौगिकमिश्राख्या स्त्रिधा शब्दाः प्रकीर्तिताः ।
व्युत्पत्तिवर्जिता रूढाः शब्दा आखण्डलादयः ॥१॥

प्रकृति प्रत्ययविभागेनान्वयार्थरहिता व्युत्पत्तिवर्जिताः, शब्दा इत्यनुवाद्यनिर्देशः, रूढा इति विधेयपदं, आखण्डलादय इत्युदाहरणम् । न ह्यत्र प्रकृतिप्रत्ययविभागेन व्युत्पत्तिरस्ति । आदिशब्दान्मण्डपादयः । यद्यपि 'नाम च धातुजं' इति शाकटायनमतेन रूढा अपि व्युत्पत्तिभाजस्तथापि वर्णानुपूर्व्यनुज्ञानमात्रप्रयोजना तेषां व्युत्पत्तिः, न पुनरन्वर्थोऽर्थप्रवृत्तौ कारणमिति रूढा अव्युत्पन्ना एव ।

यौगिकान् शब्दान् व्याचष्टे—

योगो गुणेन क्रियया सम्बन्धेन कृतोऽन्वयः ।

शब्दानां परस्परमर्थानुगमनमन्वयः संयोगः । गुणक्रियाकृतयोगो यौगिकानामुदाहरणम् ।

गुणः स्यान्नीलपीतादिर्नीलकण्ठादयस्ततः ॥२॥

ततो गुणतः, गुणनिबन्धनो येषां योगस्ते शब्दाः नीलकण्ठाद्याः; नीलः कण्ठोऽस्येति गुणप्राधान्यान्नीलकण्ठः शङ्करः । आदिशब्दाच्छितिकण्ठः कालकण्ठ इत्यादि । सङ्ख्यापि गुण एवेति वैशेषिकमते ततः । पञ्चबाणषण्मुखाऽष्टश्रवोदशमुखादयः । ततः कारणात्पञ्चबाणादयोऽपि गुणनिबन्धनयोगाः ।

क्रियाः करोति प्रमुखास्ततः स्रष्टृमुखा मताः ।

ततः क्रियातः क्रियानिबन्धनो योगो येषां ते स्रष्टृप्रभृतयः । सृजतीति सर्जनप्राधान्यात् स्रष्टा ब्रह्मा । एवं धातेत्यादयः ।

सम्बन्धं व्याचष्टे—

सम्बन्धः स्वस्वामित्वादिस्तत्राहुर्नाम तद्वताम् ।
स्वान्नेतृपतिभुक्पालधनमत्त्वर्थकादयः ॥३॥

स्वमात्मीयं, स्वामी यस्तत्र प्रभविष्णुस्तयोर्भावः स्वस्वामित्वं, तदादिः सम्बन्धः । आदिशब्दाज्जन्यजनकभावादिपरिग्रहः । तत्र स्वस्वामिभावसम्बन्धे नेतृप्रमुखाः शब्दाः स्वात्परे नियोजितास्तद्वतां स्वामिनां नामाहुः । मत्वर्थक इति । मतुस्तद्धितस्तस्यार्थोऽस्त्यर्थविशिष्ट प्रकृत्यर्थेन सह देवदत्तादेः सम्बन्धः, तदाधारो वा । तदस्यास्त्यस्मिन्निति मतुप्प्रत्ययविधानात् । मतोऽर्थो यस्य सः मत्वर्थकः तद्धितो मतुना समानार्थ इत्यर्थः । स च इन्णिकादिः । न केवलं मत्वर्थक एव मत्वर्थाव्यभिचारान्मतुरपि । आदिशब्दा त्यादयोऽपि । 'तत्राहुर्नाम तद्वतां' इत्युत्तरेष्वप्यनुवर्तनीयम् ।

क्रमेणोदाहरणान्याह—

भूनेता भूपतिर्भूभृत् भूपालो भूधनस्तथा ।
भूभांश्चेति कवे रूढ्या ज्ञेयोदाहरणावलिः ॥४॥

'इति' शब्दः प्रकारार्थः । तेन भूपादयोऽपि । कवीनां रूढिः परम्परायाता प्रसिद्धिः । तया न तु कविरूढ्यतिक्रमेण । यथा 'कपाली' इत्यादौ सत्यपि स्वस्वामिभावसम्बन्धे कपाली मत्वर्थीयान्त एव भवति, न तु कपालपालः, कपालधनः, कपालभुक्, कपालनेता, कपालपतिरित्यादि ।

जन्यजनकभावसम्बन्धे यथा—

जन्याद्विधातृकरसूकृत्कर्तृस्रष्टृसृग्जनकमुख्याः ।
जनकाद्योनिजजनिभूसम्भवरुहसूत्यणाद्यास्तु ॥५॥

जन्यात्कार्यात्परे विधातृप्रभृतयः, तद्वतां जनकानां कारणानां नामाहुः । यथा विश्वविधाता, विश्वकरः, विश्वसूः, विश्वकृत्, विश्वकर्ता, विश्वसृट् विश्वजनको ब्रह्मा । तस्य हि विश्वं जन्यमिति रूढिः । मुख्यशब्द आद्यर्थः, तेन विश्वकारक इत्याद्यपि । कविरूढ्येत्येव । न हि यथा चित्रकृदुच्यते तथा चित्रसूरिति । तथा जनकात्परे योन्यादयः शब्दाः, तद्वतां कारणवतां, कार्याणां नामाहुः । यथा—आत्मयोनिः, आत्मजः, आत्मजनिः, आत्मभूः, आत्मसम्भवः, आत्मरुहः, आत्मसूतिर्ब्रह्मा, तस्य हि आत्मा कारणमिति रूढिः । वक्ष्यमाणस्याद्यशब्दस्याभिसम्बन्धादात्मजन्मादयोऽपि । अणादयस्तु-भृगोरपत्यं भार्गवः, दितेरपत्यं दैत्यः, वत्सस्यापत्यं वात्स्यायन इत्यादि । अत्रापि हि भार्गवादीनां भृग्वादयो जनका इति रूढिः । कविरूढ्येत्येव । न ह्यात्मयोनिवदात्मजनक आत्मकारक इति भवति ।

धार्यधारकसम्बन्धे यथा—

धार्यात् ध्वजास्त्रपाण्यङ्कमौलिभृन्मण्डनसमानाः ।
धरभर्तृमालिमत्वर्थशालिशेखरसदृक्षाश्च ॥६॥

धार्यवाचकात्परे ध्वजादयः शेखरान्ता धारकस्य नामा[न्या]हुः । यथा—वृषभध्वजः शूलास्त्रः पिनाकपाणिः, वृषाङ्कः, चन्द्रमौलिः शूलभृत्, शशिमण्डनः । समानग्रहणात्सदृशार्थाः । वृषकेतनः, शूलायुधः, वृषलक्ष्मा, चन्द्रशिरः, चन्द्रभूषणः, चन्द्राभरणादयो गृह्यन्ते । तथा-गङ्गाधरः, पिनाकभर्ता, पिनाकमाली-पिनाकं मालते धारयतीति कृत्वा, शूली, पिनाकशाली, शशिशेखरः । कविरूढ्येत्येव । तेन सत्यपि धार्यधारकसम्बन्धे न सर्वेभ्यो धार्येभ्यो ध्वजाद्यर्थाः शब्दाः प्रयोज्याः । न हि भवति वृषध्वजवच्छूलध्वजः, शूलास्त्रवत्, चन्द्रास्त्रः, पिनाकपाणिवदहिपाणिः, वृषाङ्कवच्चन्द्राङ्कः, चन्द्रमौलिवद् गङ्गामौलिः, शशिमण्डनवत् चन्द्रमण्डनः, गङ्गाधरवत् चन्द्रधरः, पिनाकभर्तृवत् चन्द्रभर्ता, पिनाकमालिवत् सर्पमाली, शूलिवत् शूलवान्, शूलशालिवत् चन्द्रशाली, चन्द्रशेखरवत् गङ्गाशेखर इति ।

भोज्यभोजकभावसम्बन्धे यथा—

भोज्याद् भुग्लिट्पाय्यन्धोव्रतपाशाशनप्रमुखाः ।

भोज्यं भक्ष्यं, तद्वाचिनः शब्दात्परे भुगादयः शब्दाः, तद्वतां भोज्यवतां भोक्तॄणां नामान्याहुः । यथा—अमृतभुजः, अमृतलिहः, अमृतपायिनः, अमृतान्धसः, अमृतव्रताः, अमृतपाः, अमृताशाः, अमृताशनाः देवाः; तेषां ह्यमृतं भोज्यमिति रूढिः । प्रमुखशब्दस्तत्समानार्थः भोजनादिपरिग्रहाय । कविरूढ्येत्येव । न हि यथाऽमृतभुजस्तथाऽमृतवल्लभा इति भवति ।

पतिकलत्रे भावसम्बन्धे यथा—

पत्युः कान्ता दयिता वधूः प्रणयिनी प्रियाङ्गनातुल्याः ।
पत्न्याः प्रणयिप्रियवररमणप्राणेश्वरेशसमाः ॥७॥

पतिर्वरयिता । तद्वाचकाच्छब्दात्परे कान्तादिसदृशाः शब्दाः तद्वतीनां पतिमतीनां भार्याणां नाम (न्या)हुः । यथा—शिवकान्ता, शिवदयिता, शिववधूः, शिवप्रणयिनी, शिवप्रिया, शिवाङ्गना, गौरी; तस्याः हि शिवः पतिरिति रूढिः ।

तुल्यग्रहणाद्रमणीवल्लभाप्रभृतयो गृह्यन्ते। कविरूढ्येत्येव । न हि भवति यथा शिवकान्ता तथा शिवपरिग्रह इति । तथा पत्नीवाचिनः शब्दात्परे प्रणयिप्रमुखाः शब्दाः, तद्वतां कलत्रवतां वरयितॄणां नामान्याहुः। यथा–गौरीप्रणयी; गौरीप्रियः, गौरीवरः, गौरीरमणः, गौरीप्राणेश्वरः, गौरीशः शिवः; तस्य हि गौरी कलत्रमिति रूढिः । समशब्दात्तत्समानार्थाः पत्यादयो गृह्यन्ते । कविरूढ्येत्येव । न हि भवति यथा गौरीवरः शिवः तथा गङ्गावर इति ।

सख्यः सम्बन्धे यथा––

सख्युः सखिप्रभृतयः ।

सखिवाचकाच्छब्दात्परे सखिसमानार्थाः, तद्वतां सख्यवतां नामाहुः । यथा–श्रीकण्ठस्य सखा श्रीकण्ठसखः कुबेरः, मधुसखः कामः । प्रभृतिग्रहणात्सुहृदादयो गृह्यन्ते । कविरूढ्येत्येव। न हि भवति यथा श्रीकण्ठसखो धनदस्तथा धनदसखः श्रीकण्ठ इति।

वाह्यवाहकसम्बन्धे यथा––

वाह्याद्यानासनप्रायाः ।

वाह्यवाचिनः शब्दात् परे यानादयस्तद्वतां वाह्यवतां, वाहयितॄणां नामाहुः । यथा––वृषयानः वृषासनः शम्भुः, तस्य हि वृषो यानमिति रूढिः। प्रायः शब्दात् वृषगामी वृषवाहन इत्यादयोऽपि। कविरूढ्येत्येव । न हि भवति यथा नरवाहनः कुबेरः तथा नरगामी नरयान इत्यादि।

ज्ञातेयसम्बन्धे यथा––

ज्ञातेः स्वसृदुहित्रात्मजाग्रजावरजसङ्काशाः ।

ज्ञातिः स्वजनः, तद्वाचिनः शब्दात्परे स्वस्रादयस्तद्वतां ज्ञातेयवतां, ज्ञातीनां नामाहुः । स्वस्रादीनां ज्ञातिविशेषवाचित्वात् ज्ञातिविशेषादेव प्रयोगो यथा––यमस्वसा यमुना, हिमवद्दुहिता गौरी, चन्द्रात्मजो बुधः, गदाग्रज इन्द्रावरजश्च विष्णुः । यमादयो हि यमुनादीनां भ्रात्रादिज्ञातय इति रूढिः । संकाशशब्दात् सोदरादयो गृह्यन्ते। यथा कालिन्दीसोदरो यमः । कविरूढ्येत्येव । न हि भवति यथा यमुना यमस्वसा तथा शनिस्वसापि ।

आश्रयाश्रयिभावसम्बन्धे यथा––

आश्रयतः सदनाख्याः सद्मासिशयप्रकाराश्च ॥८॥

आश्रयो निवासः, तद्वाचिनः शब्दात् परतः सदननामानि, तथा सदनादयस्तद्वतामाश्रयवतामाश्रितानां नामान्याहुः । यथा––द्युसदनाः द्युसद्मानो दिवौकसः । दिवशब्दोऽकारान्तोऽप्यस्ति इति द्युवसतयः, दिवाश्रयाः, द्युसदः, द्युवासिनः, द्युशया देवाः । द्यौः स्वर्गः, स च तेषामाश्रय इति रूढिः। कविरूढ्येत्येव। न हि भवति यथा द्युसद्मानो देवास्तथा भूमिसद्मानो मनुष्या इति।

वध्यवधकभावसम्बन्धे यथा––

वध्याद् भिद्जिद्घातिद्वेषिध्रुग्ध्वंसिशासनविपक्षाः ।
अप्यन्तकारिसूदनदर्पच्छिद्दमनदारिमथनाद्याः ॥९॥

वध्यो घात्यः, तद्वाचिनः शब्दात् परे भिदादयः अन्तकार्यादयोऽपि तद्वतां वधकानां नामान्याहुः। यथा––पुरभित्, पुरजित्, पुरघाती, पुरद्वेषी, पुरध्रुक्, पुरध्वंसी, पुरशासनः, पुरविपक्षः, पुरान्तकारी, पुरसूदनः, पुरदर्पच्छित्, पुरदमनः, पुरदारी, पुरमथनः पुरारिः शिवः। तस्य हि पुरो वध्य इति रूढिः । आदिशब्दात् पुरनिहन्ता, पुरकेतुः, पुरहा, पुरान्तकः,

पुरजयीति । वध्य इति वधार्हमात्रेऽपि । तेन कालियदमनः, कालियारिः, कालियशासनो विष्णुरित्यादयोऽपि गृह्यन्ते । कविरूढ्येत्येव । तेन कालियदमनादिवत् कालियघातीति न भवति ।

उक्ताः स्वस्वामित्वादयः सम्बन्धभेदाः, ते च यथा भिन्नद्रव्याश्रयास्तथैकद्रव्याश्रया अपि भवन्तीति दर्शयितुमाह-

सम्बन्धो हि विवक्षात इति पदादेकतोऽपि संयोज्याः ।
औचित्याद्विबुधैः प्राग्दर्शितसम्बन्धिशब्दास्ते ।।१०।।

विवक्षानिबन्धनो हि सम्बन्धः । तत एकस्मादपि वृषादेः सम्बन्धिपदात् परे सम्बन्धान्तरनिबन्धनाः वाहनादयः शब्दाः यथौचित्यं प्रयुज्यन्ते । एतदेवाह—

वृषस्य सति वाह्यत्वे शङ्करो वृषवाहनः ।
धार्यत्वे तु वृषाङ्कोऽयं स्वत्वे वृषपतिस्तु सः ।।
धार्यत्वेंऽशोरंशुमाली सत्त्वे तु रविरंशुमान् ।
अहेर्वध्यत्वेऽहिरितुर्भोज्यत्वे बर्हिणोऽहिभुक् ।।१२।।

वाह्यवाहकभावसम्बन्धविवक्षायां यथा वृषवाहनो रुद्र इति भवति, तथा धार्यधारकभावसम्बन्धविवक्षायां वृषलान्छनः, स्वस्वामिभावसम्बन्धविवक्षायां वृषपतिरित्यपि । तथा धार्यधारकभावसम्बन्धविवक्षायां यथा अंशुमाली रविरिति भवति, तथा स्वस्वामिभावसम्बन्धविवक्षायां अंशुपतिः अंशुमानित्यपि । तथा वध्यवधकभावसम्बन्धे यथा अहिरिपुर्मयूरः तथा भोज्यभोजकभावसम्बन्धे अहिभुगित्यपि भवति ।

सम्बन्धनिबन्धनां व्युत्पत्तिमुक्त्वा व्युत्पत्त्यन्तरमाह–

व्यक्तचिह्नाङ्कितो जातिशब्दोऽपि व्यक्तिवाचकः ।
यथागस्तिनिवासा दिक् दक्षिणाशा प्रकीर्त्यते ।।१३।।

व्यक्तं निःसन्देहं यच्चिह्नं विशेषणं, तेन चिह्नितो जात्यभिधायकोऽपि शब्दो व्यक्तेर्वाचको भवति । व्यक्तेर्नामतां यातीत्यर्थः । यथाऽगस्तेर्मुनिविशेषस्य निवासो यस्यां सा, इति व्यक्तं चिह्नं; तेन चिह्निता दिगिति जातिशब्दो दक्षिणाशाया व्यक्तेरभिधायी भवति । एवं सप्तर्षिपूतादिगुत्तराशा, अत्रेर्नयनसमुत्थं ज्योतिश्चन्द्र इत्यादयोऽपि ।

व्युत्पत्त्यन्तरमाह—

शब्दौ त्रिपञ्चसप्तादिवाचकौ विषमायुजौ ।
योजयेत् त्रिनेत्रपञ्चशरसप्तच्छदादिषु ।।१४।।

त्रिपञ्चसप्तादिस्थाने विषम-अयुक्शब्दौ त्रिनेत्रादिपदेषु योजनीयौ । यथा–त्रिनेत्रो विषमनेत्रोऽयुग्नेत्रः शम्भुः; पञ्चशरो विषमशरोऽयुक्शरश्च कामः; सप्तच्छदो विषमच्छदोऽयुक्च्छदश्च सप्तपर्णः ।

व्युत्पत्त्यन्तरमाह—

इतरान्तौ नञ्पूर्वौ गुणशब्दोऽर्थविरोधिनं वक्ति ।
यद्वत् सितेतरोऽसित एवं प्रतिपद्यते कृष्णः ।।१५।।

गुणवाची शब्द इतरशब्दान्तो नञ्पूर्वश्च विरोधिनमर्थमभिधत्ते । यथा–सितेतरोऽसितश्च कृष्णः, एवं कृशेतरोऽकृशश्च स्थूल इत्यादि ।

व्युत्पत्त्यन्तरमाह—

जलदादिषु पूर्वपदे सरोजमुख्येषु चोत्तरपदे तु ।
सुरपतिसमेषु चोभयपदे तु पर्यायपरिवृत्तिः ॥१६॥

जलदादिषु शब्देषु पूर्वस्मिन्नेव पदे पर्यायपरिवर्तनं भवति । यथा—जलदस्तोयदो नीरदः । आदिग्रहणात् जलधिस्तोयधिर्नीरधिरित्यादि । सरोजमुख्येषु शब्देषु उत्तरस्मिन्नेव पदे पर्यायपरिवर्तनम् । यथा सरोजं सरोरुहम् । मुख्यशब्दाद् वडवाग्निर्वडवानलो वडवावह्निरित्यादि । सुरपतिसदृशेषु शब्देषु पूर्वोत्तरपदेषु पर्यायपरिवर्तनम् । यथा—सुरपतिः देवराजः त्रिदशेश्वरः । समशब्दाद् भूपतिर्महीपतिः भूभुक् महीभृमित्यादि ।

इति परिवृत्तिसहा ये योगात्ते यौगिकाः शब्दाः ।
परिवृत्त्यसहा ये ते मिश्रा गीर्वाणतुल्यास्तु ॥१७॥

इत्येवं पूर्वत्रोत्तरत्रोभयत्र च पदे परिवृत्तिं पर्यायपरिवर्तनं सहन्ते क्षमन्ते, इति परिवृत्तिसहा ये ते जलदादयः शब्दा योगादन्वयाद्भवेयुरिति यौगिकाः । गीर्वाणादयः शब्दाः पुनः पूर्वत्रोत्तरत्रोभयत्र पदे पर्यायपरिवृत्तिमसहमाना मिश्राः । को भावः ? योगयुक्ता रूढिमन्तश्च । तुल्यग्रहणात् कृतान्तदशरथप्रभृतयः ।

इति श्रीजिन. शब्दसिद्धिप्रतानेद्वितीये रूढयौगिकमिश्राख्यः प्रथमस्तबकः ।

म.टी. अथ शब्दसिद्धिप्रताने रूढयौगिकमिश्राख्यास्तब्धको निगदसिद्धः । तत्र कश्चिद् विशेषो यथा अन्वर्थरहिता इति—यथार्थरहिताः । अनुवाद्येति—प्रसिद्धमनुवादपदमुच्यते । शब्दा इति ।—अप्रसिद्धं करणीयं विधेयपदमुच्यते । रूढा इति—यतः सिद्धस्योक्तिरनुवादोऽसिद्धस्योक्तिरभिधानमिति ।

॥२॥

अथ योगार्हनामानि

का.क. भवन्ति यौगिकाः शब्दाः समासव्यासहेतव ।
तद्योगार्हाणि नामानि कत्यपि प्रतिपादये ॥१८॥
उद्देश्यवचनं पूर्वं सप्तम्यन्तमिहोदितम् ।
पञ्चम्यन्तं पूर्वपदं प्रथमान्तं पुरःपदम् ॥१९॥
शब्दः स एक एवात्र स्यादेकवचनात्कृतात् ।
बहवो बहुवचनान् मुख्याद्यादेस्तदर्थकाः ॥२०॥
स्वर्गे सुरेभ्यो गेहानि देवे द्युभ्यः सदादयः ।

म.टी. अथ यौगिकाह्वानमालिकामाह—

समासेति-यौगिकाः शब्दाः संक्षेपहेतवो विस्तारहेतवश्च भवन्तीति । उद्देश्येति । इह यौगिकनाममालायां प्रथम उद्देश्यपदं सप्तम्यन्तं, ततो यौगिकनामसु प्रथमं पञ्चम्यन्तं पदं, द्वितीयं तदग्रे प्रथमान्तं पदं प्रयुज्यते । शब्द इति—यत्रैकवचनं भवति तत्र स एक एव शब्द उक्तो ज्ञेयः । यत्र तु बहुवचनं मुख्यादिप्रभृत्यर्थाः शब्दास्तत्रोक्तशब्दसदृशार्था बहवोऽपरेऽपि शब्दाः ज्ञेयाः । मुख्याद्यादेरिति—मुख्यश्चाद्यश्च मुख्याद्यौ तौ आदिर्यस्य स तथा; तस्मान्मुख्यास्त्रादेरत्रादिपदात् तुल्यसन्निभप्रभृतयो गृह्यन्ते । स्वर्गे इति—सप्तम्यन्यं उद्देश्यवचनम् । सुरेभ्य इति पञ्चम्यन्तं प्रथमपदं, ततो गेहानीति प्रथमान्तं पुरःपदं योज्यम् । एवमग्रेऽपि सर्वत्र ज्ञेयम् । उदाहरणानि यथा—सुरगेहं सुरसद्म, त्रिदशावासः, अमर्त्यभुवनं, देवलोक, इत्यादयः । देवे इति—द्युभ्यः स्वर्गवाचिनामभ्यः सदादयः शब्दा योज्यन्ते । आदिशब्दात् तदर्थाः सद्मादयो यथा-द्युसदः, द्युसद्मानः, स्वर्गसदः स्वर्गालया, इत्यादयः । स्वधादिभ्यो भुगादयः प्रत्येकमभिसम्बन्ध्यन्ते । यथा—स्वाहाभुजः

स्वाहाशनाः, स्वधाभुजः स्वधाशनाः, सुधाभुजः सुधाशनाः, अमृतभुजः अमृतान्धसः ऋतुभुजः इत्यादयः। दैत्येभ्योऽरयो यथा—दैत्यारयः, दैत्यद्विषः, दानवारयः, दनुजद्विषो, सुरारय इत्यादि । अत्र नाको विद्यते येषामिति स्वस्वामिभावसम्बन्धान्नाकिनः स्वर्गिणः त्रिदिवाधीशा इत्यादयः । देवमाता अदिता अदितिर्वा, तस्या अपत्यानि आदितेयाः, । आदित्याः, अदितिजा इत्यादयः । तेषां विमानो यानमिति सम्बन्धाद् विमानयानाः, वैमानिकाः, विमानिनः, इत्यादयः । विमाने देवयानं सुरयानमित्यादि । अमृते देवानामन्धोऽन्नं, भोज्यं, आहार इति यावत् । देवान्धो देवान्नं देवभोज्यं देवाहार इत्याद्यध्याहार्यम् । अर्के इति—सहस्रादिभ्यो श्वादयो योज्यन्ते । यथा—सहस्रांशुः, सहस्ररुचिः, दशशतरश्मिः, खररुचिः, तीक्ष्णरश्मिः, उष्णांशुः, शीतेतररश्मिरित्यादि । चक्रादिभ्यो बान्धवा यथा—चक्रबान्धवः, चक्रवाकबन्धुः, रथाङ्गसुहृत्, अब्जबान्धवः, पद्मबन्धुः, दिवसबान्धवः, दिनबन्धुः इत्यादयः । ध्वान्तेभ्य इति—ध्वान्तरिपुः, ध्वान्तारातिः, तिमिररिपुरित्यादि । गविनः गोपतिः, द्युतिपतिः, त्विषामीशः; दिवसेनः । दिवसपतिः; द्यिनः, द्युपतिः, पद्मिनीनःपद्मिनीपतिः, ग्रहेनः, ग्रहाधीशः इत्यादि । प्रभादिसप्तभ्यः करः सम्बध्यते यथा——प्रभाकरप्रभृतयो यौगिकत्वात् प्रभाकृत् दिवसकृदादयः । नभ इति—नभोरत्नं, नभोमणिः; व्योमरत्नं, गगनमणिः ,दिनरत्नं, दिनमणिः; दिवसमणिरित्यादयः । गगनध्वजः, गगनकेतुः; नभोध्वजः, नभःकेतनः; गगनाध्वगः गगनपान्थः, नभोध्वगः नभःपान्थः; इत्यादयः । सप्तादेरिति—सप्ताश्वः सप्तसप्तिः । आदिशब्दाद् विषमायुजौ ग्राह्यौ । यथा—विषमाश्वः अयुक्तसप्तिरित्यादयः । अत्र यौगिकत्वात् भास्वानंशुमानंशुमाली किरणमालीत्यादयः; यमुनाजनकः कृतान्तजनकः; यौगिकत्वात् कालिन्दिसूः, यमसूरित्यादयः । अब्जहस्तः, अंशुहस्तो; यौगिकत्वात् पद्मपाणिः गभस्तिपाणिरित्यादयः; अरुणसारथिः अरुणसूत; इत्यादयः । अरुणे इति—अर्कसारथिः रविसूत इत्यादयः ।

का.क. स्वधास्वाहाभ्यां च सुधा क्रतुभ्योऽपि भुगादयः ॥२१॥

दैत्येभ्योऽरयोऽर्के सहस्रात् खरप्रभृतेरपि ।
उष्णेभ्यश्चांशवश्चक्राब्जदिनेभ्योऽपि बान्धवाः ॥२२॥

ध्वान्तेभ्यो रिपवो गोद्युपद्मिनीभ्यो ग्रहादिनाः ।
प्रभाविभाभासोदिवादिनाहर्दिवसात्कारः ॥२३॥

नभोदिनेभ्यो रत्नानि गगनेभ्यो ध्वजाऽध्वगाः ।
सप्तादेरश्वा अरुणेऽर्केभ्यः सारथयस्तथा ॥२४॥

विनतायाः सूनवस्तु गरुडेभ्योऽग्रजा पुनः ।
जैवातृके तु कुमुदात् कैरवादपि बन्धवः ॥२५॥

शशात्कलायाश्छायाया मृगेभ्योऽपि भृदादयः ।
तारानिशाकुमुदिनीकौमुदीभ्यो द्विजादिनः ॥२६॥

औषध्या दक्षजायाश्च रोहिण्याश्च प्रियादया ।

म. टी. विनताया—इति विनतासूनुः वैनतेय इत्यादयः । गरुडाग्रजः पक्षिराजाग्रजः इत्यादयः । जैवातृके इति-जीवत्यनेनामृतवर्षित्वाज्जगदिति जैवातृकः । जीवे रात्रिको जैवरातृको जैवचेत्यातृकः, तस्मिन् । चन्द्रे कुमुदबान्धवः कुमुदबन्धुः, कैरवबन्धुः; बन्धुप्रायत्वात् सुहृदपि बन्धुरिवेति । तेन कुमुदसुहृत्, कैरवसुहृदित्यादयः । शशभृत्, कलाभृत्, छायाभृत्, मृगभृत्; शशधरः, कलानिधिः, छायांकः, मृगलांछन, इत्यादयः । तारेनः, निशेनः, ,कुमुदिनीनः, कौमुदीनः; द्विजेनः, तारापतिः, तारकेशः, कुमुद्वतीशः, कैरवणीवल्लभः, ज्योत्स्नेशः, द्विजपतिः, द्विजराज इत्यादयः । अत्रेनशब्देन स्वामिवाचकाः शब्दा गृह्यन्ते । तेन औषधीप्रियः, दक्षजाप्रियः, रोहिणीप्रियः, औषधीपतिः, दाक्षायणीकामुकः, रोहिणीप्राणेश

इत्यादयः । अत्रादिशब्दाद्भर्तृप्रमुखा ग्राह्याः । सुधाद्युतिः, श्वेतद्युतिः, हिमद्युतिः, अमृतांशुः, सितरोचिः, शीतरश्मिरित्यादयः । अत्र भाशब्देन कान्तिवाचकाः शब्दा योज्यन्ते । निशामणिः, निशाकरः, रजनीरत्नं, रजनीकरः । कृदपि योज्यते-निशाकृत् इत्यादयः । अत्र दशवाजी, दशाश्वः; श्वेतवाजी श्वेताश्च इत्यादयः; अमृतसूः, सुधासूरित्यादयः; अत्रिदृग्जः, अत्रिनेत्रप्रसूत इत्यादयश्चेत्यध्याहार्यम् ।

का.क. सुधाश्वेतहिमेभ्यो भा निशाभ्यो मणयः करः ॥२७॥

इन्द्रे सहस्रनेत्राणि शतात्तु क्रतवोऽपि च ।
वज्रेभ्यः पाणिप्रमुखाः केशवेभ्योऽग्रजाः पुनः ॥२८॥

त्रिदिवेभ्यः स्वःपुरीभ्यः सुधर्मायाः सुरादितः ।
पौलोमीभ्यः पूर्वदिग्भ्योऽप्सरोभ्यः पतिसन्निभाः ॥२९॥

जम्भात्पाकाब्दलाद्वृत्रात् पुलोम्नो नमुचेरपि ।
अद्रिभ्यः शासनसमा जयन्ताज्जनकादयः ॥३०॥

वह्नौ धूमात् ध्वजाद्धव्यहविर्हुताद्भुगादयः ।
ज्वालाभ्यः सप्तादेर्मन्त्राजिव्हा सप्तादितोऽर्चिषः ॥३१॥

म. टी. इन्द्रे इति—सहस्रनेत्रः, सहस्राक्षः, दशशतनेत्र, इत्यादयः । शतक्रतुः, शतमन्युः, शतमख, इत्यादयः । वज्रपाणिः, पविलक्ष्मा, वज्राङ्कः, वज्रीत्यादि । केशवाग्रजः, मुकुन्दाग्रजन्मा, इत्यादि । त्रिदिवपतिः, स्वःपुरीपतिः, सुधर्मापतिः, सुरपतिः, पौलोमीपतिः, पूर्वदिक्पतिः, अप्सरःपतिः, स्वर्नाथः, अमरावतीशः, सुधर्माधिपः, त्रिदेशेश्वरः, शचीप्रियः, प्राचीशः, अप्सरः स्वामीत्यादि सुगमं । जम्भजित् पाकशासन इत्यादि सुगमम् । पुलोमरिपुः, नमुचिद्वेषी, अद्रिभिदादयः इत्यादि सुगमम् ।

जयन्तजनकः, जयन्तपिता इत्यादि । अत्र मेघवाहन इत्याद्यध्याहार्यम् वह्नौ इति—धूमध्वजो, धूमकेतन, इत्यादि; हव्यभुक्, हविर्भुक्, हुतभुक्, हव्याशनः, हविरशन इत्यादि; ज्वालाजिह्वः सप्तजिह्वः । अथ सप्त जिह्वा यथा—

भवति हिरण्या १ कनका २ रक्ता ३ कृष्णा च ४ सुप्रभा ५ वाच्या ।
अतिरक्ता ६ बहुरूपे ७ ति सप्त सप्तार्चिषो जिह्वाः ॥१॥

मन्त्रजिह्वः । सप्तादेरित्यत्रादिशब्दाद्युग्जिह्वो, विषमजिह्व, इत्यादि । सप्तार्चिः, सप्तज्वालः, विषमार्चिरित्यादि । स्वाहावल्लभः, स्वाहाप्रियः, अग्नायीनायक इत्यादि । अत्र छागरथो मेघ(ष)रथ इत्याद्यध्याहार्यम् । और्वे इति—वडववह्निः, वडवानल इत्यादि । यमे इति—दण्डास्त्रः, दण्डायुध, इत्यादि; मिहिषध्वजः, महिषवाहनः, लुलायुलाञ्छन, इत्यादि; कालिन्दीसोदरः, यमुनासहोदर, इत्यादि; धूमोर्णाप्रियः, धूमोर्णावल्लभ, इत्यादि । दक्षिणाशापतिः, प्रेतपतिः, पितृपतिः, याम्येशः, पिशाचेशः, पितृप्रभुरित्यादि । सूर्याङ्गजः, सूरसूत, इत्यादि । रक्षसीति—रजनीचरः निशाचरः, रात्रिञ्चर, इत्यादि । निकसासुतः निकसाङ्गजः नैकसेय इत्यादि । क्रव्यभुक्, क्रव्यादः, पलाद, इत्यादि । वरुणे इति—यादःपतिः, जलपतिः, अपांनाथ, यादोनाथ, इत्यादि । पाशास्त्रः पाशायुधः, पाशी, पाशपाणिरित्यादि । अत्रार्णवमन्दिरः, समुद्रालय, इत्यादयः ।

का.क. स्वाहाया वल्लभा और्वे वडवायाश्च वह्नयः ।
यमे दण्डादस्त्रमुखा महिषेभ्यो ध्वजादयः ॥३२॥

कालिन्दीभ्यः सोदरास्तु धूमोर्णायाः प्रियादयः ।
दक्षिणाशाभ्यः प्रेतेभ्यः पितुश्च पतयो मताः ॥३३॥

सूर्येभ्योऽङ्गजा रक्षसि रजनीभ्यश्चरः पुनः ।
निकषायाः सुता क्रव्यादेर्भुजो वरुणे पुनः ॥३४॥

यादोजलेभ्यः पतयः पाशादस्त्रादयस्तथा ।
वायौ नित्येभ्यो गतिः स्यादाशुशब्दाश्च गोगतिः ॥३५॥

श्रीदे सर्वेभ्यः सख्यादिस्तत्पुत्राज्जनकादयः ।
निधानयक्षकिन्नरधनेभ्यः स्वामिसन्निभाः ॥३६॥

अलकायाश्चैत्ररथात्पुष्पकात्पतयः पुन- ।
शिवे त्र्यैकभालेभ्यो दृशो वृषाद् वृषभात् ध्वजाः ॥३७॥

दिग्भ्यो वासांसि श्यामेभ्यो कण्ठः कालात्पुराद्गजात् ।
पूषान्धकाभ्यां कामेभ्यो मखेभ्यः प्रतिपन्थिनः ॥३८॥

म.टी. वायाविति–नित्यगतिः सततगतिः, सदागतिरित्यादि । आशुगः, आशुगतिरिति । श्रीदे इति–शर्वसखः, श्रीकण्ठसख, इत्यादि । नलकूबरजनकः, कूबरपितेत्यादि । निधानस्वामी, यक्षस्वामी, किन्नरस्वामी, धनस्वामी; निधीश्वरः, निधानेशः, गुह्यकाधिपः, किन्नरेश इत्यादि । अलकापतिः, चैत्ररथस्वामी, पुष्पकेश इत्यादि । शिवे इति–त्रिदृक् ललाटे नेत्रयोगादेकदृक्; अर्द्धनारीश्वरमूर्त्तौ महेश्वराङ्गस्य; एकदृक्त्वात् भालदृक्, भाललोचनः, एकनेत्रः, अयुग्लोचनः, ललाटनयन इत्यादि । वृषध्वजः, वृषभध्वजः, वृषलाञ्छन, इत्यादि । दिग्वासा, दिगम्बर इत्यादि । श्यामकण्ठः, नीलकण्ठः, नीलग्रीव, इत्यादि । कालप्रतिपन्थी, पुरारिः, गजासुहृत्, पूषद्वेषी, अन्धकारातिः, कामद्वेषी, मखभित्, कालान्तकः, पुरान्तकः, गजासुरद्वेषी, पूषदन्तहरः, अन्धकरिपुः, स्मरारिः, दक्षाध्वरध्वंसक, इत्यादि । पशुपतिः, गणपतिः, भूतपतिः, गौरीपतिः, प्रमथस्वामी, भूतेशः, गिरिजावल्लभ, इत्यादि । शूलभृत्, खट्वाङ्गभृत्, गङ्गाभृत्, भुजङ्गभृत्, पिनाकभृत्, पिनाकभृत्, कपालभृत्, कपर्द्दभृत्, शूली, शूलधरः, खट्वाङ्गधरः, गङ्गाधरः, उरगभूषणः, शशिमण्डनः, पिनाकपाणिः; कपर्द्दी, कपाली इत्यादि । अत्र घनवाहनः मेघवाहन, इत्यादि । कृत्तिवासागजाजिनसंव्यानत्वात् चर्मव्यसन, इत्याद्यध्याहार्यम् । गौर्यामिति-महिषमथनी, लुलायभित्, शुम्भभृत्, निशुम्भभृत्, इत्यादि । भवप्रिया, शिववल्लभा, इत्यादि । मेनासुता, हिमाद्रिसुता, अद्रिसुता, मेनाङ्गजा, प्रालेयाचलनन्दिनी, गिरिजा इत्यादि । अत्र दाक्षायणी दक्षजा, इत्यादि । सिंहयाना, सिंहवाहना, इत्यादि । स्कन्दजननी, विषमाता, इत्यादि । कृष्णभगिनी नन्दपुत्रीत्वात्, विष्णुस्वसेत्यादि । मैनाकस्वसा हिमाद्रिपुत्रित्वात्; मैनाकभगिनीत्यादि । हेरम्बे इति–गणपतिः, गणेशः, विघ्नेशः, विघ्नराजः, प्रमथाधिप, इत्यादि । एकशब्दादग्रतोरदा योज्याः–एकरदः एकदन्तः । गुहोत्पाटितत्वादेको दक्षिणो दन्तोऽस्येत्येकदशन इत्यादि । मूषकवाहनः, आखुरथः, आखुग, इत्यादि । गजवदनः, गजास्यः, कुञ्जराननः, इत्यादि । अत्र परशुपाणिः, परशधर, इत्याद्यध्याहार्यम् ।

---

१. विष्णु....पुत्रित्वात्–इदंपामपुस्तके नास्ति ।

म. टी. स्कन्दे इति–शिखिध्वजः, शिखिवाहनः, मयूरवाहन इत्यादि । शक्तिपाणिः, शक्तिधरः, शक्तिभृदित्यादि । अग्निभूः अग्निजन्मा, वह्निजन्मेत्यादि । क्रौञ्चाद्रिभित्, क्रौञ्चारिः; अन्धकासुरे हि महेश्वरात् क्रौञ्चाद्रिमध्ये, प्रणष्टेऽनेन क्रौञ्चोदारितः इति प्रसिद्धिः क्रौञ्चदारण इत्यादि । तारकद्विट्, तारकारिः, तारकान्तक, इत्यादि । गङ्गासुतः, उमासुतः, कृत्तिकासुतः, गाङ्गेयः, बाहुलेय, इत्यादि । षण्मुखः, षडास्यः, षड्वदन, इत्यादि । ब्रह्मणीति--आत्मभूः, पद्मभूः, नाभिभूः, आत्मयोनिः, कमलयोनिः, नाभिजन्मेत्यादि । सरोजासनः, कमलासनः, पद्मविष्टर इत्यादि । हंसवाहनः, श्वेतपक्षिरथ, इत्यादि । अष्टश्रुति. अष्टश्रवण, इत्यादि । चतुर्मुखः, चतुरानन, इत्यादि । जगत्कर्ता, विश्वसृडित्यादि । ब्राह्म्यामिति–ब्रह्मनन्दिनी, ब्रह्मसुता, ब्राह्मी, विरञ्चितनयेत्यादि । वचनाधिदेवता वागीश्वरीत्यादि । अत्र शास्त्रेभ्योऽधिदेव्यः शास्त्राधिदेव्यः, शास्त्राधिदेवी, श्रुतदेवतेत्यादि ।

का. क.

पशोर्गणेभ्यो भूतात्च गौरीभ्यः पतिसन्निभाः ।
शूलात् खट्वाङ्गात् गङ्गाया भुजगेन्दुमुखादपि ।।३९।।
पिनाकाच्च कपालाच्च कपर्दाच्च भृदादयः ।
गौर्यां महिषेभ्यः शुम्भात् निशुम्भान्मथनीमुखाः ।।४०।।
भवेभ्यः प्रिया मेनाया हिमाद्यद्रिमुखात्सुताः ।
हेरम्बे गणविघ्नाभ्यामीशाश्चैकपुरोरदाः ।।४१।।
मूषकेभ्यो वाहनानि गजेभ्यो वदनानि च ।
स्कन्दे शिखिभ्यो ध्वजाद्याः शक्तेश्च पाणिसन्निभाः ।।४२।।
शरादग्निभ्यो भूमुख्याः क्रौञ्चादेस्तारकाद् द्विषः ।
गङ्गोमाभ्यः कृत्तिकाभ्यः सुताः षट्तो मुखानि च ।।४३।।
ब्रह्मण्यात्मनः पद्मेभ्यो नाभेर्भू प्रमुखास्तथा ।
सरोजेभ्योऽप्यासनानि हंसेभ्यो वाहनानि च ।।४४।।
ब्राह्म्यां ब्रह्मभ्यो नन्दिभ्यो वचनेभ्योऽधिदेवताः ।
विष्णौ श्रीभ्यः पतिसमा वार्द्धिभ्यः शयनादयः ।।४५।।
इन्द्रेभ्योऽवरजा वैनतेयेभ्यो वाहनानि च ।
दैत्येभ्योऽरयः पुराणात् यज्ञेभ्यः पुरुषाः पुनः ।।४६।।
शार्ङ्गात् चक्रगदाशङ्खादेः श्रीवत्सात् भृतस्तथा ।
तार्क्ष्येभ्यो ध्वजा देवक्याः पुत्राश्चतुःपुरोभुजाः ।।४७।।
गोपेभ्यः प्रभुसङ्काशाः पीतेभ्यो वसनानि च ।
कालियात्कालनेमेश्च चाणूराद्धेनुकान्मधोः ।।४८।।

म. टी. विष्णाविति—श्रीपतिः, लक्ष्मीपतिः, कमलावल्लभ, इत्यादि । वार्द्धिशयनः, समुद्रशय, इत्यादि । इन्द्रावरजः, शक्रानुजः, वासवावरज, इत्यादि । इन्द्रमातुरदितेर्गर्भे वलिनिग्रहार्थं वामनरूपेणोत्पन्नत्वाज्जन्माद्यः दीप्तिर्निर्जितविरोचनादयं द्यां विरोचनसुतादभीप्सतः आत्मभूरवरजाखिलप्रज्ञः स्वःपतेरवरजत्वमाययौ वैनतेयवाहनः, गरुडगामीत्यादि । दैत्यारिः, दानवरिपुः, असुरद्वेषीत्यादि । पुराणपुरुषः, यज्ञपुरुषः, पुरातनपुमान्, ऋतुपुरुषः इत्यादि । शार्ङ्गभृत्, चक्रभृत्, गदाभृत्

शङ्खभृत्, श्रीवत्सभृत्, इत्यादि सुगमम् । तार्क्ष्यध्वजः, गरुडाङ्कः, गरुडकेतुरित्यादि । देवकीपुत्रः, देवकीनन्दन, इत्यादि । चतुर्भुजः, चतुर्बाहुः, इत्यादि । गोपालप्रभुः, गोपालस्वामी, गोपेश इत्यादि । पीतवसनः, पीताम्बरः, पिङ्गवासा इत्यादि । के पानीये आलयो यस्य स कालियः; पृषोदरादित्वात् कालियारिः, कालियदमनः, कालनेमिहरः, चाणूरसूदनः, धेनुकध्वंसी; मधुमथनः, पूतनासूदनः, शाल्वरिपुः, कंसजित् । केशा विद्यन्तेऽस्य केशी, केशिहा । यमलरूपावर्जुनवृक्षौ यमलार्जुनौ; यमलार्जुनभञ्जनः, शिशुपालनिषूदनः, हयग्रीवहन्ता, राहुमूर्द्धहरः, कैटभारातिः, मुरभित्, शकटखण्डनः, बलिबन्धनः, द्विविदद्वेषी, नरकान्तकः, हिरण्यकशिपुदारणः, मैन्दमर्दनः, बाणजेता, अरिष्टपेषी । एतेभ्यस्त्रयोविंशतिवध्येभ्यः पुरस्थितरित्वर्थशब्दैर्विष्णुनामानि भवन्ति—रुक्मिणीप्रियः, सत्यभामावल्लभः, राधावल्लभ इत्यादि । अत्र जलेभ्यः शयः, जले शेते, जलेशयः, जलशय इत्यपि । तोयशयः नीरशय इत्याद्यध्याहार्यम् ।

का. क. पूतनायाः शाल्वात् कंसकेशिभ्यां यमलार्जुनात् ।
शिशुपालहयग्रीवराहुभ्यः कैटभान्मुरात् ॥४९॥
शकटेभ्यो बलिभ्यश्च द्विविदान्नरकादपि ।
हिरण्यकशिपोर्भेदबाणारिष्टाग्रतोऽरयः ॥५०॥
रुक्मिण्याः सत्यभामायाः राधायाश्च प्रियादयः ।
रामे मुसलात्सीरेभ्योऽस्त्राणि तालाग्रतो ध्वजाः ॥५१॥
रोहिण्याः पुत्रा रेवत्याः प्रियाः कृष्णादितोऽग्रजाः ।
तथा रुक्मिप्रलम्बाभ्यां यमुनाभ्यो भिदादयः ॥५२॥
नीलेभ्यो वसनप्राया लक्ष्म्यां कृष्णादितः प्रियाः ।
पद्मेभ्यो वासाद्याः क्षीराऽब्धिभ्योऽब्धिभ्योऽपि पुत्रिकाः ॥५३॥
कामे विषमादस्त्राणि श्रीभ्यः पुत्रा रतेः प्रियाः ।
मधुभ्यः सुहृदो मीनमकरेभ्यो ध्वजादयः ॥५४॥
अनिरुद्धात् पितृमुखाः शम्बरात् सूर्यकाद्भिदः ।
पञ्चादितः शरप्राया पुष्पेभ्यः केतनानि च ॥५५॥

म. टी. रामे इति—मुसलास्त्रः, शीरास्त्रः, मुशली, हली, मुसलपाणि, रित्यादि । तालध्वजः, रोहिणीपुत्रः, रेवतीप्रिय, इत्यादि । कृष्णादित इति—कृष्णाग्रजः, वासुदेवाग्रजन्मा, इत्यादि । रुक्मिभित् प्रलम्बभित्, यमुनाभित्, रुक्मिदारणः, प्रलम्बघ्नः, कालिन्दीकर्षण, इत्यादि । नीलवसनः, नीलाम्बर, इत्यादि । लक्ष्म्यामिति—कृष्णप्रिया, हरिवल्लभेत्यादि । पद्मवासा, कमलावासेत्यादि । क्षीराब्धिपुत्री, क्षीरोदतनया, दुग्धाम्भोनिधिसुता, अब्धिसुता, उदधिपुत्रीत्यादि । कामे इति—विषमास्त्रो, विषमायुधः, पञ्चेषुत्वात् । श्रीपुत्रः, श्रीनन्दनः, लक्ष्मीसुत इत्यादि । रुक्मिण्यां श्रियोवतारत्वात् रतिप्रियः, रतिजीवितेश, इत्यादि । मधुसुहृत् मधुसखः, चैत्रसुहृदित्यादि । मीनध्वजः, मकरध्वज, झषकेतनः, मकरकेतुरित्यादि । अनिरुद्धपिता, उषेशजनक, इत्यादि । शम्बरभित्, सूर्पकारातिरित्यादि । पञ्चशरः, पञ्चेषुः, पञ्चबाणः, विषमेषुः, अयुग्बाण, इत्यादि । पुष्पकेतनः, पुष्पध्वज, इत्यादि । मृणालधनुः, मृणालधन्वा, मृणालचाप, इत्यादि । पुष्पबाणः, पुष्पास्त्रः, पुष्पधनुः; कुसुमेषुः, कुसुमायुधः, कुसुमचापः, इत्यादि । इषुचापयोः सत्यप्यस्त्रत्वे भेदेन ग्रहणं लोके । तथा व्यवहारात्-शृङ्गारयोनिः, आत्मयोनिः, संकल्पयोनिः, चित्तयोनिः; शृङ्गारजन्मा, आत्मभूः, स्मृतिभूः, मनोभव इत्यादि । अत्र हृन्मनोभ्यां शयः, हृच्छयः, मनसिशय इत्यादि । तार्क्ष्ये इति—अरुणावरजः रविसुतानुज इत्यादि । विष्णुवाहनं कृष्णयानमित्यादि । पक्षिनाथः विहगपतिरित्यादि ।

वज्रिनुजित् इन्द्रजिदित्यादि। दैत्ये इति–दितिपुत्रः, दितिसूनुः, दैत्यः, दानवः, दितिजः, दनुज इत्यादि। देवरिपुः सुरारिरित्यादि। पृथिव्यामिति–अब्धिनेमी, अब्धिमेखला, अब्धिवसना, जलधिनेमिः; समुद्रकाञ्चिः, सागराम्बरा इत्यादि। अत्र शैलेभ्यः आधारः शैलाधारः, पर्वताधारेत्यादि। शैले इति–भूधरः, भूध्रः क्षितिधरः, भूभृदित्यादि। उदयाद्राविति–उदयगिरिः पूर्वगिरिः, उदयाद्रिः प्राचीपर्वत इत्यादि।

का. क. मृणालाद्धनूंषि पुष्पेभ्यो बाणास्त्रधनूंषि च।
शृङ्गारात्मभ्यः संकल्पाच्चितेभ्यो योनिसम्भिभाः ॥५६॥

तार्क्ष्येऽरुणेभ्योऽवरजा विष्णुभ्यो वाहनानि च।
विनतायाः सुपर्णाश्च काश्यपाच्च तनूद्भवाः ॥५७॥

सर्पेभ्योऽरयः पक्षिभ्यो नाथा वज्रिमुखाज्जिताः।
दैत्ये दितेर्दनोः पुत्रा देवेभ्यो रिपवस्तथा ॥५८॥

पृथिव्यामब्धिभ्यो नेमीमेखलावसनानि च।
शैले भूभ्यो धरा ध्रोऽप्युदयाद्रावुदयस्तथा ॥५९॥

पूर्वादेर्गिरयोऽस्ताद्रावस्तात्प्रत्यङ्मुखान्नगाः।
हिमाद्रावुदग्हिमेभ्योऽद्रयोऽद्रिभ्योऽधिपास्तथा ॥६०॥

मेनकायाः प्रियसमाः पार्वतीभ्यो गुरुः पुनः।
मलये दक्षिणाच्छैलाः कैलासे स्फटिकान्नगाः ॥६१॥

मेरौ स्वर्गिभ्यः स्वर्गेभ्यः सुवर्णेभ्योऽपि भूधराः।
सूर्येभ्यः कान्ते सूर्येभ्योऽग्निभ्यो रत्नोत्पलादयः ॥६२॥

चन्द्रेभ्यः कान्ते चन्द्रेभ्यो मणयो दृषदोऽपि च।

म. टी. अस्ताद्राविति–अस्तनगः, प्रत्यग्नगः, अस्ताद्रिः, पश्चिमाचलः, परमाचल, इत्यादि। हिमाद्राविति-उदगद्रिः, हिमाद्रिः, उत्तराचलः, तुषाराचलः, प्रालेयशैल, इत्यादि। अद्रिपतिः, नगाधिपः, शैलराज इत्यादि। मेनकाप्रियः, मेनकावल्लभ, इत्यादि। पार्वतीगुरुः, गौरीगुरुरित्यादि। अत्र गौरीभ्यो जनकः गौरीजनकः, पार्वतीपितेत्यादि। हिमेभ्य आलयः हिमालयः, प्रालेयालय, इत्याद्यध्याहार्यम्। मलये इति—दक्षिणशैलः, दक्षिणाचलः, याम्याद्रिरित्यादि। अत्र चन्दनेभ्यो द्रयः चन्दनाद्रिः, श्रीखण्डाचल इत्यादि। कैलासे इति—स्फटिकनगः, स्फटिकाद्रिरित्यादि। अत्र धनदेभ्य आवासः धनदावासः गुह्यकेन्द्रावास इत्यादि। हरगिरिः, शिवशैल इत्यादि। मेराविति--स्वर्गिभूधरः, स्वर्गपर्वतः, सुवर्णाद्रिः, सुरशैलः, कनकाचल, इत्यादि। सूर्येभ्य कान्ते इति—अत्रोद्देश्यवचनमपि यौगिक शब्दार्थं पृथग्विभक्तित्वेनोपन्यासात् सूर्यकान्तः रविकान्त, इत्यादि। सूर्यरत्नं, सूर्योपलः; अग्निरत्नं, दहनोपलः; रविमणिः, सूर्याश्माज्वलनमणिः, ज्वलनाश्मेति। चन्द्रेभ्य कान्ते इति—अत्राप्युद्देश्यवचनं यौगिकशब्दार्थमसमासेनोपन्यासात् चन्द्रकान्तः, शशिकान्त, इत्यादि। चन्द्रमणिः, चन्द्रोपलश्चन्द्राश्मेत्यादि। अब्धाविति—नद्यधिपः, वार्यधिपः, स्रोतोधिपः, यादोधिपः, नदीपतिः, धुनीधवः, पयःपतिः, पाथोनाथ, इत्यादि। अद्भ्य[1] इति—अपांनिधिः, जलधिः, जलाशयः, पयोराशिः, वारिनिधिः, नीरनिधिः, नीराशयः,

१. शब्द एषः पा.म. पुस्तके नास्ति।

तोयराशिः वार्द्धिरित्यादि । दुग्धार्णवः, क्षीरोदधिः, लवणार्णवः, दधिवारिधिः, घृतसमुद्रः, सुरावारिधिः, इक्षुनीरधिः, स्वादुजलधिरिति सप्तार्णवाः । यदाहुः—लवणक्षीरदध्याज्यसुरेक्षुस्वादुवारयः ।

तथा चोक्तम्—

लावणोरसमयः सुरोदकः सार्पिषोदधिजलः पयःपयाः ।
स्वादुवारिरुदधिश्च सप्तमस्तान् परीत्यत इमे व्यवस्थिताः ।।१।।

का. क. अब्धौ नदीभ्यो वारिभ्यः स्रोतसो यादसोऽधिपाः ।।६३।।
अद्भ्यो निध्याशयौ राशिर्धिर्दुग्धादेः परेऽर्णवाः ।
गङ्गायां सिद्धात् स्वःस्वर्गिनभोभ्यो निम्नगासमाः ।।६४।।
जह्नोः पुत्र्यः कालिन्द्यां कलिन्दादर्कादितः सुताः ।
कृतान्तेभ्यो भगिन्योऽपि रेवायां मेकलात्तथा ।।६५।।
चन्द्रेभ्यस्तनयाः ताप्यां तपनेभ्यस्तनूद्भवाः ।
अब्जे जलेभ्यः सरसः पंकाज्जन्मजरुड्रुहाः ।।६६।।
भृङ्गे पुष्पेभ्यो मध्वादेर्लिहः षट्शब्दतोऽङ्घ्रयः ।
सर्पे वातेभ्योऽशनाद्या द्विशब्दाद्रसनासमाः ।।६७।।
दृग्भ्यः
फणेभ्योऽपि धरादयः ।
मयूरे नीलेभ्यः कण्ठाः भुजङ्गेभ्यो भुगादयः ।।६८।।
जलदेभ्यः सुहृत्तुल्या वृक्षे क्ष्माभ्यो जरुड्रुहा ।
जलवाहे जलेभ्यस्तु वाहो मुग्दो धरादयः ।।६९।।

म. टी. गङ्गायामिति—सिद्धनिम्नगा, स्वर्गिनदी, स्वर्गितटिनी, नभोनदी, सिद्धधुनी, स्वर्गापगा, त्रिदशतरङ्गिणी, व्योमस्रोतस्विनीत्यादि । जह्नुपुत्री, जह्नुभवेत्यादि । अत्र स्वःसुराभ्रेभ्यो वापी, स्वर्वापी, सुरवापी, अभ्रवापीत्यादि । कालिन्द्यामिति—कलिन्द्राद्रेरियं कालिन्दी, कलिन्दसुता, कलिन्दतनयेत्यादि । अर्कसुता, सूर्याङ्गजेत्यादि । कृतान्तभगिनी यमस्वसेत्यादि । रेवायामिति—मेकलाद्रेर्जातत्वान्मेकलाद्रिजा, मेकलकन्या, चन्द्रतनया, इन्दुजेत्यादि । ताप्यामिति—तपनतनूद्भवा, तपनात्मजा, तपननन्दिनीत्यादि । अब्जे इति—जलजन्म, जलजं; जलरुट्, जलरुहं; सरोजन्म, सरोजं; सरोरुट्, सरोरुहं; पङ्कजन्म, पङ्कजं; पङ्करुट्, पङ्करुहं; नीरजन्म, वारिजं, पयोजं, तोयरुहं, सरसीरुहमित्यादि । भृङ्गे इति—पुष्पलिट्, मधुपः, मधुव्रतः, प्रसूनलिट्, इत्यादि । षडंह्रिः, षट्पद, इत्यादि । सर्पे इति—वाताशनः, पवनाशनः, वायुभुगि, त्यादि । द्विरसनः, द्विजिह्व, इत्यादि । दृक्श्रुतिः, चक्षुःश्रवा, दृग्विषः, इत्यादि । विषधरः, फणधरः; विषभृत्, फणभृदित्यादि । अत्र गूढा दंह्रयः गूढपात्, गूढचरण, इत्यादि । मयूर इति—नीलकण्ठः, नीलग्रीवः, श्यामकण्ठ, इत्यादि । भुजगभुक्, सर्पाशन, इत्यादि । जलदसुहृत् मेघसुहृदित्यादि । वृक्षे इति—[illegible], क्ष्मारुट्, क्ष्मारुहः, क्षोणीरुट्, क्षितिरुह इत्यादि । जलवाहे इति—जलवाहः, जलमुक्, जलदः, जलधरः, नीरवाहः, तोयमुक्, पयोधर, इत्यादि । एवमिति—स्तबकोऽयं निगदसिद्धः समाप्त इत्यर्थः ।

अथ सूत्रोत्तीर्णाः केचिदन्येऽपि यौगिकशब्दा लिख्यन्ते । यथा-मङ्गले पृथिवीभ्यः सुताः-पृथ्वीसुतः, धरणीपुत्रः, कुजः, भौमः, माहेय, इत्यादि । बुधे चन्द्रेभ्यः सुताः-चन्द्रसुतः, चान्द्रमसेयनिः सौम्यः पिताऽपि सोमो देवताऽस्येति

रोहिण्याः सुताः—रोहिणीसुतः, रौहिणेय इत्यादि । बृहस्पतौ सुरेभ्यो गुरवः-सुरगुरुः, देवगुरुः, त्रिदशाचार्य, इत्यादि ।, सुरेभ्यो मन्त्रिणः-सुरमन्त्री, विबुधाऽमात्य इत्यादि । शुक्रे दैत्येभ्यो गुरवो मन्त्रिणश्च-दैत्यगुरुः, दानवाचार्यः, असुरमन्त्री दनुजामात्य, इत्यादि । शनौ सूरेभ्यः छायायाः पुत्राः-सूरपुत्रः, शौरिः, छायापुत्रः, छायासूनुः । राहौ सिंहिकायाः सुताः-सिंहिकासुतः, सैंहिकेय, इत्यादयः । वर्षायां मेघेभ्यः कालागमो-मेघकालः, मेघागमः, जलदागम, इत्यादयः । तपेभ्योऽत्ययः तपात्ययः, ग्रीष्मात्यय, इत्यादयः । शरदि घनेभ्योऽत्ययः-घनात्ययः, जलदात्यय इति । हेमन्ते हिमेभ्य आगमकालो-हिमागमः, प्रालेयागमः, हिमकाल, इत्यादयः । एवं हेमन्तात्ययः, शिशिरात्ययो, वसन्तः, वसन्तात्ययो, ग्रीष्म इति ।।छ।।

नभसि सुरेभ्यो मेघेभ्य उडुभ्यो वायुभ्यो मार्गाः-सुरमार्गः, मेघाध्वा, उडुपथः, मरुदध्वा, इत्यादयः । मेघेभ्य आश्रयः-मेघाश्रयो, जलदाश्रय, इत्यादयः । करके मेघेभ्यो ग्रावाणः-मेघग्रावा जलदाश्मा इत्यादयः ।छ।।

अप्सरः सुरस्वर्गेभ्यश्च स्वर्गिभ्यश्च वध्वो नार्यो गणिकाश्च-स्वर्वध्वः, स्वर्गिवध्वः, सुरवध्वः, सुरनार्यः, स्वर्नार्यः, स्वःस्त्रियः, स्वर्गिनार्यः, सुरस्त्रियः, स्वर्गणिकाः, स्वर्वेश्याः, सुरवेश्या; इत्यादयः । दवे वनेऽग्नयः—दवाग्निः, दववह्निः, काननाग्निरित्यादयः । अनिरुद्धे ऋष्यात् ध्वजाः-ऋष्यनामा मृगोध्वजोऽङ्कश्चिह्नं अस्य-ऋष्यध्वजः, ऋष्याङ्कः, ऋष्य-केतुरित्यादयः । उषायाः प्रिया[यः] उषा बाणसुता तस्याः प्रियः, उषाप्रियः, उषेशः, उषारमण, इत्यादयः ।।छ।।

प्रवीणे कृतकर्मार्थौ-कृतकृत्यः, कृतार्थः, कृती । चन्द्र हरिद्रायां रात्रिनामानि-रजनी, निशेत्यादयः । मृते कथा-नामालेखायशोभ्यः शेषः । विमनसि दुरन्तर्विभ्यो मनाः दुर्मनाः, अन्तर्मनाः, विमनाः । लेखकेक्षराच्चणजीवकचञ्चवः, सहायेऽनोर्जीविगामि वरप्लवाः पदातो पुरोऽग्रेभ्यः स पुरस्तोमगमगामिगाः । वेश्यायां पणपण्येभ्योऽङ्गनाः सूनावात्मने-ऽङ्गेभ्यश्च भूभवजन्मादयः । स एव स्त्रीत्वे दुहिता भ्रातृव्यसुताः, भागिनेये स्वसृभ्यः सुताः, पौत्रे पुत्रेभ्यः सुताः । एवं पितृष्वसृमातृष्वसृभ्यः, सुताः ।।छ।।

उच्चैःश्रवसि देवेभ्योऽश्वाः केशरीपुरः प्रियाः । श्मशाने प्रेतात् परेतात् पितृतः । सद्मानि वनानि च कौमुद्यां, इन्दुभ्यो रुचः, विद्युति अचिरक्षणाभ्यां प्रभा । प्रभाते निशाभ्योऽत्ययः, प्रदोषे रजनीभ्यो, मुखं सन्ध्यायां, दिनेभ्यो-ऽन्तावसानाविति । ध्वान्ते समावान्धेभ्यः तमसं, अवश्याये निशाभ्यो जलानि, बहुले कृष्णेभ्यः पक्षः, दर्शे सूर्येन्दुभ्यः सङ्गमः अर्हति, तीर्थादधिपाः करः कृच्च जिनाधीशाः ।।छ।।

नृपे पृथिवीमनुजप्रजाविश्वदेशेभ्यः पतयः । तथा पृथ्व्यादिभ्यः—

पाता, गोपायिता, गोप्ता, त्राता, भोक्ता च शाशि [सि]ता ।
नाथोऽधिपः परिवृढो भर्त्रेशः, प्रभुरीश्वरः ।
इन इन्द्रो, विभुः स्वामी, राजा राट्, पतिरीश्वरः ।।छ।। षट्पदी ।

रामे रक्षोदशरथात्, कौश [स] ल्यायाः सुताः, जानक्याः प्रियाः, जानक्यां जनकात् धरणीभ्यः सुताः, लक्ष्मण सुमित्रायाः सुताः । रावणे रक्षेभ्यो लङ्कायाः पतयः, मन्दोदरीतः प्रियाः, दशाऽस्यकण्ठः, मेघनादे शक्रेभ्यो जितः[ताः] मन्दोदरीतः सुताः । युधिष्ठिरे धर्मात् सुकृतात्तपसः, सत्यात् सुताः, शल्यादरयः, भीमे वायुभ्यः सुताः ,हिडिम्बा बक-किर्म्मरे कीचकेभ्यो रिपवः, अर्जुने शक्रेभ्यः सुताः, कपिभ्यो हनुमद्भ्यो ध्वजाः । सुभद्राया, उलूप्याश्चित्राङ्गदायाः प्रियाः नवातकवचकालिके यमकासुरकर्णेभ्यो रिपवः ।।छ।।

कृष्णायां पञ्चालाद् यज्ञसेनात् यज्ञात् नन्दिभ्यः पाण्डवेभ्यः प्रियाः, भीष्मे शान्तनोर्गङ्गाभ्यो नदीभ्यश्च सुताः, विप्रेभ्यः सुराः अग्रद्विशब्दाभ्यां जन्मजजातयः, सांयात्रिके पोतेभ्यो, वणिक्केशेषु शिरोभ्यो, ऽजस्तद्बहुलत्वे हस्तपक्षे पाशकलापभारोच्चयाः, अधरे दन्तेभ्योऽम्बरादिच्छदश्च, स्तनयोरुरसि, वक्षउरस्तोजः कक्षायां, भुजेभ्यो मूलचूचुके स्तनेभ्यो मुखानि ।

स्वगुणैरुपमानैश्च सुन्दरादिपदैरपि ।
विशेष्यन्ते स्त्रियोऽङ्गानि क्रियाश्चाप्यभिधाकृते ।।१।।

अङ्गानां क्रियानां च स्वे च ते गुणाश्च, तैस्तद्वाचिभिः शब्दैरित्यर्थः । अत्र स्वशब्दोपादानान्तरलब्धादीनां गुणानां नामसाधारणतामाह्——

तेन सुन्दरत्वादीनां गुणत्वेऽपि साधारणत्वात् सुन्दरादिपदैरिति पृथग्निर्देशः । उपमीयन्ते एभिरुपमानानि मृगलोचनादीनि, तैः । सुन्दर आदिर्येषां[1] तानि मृगलोचनादीनि, तैः सुन्दर आदिर्येषां तानि सुन्दरादीनि पदानि, तैश्च एतैः त्रिभिरङ्गान्यवयवालोचनादीनि क्रियाः गमनादयश्च । स्त्रिया अभिधाकृते अभिधानयोजनाय विशेष्यन्ते विशेषणयुक्तानि क्रियन्ते ।

स्वगुणविशेषितैरङ्गैर्नामानि यथा——अलसमीक्षणमालोकोऽस्या अलसेक्षणा । अत्रेक्षणलक्षणायाः क्रियाया अलसत्वमसाधारणः स्वकीयो गुण एव । मधुरवचना ललितगमनेत्यादयः । उपमानविशेषितैरङ्गैर्नामानि यथा–मृगाक्षिणी इव अक्षिणी अस्या मृगाक्षी, उष्ट्रमुखादित्वादुपमानभूताक्षिशब्दस्य बहुव्रीहौ लोपः । अत्र मृगाक्षिलक्षणेनोपमानेनाक्षिलक्षणमङ्गं विशेषितम् । एवं सर्वत्र इन्दुवन्मुखमस्या इन्दुमुखी, कमलानना, इत्यादीनि बहूनि नामानि सन्ति । तानि नाममालाया ज्ञेयानीति ।।छ।।

इति श्री तपागच्छाधिनायकपातसाहि श्री अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री ४ श्री हीरविजयसूरीश्वरशिष्यपण्डित श्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे शब्दसिद्धिप्रतानान्तर्गतयौगिकाह्वानमालिकास्तबकोद्योतको द्वितीय प्रसरः ।।छ।।

का. क. एवं परावृत्तिसहान् शब्दानौचित्यतो बुधः ।
समासव्याससिद्ध्यर्थं परावृत्य प्रयोजयेत् ।।७०।।

स्तबकोऽयं निगदसिद्धः ।

इति श्रीजिनदत्तसूरि. शब्दसिद्धिप्रताने द्वितीये यौगिकनाममालास्तबको द्वितीयः ।

---

१. तानि....आदिर्येषाम्–इदं पा.म. पुस्तके नास्ति ।

॥ २.३ ॥

अथानुप्रासोपायमाह

का. क. अनुप्रासस्य सिद्ध्यर्थं शब्दान् साधारणान् ब्रुवे ।
मण्डितं मण्डलैः पूरैः परितं सङ्कुलं कुलैः ॥७१॥

राजितं राजिभिर्युक्तं पङ्क्तिभिः पटलैः पटुम् ।
निचितं निचयैरोघैर्मोघं सञ्चयसाञ्चितम् ॥७२॥

पुञ्जेन मंजुजातेन सुजातं वृन्दसुन्दरम् ।
कदम्बचुम्बितं सार्थकृतार्थं सगुणं गुणैः ॥७३॥

राशिभिर्भासितं व्रातैः क्रान्तं संहतिसंहतम् ।
सोमं स्तोमैः ससङ्घट्टं सङ्घैः प्रीतप्रजं व्रजैः ॥७४॥

स्फुरन्मुदं समुदयैः प्रकरेण प्रियङ्करम् ।
ततमानं वितानेन निकुरम्बसडम्बरम् ॥७५॥

निकरेण प्रीतिकरं निवहप्रवहत्प्रभम् ।
निकायेन सुकायश्रीविसरप्रसरद्रसम् ॥७६॥

यूथेन ग्रथितं जालजटालं पूगसङ्गतम् ।
सन्दोहसप्ररोहश्रि समुदायमदायितम् ॥७७॥

समूहसुमहद्व्यूहमहितं वारधारकम् ।
समाजराजितं चक्राऽञ्चितमुत्करमुत्करैः ॥७८॥

चक्रवालविशालश्रीसङ्घातघटितोदयम् ।
धोरणीधारणं श्रेणीशरणं कलमालिभिः ॥७९॥

म. टी. अथानुप्रासोपायमाह—अत्र स्तबके केचन शब्दाः ससमासाः केचन समासरहिताश्च बोध्याः ।[1] मण्डितमिति मण्डितं, मण्डलैरित्यत आरभ्य सङ्घातघटितोदयं यावत् । समूहवाचकशब्दा ज्ञेयाः। धोरणीधारणमित्यत आरभ्यावलिशालितेति यावत् । श्रेणिपङ्क्तिवाचकशब्दास्तथैवानुप्राससाधका ज्ञेयाः । तत्रालिभिः श्रेणिभः, कलंमनो—

का. क. ततिभिर्वर्तितं मालामालितावलिशालितम् ।
विशालशालितं कीर्णविस्तीर्णं भूरिपूरितम् ॥८०॥

भूयिष्ठपुष्ठमुद्भान्तादभ्रं बहुलतावहम् ।
प्रभूतभूतं प्रचुरप्रचारं कलपुष्कलम् ॥८१॥

---

१. ससमासाः. . . .,ज्ञेयाः—इदं पा.म. पुस्तके नास्ति ।

चारुप्रचारहारिस्फारितरुचिररुचिबन्धुराबन्धाः ।
शोभनशोभं सुषमसममधुरधुरोत्तमतमाग्रिमग्राह्याः ॥८२॥

अर्हप्रबर्हसुन्दरतरसत्तमतमनवप्रवराः ।
पुण्यवरेण्यग्रामग्रामण्यौ काममभिरामः ॥८३॥

वल्गद्वल्गुमनोहरतरसम्यग्रम्यमञ्जुरुचिपुञ्जाः ।
दृष्टप्रकृष्टकामं वामाग्र्याग्रा सुखप्रमुखाः ॥८४॥

मञ्जुलोज्ज्वलसोद्रेकप्रवेकानुत्तमक्रमाः ।
निवेशपेशलप्राग्रजाग्रत्प्राग्रहराग्रहाः ॥८५॥

नम्रकम्रं काम्यकामवर्यधुर्यप्रियक्रियाः ।
साधुशुद्धं कान्तताम्तस्पष्टपृष्टवराऽन्तराः ॥८६॥

मुख्यसंख्यरुच्यरुचि सम्यक्सौम्यस्फुरत्पराः ।
हृद्यविद्योतिसौभाग्यभाग्यमाधुर्यधुर्यकाः ॥८७॥

प्रधानसन्धानज्येष्ठश्रेष्ठौ मनोरमक्रमः ।
पराध्र्यपरर्द्धिजल्यि जातोऽनुत्तरसन्तरत् ॥८८॥

सरलाग्रेसरो वर्गाग्रणीरन्योन्यधन्यभाः ।
अकनीयः कमनीयः पुरोगतपुरोगकाः ॥८९॥

म. टी. हरं विशालशालितं कीर्णविस्तीर्णमिति शब्दौ पूर्णवाचकौ । भूरिपूरितमित्यत आरभ्य बहुलतावहमिति यावत् प्रचुरार्थवाचकशब्दा अनुप्राससाधका ज्ञेयाः । तत्र प्रभूतानि भूतानि यत्र तत्प्रभूतभूतं, अदभ्रं बहुलमिति । चारुप्रचारेत्यत आरम्भ्य पुरोगतपुरोगकं यावत् मनोहरवाचकाः शब्दा अनुप्राससाधका ज्ञेया इति ।

का. क. अथ श्वेतादिवर्णाः—

धवलप्रबलो लक्ष्यवलक्षो गौरगौरवः ।
सितस्मितशुभादभ्रकेतकश्वेतकान्तयः ॥९०॥

पलाण्डुपाण्डुरहरहरिणौ गर्जदर्जुनः ।
दन्तावदातो विसविशदः शुक्लांशुशुक्लता ॥९१॥

अरुणारुणदृक्कोणशोणपाटलपाटलाः ।
पक्वाम्रताम्रमाञ्जिष्ठवरिष्ठौ रोहिरोहितः ।
उद्रिक्तरक्तलोहितलोहितादभ्रबभ्रवः ॥९२॥

कडारस्फारहारिद्रहारिरुक्भद्रकद्रवः ।
बभ्रुवभ्रवङ्गपिङ्गौ भृशं पिशङ्गमङ्गकम् ॥९३॥

कपिकपिशकपिकपिलहरिहरितपिञ्जरपिङ्गलकलाभाः ।
उन्मीलन्नीलश्रीः परितो हरितो निकामतः श्यामः ।।९४।।

कृष्णकृष्णतालकालमेचकिकण्ठमेचकाः ।
श्यामा श्यामलमसिवदसितः शितिरुक्स्थितिः ।।९५।।

सारङ्गरङ्गदङ्गश्रीः शबलप्रबलप्रभः ।
प्रसरद् धूसरो धूम्रधूमलो धूम्रकम्ररुक् ।।९६।।

पुरः कर्बुरकिर्मीरकिरणः कलचित्रलः ।
कपोतकान्तिकल्माषमयूखौ चित्रचित्ररुक् ।।९७।।

निर्वर्ण्याभ्यर्णसन्नद्धासन्नसन्निधिसन्धयः ।
सदेशपेशलश्रीमत् ससीमविकटान्तिकाः ।।९८।।

सन्निधानगुणाधानसन्निकर्षप्रकर्षता ।
अभ्यग्रमभ्यग्रहणमुपकण्ठविकुण्ठताः ।।९९।।

अभ्यासमभ्यासमता निकटप्रकटस्थितिः ।
उपान्तकान्तसम्भ्रान्तपरिक्रीडत्सनीडता ।।१००।।

सवेशसन्निवेशश्रीः सविधो विविधोदयः ।
शश्वत्पार्श्वसन्निकृष्टोत्कृष्टसमीपदीप्रताः ।।१०१।।

समर्यादिस्वमर्यादो हिताव्ययहिताशयः ।
अपदान्तपदान्तश्रीरनन्तरपरम्परः ।।१०२।।

संसक्तव्यक्तो नेदिष्ठदिष्टोऽथ दूरपूरतः ।
विप्रकृष्टः प्रकृष्टश्च दवीयःपदवी तथा ।।१०३।।

दविष्ठविनिविष्टोऽथ धर्मकर्मणि शर्मभाक् ।
सतत्त्वमस्त्वसहजसहचारीति नीतिमान् ।।१०४।।

म. टी. अथ श्वेतवर्णवाचकशब्दा धवलाद्या शुक्लतापर्यन्ता अनुप्राससाधकास्तत्र । पलाण्डु कन्दविशेषः, बिसं कमलनालम् ।

अथ रक्तवर्णवाचकशब्दा अरुणाद्याः पिङ्गलकलाभपर्यन्ता अनुप्राससाधकाः । तत्र कडारेत्यारभ्य पिङ्गलकलाभान्ताः । पीतवर्णवाचकास्ते रक्तवर्णे कथं समानीता इति चेदुच्यते । छन्दःसिद्धिप्रतानपञ्चमस्तबके कविसमये पीतारुणयोरैक्यप्रतिपादनात् । तथा लोहिताद्रक्तादधः प्रचुरो बभ्रुः पीतः ।

अथ श्यामवर्णवाचकशब्दा उन्मीलन्नीलेत्यारभ्य शितिरुक् स्थितिपर्यन्ता अनुप्राससाधकाः । अत्रापि प्राग्वत् नीलश्यामयोरैक्यमिति सारङ्गेत्यारभ्य चित्ररुक्पर्यन्ताः, शबलवर्णवाचका नानाविधवर्णवाचका इत्यर्थः ।

अथ समीपवाचकशब्दा निर्वर्ण्याभ्यर्णेत्यारभ्य दिष्टपर्यन्ता अनुप्राससाधकाः । तत्र सेवेशेति आसन्नसन्निवेशस्थानथीः ।
अथ दूरादयो दविष्ठान्ता दूरार्थवाचका शब्दाः । धर्माद्याः मुक्तान्ताः धर्मवाचकाः आकूताद्या आशयान्ताः ।

का. क. रूपस्वरूपस्वभावभावसंसिद्धिसिद्धयः ।
निसर्गसर्गप्रकृतिकृतितो लक्षलक्षणाः ।।१०५।।

शीलानश्लीलशीलोऽथ स्वस्थावस्थादशावशात् ।
रतिस्थितिरथो स्नेहासन्देहाप्रीतिरीतितः ।।१०६।।

प्रेमस्थेमाथ दाक्षिण्यदाक्षानुकूलमूलतः ।
सम्भ्रमभ्रमसम्पर्कात्तर्कनिःशङ्कसङ्कराः ।।१००।।

अवधाननिधानश्रीः समाधानविधानतः ।
प्रणिधानसुधाधामसमाधिर्व्याधिबाधिनी ।।१०८।।

धर्मशर्मकरः पुण्यनैपुण्यो वृषनिस्तृषः ।
श्रेयः प्रेयो भागधेयः सन्धेयः सुकृतं कृतम् ।।१०९।।

नूतनाकूतसंमतमतता भावभावना ।
स्वयमाशयातिशयादथ विस्तारतारता ।।११०।।

प्रपञ्चसञ्चनाव्यासविन्यासाभोगभोगता ।
नवच्छायोच्छ्रयारोहरोहच्चयसमुच्छ्रयाः ।।१११।।

अथोदग्रसमग्रत्वमुच्छ्रितस्थितसंश्रितः ।
रङ्गत्तुङ्गचञ्चदुच्चनुन्नोन्नतधुरोद्धुराः ।।११२।।

समस्तन्यस्तसकलसकलोद्गर्वसर्वता ।
नूनमन्यूननिखिलविलसद्विश्वविश्वता ।।११३।।

अखण्डमण्डनाव्यग्रसमग्राशेषशेखराः ।
अखिलानाविलः शुद्धमुद्धतं रुचिरं शुचिः ।।११४।।

पवित्रचित्रताभावपावनः पूतनूतनः ।
ज्वलदुज्ज्वलविमलोत्तमौ मिलदनाविलः ।।११५।।

नवीनपीनसद्यस्कहृद्यतानूतनूतनाः ।
प्रत्यग्राव्यग्रताभव्यनव्यत्वाभिनवस्तथा ।।११६।।

निकामरामातिमात्रगात्रैकान्तकान्तता ।
एवं सामान्यशब्दानां ज्ञेयाऽनुप्रासवासना ।।११७।।

अथो कथादिके राजवर्णनाद्युपयोगिनः ।
अनुप्रासस्य सिद्ध्यर्थं शब्दान् कतिचन ब्रुवे ॥११८॥

महादेवमहाशर्वगर्वो हरमनोहरः ।
उग्रोऽग्रो गिरिः गिरिशो वर्गो भर्गोत्तमक्रमः ॥११९॥

धराधीशानीशानश्रीर्भवप्रवरवैभवः ।
विना पिनाकिना चेतो वह्निरेताः शिवः शिवः ॥१२०॥

शम्भुर्निशुम्भनो रुद्ररौद्रो निःशङ्कशङ्करः ।
मर्द्दी कपर्दी भूपालिकपाली भीमभीमभाः ॥१२१॥

स्थाणुः स्थाणुर्वामदेव वामो भैरवभैरवः ।
खण्डपरशुरखण्डश्रीर्निस्तन्द्रश्चन्द्रमौलिवत् ॥१२२॥

जितारातिः पुरारातिः सव्योमकेशपेशलः ।
नीलकण्ठसदृङ्नीलो नीललोहितलीलया ॥१२३॥

निरूपाक्षः सरूपाक्षः कृत्तिवासाः प्रकाशभाः ।
वृषा वृषाङ्कसर्वाङ्गखट्वाङ्गधरदुर्धराः ॥१२४॥

श्रीकण्ठोत्कण्ठया कण्ठे कण्ठे कालकरालरुक् ।
ईश्वरोऽनश्वरः स्फूर्जद् धूर्जटिर्मूलशूलभृत् ॥१२५॥

मृत्यु मृत्युंजयस्फूर्तिरष्टमूर्तिः अमूर्त्तिमान् ।
भूतप्रभुः प्रभूतश्रीः विष्टपः शिपिविष्टवत् ॥१२६॥

म. टी. अभिप्रायवाचकाः विस्ताराद्या, आभोगान्ता विस्तारवाचकाः, उच्छ्रयाद्या उद्धुरांता, उच्छ्रयवाचका समस्ताद्याः, सर्वान्ताः समस्तवाचकाः । अन्यूनाद्या अखिलान्ताः, समस्तवाचकाः नवीनाद्या अभिनवान्ताः । नूतनवाचकानि कामाद्या एकान्तान्तानि । कामवाचकाः शब्दा अनुप्राससाधका ज्ञेयाः ।

अथ राजाऽमात्यनृपपुत्रपत्न्यादिवर्णने यथौचित्यमनुप्रासशब्दाः, यथा—महादेवेत्यारभ्य शिपिविष्टवत् पर्यन्ता ईश्वर-नामवाचकशब्दा अनुप्राससाधकाः ।

का. क. गौरीगौरीशकालीश शाली चण्डीशचण्डिमा ।
दुर्गादुर्गाणि रुद्राणी वाणी शर्वाणिपाणिना ॥१२७॥

वात्या कात्यायनी सर्वमङ्गला सर्वमङ्गला ।
नवानीता भवानी साऽपर्णा(ऽ)वर्णा शिवाशिवा ॥१२८॥

रणे गणेशविघ्नेश निघ्ने हेरम्बडम्बराः ।
परः परशुपाणिश्रीः सनायकविनायकाः ॥१२९॥

स्तम्बो लम्बोदरो दन्तैकदन्तेभास्यलास्यवत् ।
दूषको मूषकरथो महासेन महामहान् ॥१३०॥

स्वामी कामी कृतास्कन्दः स्कन्दषण्मुखसंमुखाः ।
महातेजो महातेजा दत्तार्तिः कार्तिकेयवत् ॥१३१॥

कुमारस्तारसेनानी सेना गाङ्गेयगेयवत् ।
सब्रह्मचारि सब्रह्म यमाहुर्बाहुलेयवत् ॥१३२॥

शाखाविशाखक्रौञ्चारिसञ्चारिशरभूशराः ।
तारका तारकारातिर्नादिद्वादशलोचनः ॥१३३॥

विश्वरूपस्वरूपश्रीः क्रतुपूरुषपौरुषः ।
दामोदरवदुद्दामो धरणीधरदुर्धरः ॥१३४॥

श्रीवत्सवदतुच्छश्रीः स त्रिविक्रमविक्रमः ।
स वासुवासुदेवाभः स हृषीकेशपेशलः ॥१३५॥

विष्वक्सेनविष्वक्सेना च्छद्मना पद्मनाभवत् ।
विष्णुर्वाचिष्णुवैकुण्ठकुण्ठलोकेशकेशवाः ॥१३६॥

द्विट् मुण्डपुण्डरीकाक्षो भारान्नारायणप्रभुः ।
स्फीतां पीताम्बरो मञ्जुर्मञ्जुकेशाच्युताच्युतः ॥१३७॥

श्रीवत्साङ्कशशाङ्कश्रीर्जनार्दन इवार्दनः ।
सदा गदाधरः शाली वनमाली हरिर्हरिः ॥१३८॥

आशादाशार्हवद् बाणः पुराणपुरुषक्रमः ।
इन्द्रोपेन्द्रकृष्णकृष्णपुरुषोत्तमपौरुषाः ॥१३९॥

वृषा वृषाकपिः सेतुस्तार्क्ष्यकेतुरजोऽग्रजः ।
नयज्ञयज्ञपुरुषत्रिक्रमोपमविक्रमः ॥१४०॥

विष्टरश्रवसाविष्टो विश्वं विश्वम्भरः प्रभुः ।
मनाक् सनातनः शौरिगौरिर्गोविन्द विन्दति ॥१४१॥

द्वीपश्रीपतिदैत्यारिशैत्या कुन्दमुकुन्दवत् ।
अगाधमाधवः पद्मे पद्मेशयवदाशयः ॥१४२॥

बलदेवबलो देवः सीरभृद्वीरविक्रमः ।
कालिन्दीकर्षणोत्कर्षः सोद्रेकस्त्वेककुण्डलः ॥१४३॥

लीलां नीलाम्बरो भद्रबलभद्रो हली बली ।
कुशली मुशली तालध्वजोत्तालो बलाद्बलः ॥१४४॥

ततालम्बः प्रलम्बघ्नः क्ष्मापालः कामपालवत् ।
अनन्तानन्तसङ्ग्रामारामकामः सरामवत् ॥१४५॥

सङ्कल्पजन्मकल्पश्रीर्विषमाविषमायुधः ।
चञ्चत्पञ्चशरः पुष्पपुष्पास्त्रो घस्मरः स्मरः ॥१४६॥

प्रद्युम्नद्युम्नकन्दर्पकन्दसद्दर्पदर्पकाः ।
मनो मनोभवो भव्यवदनो मदनोपमः ॥१४७॥

पीनमीनध्वजः कामः कामनामारसारता ।
शृङ्गारयोनिर्भृङ्गारस्तम्बशम्बरसूदनः ॥१४८॥

अनङ्गचङ्गसङ्गत्या मधुमित्रपवित्रभाः ।
अथ मन्मथवद्धनप्रसूनशरभासुरः ॥१४९॥

प्रजा प्रजापतिर्धर्ता जगत्कर्ता विधिर्विधिः ।
ब्रह्म सब्रह्मचारित्वं पितामहमहा महान् ॥१५०॥

स्रष्टा स्पष्टास्फुरन्मेधा वेधाः कमलभूरभूत् ।
स्वयंभूमिः स्वयंभूवद्धाता त्राता जगत्त्रयीम् ॥१५१॥

चतुरा चतुरास्यश्रीः पद्मभूः सद्म सम्पदाम् ।
परमेष्ठः परमेष्ठी वेदगर्भसगर्भभाः ॥१५२॥

शतानन्दकृतानन्दद्रोहिणा द्रुहिणाकृतिः ।
सुरज्येष्ठः सतां ज्येष्ठो नाभिभूर्नाभिभूतये ॥१५३॥

श्रीमानिन्द्र इवोन्निद्रः कश्चिद्दुश्च्यवनोपमः ।
महामहः सहस्राक्षः समन्युः शतमन्युवत् ॥१५४॥

वर्यः पर्यन्यवत्पूर्वः पूर्वदिक् क्रान्तकान्तभाः ।
सुनासीरसुनासीरः साक्षादिव दिवस्पतिः ॥१५५॥

शक्रवक्रः पुरुहूतपूतः सूत्रामधामभाक् ।
नास्तो वास्तोष्पतिः क्षोणीखण्डमाखण्डलप्रभः ॥१५६॥

अनघो मघवा भूपः स पुरन्दरसुन्दरः ।
वासवासवसारौजा बिडौजा दम्भजम्भजित् ॥१५७॥

ससङ्क्रन्दनसङ्क्रन्दः पाकशासनशासनः ।
प्राचीनबर्हिः प्राचीनवर्गः स्वर्गपतिप्रभुः ॥१५८॥

आदित्यनित्यसविता कविता क्रूरशूरवत् ।
अंशुमाली महःशाली दिवाकर इवाकरः ॥१५९॥

द्वादशात्मा महात्माऽसौ त्रयीतनुमनुव्रजन् ।
जगच्चक्षुः सादृक्षश्रीरहर्पतिमहस्ततिः ॥१६०॥

धर्मकर्मकर्मसाक्षी पवित्रश्चित्रभानुवत् ।
अर्यमा वर्यमाहात्म्यसत्पूतः सप्तसप्तिवत् ॥१६१॥

आर्तं मार्तण्डचण्डश्रीर्मणिर्दिनमणिद्युतिः ।
द्योतनः प्रद्योतनवत् सहस्रांशुमहःसहः ॥१६२॥

भास्वद्भास्वद् भानुभानुः शौर्यसूर्यरविच्छविः ।
पतङ्गचङ्गतरणितरस्वस्तिगभस्तयः ॥१६३॥

विरोचनरोचनश्रीः पूषा भूषार्ककर्कशाः ।
नभो नभोमणिः प्रांशु खरांशुः कोपगोपतिः ॥१६४॥

चण्डदण्डधराध्वान्तकृतान्तसमविक्रमः ।
करालकालः सद्धर्मो धर्मराजोऽन्तकान्तकृत् ॥१६५॥

हीना पीनाशकीनाशवर्तिना समवर्तिना ।
सुश्राद्धश्राद्धदेवेन शमनो दमनो द्विषाम् ॥१६६॥

सम्मुदी कौमुदीकान्तः साक्षाद्दाक्षायणीपतिः ।
दोषधीरोषधीभर्ता मुदः कुमुदबान्धवः ॥१६७॥

दैवाज्जैवातृकः सोमः कोमलो बिन्दुरिन्दुवत् ।
विधुर्विधुरितो राजा राजानिस्तन्द्रचन्द्रमाः ॥१६८॥

दक्षनक्षत्रनाथश्रीः रोहिणी रोहिणीशरुक् ।
स्फारातारापतिस्तारतारकस्तारकप्रभुः ॥१६९॥

गिरमाङ्गिरसक्षीबपीव्रजीवोऽगुरुर्गुरुः ।
धिषणो धिषणोदग्रश्चित्रश्चित्रशिखण्डिजः ॥१७०॥

वाचं वाचस्पतिः सूरिर्भूरिबृहद्बृहस्पतिः ।
सविचार्यसुराचार्यसभृङ्गीपतिर्गीष्पतिः ॥१७१॥

म. टी. रणे गणेशेत्यारभ्य मूषकरथपर्यन्ता गणेशनामवाचका(काः)। महासेनेत्यारभ्य द्वादशलोचनपर्यन्ताः कार्त्तिकेयनामवाचकाः। विश्वरूपेत्यारभ्य पद्मेशयवदाशयपर्यन्ताः विष्णुनामवाचकाः। बलदेवेत्यारभ्य सरामवत्पर्यन्ताः बलभद्रनामवाचकाः। संकल्पजन्मेत्यारभ्य प्रसूनशरभासुरपर्यन्ताः कन्दर्पवाचकाः। प्रजेत्यारभ्य नाभिभूतिपर्यन्ताः प्रजापतिवाचकाः। श्रीमानिन्द्रेत्यारभ्य स्वर्गपतिप्रभुपर्यन्ता इन्द्रवाचकाः। आदित्येत्यारभ्यः गोपतिपर्यन्ताः सूर्यवाचकाः। चण्डेत्यारभ्य दमनोद्विषामितिपर्यन्ताः यमवाचकाः। सम्मदीत्यारभ्य तारकप्रभुपर्यन्ताः चन्द्रवाचकाः। गिरमारभ्य गीःपतिपर्यन्ता. बृहस्पतिवाचका शब्दा अनुप्राससाधका ज्ञेयाः।

का.क. अथ प्रकारान्तरेणानुप्रास शब्दानाह—

गौरीत्यारभ्य शिवापर्यन्ता पार्वतीनामशब्दाः।

इति शब्दा नृपामात्यनृपपुत्रादिवर्णने।
यथौचित्यं प्रयोक्तव्या शीघ्रानुप्राससिद्धये ॥१७२॥

अनुप्रासानयनोपायान्तरमाह—

आदिक्षान्तलिपौ कादिक्षान्तशब्दगवेषणम्।
चित्रानुप्रासयमकशब्दनिश्चयकृद्भवेत् ॥१७३॥

अकारादिक्षकारान्तशब्दे सति अन्ये तत्सदृशाः ककारादिक्षकारान्ताः शब्दाः वीक्ष्यन्ते, तदा चित्रानुप्रासयमकशब्दनिश्चयो भवति। यथा 'अर' शब्दस्य सदृशाः कादिक्षान्तशब्दाः यथासम्भवं लिख्यन्ते—अर कर खर गर घरट्ट चर जरया क्षरया विड्वर तरणि संस्तर दर धर नर परस्पर अम्बर भर मर वर शरवण सर हर अक्षर। तथा—आर कार गार चार जार तार दार धार पार स्फार भार मार वार सार हार क्षार। तथा—आम काम ग्राम आवाम, जामया तामस, दाम धाम नाम पामया, याम राम वाम श्याम साम क्षाम। तथा—कीर चीर जीरक तीर धीर नीर भीरवः, सीर हीर क्षीर कोटीर कुटीर वानीर महीरमण। तथा—अर्ण कर्ण तर्णक पर्ण वर्ण स्वर्ण अर्णव। एवं सर्वशब्देषु शब्दान्तराणि गवेषणीयानि।

शब्दस्य सकलान् वर्णान् स्वरैः सर्वैः क्रमाक्रमात्।
संयोज्य जनिताः शब्दाश्चित्रानुप्राससिद्धिदाः ॥१७४॥

एते शब्दाश्छन्दोऽभ्यासस्तबके शब्दभेदजशब्दविवरणात् ज्ञेयाः।

इति श्रीजिन. शब्दसिद्धिप्रताने द्वितीयेऽनुप्रासस्तबकस्तृतीय।

म. टी. आदिक्षान्तेति—अकार आदिर्येषां ते अकारादयः। लक्ष इति वचनात् क्षकार अन्ते येषां ते तथा। अकारादयश्च ते क्षकारान्ताश्च ते तथा। तेषां पुरस्तात् चित्रानुप्रासयमकसिद्धये ककारादिक्षकारान्ताः शब्दा योज्याः। यथा—अर कर खर गर घर ङर चर। जरया झरया इत्यादि सुगमम् ॥छ॥

इतिश्रीतपागच्छाधिनायकपातसाहि श्री अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारकभट्टारक पुरन्दर भट्टारक श्री हीरविजयसूरीश्वरशिष्यपण्डितश्रीशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे शब्दसिद्धिप्रतानप्राप्तानुप्रासस्तबको द्योतकः तृतीयः प्रसरः ॥छ॥

॥ २.४ ॥

लाक्षणिकाख्यः स्तबकः

का. क. अथ मुख्यलाक्षणिकव्यञ्जकानां शब्दानां स्वरूपमाह—

शब्दो मुख्यो लाक्षणिको व्यञ्जकश्च त्रिधा मतः ।
मुख्यार्थवाचको मुख्यो व्यापारोर्थेऽस्य चाभिधा ॥१७५॥

लक्ष्याश्रितो लाक्षणिको व्यापारो लक्षणाऽस्य तु ।
व्यङ्ग्ययुक्तो व्यञ्जकोऽस्य व्यापारो व्यञ्जनं मतम् ॥१७६॥

साक्षात्सङ्केतविषयो गोपिण्डादिर्वाच्यो मुख्योऽर्थः, तदभिधायी गोप्रभृतिशब्दोऽपि मुख्यः । अस्य मुख्यशब्दस्य मुख्यार्थे व्यापारः संकेतापेक्षा वाच्यावगमनशक्तिरभिधा । लक्ष्यलक्षकस्य लाक्षणिकशब्दस्य लक्ष्यनिष्ठो व्यापारो लक्ष्यावगमनशक्तिर्लक्षणा । व्यङ्ग्यव्यञ्जनक्षमस्य व्यञ्जकशब्दस्य व्यङ्ग्यनिष्ठो व्यापारो व्यङ्ग्यावगमनशक्तिर्व्यञ्जनम् ।

मुख्यार्थबाधे मुख्यार्थसन्नत्वे लक्ष्यतेऽपरः ।
रूढेः प्रयोजनाद्वार्थो यत्सोक्ता लक्षणा बुधैः ॥१७७॥

मुख्यार्थबाधाऽनुपपत्तेरनुपयोगाच्च । 'गङ्गायां घोषः' इत्यादावनुपपत्तिः । 'रामोऽस्मि सर्वं सहे' इत्यादावनुपयोगः । अत्र प्रस्तावादभिधेयप्रतिपत्तौ रामशब्दोऽनुपयुज्यमानत्वात् बाधितार्थः स्वाभिधेयभूतार्थगामित्वरूपसम्बन्धाद्राज्यभ्रंशप्रवासपितृसीतावियोगादिदुःखपात्रत्वं लक्षयति । असामान्यनिर्वेदादिव्यङ्ग्यं प्रयोजनम् ।

म. टी. अथ शब्दास्त्रिविधा मुख्या लाक्षणिकाव्यञ्जकाश्च । तत्स्वरूपमाह । मुख्यार्थवाचक इति । ननु शब्दानां वाचकत्वं नाम वाक्यार्थप्रतिपत्त्यानुकूलपदार्थस्मरणजनकः शब्दार्थयोः सम्बन्धः । स च सम्बन्धः सङ्केतो वा पदार्थान्तरं वा । किञ्च स सम्बन्धः कुत्र कल्प्यते ? "जातिमात्रे वा जातिव्यक्त्योर्वा" इति चेदुच्यते । पदानां शक्तिः सङ्केतः । ननु पदार्थान्तरं स च सम्बन्धो व्यवहारबलेन जाताविव व्यक्तावपि गृह्यते । न हि गोपदाज्जातिमात्रं व्यवह्रियते । ननु व्यक्तिरिति युक्तं यतो व्यक्त्या विना जात्युपस्थितिरेव नास्तीति कस्यान्वये व्यक्तिप्रकारः स्यात् ? तस्मात् सङ्केतग्राहकस्य जातिव्यक्तिसाधारणस्य प्रमाणसिद्धत्वात् उभयत्रापि पदपदार्थयोः संङ्केतरूपा शक्तिरस्तीति न किञ्चिनुपपन्नमिति । गोपिण्डादिवाचको गोप्रभृतिशब्दो, मुख्योऽस्य व्यापारः । गोपिण्डादिसङ्केतरूपा शक्तिः । सा चाभिधेत्यभिधीयते । तस्या व्यापारत्वं च तज्जन्यत्वे सति तज्जन्यजनकोऽवान्तरव्यापार इति व्यापारलक्षणयुक्तत्वात् । तथाहि—तच्छब्देन गोप्रभृतिशब्दः, तेन जन्या गोपिण्डादिसङ्केतरूपा शक्तिः, पुनस्तच्छब्देन गोप्रभृतिशब्दः, तेन जन्यं गोपिण्डाद्यर्थज्ञानं, तस्य जनिका गोपिण्डादिसङ्केतरूपा शक्तिः । अतोऽवान्तरव्यापारोऽभिधेत्यर्थः । एवं लक्षणादिष्वपि व्यापारत्वं ज्ञेयम् । गवादेर्मुख्यशब्दस्य त्रयोऽर्थाः—एको मुख्यो १ द्वितीयो लक्ष्यः २ तृतीयो व्यङ्ग्यार्थश्च ३ । यत्र रूढिवशेन लक्षणा प्रवर्तते तत्र मुख्यशब्दस्य, द्वावेवार्थौ-मुख्यो १ लक्ष्यश्च २ । यत्र प्रयोजनवशाल्लक्षणा प्रवर्तते तत्र मुख्यशब्दस्य त्रयोऽर्था-मुख्यार्थो१, लक्ष्यार्थो २, व्यङ्ग्यार्थश्च ३ । एक एव मुख्यशब्दो मुख्यार्थं १ लक्ष्यार्थं २ व्यङ्ग्यार्थं वाश्रित्य यथाक्रमं नामत्रयं धत्ते । तद्यथा—वाचको १, लाक्षणिको २, व्यञ्जकश्चेति ३ । वाच्योऽर्थो लक्ष्यार्थाद् भिन्न एव भवत्यतो द्वावेवार्थौ-वाच्यो १ लक्ष्य २ श्चेति । व्यङ्ग्योऽर्थस्तु लक्ष्यार्थनिष्ठ एव भवति । तस्मात् परमार्थतो वाच्योऽर्थो लक्ष्योऽर्थश्चेति अर्थद्वयमेव भवति । तृतीयो व्यङ्ग्योऽर्थो लक्ष्यार्थस्य विशेषणमेव भवति । तेन लक्ष्यार्थव्यङ्ग्यार्थयोरेकत्वमेवेति भावः । साक्षादिति—मुख्यः शब्दः १, मुख्योऽर्थः २, अभिधा व्यापारः ३, लाक्षणिकः शब्दः ४. लक्ष्योऽर्थः ५, लक्षणा व्यापारः ६, व्यञ्जक

शब्दः ७. व्यङ्ग्योऽर्थः ८, व्यञ्जनं व्यापारः ९। इति मुख्यार्थज्ञानसामर्थ्यमभिधालक्षणायां भवो लाक्षणिकः शब्दः लक्ष्यते। लक्ष्यरूपोऽर्थोऽनयेति लक्षणा। व्यङ्ग्योऽर्थो व्यङ्ग्य-व्यञ्जनेनेति क्वचिद्विधौ प्रतिषेधरूपः, क्वचित् प्रतिषेधे विधिरूपः, क्वचिदन्यथाऽपि। तत्र प्रतिषेधे विधिरूपो यथा—

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥१॥[1]

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येन व्यज्यते। निःशेषच्युतेति-च्युतं ननु, क्षालितमित्युक्ते व्यङ्ग्यार्थ-प्रतीतिरेव न स्यात् वाप्यामेव क्षालनसम्भवात्। निर्मृष्टो ननु किञ्चिन्मृष्टः। दूरमनञ्जने, निकटे तु साञ्जने। पुलकितेति तन्वीति चोभयं विधेयं व्यङ्ग्यपक्षे। अधमपदस्य अधमपदसहायानां चन्दनच्यवनादीनां च व्यञ्जनकत्वमित्येषो-ऽर्थशक्तिमूलो वाक्यप्रकाशो ध्वनिः। तथाऽत्रैव स इव त्वं त्वमिव सोऽप्यधम इत्युपमेयोपमालङ्कारो व्यङ्ग्य, इति इदं वृत्तमुत्तमम्। यतोऽतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः। तथाविधौ निषेधरूपो यथा—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥१॥

अत्र वञ्जुललतागृहे दत्तसङ्केताऽनागतेति व्यङ्ग्यं, तदपेक्षया वाच्यस्यैव चमत्कारकारित्वादिति। तदपेक्षया नागतेति व्यङ्ग्यस्यार्थस्य मलिना मुखच्छायेत्येतयैवोक्त्या विषयीकृतत्वमिति वाच्यमेव चमत्कारीति। तदिदमत्र तत्त्वं यथा—मुखमालिन्यछायया कामिन्याः कामुकं प्रति रागोत्कर्षः प्रतिपाद्यते। तथा व्यङ्ग्येन प्रेम्णि हि संकेतच्युताया मुख-मालिन्यसम्भवात् व्यङ्ग्यं त्वन्यथाऽपि स्यादिति इदं वृत्तं मध्यमम्। यतः—अतादृशि वाच्यादनतिशयिनि प्रगुणीभूतव्यङ्ग्य-मिति। 'शब्दचित्रमर्थचित्रमव्यङ्ग्यं त्ववरं स्मृतं' अवरमधममित्यादि काव्यप्रकाशतो ज्ञेयमिति। मुख्यार्थबाधे इति— मुख्यार्थस्य बाधेऽघटमानत्वे सति। मुख्यार्थस्य सम्बन्धादिनासन्नत्वे समीपवर्तित्वे च सति रूढितः प्रयोजनात् कार्यवशाद्वा मुख्यार्थादभिन्नोऽर्थो यो लक्ष्यते ज्ञायते सा बुधैः पण्डितैर्लक्षणा प्रोक्ता। मुख्यार्थबाधश्च क्वचिनुपपत्तेरित्यघटमानत्वात्, क्वचिदनुपयोगाच्चेति प्रयोजनाभावादिति तत्रानुपपत्तितः। यथा 'कर्मणि कुशल' इत्यत्र कुशान् दर्भान् लाति गृह्णातीति कुशलो दर्भग्राहकपुरुषो मुख्योऽर्थः। अत्र कर्मणि कार्ये दर्भग्रहणक्रियाया अयोगादघटमानत्वान्मुख्यार्थबाधः, तस्मिन् सति विवेचकत्वसाधर्म्यात् मुख्यार्थाद् दर्भग्रहणक्रियया भिन्नोऽर्थो निपुणतारूपो लक्षणया व्यापारेण कुशलशब्देन लक्ष्यते ज्ञाप्यते। अतो लाक्षणिकः कुशलशब्दः १, लक्ष्योऽर्थो निपुणपुरुषः २, विवेचकत्वादिसम्बन्धेन चतुरनरज्ञापनशक्तिर्व्यापारो लक्षणा ३, इति रूढितो लक्षणा कथिता। रूढिलक्षणायां तु प्रयोजनाभावान्न शब्दस्य व्यञ्जकतेति। तथा 'गङ्गायां घोष' इत्यत्र 'घोषस्त्वाभीरपल्लिका' [अ.चि.४-६८] इति वचनात् गङ्गाशब्दवाच्ये जलप्रवाहे घोषस्याभीरपल्लिकाया अवस्थितेरघटमान-त्वात् मुख्यार्थबाधः, तस्मिन् सति समीप-समीपिभावसम्बन्धेन मुख्यार्थासन्नमुख्यार्थाद् गङ्गास्रोतसोऽभिन्नस्तटरूपोऽर्थो लक्षणया व्यापारेण गङ्गाशब्देन लक्ष्यते ज्ञाप्यते। अतो लाक्षणिको गङ्गाशब्दः १, लक्ष्योऽर्थो गङ्गातटं २, समीपसमीपि-भावसम्बन्धेन गङ्गातटसङ्केतज्ञापनशक्तिर्व्यापारो लक्षणा ३, इति प्रयोजनाल्लक्षणा कथिता। प्रयोजनं चात्र व्यङ्ग्य-प्रतिपादनं, व्यङ्ग्यं च पुण्यत्वमनोरमत्वशैत्यादिः। तेनात्र गङ्गाशब्दस्य व्यञ्जकताऽपि भवतीति भावस्तेनात्र गङ्गाशब्दो व्यङ्ग्यः।

गङ्गा त्वैकार्थसमवेतपुण्यत्वमनोरमत्वशैत्यादिव्यङ्ग्योऽर्थः २, व्यङ्ग्यज्ञापनशक्तिर्व्यापारो व्यञ्जनम् ३, इत्यनुप-पत्त्या मुख्यार्थबाधे लक्षणा दर्शिता जहत्स्वार्था। लक्षणाऽपीयमेव यथा 'गङ्गायां घोष' इत्यत्र गङ्गाशब्देन स्वार्थप्रवाहरूपं त्यक्त्वैव तटं लक्ष्यते इति जहत्स्वार्था त्यजत्स्वार्थेत्यर्थः।

---

१. काव्यप्रकाशस्य प्रथमोल्लासे काव्यव्याख्यानन्तरम्।

अथानुपयोगान्मुख्यार्थबाधे लक्षणा यथा--

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः ।
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे।
वैदेही नु कथं भविष्यति ह हा हा देवि धीरा भव ॥१॥ [उ.च.]

'रामोऽस्मि सर्वं सहे' इत्यत्र प्रस्तावादधिकारादभिधेयप्रतिपत्तौ दशरथपुत्ररूपवाच्यावगमे रामशब्दोऽनुपयुज्यमानत्वादप्रयोजकत्वात् मुख्यार्थबाधः । तस्मिन् सति स्वाभिधेयभूतार्थगामित्वरूपसम्बन्धात् मुख्यार्थासन्नमुख्यार्थाद् दशरथपुत्ररूपाद् भिन्नो राज्यभ्रंशप्रवासपितृसीतावियोगादिदुःखपात्रत्वरूपोऽर्थो लक्षणया व्यापारेण लक्ष्यते ज्ञाप्यते । अतो लाक्षणिको रामशब्दः १, लक्ष्योऽर्थो राजभ्रंशादि दुःखभाजनस्वरूपः २, राज्यभ्रंशादिदुःखपात्रत्वरूपलक्ष्यावगमनशक्तिर्व्यापारो लक्षणा ३।अत्र रामशब्दो लक्षणया राज्यभ्रंशादिदुःखपात्रत्वं लक्षयतीति रामशब्दो लाक्षणिकः। यतो 'रामोऽस्मि' राज्यभ्रंशादिदुःखपात्रमस्मि, अतः सर्वं सहे क्षमे इत्यर्थः । अत्र प्रयोजनलक्षणत्वात् व्यङ्ग्यमपि भवति । तेनात्र व्यञ्जकोऽपि रामशब्दः १, व्यङ्ग्योऽर्थो निर्वेदः स्वावमाननमिति वचनादसाधारणस्वावमाननादिकं २, असामान्यनिर्वेदादिज्ञापनशक्तिर्व्यापारो व्यञ्जनम् ३ ।

का.क. मुख्यार्थासन्नत्वं पञ्चधा । यदुक्तम्–

अभिधेयेन सम्बन्धात्
साहश्यात्समवायतः ।
वैपरीत्यात् क्रियायोगात्
लक्षणा पञ्चधा मता ॥

अभिधेयं मुख्यार्थः, तेन सह सम्बन्धो यथा–'गङ्गायां घोषः'। अत्र गङ्गाशब्दाभिधेयस्य स्रोतसो घोषाधारतानुपपत्तेः, मुख्यार्थबाधे योऽयं समीपसमीपिभावात्मा सम्बन्धः, तदाश्रयणेन गङ्गाशब्दस्तटं लक्षयति । गङ्गात्वैकार्थसमवेतपुण्यत्वमनोरमत्वशैत्यादिप्रतिपादनं प्रयोजनं व्यङ्ग्यम्। न हि तत्पुण्यत्वादि 'गङ्गातट' इत्यादिशब्दान्तरैः स्प्रष्टुमपि शक्यते। सादृश्याद्यथा–'गौर्वाहीकः' 'गौरेवायं' वा इत्यादौ मुख्यार्थस्य सास्नादिमत्त्वादेः प्रत्यक्षादिप्रमाणेन बाधे, अभिधेयेन सादृश्यात्तद्गतजाड्यमान्द्यादिगुणयुक्तो वाहीको लक्ष्यते । प्रयोजनं, सारूपायां ताद्रूप्यप्रतिपत्तिः, साध्यवसानायां सर्वथाऽभेदप्रतिपत्तिः । समवायात्साहचर्याद्यथा–'कुन्ताः प्रविशन्ति' इत्यादौ कुन्तानां प्रवेशानुपपत्त्या मुख्यार्थबाधे साहचर्यात् कुन्तवन्तः पुरुषा लक्ष्यन्ते । प्रयोजनं तु रौद्रत्वादीनां सातिशयानां प्रतिपादनम् । वैपरीत्याद्यथा–अभद्रमुखे 'भद्रमुखः' । अत्र 'भद्रमुख'शब्दस्य अभद्रमुखे प्रयोगात्स्वार्थबाधः । अतोऽसौ स्ववाच्यभूतस्य भद्रमुखत्वस्य वैपरीत्यादभद्रमुखत्वं लक्षणयावगमयति । प्रयोजनं तु गुप्तासभ्यार्थप्रतीतिः । क्रियायोगाद्यथा–'महति समरे शत्रुघ्नस्त्वं' इति। अत्र अशत्रुघ्ने शत्रुघ्नशब्दप्रयोगात् स्वार्थबाधः। शत्रुघ्नशब्दश्च अशत्रुघ्ने शत्रुहननक्रियाकर्तृत्वायोगात् लक्षणया प्रयुक्तः । प्रयोजनं च वर्ण्यमानस्य शत्रुघ्नशब्दाभिधेयनृपरूपताप्रतिपादनम् । 'कर्मणि कुशलः' इत्यत्र कुशान् लातीति दर्भग्रहणायोगात् मुख्यार्थबाधे विवेचकत्वादौ च सम्बन्धे रूढितः प्रवीणपुरुषरूपोऽर्थो लक्षणाव्यापारेण लक्ष्यते ।

म.टी. अथ मुख्यार्थासन्नत्वस्य पञ्चधात्वेन लक्षणाऽपि बुधैः पञ्चधा मता। यथा अभिधेयेनेति–अभिधेयेन वाच्येन सह सम्बन्धात् १, वाच्येन सह सादृश्यात् २, वाच्येन सह समवायतः साहचर्यात् ३, वाच्येन सह वैपरीत्यात् ४, वाच्येन सह क्रियायोगा, ५, च्चेति समीपसमीपिभावात्मा इति । समीपी प्रवाहः समीपं तटमित्यर्थः । सम्बन्धक्रियायोगयोरुदाहरणानि प्राग्दर्शितानि । सादृश्यादुदाहरणं यथा, 'गौर्वाहीक, इत्यत्र, 'गौरेवायं' इत्यत्र च। मुख्यार्थस्य सास्नादिमत्वादेः प्रत्यक्षादि-

प्रमाणेन बाधस्तस्मिन् सति वाच्येन सह सादृश्याद् गोपिण्डगतजाड्यमान्द्यादिगुणयुक्तो वाहीको मुख्यार्थासन्नमुख्यार्थाद् गोपिण्डाद् भिन्न इति लक्षणया व्यापारेण लक्ष्यते, ज्ञाप्यते । अतो लाक्षणिको गोशब्दः १, लक्ष्योऽर्थो वाहीकः २, वाहीकज्ञापनशक्तिर्व्यापारो लक्षणा ३. । अत्र गवादिगतजाड्यमान्द्यादिना सादृश्यं पुरस्कृत्योपमेये वाहीके उपमानवाचक-गोशब्दः प्रवर्तते इति प्रथमोदाहरणे सारोपा लक्षणा। तस्यां प्रयोजनं व्यङ्ग्यं ताद्रूप्यप्रतिपत्तिः । द्वितीयोदाहरणे साध्य-वसाना लक्षणा, अस्यां प्रयोजनं व्यङ्ग्यं, सर्वथाऽभेदप्रतिपत्तिः; शेषं पूर्ववद् ज्ञेयमिति । साहचर्याद्यथा-'कुन्ताः प्रविशन्ती'-त्यत्र कुन्तानां प्रवेशानुपपत्त्या मुख्यार्थबाधे सतिसाहचर्यान्मुख्यार्थासन्नाः कुन्तवन्तः पुरुषा, मुख्यार्थात् कुन्तरूपाद् भिन्नोऽर्थः। कुन्तवत्पुरुषरूपो लक्षणया व्यापारेण लक्ष्यते। अतो लाक्षणिकः कुन्तशब्दः १. लक्ष्योऽर्थः, कुन्तवत् पुरुषाः २, कुन्तवत् पुरुषज्ञापनशक्तिर्व्यापारो लक्षणा ३. । अत्र कुन्तशब्दः कुन्तवत्पुरुषानेव लक्षयतीति कुन्तशब्दो लाक्षणिकोऽत्र ३, प्रयोजनं व्यङ्ग्यं रौद्रत्वादिप्रतिपादनं वा, शेषं पूर्ववद् ज्ञेयमिति । अजहत्स्वार्थाऽपीयमेव, ५ । उदाहरणान्तरं यथा–'काकेभ्यो दधि रक्षता' मित्यत्र काकशब्देन ये केचन दध्युपघातकास्त एव लक्षणया गृह्यन्ते। तथा च काकस्यापि दध्युपघातकत्वेन लक्षणया ग्रहणादियमजहत्स्वार्थेत्यर्थः । वैपरीत्याद्यथा—'अभद्रमुखे भद्रमुख' इत्यत्र भद्रमुखशब्दस्याभद्रमुखे प्रयोगान्मुख्यार्थबाध-स्तस्मिन् सति स्ववाच्यभूतभद्रमुखत्ववैपरीत्येन मुख्यार्थासन्नो मुख्यार्थाद्भद्रमुखाद् भिन्नोऽर्थो भद्रमुखरूपो लक्षणया व्या-पारेण लक्ष्यते ।अतो लाक्षणिको भद्रमुखशब्दः १, लक्ष्योऽर्थोऽभद्रमुखः २, अभद्रमुखज्ञापनशक्तिर्व्यापारो लक्षणा ३। अत्र भद्रमुखशब्दोऽभद्रमुखमेव लक्षयत्यवगमयतीति भद्रमुखशब्द एव लाक्षणिकोऽत्र । व्यङ्ग्यमपि यथा–भद्रमुखशब्देन गुप्तासभ्यार्थप्रतीतिर्व्यञ्जनेन व्यापारेण व्यज्यते प्रकटीक्रियते अतो भद्रमुखशब्दो व्यञ्जकः १, गुप्तासभ्यार्थप्रतीतिर्व्यङ्ग्यो-ऽर्थः २. गुप्तासभ्यार्थज्ञापनशक्तिर्व्यापारो व्यञ्जनम् । क्रियायोगोदाहरणं पाग्दर्शितमस्ति । परं 'द्विर्बद्धं सुबद्धं भवती'ति न्यायाद्द्वितीयोदाहरणं यथा——

पृथुरसि गुणैर्मूर्त्या रामो न लोभरतो भवान्
महति समरे शत्रुघ्नस्त्वं तथा जनकस्थितिः ।
इति सुचरितैर्मूर्तीर्बिभ्रच्चिरंतनभूभृतां
कथमसि न मान्धाता देव त्रिलोकविजय्यपि ।।११।।

'महति समरे शत्रुघ्नस्त्व'मित्यत्राशत्रुघ्ने शत्रुघ्नशब्दप्रयोगात् स्वार्थबाधस्तेन शत्रुघ्नशब्दोऽशत्रुघ्नमपि शत्रुहनन-क्रियायोगाल्लक्षणया लक्षयति, प्रयोजनं च वर्ण्यमानशत्रुघ्नशब्दाभिधेयनृपरूपताप्रतिपादनं, शेषं पूर्ववदिति । 'द्विरेफद्विके'ति-अत्र द्वौ रेफौ यत्रेति कृत्वा द्विरेफो भ्रमरशब्द उच्यते, न तु मधुव्रतः । परं तत्र बाधितत्वाद् वाच्यवाचकभावसम्बन्धेना-सन्नं द्विरेफशब्दो भ्रमरमेव लक्षयतीति भावः । एवं द्विकशब्देऽपि यथा-द्वौ ककारौ यत्रेति कृत्वा द्विकः काकशब्द उच्यते, न तु वायसः । परं तत्र कविप्रयोगाभावाद् बाधितत्वाद् वाच्यवाचकभावसम्बन्धेनासन्नं वायसमेव लक्षयतीति भावः । एवमानुलोम्यमपि लक्षणया अनुकूलत्वमेव ज्ञायते ननु । अनुगतरोमत्वं, तथा लवणस्य भावो लावण्यं लवणगतो धर्मः, परमत्र मनुष्यादिरूपगतचाकचिक्यमेव लावण्यशब्देन लक्ष्यते इति भावार्थः । एवमन्येऽपि लाक्षणिकाः शब्दाः स्वयम-भ्यूह्याः । मुख्यार्थासन्नत्वं पञ्चधोक्तम् ।

का.क. लावण्यादयो रूढिशब्दाः। ततः एतेषु कुशलद्विरेफादिषु रूढिलक्षणा। 'गङ्गायां घोष' इत्यादौ प्रयोजनात लक्षणा । प्रयोजनं च पावित्र्यादिव्यङ्ग्यम् । तत्त्वमिदम्–रूढिलक्षणायां शब्दस्य वाचको लाक्षणिकश्चेति नामद्वयम् । अभिधा लक्षणेति व्यापारद्वयम् । प्रयोजनलक्षणायां तु शब्दस्य वाचको लाक्षणिको व्यञ्जकश्चेति नामत्रयम् । अभिधा लक्षणा व्यञ्जनं चेति व्यापात्रयम्। रूढिलक्षणायान्तु व्यङ्ग्यप्रयोजनाभावात् शब्दस्य न व्यञ्जकता, न व्यञ्जनव्यापारः ।

शब्दव्यापारो निरन्तरार्थनिष्ठोऽभिधा मता ।
स तु सव्यवधानार्थनिष्ठो भवति लक्षणा ।।१७८।।

सव्यवधानो मुख्यार्थबाधादिहेतुत्रयान्तरितो यो लक्ष्यस्तटादिरर्थस्तत्र विश्रान्तः शब्दव्यापारो लक्षणा। अभिधैव मुख्यार्थे बाधिता सती अचरितार्थत्वात् अन्यत्र प्रसरतीति, तत्पुच्छभूतैव लक्षणा ।

शुद्धोपचारमिश्राऽसौ द्विधा शुद्धापि हि द्विधा ।
उपादानलक्षणाऽऽद्या परा लक्षणलक्षणा ॥१७९॥

उपादानं स्वसिद्ध्यर्थं पराक्षेपः। यथा–'पुरे कुन्ताः प्रविशन्ति'। अत्र कुन्तैः स्वप्रवेशसिद्ध्यर्थं स्वसंयोगिन पुरुषा आक्षिप्यन्ते, तत उपादानेनेयं लक्षणा ।

'परार्थं स्वार्पणं लक्षणं' यथा–'गङ्गायां घोषः' । अत्र तटस्य घोषाधिकरणतासिद्धये 'गङ्गा' शब्दः स्वार्थमर्पयतीत्यादौ लक्षणेन लक्षणा। अयमभिप्रायः–यत्र शब्दः सर्वथा स्वार्थं त्यजन् अन्यमर्थं लक्षयति, तत्र लक्षणेन तटादिज्ञापनेन लक्षणा । यत्र तु स्वार्थमपि वदन्नन्यमुपादत्ते तत्रोपादानेन लक्षणा । इमौ द्वावपि भेदौ शुद्धौ, उपचारेणामिश्रत्वात् । यथा 'गौर्वाहीकः' इत्यत्र वस्त्वन्तरे वस्त्वन्तरमुपचर्यते, न तथाऽत्रेति भावः । उपचारमिश्राऽपि चतुर्विधा।

सादृश्याद्गौणसारोपा गौणसाध्यवसानिका ।
गौर्वाहिको गौरेवायं

यत्रोपमानगतगुणतुल्यगुणयोगलक्षणं पुरःसरीकृत्योपमेये उपमानशब्द आरोप्यते, तौ गौणौ भेदौ, गुणेभ्य आगतत्वात् गौणशब्दवाच्यौ ।

सम्बन्धान्तरतः पुनः ॥१८०॥

म. टी. अथ लक्षणाभेदान् व्याचिख्यासुः प्रथमं तत्स्वरूपमाह–शब्दव्यापार इति। शब्दव्यापारो निरन्तरार्थनिष्ठः स्वाभाविकार्थनिष्ठोऽभिधा प्रोच्यते । स च व्यापारः सव्यवधानार्थनिष्ठः सान्तरार्थनिष्ठो लक्षणा भवति । सव्यवधानो मुख्यार्थबाधो १, मुख्यार्थासन्नत्वं २, रूढिः प्रयोजनं वा ३ इति हेतुत्रयान्तरितो यो लक्ष्यस्तटादिरर्थस्तत्र विश्रान्तः स्थितः शब्दव्यापारो लक्षणा । अभिधैव मुख्यार्थे बाधिता सती अचरितार्थत्वादनुक्तार्थत्वादन्यत्र तटादिषु प्रसरतीति तत्पुच्छभूतैव अभिधा, समीपगतैव लक्षणा भवतीति भावः । सा मूलभेदेन द्विधा यथा–शुद्धा १, उपचारमिश्रा चरशुद्धाऽपि द्विधा उपादानलक्षणा १, लक्षणलक्षणा च २ । उपादानं स्वसिद्ध्यर्थं पराक्षेपोऽन्यग्रहणम् । यथा–'पुरे कुन्ताः प्रविशन्ति' । अत्र कुन्तैः स्वप्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते, तत्र उपादानेनेयं लक्षणा १ परार्थं स्वार्पणं स्वस्य समर्पणं, लक्षणं यथा 'गङ्गायां घोषः' । अत्र तटस्य घोषाधिकरणतासिद्धये गङ्गाशब्दः स्वार्थं समर्पयतीत्यादौ लक्षणेन लक्षणा लक्षणलक्षणा २ । अयमभिप्रायः-यत्र शब्दः सर्वथा स्वमर्थं स्वकीयवाच्यं पुण्यत्वमनोरमत्वादिस्वार्थसमवेतगुणत्वादत्यजन् अन्यमर्थं लक्षयति, तत्र लक्षणेन तटादिज्ञापनेन लक्षणा लक्षणलक्षणा । यत्र तु स्वार्थं स्वकीयवाच्यमपि वदन् अन्यार्थमुपादत्ते तत्रोपादानेन लक्षणा । इमौ द्वावपि भेदौ शुद्धौ, उपचारेणामिश्रत्वात् । यथा 'गौर्वाहीक' इत्यत्र वस्त्वन्तरे वस्त्वन्तरमुपचर्यते न तथाऽत्रेत्युपचाराभावः । उपचारमिश्राऽपि चतुर्विधा यथा गौणसारोपा १, गौणसाध्यवसानिका २, शुद्धसारोपा ३, शुद्धसाध्यवसानिका च ४ । तत्र सादृश्यात् गौणसारोपा गौणसाध्यवसानिका । सहारोपेण वर्तते या सा सारोपा । गौणा चाऽसौ सारोपा च गौणसारोपा, सहाध्यवसानेन वर्तते या सा साध्यवसाना । साध्यवसाना एव साध्यवसानिका । गौणा चासौ साध्यवसानिका च गौणसाध्यवसानिका । 'गौर्वाहीक' इति 'गौरेवायं' इत्यत्रोपमानगवादिगतजाड्यमान्द्यादिवाहीकगतजाड्यमान्द्यादिसादृश्यं पुरःसरीकृत्योपमेये वाहीके उपमानवाचकगोशब्द आरोप्यते । तौ गौणौ भेदौ गुणेभ्यो जाड्यादिभ्य आगतत्वाद् गौणौ गौणशब्दवाच्यौ । आरोप्यारोप्यविषयाविति यथा–'गौर्वाहीक' इत्यत्रारोप्यारोप्यविषयौ स्फुटौ प्रकटौ, आरोप्यश्चारोप्यविषयश्च तौ, तथा आरोप्यो गवादिरारोप्यविषयो वाहीकादिरिति गौणसारोपा सादृश्यहेतुका । एषा उपमानोपमेयस्य विद्यमानरूपत्वात् रूपकालङ्कारस्य बीजमिति ।

का. क. विज्ञेया शुद्धसारोपा शुद्धसाध्यवसानिका ।

आयुर्घृतमायुरेवेदं

अनयोः शुद्धभेदयोः कार्यकारणभावः सम्बन्धः । सादृश्याभावान्न गौणता । यथा-आयुःकारणं घृतं तथा न क्षीरादीति क्षीरादिवैसादृश्येन आयुः शब्दान्न व्यभिचरतीति कार्यकारित्वादिप्रयोजनम् ।

[सा] षड्भेदेति लक्षणा ॥१८१॥

उपादानलक्षणा, लक्षणलक्षणा, गौणसारोपा, गौणसाध्यवसाना, शुद्धसारोपा, शुद्धसाध्यवसाना इति षड् भेदाः ।

आरोप्यारोपविषयौ सारोपायां स्फुटावुभौ ।
पुनः साध्यवसानायामारोप्यान्तर्गतः परः ॥१८२॥

आरोप्यो गवादिः, आरोपविषयो बाहीकादिः; सारोपा सादृश्यहेतुका । एषा उपमानोपमेयस्य विद्यमानरूपत्वात् रूपकालङ्कृतेर्बीजम् । यत्रारोप्येण[1] गवादिना निगीर्णतया आरोपविषयस्य बाहीकादेः प्रतीतिः सा साध्यवसाना । इयमतिशयोक्तेर्बीजम् । यथा——

कमलमनम्भसि कमले च कुवलये
तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगे-
त्युत्पातपरम्परा केयम् ।

कार्यकारणभावादिलक्षणायां तु न रूपकादिविषयता, सादृश्याभावात् । यथा——

आयुर्घृतं यशस्त्यागो
भयं चौरः सुखं प्रिया ।
वैरं द्यूतं गुरुर्ज्ञानं
श्रेयः सत्तीर्थसेवनम् ॥

तथा अन्यापदेशालङ्कारस्य साध्यवसानलक्षणात्वम् । यथा——

अनर्घ्यः कोऽप्यन्त-
स्तव हरिण हेवाकमहिमा
स्फुरत्येकस्यैव
त्रिभुवनचमत्कारजनकः ।

इत्यत्र हरिणेन सह प्रतीयमानस्याभेदः ।

सम्बन्धा बहवः । यदुक्तं——'एकशतं हि षष्ठ्यर्थाः' । क्वचित्तादर्थ्यादुपचारः, यथा–'इन्द्रार्था स्थूणा इन्द्रः ।' क्वचित् स्वस्वामिभावाद्यथा——'राजकीयः पुरुषो राजा ।' क्वचिदवयवावयविभावाद्यथा——'अग्रहस्त इत्यग्रमात्रेऽवयवे हस्तः ।' क्वचित् तात्कर्म्यात् यथा——'अतक्षा तक्षा' । क्वचिन्मानाद्यथा–'आढकमश्नाति ।' क्वचित्स्थानाद्यथा–'मञ्चाः क्रोशन्ति' इत्यादयः । सर्वे यथालक्ष्यं लक्षणीयाः ।

१. आरोपविषयो....ऽऽरोप्येण–इदं ला. १ पुस्तके नास्ति ।

म. टी. यत्रारोप्येनेति यथा—'गौरेवाय'मित्यत्र आरोप्यो गवादिस्तेन आरोप्येन गवादिना निगीर्णतया मिलिततया सर्वथा भेदत्वेनारोप्यविषयस्य वाहीकादेः प्रतीतिः, सा गौणसाध्यवसानिका । इयमतिशयोक्तेर्बीजमतिशयालङ्कारस्य कारणमिति । यथा—'कमलमनम्भसी'ति कमलं पद्मं, अनम्भसि अपानीये पानीयाभावे इत्यर्थः; तस्मिन् कमले च कुवलये उत्पलद्वयं, तथा कमलं कुवलयद्वयं चेति । त्रीण्यपि तानि कनकलतिकायां सुवर्णवल्ल्याम् । सा कनकलतिका सुकुमारसुभगा सुकुमारा चासौ सुभगा च सुकुमारसुभगेत्यर्थः । अत्र कमलस्य पानीयाभावे, कुवल (य) द्वयस्य च कमले, कमलस्य कुवलयद्वयस्य च कनकलतिकायां, कनकलतिकायां च सुकुमारत्वसुभगत्वयोरसम्भवादियमुत्पातपरम्परेति अत्र गौणसाध्यवसानया लक्षणया कमलशब्दस्य पद्मे बाधितत्वात् स्त्रीमुखे प्रयोगः । तथा कुवलयशब्दस्य उत्पले बाधितत्वात् स्त्रीनेत्रे प्रयोगः । एवं कनकलतिकाशब्दस्यापि बाधितत्वात् स्त्रीशरीरे प्रयोग इति । एवमतिशयालङ्कारोऽपि दर्शित, उत्पातत्वं चात्र बाधावस्थायां भाव्यमन्यथासम्भवात् । सम्बन्धान्तरात् पुनः शुद्धसारोपा १, शुद्धसाध्यवसानिका २, । यथा 'आयुर्घृतं' 'आयुरेवेद'मित्यनयोः शुद्धभेदयोः कार्यकारणभावलक्षणः सम्बन्धः । शेषं पूर्ववत् । सादृश्याभावान्न गौणता यथा—आयुःकारणं घृतं न तथा क्षीरादीति । क्षीरादिवैसदृश्येन आयुः शब्दात् व्यभिचरतीति कार्यकारित्वादिप्रयोजनम् ।

लक्षणायाः षड्भेदा यथा—उपादानलक्षणा १, लक्षणलक्षणा २, गौणसारोपा ३, गौणसाध्यवसाना ४, शुद्धसारोपा ५, शुद्धसाध्यवसाना ६, इति । कार्यकारणभावादिलक्षणायां तु न रूपकालङ्कारादिविषयता । सादृश्याभावाद्यथा—'आयुर्घृत'मित्यादि । तथा अन्योपदेशालङ्कारे अन्योक्त्यलङ्कारे शुद्धसाध्यवसाना लक्षणा यथा—

'अनर्घ्यः कोऽप्यन्तस्तव हरिणहेवाकमहिमा' इत्यादि ।

अत्र हरिणेन सह प्रतीयमानस्याभेदो ज्ञेयः । शतं षष्ठ्यर्था इति षष्ठ्या विभक्तेरर्थाः सम्बन्धाः, सम्बन्धे षष्ठीविधानादिति । क्वचित् तादर्थ्यादुपचारो यथा—'इन्द्रार्था स्थूणा' स्तम्भः इन्द्रः प्रतिपाद्यते इत्यादि सुगमम् । सहचरणेति सहचरणाद्यथा—बहुब्राह्मणसहचरणात् शूद्रोऽपि ब्राह्मणः १, स्थानात्-मञ्चाः क्रोशन्ति २, तादर्थ्यात्—कटार्थानि तृणानि कटः ३, वृत्तात् राजवद्वस्त्रालङ्करणादिभिः सामान्यपुमानपि राजा ४, मानात् 'सत्करोति काममश्नाति' ५, धारणात् 'चन्दनं तुला' ६, सामीप्यात् 'गङ्गायां घोषः' ७, योगात् शाटकपरिधानात् पुरुषोऽपि स्त्री ८, साधनं कारणं, तस्मात् 'मेघोऽन्नं वर्षति', 'हलादि वान्नं' ९, आधिपत्यात् पुरुषवदाधिपत्यं कुर्वाणा स्त्री अपि पुरुषः १० । अत्र सहचरणेत्यादीनां ब्राह्मणेत्यादीनि यथाक्रममुदाहरणानि ज्ञेयानि —इत्यादिषु शुद्धा लक्षणा काचित् रूढितः, काचित् प्रयोजनात्, काचित् सारोपात्, काचित् साध्यवसाना, इति लक्षणाविचारः सोदाहरणो दर्शितः ।

का. क. यदाहुः—सहचरणस्थानतादर्थ्यवृत्तमानधरणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटकराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः । एषु शुद्धा लक्षणा । काचित् रूढितः, काचित्प्रयोजनात्, काचित्सारोपा, काचित् साध्यवसाना । इति लक्षणाविचारः ।

अथ लक्षणार्हाः केचिच्छब्दाः कथ्यन्ते—

चित्रेन्द्रजालवाच्यद्विर्भावस्वप्नयमकसंवादाः ।
द्वैगुण्याभिनयकथाद्विरन्यपर्यायवक्रपुनरुक्तिः ॥१८३॥

रूपावस्थार्थवपुर्भावान्तरं परिणतिविवर्तौ ।
अनुवादानुप्रासानुकृतिच्छायाप्रतिबिम्बशब्दौ च ॥१८४॥

प्रतिवीरमल्लनायककविवेशी बन्धुरनुकूलः ।
प्राणाय्यज्ञातिसुहृद्दायाद्वेसनाभिसहचरसतीर्थ्याः ॥१८५॥

सब्रह्मचारिनीलीरागसहाध्यायिसदृशसध्यञ्चः ।
गणनाधिकः सवर्णः संवादी सांयुगीनरिपू ॥१८६॥

अधिदैवतविद्याकुलगुरुकुलनाथकुलपुरः पुरुषाः ।
ओंकारचक्रवर्ति क्षेमङ्करसार्थवाहतीर्थानि ॥१८७॥

ज्येष्ठसभापत्यग्रेसरोत्तमर्णप्रतीक्ष्यजितकाशि ।
अद्वैतवादिधुर्योल्लासघनगृहमेधिनोऽध्यक्षाः ॥१८८॥

तत्त्वब्रह्मोपनिषद्रहस्यचैतन्यहृतपरात्मानः ।
सौरभ्योत्कर्षरसाभोगानन्दाभिजात्यपरभागाः ॥१८९॥

लयसर्वस्वविलासास्तण्डुलनिर्यासभाग्यमज्जानः ।
जीविततात्पर्यार्थव्युत्पत्त्यपवादमर्ममकरन्दाः ॥१९०॥

साम्राज्यसिंहनादाहंकारैश्वर्यसंस्कृतविपाकाः ।
सारोद्धारनिदानव्याख्याटीकाचरित्रविश्रम्भाः ॥१९१॥

मूलद्रव्यविवेकव्याकरणनिरुक्तसौष्ठवाभ्युदयाः ।
सौन्दर्योन्मेषनवीतत्त्वप्ररोहसम्भ्रमोत्साहाः ॥१९२॥

वैदग्ध्यावष्टम्भावुत्सवनवनीतयौवनादेशाः ।
महिमनिघण्टौद्धत्यान्तरङ्गपूर्वोक्त्यधित्यकास्वेच्छाः ॥१९३॥

प्याप्तिर्बहुघनपीवक्षीबमहोद्दामतुङ्गता प्रौढिः ।
सर्वाभिसारवृद्धिव्यूहव्यासाट्टहाससङ्घट्टाः ॥१९४॥

विष्कम्भकवज्रपातानध्यायापह्नवादिसंवादाः ।
केतूदयान्तरायावातङ्कोपप्लवाध्यवस्कन्दाः ॥१९५॥

प्रत्याख्यानान्तर्द्धिव्याषेधविडम्बनान्यतीचाराः ।
अनुपदारुन्तुदकद्वदवैरङ्गिकनास्तिकाः पुरोभोगी ॥१९६॥

स्थायी द्रव्यं किट्टस्तुषपिण्याकौ पलालपदधूली ।
उद्ग्राहपूर्वरङ्गप्रतिभा प्रस्तावनाट्यसम्फेटाः ॥१९७॥

अङ्गोद्वर्तनशाखापुरशाखामङ्गलावतरणानि ।
प्रश्नोत्तरप्रहेले कलभकिशोरौ प्रवालमञ्जर्यौ ॥१९८॥

निर्माल्यभङ्गिकरणी कैतवपाखण्डिकर्णिकाभेदाः ।
तर्णकपरागसैन्योपपदसमस्याकलान्तरोत्सर्गाः ॥१९९॥

प्राकाम्यवस्तुवाचिकसम्बोधनपादुकावहित्थानि ।
व्यवहारकिंवदन्तीप्रभृतविज्ञानकारिकोपाधिः ॥२००॥

बहिरङ्गोपश्रुतिमृगतृष्णानासीरपादपीठानि ।
व्यापृतिदिग्धपरोक्षागण्डूषोपत्यकाप्रहसनानि ॥२०१॥

युवराजशिष्यसैनिकसचिवप्रतिहारमण्डलेशगणाः ।
वैहासिकसेनानीवैतालिकबटुपदात्यनुगाः ॥२०२॥

ग्रामीणपारिपार्श्विकनान्दीचटुकारभक्तिपरिवाराः ।
प्राकृतपरान्नमायिकदासपराधीनयद्धदास्त्रधराः ॥२०३॥

वैमात्रेयेर्ष्यालू परिचारकभर्तृदारककनिष्ठाः ।
अधमर्णराजवंश्यौ वन्दारुरताञ्चलस्फुलिङ्गकणाः ॥२०४॥

दिङ्मात्रमेकदेशः खण्डं बालोऽङ्कुरः शिशुता ।
संक्षेपक्षामत्वावयवकलाशीकरलहर्यः ॥२०५॥

इत्याद्या लक्षणाशब्दाः सदृशत्वोपयोगिनः ।
उपमाने क्वचिद्रोप्या उपमेये क्वचित्तथा ॥२०६॥

उपमाने यथा–

इन्दुर्वक्त्रस्य वीप्सासदनमुपकथा पादयोः पङ्कजाली
पर्यायोऽलिः कबर्या, ननु तनुमहसां कर्णिका कर्णिकारम् ।
आभासः कुम्भिकुम्भद्वयमुरसिजयोः कामकोदण्डदण्डः,
पाखण्डं भ्रूलतायाः, रतिरभिनयनं, पश्य स्वरूपस्य यस्याः ॥

उपमेये यथा–

व्याषेधो धरणीधरेशितुरनध्यायः सुधायाः, विधो–
रर्त्तार्द्धिर्धनदाचलस्य निधनं, दुग्धोदसिन्धोः पिधा ।
प्रत्याख्यानममानपद्विपमहा– देहद्युतेर्निह्नवो
जाह्नव्यास्तव भूभुजङ्गयशसां भारो दिशां हारति ॥

अन्येऽपि लक्षणाशब्दा लिख्यन्ते । यथा—लुण्टाक जल्पाक गृहयालु स्पृहयालु घस्मर मेदुर भङ्गुर छिदुर विदुर । जागरूक वावदूक विकस्वर प्रमद्वर सत्वर जित्वर गत्वर कम्प्र उन्मदिष्णु वैतण्डिकमायिक तुन्दिल तुन्दिक पिचण्डिल पिचण्डिक तुण्डिल तुण्डिक शुभंयुः दन्तुल जङ्घाल दंष्ट्राल भुजाल पांसुल प्रज्ञाल प्रज्ञिल रजस्वल फेनिल वाचाल वाचाट मुखर पङ्किल इत्यादयः । विद्वन्नाम चौर महोत्साह उद्धत कोपन वैरङ्गिक कर्मशूर अलङ्कर्मिण कर्मठ धृष्ट सज्जन बन्धुगोत्रादीनां नामानि । एवंप्रकाराः शब्दाः लक्षणासाधका यथौचित्यं प्रयोज्याः । यथा—

विप्रोऽप्ययं द्रुतमहीनमहीनकीर्ति–

लुण्टाकशक्तिरपसादगुरुप्रसादः ।

वेध्यं प्रपातयति पश्यत रे नरेन्द्राः !

कीर्तिं स्मरन्मनसि गौररुचं न कृष्णाम् ।

म. टी. अथ लक्षणार्हशब्दानाह—

द्विरिति द्विशब्दादिभ्यः पुनः शब्दं यावदुक्तिशब्दः सम्बध्यते । यथा—द्विरुक्तिः १, अन्योक्तिः २, पर्यायोक्तिः ३, वक्रोक्तिः ४, पुनरुक्तिरिति ५. । अनुवादेति अनुशब्दो वादादिषु त्रिषु सम्बध्यते यथा—अनुवादः १. अनुप्रासः २. अनुकृतिः इति ३. । प्रतिबिम्बेति प्रतिशब्दो बिम्बशब्दाभ्यां योज्यस्तेन प्रतिबिम्बं प्रतिशब्दश्चेति । प्रतीतिप्रतिशब्दौ वेशीशब्दं यावत् सम्बध्यते यथा— प्रतिवीरः १, प्रतिमल्लः २, प्रतिनायकः ३, प्रतिकविः ४, प्रतिवेशीति । प्राणाज्यः असम्मतः सांयुगीनो रणे साधुः, जिताहवो जितकाशी । अध्यक्षः स्वामी, ग्रामाध्यक्ष इत्यादिषु । लयः कालविशेषः; मज्जनशब्दो नान्तः सर्वाभिसारः सर्वौघः सर्वसंहननं समाः; प्रपातस्त्वभ्यवस्कन्दः अन्तर्द्धिराच्छादनं पुरोभागी दोषैकदृग् । किट्टः मलः, निघसो भुक्तशेषकः फलाभुक्तसमुज्झिते अइठि इति प्रसिद्धिः । शाखापुरं उपपुरं करणी कादृश्यं कलान्तरं । वृद्धिः ब्याज इति प्रसिद्धिः । अश्नुतेऽश्राम्बुक्लीबलिङ्गः । अवहित्था आकारगोपनं स्त्रीक्लीबलिङ्गः । उपत्यका पर्वताऽधोभूमिः । वैहासिको विदूषकः, प्राकृतो नीचः, यद्वदो यथा तथा । जल्पाक अधमर्णो, ग्राहकः देणियात इति प्रसिद्धिः । इत्याद्या लाक्षणिकशब्दाः ।

उपमानोदाहरणं यथा—इन्दुरिति प्रसिद्धमुपमानं, तेन वक्त्रस्योपमानमिन्दुः । स च वीप्सासदनं लाक्षणिकत्वात् । सदृशः कस्य ? मुखस्य द्वितीयरूपमित्यर्थः । पङ्कजाली उपकथा, सदृशीकयोः पादयोः दृष्टान्त इत्यर्थः । अलिर्भ्रमरः, पर्यायस्तुल्यः । कस्याः ? कबर्या वेण्याः । ननु निश्चितं कर्णिकारं कर्णिकारवृक्षकुसुमम् । वर्णिकासदृशी केषां ? शरीर-तेजसाम् । वर्णिका वा नीतिप्रसिद्धिः । हस्तिकुम्भद्वयं आभासः प्रतीकः सदृशमित्यर्थः । कयो ? स्तनयोरिति । कन्दर्प धनुर्दण्डः । अत्र दण्डशब्दोऽलङ्कारार्थः । पाखण्डं तुल्यं भ्रूलतायाः, लताशब्दः शोभार्थः, कपटमित्यर्थः । यस्याः स्त्रियः रूपस्य रतिः कामभार्या । अभिनयनं अभिनयो हस्तादिकृतो नाटकप्रसिद्धः । तुल्यमित्यर्थः । उपमेयोदाहरणं यथा—व्याषेध इति अप्रसिद्धमुपमेयम् । तेन हे भूमुज गतवयसां भारः । उपमेयं स एव व्याषेधो निषेधः रोधकः । कस्य ? धरणीधरेशितुः हिमाचलस्याथ वा, धरणीधरश्चासौ ईशिता च स तथा, तस्य शेषनागस्येत्यर्थः । यशोभारः । कथम्भूतोऽनध्यायो निषेधः अणोज्झउ इति प्रसिद्धिः । कस्याः ? सुधाया अमृतस्य । पुनः कथम्भूत ? अन्तर्द्धिराच्छादनं विधोश्चन्द्रस्य । पुनः कथंभूतः ? निधनं निषेधः, धनदाचलस्य कैलासस्य । पुनः कथम्भूतः ? पिधापिधानं । दुग्धोदसिन्धोः क्षीरसमुद्रस्य । पुनः कथंभूतः ? प्रत्याख्यानं निराकरणं, अमानवद्विपमहादेहद्युतेरैरावणमहाशरीरकान्तेः । पुनः कथम्भूतः ? निह्नवोऽ-पलापः । जाह्नव्या गङ्गायाः । एवंविधः सन् हारति हार इवाचरतीति । कासां दिशां ? काष्ठानामित्यर्थः । अत्र लाक्षणिक-त्वात् सर्वे शब्दा निषेधार्था ज्ञेयाः । मायाऽस्यास्तीति मायिकः । तुंदिः प्रवृद्धा नाभिरस्यास्तीति सिध्यादिपाठाल्ले । तुन्दिलः पिचण्डोऽस्यास्तीति तुण्डादि, पाठादिलेऽपि चण्डिलः प्रवृद्धोदरः । विप्रोऽप्ययमिति-रे नरेन्द्रा यूयं पश्यत विप्रोऽपि अयं प्रत्यक्षः द्रुतं शीघ्रं, वेध्यं लक्ष्यं, प्रपातयति विध्यति ।' कथम्भूतः ? अहीनमहीनकीर्तिः लुण्टाकशक्तिः । अहीना महान्तो

ये महीना राजानस्तेषां कीर्ति, लुण्टाका शक्तिर्यस्य स तथा। यद्वा अहीनं यथा स्यात् तथेति क्रियाविशेषणं। अहीनः शेषनाग, तस्य कीर्तिर्बलवत्त्वख्याति, स्तस्या लुण्टाका शक्तिर्यस्य स तथा। पुनः कथम्भूतः ? अपसादगुरुप्रसादः, अपगतः सादो विषादो विभ्रंशो वा यस्मात् सोपसादः। अविश्रान्तः अविनष्टो वा गुरोर्द्रोणाचार्यस्य प्रसादो यस्य स तथा। किं कुर्वन् ? गौररुचं श्वेतकान्तिम्। ननु कृष्णां श्यामां कीर्तिं मनसि चित्ते स्मरन् ध्यायन्। अथ च पक्षे गौररुचं गौराङ्गीं, कृष्णां द्रौपदीं, न स्मरन् कीर्त्यर्थमेव वेध्यं प्रपातयति, न द्रौपद्यर्थमिति भावः। राधावेधसाधनावसरेऽर्जुनस्य विप्रवेषभृतो द्रोणाचार्येणेदं वाक्यमुक्तम् ॥छ॥

इतिश्री तपागच्छाधिनायक पातसाहि श्री अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयतीर्थादिकरमुक्तिकारकभट्टारक श्री हीरविजयसूरीश्वरशिष्यपण्डित श्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे शब्दसिद्धिप्रतानप्राप्तलाक्षणिकस्तबकोद्योतकश्चतुर्थः प्रसरः समाप्तस्तत्समाप्तौ च समाप्तोऽयं शब्दसिद्धिप्रतानो द्वितीयः ॥छ॥

का. क. इति श्रीजिनदत्तसूरिशिष्यकविपण्डितश्रीमदमरविरचितायां कविशिक्षावृत्तौ शब्दसिद्धिप्रताने लाक्षणिकः स्तबकश्चतुर्थः। सम्पूर्णश्चायं शब्दसिद्धिप्रतानो द्वितीयः॥

॥ ३ . १ ॥

अथ श्लेषसिद्धिप्रतानः

का. क. तत्र पूर्वं श्लेषव्युत्पादनं यथा—

वर्णाकारक्रियाधाराधेयसम्बन्धिबन्धवः ।
द्विट्पत्नीप्रियसम्पर्किस्वामितुल्यगुणादयः ॥१॥

एषां स्यान्नामभिः श्लेषो नानार्थैर्वर्ण्यवस्तुनि ।
भङ्गश्लेषोऽधिककसन् मुख्यैः पूर्वाग्रगैः पुनः ॥२॥

वर्ण्यवस्तूनां वर्ण्यादिनाम्नां मध्याद्यन्नाम द्व्यर्थं त्र्यर्थं नानार्थं वा भवेत्, तेन नाम्ना श्लेषः कार्यः । यथा—धवलार्जुनगोप्रभृतयः शब्दाः । भङ्गश्लेषस्तु वर्ण्यवर्णादिनाम्नः पूर्वगतैरधिकादिभिरग्रगतैः कसदादिभिः सामान्यशब्दैरर्थे मिलिते यथासम्भवं कार्यः । यथा—कमलशब्दस्य मल इति अग्रेतनाक्षरार्थे मिलति पूर्वाक्षरः कः त्रोट्यते । यथा—'अधिकमलशाली' । अधिकशब्दः सामान्यः । तथा करकशब्दस्य कर इति पूर्वाक्षरार्थे मिलिते उत्तराक्षरः कः त्रोट्यते । यथा—'करकसल्लक्ष्मीः' । कसच्छब्दः सामान्यः ।

पूर्वं पूर्वाक्षराणां त्रोटनाय पूर्वप्रयोज्याः सामान्यशब्दा यथा—

अधिकस्वकस्वकीयकसश्रीकाः सुखसुगौ पुरोगश्च ।
ज्ञेयाः समानद्योच्चा सदा च स्वस्थाः सदाच्छसज्जौ च ॥३॥

तज्ज्ञाभिज्ञसुखज्ञाः शोभितविभ्राजितादयः स्वस्थाः ।
सुखदं तद्दं शोभाबद्धं सौन्दर्यप्रभृतितो बद्धम् ॥४॥

सम्पन्नसुशोभिनलोलुपसम्पन्नवसगौरवमहाभाः ।
बहुशोभनसदाशुभबहुभाः परमसमानया मनोहृद्यम् ॥५॥

पीवरसुरुचिरमधुरा मञ्जुलपृथलौ स्वभावतः शश्वत् ।
सुमुखदशः समहासः ससमग्रहपरमहौ च बहुलक्षः ॥६॥

एतैः शब्दैः पदानां पूर्वाक्षराणि त्रोट्यन्ते । यथा—सश्रीकपालिस्थितिः कैलासः, सरोवत्[1] । स्वकङ्काभोगः शशी, रावणवत् । सुखरोचितः कुलालः, सुकृतिवत् । सुखलीनस्तुरगः, सुकृतिवत् । सुखद्योतस्तपात्ययो, नृपवत् । उच्चामरश्रीः नृपतिः, इन्द्रवत् । सदाच्छगणराजितं गोस्थानं, रुद्रस्थानवत् । सज्जं वीरगणं बिभ्रत् वनं, नृपवत् । अभिज्ञातिस्थितिः कुलीनो, विदग्धगोष्ठीवत् । शोभितरङ्गान्वितो जलधिः, नटवत् । स्वस्थपुटताशाली शैलमार्गो, मृदङ्गवत् । सुखदानस्थितिः वदान्यः, शाकटिकवत् । स्वस्थामराजितं मघोनः सदनवत् नृपबलम् । सुशोभनगरस्थितिः सुनृपः, शिवकण्ठवत् । लोलपवनस्थितिः सागरतरङ्गो, गिरिवत् । सम्पन्नवसुधाभोगः पार्थिवः, सुरवत् । बहुशोभवनान्वितं पुरं, गिरिवत् । महाभवनान्वितं पुरं, गिरिवत् । परमहेलाशाली द्वेधापि कामुकः । मनोहृद्योधस्थितिः युद्धभूमिः धेनुवत् । सुरुचिरमणीरमणीयः

---

१. सश्रीकपालिस्थिति....पाठस्वीकारश्चात्र मकरन्दानुसारी, अर्थबोधकश्च ।

पाणिग्रहमहो, रोहणवत् । पृथुलक्षणं गृहं, चन्द्रवत् । स्वभावशरणधुरीणो द्वेधा सुभटः । समहासकलः सज्जनः पूर्णिमेन्दुवत् । परमहसितश्रीः सुकृती, शिववत् ।

म. टी. अथ श्लेषसिद्धिप्रताने अभङ्गभङ्गश्लेषव्युत्पादनप्रकारमाह––वर्णाकारेति धवलेति । द्व्यर्थं नाम-धवलो बलीवर्दः श्वेतश्च अर्जुनेति ।

त्र्यर्थं नाम––

अर्जुनो वृक्षो भीमबन्धुः श्वेतश्च । नानार्थनामानि च हरिगोप्रभृतीनि । अधिकेति-अधिकमलशाली तडागे दरिद्रवत् । तडागः कथम्भूतः ? अधि सामस्त्येन, कमलैः शालते इत्येवंशीलोऽधिकमलशाली दरिद्रः । कथम्भूतः ? अधिकश्चासौ मलश्चाधिकमलस्तेन शाली करे[रो]ति करकसल्लक्ष्मीः । पुरुषो घनाघनवत् । कथम्भूतः पुरुषः, ? कराभ्यां कसन्ती दीप्यमाना लक्ष्मीर्यस्य स तथा । मेघः कथम्भूतः ? करकैः घनोपलैः सती प्रधाना लक्ष्मीर्यस्य स तथा ।

पूर्वाक्षरत्रोटनाय सामान्यशब्दानाह––

यथेति––अधिकः १. स्वकः २. स्वकीयकः ३. सश्रीकः ४. सुखः ५. सुगः सुष्ठु गच्छतीति सुगः ६. पुरोगः ७, समानघः ८. उच्चः ९. सदाचः १०. स्वस्था, ११. सदाच्छः १२. सज्जः १३. तज्ज्ञः १४. अभिज्ञः १५. सुखज्ञः १६. शोभितः १७. बि[वि]भ्राजितः १८। अत्रादिशब्दात् द्योतितभासितराजितप्रमुखा ग्राह्याः । स्वस्थः १९. सुखदं २०. तद्दुःखध्वंसिसुखादिदायकं वा[१] २१. शोभाबद्धं २२. सौन्दर्यप्रभृतितो बद्धं २३ । अत्र सौन्दर्यादितः बद्धशब्दो योज्यते । यथा–सौन्दर्यबद्धं चारुत्वबद्धं वर्यबद्धमित्यादि । सम्पन्नः २४. सुशोभनः २५. लोलान् पातीति लोलपः २६. सम्पन्नवः २७. सुगौरवः २८. महाभाः २९. बहुशोभः ३०. सदाशुभः ३१. बहुभाः ३२. परमः ३३. समानया ३४. मनोहृद्यं ३५. पीवरः ३६. सुरुचिरः, ३९. मधुरः, ३८. मञ्जुलः, ३९. पृथुलः ४०. स्वभावशः ४१. सुसुखदस ४२. समहास ४३. ससमग्रह ४४. परमह ४५. बहुलक्षाः ४६. इति । उदाहरणानि यथा––

अधिकशब्दोदाहरणं प्राग्दर्शितम् । सश्रीकशब्दोदाहरणं सूत्रवैचित्र्यात् प्रथमं दर्श्यते । यथा -सश्रीकपालिस्थितिः कैलासोऽष्टापदो हरप्रासादो वा सरोवत् । कपालमस्यास्तीति कपालश्रिया युक्तः कपाली श्रीकपाली, तस्य स्थितिः; सहश्रीकालिस्थित्या वर्तते यः स सश्रीकपालिस्थितिः । सरः कथम्भूतं ? पालेः स्थितिः पालिस्थितिः, सश्रीका शोभमाना पालिस्थितिर्यस्य तत् तथा । तथा स्वकलङ्काभोगश्चन्द्रो रावणवत् । कथम्भूतश्चन्द्रः ? स्वकलङ्कस्याभोगो विस्तारो यस्य स तथा । रावणः कथम्भूतः ? स्वका चासौ लङ्का च स्वकलङ्का, तस्याभोगो यस्य स तथा । तथा सुखरोचितो दुर्जनः कुलालो वा सुकृतिवत् । दुर्जनः कथम्भूतः ? शोभनः[१] खरः सुखरस्तस्य उचितो योग्यः असारबहुजल्पनत्वात्, कुलालपक्षे सुखरेणोचितो योग्यः सुकृती । कथम्भूतः सुखेन रोचितो[२] व्याप्तो यः स तथा । तथा सुखलीनो हयः सुकृतिवत्, सुशोभनं खलीनं यस्य स तथा; पक्षे सुखेन लीनो व्याप्तः तथा सुखद्योतः[३] । तपात्ययः कश्चित्प्रदेशो वा नृपवत् । उभयत्रापि सुष्ठु खद्योतो जीवविशेषो यस्मिन् स तथा; पक्षे सुखेन द्योतते इति सुखद्योतः । तथा पुरोगवलस्थितिर्महिषो मल्लवत् । पुरोऽग्रे गवलं माहिषं शृङ्गं तस्य स्थितिर्यत्र स तथा । मल्लपक्षे पुरोगा प्रधाना बलस्य स्थितिर्बलस्थितिः । पुरोगा बलस्थितिर्यस्य स तथा । समानघनरसभासितं सरो नृपवत् । समानस्तुल्यश्चासौ घनरसो जलं च, तेन भासितं शोभितं; नृपपक्षे समा तुल्या अनघा पापरहिता या नरसभा तस्यामासित उपविष्ट[:] तथा । उच्चामरश्रीनप इन्द्रवत् । उत्प्राबाल्येन, चामरश्रीर्यस्य स तथा ;इन्द्रपक्षे उच्चा प्रधाना अमरश्रीर्यस्य स तथा । स्वस्थामराजितं नृपसैन्यं मघोनः सदनवत् । स्वस्य स्थाम बलं, तेन राजितं शोभितं; इन्द्रसदनपक्षे स्वस्था ये अमरा देवास्तैरजितमपराभूतं तथा । सदाच्छगणराजितं हरसमीपं मुनिकुलं वा गोष्ठवत् । सदा निरन्तरमच्छा निर्मला ये गणा ईश्वर-

१. सुखरोचितो....शोभनः–इदं पा.म. पुस्तके नास्ति ।

२. योग्यः....रोचितो-इदमपि पा.म. पुस्तके नास्ति ।

३. सुकृति....सुखद्योतः–इदमपि पा.म. पुस्तके नास्ति ।

सप्तगणास्तै राजितं; मुनिपक्षे सदा अच्छा गणा गच्छा यतिसमुदायास्तै राजितं; गोष्ठपक्षे सदाच्छगणै राजितम् । अत्रो-नाङमाङो दीर्घाद्वा छ' (हे.व्या.१.३.२८) इति सूत्रेण द्वित्वमिति तथा । सज्जं [ज्ज ?] वीरगणं बिभ्रद्धनं नृपवत् । सन्तः प्रधानानि; जम्बीरा वृक्षास्तेषां गणस्तं दधत्;, नृपपक्षे सज्जं सज्जीभूतं वीरगणं सुभटगणं बिभ्रत् तथा । अभिज्ञाति-स्थितिः कुलीनो विदग्धगोष्ठीवत्[१] अभि सामास्त्येन, प्रसिद्धा वा ज्ञाति,स्तस्यां स्थितिरवस्थानं, यस्य स तथा । विदग्ध-गोष्ठीपक्षे अभिज्ञाः पण्डितास्तेषु अतिशयेन स्थितिर्यस्याः सा तथा । शोभितरङ्गान्वितो जलधिर्नटवत् । शोभिनो ये तरङ्गाः कल्लोलास्तैरन्वितो युक्तः; नटपक्षे शोभितो यो रङ्गो नाट्यस्थानं रङ्गाचार्यो वा, तेनान्वितः सहितस्तथा । स्वस्थपुटताशाली पर्वतमार्गो भूमिप्रदेशो वा मृदङ्गवत् । स्वस्य स्थपुटं स्वस्थपुटं, स्वविषमोन्नतं स्थपुटं । विषमोन्नतमिति नाममालावचनात् । स्वस्थपुटस्य भावः[२] स्वस्थपुटता, तया शाली; मृदङ्गपक्षे स्वस्थौ स्वस्थानस्थौ पुटौ मृदङ्गोभयपार्श्व-वर्ति चर्मखण्डौ यस्य स स्वस्थपुट,स्तस्य भावः स्वस्थपुटता, तया शाली तथा । सुखदानस्थितिर्लक्ष्मीवान् दाता वा शाकटिकवत् । सुखेनैव दाने स्थितिरवस्थानं यस्य स तथा; शाकटिकपक्षे अनसि स्थितिरनस्थितिः सुखदानः स्थितिर्यस्य स तथा । अत्रानः पक्षे 'व्यत्यये लुग् वेति' सूत्रेण (हे.व्या.१.३.५६) विसर्गलोपः । एवमग्रेऽपि ज्ञेयम् । शोभाबद्धबलान्वितो महेश्वरो रथी वा नृपवत् । बवयोरैक्यात् शोभावांश्चासौ धवलो वृषभश्च तेनान्वितः; नृपपक्षे शोभया बद्धं यद् बलं सैन्यं तेनान्वितस्तथा । सम्पन्नगरस्थितिः सुशोभनगरस्थितिश्च लक्ष्मीवान्नृपो वा शिवकण्ठवत् । सम्पच्च नगरं च तयोः स्थितिर्यस्य स तथा; शिवकण्ठपक्षे सम्पन्नागरस्थितिर्यस्य स तथा; नृपपक्षे सु अतिशयेन शोभा यस्य, तच्च तन्नगरं च, तस्मिन् स्थितिर्यस्य स तथा । शिवकण्ठपक्षे सुशोभना वाऽसौ गरस्थितिर्विषस्थितिर्यस्य स तथा । लोलपवनस्थिति-र्गवाक्षः । सागरतरङ्गोत्करो वा गिरिवत् । उभयत्रापि लोला चपला पवनस्थितिर्यस्मिन् स तथा; गिरिपक्षे लोलान् चपलान् नरान् पाति रक्षतीति लोलपं, तच्च तद्वनं च, तस्य । स्थितिर्यत्र स तथा । सम्पन्नवसुधाभोगः पार्थिवः सुरवत्, सम्पन्ना चासौ वसुधा च, तस्याभोगो यस्य स तथा; सुरपक्षे सम्पच्च न वसुधा च, ते तयोर्भोगो यस्य स तथा। सुगौरवान्वितं नगरं गृहवत्, द्वेधापि महत्त्वान्वितं । तथा बहुशो भवनान्वितं नगरं गिरिवत् । बहुशोऽत्यर्थं गृहान्वितं; गिरिपक्षे बह्वी शोभा यस्य तद्बहुशोभं तच्च तद्वनं च तेनान्वितो युक्तस्तथा । महाभवनान्वितं नगरं गिरिवत् । महान्ति च तानि भवनानि गृहाणि च, तैरन्वितैः; गिरिपक्षे महती भा कान्तिर्यस्य तन्महाभं, तच्च तद्वनं च, तेनान्वितो, युक्तस्तथा । परमहेलाशाली द्वेधाऽपि कामुकः, परमा प्रकृष्टा चासौ हेला लीला च तया शाली, परा प्रकृष्टा महेला स्त्री तथा शाली तथा । मनोहृद्योधस्थितिः सङ्ग्रामो धेनुवत् । मनोहृत् मनोज्ञा योधस्थितिर्यत्र स तथा । पक्षे मनसि हृद्या मनोहृद्या, मनोहरा ऊधस्थितिर्यस्याः सा तथा । सुरुचिरमणीरमणीयो राजा भोगी वा रोहणवत्। उभयत्रापि सुरुच्यो या रमण्यस्ताभिः रमणीयोः मनोहरो; रोहणपक्षे सुरुचिरा मनोज्ञा या [ये ?] मणयस्ताभिः (तैः ?) रमणीयस्तथा । पृथुलक्षणं गृहं चन्द्रवत् । पृथुला क्षणा उत्सवा यत्र तत् तथा । चन्द्रपक्षे पृथु विस्तीर्णं लक्षणं चिन्हं यस्मिन् स तथा । स्वभावशरणधुरीणो द्वेधाऽपि सुभटः स्वभावेन स्वस्वभावेन शरणे । धुरीणो धुर्यो मुख्य इत्यर्थः । पक्षे स्वभावकान्तिर्बलमिति यावत्, तस्यावशं यद्रणं तत्र धुरीणस्तथा । स महासकलः सज्जनः पूर्णिमेन्दुवत् सज्जनः । कथम्भूतः ? सह महसा उत्सवेन वर्तते यः स समहाः, सह कलाभिर्वर्तते यः स सकलः, स महासकलश्चेति पदद्वयं । अत्र 'नानुस्वारविसर्गौ च चित्रभङ्गाय सम्मताविति, (वा.१.१०) वचनात् सन्नापि विसर्गो न श्लेषभङ्गकृत्। इन्दुपक्षे स महासः समस्तहासस्तद्वत्कलो मनोज्ञो निर्दोषत्वात् तथा । परमहसितश्रीः सुकृती शिववत् । परः प्रकृष्टो यो मह उत्सवः तत्र सिता बद्धा, श्रीर्येन स तथा । अथवा परमा प्रकृष्टा हसितश्रीः हास्यस्य श्रीर्यस्य स तथा । शिवपक्षे परमा प्रकृष्टा हसितश्रीरट्टहास्यश्रीर्यस्येति तथा । बहुलक्षपणं कुर्कुटयोधनं जैनदर्शनवत् । बहुलक्षणो क्षपणो यत्र तत्तथा । जैनदर्शन-पक्षे बहुलानि क्षपणानि तपांसि यत्र तत्तथा । किञ्चात्र स्वकीयकसुगेत्यादि शब्दश्लेषादर्शने महाभबहुशोभयोर्वैपरीत्यव्याख्याने च सम्यग् निदानं न ज्ञायत इति ।

---

१. 'सुखादिदायकं वा' इदं पा.म. पुस्तके नास्ति ।
२. विद्वद्गोष्ठी'-सं.म.२
३. 'स्वस्थपुटस्य भावः' इदं पा.म. पुस्तके नास्ति ।

का क. एवमन्यस्वरान्तैरपि सामान्यशब्दैः श्लेषः । यथा—सदारोपचितो युवा, धनुर्धरवत् । बहुधान्यपुष्टश्रियान्विता शरद् वसन्तवत् । अग्रतोरणशोभं देवगृहं, सुभटवत् ।

अथान्त्याक्षरत्रोटनायान्त्यप्रयोज्याः सामान्यशब्दा यथा—

कुलसत्करोचितकसत्कान्ताः कामात् क्रमादुदिताः ।
कूटोपचितखरोचितखचितागतगाहितौ गुरूढश्च ।।७।।

गूढोगीतं घटोपचितं घोरीकुलश्च घनवर्द्धी ।
छविराजितछविलासिप्रमुखाः छलसच्छटोपचितौ ।।८।।

जाग्रगततोलसज्जातिज्ञातिज्ञानवर्धिनो ज्ञानम् ।।९।।

टोपतिरोहिततनुतस्तारोचिततानुवर्धि तु वराः स्युः ।
तान्तस्ततस्तुतश्च स्थपुटस्थामोदितस्थिरचित्तश्च ।।१०।।

स्थास्थितवधिकरोचितदान्ताश्चामोदितो दूरात् ।
धनवर्द्धीधरोचितधवलो धामोदितो धुरीणश्च ।।११।।

धीरोचितो धनव्यासङ्गोऽनवसन्नवर्द्धिनव्याप्ताः ।
नामोदितनियमोदितनिचितनिभासितनिकायनिहिताश्च ।।१२।।

निकरनिवहौ च नियमो निचयनुतो न्यूनवर्द्धिनो न्यस्तम् ।
प्रवरप्रमुखप्रकरप्रकामभारोचितप्रधानाः स्युः ।।१३।।

प्रबलप्रकटप्रसभप्रभावपूतप्रभूतपिहिताः स्युः ।
पुरतः प्रियमोदितकप्राग्रप्रामोदितप्रकाराः स्युः ।।१४।।

प्राग्रहरपीनवर्द्धिप्रस्तावप्रांशवः प्रकाशश्च ।
प्रविभासितः परोचितपिनद्धपरिवर्द्धिपरिचितस्फीताः ।।१५।।

स्फारोचितश्च फलसद्वितानबलसद्वरोचितवलक्षाः ।
वामोदितो विरोचितवर्द्धिवसद्वासनाव्याप्ताः ।।१६।।

विपरीतविप्रकृष्टवरचिताश्च व्राततोऽव्यवहिताः स्युः ।
विलसितविकसद्विचरद्विभ्राजिभ्रासिकासिसमाः ।।१७।।

विसरविमानवितर्का विशालविभ्रमविनोदविकटाः स्युः ।
विक्रमविकल्पविस्मयवीतव्यूढव्रजव्यूहाः ।।१८।।

भासितभारोचितभानवर्द्धिभीमोदिता भ्रान्तिः ।
भासितभूरिकृतभावबद्धभूयोगतो भरचितश्च ।।१९।।

उदितं भ्रमाद्भ्रमोचितमहितौ महसन्मदेशौ च ।
मधुरो मोहितमोदितमितो मतामानवर्द्धितयाताः ॥२०॥
यानाद्वर्द्धीरतमरामोदितराजितरचिलरोचितारूढम् ।
रोपचितरमोहितरूपचितलसल्लासलासितालं वसत् ॥२१॥
लातं लोभासितलीनवर्द्धिनो लूनवर्द्धी च ।
शतशकलशबलशान्ताः स्वकामसार्थौ स्वभावसमुदायाः ॥२२॥
समसीमोदिलदृङ्मोदितसितसारोचिताः सभासकलौ ।
सद्योतिसभाजनसारचितस्वेच्छास्वलन्त्वाश्च ॥२३॥
सततसमर्यादससीमसदेशसमानहासिता हारी ।
हृतं हितश्च हसितं हीनाद्वर्धी हसंश्चापि ॥२४॥
क्षिप्राग्रं च क्षुद्रव्याप्तं चैव क्षमोदितं क्षान्तम् ।
एते पुरतः शब्दा अन्येऽप्येवंविधा बुधैर्बोध्याः ॥२५॥

एतैः शब्दैः पदानामन्त्याक्षराणि यथासम्भव त्रोट्यन्ते । यथा—फलकसल्लक्ष्मीः युद्धकारः, फलितद्रुमवत् । नरकान्तस्थितिर्विष्णुः, नृपवत् । शङ्खचिताटोपं बिभ्रच्छङ्खवादकः पुण्यनरवत् । मृद्गाहितो मरुदेशः पूर्णेन्दुवत्, पूर्णेहितवत् । प्रियंगूढविभवं बिभ्रद्वनं, वेश्याजनवत् । परिघनवर्द्धिस्थितिः पुरप्रतोली, धर्मपरवत्, प्रावृट्कालवद्वा । कचरोचिता वेणी, समुद्रवीचीवत् । तापिच्छविराजितो वनोद्देशो, रविवत् । सदागजातिश्रीर्नृपो, वनवत् । रसज्ञानवर्धिस्थितिर्द्विरसनाधिपो, रसिकवत् । शृङ्गाटोपचितो वीरवर्गो, गिरिवत् । सुरतरतःश्रियं बिभ्रद् वेश्यावर्गः, स्वर्गवत् । स्वस्थामोदितश्रीः सुरेन्द्रो, मल्लवत् । कलदान्तस्थितिः स्वर्णालङ्कारकारी[1], दक्षवत् । सुधामोदितश्रीः स्वर्गो, रविवत् । उपायनवसल्लक्ष्मीर्द्वैधा नृपः । कच्छपरचितश्रीर्जलाशयो, ग्रामवत् । अधिकफलसत्स्थितिर्वसन्तः, सुस्वामिसेवावत् । केशवरोचितश्रीः द्वारकापुरी, सुकेशीवत् । करभासितो मरुदेशो, रविवत् । कलमहसल्लक्ष्मीः शरत्कालः सुपुण्यवत् । वलयतःस्थितिं बिभ्रत् नारीप्रकोष्ठो, मल्लवत् । तिमिरोचितश्रीः कुहूः, समुद्रवत् । कुण्डलसल्लक्ष्मीः कपोलपाली, सुधावत् । मानवसत्स्थितिः मर्त्यलोको, मानिवत् । गिरिशतःश्रियं बिभ्रत् कैलासः, पृथ्वीवत् । मानसमोदितश्रीः श्रीदपुरीप्रवेशो, मानिवत् । कलहसितस्थितिः नारदः, कामिवत् । वलक्षमोदितश्रीः हिमाद्रिः, शान्तवत् ।

एवमन्यरपि सामान्यशब्दैः श्लेषः साध्यः—

अपूर्वश्चाद्वितीयश्च मध्यमोऽनन्त इत्यपि ।
अमात्रो मात्राधिकश्चातिक्रान्ताद्दलितक्रमः ॥२६॥
केवलोऽथान्तरत्यन्तादिभ्यश्च पुरतो गुरुः ।
श्लेषमुत्पादयेदेतैः शब्दैरुपपदस्थितैः ॥२७॥

क्रमेणोदाहरणानि—

अपूर्वत्रिदशाभोगः, पक्षे दशाभोगः । सुमनः गीर्वाण वृन्दारक विबुध अमृत दानव मीमांसा पिनाक कुमार केशव कन्दर्प कमल कन्दल कमठ इत्यादिशब्दनामादौ अपूर्वशब्दः प्रयोज्यः ।

१. कारयिता—ला-वृ २ ।

अद्वितीयकपालिश्रीः, पक्षे कलिश्रीः। अमर दानव स्वयम्भू आराम पिनाक वृषाङ्क कमल भास्कर इत्यादिशब्दानामादौ अद्वितीयाऽमध्यमशब्दौ प्रयोज्यौ ।

अनन्तदानवश्रीः, पक्षे दानश्रीः । दैवत असुर प्रजापति भारती मदन नन्दक इत्यादिशब्दनामादौ अनन्तशब्दः प्रयोज्यः ।

अमात्रकालस्थितिः, पक्षे कलस्थितिः । जार वार स्फार दार भार चार हार इत्यादिशब्दानामादौ अमात्रशब्दः प्रयोज्यः ।

मात्राधिककेवलज्ञानं, पक्षे केवलज्ञानम्। कृपण कमल कल वल भर हर इत्यादिशब्दानामादौ मात्राधिकशब्दः प्रयोज्यः ।

अतिक्रान्तक्रमभारतीस्थितिः, पक्षे तीरभास्थितिः । वलितक्रमपोतवैभवः, पक्षे तपोवैभवः। हर नन्दक वाल मार कर्तन सहभावि राजा भार्गव धारा लङ्का रसा दिवा दीना नीलिमा राक्षसा रुत चारु पुत्र शाप भान पात्र रद कपि छाग वलभी इत्यादिशब्दानामादौ अतिक्रान्तक्रमवलितक्रमशब्दौ प्रयोज्यौ।

केवलकोरकस्थितिः, पक्षे करकस्थितिः। कम्बल कोमल दाव प्रमोद इत्यादिशब्दानामादौ अन्तर्गुरुशब्दः प्रयोज्यः ।

अन्तगु [र्गु] रुकमलस्थितिः, पक्षे कमलास्थितिः। पद्म राम वाल वाम इत्यादिशब्दानामादौ अन्तगु [र्गु] रु शब्दः प्रयोज्यः ।

आदिगुरुवलस्थितिः, पक्षे बालस्थितिः। चर कल दह हर वर इत्यादिशब्दानामादौ आदिगुरुशब्दः प्रयोज्यः ।

म. टी. एवमन्यस्वरान्तैः सामान्यशब्दैर्यथा—सदारोपचितो युवा धनुर्धरवत्। सह दारैर्वर्तते यः सः सदारः, सदारश्चासावुपचितश्च सदारोपचितः । धनुर्धरपक्षे सदारोपैर्बाणैश्चितो व्याप्तस्तथा । बहुधान्यपुष्टश्रियान्विता शरत् वसन्तवत्। बहुभिर्धान्यैः पुष्टा श्री,स्तयान्विता युक्ता । वसन्तपक्षे बहुधा ये अन्यपुष्टाः कोकिलास्तेषां श्रीस्तयान्वितः तथा । अग्रतोरणशोभं देवगृहं सुभटवत्, अग्रं प्रधानं यत् तोरणं तेन शोभा यस्य तत् तथा। सुभटपक्षे अग्रतः प्रथमतो रणशोभा यस्य स तथेति।

अथान्त्याक्षरत्रोटनायान्त्यप्रयोज्या सामान्यशब्दा यथा—कुलसदिति। कामशब्दात् क्रमशब्दाच्च उदितशब्दो योज्यते। यथा—कामोदितः, क्रमोदितः। छविराजीति-छविशब्दात् राजिलासिशब्दौ योज्यौ। प्रमुखग्रहणात् द्योतिशोभिभासिप्रमुखाश्च योज्याः । जाग्रगेति आशब्दात् ततः लसत्शब्दौ योज्यौ। यथा—जाततः जालसत् । अत्र ततो इति—प्रथमान्तोऽनुकरणशब्दो ज्ञेयः छन्दोबन्धानुलोम्यात् । ततश्च लसच्चेति समाहारद्वन्द्वः, पश्चाद् जाग्रगपदेन सह कर्मधारयो, जकाराग्रगौ, ततो लसच्छब्दावित्यर्थः। स्थाशब्दात् स्थिशब्दात् यथाक्रमं न वर्द्धिकरोचितशब्दौ योज्यौ, यथा स्थानवर्द्धिकः, स्थिरोचितः। दूरशब्दान्मोदितो यथा दूरामोदितः। विभ्राजि भ्रासि कासि समा इति—विभ्राजि, विभ्रासि, विकासि, विराजि, विलासि, विभासि, प्रमुखा ज्ञेयाः। भानवर्द्धीति—भानेन दीप्त्या वर्द्धीपक्षे भापूर्वपदात् नवर्द्धिशब्दो योज्यः । एवं प्रागग्रे च भाव्यं। भ्रमशब्दादुदितशब्दो योज्यः । यथा—भ्रमोदितं । रशब्दात् यानशब्दात् वर्द्धीशब्दो योज्यो यथा-यानवर्द्धी। तशब्दाद्राशब्दाच्च मोदितशब्दो योज्यते। यथा रमोदितः तमोदितः रामोदितः । यद्वा रावर्णात् परौ मोदितजितशब्दौ योज्यौ। तेन रामोदितराजितशब्दौ स्यातामिति ज्ञेयं। ससमी शब्देभ्यः क्रमेण मोदितदृग् मोदितशब्दा योज्याः । यथा समोदितः, सदृग् सीमोदितः । हीनशब्दात् वर्द्धिशब्दो योज्यः । यथा हीनवर्द्धी।

एतेषामुदाहरणानि यथा—फलकसल्लक्ष्मीः युद्धकारः, फलितद्रुमवत् । सती विद्यमाना चासौ लक्ष्मीश्च सल्लक्ष्मीः । फलकस्य खेटकस्य सल्लक्ष्मीर्यस्य स तथा। द्रुमपक्षे फलेन कसन्ती शोभमाना लक्ष्मीर्यस्य स तथा ।

नरकान्तस्थितिर्विष्णुर्नृपवत् । नरकनामा दैत्यस्तस्यान्तः क्षयो नरकान्तस्तत्र स्थितिर्यस्य स तथा। नृपपक्षे नराः पुरुषास्तेषु कान्ता मनोज्ञा स्थितिर्यस्य स तथा। अथवा 'नानुस्वारविसर्गौ च चित्रभङ्गाय सम्मता'विति (वा.१.२०) वचनात् रङ्कस्यान्तर्मध्यं; तत्र स्थितिरवस्थानं यस्य स तथा, एवंविधो न भवति। अथवा नरकस्यान्तर्मध्यं, तत्र स्थितिरवस्थानं यस्य स तथा राज्यं नरकान्तमिति वचनात् । शङ्खचिताटोपं बिभ्रत् हरिः पुण्यनरवत्। शङ्खो जलजस्तेन चितो व्याप्त, आटोपो रचना, तम् । पुण्यनरपक्षे शं सुखं, खानीन्द्रियाणि, तैः चिताटोपं तथा। मुद्गाहितो मरुदेशः पूर्णवाञ्छितवत् । मुद्गो धान्यविशेषस्तेनाहितो व्याप्तः। अथवा मुद्गा नामासमन्तात् हितो हितकृत्; पूर्णवाञ्छितपक्षे मुत् हर्षस्तया गाहितो व्याप्तस्तथा। प्रियं गूढविभवं बिभ्रत्वनं वेश्याजनवत् । प्रियङ्गुर्वृक्षस्तस्य ऊढो धृतो, यो विभवस्तम् । पक्षे गूढः प्रच्छन्नो विभवो यस्य स तथा। तन्द्रव्याढ्यं प्रियं बिभ्रदित्यर्थः। परमोरगीतस्थितिं बिभ्रन्नागलोको वर्षाकालवत्। परमाः प्रकृष्टा या उरग्यस्ताभिरिता व्याप्ता या स्थितिस्तां; वर्षापक्षे पराः प्रकृष्टा येऽभ्र व्यामयूरास्तेषां गीतस्थिति तथा। महाघाटोपचितः उष्ट्रः पापिवत्। महती घाटा कृकाटिका च दुर्घाटा कृकाटिका इति वचनात्। तया उपचितो व्याप्तः। पापिपक्षे महच्च तदघं च महाघं महत्पापं, तस्याटोपस्तेन चितो व्याप्त, स्तथा। महाघोरीकृतस्थितिर्निशाचरः पापिवत् । महाघोरीकृता बीभत्सीकृता, स्थितिर्येन स तथा। पापिपक्षे महाघस्य ऊरीकृता अङ्गीकृता, स्थितिर्येन स तथा। गीतादिघोरीकृतपर्यन्तोदाहरणान्यनुक्तान्यप्यत्र लिखितानीति। तथा परिघनवर्द्धिस्थितिर्नगरप्रतोलीधर्मपरवत्, परिघोऽर्गला, स एवं न वर्द्धिस्तस्याः स्थितिर्यस्याः सा तथा। धर्मपरपक्षे परि समन्तात्, घना निबिडा, वर्द्धिनी स्थितिर्मर्यादा, यस्य स तथा। तथा सम्पन्नवचान्तःस्थितिः पुस्तकोघ आकाशवत्- सम्पन्ना प्राप्ता वचायावज इति प्रसिद्धायाः पुस्तकरक्षाकारित्वात् अन्तर्मध्ये स्थितिर्यत्र स तथा। आकाशपक्षे सम्पदा नवः सम्पन्नवो यः चन्द्रस्तस्यान्तर्मध्ये स्थितिर्यत्र स तथा। तथा कचरोचिता स्त्रीश्रेणी वा समुद्रवीचीवत्। उभयत्रापि कचैः केशैः रोचिता शोभिता। वीचीपक्षे कचरैः जलचरैः जन्तुभिरुचिता योग्या तथा। सश्रीकचक्रान्तःस्थितिशाली नारी मुद्धा कासारवत् । सश्रियः श्रीसहिताः, कचाः सश्रीकचाः, सश्रीकचैः क्रान्ता व्याप्ता, स्थितिस्तया शाली। कासारपक्षे सश्रीका ये चक्राः चक्रवाकास्तेषामन्तःस्थितिस्तया शाली तथा। राजितरुचिरोचितश्रीर्वनोद्देशो रविवत्। राजिनश्च ते तरवश्च तैः चिरं उचिता योग्या, श्रीर्यस्य स तथा। रविपक्षे राजिता या रुचिस्तया रोचिता श्रीर्यस्य स तथा। तापिच्छविराजितो वनप्रदेशो रविवत्। तापिच्छास्तमालनामानो वृक्षास्तैर्विराजितः। रविपक्षे तापिनीच्छविः कान्तिस्तया राजितः शोभितः तथा। सदा पिच्छलसत्स्थितिर्मयूरो दुर्जनवत् । सदा पिच्छैर्लसन्ती स्थितिर्यस्य स तथा। दुर्जनपक्षे सदाऽपि निरन्तरमपिच्छले सद्विद्यमाना स्थितिर्यस्य स तथा। तथा गिरिजाततश्रियान्वितो रुद्रः पृथ्वीवत्। गिरिजायाः पार्वत्याः, तता विस्तीर्णा, श्रीस्तयान्वितः। पृथ्वीपक्षे गिरिजा ततः पर्वतसमूहतः श्रियान्विता। अत्र शकारद्वित्वादिकं वक्ष्यमाणरीत्या ज्ञेयम्। तथा महाजालसत्तमोऽजापालो धवलगृहवत् महाजाभिर्लसत्तमः। धवलगृहपक्षे महाजालैर्महागवाक्षैः सत्तमोऽतिशयेन प्रधान इत्यादि तथा। सदागजातिश्रीर्नृपो वनवत्। गजा हस्तिन, स्तेषां अतिप्रचुरा श्रीर्यस्य स तथा। वनपक्षे सदा अगजात्या वृक्षजात्या, श्रीर्यस्य तत् तथा। रसज्ञानवर्द्धिस्थितिर्नागराजो रसिकवत्। रसज्ञाः जिह्वास्तासां नवा ऋद्धिर्नवर्द्धिः, रसज्ञानवर्द्धेः स्थितिर्यस्य स तथा। रसिकपक्षे रसाः शृङ्गारादय,स्तेषां ज्ञानेन वर्द्धिनी स्थितिर्यस्य स तथा। शृङ्गाटोपचितो जलप्रदेशो वीरवर्गो वा गिरिवत्। शृङ्गाटं जलोद्भवं फलं सींघोडा इति प्रसिद्धं, तेनोपचितो व्याप्तः तथा। शृङ्गमुत्कर्षं, आटोपः ताभ्यां चितो व्याप्तः। गिरिपक्षे शृङ्गाणां शिखराणामाटोपो रचनाविशेषस्तेन चितो व्याप्तः। तथा सुरततश्रियं बिभ्रत् वेश्याजनः स्वर्गवत्। सुरतं सम्भोग,स्तस्मात् श्रियं लक्ष्मीं बिभ्रत्। स्वर्गपक्षे सुराणां देवानां ततां विस्तीर्णां श्रियं। अत्र प्रथमपक्षे 'शषसे शषसं वेति', सूत्रेण (हे.व्या.१.३.६) रकारस्य शकारत्वं; द्वितीयपक्षे 'अदीर्घाद्विरामैकव्यञ्जने' इति सूत्रेण (हे.व्या.१.३.३२) शकारस्य द्वित्वं। एवमग्रेऽपि ज्ञेयम्। तथा स्वस्थामोदितश्रीरिन्द्रपुरी मल्लवत्। स्वस्थानां देवानां आमोदिता श्रीर्लक्ष्मीर्यस्यां सा तथा। मल्लपक्षे स्वस्य स्थाम स्वस्थाम निजबलं, तेनोदिता श्रीर्यस्य स तथा। कलादान्तस्थितिः स्वर्णालङ्कारकारयिता दक्षवत्। कला [लां] आदत्त इति कलादः स्वर्णकार, स्तस्यान्ते पार्श्वे, स्थितिर्यस्य स तथा। दक्षनरपक्षे कलाभिर्दान्ता शान्ता, स्थितिर्यस्य सः। तथा सुधामोदितश्रीः स्वर्गो रविवत्। सुधाऽमृतं तेन मोदिता हर्षिता, श्रीर्यस्य स तथा। रविपक्षे सुशोभनं धाम तेजस्तेन,

उदिता प्रकटिता, श्रीर्यस्य स तथा। उपायनवसल्लक्ष्मीर्द्वेधाऽपि नृपः उपायैर्नवा उपायनैर्वा सती विद्यमाना लक्ष्मीर्यस्य स तथा। पक्षे उपायने प्राभृते वसन्ती लक्ष्मीर्यस्य स तथा। कच्छपरचितश्रीर्जलाशयो ग्रामवत्। कच्छपाः कूर्मास्तैः रचिता श्रीर्यत्र स तथा। ग्रामपक्षे कच्छाः सजलप्रदेशास्तैः, परा प्रकृष्टा चिता श्रीर्यत्र स तथा। अधिकफलसंस्थितिर्वसन्तः सुस्वामिसेवावत्। कफमधिलक्ष्यीकृत्याधिकफं तेन लसत् स्थितिर्यस्य स तथा। वसन्ते कफस्याधिक्यात् पक्षे अधिकफलेन सत् स्थितिर्यस्यां सा तथा। केशवरोचितश्रीर्द्वारकापुरी सुकेशी स्त्रीवत्, केशवेन कृष्णेन रोचिता शोभिता श्रीर्यस्यां सा तथा। पक्षे केशैः कचैर्वरा प्रधाना, उचिता योग्या, श्रीर्यस्याः सा तथा। करभासितो मरुदेश आभीरो वा रविवत्। करभैरासितः शसयोरैक्याद् व्याप्तः। पक्षे करभे आसित उपविष्टः करभासितः। रविपक्षे करैः किरणैर्भासितः शोभितस्तथा। कलमहसल्लक्ष्मीः शरत्सुपुण्यवत्। कलमाः शालयस्तैर्हसन्ती लक्ष्मीः शोभा, यस्याः सा तथा। सुपुण्यपक्षे कलेन मनोज्ञेन, महेनोत्सवेन, सल्लक्ष्मीर्यस्य स तथा। वलयतः स्थितिं बिभ्रन्नारीप्रकोष्ठो मल्लवत्। वलयतः कङ्कणानां स्थितिं बिभ्रत्। मल्लपक्षे बले नयता बद्धाया, स्थितिस्तां तथा। तिमिरोचितश्रीः अमावास्या समुद्रवत् तिमिरैरुचिता योग्या, श्रीर्यस्याः सा तथा। पक्षे तिमिभिर्मत्स्यैः रोचिता श्रीर्यस्य स तथा। कुण्डलसल्लक्ष्मीर्नारी कपोलपाली वा सुधावत्। उभयत्रापि कुण्डलाभ्यां कर्णाभरणाभ्यां सती लक्ष्मीर्यस्याः सा तथा। सुधापक्षे कुण्डेषु पातालकुण्डेषु, लसन्ती लक्ष्मीर्यस्याः सा तथा। मानवसत्स्थितिर्मनुष्यलोको मानिवत्। मानवानां सती प्रधाना स्थितिर्यस्मिन् स तथा। मानिपक्षे मानेऽभिमाने वसन्ती स्थितिर्यस्य स तथा। गिरिशतःश्रियं बिभ्रत् कैलासः पृथ्वीवत्। ईश्वरतः श्रियं शोभाम्। पृथ्वीपक्षे गिरिशतानां पर्वतशतानां श्रीः शोभा तां बिभ्रत् तथा। मानसमोदितश्रीर्हंसो मानिवत्, मानसेन देवसरसामोदिता हर्षिता श्रीर्यस्य स तथा। मानिपक्षे मानस्य समा समस्ता, उदयवती श्रीर्यस्य स तथा। कलहसितस्थितिर्नारदः कामिवत्। कलहे सिता बद्धा स्थितिर्येन स तथा। कामिपक्षे कलं मनोज्ञं हसितं तस्य स्थितिर्यस्य स तथा। वलक्षमोदितश्रीर्हिमाद्रिश्चन्द्रो वा शान्तवत्। द्वेधाऽपि वलक्षेण धवलवर्णेन, मोदिता श्रीर्यस्य स तथा। शान्तनरपक्षे बवयोरैक्यात् बलं च क्षमा च ताभ्यां उदितश्रीर्यस्य स लक्षमोदितश्रीरिति।

अपूर्वश्चैत्यस्योदाहरणानि वृत्तावेव विवृतान्यतोऽत्र न लिखितानीति।

का. क. अथ वर्णाक्षेपेण श्लेषप्रकारान्तरमाह—

क्रमतोऽपूर्वोञ्चित आचिता सितावाहितोहितोरूढाः।
उद्योतिकान्तकासितकामोदितकुलसितः कसंश्चापि ॥२८॥

उदितं क्रमाच्च कूटोपचितं खचितं सुखं पुरोगचितम्।
गाहितगुरूढगूढघनवर्द्धिघोरीकृता ज्ञेयाः ॥२९॥

घाटोपचितोच्चरोचितचक्राञ्चितकरोचिताश्चान्तम्।
छविराजिमुखाच्छलसत् सज्जं जालोचितश्च जातियुतः ॥३०॥

ज्ञानाद्वर्द्धी टोपचिततिरोहिततानवर्द्धिनो बोध्याः
तारोचितस्थिरोचितस्थिरोहितस्थानवर्द्धिनो ज्ञेयाः ॥३१॥

स्थामोचितदूरोचितदान्ता धीरोचितश्च धनवर्धी।
धामोदितो धरोचितनव्याप्तनिचितनवर्द्धिनियताश्च ॥३२॥

निहितनिबद्धपरोचितपिहितपिनद्धप्रभासितप्रमुखाः।
प्रान्तप्रकटप्रवरप्रमोदिताः पीनवर्द्धी च ॥३३॥

पूरोचितप्रमोदितप्राग्रप्रभासिताः स्फूटोपचितम्।
स्फारोचितश्च फलसद्बलसद्वामोदिता बसद्व्याप्तौ ॥३४॥

विपरीतविकटसम्पन्नवा विभासितवरोचितव्यूढाः ।
विप्रोत्क्रुष्टोद्भासितभारोचितभानवर्द्धिभूव्याप्ताः ।।३५।।
भासितभ्रामोदितमोहितमहसन्मानवर्द्धिनो ज्ञेयाः ।
यानाद्वर्धी रोचितरचितौ परोचितरूढरूपचिताः ।।३६।।
रामोदितलसितलसल्लाभाश्रितलूनवर्द्धिनो ज्ञेयाः ।
लीनाद्वर्धी शु[सु]भ्राजितश[स]कलशुभासिताः सुशोभश्च ।।३७।।
सहसततसमोहितसारोचितसीमोदिताश्च सद्द्योती ।
सबलं हासितहीनावर्द्धिक्षिप्राग्रकक्षमोदितकाः ।।३८।।
शब्दैरेभिरपूर्वाद्यैः पूर्वभागप्रयोजितैः ।
श्लेषाय शब्दमध्येषु निक्षिपेद्वर्णमण्डली ।।३९।।

यथा—अपूर्वसुरस्थितिः, पक्षे असुरस्थितिः । अंचितगजयुतः, पक्षे अङगजः । आचितखेटकशोभी, पक्षे आखेटकः । उद्योतिपरागपूर्णः, पक्षे उपरागः । कामोदितसरःस्थितिः, पक्षे कासारः । एवं सर्वत्र । खचितद्योतयुतः । गाहितजारोहः । घनवर्धिस्मरः । वरोचितपलश्रीः । छविराजिगणः । जालोचितघनः । पुरोज्ञानवर्द्धिरसप्रसरः । अग्रेसदाटोपचितकरश्रीः । चारोचितरणश्रीः । स्यामोदितपुटः । दामोदितनवश्रीः । धरोचितवलः । नव्याप्तक्षत्रराजी । परोचितवनशोभी । प्रमोदितकरस्थितिः । स्फुटोपचितरणश्रीः । व्याप्तपक्षस्थितिः । वामोदितमनःस्थितिः । भारोचितरतश्रीः । महसत्सूर-शोभी । यानवर्द्धिबकस्थितिः । रचितमणी[णि]भासुरः । लमितगुडरम्यः । शकलकटयुक्तः । सततगोत्रस्थितिः । पुरोहसितपटयुक्तः । क्षमोदितपणस्थितिः ।

एतेषां वर्णानामग्रे रहितशब्दः प्रयोज्यः । करहित-कीरहितेत्यादि । एतैः शब्दैर्वर्णा आक्रम्यन्ते । करहितकमल-शाली, पक्षे मलशाली । कीरहितबन्धुकीयुतः, पक्षे बन्धुयुतः, इत्यादि ज्ञेयम् ।

एवं वर्णाक्षेपकशब्दा अन्येऽप्यूह्याः । यथा—कोपपद टोपपद रोपपद लोपपद कूपपद भूपपद यूपपद रूपपद ।

तथा कराजिरकान्तारादिशब्दानामग्रेऽजितशब्दः प्रयोज्यः । यथा—कराजिताद्याः ।

कविछविरविप्रमुखाः, तथा नवी-अटवीमुख्याः, विकारान्तवीकारान्तादिशब्दानामग्रे आप्तशब्दः प्रयोज्यः । यथा—छव्याप्तनीव्याप्ताद्याः ।

तथा अवर्णोपलक्षितरेफान्तशब्दानामग्रे उपचित-उपयुक्तशब्दौ प्रयोज्यौ । यथा—जलोपयुक्तः, करोपचितः, करोप-युक्तः; जरोपचितः, जरोपयुक्तः ।

म. टी. अथ वर्णक्षेपेण श्लेषप्रकारान्तरशब्दा यथाक्रमत इति ।

उदितिमिति—क्रमशब्दादुदितशब्दो योज्यते । यथाक्रमोदितं मुखशब्दग्रहणाच्छविद्योतिछविशोभिप्रभृतयः शब्दा ग्राह्याः । सत्प्रधानोजो यत्र तत्सज्जं ज्ञानात् । वर्द्धीशब्दो यथा ज्ञानवर्द्धी; यानात् वर्द्धीशब्दो यथा यानवर्द्धी; लीनात् वर्द्धीशब्दो यथा लीनवर्द्धी; हीनात् वर्द्धीशब्दो यथा हीनवर्द्धी । उदाहरणानि यथा—अपूर्वसुरस्थितिः स्वर्गः पातालवत् । अपूर्वा प्रधाना सुरस्थितिर्यत्र स तथा । पातालपक्षे अकारः पूर्वः प्रथमो यस्यां सा तथा । अपूर्वा सुरस्थिति-रेतावताऽसुरस्थितिर्यत्र स तथा । अञ्चितगजयुतो राजाऽपि नृपवत्, अञ्चितगजेन युतः । पितृपक्षे अंकारेण चितो व्याप्तो गजः अङ्गजस्तेन युतस्तथा । आचितखेटकशोभी सुभटो नृपवत्, आचितखेटकेन शोभी । नृपपक्षे आकारेण चितो व्याप्तः, खेटकः आखेटकस्तेन, शोभी तथा । उद्योतिपरागपूर्णः कमलौघो राहुग्रस्तसूर्यवत् । उद्योतिना परागेण पूर्णः । सूर्यपक्षे उकारेण द्योतिपरागः । उपरागः ग्रहणं, तेन पूर्णस्तथा । कामोदितसरःस्थितिर्देशो महिषीसमुदायवत् । काममत्यर्थमुदिता कामोदिता, सरसः स्थितिः सरःस्थिति, कामोदिता सरःस्थितिर्यत्र स तथा । महिषीसमुदायपक्षे काशब्देन मोदितः सरः शब्दः कासरो महिष,स्तस्य स्थितिर्यत्र स तथा ।

म. टी खचितद्योतयुतप्रभृतिशब्दानां द्वितीयार्थद्योतकशब्दा यथा—खद्योतः १. गजारोह, २. घस्मरः ३. चपलश्रीः ४. छगणः ५. जघनः ६. रसज्ञा ७. करटः ८. तारणः ९. स्थपुटः १०. दानवः ११. धवलः १२. नक्षत्रशोभी १३. पवनराजी १४. प्रकटः, १५. स्फुरणः १६. विपक्षः १७. वामनः १८. भरतः १९. मसूरः २०. यावकोऽलक्तकः २१. रमणी २२. लगुडः २३. शकटः २४. सगोत्रः २५. पटहः २६. क्षपणः २७.। एतेषां दृष्टान्तदार्ष्टान्तिकयोजना यथा—खचितद्योतयुतः सूर्यो वर्षाकालवत् । खचितो निबिडो द्योत उद्योतस्तेन युतः । पक्षे खकारेण चिताः व्याप्ताः ये द्योता ? खद्योता इत्यर्थः, तैर्युतः । वर्षाकाले हि खद्योता बहवो भवन्तीत्युक्तम् । तथा गाहितजारोहा व्यभिचारिणी स्त्री नृपवत्, गाहितोऽवगाहितो जारपुरुषस्य ऊहो विचारो, यया सा तथा । पक्षे गकारेणाहितो व्याप्तो जो (यो) गजस्तत्रारोहो यस्य स तथा । तथा घनवर्द्धिस्मरः कामी कुक्षम्भरिवत् । घनं वर्द्धते इत्येवंशीलः स्मरो यस्य स तथा । पक्षे घकारेण न वर्द्धिस्मरो घस्मरः खाउकण इति प्रसिद्धः । तथा च रोचितपलश्रीः शौतिकः वानरवत् । चराणामुचिता योग्या पलश्रीः मांसश्रीर्यस्य स तथा । पक्षे चकारेण रोचिता सहिता पला चपला श्रीर्यस्य स तथा । तथा छविराजिगण ईश्वरः छगणशब्दवत् । छविः प्रभा, तथा राजी गणो यस्य स तथा । पक्षे छकारेण विराजी गणो यत्र स तथा छगण इत्यर्थः । तथा जालोचितघनः पवनः पथः स्त्रीजघनशब्दवत्, जालैर्जलससमूहै, रुचितो योग्यो, घनो मेघो, यत्र स तथा । पक्षे जकारेणालोचितो घनशब्दो यत्र स तथा । तथा पुरो ज्ञानवर्द्धि रसप्रसरः पण्डितः सर्पवत् दुर्जनवद्वा, पुरोऽग्रतो ज्ञानस्य नवर्द्धि रसप्रसरो यस्य स तथा । पक्षे पुरोऽग्रे ज्ञानशब्देन नवर्द्धिरसः रसज्ञातस्याः प्रसरो यस्य स तथा । तथाग्रे सदाटोपचितकरश्रीः सिंहो गजवत् । अग्रे पुरतः, सदा निरन्तरं, आटोपेन व्याप्ता करश्रीर्यस्य स तथा । सिंहस्य फालादानावसरे अग्रहस्तयोराटोपो भवतीति । पक्षे अग्रे सदा टकारेणोपचितः सहितः, करः करटः, कुम्भस्थलम् तस्य श्रीर्यस्य स तथा । अत्रोदाहरणद्वये अग्रे वर्णप्रक्षेपः कृतः । एवं पुरःप्रभृतिशब्देनान्यत्रापि कर्तव्य इति ध्येयम् । तथा तारोचितरणश्री सुभटो यानपात्रवत् । तारा उचिता रणश्रीर्यस्य स तथा । पक्षे ताराशब्देन रोचिता शोभिता, रणश्रीर्यस्य तत्तथा तारणश्री इत्यर्थः । तथा स्थामोदितपुटो मल्लो गिरिमार्गवत् । स्थाम्ना बलेन, उदितं पुटं अर्थात् कक्षापुटं, यस्य स तथा । पक्षे स्थकारेणामोदितो युक्तः पुटः स्थपुटः विषमोन्नत इत्यर्थः । तथा दामोदितनवश्रीः सश्रीकपुरुषः पाताललोकवत् । दाम्ना स्रजा उदिता नवा श्रीर्यस्य स तथा । पक्ष दा इत्यक्षरेण मोदिता नवश्रीर्यत्र स तथा दानवश्रीरित्यर्थः । तथाऽधरोचितबलः सुभटः शङ्खवत् । धरायां पृथिव्यामुचितं योग्यं, बलं यस्य स तथा । पक्षे धकारेण रोचितश्चासौ बलश्च धवलः श्वेत इत्यर्थः । तथा न व्याप्तक्षत्रराजां विराजते । रणे गगने च नव्या आप्ता ये क्षत्रा क्षत्रिया, स्तेषाम् । राजीपक्षे नकारेण व्याप्ता क्षत्रराजी नक्षत्रराजी इत्यर्थः । तथा परोपचितवनशोभी नगरासन्नप्रदेशो वसन्तवत् । परेषामुचितानि योग्यानि वनानि तैः शोभी । पक्षे पकारेण रोचितवनशोभी पवनशोभीत्यर्थः तथा । प्रमोदितकटस्थितिः कटकृत् दक्षवत् । प्रमोदिता कटस्थितिर्यस्य स तथा । पक्षे प्रशब्देन मोदिता कटस्थितिर्यस्य स प्रकटस्थितिरित्यर्थः । तथा स्फुटोपचितरणश्री शूरः चक्षुर्वत् । स्फुटा प्रकटा उपचिता पुष्टा रणश्रीर्यस्य स तथा । पक्षे स्फुइत्यक्षरस्य टोप आटोपस्तेनोपचिता व्याप्ता, रणश्रीर्यत्र तत्, स्फुरणश्री इत्यर्थः । लोचने हि प्रायशःशुभाशुभसूचकं स्फुरणं भवतीत्यभिप्रायेण दृष्टान्तः । तथा व्याप्तपक्षस्थितिः पक्षी दुर्बलनृपवत् ।व्याप्ता पक्षस्थितिर्यस्य स तथा । पक्षे विशब्देन आप्ता प्राप्ता, पक्षस्थितिर्यस्य स तथा विपक्षस्थितिरित्यर्थः । तथा वामोदितमनःस्थितिः शान्तपुरुषः कामी वा त्रिविक्रमविष्णुवत् । वामा मनोज्ञा, उदिता मनसः स्थितिर्यस्य स तथा । अथवा वामायां स्त्रियां उदिता उदयं प्राप्ता, मनसः स्थितिर्यस्य स तथा । अत्र विसर्गलोपः प्राग्वत्, 'व्यत्यये लुग् वे' ति सूत्रेण (हे.व्या. १.३.५६') । पक्षे वा इत्यक्षरेण मोदिता मनःस्थितिर्वा मनस्थितिरित्यर्थः तथा । भरोचितरतश्री कामुको जम्बूद्वीपवत् । भरेण बाहुल्येन, उचिता रता श्रीर्यस्य स तथा । पक्षे भकारेण रोचिता रतश्रीः भरतश्रीर्यत्र स तथा । तथा महसत्सूरशोभी दिवसो मालवदेशवत् । महेन तेजसा सत्प्रधानः सूरः सूर्यस्तेन शोभी । पक्षे मकारेण हसत् मसूरशोभी मसूरशोभीत्यर्थः । मसूरो हि धान्यविशेषः, स च मालवदेशे भूयान् भवतीति तथा । यानवर्द्धिबकस्थितिस्तटाको रमणीचरणवत् । यानेन गमनेन वर्द्धिनो ये बकास्तेषां स्थितिर्यत्र स तथा । पक्षे या इत्यक्षरेण न वर्द्धिबकस्थितिर्यत्र स तथा; या बकस्थितिरलक्तकस्थितिरित्यर्थः । तथा च रचितमणी(णि)भासुरो मुकुटो कामिवत् । रचिताः यां म(णय)स्ताभिर्भासुरः । पक्षे रकारेण चिता व्याप्ता, मणी रमणी, तया भासुरः तथा । लसितगुडरम्यो

मालवदेशो वृद्धपुरुषवत् । लसितो मनोज्ञो यो गुड ईक्षुरसक्वाथस्तेन रम्यः । पक्षे लकारेण सितो बद्धः, सहित इत्यर्थः, यो गुडः लगुडः, दण्डस्तेन रम्यः तथा । शकलकटयुक्तः कश्चित् पुरुषः शाकटिकवत् । शकलश्चासौ कटश्च शकलकटस्तेन युक्तः । पक्षे शकटयुक्तः । तथा सततगोत्रस्थितिः पृथ्वी कुटुम्बवत् । सततं गोत्रस्थितिः पर्वतस्थिति, यत्र सा तथा । पक्षे सकारेण तता विस्तीर्णा, वस्तुतः सहिता, गोत्रस्थितिर्यत्र तत् तथा । सगोत्रस्थितिः स्वजनस्थितिः तथा । पुरो हसितपटयुक्तः उद्घोषकपुरुषवत् । पुरोऽग्रे हसितोऽर्थात् शोभितो यः पटस्तेन युक्तः । पक्षे पुरोऽग्रे हकारेण सितो बद्धो यः पटः पुरुषः पटहस्तेन युक्तः तथा । क्षमोदितपणस्थितिः धूनकृत् तपस्विवत् । क्षमायां उदिता पणस्थितिर्यस्य स तथा । पक्षे क्षकारेण मोदितानि पणानि क्षपणानि तपांसि, तेषां स्थितिर्यस्य स तथा । कोपपद इत्यादिषु–क उपपदे यस्य स कोपपदः । कोपः १. टोपः २. रोपः ३. लोपः ४. कूपः ५. भूपः ६. यूपः ७. उरूपः ८. इत्यादि ज्ञेयम् ।

का. क. अथ वर्णाकर्षणेन श्लेषप्रकारान्तरमाह––

अकार्कागाग्र्याग्राघार्घार्घ्यार्चार्च्यार्चिरच्छाजाब्जाः ।
अज्ञाटाद्याट्टाण्यण्वत्रात्यतोऽत्यथार्थोऽथो ॥४०॥

अक अर्क अग अग्र्य अग्र अघ अर्घ अर्घ्य अर्चा अर्च्य अर्चिः अच्छ अज अब्ज अज्ञ अट अद्य अट्ट अणि अणु अत्र अति अतः अति अथ अर्थ अथो ।

अदोऽद्रिरब्दोऽधोऽर्द्धाध्वाध्यनोऽन्वन्या अपाप्यवि ।
अर्वावाभ्यभ्राम्यमू अमार्यायेऽयमय्ययाः ॥४१॥

अदः अद्रि अब्दः अधः अर्ध अध्व अधि अनः अनु अन्य अप अपि अवि अर्व अव अभि अभ्र अमी अमू अमा अर्या अये अयं अयि अयः ।

अरमरुररेर्यरास्त्राल्पाल्यलमश्वाश्रवोऽश्रिरसौ ।
अश्वास्वहो अहरहमर्हाह्यक्ष्यक्षा विवर्जितविहीनौ ॥४२॥

अरं अरुः अरे अरि अर अस्त्र अल्प अलि अलं अश्व अश्रु अश्रि असौ अश्र असु अहो अहः अहं अर्ह अहिः अक्षि अक्ष ।

अखिलान्यूनाजस्रानन्ताभीक्ष्ण्याधिकापरापाराः ।
अतुलानेकानल्पाशेषासक्तानघामदादभ्राः ॥४३॥
अहहामरासुराद्या इत्यकारादयो हि ये ।
योजयेत् तान् यथौचित्यं वर्णाकर्षणहेतवे ॥४४॥

एते ह्यन्येऽपि द्व्यक्षरास्त्र्यक्षराश्चतुरक्षराः वा अकारादयः शब्दानामादौ वर्णाकर्षणाय प्रयोज्याः । श्लेषो भवति यथा––अककमलशाली, पक्षे मलशाली । अच्छच्छगणशाली, पक्षे गणशाली । अलङ्केशयुक्तः, पक्षे केशयुक्तः इत्यादिशब्दा ज्ञेयाः ।

ककीकुकूखखुगगौघोचचाचिचयस्तथा ।
जातातोस्थिददादूधधीननीपापपौपुपूः ॥४५॥
स्फस्फावावीववेवैभभाभारोशूशसाससू ।
सीहहाहीक्षक्षाक्षीक्षौ एतेषां रहितः पुरः ॥४६॥

एतेषां वर्णानामग्रे रहितशब्दः प्रयोज्यः । करहित-कीरहितेत्यादि । एतैः शब्दैर्वर्णा आकृष्यन्ते । करहित-कमलशाली, पक्षे मलशाली । कीरहितबन्धुकीयुतः, पक्षे बन्धुयुतः, इत्यादि ज्ञेयम् ।

स्मेरज्वरस्वरस्मरद्वारस्थावरतुषारमुख्यानाम् ।
पारावारादीनां रान्तानामग्रतो हितो योज्यः ॥४७॥

यथा–स्मेरहित, ज्वरहित इत्यादि । स्मरहितस्मरणशाली, पक्षे रणशाली । इत्याद्यूह्यम् । एवमन्येऽपि शब्दाः। यथा–अहीनं, अलङ्कृतं, नूनम् ।

लकारान्तलाकारान्तशब्दानामग्रे नोदशब्दः प्रयोज्यः, तथा उपपदे कृतरचितादिशब्दाः प्रयोज्याः । यथा–कृत-तापनोदः, रचितचापनोदः ।

अथ श्लेषसाधकाः ककारान्ताद्याः ककारादिप्रमुखाश्च शब्दा लिख्यन्ते । यथा––

नाक[1] निष्क पिक काक शुक बक पङ्क भेक घूक स्तोक अलिक पुलक अंशुक गर्भक ताटङ्क हंसक कृपिक कर्पक कौतुक श्यामाक नरक कलङ्क नन्दक तारक करक गुह्यक विपाक अलीक कटक स्थानक स्तबक बन्धूक गण्डक आहक चन्द्रक तर्णक व्यालीक विटङ्क जालक स्वस्तिक मणिक पथिक हतक लग्नक नाविक गणक कविक समीक अनीक फलक बन्धूक पृथुक दारक जनक अम्बक तिलक अलक नालिक रजक मालिक लुब्धक स्फोटक आर्द्रक माक्षिक पातक तलक उदक अधिक मस्तक वर्नोक अङ्गारक अपवरक उच्छीर्षक प्राघुणक वनीपक दौवारिक आरालिक प्रबोधक विशेषक भयानक रणरणक वैकटिक । एषामग्रे––आकर कर कल करि कपि कवि कम्र कशा कन्या कर्ण कच कफ कपालि कदर्य कपर्द कलङ्क कदली करञ्ज कमठ कमल कदम्ब कपट करवीर कवचन कमण्डलु करवाल कर्णधार कम्बु कङ्गु कण्डू कन्द कङ्काल कन्धरा कङ्कट कम्बल कन्दर कन्दर्प कङ्कण केवलि कोल कोयष्ठि कोष कौपीन केलि केतु केशव कोदण्ड केश केदार कोद्रव कैरव केसर ।

चक्र तक्र वक्र शक्र शुक्र नक्र शुक्ल । अग्रे––क्रोड क्रतु क्रव्य क्लेश क्लम क्रोधन क्रमेलक क्रकच ।

राका शङ्का लङ्का कालिका बलाका बालिका ऊर्मिका नासिका तारका कृत्तिका उत्कालिका ।
अग्रे––कासि काय काकु काञ्ची काक काम कान्ता काण्ड कामि काच कारु कारा काकोल कापेय कासर कानन कान्तार काञ्चन काश्यपी कारण कातर कासार ।

नाकि पिनाकि वातकि वर्द्धकि श्रीवृक्षकि प्रचलाकि । अग्रे––किल किरण किंशुक किसलय किङ्कर ।

शुकी पिकी बन्धकी वल्लकी आमलकी । अग्रे––कील कीर कीनाश कीलाल ।

काकु रङ्कु न्यङ्कु शङ्कु । एषामग्रे––कुल कुच कुश कुट कुक्षि कुम्भि कुण्ड कुन्त कुण्डल कुन्तल कुशीलव कुरबक कुलवधू कुलाल कुहर कुवेणी कुरङ्ग कुलीना ।

मुख मख पुङ्ख नख सुख दुःख शङ्ख । अग्रे––खर खनि खग खश खर्जु खल खलीन खद्योत खचित खण्ड खञ्जन खञ्ज ।

शिखा शाखा रेखा लेखा परिखा विशाखा । अग्रे––खानि खात ।

सखि सखी––अग्रे अखिल खिल । आखु––अग्रे खुर ।

१. विभिन्नेषु पुस्तकेषु शब्दक्रमः अत्रतत्र असमानः ।

तुङ्ग स्वर्ग रङ्ग मुङ्ग मङ्ग वङ्ग पूग खग छग छाग राग याग वेग रोग उरग नाग भोग युग पुरोग तडाग तरङ्ग पन्नग रथाङ्ग भुजङ्ग चतुरङ्ग अङ्गराग शताङ्ग अनुग।

म. टी. अथ वर्णाकर्षणेन——

श्लेषप्रकारो यथा–अकार्का इति अस्मिन् श्लोके षट्विंशतिशब्दाः सन्ति । द्वितीयश्लोके पञ्चविंशतिशब्दाः सन्ति। तृतीयश्लोके द्वाविंशतिशब्दाः सन्ति । प्रथमश्लोके अणिः अग्रविभागः, अणुः सूक्ष्मः । द्वितीयश्लोके अमासहार्थे अर्यः स्वामिवैश्ययोः । तृतीयश्लोके विवर्जितविहीनशब्दावपि वर्णाकर्षणहेतू ज्ञेयौ । उदाहरणानि यथा——अककमलशाली ग्रीष्मतडागो मुनिवत् । कं पानीयं, कमलं पद्मं, ताभ्यां शालते इत्येवंशीलः कमलशाली, न ककमलशाली अककमलशाली। पक्षे न विद्यते ककारो यत्र एवंविधः कमलशाली अककमलशाली मलशालीत्यर्थः । तथा अच्छगणशालीछ गोष्ठानप्रदेशः ईश्वरवत्। अच्छानि यानि छगणानि तैः शाली । पक्षे न विद्यते छकारो यत्र एवंविधः छगणशाली गणशालीत्यर्थः । तथा अलं क्लेशयुक्तः क्रोधी मस्तकवत् / अलं अत्यर्थं, क्लेशयुक्तः । पक्षे अलं लवर्जितं यथा स्यात् तथा । क्लेशयुक्तः केशयुक्त इत्यर्थः, इत्यादि ।

अथ प्रकारान्तरेण श्लेषसाधकशब्दा यथा——नाकः स्वर्गः १. निष्कः सुवर्णं २. पिकः कोकिलः ३. काकशुकबक-पङ्काः प्रसिद्धार्थाः ७. भेकः दर्दुरः ८. घूकः काकारिः ९. स्तोकः अल्पः १०. अलिकः ललाटं ११. पुलकः रोमाञ्चः १२. नरक १३. कलङ्क १४. नन्दक १५. नारकाः प्रसिद्धार्थाः १६. करकः घनोपलः १७. गुह्यकः यक्षः १८. विपाकः सिद्धान्तभेदः १९. अलीकं मृषावादः २०. कटकः केयूरं २१. स्थानकं प्रसिद्धं २२. स्तबकः गुच्छकः २३. बन्धूकः मध्याह्नविकासी वृक्षविशेषः २४. गण्डकः प्रसिद्धः २५. जाहकः सेहलु इति जीवः २६. चन्द्रकः कर्पूरः २७. तर्णकः वत्सः २८. व्यलीकं विप्रतारणं २९. विटङ्कः कपोतपाली ३०. जालकः क्षारकः ३१. स्वस्तिकः ३२. मणिकः अलिञ्जरः गढु इति प्रसिद्धिः[द्धः] ३३. पथिकः ३४. हतकः व्यापादितः ३५. लग्नकः प्रतिभूः ३६. नाविकः खलासीओ इति प्रसिद्धः ३७. गणकः जोसी ३८. कविकः खलिनं ३९. समीकं संग्रामः ४०. अनीकं कटकं ४१. पृथुकः बालकः ४२. दारुकः काष्ठं ४३. जनकः ४४. अम्बकं नेत्रं ४५. अलकः कुटिलकेशः ४६. तिलकं ४७. गर्भकः केशमध्यगतं माल्यं ४८. ताडङ्कः ताडपत्रं ४९. हंसकः नूपुरं ५०. कृषिकः हालिकः ५१. कर्षकः करसु इति मानविशेषः ५२. कौतुकं ५३. श्यामाकः धान्यविशेषः सामु इति प्रसिद्धिः[द्धः] ५४. मालिकः वनमाली ५५. रजकः ५६. जालिकः जालकारकः ५७. लुब्धकः धीवरः ५८. स्फोटकः गण्डः ५९. आर्द्रकः शृङ्गबेरं ६०. माक्षिकं माक्षिकं मधु ६१. पातक ६२. तलक ६३. उदक ६४. अधिक ६५. मस्तक ६६. वनौकः । ओकशब्द अकारान्तोऽप्यस्ति तेन वनौको वानरः ६७. अंगारकः अंगारु इति प्रसिद्धिः[द्धः]६८. अपवरक ओरडु इति प्रसिद्धः ६९. उच्छीर्षकः ओसीसु इति प्रसिद्धः ७०. प्राघूर्णकः ७१. वनीपकः याचकः ७२. दौवारिकः प्रतीहारः ७३. आरालिकः सूपकारः ७४. प्रबोधकः मागधः ७५. विशेषकः तिलकं ७६. भयानको रसविशेषः ७७. रणरणकः। औत्सुक्यं ७८. वैकटिकः मणिकारः ७९. । एतेषां शब्दानामग्रे आकरकरकल-प्रभृतिशब्दा योज्याः। तत्र करी गजः, कसा चर्मवस्त्री नाडीदि प्रसिद्धिः, करञ्जस्तु नक्तमालः, कवचः सन्नाहः, कदनं विनाशः, करणं इन्द्रियं, कबन्धः मृतकं, कमठः कच्छपः, कदम्बो वृक्षः, करवीरः हयमारो वृक्षः, कवचनः उत्तमः, करवालः खड्गः, कर्णधारः नाविकः, कण्डूः खर्जूः, कन्दुरिति पाठे कढाईओ इति प्रसिद्धिः । कंकालः अस्थिपञ्जरः, ककरः सन्नाहः, कोयष्टिः पक्षिविशेषः, के[कौ]पीनं वस्त्रं कच्छोट5 इति प्रसिद्धिरित्यादि । उदाहरणानि यथा–सुनाका करसंशोभी श्रेष्ठी देवगणवत् । अत्र कं सुखं, अकरः कराभावोऽदण्ड इति यावत् । कंचा करश्च काकरौ, ताभ्यां संशोभते इत्येवंशीलः काकरसंशोभीः । कथम्भूतः सुनाशोभन पुरुष इत्यर्थः । पक्षे सुशोभनो नाकः स्वर्गः, स एवाकर उत्पत्तिस्थानं, तेन संशोभी । तथा निष्कारणसुखशाली सिद्धो धनिकवदत्र निष्कारणं निर्हेतुकं, शाश्वतं यत्सुखं तत्र शालते इत्येवंशीलः निष्कारणसुखशाली। पक्षे निष्कं सुवर्णं, अरणसुखमक्लेशसुखं, ताभ्यां शाली। तथा सदापि कलसच्छोभी वसन्तः सज्जनवत् । सदा निरन्तरं, पिकैर्लसन् पिकलसन्, शोभते इत्येवंशीलः शोभी; पिकलसंश्चासौ शोभी च पिकलसच्छोभी । पक्षे सदापि कला

मनोज्ञाश्च ते मन्तश्च, तेषु शोभी । तथा पूर्णा काकपिकरवैर्वाटिका गिरितटीवत् । काकाश्च पिकाश्च काकपिका, स्तेषां रवैः शब्दैः, पूर्णा । पक्षे पूर्ण अङ्को मध्यभागो, यस्यां सा तथाकैः । कपय एव कपिका, स्तेषामारवैः शब्दैः । तथा शुकविभ्राजितान्तरं वनं नृपास्थानवत् । शुकाश्च ते वयश्च शुकवय,स्तैर्भ्राजितं शोभितं, अन्तरं मध्यं, यस्य तत् तथा । पक्षे शसयोरैक्यात् सुकविभिः शोभनकविभिर्भ्राजितमन्तरं यस्य तत्तथा । तथा भूयो वकभ्रविभवं यमुनाजलमथवा पक्व-धान्यं वनवत् । भूयांसो बका यत्र तत् । तथा रविभवं सूर्यप्रभवं तज्जन्यत्वात् । तथा भूयस्यश्च ता आपश्च भूय आपः । भूयोद्भिरकभ्रो विभवः सम्पद् यत्र तत्तथा । पक्षे भूयांसो वाः वायवः, तैः कभ्रो मनोज्ञो, विभवो यस्मिन् तत् तथा । निरस्तपङ्कसारङ्गं काननं रेवातटवत् । निरस्तपङ्का निष्पापाः, सारङ्गा मृगा, यस्मिन् तत्तथा । पक्षे निर्गतपङ्का निष्कर्दमा, अर्थान्निर्मलाः सारङ्गा गजा यस्मिन् तत्तथा । तथा भेकन्याससमाकुलः कासारः कातरसङ्ग्रामवत् । भेका दर्दुरा,स्तेषां न्यासो निवेश,स्तेन समाकुलः । पक्षे भेका भीरव,स्तेषां न्यासः स्थापनं, तेन समाकुलः । तथा सदा स्तोकचयप्रीतिः सज्जनो घनवत्, सदा निरन्तरं, अस्तोकानां अर्थात्सर्वेषां लोकानां चये समूहे प्रीतिर्यस्य स तथा । पक्षे स्तोकचयश्चातकसमूह,स्तस्य प्रीतिर्यत्र स तथा । तथा सदालिकर्णप्रमोदकृत् उत्तमः अधमवत् ।

सतां पण्डितानां, आलिः श्रेणिस्तस्याः कर्णानां प्रमोदकृत् हर्षकृत् । पक्षे सदा नित्यं, अलिकं कूटं, यद् ऋणं तेन प्रमोदं कृन्ततीति सदालिकर्णप्रमोदकृत् । तथा विपुलकपालीहृरवत् तटाकभूमिः । विपुलं विस्तीर्णं, कपालं यस्य सा तथा । पक्षे विपुला विस्तीर्णा, पाली सेतु,र्यस्यां सा । तथा अनया दिशा सर्वत्रोदाहरणानि ज्ञेयानीति ।

तथा चक्रतक्रादिशब्दानामग्रे क्रोशक्रोडप्रभृतयः शब्दा योज्याः । तत्र शुक्रं वीर्यं, नक्रं नासिका, क्रोडो मध्यं, क्रतुः यज्ञः, क्रव्यं मांसं, क्लेशः खेदः, क्लमः परिश्रमः, क्रमेलकः उष्ट्रः, क्रकचं करपत्रकं करवत इति प्रसिद्धिः इत्यादि ।

तथा राकाशङ्कादिशब्दानामग्रे कासिकायप्रमुखाः शब्दा योज्याः । तत्र राका पूर्णिमा, लङ्का नगरीविशेषः, कालिका कृष्णादेवी वा, ऊर्मिका मुद्रिका, कृत्तिका नक्षत्रं, उत्कलिका कल्लोलः, ओकलीतिप्रसिद्धिर्वा, काशीर्वाराणसी नगरी । कायः शरीरं, काकुः ध्वनिविशेषः, काञ्ची कटिमेखला, कारा गुप्तगृहं, काकोलो विषविशेषः, कापेयं मद्यं, कासरः महिषः, काश्यपी भूमिः, कासारः सरोवरम् ।

तथा नाकिपिनाकिप्रमुखशब्दानामग्रे किल किरणाद्याः शब्दा योज्याः । तत्र नाकिनो देवाः, पिनाकी ईश्वरः, वानकी वातरोगी, वर्द्धकी सूत्रधारः, श्रीवृक्षकी अश्वः, श्रीवत्सो लाञ्छनं यस्य स श्रीवृक्षकी, प्रचलाकी मयूरः ।

तथा शुकीपिकीप्रभृतिशब्दानामग्रे कीरकीलादि शब्दा योज्याः । तत्र बन्धुकी कुलटा, वल्लकी वीणा, आमलकी क्रीडाविशेषः, कीला ज्वालाकी, नाशो यमः, कीलालं जलं, इत्यादि ।

[तथा] काकुप्रमुखाणामग्रे कुलकुञ्चादिशब्दा योज्याः । तत्र काकुर्ध्वनिविशेषः, रंकुर्मृगभेदः, न्यंकुर्हरिणः, शंकुः कीलकः, कुशीलवः वारणस्तु कुशीलवः कुरबकः वृक्षः, कुहरः गर्त्ता, कुवेणी मत्स्यबन्धनी, कुरङ्गो मृगः ।

म. टी. तथा मुखमखादीनामग्रे खरखानि प्रमुखाः शब्दा योज्याः । तत्र मखो यज्ञः, पुंखः बाणपृष्ठं, खनिः खाणि इति प्रसिद्धा ।

भुजग अध्वग उत्तरङ्ग कलिङ्ग सारङ्ग । अग्रे—गदा गज गति गद्य अङ्गद गर्भगद गरल गल गर गजराज गजारोह गङ्गा गण्ड गन्ध आगन्तु गोधा गौर गोसर्ग गौधेय गोधन गाङ्गेय गौरव ।

सुरङ्गा आपगा निम्नगा । अग्रे—गान गात्र अगाध ।

भङ्गि भोगि । अग्रे-गिरि । भुजगी । अग्रे—गीति ।

पङ्गु कङ्गु प्रियङ्गु । अग्रे—अगुरु गुरु गुह ।

आगू । अग्रे—गूढ गूह गूहनम् ।

आग: रुग् वाग् त्वग् स्रग् ईदृग् प्राग् अवाग् द्राग् । अग्रे–अग्नि ।

अग्र व्यग्र समग्र उदग्र मण्डलाग्र । अग्रे–ग्राव घोर अघ घस्मर घनरस ।

जङ्घा । अग्रे–घाट घास ।

व्याघ्र । अग्रे––आघ्राण ।

प्राज्ञ यज्ञ अभिज्ञ क्षेत्रज्ञ दैवज्ञ प्रज्ञा अवज्ञा प्रतिज्ञा रसज्ञा । अग्रे––ज्ञाति ज्ञानि ज्ञान ।

नीच काच कुच कच उच्च रोमाञ्च वचस् । अग्रे––चक्र चय चमू चर चरु अचल आचमन चरण चपल अञ्चल चञ्चल चल ।

काञ्ची वीची शची प्राची विपञ्चि घृताची । अग्रे––चीर चीवर ।

चञ्चु पिचु । अग्रे-चुम्बक ।

चञ्चु । अग्रे––चूडा चूत चूर्ण ।

पिच्छ पुच्छ अच्छ गच्छ स्वच्छ तुच्छ । अग्रे––छवि छल छत्र छग छद छगल अच्छभल्ल ।

इच्छा वाञ्छा । अग्रे––छात्र छाग छादन । मुञ्ज गुञ्ज अण्डज राज वाज ध्वज भुज खञ्ज बीज अम्बुज व्रज व्याज लाज मुरज करञ्ज नीडज आत्मज उरसिज क्षतज समाज गजराज सरसिज मलयज । अग्रे––जल जन जपा जव जय जरा जगत् जङ्घा जम्बीर जङ्घाल जगति जवन जगर जघन अजगर जवनिका ।

रुजा लज्जा भुजा प्रजा गिरिजा । अग्रे––जाहक जानु जार जाति जात जाया जाल जागुड जाबाल जागर जालक जातरूप जातमात्र ।

राजि आजि वाजि वनराजि । अग्रे––अजित जित जिन ।

राजी । अग्रे––जीवन जीव जीरक जीवा ।

ऋजु । अग्रे––ज्वाला ।

झञ्झा । अग्रे––झष झम्पा झावुक ।

वात वीत भूत वित्त गीत चूत मत्त गर्त्त धूर्त भीत अहित मृदत कुन्त सुत तात दन्त चित्त प्रोत जात नत द्रुत अश्रान्त आचित एकान्त श्वेत सित पीत सङ्गीत प्रभात अनृत हरित पर्वत राजत कङ्कत दुर्गत उत्कण्ठित उपवीत लम्बित विधौत प्रदात सैकत प्रपात निशात निशित शुद्धान्त सामन्त हसित सूरत मणित नापित भरत पारत चेष्टित विभात उचित उन्नत आयत ऐरावत नवनीत प्रक्षालित अपहस्तित अपवारित अनवरत । अग्रे––तप तर तनु तनू अन्तर तरी तमी तम तरु तर्क इतर तन्त्र तण्डुल तत्पर तनय आतपत्र तरङ्ग तडाग तमिस्र तर्णक तरुण तरङ्गिणी तरुखण्ड तरवारि तारेण तेजित तोय ।

मरुत् हरित् शरत् पतत् उपानत् उपविशत् असुहृत् क्षुत् द्विषत् सर्पत् शश्वत् बृहत् संसत् चिता कान्ता लता वासिता देवता वनिता । अग्रे––तात ताल ताम्र तारा तापिच्छ ताटङ्क ताम्बूल ताम्रचूड तामरस ताडपत्र ।

म. टी. तथा मुखमखादीनामग्रे खरखानि प्रमुखाः शब्दा योज्याः । तत्र मखो यज्ञः, पुंखः बाणपृष्ठं, खनिः खाणि इति प्रसिद्धा ।

खगः पक्षी । खशः पामाषस इति प्रसिद्धा । खर्जुः खरजुआं इति प्रसिद्धिः ।

(तथा) शिखादीनामग्रे खानिखातौ योज्यौ । तत्र खातं सरः ।

तथा सखिसखीशब्दयोरग्रे अखिलखिलशब्दौ योज्यौ ।

तथा आखुशब्दाग्र खुरशब्दो योज्यः ।

तथा तुङ्गस्वर्गादीनामग्रे गदागजप्रभृतिशब्दा योज्याः । तत्र रङ्गो नाट्यस्थानं, मङ्गः वेडाशिरः, वंगं त्रपुः, पूगः समूहः, पूगी फलदो वा, रथाङ्गः चक्रवाकः, अङ्गरागो विलेपनं, शताङ्गो रथः, अनुगः सेवकः, भुजगः सर्पः, अध्वग पथिकः ।

(तथा) उत्तरङ्गः द्वारशाखा सुरङ्गादीनामग्रे गात्रगानप्रमुखाः शब्दा योज्याः । तत्र सुरङ्गा भुवोन्तरे गूढमार्गः, आपगा नदी ।

तथा भङ्गिभोगिशब्दयोरग्रे गिरिशब्दो योज्यो, भुजगीशब्दाग्रे गीतिशब्दो योज्यः, तथा पङ्गुप्रियङ्गुशब्दयोरग्रे अगुरुगुरुशब्दौ योज्यौ, तथा आगूशब्दाग्रे गूढगहनशब्दौ योज्यौ । तत्रागू प्रतिज्ञा । तथा आग आदीनामग्रे अग्निशब्दो योज्यः । तत्र आगः अपराधः ।

तथाऽव्यग्रसमग्रादीनामग्रे ग्रावाद्या योज्याः । तत्र उदग्रः उत्कटः, मण्डलाग्रः तरवारिः तथा ।

अथ मेघादीनामग्रे घनघोराद्या योज्याः । तथा जंघाग्रे घाटघासौ योज्यौ । तथा व्याघ्राग्रे आघ्राणो योज्यः । तथा प्राज्ञयज्ञादीनामग्रे ज्ञातिप्रमुखा योज्याः ।

तथा नीचकाचादीनामग्रे चत्राद्या योज्याः । तत्र चरुः हव्यपाकः, अचला भूमिः, आचमनं चलु इति प्रसिद्धं । तथा लञ्चाग्रे चारुप्रमुखा योज्याः । तथा शुचिरुचिशब्दयोरग्रे चित्या चिताद्या योज्याः । तथा काञ्चीविच्यादीनामग्रे चीरचीवरौ योज्यौ । तत्र विपंची वीणा, घृताची इन्द्राणी । तथा चञ्चुपिचुशब्दयोरग्रे चुम्बको योज्यः । तत्र पिचुः कर्पासः । तथा चञ्चू अग्रे चूडाचूतचूर्णा योज्याः । तथा पिच्छादीनामग्रे छविप्रमुखा योज्याः । तथा इच्छावांछाग्रे छात्राद्या योज्याः ।

तथा मुञ्जगुञ्जादीनामग्रे जलजनाद्या योज्याः । तत्र गुञ्जः भाण्डागारः, मुरजो मृदङ्गः, नीडजः पक्षी, आत्मजः अङ्गजः उरसिजः । ततः क्षतजं रुधिरं, समाजः सभा, मलयजः चन्दनं, जपाजवाजासू इति पुष्पविशेषौ, जंघालो ऽतिजवः जवनः, त्वरिते वेगे, जगरः सन्नाहः, अजगरः सर्पः, जवनिका परिपच्छि इति प्रसिद्धा ।

तथा रुजालज्जादीनामग्रे जाहकप्रमुखा योज्याः । तत्र जागुडं कुङ्कुमं, जाबालः अजापालः ।

तथा राजिवाजिप्रमुखाणामग्रे अजितजितादिशब्दा योज्याः । तथा राजीशब्दाग्रे जीवनजीरकादिशब्दा योज्याः । तथा ऋजुशब्दाग्रे ज्वालाशब्दो योज्यः ।

तथा झंझाग्रे झषाद्या योज्याः । तत्र वृष्टिसहितवायुः झंझा झषो मत्स्यः झावुकः निम्बः ।

तथा वातवीतादीनामग्रे तपतराद्या योज्याः । तत्र राजतं रजतस्य समूहो राजत, कङ्कतः कांकसओ इति प्रसिद्धः । दुर्गतः दरिद्रो, उपवीतं यज्ञसूत्रं जनोयीति प्रसिद्धं । सैकतं तटं निशान्तः ।

का. क. कृत्ति श्रुति ज्ञाति पत्ती हेति व्रति यति मति गति जाति रीति क्षिति स्तुति रति पूति नुति नति भ्रान्ति दुर्गति कण्डूति अराति पदाति पक्षति व्रतति श्रान्ति विप्रीति आशापति प्रजापति ध्वाङ्क्षाराति अभिजाति । अग्रे—तिल तिमि तिमिर तिरोहित।

छत्र छात्र मित्र पुत्र पत्र गात्र श्रोत्र यन्त्र नेत्र गोत्र पात्र यत्र अत्र तन्त्र दात्र क्षेत्र अरित्र क्षत्र पवित्र परतन्त्र ताडपत्र आतपत्र । अग्रे—त्रस्त त्रपु त्रपा ।

यात्रा वरत्रा । अग्रे—त्रास ।

रात्रि । अग्रे—त्रिक त्रिगुण त्रिफला त्रिशङ्कु त्रिदश ।

अमात्य नित्य वात्या चित्या । अग्रे––त्याग ।

सत्त्व-अग्रे––त्वरी ।

सती अर्हती वासन्ती मालती भारती युवती । अग्रे––तीर तीव्र ।

सेतु केतु हेतु ऋतु आगन्तु धातु । अग्रे––तुष तुच्छ तुला ऋतु तुहिन तुम्बरी तुरग तुरङ्गम तूर्ण तूप तुल तुङ्ग तुन्द ।

नद नाद कन्द छद मद मन्द सूद क्षोद गुद नुद अङ्गद अगद खेद भेद छेद स्कन्द धनद प्रमाद स्वच्छन्द दोहद कलाद विनोद मकरन्द अरविन्द । अग्रे––दव दम दनु दरी दल दक्ष दशा दद्रु दह दश दर दया उदक उदधि उदग्र उदश्र दर्भ दक्षिण दमन दहन दम्भ दण्ड दण्डि दन्त दोला देह देव देश दास दोष दौवारिक ।

गदा गोदा सदा सर्वदा क्षणदा नर्मदा । अग्रे––दानव दारुण दान्त दाम दाम दान दासी दार दात्र ।

नन्दि वन्दि आदि सादि मांसादि हीनवादि । अग्रे––दिन दिवा दिवस दिति आदि आदित्य आदिम ।

वेदी नन्दी कालिन्दी । अग्रे––दीन दीप दीक्षित उदीरण ।

कन्दु बिन्दु इन्दु । अग्रे––दुली दुस्थ दुःख दुहिता दुकूल ।

अन्दू । अग्रे––दूर दूरा दून दूरमणी ।

म. टी. तीक्ष्णीकृतं, शुद्धान्तः अन्तःपुरं, मणितं रतकूजितं, पारतः पारदः, तरी बेडा, तमी रात्रिः, तेजितः उद्योतितः ।

तथा मरुत्प्रमुखाणामग्रे तातताल‍ाद्या योज्याः । तत्र हरित् दिग् क्षुत् छिक्वा संसत् सभा, तापिच्छः तमालः, ताडंकः ताडपत्रं कर्णाभरणं ताम्रचूडः कुर्कुटः, तामरसं महोत्पलम् ।

तथा कृत्तिश्रुत्यादीनामग्रे तिलतिमिप्रमुखा योज्याः । तत्र कृत्तिः चर्मश्रुतिः, कर्णः हेतिः, प्रहरणं, ध्वांक्षारातिः, घूकः, अभिजातिः कुलं । तथा छत्रादीनामग्रेऽत्र सूत्रपुत्रपाद्या योज्याः । तथा यात्रात्ररत्राग्रे त्रासो योज्यः । तथा रात्रि-शब्दाग्रे त्रिकाद्या योज्याः ।

तथा अमात्यादीनामग्रे त्यागशब्दो योज्यः । तत्र वातानां समूहो वात्याचित्या चिता । तथा सत्त्वाग्रे त्वरीशब्दो योज्यः ।

तथा सतीप्रमुखाणामग्रे तीराद्या योज्याः । तत्र अर्वती वडवा वासन्ती माधवीलता ।

तथा सेतुप्रभृतीनामग्रे तुषाद्या योज्याः । तूपं घृतं, तूर्णं त्वरितं, तुन्दमुदरं ।

तथा नदनादादीनामग्रे दवदमाद्या योज्याः । तत्र नदः ह्रदः, सूदः सूपकारः, क्षोदः चूर्णं आदु इति प्रसिद्धः (द्धं ?) गुदः अधोद्वारं । अम्बुद इत्यत्र अर्बुद बुद्बुद इत्यपि पाठः । अङ्गदः बाहुभूषणं, बहिरखु इति प्रसिद्धः । अङ्गदो नीरोगो, भेषजं वा, कलादः स्वर्णकारः, दनुः दानवपिता, दरी गुहा, दौवारिकः प्रतिहारः ।

तथा गदादीनामग्रे दानवाद्या योज्याः । तत्र गोदा नदीविशेषः, क्षणदा रात्रिः, नर्मदा नदीविशेषः, दात्रं दातरडुं इति प्रसिद्धम् ।

का. क. रुद्र मद्र भद्र क्षुद्र शूद्र दद्रु छिद्र सान्द्र हारिद्र दरिद्र वैद्य सद्य । अग्रे––द्वार द्युति द्रव्य द्राक्षा द्विषि द्वीपि द्विरद द्रुत द्रोह द्विषत् ।

वृद्ध युद्ध क्रोध व्याध आयुध अगाध न्यग्रोध समिद्ध समृद्ध अविद्ध अवरोध अपरोध अपविद्ध । अग्रे––अन्ध धन धरा ऊधः ऊधस्य अधः धेनुः धनुः अन्धः धव धवल अधर धाराधर ।

सन्धा क्षुधा मेधा गोधा सुधा अभिधा द्विधा राधा अभिधा । अग्रे—धाना धान्य धातु धार आधार ।

उदधि व्याधि आधि अवधि निधि सन्धि विधि । अग्रे—अधिप अधिपति अधिभू अधिकृती अधिरोहिणी ।

सुधी । अग्रे—धी धीर धीवर अधीश । सिन्धु अन्धु सीधु साधु विधु । अग्रे—धुनी धुर्य धुरीण ।

वधू । अग्रे—धूप धूः धूलि धूसर धूमयोनि ।

अध्व रन्ध्र साध्य । अग्रे—ध्वान्त ध्वान ध्वाङ्क्ष ध्वनि अध्व अधि अध्यक्ष ध्वाङ्क्षाराति ।

घन धन जिन गान दिन ध्वान वन दान जन पीन हीन दान स्नान यान अञ्जन मीन फेन भुग्न मान उन्न सन्न स्तन अनः धनुः मनः एनः ग्रथन कर्तन कल्पन समान आसन्न पाठीन तुहिन अजिन वामन जीवन मोहन दर्शन रदन आलिङ्गन मण्डन नयन आनन सूदन प्रस्थान वाहन स्यन्दन उपायन स्पर्शन अपान शालीन क्रोधन सज्जन कोपन जनन अनून आसन उल्लोचन आयतन ईशान मदन प्राचीन मज्जन छदन दशन आलीजन जघन खञ्ज-जन मन्थन बन्धन भवन मोहन अनवधान प्रतिमान नरवाहन वातायन वेत्रासन अध्वनीन अभिवादन सिंहासन व्यापादन आच्छादन सारसन निभालन । अग्रे—नभ नग नर नल नख नक्र नदी नद नत नव नव्य नेत्र नेपथ्य एनः नौ नर्मदा नक्षत्र नखर आनन नगर नरदेव नवनीत ।

अवधान ध्यान धाना अङ्गना मेना वासना देशना यातना रसना प्रार्थना घटना वर्णना पूतना । अग्रे—नाग-नाश नाशानारी नाम नाद नाना नाहल नारद आनाय नासिका नाविका ।

मुनि ध्वनि अवनि खनि खानि अटनि योनि धूमयोनि । अग्रे—निशा निधि अनिश निभ निःस्व नित्य निर्वेद निहित नितान्त निबद्ध निखिल निश्चित निकार निरस्त निचित निवह निकाय निधन निकर निरय निदान निध्यान ।

अनिमिष निखात निदाघ नियति निकुञ्ज निगड निलय निश्रेणि निकेतन निवसन निभालन निरवग्रह ।

धुनी जननी वनी जनी कठिनी कामिनी भामिनी सेनानी वर्द्धिनी दामिनी भवानी मानिनी वाहिनी । अग्रे—नीर नीवी नीली नीप नीव निध्र अनीक नीहार नीवार ।

म. टी. नन्दिप्रमुखाणामग्रे दिनाद्या योज्याः । तत्र नन्दिः द्वादशतूर्यनिर्घोषः, सादी अश्ववारः, मांसादिः मांसभक्षकः, हीनवादी तुच्छवाक्, दितिः दैत्यमाता ।

तथा वेदी प्रमुखाणामग्रे दीनाद्या योज्याः । तथा बिन्दुकन्द्वादीनामग्रे दुली प्रमुखा योज्याः । तत्र बिन्दुर्वारि-कणः, निन्दुर्नश्यत्प्रसूतिकादुली कच्छपी, दुर्दिनं मेघवमः ।

तथा अंदू अग्रे दूराद्या योज्याः । तत्र दूरमणी दुष्टा रमणी । तथा रुद्रादीनामग्रे द्वारयुतिद्रव्याद्या योज्याः । तत्र दद्रुः रोगविशेषः, द्राद्र इति प्रसिद्धिः (द्रुः) । तथा बुधादीनामग्रे अन्धः धनाद्या योज्याः । तत्र न्यग्रोधः वटवृक्षः, अवरोधः अन्तःपुरं, ऊधः दुग्धस्थानं, ऊधस्यं क्षीरम् । तथा सन्धादीनामग्रे धानाद्या योज्याः । तत्र संधा प्रतिज्ञा, गोधा गोह इति प्रसिद्धा ।

तथा उदध्यादीनामग्रे अधिपप्रमुखा योज्याः । तत्र अभिधाशब्दव्यापारो नाम च । व्याधिः शारीरी पीडा, आधिर्मानसी पीड़ा, अवधिर्मर्यादा ज्ञानविशेषश्च, अधिपो नृपः, अधिभूः स्वामिवाचकः, अधिरोहिणी निश्रेणिः । तथा सुधी अग्रे धीराद्या योज्याः ।

तथा अन्धुप्रमुखाणामग्रे धुनीप्रमुखा योज्याः । तत्र अन्धुः कूपः, सिन्धुः समुद्रः, सीधु मद्यं, साधुः सज्जनो मुनिश्च धुनी नदी ।

तथा वधू अग्रे धूपाद्या योज्याः । तत्र धूमयोनिर्मेघः ।

तथा अध्वादीनामग्रे ध्वान्ताद्या योज्याः। तत्र रन्ध्रं छिद्रं, ध्वानः शब्दः, ध्वांक्षाः काकः, अध्यक्षः प्रत्यक्षः, ध्वांक्षारातिः घूकः ।

तथा धनधनादीनामग्रे नभःनगाद्या योज्याः। तत्र यानं युग्यं, मीनो मत्स्यः, फेनो डिण्डीरः, भुग्नं वक्रं, उन्नं क्लिन्नं, सन्नः खिन्नः, सूनं पुष्पं, अनः शकटं, एनः पापं, पाठीनो मत्स्यविशेषः, तुहिनं हिमं, अजिनं चर्म, प्रस्थानं गमनं, वाहनं यानं, स्यन्दनो रथः, उपायनं ढौकनं, आपानं पानगोष्ठी, शालीनोऽधृष्टः, सरल इति प्रसिद्धः; क्रोधनः अमर्षणः, जननं जन्म, अन्नः सम्पूर्णः, आसनं स्थानं, ईशानः शिवः, मज्जनं स्नानं, छदनं पत्रं, आलानः गजबन्धनस्तम्भः, जयनं जयः, खञ्जनः पक्षिविशेषः, मन्थानः रवाईओ इति प्रसिद्धः, भवनं गृहं, अनवधानः असावधानः, प्रनिमानं कादूलकः, पार्श्ववर्ति पासंग इति प्रसिद्धं, नरवाहनो धनदः, वातायनो गवाक्षः, वेत्रासनं आसनविशेषः मांचीति प्रसिद्धिः, अध्वनीनः पथिकः, अभिवादनं वन्दनं, व्यापादनं विनाशनं, सारसनं कटिमेखला, निभालनं विलोकनं, नदो ह्रदः, नेपथ्यः वेषः, क्षुद्रः लघुनासिकः, नरदेवः चक्रवर्ती, नवनीतं म्रक्षणं, नखरायुधः सिंहः ।

तथा धानासेनादीनामग्रे नागाद्या योज्याः । तत्र पूतना राक्षसी, नाहलः पुलिन्दः, आनायः मत्स्यजालं।

तथा मन्यादीनामग्रे निशाद्या योज्याः । तत्र अटनिः ज्याया अग्रभागः, निभं कपटं, निस्वः निर्धनः, निर्वेदः स्वावमाननं, निहितः न्यस्तः, निकुञ्जः कुञ्जनिकुञ्जकुडङ्गाः, निकारः पराभवः, निरस्तः, तिरस्कृतः, निधनं मरणं, निदानं कारणं, निध्यानं विलोकनं, अनिमिषः देवः, निदाघः उष्णकालः, नियतिः भवितव्यता, निगडः आठील इति प्रसिद्धः, निःश्रेणी नीसरणि इति प्रसिद्धा, निकेतनं गृहं, निरवग्रहः स्वेच्छाचारी ।

का. क. जानु तनु सूनु सानु भानु दनु कृशानु । अग्रे--नुति अनुग अनुक्रम अनुपदी अनुचर अनुशय अनुकूल अनुताप अनुक्रोश अनुजीवी ।

तनू । अग्रे—नून नूतन नूपुर ।

धन्य धान्य स्तन्य शून्य राजन्य कन्या । अग्रे—न्यस्त न्यास न्यङ्कु न्यञ्चित न्यग्रोध ।

शाप पुष्प सर्प द्विप पूप तूप रूप कूप भूप सूप चाप वाप ताप पाप विलाप कच्छप लोलुप अधिप मण्डप मधुप कलाप पादप अङ्घ्रिप अनेकप अवलेप अन्तरीप उपलाप उपजाप । अग्रे—परु पर्ण पशु पवि पशुपति पक्षि पल्ली प्रबोधिक प्रधि प्रस्थान प्रधन प्रास प्रवह प्रकट प्रचार प्रतिलोम प्रसभ प्रतारण ।

शिव भव देव दाव हाव जीव स्तव ग्राव पीव आजीव क्षीब जव आहव धव रव लव नव पूर्व दानव वाडव केशव वासव विभव ताण्डव पणव शराव मानव पार्थिव बल्लव नरदेव पौरोगव कुशीलव बान्धव राजीव गौरव श्रव। अग्रे—बक वशा वयः अवधि वपु वसु अवनि बल्ली बलि बल वधू अम्बर अम्बक वस्त्र वपा वसा वर आवली अवज्ञा वनौकः अवयव वर्द्धनी वसुधा वकोट बदरी बकुल वत्सर वषट् वडवा अवस्कन्ध अवरोध वदन वन्य अवकीर्ण अवलेप अवलक्ष अवसर वर्तुल वनराजि वर्धमान वसुमती वनीपक आवरण।

रेवा ग्रीवा जीवा दिवा वडवा । अग्रे—वारी वार्ता वात्या वात वायु वामा वाद वाजि वाह बाल बाहु वासव वारि वार वामन बान्धव बालक आवास वानर बालिश वाहिनी वासिता वागुरा वारण वानीर वाडव आवाल।

अवि कवि रवि पवि मेधावि मायावि । अग्रे—विप्र विश्व बिल विधु विभा विधि अवि विन्दु बिस वितर्क विटङ्क विदेह विगान विबुध विशाख विकल्प विसाय वियोग विश्वास विपरीत विसर विपक्ष विग्रह विकल विदग्ध विरोधि विवाह विभीत विवर विभ्रम अविरत विशाल विनोद विक्रम विरह विहार विकट विदुर विचिकित्सा विचरण विरोचन विनायक विचक्षण वितरण विकर्तन विशारद।

नीवी पदवी अटवी देवी । अग्रे—वीर वीची वीरुध् ।

अम्बु कम्बु अलाबू जम्बू । अग्रे—बुध बुस । द्रव्य भव्य गव्य हव्य तीव्र क्रव्य सव्य मृगव्य । अग्रे—व्याज व्रात व्रज व्याल व्याधि व्रती व्याघ्र व्योम व्याहार व्याकुल व्रतति व्यजन व्यञ्जन वाञ्छा आवेश वेग वेदी वेश वेष्टित विकक्ष वेत्रासन वैश्रवण वैतालिक वैकटिक वैरोचन ।

दम्भ निभ आरम्भ शुभ डिम्भ आलम्भ वल्लभ लोलुभ करभ करम्भ वृषभ कलभ शलभ उपालभ्य नभः। अग्रे—भव भर भस्म भय भद्र भव्य इभ उभय भरत भक्षण भवन आभरण भासित भविक भयानक भोजन भोगि अम्भ भैरव भङ्गि भेद।

शोभा सभा रम्भा विभा प्रभा जम्भा प्रतिभा । अग्रे—भाजन भानु भाषा भार्या भामिनी भारती भारत भावुक।

नाभि कुम्भि सुरभि । अग्रे—भिल्ल भिक्षु भिक्षा भिदा अभिधा अभिज्ञा अभिजाति अभिभव अभिनव अभिप्राय अभिवादन।

वलभी अतिभी । अग्रे—भीम भीरु भीत आभीर।

विभु प्रभु शम्भु । अग्रे—भुज भुजा भुवन भुजङ्गम।

अतिभू प्रतिभू सहभू भू । अग्रे—भूत भूमि भूरि भूत भूः ।

श्वभ्र शुभ्र अदभ्र, बभ्र, लभ्य। अग्रे-अभ्यास भ्रान्ति भ्रुकुटि भ्रमि भ्रम भ्रमर ।

म. टी. तथा वपादीनामग्रे पापाद्या योज्याः तत्र वपा मेद जपा जासू इति पुष्पं, क्षपा रात्रिः, पामा रवसः, आपानं पानगोष्ठी, पावनं पवित्रम् ।

तथा कपिप्रमुखाणामग्रे पिकाद्या योज्याः। तत्र कपिः वानरः, द्वीपी व्याघ्रः, क. . .मयूरः, पिचुः कर्पासः, पिशितं मांसं, पिशुनः नीचः, पिधानमाच्छादनं, पिशंग कर्बुरः, पिहो (हि) तमाच्छादितं, पिनद्धः पिङ्गलः कपिशः।

तथा वापीप्रमुखाणामग्रे पीनाद्या योज्याः। तत्र काश्यपी पृथिवी, पीवरः पीनः, आपीडः शेखरः।

तथा रिपुप्रमुखाणामग्रे पुन्नागाद्या योज्याः। तत्र पुन्नागो वृक्षविशेषः, पुष्करं पयः कमलं च।

तथा वप्राद्यानामग्रे प्रहराद्याः शब्दा योज्याः। तत्र क्षुरप्रः बाणभेदः, प्रस्थः चतुर्भिः कुडवैः, प्रस्थः प्रसूरः पाषाणः, प्रततिः लता, प्रवासितः विदेशगतः प्राजनं पराणु इति प्रसिद्धं, प्राग्रं प्रधानं[1], प्रग्रहो मरीचिः, प्रकाण्डं प्रधानं, प्रान्तरं दूरशून्योऽध्वा, प्रपा पानीयशाला, प्रकोष्ठः पडुंचु इति प्रसिद्धः प्रच्छदः ओढणु इति प्रसिद्धः (द्धं ?), प्रबोधकः प्रबोधकृत, प्रधिः चक्रधारा, प्रथनं विस्तारः, प्रसभं हठः, प्रतारणं विप्रतारणम् ।

तथा शिवादीनामग्रे बकाद्याः शब्दा योज्याः। आजीवो वृत्तिः, क्षीवः उत्कटः, जवो वेगः, आहवः सङ्ग्रामः, लवो लेशः, वाडवो विप्रः, केशवो मुरारिः, वासवः इन्द्रः, विभवो द्रव्यं, ताण्डवं नाटकं, पणवः पटहः पल्लवः गोपालः कुशीलवः चारणः, श्रवः चारणः, श्रवः कर्णः, वप्ता पिता, अम्बकं नेत्रं, अवस्कन्दः प्रपातस्त्वभ्यवस्क[illegible], अवकीर्णं अवध्वस्तं, अवलक्षः श्यामः ।

तथा रेवादीनामग्रे वारीप्रमुखा योज्याः। तत्र रेवा नर्मदा, वारी गजबन्धनभूः, वात्या वातानां समूहः, बालिशो मूर्खः, रा मृगजालं, वानीरो वेतसवृक्ष, आवालः याणुं इति प्रसिद्धम् ।

तथा अविप्राणामग्रे विप्राद्या योज्याः। तत्र विगानं वचनीयता, विशायः अनुक्रमः, निसरः समूहः विग्रहः शरीरं, विदुरो निपुणः, विचिकित्सा संशयः, विरोचनः रविः, वितरणं दानम् ।

---

१. 'प्रहरं मनोहरं' इति ला.म पुस्तके अधिकम् ।

तथा नीवीप्रमुखाणामग्रे वीराद्या योज्याः। तत्र नीवी वासोग्रन्थिः पाटलीति प्रसिद्धा, वीरुधलता।

तथा अम्बुप्रमुखाणामग्रे बुधाद्या योज्याः तथा द्रव्यादीनामग्रे व्याजाद्या योज्याः तत्र व्यालः सर्पः, व्याहारः वचनम्। तथा दम्भादीनामग्रे भवाद्या योज्याः। तत्र डिम्भो बालः, करम्भः कबरो मिश्रः, शलभः पतङ्गः। तथा शोभादीनामग्रे भाजनाद्या योज्याः तत्र जृम्भा बगाई इति प्रसिद्धा, भारतं भरतशास्त्रम्।

तथा नाभिप्रमुखाणामग्रे भिल्लाद्या योज्याः। तत्र अभिजातिः कुलीनः, अभिनयः हस्तकदर्शनम्।

तथा वलभी अतिभी अग्रे भीमाद्या योज्याः। तथा विभुप्रमुखाणामग्रे भुजगाद्या योज्याः। तथा अतिभूप्रमुखाणामग्रे भूपाद्याः शब्दाः योज्याः।

तथा श्वभ्रादीनामग्रे अभ्यासाद्या योज्याः तत्र श्वभ्रं पातालं, भ्रमिः भ्रान्तिः।

का. क. काम सीम धूम वाम लोम नाम हेम द्रुम ग्राम सीम दाम पद्म अधम क्षम रोम क्षौम हिम सद्म स्तोम धाम तम युग्म भीम क्षाम स्थाम आदिम आयाम मध्यम विषम कलम उपयाम आराम अर्यम प्लवङ्गम भुजङ्गम तुरङ्गम। अग्रे-मस्तु मति मख मनः मल महः मद मयुः मरु अमर मोक्ष मेरु मेधा मौलि मांसादी मेखला मोहन मोदन मेघ मण्डन मङ्गल मद्गु महानिशा महानस महाबल महासेन महाध्वज मलयज मदन मनुज मत्सर महिला मसूर आमय मरण मकर मधुकर मङ्क्षु मन्द मन्द्र मञ्जीर मन्दार मण्डल मन्दुरा।

यामा रामा वामा क्षमा रुमा उमा सीमा। अग्रे-मानस माया माला मारस माक्षिक मालिक मारण मानव मार्जन मार्ग मारुत मातलि मार्तण्ड अमात्य।

तिमि कामि स्वामि भूमि। अग्रे-मिष आमिष मित्र।

तमी शमी। अग्रे-मीन मीमांसा।

चमू। अग्रे--मूक मूढ मूल।

भय रय लय प्रिय हय काय तोय चय नय हृद्य अन्हाय आम्नाय आमय आनाय अङ्गुलीय उत्तरीय अन्तराय वलय विलय विषय कुलाय गाङ्गेय समुदय। अग्रे-यम यक्ष यति यज्ञ यशः यज्वा आयत्त अयः। वयः पयः। अग्रे-योग योध योनि आयोधन। पर पति पल पक्ष पयः पत्रि पत्र पवन पल्लव उपहास उपक्रोश अपवाद उपकार पयोद पक्कण उपचार उपधान उपवीत उपपत्ति उपसर्प उपयाम पयोधर अपवरक परवश परतन्त्र अपत्रप उपताप उपजाप उपचर्या परेत पन्नग आपगा। उपकण्ठ अपविद्ध उपक्रम अपदेश अपज्ञान अपकार परुष अपवारित अपहस्तित पङ्गु पङ्क पञ्च पञ्जर पांशु पांसुल पेशल पौरोगव पञ्चानन।

म. टी. निध्यानं विलोकनं, अनिमिषः देवः, निदाघः उष्णकालः, नियतिः भवितव्यता, निगडः आठील इति प्रसिद्धः, निःश्रेणिः नीसरणि इति प्रसिद्धा, निकेतनं गृहं, निरवग्रहः स्वेच्छाचारी।

तथा धुनीवन्यादीनामग्रे नीलाद्या योज्याः। तत्र वनी वनं, कटिनी खटी, वर्द्धनी गर्गरी, दामनी पशुबन्धनं, वाहिनी नदी मेना च; नीपः कदम्बवृक्षः, नीध्रं नेत्रं इति प्रसिद्धं, अनीकं कटकं, नीहारः हिमं, नीवारः वनव्रीहिः।

तथा जानुप्रमुखाणामग्रे नुतिप्रमुखा योज्याः। तत्र सानुः शृङ्गं, दनुः दानवपिता, कृशानुः वन्हिः, अनुगः सेवकः, अनुपदी पगी इति प्रसिद्धः, अनुचरः सेवकः, अनुशयः अनुतापश्च पश्चात्तापवाचकौ, अनुक्रोशः दया, अनुजीवी सेवकः।

तथा तत्र तनू अग्रे नूतनाद्या योज्याः। तथा धन्यादीनामग्रे न्यस्ताद्या योज्याः। तत्र स्तन्यं दुग्धं, राजन्या राजानः क्षत्रिय इत्यर्थः, न्यंचितं अधःक्षिप्तं, न्यग्रोधो वटः।

तथा शापादीनामग्रे पर्याया योज्याः। तत्र वापो वपनं, विलापः परिदेवनं, लोलुपः रसिकः लोलप्रीति प्रसिद्धः, कलापः समूहः, अंहिपो वृक्षः, अनेकपो गजः, अवलोपः अहंकारः, अन्तरीपं जलमध्ये द्वीपं, उपजापः पुनर्भेदः, प(पु)रुर्वश, पर्वपविः वज्रं, पक्ष्म नेत्ररोमपल्लिः भिल्लादिवासः, पलं मांसं, पत्री बाणः, पक्कणः शबरावासः, उपचारः ढौकनं, उपवीतं यज्ञसूत्रं, उपपतिः जारनः , उपयामः विवाहः, अपत्रपो निर्लज्जः, परुषः कठोरः, पांसुः धूलिः, पांसुला असती, पौरोगवः, सूदाध्यक्षः।

का. क. वपा त्रपा प्रपा जपा क्षपा शिशपा अपत्रपा । अग्रे-पाप पाणि पात्र पामा पाशा पाली उपान्त उपाधि उपानत् पाताल पाथित्र पामर अपान पावन पावक उपायन पार्वती पाणिग्रह पारिजात पादरक्षण परिरक्षित।

कपि लिपि द्वीपि कलापि । अग्रे-पिक पिच्छा पिशित पिश्रान पिचु पिप्पल पिनाक पिशङ्ग पिहित पिनद्ध पिङ्गल पिण्ड।

वापी काश्यपी । अग्रे-पीन पीडा पीत पीवर पाठ आपीड।

रिपु त्रपु वपु । अग्रे-पुन्नाग पुष्कर पुष्प पुर पुरा पुट पुत्र पुरी पूर पूत पूल पूज्य अपूप पूः पून पुनः पुरुष पूजि पूजित पूरित पूर्णायुः।

वप्र विप्र क्षिप्र क्षुरप्र कम्प्र । अग्रे-प्रहर प्रदोष प्रहेला प्रस्थ प्रस्तर प्रतति प्रवासित प्राजन प्राग्र प्राज्य प्रस्तावन प्रग्रह प्रकाण्ड प्रवाल प्रहार प्रान्तर प्रजा प्रकार प्रपा प्रमदा प्रकृति प्रमुख प्रभूत प्रांशु प्रपञ्च प्रकोष्ठ प्रच्छद प्राज्ञ प्रवीण प्राकृत प्राघुणक प्रार्थना प्रेत प्रवर प्रकाम प्रकर प्रभावती प्रिय प्रधान प्राभृत दया जाया माया मृगया। अग्रे-यादः यात्रा यान याग याम आयाम यावक।

गोमायु मायु वायु मृगयु शुभंयु अहंयु । अग्रे-युग युगल युव आयुध युगन्धर।

सुर पुर अमर असुर अधर हर नर स्मर चर चार कर खुर पर वीर सूर नीर तीर आभीर गम्भीर आहार द्वार क्षार क्रूर धीर वर जार दूर हार वैर शर दार वीर सार अक्षर अन्तर दर अम्बर स्थिर गर पूर आधार चार वार अधीर गौर आचार बन्धुर कडार पाण्डुर अनादर सत्वर सुन्दर रुचिर मधुर उत्कर विसर कुलीर अकूपार तुषार शिशिर रुधिर बधिर शबर वटार कोटीर शेखर अलङ्कार कूर्पर अधर उदर कुटीर मुद्गर मुखर नरवर समर सङ्कर अनुचर।

वत्मर कूबर मन्थर दासेर उदार इतर पीवर चतुर शृङ्गार नगर भ्रमर सिन्धुर कुञ्जर कान्तार आकार कन्दर मर्मर तिमिर चामर अङ्गार किन्नर समीर कोविदार कर्णिकार हयमार करवीर चकोर वैश्वानर पयोधर शतधार दामोदर प्रतीहार युगन्धर निधिकर मणिकर पारावार नालिकेर । अग्रे—रवि रति रश्मि रक्षा रक्ष रव रथ रथ रमा रक्त रस उरग रमणी रचित रहित रक्षित आरक्ष आरनाल आरभट रम्भा रङ्ग रंहू रन्ध्र आरम्भ।

मुद्रा जरा धारा तारा धरा कीरा पुरा धुरा धारा शिरोधरा । अग्रे—राज राग राहु रामा राका रात्रि आराम राशि राजी राव राक्षस आराधन आरालिक राजीव राजयक्ष्मा अरात्रिक।

सूरि हारि वारि वैरि भूरि करि गिरि हरि अरि स्तम्बकरि तरवारि । अग्रे—रिपु अरित्र रिक्त अरि।

नारी वारी तरी सुरी पुरी दरी शर्वरी करीरी बदरी कर्करी सुन्दरी नागरी गोदावरी । अग्रे—रीति।

रुरु, चारु कारु भीरु चरु परु तरु मेरु अगुरु शरारु वन्दारु । अग्रे—रुचि रुजा रुद्र रुरु रुचिर रुषा रूप रूक्ष।

नरः उरः सरः पुरः। अग्रे—रोधः रोम रोग आरोह रोमाञ्च।

कल मूल पूल चल तल दल वल हल नल क्रोड कोल गण्ड तूल शाल उपल किल खिल अनल नाल चण्डमाल स्थाल भाल कुण्डल खल लोल आमल कुल शील वाल पिण्डगल तुण्ड मुण्ड चेल अञ्चल आपीड फल तिल बिल रुण्ड व्याल जल कूल जाल आकुल स्थल आवाल वर्तुल गल उच्चण्ड कराल शबल धूमल कपिल पिङ्गल श्यामल पटल पाटल धवल लगुड बहल युगल यमल मृदुल चपल चापल तरल चटुल पेशल मञ्जुल शैवाल गरल समल कङ्काल पाताल चण्डाल कुलाल वृषल लाङ्गल कुन्तल ताम्बूल मूलक त्रिकाल सरल जङ्घाल कुशल वत्सल छगल बिडाल मार्तण्ड मण्डल मङ्गल वल्कल पिचुल कूष्माण्ड करवाल आखण्डल अनाविल आलवाल महाबल । अग्रे—लक्ष-लव लता लक्ष्म लटा अलस लगुड लज्जा अण्ड अल आलय आलस्य आलवाल लक्षण ललाट लहरी ललाटिका लवणिमा लोहलोल लोहित लेश लेखा लम्पट लङ्का अलङ्कार लञ्चा लव उम्बर आलम्भ ।

तथा कामादीनामग्रे मस्नुप्रमुखा योज्यास्तत्र क्षौमः(मं) पट्टकूलं, क्षामः गतबलः स्थामबलं, उपयामः पाणिग्रहणं, प्लवङ्गमः वानरः, मस्तु दधिमण्डं मखः यज्ञः, मयुः किन्नरः, मन्दुरा वाजिशाला ।

तथा यामादीनामग्रे मानाद्याः तथा तिमिप्रमुखाणामग्रे मीनाद्याः तथा चमू अग्रे मूकाद्याः तथा भयादीनामग्रे यमाद्याः शब्दा योज्याः । तत्र अह्नाय शीघ्रं, आनायः मत्स्यजालं, अङ्गुलीयं मुद्रिका, विलयः, विनाशः, कुलायः नीडः, आयतं दीर्घम् ।

तथा दयादीनामग्रे यादःप्रमुखा योज्याः तत्र यादः जलजन्तुः यावकः अलक्तकः ।

तथा गोमायुप्रमुखाणामग्रे युगाद्या योज्याः । तत्र गोमायुः शृगालः मायुः पित्तं मृगयुर्व्याधः शुभंयुः शुभसंयुक्तः अहंयुः अहंकारवान् युगन्धरं कूबरम् ।

तथा सुरादीनामग्रे रविरतिप्रमुखा योज्याः । तत्र कुलीरः जलचरः, अकूपारः समुद्रः, समरः सङ्गरश्चरणवाचकौ । दासेरः दास्या अपत्यं, समीरः पवनः, कोविदारः कर्णिकारः, हयमारश्च वृक्षविशेषः, पारावारः समुद्रः, आरभटः सुभटः ।

तथा मुद्रादीनामग्रे राजाद्या योज्याः । तत्र राजयक्ष्मा क्षयरोगः, आरात्रिकं आरति इति प्रसिद्धिः ।

तथा सुरिप्रमुखाणामग्रे रिपुप्रमुखा योज्याः । तथा नारीप्रमुखाणामग्रे रीतिशब्दो योज्यः । तथा कुरुप्रमुखाणामग्रेरुचि-प्रमुखा योज्याः । तथा नरः शिरः प्रभृतीनामग्रे रोधाद्या योज्याः ।

का. क. पाली धूली नीली स्थाली वल्ली आपली पल्ली स्थली पली कली देहली खुरली पत्रपाली पत्रवल्ली नाग-वल्ली । अग्रे—लीला लीन ।

कलण्डलू कण्डू । अग्रे—लून लूता ।

दश कुश वंश केश पाश खश नाश लेश अनिश आवेश अधीश वश देश कर्कश बालिश कलश पलाश गिरिश ओषधीष परवश । अग्रे—शर शस्त्रिका शक शशी शची शत अशन शत्रु शय शकट शराब शरण शकुन्त शबल शकुन्ति शङ्का शङ्ग शवल शङ्कर शैल शोभा अभ्र अश्रु श्मश्रु श्रग् ।

विश्व प्रश्न । अग्रे—श्रान्त श्रोत्र अश्व श्रवः श्रुति अश्रु शुभ श्वेत ।

दशा निशा आशा महानिशा । अग्रे—शारद शालि शान्त आशा शाल शाखा शाप शात शालीन ।

शशि वशि । अग्रे—शिव शिरः शिशु शिखा शिति शिरट शिखण्ड शिरोधरा ।

काशी आशीः । अग्रे—शील शीकर शीतल शीत ।

आशु शिशु पशु परशु । अग्रे—शुक शुभ शुचि शुभ्र अंशुक शूल शूद्र शूकर शूकल ।

विष तुष झष मिष आमिष महिष पुरुष । अग्रे—षडास्य ।

हास मास घास दास ध्वंस वास आवास अलस प्रास अंस मांस रस बिस त्रास विश्वास समास साध्वस मानस तापस लालस पायस सारस विलास राक्षस अन्धतमस कालायस कलहंस घनरस तामरस । अग्रे—सभा सती सव्य सद्यः असकृत् सम सदृक् सरः सस्य सखी सखि सख्य अंसल आसन सकल सत्वर सतत समान सवन सदन सज्जन सनाभि सगोत्र सपिण्ड समास समूह समुद्र सत्तम सनीड सदेश समुद्ग सभाजन सहृदय सगर्भ सवास सन्तत सन्देह संहति सन्दोह सङ्ग्राम संयम सन्दान सङ्कुल संवेग संभ्रम संरम्भ सन्धान सन्धा सन्धि सेतु सैकत सेना सेवक सौवीर सोपान सोम ।

नासा हिंसा कासा रसा । अग्रे—सार्ध सानु सादि साल साधु साध्वस सारङ्ग सारस साकल्प सारसना ।

असि । अग्रे—सित असिपुत्री असिधेनु सिन्धु सिन्दूर सिंहासन ।

दासी सारसी सरसी । अग्रे—सीर सीधु सीमन्त ।

तपस्वि । अग्रे—स्वर स्वर्ण स्वच्छन्द स्वामि स्वान्त सूत्र सूनृत सूद सूर सूरि सूपकार ।

सुस्थ दुस्थ अस्थि कायस्थ । अग्रे—स्थाल स्थाली स्थली स्थपुट स्थपति स्थापक स्थाम स्थान स्थेम स्थैर्य ।

अगस्त्य अगस्ति अवध्वस्त व्यस्त त्रस्त समस्त वस्तु । अग्रे—स्तोत्र स्तुति स्तव स्तन्य स्तबक आस्तरण स्तन स्तोम स्तोक स्तम्बकरि ।

शस्त्र अस्त्र वस्त्र । अग्रे—अस्त्र स्त्री ।

अजस्त्र अस्त्र अस्त्रि अश्रु । अग्रे—अस्त्र ।

लास्य वयस्य हास्य आस्य सस्य रहस्य । अग्रे—स्मर स्मरण आस्य ।

वसु विभावसु । अग्रे—सुत सुकृत् सुख सुधी सुरा सुर सुरत सुरङ्गा सुमनः सुवर्ण सुपर्ण सुन्दरी सुदर्शन ।

कुह गुह लेह सिंह रहः वाह देह ग्राह आरोह सन्नाह कलह विरह कटाह वराह पटह गन्धवह गजारोह समारोह । अग्रे—हर हरि हय हव्य हस्त हल हसित आहव हयमार रहः रंहः अहः अंहः अहंयुः हंस अहङ्कार हत हन्तृ हेला हेति हेलि हेतु हेम हेरिक होम ।

गुहा विदेहा ईहा स्पृहा । अग्रे—आहार हाला हारि हार हास हास्य हारिद्र ।

अहि व्रीहि बर्हिः ग्राहि दाहि । अग्रे—हिङ्गु हिंसा हिम हित अहित अहि आहित हिमानी हिङ्गुल ।

मही वाही । अग्रे—हीन हीनवादी ।

राहु बाहु बहु । अग्रे—हुत हुड आहुत ।

गुह्य बाह्य । अग्रे—ह्यस्तन ।

मोक्ष यक्ष आरक्ष पक्ष अध्यक्ष दक्ष कक्ष प्लक्ष ध्वाङ्क्ष अक्ष गवाक्ष वैकक्ष विपक्ष कटाक्ष वलक्ष । अग्रे—क्षय क्षमा क्षम क्षेत्र अक्ष अक्षर उक्ष क्षपण ।

राक्षा रक्षा द्राक्षा लाक्षा आकाङ्क्षा । अग्रे—क्षार क्षाम क्षान्त क्षालित ।

पक्षि कुक्षि अक्षि साक्षि । अग्रे—क्षिति अक्षि क्षीर क्षीब ।

रक्षो वक्षो । अग्रे—क्षोद क्षोभित ।

भिक्षु भक्षु चक्षु तरक्षु । अग्रे—क्षुद्र क्षुधा क्षुर प्रक्षुप ।

पक्ष्म पक्ष्मल राजयक्ष्म लक्ष्मी । अग्रे—क्ष्मा । एवं व्यञ्जनक्रमोऽन्योऽपि ज्ञेयः ।

अथ स्वरादिशब्दक्रमः—

अनिरुद्ध अनिल अहोरात्र अपवर्ग अमृत अपनी अशोक अतिथि अगुरु अवट अजिन अनवरत ।

आकुल आमिष आयति आमय आखेटक आलाप आहार आवाल आकार आलोक ।

इन्धन इन्दु इङ्गुदी इन्द्रावरज ।

ईक्ष ईक्षण ।

उपराग उद्धत उदन्त उपवन उद्गार उदार उत्ताल उदर उदधि उत्पल उत्कर उत्कल उत्तम उद्भट उदित उत्कर्ष उपल उत्प्रास ।

ऊन ऊर ऊह ।

एक एकान्त ।

ऐरावण ऐरावत ।

ओतुः ओजस् ।

अङ्गज अङ्गविक्षेप अम्बर अङ्कुर अङ्कुश अङ्गुलि अम्बक अंशुक अङ्घ्रि अञ्जन अङ्गद अनन्तर अङ्कपाली अन्तर ।

म. टी. इतिश्री जिनदत्तश्लेषसिद्धिप्रताने तृतीये श्लेषव्युत्पादनं नाम प्रथमः स्तबकः ।।

तथा वेलादीनामग्रे लाक्षाद्या योज्याः तत्र हेला लीला पांशु(सु)ला असती स्त्री, वारला हंसी, निष्कला कलारहिता, अलातमुल्मुकं उंबाडिउं इति प्रसिद्धिः । तथा कमण्डलु कण्डु अग्रे लूतलूताशब्दौ योज्यौ । तथा पालिमौलिप्रमुखाणामग्रे लिपिलिविप्रमुखा योज्याः ।

तथा पालीप्रमुखाणामग्रे लीलाद्या योज्याः । तत्र पत्रपाली शस्त्रविशेषः । तथा दशादीनामग्रे शराद्या योज्याः तत्र शकुन्त शकुन्तिश्च पक्षिवाचकौ । तथा अश्वादीनामग्रे श्रान्ताद्या योज्याः तत्र तथादशावशादीनामग्रे शारदाद्या योज्याः तथा राशिप्रमुखाणामग्रे शिवाद्या योज्याः । तथा आशीःप्रमुखाणामग्रे शीलाद्या योज्याः । तथा आशुप्रमुखाणामग्रे शुकशुभाद्या योज्याः । तथा विषादीनामग्रे षडास्यः शब्दो योज्यः ।

तथा हासादीनामग्रे सभाद्या योज्याः । तत्र-प्रासः भल्लः, साध्वसं भयं, पायसं परमान्नं ,सारसः पक्षिविशेषः, कालाय संलोहं । सखीसखिशब्दावेकार्थौ, सख्यं मैत्र्यं, सनीडसदेशौ समीपे, समुद्गः संपुटः, सभाजनमानदन्नं, सहृदयः पण्डितः, सगर्भो भ्राता, । सन्दानं पशुबन्धनं, सन्धानं सन्धिकरणं, सन्धा प्रतिज्ञा, सैकतं तटं, सौवीरं काञ्जिकं ।

तथा नासादीनामग्रे सार्थाद्या योज्याः । तत्र साकल्यं सकलत्वं । सारसनं मेखला । तथा असिअग्रे सिताद्या योज्याः । तथा दासीप्रमुखाणामग्रे सीराद्या योज्याः । तथा तपस्विस्वः शब्दयोरग्रे स्वराद्या योज्याः । तथा सुस्थादीनामग्रे स्थामाद्या योज्याः । तत्र स्थपुटं विषमोन्नते स्थपतिः, गीष्पतीष्ठिकृत् बृहस्पतेर्यज्ञकर्त्तेत्यर्थः । स्थिरस्य भावः स्थैर्यम् । तथा मस्तु-हस्तादीनामग्रे स्तोत्राद्या योज्याः । तथा शस्त्रादीनामग्रे अस्त्राद्या योज्याः । तथा अजस्त्रादीनमग्रे अश्रशब्दो योज्याः । तथा लास्यादीनामग्रे स्मराद्या योज्याः । तथा प्रांशुवसुप्रमुखाणामग्र सुताद्या योज्याः । तथा कुहादीनामग्रे हारद्या योज्याः । त्रत हयमारं करवीरः ।

तथा रहोरंह आदीनामग्रे अहंयुः हंसाद्या योज्याः। तत्र रहः एकान्तः, रंहो वेगः, अंहः पापं, हेरिकः हेरू इति प्रसिद्धः । तथा गुहादीनामग्रे आहारहालाद्या योज्याः। तत्र-गुहादरी, विदेहा सीतामाता, हाला सुरा ।

तथा अहिप्रभृतीनामग्रे हिंगुप्रमुखाः शब्दा योज्याः। तत्र अहितः शत्रुः, आहितः न्यस्तः । तथा महीवाही अग्रे हीनहीनवादीशब्दौ योज्यौ । तथा राहुप्रमुखाणामग्रे हृताद्या योज्याः ।तथा गुह्यादीनामग्रे ह्यस्तनशब्दो योज्यः ।

तथा मोक्षादीनामग्रे क्षप्रक्षयाद्याः शब्दा योज्याः। तत्र प्लक्षः बटः, वैकक्षः उत्तरासङ्गः, वलक्षः श्वेतः, क्षमः समर्थः, उक्षा वृषभः ।

तथा रक्षादीनामग्रे क्षाराद्या शब्दा योज्याः। तथा पक्षिप्रमुखाणामग्रे क्षितिप्रमुखा योज्याः। तथा रक्षोवक्षोऽग्रे क्षोदक्षोभितौ शब्दौ योज्यौ । तथा भिक्षुप्रमुखाणामग्रे क्षुद्राद्या योज्याः। तथा पक्ष्मादीनामग्रे क्ष्माशब्दो योज्यः । इति ककारान्तककारादिप्रभृतिशब्दानां हकारान्तहकारादिपर्यन्तानां व्यञ्जनक्रमः । एवमन्योऽपि च श्लेषसाधनाय बोध्यः। अथ स्वरादिशब्दक्रमो यथा अनिरुद्ध अनल इत्यादि ।।छ।।

इतिश्री तपागच्छाधिनायकपातसाहि श्री अकब्बर प्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री ५ श्री हीरविजयसूरीश्वर शिष्य पण्डित श्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे श्लेषसिद्धिप्रतानप्राप्तश्लेषव्युत्पादनस्तवकोद्योतकः प्रथमः प्रसरः ।।छ।।१

॥३.२॥

अथ सर्ववर्णनम्

का. क. जनितश्लेषसंश्लेषैर्वर्ण्यवर्णादिनामभिः ।
उपमानकृतोल्लासैः साधयेत्सर्ववर्णनम् ॥४८॥

वर्ण्यस्य वर्णाकाराधारक्रियाविधेयानि नामानि, तथा वर्णादिगुणैर्वर्ण्यसदृशानां पदार्थानां नामानि श्लेषार्पितोपमानयुक्तानि कृत्वा सर्ववर्णनं कुर्वीत । यत्रैकेन श्वेतादिशब्देन श्वेतादिपदार्थाः सर्वेऽपि वर्ण्यन्ते तत्सर्ववर्णनम् । यथा–

अहो गौरवसल्लक्ष्मी–
यामिनीकामिनीपतिः ।
सुपर्वपर्वतौपम्य–
भङ्गीमङ्गीकरोत्यसौ ॥

अहो गौरवेत्येकपदेनैव ये केऽपि श्वेतपदार्था भवन्ति, ते सर्वेऽपि वर्ण्यन्ते ।

वर्णादीनां सङ्ग्रहो यथा–

सत्कोणवृत्तलघुलम्बपुराणनव्यवक्रान्तदूरचलनिश्चलदुःसुगन्धाः ।
सूक्ष्मोरुतीव्रपृथुसङ्कटनिस्ससारस्थानप्रभासरसनीरसवामनाः स्युः ॥४९॥

प्रभा श्वेतपीतादिको वर्णः । सत्कोणवृत्तलघुलम्बादिराकारः । स्थानशब्देन स्वर्गाकाशभूमिपातालनदीवनप्रभृतिक आधारः । चलनिश्चलादिकाः क्रियाः । पुराण-नव्य-अन्तर-दूर-दुर्गन्ध-सुगन्ध-निःसार-ससार-सरस-नीरसादिभिराधेयादयः । अमीषां च वर्णादीनां नामानि पूर्वोक्तश्लेषरीत्या सश्लेषाणि क्रियन्ते । पूर्वं श्वेतवर्णशब्दा यथा—

गौरीभूतकलाशाली
परमश्वेतनादृतिः ।
सवीवरसितोल्लासः
परशुभ्रासितोदयः ॥

म. टी. अथ सर्ववर्णनमाह—यत्रैकेन श्वेतादिशब्देन श्वेतादिपदार्थाः सर्वेऽपि वर्ण्यन्ते तत्सर्ववर्णनम् । उदाहरणानि यथा–अहोगौरवसल्लक्ष्मीरिति । अहो इति आश्चर्ये । असौ यामिनीकामिनीपतिश्चन्द्रः सुपर्वपर्वतौपम्यभङ्गीं मेरुपर्वतरचनामङ्गीकरोति । कथम्भूतश्चन्द्रः गौरा उज्व(ज्ज्व)ला वसन्ती लक्ष्मीर्यस्य स गौरवसल्लक्ष्मीः । पक्षे मेरुः । कथंभूत गौरवं महत्त्वं तस्यसल्लक्ष्मीर्विद्यमानशोभा यस्य स तथेति । दुःसुगन्धा इति दुःसुशब्दाभ्यां गन्धशब्दो योज्यते । यथा— दुर्गन्धः सुगन्धश्च । ऊरु—गरिष्ठं । निस्ससारेति—निस्सशब्दाभ्यां सारशब्दो योज्यते, यथा निस्सारः ससारश्च । तत्र प्रथमं श्वेतवर्णशब्दा यथा गौरीति चन्द्रः शिववत् शोभते । कथम्भूतश्चन्द्रः ? गौरीभूता उज्ज्वलीभूताश्च ताः कलाश्च गौरीभूतकला, स्ताभिः शाली । शिवपक्षे गौरी पार्वती, भूतानि च सेवकविशेषाः, कलाश्च चन्द्रलेखा,स्ताभिः शाली । अत्र श्वेतवर्णपदार्थश्चन्द्रः शोभते इति सर्वत्र योज्यम् । तथा परमश्चेत् तादृक् निश्चन्द्रोऽश्ववारवत् । परमा चासौ श्वेतता च, तस्या आदृतिरादरो यस्य स तथा । पक्षे परं केवलं अश्वेतता

विस्तीर्णा आदृतिरादरो यस्य स तथा । तथा सपीवरः सितोल्लासश्चन्द्रो मेघवत्, पीवरः प्रधानो यः; सितोल्लासः श्वेतवर्णोल्लासस्तेन सह वर्तते इति । पक्षे पीवा पीतश्च पीवरः इत्युक्तेः । पीवा पुष्टो लक्षणया मनोज्ञो यो रसितस्य गर्जितस्य उल्लास, स्तेन सह वर्तते यः स सपीवरसितोल्लासः । तथा परशुभ्रासितश्चन्द्रो जामदग्न्यवत् । परं प्रकृष्टं, शुभ्रवर्णः तेनान्वितः । पक्षे परशुरायुधं, तेन भ्रासितः ।

का. क. आदिशब्दादन्येऽपि शब्दा यथा––अधिक गौरवितस्थितिः सुराष्ट्रवत् । प्रिय गौरचिताटोपं बिभ्रत्, भृङ्गवत् । पुरो गौरसाटोपश्रीः, तरुणीवत् । विश्वे तत्त्वमनोहरो, योगिवत् । स्पष्टां श्वेतश्रियं बिभ्रत्, भानुवत् । लोलपश्वेतवैभवः, पशुपालवत् ।

एवं वर्णादिनामश्लेषशब्दाः, सद्गुणपदार्थश्लेषशब्दाश्च बहवो मत्कृतकाव्यकल्पलतापरिमले श्लेषशब्दसमुच्चयात् ज्ञेयाः ।

क्षलवाद्या योज्याःतत्र शबलः कर्बुरः लगुडः यष्टिः, समलः मलसहितः, लाङ्गलं हलं, शुकलः दुर्विनीतोऽश्वः, जङ्घालोऽतिजवः, छगलः छागः, वल्कलं वृक्षत्वकः, पिचुलः निम्बः, अलं वृश्चिकपुच्छम् तत्।

सदग्गुणशब्दा यथा––

अहो चन्द्रकसल्लक्ष्मी-
घनसारश्रियं वहन् ।
सदा नवसुधाशोभी
बिभ्राणो राजतश्रियम् ।।

इति श्वेतवर्णः ।

म. टी. अत्रादिशब्दादन्येऽपि शब्दाः । यथा––अधिकं गौरचितस्थितिः चन्द्रः सुराष्ट्रवत् । अधिकं यथा स्यात्तथा; गौरवर्णेन चिता व्याप्ता स्थितिर्यस्य स तथा । पक्षे कङ्गुधान्यविशेष,स्तमधिलक्षीकृत्य रचितस्थितिः । तथा प्रियं गौरचिताटोपं बिभ्रच्चन्द्रो भृङ्गवत् । प्रियं वल्लभं, गौरेण गौरवर्णेन, चितो व्याप्तो य आटोपस्तम् । पक्षे प्रियंगौ वृक्षे रचिताटोपं तथा । पुरो गौरसाटोपश्रीश्चन्द्रस्तरुणीजनवत् । पुरो अग्रे, गौरा साटोपा, श्रीर्यस्य स तथा। पक्षे पुरोगा अग्रगा ये औरसाः स्तनास्तेषामाटोपस्तस्य तेन वा श्रीः शोभा यस्याः सा तथा । विश्वे तत्त्वमनोहरश्चन्द्रो योगिवत्। वि विशिष्टं, श्वेतत्वं विश्वेतत्त्वं, तेन मनोहरः । पक्षे विश्वे जगति यत् तत्त्वं तेन मनोहरस्तथा । स्पष्टां श्वेतश्रियं बिभ्रत् चन्द्रो भानुवत् ।स्पष्टां प्रकटां, श्वेतश्रियं । भानुपक्षे स्पष्टांशुभ्यः प्रकटांशुभ्य, एता प्राप्ता या श्रीस्तां तथा । लोलपश्वेतवैभवः चन्द्रः पशुपालवत् ।लोला चञ्चला, पा लक्ष्मीरर्थादुदयरूपा यस्य स तथा । पाशब्दस्य लक्ष्मीवाचकत्वं वैश्वदेव्यां प्रोक्तमस्ति । श्वेतवैभवो यस्य स तथा । अत्र पूर्वेण सह कर्मधारयः । कृष्णपक्षे क्षीणकान्तित्वात् लोलान् तृषितान् पातीति लोलपं जलं, तद्वद् श्वेतवैभवो यस्येति वा। पशुपालपक्षे लोला ये पशव, स्तेभ्य एतः प्राप्तो, वैभवो यत्र स तथा ।

सद्गुणशब्दा इति––यैः शब्दैः श्वेतवर्णादिगुणा आकृष्यन्ते तेन सद्गुणशब्दाः । यथा–अहो चन्द्रकसल्लक्ष्मीः । चन्द्रो मयूरवत् चन्द्रवत् कर्पूरवत् कसन्ती विकसन्ती लक्ष्मीर्यस्य स तथा । पक्षे चन्द्रकैः चान्दला इति प्रसिद्धैः, सल्लक्ष्मीर्यस्य स तथा । घनसारश्रियं वहन् चन्द्रो वर्षाकालवत्। घनसारस्य कर्पूरस्य श्रीस्ताम् । पक्षे घनो मेघस्तेन सारश्रीः प्रधानश्रीस्तां तथा । सदा नवसुधाशोभी चन्द्रो नृपवत् ।सदा नूतना या सुधा तद्वत् शोभी शुभ्रवर्णत्वात् । पक्षे सहदानेन वर्तते यः स सदानः । वसुधा पृथ्वी, तया शोभी सदानश्चासौ वसुधाशोभी चेति तथा। बिभ्राणो राजतश्रियं चन्द्रो

ऽमात्यवत् । रूप्यसमूहसदृशश्रियं, तेनात्र 'अदीर्घाद्विरामैकव्यञ्जने' इति सूत्रेण (हे.व्या.१.३.३२) शकारस्य द्वित्वं। पक्षे राजतः भूपालात् इति श्वेतवर्णः ।

अथ रक्तपदार्थः अधिकारुण्यसंशोभी सूर्यो मुनिवत् । अधिकं अरुणस्य भाव आरुण्यं रक्तत्वं, तेन शोभी । पक्षे अधि सामस्त्येन कारुण्यं दया, तेन शोभी तथा । स्फुरन्मांजिष्टवैभवः सूर्यो गांधिकवात् । स्फुरन् माञ्जिष्टो रक्तो वर्णस्तस्य वैभवः सम्पद् यस्य स तथा । पक्षे मञ्जिष्टायाः मजीठ इति प्रसिद्धायाः, नवो वैभवो यस्य स तथा । सदा विराजिताम्रश्रीः सूर्यो वसन्तवत् । सदा विराजिनी ताम्रवत् श्रीर्यस्य स तथा । पक्षे विराजिताम्राणां शोभितचूतानां श्रीर्यत्र स तथा । बहुलोहितवैभवः सूर्यः तार्किकवत् बहुलोहितो बहुरक्तो वैभवो यस्य स तथा । पक्षे बहुलं ऊहितं विचारितं तर्कितं वा, तस्य वैभवो यस्य स तथा । विद्रुमप्रवरच्छायः सूर्यो मरुदेशवत् । प्रवालवत् प्रवरा प्रधाना छाया शोभा यस्य स तथा । पक्षे प्रवरा चासौ छाया च प्रवरच्छाया, द्रुमाणां प्रवरच्छाया द्रुमप्रवरच्छाया, विगता द्रुमप्रवरच्छाया यस्मात् स तथा । प्रवालस्थितिपेशलः सूर्यः शिरोवत् । प्रवालस्थितिवत् पेशलः । पक्षे प्रकृष्टा वालाः केशास्तेषां स्थितिस्तया पेशलं तथा । अशोकश्रीमनोहारी सूर्यो योगिवत् । अशोकनामा वृक्षस्तस्य श्रीः रक्ततारूपा, तया मनोहारी । पक्षे न शोको ऽशोक,स्तस्य श्रीस्तया मनोहारी, तथा । बन्धुजीवनर्द्धिभाः सूर्यः सत्पुरुषवत् । बन्धुजीवनाम पुष्पं, तस्य नवा ऋद्धिर्नवर्द्धि, स्तद्वद् भाः कान्तिर्यस्य स तथा । पक्षे बन्धूनां बान्धवानां, जीवनर्द्धिः जीवितसदृशा ऋद्धिः जीवनर्द्धि,स्तस्या भा यस्मात् स तथा इति, रक्तवर्णः ।

का. क. एवं सर्वत्र गुणशब्दाः सदृग्गुणशब्दाश्च श्लेष्याः ।

अधिकारुण्यसंशोभी स्फुरन्माञ्जिष्ठवैभवः ।
सदाविराजिताम्रश्रीर्बहुलोहितवैभवः ॥
विद्रुमप्रवरच्छायः प्रवालस्थितिपेशलः ।
अशोकश्रीमनोहारी बन्धुजीवनवर्धि भाः ॥

इति रक्तवर्णः ।

अधिकद्रुश्रियं बिभ्रत् कलारचितवैभवः ।
रङ्गत्पिङ्गलतासङ्गी मधुपीतश्रियं वहन् ॥
जातरूपश्रियं बिभ्रत्परागश्रीविराजितः ।
कर्णिकारचितच्छायस्तरणिस्थितिभासुरः ॥

इति पीतवर्णः ।

असितत्वमनोहारी बहुश्यामलतान्वितः ।
स्वभावनीलसल्लीलः सदारामोदितद्युतिः ॥
केशवामोदितच्छायो नदीनश्रीमनोरमः ।
अन्धकारातिरोचिष्णुर्बिभ्रत्कुवलयस्थितिम् ॥

इति श्यामवर्णः ।

नवधूसरसाटोपः सदा शबलसद्द्युतिः ।
विभास्थाधिकपोतश्रीरासभासितवैभवः ॥

इति धूसरवर्णः ।

अथाधारशब्दाः—

स्वर्जनस्थितिरोचिष्णुः स्वर्गलाभकरस्थितिः ।
सदा दिवि हितोल्लासः सुरावासनयान्वितः ॥

इति स्वर्गाधारः ।

सव्योमामङ्गविद्योती सन्नभोगमन[:] स्थितिः ।
अभ्रान्तस्थितिरोचिष्णुः सदाकाशकृतस्थितिः ।।

इति व्योमाधारः ।

स्वयं भूस्थितिविभ्राजीसम्पन्नवसुधास्थितिः ।

म. टी. अथ पीतवर्णपदार्थो यथा––अधिकद्रुश्रियं बिभ्रत् काञ्चनं वसन्तवद्वनवद्वा। कद्रुः, पीतवर्णस्तथा च अधि सामस्त्येन कद्रुश्रियं पीतश्रियं बिभ्रत्पक्षे उभयथाऽपिद्रुणां श्रीःद्रुश्रीः, अधिका चासौ द्रुश्रीश्च, तां बिभ्रत्तया। कलारचितवैभवः सुवर्ण-पुञ्जः चन्द्रवत् डलयोरैक्यात् कडारः पीतवर्णस्तेन चितो व्याप्तो, वैभवो यस्य स तथा पक्षे कलाभिः रचितः वैभवो यस्य स तथा रङ्गत् पिङ्गलतासङ्गी सुवर्णपुञ्जः कमलवत्। रङ्गत् पिङ्गलता पीतता, तस्याः सङ्गी, पीतत्वाश्रयीत्यर्थः पक्षे रङ्गन्ती या पिङ्गलता पीतवल्ली, तत्साङ्गि तथा मधुपीतं श्रियं वहन् सुवर्णपुञ्जः कमलवत् । मधुवत् पीतश्रियं । पक्षे मधुपैः भ्रमरीतः, श्रियं वहन्। तथा जातरूपश्रियं बिभ्रत् कनकाद्रिः, तरुणीजनवत्। जातरूपं सुवर्णं तत्श्रियं शोभां। पक्षे जाता उत्पन्ना रूपश्रीः रूपलक्ष्मीस्तां बिभ्रत्। तथा परागश्रीः विराजितः सुवर्णपुञ्जः शठकान्तवत्। परागः पुष्प-रजस्तद्वत् श्रीस्तया विराजितः। पक्षे परा प्रकृष्टा, या आगःश्रीः अपराधश्रीस्तया विराजितः तथा। कर्णिकारचितच्छायः सुवर्णपुञ्जः सुमुखीमुखवत्। कर्णिकारकुसुमं पीतं, तद्वत् चिता व्याप्ता, छाया शोभा, यस्य स तथा। पक्षे कर्णिकया कर्णाभरणेन रचिता छाया यस्य तत्। तरणिस्थिति भासुरः सुवर्णपुञ्जः समुद्रवत्। मध्याह्ने सूर्यस्य पीतत्वात् तरणिवत् सूर्यवत् स्थितिभासुरः। पक्षे तरणीनां बेडानां स्थित्या भासुरः इति पीतवर्णः ।

अथ श्यामपदार्थो यथा-असितत्वमनोहारी राहुः सुभटवत्। श्यामत्वमनोहारी। पक्षे असितत्वं खङ्गत्वं, तेन मनोहारी तथा। बहुश्यामलताऽन्वितो राहुः वनवत्। प्रचुरकृष्णता तयाऽन्वितो युक्तः। पक्षे प्रचुराश्च ताः श्यामलताश्च कृष्णवल्लयस्ताभिरन्वितं तथा। स्वभावनीलसल्लीलो राहुः सिंहवत्, कविसमये श्यामनीलयोरैक्यात्। स्वभावेन नीला-सल्लीला यस्य स तथा। पक्षे स्वा स्वकीया भा कान्तिस्तयोपलक्षिता अवनी पृथिवी, तत्र लसन्ती लीला यस्य तथा। सदारामोदितद्युतिः राहुः नगरवत्। राजवद्वा रामः श्यामवर्णस्तेन उदितद्युतिः। पक्षे सदा आराम वनानि, तैरुदितद्युतिः, सदा सर्वकालं, रामाभिः स्त्रीभिरुदितद्युतिर्वा; दारैः स्त्रीभिरामोदिता या द्युतिस्तया सह वर्त्तते यः स तथेति वा। तथा केशवामोदितच्छायो राहुः सुकेशीधम्मिल्लवत्। केशववदामोदिता छाया कान्तिर्यस्य स तथा। पक्षे केशैर्वामा प्रकृष्टा, उदिता छाया यस्य स तथा। नदीनश्रीमनोरमो राहुः तेजस्विवत्। नदीनः समुद्रस्तस्य श्रीस्तया मनोहरः । पक्षे नदीन-श्रिया अदीनलक्ष्या मनोहरस्तथा। अन्धकारातिरो विष्णुः राहुः कैलासवत्। नमो वदति रोचिष्णुः दीप्तिमान्। पक्षे अन्ध-कारातिः हरस्तेन रोचिष्णुस्तथा। बिभ्रत्कुवलयस्थितिः राहुर्नृपवत् शेषनागवद्वा कुवलयवत् स्थितिं नीलस्थितिम्। पक्षे कुवलयं भूवलयं, तस्य स्थितिं बिभ्रदिति श्यामवर्णः।

अथ धूसरपदार्थो यथा—नवधूसरसाटोपः पारावतो मुनिवत् । नूतनो यो धूसरो धु (धू) सरवर्णस्तेन साटोपः । अथवा नवा धूसरा, सा लक्ष्मीः, तस्या आटोपो यस्य स तथा प। पक्षे नवधूसरसाटोपः वध्वाः सरसाटोपो यस्य नास्तीत्यर्थः। तथा सदाशबलसद्द्युतिः कपोतः श्मशानवत् नृपवद्वा। सर्वदा शबला कर्बुरा, सद्द्युतिर्यस्य स तथा। पक्षे सदाशवानि-मृतकानि, तैः सद्द्युतिर्यस्य स तथा। शसयोरैक्यात् सदा सबला बलयुक्ता सती, द्युतिः कान्तिर्यस्य स तथा। बिभात्य-धिकपोतःश्रीःरासभः स यांत्रिकवत्। अधिसामस्त्येन, कपोतस्य सदृशा श्रीर्यस्य स तथा। पक्षे अधिक पोतश्रीर्वहनश्री, र्यस्य स तथा। रासभासितवैभवः कपोतो नारीहल्लिसकवत्। रासभवदसितो वैभवो यस्य स तथा। पक्षे रासैः रासकै-र्भासितः शोभितो वैभवो यत्र स तथा, इति धूसरवर्णः ।

का. क. स्फुरद्धरित्रिकास्थानः स्फुरद्धाराङ्कसंस्थितिः ।

इति भूम्याधारः ।

वडवामुखरोचिष्णुः सज्जपातालवैभवः ।
स्फुरद्द्विरसनावासः सदा बलिगृहस्थितिः ॥

इति पातालाधारः ।

गिरिस्थितिमनोहारी कुशैलाभोगभासुरः ।
प्रतिभूधरसंरम्भः पर्वतस्थितिमुद्वहन् ॥

इति शैलाधारः ।

सश्रीकाननरोचिष्णुः कान्तारचितवैभवः ।
अधिकासारसारश्रीर्विधुनीतश्रियं वहन् ॥

इति वनसरोनद्याधारः ।

स्वर्णस्थितिमनोहारी सदानीरोचितस्थितिः ।
सज्जलक्षणविद्योती सदम्भस्थितिपेशलः ॥

इति जलाधारः ।

सम्पन्नवेश्मनि स्थायी सदनस्थितिभासितः ।
सद्मनः स्थितिमुद्बिभ्रत् सुशोभिनिलये स्थितः ॥

इति गृहाधारः ।

अथाकारशब्दाः—

सद्वृत्ताभोगसंशोभी सर्वदारालसस्थितिः ।
उद्धरस्थितिविद्योती ह्यधिकं प्रांशुवैभवः ॥

म. टी. अथाधारशब्दा यथा—स्वर्जनस्थितिरोचिष्णुः स्वर्गः सुवर्णिवत् । स्वर्जनाः स्वर्गजना देवा, स्तेषां स्थितिस्तया रोचिष्णुः । पक्षे सुष्ठु अर्जनं स्वर्जनं तस्य स्थित्या रोचिष्णुः । तथा स्वर्गलाभकरस्थितिः धर्मः हस्तिवत् । स्वर्गस्य लाभः स्वर्गलाभस्तत्कारिणी स्थितिर्यस्य स तथा । पक्षे सुष्ठु अर्गला स्वर्गला, स्वर्गलावदाभा यस्य स स्वर्गलाभः, स्वर्गलाभश्चासौ करश्च हस्तः, स्वर्गलाभकरस्य शुण्डादण्डस्य स्थितिर्यस्य स तथा । सदा दिवि हितोल्लासः देवो मुनिवत् । सर्वदा दिवि तद्विषे हितो हितकारी उल्लासो यस्य स तथा । पक्षे सत्साधुः वर्यजनः सन् आदिर्येषां ते सदादयो जनास्तेषु तेषां चाविहित उल्लासो येन स तथा । सुरावासनयाऽन्वितः इन्द्रः बलदेववत् मद्यपवद्वा । सुरावासः स्वर्गस्तत्र यो नयः तेनान्वितः । पक्षे सुरा मदिरा, तस्या वासना, तयान्वितः सहितः इति स्वर्गाधारः । सव्योमासङ्गविद्योती सूर्यः शिववत् । सः प्रसिद्धः, व्योम्न आसङ्गः, आ समन्तात् सङ्गः आसङ्गस्तेन विद्योतते इति । विद्योतीपक्षे सव्या वामपार्श्वस्था चासौ उमा पार्वती च, तस्याः सङ्गस्तेन विद्योती तथा । सन्नभोगमनस्थितिः सूर्यो विद्याधरो वा मुनिवत् । सत्प्रधानं नभोगमनं, तत्र स्थितिर्यस्य स तथा । पक्षे मनसः स्थितिर्मनःस्थितिः, भोगे मनःस्थितिर्भोगमनस्थितिः, सन्ना खिन्ना भोगमनस्थितिर्यस्य स तथा । विसर्गलोपात् तथा अभ्रान्तस्थितिरोचिष्णुः सूर्यः तत्त्वज्ञवत् । अभ्रस्याकाशस्य अन्तर्मध्यं, तत्र स्थित्या रोचिष्णुः । पक्षे अभ्रान्तस्य भ्रमरहितस्य, स्थित्या रोचिष्णुः तथा । सदाकाशकृतस्थितिः सूर्यः शरद्वत् । सती प्रधानाकाशे स्थितिर्यस्य स तथा । पक्षे सर्वदा काशैः शरकड इति प्रसिद्धैः, कृता स्थितिर्यत्र सा तथा इति इति व्योमाधारः । स्वयम्भूस्थितिविभ्राजी मनुष्यो नारायणनाभिकमलवत् । स्वयमात्मना, भुविस्थितिर्भूस्थितिस्तया विभ्राजी । पक्षे स्वयम्भूर्ब्रह्मा, तस्य स्थितिस्तया विभ्राजी तथा । सम्पन्नवसुधास्थितिर्मनुष्यः पातालवत् । सम्पन्ना प्राप्ता, वसुधायां स्थितिर्येन स तथा । पक्षे अर्थात् माधुर्यादिसम्पदा नवा सम्पन्नवासावासौ सुधा च, तस्याः स्थितिर्यत्र

तत् तथा । स्फुरद्धरित्रिकास्थानो नरो गरुडवत्, आकाशवद्वा । स्फुरद्वसुधायां स्थानं यस्य स तथा । पक्षे हरित्रिकं । नारायणपृष्ठाधोभागः, आसण इति प्रसिद्धः, स्फुरद्धरित्रिकस्यास्थानं स्थानं स्थापनं यस्मिन् स तथा । आकाशपक्षे हरित्रिकं सोमसूर्यवायवः, तेषां स्थानं तथा । स्फुरद्धरांकसंस्थितिर्नरो गौरीवत् । स्फुरन्ती चासौ धरा च, तस्या अङ्के मध्ये उत्सङ्गे वा संस्थितिर्यस्य स तथा । पक्षे स्फुरन् यो हरस्तस्योत्सङ्गे संस्थितिर्यस्याः सा तथा इति भूम्याधारः । वडवामुखरोचिष्णुः सर्पः नासिकावत् । वडवामुखे पाताले रोचिष्णुः । पक्षे वडवामुखवदश्वामुखवद् रोचिष्णुः तथा । सज्जपातालवैभवः सर्पः वनवत् । सज्जपाताले वैभवो यस्य स तथा । पक्षे सन्तो विद्यमाना जपातालाश्च वृक्षविशेषास्तेषां वैभवो यत्र तत् तथा । स्फुरद्विरसनावासः पातालः स्त्रीनितम्बवत् । स्फुरन्तो द्विरसनाः सर्पा, स्तेषां आवासो यत्र तत्तथा । पक्षे स्फुरन्ती वि विशिष्टा, रसना कटिमेखला, तस्या आवासो यत्र स तथा । अत्र 'अदीर्घाद्विरामैके'ति सूत्रेण (हे.व्या.१.३.३२) दस्य द्वित्वम् । अथवा स्फुरन्त्यौ द्वे रसने मेखले, तयोरावासो यत्र स तथा । सदा बलिगृहस्थितिः सर्पः मान्त्रिकवत्, नगरवद्वा । सदा बलिगृहे पाताले स्थितिर्यस्य स तथा । पक्षे सदा बलिगृहे वलिप्रधाने गृहे, स्थितिर्यस्य स तथा । नगरपक्षे—सन्ति प्रधानानि आवलिगृहाणि, तेषां स्थितिर्यत्र तत्तथा इति पातालाधारः । गिरिस्थितिमनोहारी हरः कविरिव । गिरौ पर्वते स्थितिः, तया मनोहारी मनोज्ञः । पक्षे गिरिवाण्यां स्थितिस्तया मनोहारी । तथा कुशैलाभोगभासुरो हरो वनमिव । कौ पृथ्व्यां (धिव्यां ?) । तथा शैलेषु आभोगो विस्तारस्तेन भासुरः सर्वव्यापित्वात् । पक्षे कुशो दर्भः, एला एलावृक्ष,स्तयोराभोगो विस्तारो यत्र तत्तथा । प्रतिभूधरसंरम्भो हरो व्यवहारिवत् । प्रतिभूधरे प्रतिपर्वते, संरम्भ आटोपो, यस्य स तथा । पक्षे प्रतिभूः साक्षी, तस्य धरणं धरस्तत्र संरम्भो यस्य स तथा । पर्वतस्थितिमुद्वहन् हरो गगनवद्, विप्रवद्वा । पर्वतस्थितिं शैलस्थितिं । पक्षे पर्वतः अङ्गुलीपर्वतः, स्थितिं य(या) तो गगनमङ्गुलीपर्वसु भवति तथा । अमावास्यादिपर्वणि, ततः स्थितिं मर्यादां इति शैलाधारः । सश्रीकाननरोचिष्णुः हस्ती तरुणीवत् । सश्रीकानने सश्रीकवने रोचिष्णुः । पक्षे सश्रीकं मदाननं मुखं तेन रोचिष्णुः तथा । कान्तारचितवैभवो हस्ती मुनिवत् भोगिवद्वा । कान्तारं वनं, तत्र चितो व्याप्तो, वैभवो यस्य स तथा । पक्षे कान्ता भार्या, तस्या अ(आ ?)चितो वैभवो येन स तथा । भोगिपक्षे कान्ताया रचितो वैभवो येन स तथा । अधिकासारसारश्रीरुद्यानो मेघवत् । अधि सामस्त्येन, कासारे तडागे, सारा प्रधाना, श्रीर्यस्य स तथा । पक्षे अधिकः आसारो वेगवान् वर्षः, तस्य सारा श्रीर्यत्र स तथा । विधुनीतः श्रियं वहन्नुद्यानः पूर्णिमावत् । वि विशिष्टा, धुनी नदी, ततः श्रियं वहन् । पक्षे विधुः चन्द्रस्तेन नीता प्राप्ता या श्रीस्तां इति । वनसारो नद्याधारः । स्वर्णस्थितिमनोहारी कासारो मेरुवत् । सुष्ठु अर्णः पानीयं ,तस्य स्थितिस्तया मनोहारी । पक्षे स्वर्णस्थित्या कनकावस्थानेन मनोहारी तथा । सदा नीरोचितस्थितिः सरो नृपवत् वनवद्वा । सर्वदा नीरेण जलेनोचित(ता) स्थितिर्यस्य तत्तथा । पक्षे स प्रसिद्धः, दानमस्यास्तीति दानी, तथा रोचितस्थितिः । वनपक्षे रलयोरैक्यात् सदा नीडोचितस्थितिः तथा । सज्जलक्षणविद्योती सरो वैयाकरणवत् । प्रधाना जले ये क्षणा उत्सवाः तैः। विद्योतिपक्षे सज्जं यल्लक्षणं व्याकरणं, तेन विद्योती तथा । सदम्भस्थितिपेशलं सरो दाम्भिकवत् । सदम्भः सत्पानीयं, तस्य स्थित्या पेशलं मनोहरम् । पक्षे स प्रसिद्धः दम्भस्थित्या छद्मस्थित्या पेशलः इति । जलाधारः सम्पन्नवेश्मनि स्थायी नरः शिलाकुट्टकवत् । प्राप्तगृहे स्थायी पक्षे सम्पदा नवे सम्पन्नवे, अश्मनि पाषाणे, स्थायी तथा । सदनस्थितिभासितो नरः शाकटिकवत् । गृहस्य स्थित्या भासितः । पक्षे सत् अनः शकटं, तस्य स्थित्या भासितः तथा । सद्मनः स्थितिमुद्विभ्रन्नरः साधुवत् । सद्मनः गृहस्य, स्थितिम् । पक्षे प्रधानमनःस्थितिं तथा । सुशोभिनि लये स्थितिर्नरो गीतवत् । सुशोभी चासौ निलयश्च सुशोभिनिलयः सुगृहं, तस्मिन् स्थितिर्यस्य स तथा । पक्षे सुशोभिनि शोभमाने लये स्थितिर्यस्मात् तत् तथा इति गृहाधारः ।

का. क. ऊर्मिमद्वैभवोद्भासी चक्राङ्गस्थितिशोभितः ।
सदैव तनुताभोगो नितान्तमणिसद्द्युतिः ॥

सदा सतीव्रतारोपो निशितारोचितस्थितिः ।
पृथुस्थितिमनोहारी स्फुरद्विपुलकस्थितिः ॥

अहो वामनताटोपः सदाऽखर्वतमस्थितिः ।
समहासङ्कटोल्लासः सम्बाधस्थितिमुद्वहन् ॥

तरस्त्वरोचितौ भावबद्धतारोचितौ तमः ।
वर्ण्यस्याकारशब्दानामेते योज्याः पुरो बुधैः ॥५०॥

यथा—स्थूलतरस्थितिः । महत्त्वशोचितस्थितिः । सुदीर्घभावबद्धश्रीः । सूक्ष्मतारोचितस्थितिः । गुरुतमस्थितिः ।

अथ क्रियाशब्दाः—

सदा चटुलसल्लक्ष्मीरुच्चैस्तरलतान्वितः ।
अचलस्थितिविद्योती सदा स्थिरचितद्युतिः ॥

प्रकाशयन् सदाध्वानमुच्चैः कलकलान्वितः ।
साक्षाद्विपाटनाटोपः सत्वरोचितवैभवः ॥

असौ पवित्रसल्लक्ष्मीः सज्जपावनवैभवः ।
अलं लानपदं बिभ्रन्नितान्तमलिनस्थितिः ॥

म. टी. अथाकारशब्दा यथा—सद्वृत्ताभोगसंशोभी चन्द्रो विवेकिवत् । वृत्तः वृत्ताकारः संश्चासौ वृत्तश्च सद्वृत्तस्तस्याभोगो विस्तारस्तेन संशोभी । पक्षे सद्वृत्तस्य सदाचारस्याभोगस्तेन संशोभी, तथा । सर्वदारालसस्थितिः सर्पः साधुवत् । सर्वदा सर्वकालं, आरालो वक्रः, सह स्थित्या वर्तते यः स सस्थितिरारालश्चासौ सस्थितिश्च अरालसस्थितिः । पक्षे सर्वदारेषु सर्वस्त्रीषु, अलसा स्थितिर्यस्य स तथा। उद्धरस्थितिविद्योती तालवृक्षः कैलासवत् । उद्धरस्थितिः उच्चस्थितिस्तया विद्योती । पक्षे उत् प्राबल्येन हरस्थित्या विद्योती तथा । ह्यधिकं प्रांशुवैभवो मेरुर्जलप्रतिबिम्बितार्कवत् । अधिकं यथा स्यात्तथा, प्रांशुरुच्चैस्तरो वैभवो, यस्य स तथा । पक्षे अधि सामस्त्येन, कम्प्राः कम्पिता, अंशवः किरणास्तेषां वैभवो यस्य स तथा। ऊर्मिमद्वैभवोद्भासी सर्पः समुद्रवत् । ऊर्मिमान् वक्रो वैभवस्तेनोद्भासी। पक्षे कल्लोलवद् वैभवेनोद्भासी तथा । वक्राङ्कस्थितिशोभितः सर्पः मानससरःप्रदेशवत् । वक्रा या अङ्कस्थितिस्तया शोभितः। पक्षे वक्राङ्काः हंसास्तेषां स्थित्या शोभितः तथा । सदैव तनुताभोगः तपस्वी जिनेशवत् । सर्वकालं तनुता कृशता, तस्य आभोगो विस्तारो यस्य स तथा। पक्षे सदैवतैः देवयुतैरर्थान्तरैर्नुतः स्तुत, आभागो वस्तुतोऽतिशयविस्तारो यस्य स तथा। नितान्तमणिमद्द्युतिः कुमणिरोहणाचलवत् । नितान्तं निरन्तरं, अणिम्ना सूक्ष्मा, द्युतिर्यस्य स तथा । पक्षे निरन्तरमणियुक्ता द्युतिर्यस्य स तथा । सदा सतीव्रतारोपः परशुः सतीवत् । सदा तीव्रता तीक्ष्णता, तस्या आरोपस्तेन सह वर्तते यः स सतीव्रतारोपः । पक्षे सती व्रतस्यारोपो यस्यां सा तथा । निशिता रोचितस्थितिः कुठारो नभोवत् । निशिता तेजिता, आ समन्तात् रोचिता स्थितिर्यस्य सः तथा । पक्षे निशि रात्रौ तारकाणामुचिता योग्या स्थितिर्यत्र तत् तथा । पृथुस्थितिमनोहारी पटः पृथुराज्यवत् । पृथुस्थित्या विस्तीर्णस्थित्या, मनोहारी । पक्षे पृथुनाम्नो राज्ञः स्थित्यावस्थानेन, मनोहारि-(री) तथा । स्फुरद्विपुलकस्थितिः पृथिवी मिलितकान्तस्त्रीवत् । विपुला एव विपुलका, सा चासौ स्थितिश्च, स्फुरन्ती विपुलकस्थितिर्यस्यां सा तथा । पक्षे विशिष्टः पुलको रोमाञ्चस्तस्य स्थितिर्यस्याः सा तथा । तथा अहो वामनताटोपो वामनपुरुषो विनयवत् । वामनता कुब्जता, तस्या आटोपो यस्य स तथा । पक्षे वामो मनोज्ञो, नताटोपो नतपुरुषस्याटोपो यत्र स तथा । सदा खर्वतमस्थितिः वामनः प्रभातवत् । सदा खर्वतमा अतिशयेन कुब्जा, स्थितिर्यस्य स तथा ।

पक्षे सदा खर्वा ह्रस्वा तमःस्थितिर्यत्र तत् तथा । स महासंकटोल्लासमुद्वहन् कुशूलमुखं बद्धहस्तिवत् । महासंकटस्यात्यन्तसंकीर्णस्योल्लासम् । पक्षे महासंकटं महत्कष्टं तस्योल्लासमुद्वहन् तथा । संबाधस्थितिमुद्वहन् कुशूलमुखं बाधितवत् । संबाधा संकीर्णा, या स्थितिस्ताम् । पक्षे सं सम्यग्, बाधनं बाधस्तस्य स्थितिस्तामुद्वहन् ।

अथ वर्ण्यस्याकारशब्दानामग्रेतरः १. त्वरोचित २. भावबद्ध ३. तारोचित ४. तम ५. आद्याः शब्दा योज्याः । यथा—स्थूलतरस्थितिः गल्लो मल्लवत् । अतिशयेन स्थूला स्थूलतरा, स्थितिर्यस्य स तथा । पक्षे स्थूलं बहुतरं बलं तेन स्थितिर्यस्य स तथा । महत्त्वरोचितस्थितिर्मेरुर्वायुवत् । महत्त्वेन रोचितस्थितिः । पक्षे महतीत्वरा वेग,स्तेनोचिता योग्या, स्थितिर्यस्य स तथा । स्वदीर्घभावबद्धश्रीः रज्जुः रविवत् । स्वस्य दीर्घभावः स्वदीर्घभाव,स्तेन बद्धा श्रीर्येन स तथा । पक्षे दीर्घा चासौ भावदीर्घभास्वस्य (च्च?) दीर्घभा तया अवबद्धा श्रीर्यस्य स तथा । सूक्ष्मतारोचितस्थितिः रोमराजिः अमावास्यावत् । सूक्ष्मतया रोचितस्थितिः, पक्षे सूक्ष्मताराभिरुचितस्थितिर्यस्याः सा तथा । गुरुतमस्थितिः मेरुरमावास्यावत् । गुरुतमा स्थितिर्यस्य स तथा । पक्षे गुरु च तत्तमश्च गुरुतमस्तस्य स्थितिर्यस्यां सा तथा । अत्र विसर्गलोपः प्राग्वत् ।

का. क. उपकण्ठस्थितिं बिभ्रत् सनीडस्थितिपेशलः ।
सन्निधानस्थितिश्रेष्ठो विप्रकृष्टश्रियं वहन् ॥

अथाधेयादिशब्दाः—

कीलाभोगगुणासङ्गचूर्णचन्द्रकसन्धयः ।
सदा लिपीनां लक्ष्मीलेखारेखाक्षरवर्णकाः ॥

पीवरज्वालयोद्द्योती मृदुदारेष्टकासितौ ।
दारुणस्थितिसत्काष्ठाभोगौ धर्मसदाजिनौ ॥

कृत्तिकाकार्तिकेयश्रीः सुखटीकासितस्थितिः ।
समोपाधिकपरमसुहृद्भ्यः स्यादयः स्थितिः ॥

म. टी. अथ क्रियाशब्दाः—सदा चटुलसल्लक्ष्मीर्वायुवश्यावत् । सदा चटुला चपला सती विद्यमाना लक्ष्मीर्यस्य स तथा । पक्षे सर्वकालं चटूनि चाटुकारिवचनानि, तेषां लसन्ती लक्ष्मीर्यस्याः सा तथा । उच्चैस्तरलतान्वितः गजकर्णो वनवत् । उच्चैरतिशयेन, तरलता कम्पनता, तया अन्वितो युक्तः । पक्षे उच्चैस्तरा या लताः, ताभिरन्वितः तथा । अचलस्थितिविद्योती पर्वतो महेश्वरवत् । निश्चलस्थित्या विद्योती । पक्षे अचले पर्वते स्थितिस्तया विद्योती तथा । सदा स्थिरचितद्युतिः मणिः शिववत् । सदा स्थिरा निश्चला, चिता व्याप्ता, द्युतिर्यस्य स तथा । पक्षे सदाऽस्थिरचिता द्युतिर्यस्य स तथा । प्रकाशयन् सदाध्वानं सुखं रविवत् । सर्वदाध्वानं शब्दम् । पक्षे अध्वानं मार्गं तथा । उच्चैः कलकलान्वितः स्त्रीसमूहः चन्द्रवत् । उच्चैः कलकलः कोलाहल,स्तेनान्वितः । पक्षे कलामनोज्ञाश्च ताः कलाश्च कलकलाः, ताभिरन्वितः तथा । साक्षाद्विपाटनाटोपः कुठारो हस्तिपकवत् । साक्षात् विपाटनं दारणं, तस्याटोपो यस्य स तथा । पक्षे अक्षो ज्ञाने इत्युक्तेः साक्षः सज्ञानस्तथा । आद्विपाटनं, आ सामस्त्येन, हस्तिगतिः तस्याटोपो यस्मात् स तथा पूर्वेण सह कर्मधारयः तथा । सत्वरोचितवैभवो वायुः सुभटवत् । सह त्वरया वेगेन वर्तते यः स सत्वरः । सत्वरः चितो योग्यो वैभवो यस्य स तथा । पक्षे सत्त्वेन रोचितो दीपितो वैभवो यस्य स तथा । असौ पवित्रसल्लक्ष्मीः न्यायी [illegible]नाक्र्वज्रवत् । पवित्रा सल्लक्ष्मीर्यस्य स तथा । पक्षे पविर्वज्रं, तस्मात् त्रसल्लक्ष्मीर्नश्यल्लक्ष्मीर्यस्य स तथा । सज्जपावनवैभवो व्यवहारी वनवत् । सज्जः सज्जीभूतः, पावनः पवित्रो, वैभवो यस्य स तथा । पक्षे सत्प्रधानं जपावनं जपारक्षणं, तस्य

वैभवो यत्र तत्तथा । अलं म्लानपदं बिभ्रत् सन्ध्याकमलं मानिवत् । अलं अत्यर्थं म्लानपदं सङ्कोचपदम् । पक्षे न विद्यते लो यत्र तदलं म्लानपदम् । कथम्भूतं ? अलं लरहितं मानपदं बिभ्रत् तथा । नितान्तमलिनस्थितिः भ्रमरः पद्मवत् । नितान्तं मलिना श्यामा स्थितिर्नितान्तमलिनस्थितिस्ताम् । पक्षे नितान्तं निरन्तरं, अलिनो भ्रमरस्य, स्थितिं । अत्र बिभ्रदिति प्राक्तनं योज्यं तथा । उपकण्ठस्थितिं बिभ्रत् सेवको हारवत् । उपकण्ठे समीपे या स्थितिस्ताम् । पक्षे कण्ठस्य समीपं उपकण्ठं तत्र या स्थितिस्तां तथा । सनीडस्थितिपेशलः सेवको वृक्षवत् । सनीडे समीपे स्थितिस्तया शलः । पक्षे सह नीडेन मालकेन वर्तते या सा सनीडा, सनीडा चासौ स्थितिश्च, तया पेशलस्तथा । सन्निधानस्थितिश्रेष्ठः सेवको धनिवत् । सन्निधानं समीपं, तत्र स्थितिस्तया श्रेष्ठः । पक्षे प्रधाननिधानस्थित्या श्रेष्ठः । तथा विप्रकृष्टश्रियं वहन् धनी विप्रपुत्रवत् । विप्रकृष्टश्रियं विशिष्टतरलक्ष्मीं । पक्षे विप्रैः कृष्टा आकर्षिता, श्रीर्लक्ष्मी,स्ताम् ।

का. क. परमन्तरसाटोपं वहन् स्पष्टान्तरस्थितिम् ।
सदाविलांशुकोच्चेलो वेरावासश्रियोऽम्बरम् ।।

पोतः सदाधिकपटः सदासिचयभासुरः ।
विस्पष्टाञ्जनसल्लक्ष्मीः शोभितार्णस्थितिं वहन् ।।

तान्तवस्थितिमुद्बिभ्रन्माधुर्यगुणसंयुतः ।
लसल्लवणिमप्रौढः स्फुरत्तीव्ररुचिस्थितिः ।।

मौलिश्रोत्रालिकभ्रूहनुरदकरदृक्तालुनासौष्ठवक्त्र-
स्कन्धग्रीवाभुजोरःस्तनकचनखवाङ्मध्यनाभ्यं सदेशाः ।

कक्षाजङ्घाङ्घ्रिरोमावलिकटिजघनाङ्गुष्ठगुल्फाङ्गुलीस्फिग्-
गुह्यक्रोडप्रकोष्ठावटुकफणितलभ्रान्तिकान्तिप्रकाण्डाः ।।

म. टी. अथाधेयादिशब्दा यथा-कीलेति कीलाभोगयुतो रथो वह्निवत् । कीलः कीलकः, तस्याभोगो विस्तारस्तेन युतो युक्तः । पक्षे कीलाः ज्वालास्तासां भोगस्तेन युक्तः । तथा गुणासंगयुतो निर्गुणनरः पटवत् सत्पुरुषवद्वा । गुणानामसङ्गोऽमिलनं, तेन युतः । पक्षे गुणानां तन्तूनां, आ सामस्त्येन, सङ्गस्तेन युतः । सत्पुरुषपक्षे गुणानां गाम्भीर्यादीनामासङ्गो मिलनं, तेन युतः तथा । चूर्णयुतं ताम्बूलं सुरभिजलवत् । चूर्णः दग्धपाषाणक्षोदस्तेन युतः । पक्षे चूर्णानि सुगन्धद्रव्याणि वासयोगाख्यानि, तैर्युतम् । तथा चन्द्रकयुतः शुक्लपक्षः समुद्गको वा, मयूरवत् । स्वार्थे के चन्द्रकश्चन्द्रमास्तेन युतस्तथा । चन्द्र एव चन्द्रकः कर्पूरस्तेन युतः । पक्षे चन्द्रकैः चांदला इति प्रसिद्धैर्युतस्तथा । दृढसन्धिसङ्गतो दृढाङ्गो निपुणनृपतिवत् । दृढः सन्धिरस्थिसन्धि, स्तेन सङ्गतः सहितः । पक्षे दृढः सन्धिर्मेल, स्तेन सङ्गतो युक्तः तथा । सदालिपीनां लक्ष्मीं वहत् पद्मं पुस्तकवत् । सदा निरन्तरं, अलिनो भ्रमरास्तैः पीनां पुष्टां, लक्ष्मीं । पक्षे लिपीनामक्षरन्यासानां, लक्ष्मीं शोभां, तथा । लेखान्वितः सोपानराशिः पुस्तकवत् । अत्र लेखा पङ्क्तिस्तयान्वितः । पक्षे लेखा लिपिस्तयान्वितः तथा । रेखान्वितं चित्रं विस्तीर्णवस्तुवत् । रेखा उल्लेखस्तेनान्वितम् । पक्षे रेखा विस्तारस्तेनान्वितम् । यदुक्तं—

रेखा स्यादल्पके छद्मन्याभोगोल्लेखयोरपीति ।

तत्राभोगे यथा-आसीत् तस्या वदनकमले काऽपि लावण्यरेखा ।

उल्लेखे यथा-चित्रेऽपि तादृशी रेखा यादृशी कर्तुराकृतिः तथा ।

तथा अक्षराश्रितो मातृकापाठः सिद्धवत् । अक्षराणि अकारककारादीनितैराश्रितस्तदात्मक इत्यर्थः । पक्षे अक्षरं मोक्षस्तत्राश्रितः तथा । वर्णकाश्रितो मलयाद्रिर्भोगिवत् । अत्र वर्णकैः चन्दनवृक्षैराश्रितः । पक्षे वर्णको विलेपनं, तेनाश्रितः

वर्णको विलेपने मलयजे इत्युक्तेः। तथा पीवरज्वालयोद्योती वह्निर्धन्यवत्। पीवरा या ज्वाला तथा उद्योती। पक्षे पीवा रज्जवस्तासामालयोऽर्थान्मूटकस्तत्रोद्योती तथा। मृदुदारः घटः कृतपुण्यवत्। मृदा मृत्तिकया, उदारः। पक्षे मृदवो दाराः कलत्रं, यस्य स तथा। इष्टिकासित असन्तोषी याज्ञिकवत्। स्वार्थे केः इष्टिका वांछा, तत्रासितः स्थितः। पक्षे इष्टिकायां यागे आसितः तथा। सदारुणस्थितिं वहन् रविः क्रूरनरवत् गृहवच्च। सदा अरुणस्थितिं पक्षे स प्रसिद्धः, दारुणस्थितिं पुनः दारुणः काष्ठात् स्थितिं तथा। सत्काष्ठाभोगयुतो रविररण्यवत्। सत्काष्ठायाः दिशो भोगस्तेन युतः। पक्षे काष्ठानामाभोगस्तेन युतः तथा। धर्मयुतो मुनिर्धनुर्धरवत्। धर्मः पुण्यं, तेन युतः। पक्षे धर्मः कार्मुकं, तेन युतः तथा। सदा जिनशोभी जैनः योगिवत्। सदा जिनो वीतरागो देवस्तेन शोभी। पक्षे अजिनं चर्म, तेन शोभी तथा। कृत्तिकाशोभितं गगनं महेश्वरवत्। कृत्तिका नक्षत्रं, तेन शोभितम्। पक्षे कृत्तिका चर्म तेन, अथवा कृत्तिका कृपाणी, तया शोभितः तथा। कार्तिकेयश्रीः शिवः चर्मकारवत्। कार्तिकेयनाम्नः स्वसुतस्य श्रीर्यस्य स तथा। पक्षे स्वार्थे के कृत्तिकाचर्म, तत्सम्बन्धिनी श्रीर्यस्य स तथा। सुखटीकासितस्थितिर्भित्तिविषमग्रन्थवत्। सुष्ठु खटी तया कासिता राजिता स्थितिर्यस्याः सा तथा। पक्षे सुखेन टीकया सिता, बद्धा स्थितिर्यस्य स तथा।

अथ समादिभ्यो यः स्थितिर्योज्यते। यथा-समायस्थितिः दाम्भिकवत् १ उपायस्थितिर्नृपवत् २ अधिकायस्थितिर्मल्लवत् ३ परमायस्थितिः सुपुण्यवत् ४ सुहृदयस्थितिः सज्जनवत्। परमं तरसाटोपं वहन् मल्ल आम्रफलवत्। परमं तरसा बलेनाटोपम्। पक्षे परं केवलं, अन्ते रसाटोपं तथा। स्पष्टान्तरस्थितिं वहन् मल्लो वर्णावलिवत्। स्पष्टां प्रकटां बलस्थितिम्। पक्षे स्पष्टानि यान्यन्तराणि, तेषां स्थितिं तथा। सदाबिलांशुको मुनिः सर्पशिरस्थमणिवत्। सदा निरन्तरं, आबिलं अंशुकं, यस्य स तथा। पक्षे सदाविले अंशवो यस्य स तथा। तथा उच्चेलो दिगम्बरः पर्वतासन्नप्रदेशवत्। उद्गतानि चेलानि वासांसि यस्मात् स तथा। पक्षे उच्चा इला पृथ्वी यत्र स तथा। तथा वेरावासश्रीः वृक्षः सुवस्त्रवत्। वेः पक्षिणः आवासो नीडरूपस्तस्य श्रीर्यत्र स तथा। पक्षे बेरे शरीरे आवाश्रीर्वसनश्रीर्यस्य वस्त्रस्य तत् तथा।

तथा स्पष्टाम्बरस्थितिः सूर्यः सुवेषपुरुषवत्। स्पष्टा अम्बरे आकाशे स्थितिर्यस्य स तथा। पक्षे स्पष्टा अम्बराणां वस्त्राणां स्थितिर्यस्य स तथा। अधिकपोतस्थितिः सांयात्रिकः कपोतपालीवत्। अधिकं पोते स्थितिर्यस्य स तथा। पक्षे अधि सामस्त्येन, कपोतानां स्थितिर्यत्र स तथा। सदाधिकपटः पोतो दाम्भिकवत्। सदा नित्यं, अधिकः पटः शठ इति प्रसिद्धो यत्र स तथा। पक्षे अधि सामस्त्येन, कपटं यत्र स तथा। सदासिचयभासुरो धनी आयुधगृहवत्। सिचयैर्वस्त्रैर्भासुरः। पक्षे असिचयेन खड्गसमूहेन भासुरं तथा। विस्पष्टाञ्जनसल्लक्ष्मीं वहन् नृपो नयनवत्। स्पष्टां प्रकटां जनानां सल्लक्ष्मीम्। पक्षे अञ्जनसल्लक्ष्मीं तथा। शोभितार्णस्थितिं वहन् समुद्रोऽरण्यभूवत्। शोभितानि यानि अर्णांनि पानीयानि, तेषां स्थितिम्। पक्षे शोभिनी या तार्णस्थितिः तृणसम्बन्धिनी स्थितिस्तां तथा। तांतवस्थितिमुद्बिभ्रत् पटवत्। तान्तवा तन्तुसम्बन्धिनी या स्थितिस्ताम्। पक्षे तां प्रसिद्धां, तवेति षष्ठ्यन्तप्रयोगश्चेति तथा। माधुर्यगुणसंयुतो गुल्लये पदार्थः रम्यार्थवत्। माधुर्यं स्वादुत्वं, तद्रूपो यो गुणस्तेन युतः। पक्षे माधुर्यगुणः मनोज्ञत्वगुणस्तेन संयुतः तथा। लसल्लवणिमप्रौढः सुभगो लवणराशिवत्। लसन् दीप्यमानः, लवणिमा लावण्यं, तेन प्रौढः। पक्षे लवणिमा क्षारत्वं, तेन प्रौढः तथा। स्फुरत्तीव्ररुचिस्थितिर्लोलुपो रविवत्। स्फुरन्ती तीव्रा रुचिर्वांछा, यस्य स तथा। पक्षे रुचिः कान्तिस्तस्याः स्थितिर्यत्र स तथा। तथा मौलिश्रोत्रेति–'पुतौ स्फिजौ कटिप्रोथौ' इतिवचनात् (अ.चि. ३.२७३) स्फिग्शब्दः पुतवाचकः। क्रोडः उत्सङ्गः तथा। प्रकोष्ठः कलाविकावटुः कृकाटिकातलं पादतलं, भ्रान्तिर्गतिः, प्रगण्डः कूर्परां सान्तः। शेषं सुगममिति : पुरुषादिवर्णनायामंगोपांग नाम।

पुरुषादिवर्णनायामङ्गोपाङ्गनामश्लेषो यथा––उच्चैरङ्गमनोहरो, नाट्यवत्। साक्षादधिकविग्रहो, दैत्यवत्। सुशोभिततनुःश्रियं वहन्, नृपवत्। समुल्लासितन् पुरश्रीः, स्त्रीक्रमवत्। अधिकायस्थितिं बिभ्रत् शस्त्रीवत्। कुबेरस्थितिसंयुतः, कैलासवत्। सुसम्पन्नवपूरम्यः, नृपवत्। कलेवरश्रियं बिभ्रत्, कुमारीवत्। उत्तमाङ्कस्थितिं बिभ्रत्, जैनमुनि-

---

१. समुल्लासित....नृपवत्"—लावृ, २. पुस्तके नास्ति। मकरन्दे त्वस्ति।

वत् । अधिकेशश्रियं वहन्, मन्त्रिवत् । बहुकुन्तलसद्द्युतिः, सुभटवत् । सदावालमनोरमः, वृक्षवत् । वेणीसम्भ्रमसम्भृतो, नदीवत् । सदा तुण्ड (ङग ?) क्षणान्वितः, दातृवत् । पृथुलास्यमनोहरः, नर्तकीवत् । सुखरोचितवैभवः कथकवत्। बहुश्रावदन-स्थितिः सैन्यवत् । अधिकाननरोचिष्णुः, गिरिवत् । स्फुरत्पृथुललाटश्रीः, भृगकच्छवत् । अलिकान्तस्थितिं वहन्, पद्मवत् । प्रतिमालासितस्थितिः, कविवत् । उच्चैःश्रवःस्थितिं बिभ्रत् इन्द्रवत् । अधिकर्णस्थितिं बिभ्रत्, दरिद्रवत् । वैश्रवण-स्थितिं वहन्, कैलासवत् । विश्वेक्षणस्थितिं बिभ्रत्, हरिवत् । नेत्राभोगभासुरो, धनवत् । नयनोदितवैभवः, मुनिवत् । स्पष्टां बकस्थितिं वहन्, सरोवरवत् । सदा लोचनभासुरः, मन्त्रिवत् । उल्लोचनमितद्युतिः, सुदर्शनमनोरमो, विष्णुवत् । सुतारास्थितिपेशलः, चन्द्रवत् । कलयन् नासिकास्थितिं, पान्थवत् । नक्रस्थितिमनोरमः, समुद्रवत् । सदाधरमनोरमः, पृथ्वीवत् । गण्डस्थितिमनोहारी, वनवत् । हनुमद्वैभवान्वितः, रामवत् । कूर्चकस्थितिपेशलः, चित्रवत् । उच्चैरदनभासुरो, बालवत् । असौ सुदर्शनस्थितिं बिभ्रत्, सुभोजिवत् । राजदन्तस्थितिं बिभ्रत्, राजदारवत् । रसनाभोगभासुरः, नारी-नितम्बवत् । घण्टिकास्थितिपेशलः, गजवत् । अधिकन्धरयान्वितो, नृपवत् । सुग्रीवोदितवैभवः, रामवत् । स्कन्धस्थिति-मनोहारी, ऋणिवत् । गलच्छायामनोहरः, कृष्णपक्षचन्द्रवत् । अधिकण्ठमनोरमः, मन्त्रवत् । त्रिभुजातिमनोहरः, नृपवत् । स्फुरद्बाहोरुचिं बिभ्रत्, सैन्यनिवेशवत् । समदोर्जितवैभवः, कुम्भिवत् । कक्षास्थितिमनोहरो वादिवत् । सश्रीकफणिवैभवः पातालवत् । नितान्तमणिबन्धवान्, रथवत् । करस्थितिमनोहरः, नृपवत् । सश्रीकरचितस्थितिः, धनिवत् । करभासित-वैभवः, उष्ट्रपालवत् । स्पष्टाङ्गुलिस्थितिं वहन् गान्धिकवत् । कामाङ्कुशस्थितिं वहन्, हस्तिवत् । सदाधिकरजस्थितिः, सैन्यवत् । नरवरस्थितिभासुरः, वर्षार्कवत् । सुसम्पन्नखचितस्थितिः, प्रासादवत् । प्रहस्तस्थितिपेशलः, रावणवत् । तालिकास्थितिसुन्दरः, वनवत् । अवक्रोडलक्षणान्वितः, सत्पुरुषवत् । स्पष्टमुत्सङ्गपेशलः, सकान्तस्त्रीवत् । उच्चैरङ्क-समन्वितो, दुष्कालवत् । प्रौढोरसश्रियं बिभ्रत्, घटवत् । समस्तनोदिताभोगो, मुनिवत् । कुचेष्टाभोगभासुरः, अधमवत् । द्विपयोधरसाटोपः, नृपवत् । सदापि चण्डसंरम्भो, नृपवत् । प्रौढोदरस्थितिं वहन्, शैलवत् । नाभिभूतस्थितिं वहन्, अभिमानिवत् । कटकान्तस्थितिं वहन्, नृपवत् । वहन् वैकटिकाभोगं, पुरवत् । सर्वदारोहपेशलः, सुभगवत् । अहो सज्ज-घनस्थितिः, नभोवत् । सज्जानुगतवैभवः, धनिवत् । सदापि चण्डिकाभोगः, शम्भुवत् । अपूर्वचरणस्थानः, सुभटवत् । द्विपादरचितस्थितिः, नृपवत् । सदा चलनश्रियं बिभ्रत्, भूमिवत् ।

तरस्त्वरोचितौ भावबद्धतारोचितौ तमः ।
वर्ण्यस्याकारशब्दानामेते योज्याः पुरो बुधैः ॥५०॥

विषाणपुच्छसास्नाभिः शूलाच्छादनचञ्चुभिः ।
वेगभीक्रोधयुद्धश्रीभीमतादिभिरुच्यते ॥५१॥

तिर्यग्वर्णनाय तदङ्गोपाङ्गश्लेषशब्दा यथा—शृङ्गारोपचितस्थितिः, स्त्रीवत् । सद्विषाणां श्रियं वहन्, सर्पवत् । त्रिश्वे त्रपुच्छविभ्राजी, रसितलोहवत् । उच्चं चूतश्रियं वहन्, वनवत् । त्रोटितस्थितिमुद्वहन्, मुनिवत् । सदापिच्छवि-राजितः, रविवत् । विपक्षोचितवैभवः, नृपवत् । स्फुरत्द्विपक्षस्थितिः, रणवत् । इत्यादिश्लेषशब्दाः मत्कृतकाव्यकल्पलता-परिमले श्लेषसमुच्चयात् ज्ञातव्याः ।

इतिश्री जिनदत्त० श्लेषसिद्धिप्रताने तृतीये सर्ववर्णनस्तबको द्वितीयः ।

म. टी. श्लेषोदाहरणानि यथा—उच्चैरङ्गमनोहरो रूपवान् नाट्यवत् । उच्चैरतिशयेनाङ्गमनोहरः । पक्षे उच्चैरङ्गेन नाट्यभूम्या मनोहरं तथा । साक्षादधिकविग्रह उच्चपुरुषः पारधिवत् । अधिको विग्रहः शरीरं यस्य स तथा । पक्षे ऽधिकं वीनां पक्षिणां, ग्रहो ग्रहणं, यस्य स तथा । तथा सुशोभितनुतः श्रियं वहन् रूपवान् नृपवत् सुशोभितनुतः सुशो-भिशरीरात्, श्रियम् । पक्षे सुशोभितां तथा नुतां स्तुतां यं श्रियं तथा । समुल्लासितनूपुरश्रीर्नृपः स्त्रीचरणवत् ।

समुल्लासिनी तनूपुराभ्यां देहनगराभ्यां श्रीर्यस्य: स तथा । पक्षे समुल्लासिनी ये नूपुरे हंसके तयोः श्रीर्यत्र स तथा । अधिकायस्थितिं बिभ्रत् मल्लः शस्त्रीवत् । अधि साभस्त्येन कायस्थितिम् । पक्षे अधिकां अयःस्थितिं तथा । कुबेरस्थितिसंयुतो महेश्वरः कैलासवत् । कुत्सितशरीरस्थितिसंयुतः । पक्षे कुबेरो धनदस्तस्य स्थितिस्तया संयुतः तथा । सुसम्पन्नवपुरस्यः सुरूपो नृपवत् । सुसम्पन्नं यद्वपुस्तेन रम्यः । पक्षे सुसम्पदा नवाथाप्ता पुरी, तया रम्यः तथा । कालेवरश्रियं बिभ्रत्सुरूपः कुमारीवत् । कलेवरं शरीरं, तस्य सम्बन्धिनी श्रीः कलेवरश्रीस्तां । पक्षे काले समये, वरश्रियं । तथा उत्तमाङ्गस्थितिं बिभ्रत् सुमूर्द्धा जैनमुनिवत् । मस्तकस्थितिं । पक्षे उत्तमानामङ्गानामाचाराङ्गादीनां स्थितिं तथा । अधिकेशश्रियं वहन् सुकेशी मन्त्रिवत् । अधिकेशश्रियं कचश्रियम् । पक्षे अधिकस्वामिश्रियं तथा । बहुकुन्तलसदृक्द्युतिः स्त्री सुभटवत् । कुन्तलाः केशास्तेषां सदृक् द्युतिर्यस्याः सा तथा । पक्षे बह्वी कुन्तेन भल्लेन लसन्ती द्युतिर्यस्य स तथा । सदा बालमनोरमः सुकेशीवृक्षवत् । सदा बालाः केशास्तैर्मनोरमः । पक्षे सन् आवालः आलवालस्तेन मनोरमः । तथा वेणीसम्भ्रमसंभृतः स्त्रीकायो नदीवत् । प्रवेणीसम्भ्रमयुतः । पक्षे वेणीप्रवाहः तस्य सम्भ्रमस्तेन सम्भृता युता तथा । सदा तुण्डक्षणान्वितो नृपो दातृवत् । तुण्डं मुखं, तस्य क्षण उत्सवः तेनान्वितः पक्षे डलयोरैक्यात् स प्रसिद्धः दातुं लक्षणान्वितो दाता तथा । पृथुलास्यमनोहरो नृपो नर्तकीवत् । पृथुलं आस्यं मुखं, तेन । पक्षे पृथु पृथुलं, लास्यं नाट्यं तेन तथा । मुखरोचितवैभवो नृपः कथकवत् । मुखेन रोचितो वैभवो यस्य स तथा । पक्षे मुखरस्य, अत्र भावप्रधाननिर्देशबलान्मुखरत्वस्य उचितो वैभवो यस्य स तथा । बहुधा वदनस्थितिर्दुर्जनः सैन्यवत् । बहुधा वदनानां स्थितिर्यस्य स तथा । पक्षे बह्वी धावन्ती अनः स्थितिर्यत्र तत्तथा । अधिकाननरोचिष्णुः नारी गिरिवत् । आननेन रोचिष्णुः पक्षे काननेन रोचिष्णुः तथा । स्फुरत्पृथुललाटश्रीर्नृपो भृगुकच्छपुरवत् । पृथुना ललाटेन श्रीर्यस्य स तथा । पक्षे पृथुला ललाटश्रीः लाटदेशश्रीर्यस्मात् तत्तथा । अलिकान्तस्थितिं वहन् तिलकं पद्मवत् । अलिकं भालं, तस्यान्तर्मध्ये स्थितिस्तां । पक्षेऽलिः भ्रमरः, तेन कान्ता मनोज्ञा या स्थितिस्तां तथा । प्रतिभालासितस्थितिः तिलकः कविवत् । प्रति सामस्त्येन, भाले आसिता स्थितिर्यस्य स तथा । पक्षे प्रतिभा बुद्धिस्तया लासित(ता) स्थितिर्यस्य स तथा । उच्चैःश्रवस्थितिं बिभ्रन्नृप इन्द्रवत् । उच्चैरतिशयेन, कर्णस्थितिं । पक्षे उच्चैःश्रवाः तुरङ्गस्तस्य स्थितिं तथा । अधिकर्णस्थितिं बिभ्रन्नृपो दरिद्रवत् । कर्णस्थितिं ।पक्षे अधिकऋणस्थितिं तथा । वहन् वैश्रवणस्थितिं नृपः कैलासवत् । वै निश्चयेन, श्रवणस्थितिं । पक्षे वैश्रवणस्य धनदस्य स्थितिं तथा । विश्वेक्षणस्थितिं बिभ्रन्नृपो हरिवत् । सर्वैर्लोकैर्नस्थितिं सहस्राक्षवत् । पक्षे विश्वे लोकमध्ये, क्षणस्य उत्सवस्य स्थितिं तथा । नेत्राभोगमनोहरो नृपो धनिवत् । नेत्रे लोचने, तयोरासामस्त्येन, भोगस्तेन मनोहरः । पक्षे नेत्रस्य वस्त्रस्य आभोगस्तेन मनोहरः तथा । नयनोदितवैभवो नृपो मुनिवत्, मन्त्रिवद्वा । नयनाभ्यां मुदितवैभवो यस्य स तथा । पक्षे उभयत्र नयेन न्यायेन, नोदितः प्रेरितो वैभवो यस्य स तथा । स्पष्टां बकस्थितिं वहन्नृपः सरोवरवत् । अम्बके नेत्रे, तयोः स्थितिं । पक्षे बकस्थितिं । सदा लोचनभासुरो नृपो मन्त्रिवत् । सदा लोचनाभ्यां भासुरः । पक्षे सत् आलोचनेन भासुरस्तथा । उल्लोचनमितद्युतिर्नृपो गृहवत् । उत्प्राबल्येन, नेत्रमितद्युतिः । पक्षे उल्लोचनमितद्युतिः चन्द्रोदयमितद्युतिः तथा । सुदर्शनमनोरमो नृपो विष्णुवत् । दर्शने नेत्रे ताभ्यां मनोरमो मनोज्ञः । पक्षे सुदर्शनेन चक्रेण मनोरमः तथा । सुतारास्थितिपेशलो नृपश्चन्द्रवत् । तारास्थितिः कनीनिकास्थितिस्तया पेशलः । पक्षे ताराःनक्षत्राणि तासां स्थित्या पेशलः तथा । कलयन्नासिकास्थितिं नृपः पान्थवत् । नासिकास्थितिं । पक्षेन आसिकास्थितिं उपवेशनस्थितिं तथा । नक्रस्थितिमनोरमो नृपः समुद्रवत् । नासिकास्थित्या मनोरमः । पक्षे नक्राः जलचरजीवविशेषास्तेषां स्थित्या मनोरमः तथा । सदाधरमनोरमो नृपः पृथ्वीवत् । अधरेणौष्ठेन मनोरमः । पक्षे धराः पर्वताः तैर्मनोरमाः तथा । गण्डस्थितिमनोहारी नारीजनः वनवत् । गण्डयोः कपोलयोः स्थित्या मनोहारी । पक्षे गण्डाः जीवविशेषा, स्तेषां स्थित्या मनोहारि (री) । तथा हनुमद्वैभवान्वितो मुखप्रदेशो रामवत् । हनुमांश्चासौ वैभवान्वितश्च । पक्षे हनुमान् सेवकस्तस्य वैभवेनान्वितः तथा । कूर्चकस्थितिपेशलो मुखप्रदेशश्चित्रवत् । कूर्चमेव कूर्चकं श्मश्रु । पक्षे कूर्चकस्थितिः कूर्चिकास्थितिस्तया पेशलः तथा । उच्चैरदनभासुरो नृपो बालकवत् । दन्तभासुरः । पक्षे अदनभासुरः तथा । असौ सदनस्थितिर्नृपः सुभोजिवत् । सदन्तस्थितिः । पक्षे सत् अशनस्थितिः तथा । राजदत्त-

स्थितिं बिभ्रत् नृपो राजदारवत् । अग्रदन्तचतुष्कस्थितिम् । पक्षे राजन्तस्तथा । शोभमाना अन्तर्मध्येस्थितिस्तां तथा । रसनाभोगभासुरः सर्पो नारीनितम्बवत् । जिह्वाभोगस्तेन । पक्षे मेखलाभोगेन भासुरः तथा । घण्टिकास्थितिपेशलो नृपो गजवत् । घण्टिकालम्बिका पक्षे घण्टिका घण्टा तथा । अधिकं धरयान्वित उभयथाऽपि नृपः । कन्धरा ग्रीवा । पक्षेऽधिकं धरया पृथ्व्यान्वितः तथा । सुग्रीवोचितवैभवो नृपो रामवत् । सुग्रीवा कन्धरा तया उचित(:) वैभवो यस्य स तथा । पक्षे सुग्रीवराज्ञा उचितवैभवः तथा । स्कन्धस्थितिमनोहारी नृपः मणिवत् । स्कन्धोंऽसः, तस्य स्थितिस्तया । पक्षे स्कन्धो नियतकालावधिः, कांधां पाँजरां इति प्रसिद्धस्तस्य स्थित्या तथा । गलच्छायामनोहरो नृपः कृष्णपक्षचन्द्रवत् । कण्ठस्य छायया शोभया । पक्षे गलन्ती पतन्ती छाया शोभा तया तथा । अधिकण्ठमनोरमो नृपो मन्त्रवत् । कण्ठमधिलक्ष्यीकृत्य मनोरमः । पक्षेऽधिकण्ठकारेण मनोरमः तथा । विभुजातिमनोहर उभयथाऽपि नृपः विशिष्टभुजाभ्यामतिमनोहरः । पक्षे विभुजातिर्नृपजातिस्तया मनोहरः तथा । स्फुरद्बाहोरुचिं बिभ्रन्नृपः सैन्यनिवेशवत् । बाहोर्भुजस्य रुचिं कान्तिं । पक्षे बवयोरैक्यात् वाहास्तुरङ्गाः, स्फुरन्तस्तुरङ्गा यत्र स तथा, एवंविधः सन् रुचिं बिभ्रत् तथा । समदोर्जितवैभवो नृपः कुम्भिवत् । समदोर्भ्यां बाहुभ्यां जितो वैभवोऽर्थाद्वैरिसम्पत् येन स तथा । पक्षे समदं मदयुक्तं, ऊर्जितं बलं, तस्य वैभवो यस्य स तथा । कक्षास्थितिमनोहरो नृपो वादिवत् । कक्षा बाह्वधोभागः । पक्षे कक्षा प्रतिज्ञा तस्याः स्थित्या तथा । सश्रीकफणिवैभवो नृपः पातालवत् । स प्रसिद्धः, श्रिया उपलक्षितः कफणिः श्रीकफणिः, तस्य वैभवो यस्य स तथा । पक्षे सश्रीकाः फणिनस्तेषां वैभवो यत्र तत्तथा । नितान्तमणिबन्धवान् नृपो रथवत् । मणिबन्धः करादिः तद्वान् । पक्षे नितान्तमत्यर्थं नेमिरक्षाग्रकीले 'त्वण्यणी नाभिस्तु पिण्डिका' (अ. चि. ३.४२०) इतिवचनादणिस्तस्य बन्धस्तद्वान् तथा । करस्थितिमनोहरो नृपात्मजो नृपवत् । हस्तस्थित्या मनोहरः । पक्षे करो दण्डस्तस्य स्थितिस्तया तथा । सश्रीकरचितस्थितिर्नृपो धनिवत् । श्रीहस्तेन चिता व्याप्ता, स्थितिर्यस्य स तथा । पक्षे सश्रीका रचिता स्थितिर्येन स तथा । करभासितवैभवो नृप उष्ट्रपालवत् । हस्तेन भासितः शोभित वैभवो यस्य स तथा । पक्षे करभैरुष्ट्रै, आभितो व्याप्तो, वैभवो यस्य स तथा । तथा स्पष्टाङ्गुलस्थितिं वहन् हस्तो गान्धिकवत् । अङ्गुलोऽङ्गुष्ठः, स्पष्टश्चासौ अङ्गुलश्च स्पष्टाङ्गुल,स्तस्य स्थितिः ताम् । पक्षे गुडस्थितिं तथा । कामांकुशस्थितिं वहन् नृपो हस्तिवत् । नखस्थितिं । पक्षे कामं अत्यर्थं, अंकुशस्थितिं तथा । सदाधिकरजस्थितिर्नृपः सैन्यवत् । अधिनखस्थितिः । पक्षे रजस्थितिः तथा । नरवरस्थितिभासुरो नृपो वर्षाकवत् । नखस्थित्या । पक्षे न कठोरस्थित्या भासुरः । तथा सुसम्पन्नखचितस्थितिर्नृपः प्रासादवत् । सुसम्पन्नखैः सश्रीकनखैः, चिता व्याप्ता, स्थितिः । पक्षे सुसम्पन्ने खे आकाशे, व्याप्तस्थितिः तथा । प्रहस्तस्थितिपेशलो गायनो रावणवत् । 'प्रहस्तस्तालिकातालः' इति वचनात् (अ. चि. ३.२६०) प्रहस्तश्चपेटस्तस्य स्थित्या । पक्षे प्रहस्तो रावणप्रतीहारस्तस्य स्थित्या तथा । तालिकास्थितिसुन्दरो गायनो वनवत् । तालिका ताला तस्याः स्थित्या । पक्षे ताडिकावृक्षः तस्य स्थित्या तथा । अवक्रोडक्षणान्वितो नृपो महापुरुषवत् । अवबद्धस्य क्रोडस्य उत्सङ्गस्य, क्षणः उत्सवस्तेन सहितः । पक्षे अवक्रः सरलः, डलयोरैक्याल्लक्षणान्वितश्च तथा । स्पष्टमुत्सङ्गपेशलो नृपः सकान्तस्त्रीवत् । उत्सङ्गपेशलः । पक्षे स्पष्टामुद्धर्षस्तस्याः सङ्गस्तेन पेशलः तथा । उच्चैरङ्कसमन्वितो नृपो दुष्कालवत् । अङ्क उत्सङ्गः । पक्षे रंकसमन्वितः तथा । प्रौढो रसश्रियं बिभ्रत् सुपुरुषो घटवत् । प्रौढहृदयस्थ श्रियं । पक्षे प्रौढः सन् रसश्रियं पानीयश्रियं तथा । समस्तनोदिताभोगो नारीजनो मुनिवत् । स्तनोदिताभोगः । पक्षे समस्तं यथा स्यात् तथा नोदितोऽपहृत आ समन्तात् भोगो येन अथवा नोदितः प्रेरितः आभोगोऽर्थाद् ज्ञानप्रपञ्चो येन स तथा । तथा कुचेष्टाभोगभासुरो नारीजनः अधमवत् । कुचाभ्यामिष्टाभोगः । पक्षे कुचेष्टाया आभोगः तथा । द्विपयोधरसाटोपो नारीजनो नृपवत् । द्विपयोधराभ्यां साटोपः । पक्षे द्विपो हस्ती, योधाः सुभटा,स्तेषां रसेनाटोपो यस्य स तथा । सदाऽपि चण्डसंरम्भो गणेशो नृपवत् । पिचण्डो जठरं, तस्य संरम्भ आटोपो, यस्य स तथा । पक्षे सदापि निरन्तरमपि, चण्डः प्रचण्डः, संरम्भो यस्य स तथा । प्रौढोदरस्थितिं वहन् विनायकः शैलवत् । उदरस्थितिं । पक्षे प्रौढः सन् गर्त्तास्थितिं भयस्थितिं, वा तथा । नाभिभूतस्थितिं वहन् धाताभिमानिवत् । नाभिस्तुन्दकूपिका, ततो

भूता उत्पन्ना स्थितिस्तां । पक्षे न अभिभूतस्थितिं तथा । कटकान्तःस्थितिं वहन् पुष्टनरो नृपवत् । कटः कटिः, श्रोणिरिति यावत्तेन कान्तां स्थितिं । पक्षे कटकस्यान्तर्मध्ये स्थितिं तथा वहन् । वैकटिकाभोगं नारीजनः पुरवत् । वै निश्चितं ह्रस्वा कटिः कटिका तस्याभोगः । पक्षे वैकटिको मणिकारस्तस्याभोगं तथा । सर्वदा रोहपेशलः नारीजनः सुभगवत् । सर्वदारोहो नितम्बस्तेन, पेशलः । पक्षे सर्वदाराणां ऊहस्तेन पेशलः तथा । अहो सज्जधनस्थितिर्नारीजनो नभोवत् । सत् जघनस्य स्थितिर्यस्य स तथा । पक्षे सज्जा धनस्थितिर्मेघस्थितिर्यत्र तत्तथा । सज्जानुगतवैभवो नृपो धनिवत् । सन् जानुगतवैभवो यस्य भवो स तथा । पक्षे सज्जोऽनुगतो वैभवो यस्य स तथा । सदापि चण्डिकाभोगो नर ईश्वरवत् 'पिण्डिका नुपचण्डिका' इति वचनात् (अ. चि. ३. २९९) पिण्डिका । तस्या आभोगो यस्य स तथा । पक्षे सदापि निरन्तरमपि चण्डिका पार्वती, तस्या आभोगो यस्य स तथा । अपूर्वचरणस्थानो राजा सुभटवत् । अपूर्वचरणयोः स्थानं यस्य स तथा । पक्षे न विद्यते पूर्वो यत्र स अपूर्वः, अपूर्वश्चासौ चरणश्चापूर्वचरणः, रण इत्यर्थस्तत्र स्थानं स्थितिर्यस्य स तथा । द्विपादरचितस्थितिः नरो नृपवत् । द्विपादाभ्यां रचितस्थितिः । पक्षे द्विपानामादरस्तेन व्याप्तस्थितिः तथा । सदा चलनश्रियं बिभ्रन्नर्तको भूमिवत् । पादश्रियं । पक्षे अचलनश्रीः स्थिरश्रीस्तां ।

अथ तिर्यग्वर्णनाय तदङ्गोपाङ्गशब्दाश्लेषो यथा—शृङ्गारोपचितस्थितिर्वृषभः स्त्रीवत् । शृङ्गयोर्विषाणयोरारोपस्तस्य स्थितिर्यस्य स तथा । पक्षे शृङ्गारेण उपचिता स्थितिर्यस्याः सा तथा । सद्विषाणां श्रियं वहन् वृषभः सर्पवत् सत् विषाणां सत् श्रियं । पक्षे सद्विषाणां विद्यमानकालकूटानां श्रियं तथा । विश्वेऽत्र पुच्छविभ्राजी वृषभो रसितलोहवत् । पुच्छविभ्राजी । पक्षे विश्वमध्येऽत्र पुच्छविशोभि तथा । उच्चंचूतः श्रियं वहन् हंसो वनवत् । उत् प्राबल्येन, चञ्चूतः श्रियं । पक्षे उच्चं यथा स्यात्तथा चूतश्रियं आम्रश्रियं तथा । त्रोटितस्थितिमुद्वहन् पक्षी मुनिवत् । त्रोटितः चञ्चूतः स्थितिं । पक्षे अर्थात् कर्मणां त्रोटिता चासौ स्थितिश्च तां तथा । सदा पिच्छविराजितः पक्षी रविवत् । पिच्छैः पक्षैर्विराजितः । पक्षे च्छविः कान्तिस्तया राजितः तथा । विपक्षोचितवैभवः पक्षी नृपवत् । विशिष्टपक्षे रुचितवैभवः पक्षी । विशिष्टपक्षे रुचितवैभवो यस्य तथा । पक्षे विपक्षा वैरिणस्तेभ्य उचितवैभवो यस्य स तथा । स्फुरद्विपक्षस्थितिः पक्षी रणवत् । स्फुरन्ती द्विपक्षाभ्यां स्थितिर्यस्य स तथा । पक्षे विपक्षाणां वैरिणां स्थितिर्यत्र तत् तथा ।।छ।।

इति श्रीतपागच्छाधिनायक पातसाहि श्री अकब्बर प्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री ४ श्री हीरविजयसूरीश्वरशिष्य पण्डित श्रीशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिकरन्दे श्लेषसिद्धि प्रतानप्राप्तसर्ववर्णनस्तबकोद्योतको द्वितीय प्रसरः ।।छ।। २

॥ ३.३ ॥

अथोद्दिष्टवर्णनम्

का. क. वर्णादिभिर्विभिन्नस्योद्दिष्टवस्तुद्वयस्य यत् ।
अभेदः क्रियते श्लेषात्तत्स्यादुद्दिष्टवर्णनम् ॥५२॥

विभिन्नवर्णद्वयानां षड्भेदाः । यथा श्वेतश्यामौ, श्वेतरक्तौ, श्वेतपीतौ, रक्तश्यामौ, पीतश्यामौ, पीतरक्तौ । एषां क्रमेण शब्दा यथा—

श्वेतश्यामौ विधुर्हरितारा: घनसारशम्भुनागेन्द्राः ।
अभ्राश्मगर्भरामानन्तार्जुनचन्द्रहाससिंहीजाः ॥५३॥

हरेर्जिष्णोर्घनाब्धिभ्यो गजाः सिन्धुर्मुरारितः ।
अद्भ्यो वाहोऽम्बुजाः कृष्णात् यमुनाकुम्भितो द्विषः ॥५४॥

कृष्णाथाग्रगतटिनीवाचकशब्दाग्रतो वरो योज्यः ।
नीरदघनोपलसितसदा, हिमकरसिन्धुवेणिपृथुलाजाः ॥५५॥
शङ्खकरतारकेश सदाकाशव्योमकेशतालाङ्काः ।
नीलांशुकाधिकेशारिष्टसदासिन्चयकलकण्ठाः ॥५६॥

श्वेतश्यामावित्यादि । विधुवैभवभासुरः; विधुश्चन्द्रो, विष्णुश्च । हरिहारितरद्युतिः; हरिशब्देन चन्द्रविष्णू । तारास्फारतरद्युतिः; तारा शब्देन तारका, नयनकनीनिका च । घनसाररुचिस्फारः; कृष्णपक्षे घना मेघास्तद्वत्साररुचिः, श्वेतपक्षे घनसारशब्दः कर्पूरवाची । शम्भुशोभामनोहरः; शम्भुशब्देन हरिहरौ । नागेन्द्ररुचिरच्छायः; नागेन्द्रशब्देन शेषो हस्तीन्द्रश्च । अभ्रप्रभामनोहारी; अभ्रशब्देन मेघोऽभ्रकञ्च । अश्मगर्भसगर्भांशुः; अश्मगर्भशब्देन मरकतं, पाषाणगर्भश्च । सदा रामाभिरामश्रीः; रामशब्देन दाशरथिर्बलदेवश्च । अनन्तरुचिरोचिष्णुः; अनन्तशब्देन विष्णुर्बलदेवश्च । अर्जुनच्छविपेशलः; अर्जुनशब्देन पार्थो धवलवर्णश्च । चन्द्रहासप्रकाशश्रीः; चन्द्रहासशब्देन खड्गः, । चन्द्रस्य हासः, प्रकाशश्च । सिंहीजरुचिरोचितः; सिंहीजशब्देन राहुः, सिंहश्च ।

हरेर्जिष्णोरित्यादि । हरिशब्दात् जिष्णुशब्दात् घनवाचकशब्देभ्योऽब्धिवाचकशब्देभ्यश्च गजवाचकाः शब्दाः प्रयुज्यन्ते । यथा—

हरिकुम्भिनिभज्योतिर्जिष्णुहस्तिनिभप्रभः ।
मेघदन्तावलच्छायः समुद्रद्विरदद्युतिः ॥

म. टी. अथोद्दिष्टवर्णनमाह । विधुहरीति–विधुप्रभृतिभिस्त्रयोदशशब्दैः श्वेतश्यामार्थवाचकैः श्वेतश्यामयोः श्लेषो भवतीति । हरेरिति–हरिजिष्णुघनाब्धिभ्यः पुरतो गजवाचक–शब्दाः प्रयुज्यन्ते । तथा मुरारिवाचकशब्देभ्यः सिन्धुशब्दः प्रयुज्यते । तथा जलवाचकशब्देभ्यो वाहशब्दः प्रयुज्यते । तथा कृष्णशब्दात् परतः अम्बुजवाचकाः शब्दा योज्यन्ते । तथा यमुनावाचकशब्देभ्यः कुम्भिवाचकशब्देभ्यश्च वैरिवाचकाः शब्दाः प्रयुज्यन्ते । कृष्णवाचकशब्दानामग्रे नदीवाचकाः शब्दाः, तेषामग्रे च वरशब्दो योज्यते । एतैः नीरदादिकलकण्ठान्तैश्च शब्दैर्विशेषणे श्वेतश्यामयोः श्लेषः स्यात् ।

उदाहरणानि यथा—विधुवैभवभासुरो नृपश्लोको वैरिवत् । विधुश्चन्द्रस्तस्य वैभवः श्वेतसम्पत् तद्वद् भासुरः । पक्षे विधुर्विष्णुस्तस्य वैभवः श्यामत्वं, तद्वद् भासुरो मनोहरः, तथा । हरिहारितरद्युतिः नृपयशो वैरियशोवत् । हरिश्चन्द्रस्तद्वद् हारितरा मनोहरतरा द्युतिर्यस्य तत्तथा । पक्षे हरिर्विष्णुस्तद्वद् मनोहरतरा द्युतिर्यस्य तत्तथा । तारा स्फारतरद्युतिर्नृपयशोराशिर्वैरियशोवत् । स्फारतरा चाऽसौ द्युतिश्च स्फारतरद्युतिः तारानक्षत्रं, तद्वत् स्फारतरद्युतिर्यस्य स तथा । पक्षे तारानयनकनीनिका तद्वद् स्फारतरद्युतिर्यस्य तत्तथा । घनसाररुचिस्फारो नृपश्लोको वैरियशोवत् । घनसारः कर्पूरस्तस्य रुचिः कान्तिस्तया स्फारः मनोज्ञः । पक्षे घना मेघास्तद्वत् । साररुच्या स्फारः तथा । शम्भुशोभामनोहरः प्रासादो राहुवत् । शम्भुर्महेश्वर, स्तस्य शोभा श्वेतप्रभा, तथा मनोहरः । पक्षे शम्भुः कृष्णस्तस्य शोभा तथा मनोहरः तथा । नागेन्द्ररुचिरच्छायः कैलासः तमोवत् । नागेन्द्रः शेषनागस्तद्वद् रुचिरा छाया यस्य स तथा । पक्षे हस्तीन्द्रस्तद्वद् रुचिरच्छायः तथा । अभ्रप्रभामनोहारी कैलासः तमस्तोमवत् । अभ्रमभ्रकं, तस्य प्रभा, तद्वन्मनोहारी । पक्षे अभ्रो मेघस्तस्य प्रभाकान्तिस्तद्वन्मनोहारी तथा । अश्मगर्भसगर्भांशुः चन्द्रो राहुवत् । अश्म पाषाणस्तस्य गर्भः मध्यवर्तिश्वेतभागस्तस्य सगर्भा अंशवः किरणा यस्य स तथा । पक्षे अश्वगर्भ्र मरकतं रत्नं, तस्य सगर्भो अंशवो यस्य स तथा । सदारामाभिरामश्रीः कैलासो रात्रिवत् ।

का.क. कृष्णवर्णपक्षे हरिजिष्णुशब्दौ विष्णुवाचकौ । हरिश्च कुम्भी च जिष्णुश्च हस्ती च तद्वत् द्युतिः । श्वेतवर्णपक्षे हरिजिष्णुशब्दाविन्द्रवाचकौ । ततो हरेः कुम्भी जिष्णुर्हस्ती ऐरावणस्तद्वद् द्युतिः । तथा कृष्णवर्णपक्षे मेघाश्च दन्तावलाश्च, समुद्राश्च द्विरदाश्च तद्वत् द्युतिः । श्वेतपक्षे मेघहस्ती, समुद्रहस्ती, ऐरावणः, तद्वत् द्युतिः ।

तथा मुरारिवाचकशब्देभ्यः सिन्धुशब्दः प्रयुज्यते । विष्णुसिन्धुसमप्रभः । कृष्णपक्षे मुरारिश्च सिन्धुश्च, तद्वत् द्युतिः । श्वेतपक्षे मुरारेः सिन्धुर्नदी गङ्गा, तद्वत् द्युतिः ।

तथा जलवाचकशब्देभ्यो वाहशब्दः प्रयुज्यते । जलवाहसमप्रभः । कृष्णपक्षे जलवाहो मेघस्तद्वत् द्युतिः । श्वेतपक्षे जलस्य वाहस्तद्वत् द्युतिः ।

कृष्णशब्दादम्बुजवाचिनः शब्दाः प्रयुज्यन्ते । कृष्णाम्भोजसमप्रभः । कृष्णपक्षे कृष्णाम्भोजं नीलोत्पलम् । श्वेतपक्षे कृष्णस्य हरेरम्भोजं नाभिपुण्डरीकं, तद्वत् द्युतिः ।

यमुनावाचकशब्देभ्यस्तथा कुम्भिवाचकशब्देभ्यो द्वेषिवाचिनः शब्दाः प्रयुज्यन्ते । यमुनारिसमप्रभः । कुम्भिद्वेषिरुचिः सदा । कृष्णपक्षे यमुनाया अरिरूपा स्पर्धिनी रुचिर्यस्य, कुम्भिनां द्वेषिणी रुचिर्यस्य । श्वेतपक्षे यमुनारिर्बलदेवः, कुम्भिद्वेषी सिंहस्तद्वत् द्युतिः ।

म.टी. सदा निरन्तरं रामो बलदेवस्तद्वदभिरामा श्रीर्यस्य स तथा । पक्षे रामो दाशरथिस्तद्वदभिरामश्रीस्तथा । अनन्तरुचिरोचिष्णुः कैलासो राहुवत् । अनन्तो बलदेवस्तस्य रुचिः कान्तिस्तद्वद् रोचिष्णुः दीपनशीलः । पक्षे अनन्तो विष्णुस्तस्य रुचिस्तद्वद् रोचिष्णुः तथा । अर्जुनच्छविपेशलः कैलासः तमोवत् । अर्जुनो धवलः, अर्जुना चासौ छविश्चार्जुनच्छविस्तया पेशलः । पक्षे अर्जुनः पार्थस्तस्य छविस्तया पेशलस्तथा । चन्द्रहासप्रकाशश्रीः कैलासो राहुवत् । चन्द्रश्च हासश्च चन्द्रहासौ तयोरिव प्रकाशश्रीर्यस्य स तथा । पक्षे चन्द्रहासः खड्गस्तद्वत् प्रकाशश्रीर्यस्य स तथा । सिंहीजरुचिरोचितः कैलासः तमस्तोमवत् । सिंहीजः सिंहस्तस्य रुचिः कान्तिस्तया रोचितः शोभितः । पक्षे सिंहीजो राहुस्तस्य रुचिस्तया रोचितः इत्यादि ।

अथ हरेर्जिष्णोरित्याद्युदाहरणानि वृत्तावेव विवृतान्यतोऽस्माभिरपि न विव्रियन्ते ।

का.क. कृष्णार्थेत्यादि । कृष्णवाचकशब्दात् पुरःस्थितनदीवाचकशब्देभ्यो वरशब्दः प्रयोज्यः । कृष्णकुल्यावरद्युतिः । श्वेतपक्षे कृष्णकुल्या गङ्गा, तद्वत् द्युतिः । श्यामपक्षे कृष्णो विष्णुः, कुल्यावरः, समुद्रः, तद्वत् द्युतिः । नीरदद्युतिभासुरः ।

नीरदो मेघस्तद्वत् । पक्षे, निश्चिता रदवत् दन्तवत् द्युतिः । घनोपलसितश्रीः । घनवत् मेघवत्, उपलसिता श्रीः । पक्षे घनो घनोपलः करकस्तद्वत्सिता शुभ्रा श्रीः । सदाहिमकरद्युतिः । हिमकरश्चन्द्रः, तद्वत् । पक्षे अहिः सर्पो, मकरश्च । सिन्धुवेणिश्रियं वहन् । सिन्धुर्नदी, तस्याः वेणिः प्रवाहः, तद्वत् । पक्षे सिन्धुः समद्रो, वेणिः केशपाशबन्धः, तद्वत् । पृथुलाजसमद्युतिः । पृथुलाजवत् कान्तिः । पक्षे पृथुला अजसमा विष्णुसमा ।

शङ्खकरेत्यादि । युक्तः शङ्खकरश्रिया । शङ्खस्य कराः किरणानि । पक्षे शङ्खकरो विष्णुः । तारकेशच्छविः । तारकेशश्चन्द्रः, तद्वत् । पक्षे तारा दीप्ता केशवत् छविः । सदाकाशश्रीः । सद्विद्यमाना, आकाशवत् । पक्षे सदा सर्वदा, काशवत् । व्योमकेशच्छविः । व्योम च केशाश्च, तद्वत् । पक्षे व्योमेशः शिवः, तद्वत् । काललक्ष्मश्रीः । तालश्च लक्ष्म च, तद्वत् । पक्षे काललक्ष्मा बलदेवः । नीलांशुकश्रीः । नीलानां अंशुकानां किरणानां, श्रीः । पक्षे नीलांशुको बलदेवः, तद्वत् । अधिकेशच्छायः । अधि सामस्त्येन, केशवत् । पक्षे अधिकं ईशवत् । अरिष्टरुचिः । अरिष्टशब्देन तत्रकाकः । यथा—

अरिष्टो लशुने निम्बे फेनेऽल्पे कङ्ककाकयोः ।
अरिष्टं सूत्यगारे तत् चिन्हे तक्रे शुभेऽशुभे ॥

सदासिचयरोचिष्णुः । सिचयं वस्त्रं, तद्वत् । पक्षे असिचयः खड्गश्रेणिः । कलकण्ठद्युतिः । कलकण्ठः पिकः हंसश्च । यथा—

कलकण्ठः पिके पारावते हंसे कलध्वनौ ।

श्लोकोत्तीर्णाः शब्दाः यथा— वहन् कलभवच्छायाम् । सदाधिकेशवच्छायः । अन्धकारातिदीधितिः । अनेकपायसच्छायः । वपुर्महोदधिच्छायं वहन् । स्पष्टांशुकश्रियं बिभ्रत् । धौताम्बरश्रियं श्रयन् । स्फटिकान्तश्रियं बिभ्रत् । स्फटिकाचलसल्लक्ष्मीः । स्फटी सर्पः । पुरो गजलसल्लक्ष्मीः । जलमुक्तान्तदीधितिः । जलं च मुक्ताश्च तद्वदन्ते दीधितिर्यस्य । पक्षे जलमुक् मेघः, तद्वत् तान्ता । अवश्यायश्रियं वहन् । सैन्धवद्युतिविद्योती । कलितो माधवश्रिया शोभते, वराहरोचितच्छाया यन्मूर्तिः । वृषाकपिद्युतिद्योती । वृषाकपिशब्देन कृष्णशिवौ ॥

मकरन्दटीकायां श्वेतरक्ताविति ।

रक्तश्वेतौ हरिशुचिपुष्करशतपत्रसूर्यकान्ताब्जाः ।
नवहंसमहापद्मार्कसोदराः कनलकीलाले ॥५७॥

सुहृद्रत्नानि भानुभ्यो वह्निरत्नरदांशुकैः ।

म.टी. श्लोकोत्तीर्णाः शब्दाः यथा—वहन् कलभवच्छायां कैलासो राहुवत् । भवस्येश्वरस्य, छाया कान्तिः भवच्छाया कला, मनोज्ञा चासौ भवच्छाया च, तां वहन् । पक्षे कलभवत् हस्तिबालकवत्, छायां कान्ति, वहन् तथा । सदाऽधिकेशवच्छायश्चन्द्रो राहुवत् । सदा अधिकइकारो यत्रैवंविधो यः शवस्तथा च शिव ईश्वरस्तद्वत् छाया यस्य स तथा । पक्षे अधि सामस्त्येन, केशववत् कृष्णवत्, छाया यस्य स तथा । अन्धकारातिदीधितिः कैलासो राहुवत् । अन्धकारातिः ईश्वरस्तद्वद्दीधितिर्यस्य स तथा । पक्षे अन्धाया कारा, अन्धा चासौ कारा, चान्धकारा, तद्वदतिदीधितिर्यस्य स तथा । अथवा अन्धकोऽन्धकारं तस्यारिरूपा दीधितिरथवा अन्धकारवत् तमोवत् दीधितिर्यस्येति तथा । अनेकपायसच्छायः कैलासो राहुवत् । अनेका पायसवत् परमान्नवत् छाया यस्य स तथा । पक्षे अनेकयोगजः, आयसं च लोहसम्बन्धि शस्त्रादि, तद्वत् छाया यस्य स तथा । वपुर्महोदधिच्छायं वहन् कैलासो राहुवत् । वपुर्महो वपुस्तेजः । कथम्भूतं ? दधिच्छायं, दधि तद्वत् छाया यस्य तत्तथा । तत्पक्षे वपुः । कथम्भूतं, महोदधिच्छायं ? महोदधिः समुद्र,स्तद्वच्छाया यस्य तत्तथा ।

स्पष्टांशकश्रियं वहन् श्रयन्, कैलासो राहुवत् । स्पष्टं निर्मलं, अंशुक वस्त्रं, तस्य श्रीस्तां श्रयन् । पक्षे स्पष्टां प्रकटांशुकश्रियं नीलश्यामयोरैक्यात्तथा । धौताम्बरश्रियं श्रयन् कैलासो राहुवत् । धौतं क्षालितं, यदम्बरं वस्त्रं, तस्य श्रीस्ताम्। पक्षे धौतं वार्दलरहितं, यदम्बरं आकाशं, तस्य श्रीस्तां तथा । स्फटिकान्तश्रियं बिभ्रत् कैलासो राहुवत् । स्फटिकानामन्तर्मध्यं, तद्वत् श्रीस्तामथवा स्फटिकान्तश्रियं स्फटिकस्वरूपश्रियं; अन्तशब्दस्य स्वरूपवाचकत्वात् । पक्षे स्फटाः सन्त्यस्य स्फटी सर्पस्तद्वत कान्तश्रियम् । तथा स्फटिकाचलसल्लक्ष्मीः ईश्वरः तमोवत् । स्फटिकाचलवत् सती लक्ष्मीर्यस्य स तथा । पक्षे सर्पकाचयोरिव लसन्ती लक्ष्मीर्यस्य तत् तथा । पुरोगजलसल्लक्ष्मीः कैलासो राहुवत् । पुरोगा प्रधाना, जलवत् सल्लक्ष्मीर्यस्य स तथा । पक्षे पुरोऽग्रे, गजवत् लसल्लक्ष्मीर्यस्य स तथा । जलमुक्तान्तदीधितिः कैलासो राहुवत् । जलं च मुक्ताफलं च तद्वत्, अन्ते दीधितिः कान्तिर्यस्य स तथा । पक्षे जलमुक् मेघस्तद्वत्तान्तदीधितिः तथा । अवश्यायश्रियं वहन् कैलासौ राहुवत् । अवश्यायो हिमं, तस्य श्रियम् । पक्षेऽवश्यं निश्चितं, अयो लोहं, तद्वत् श्रियं तथा । सैन्धवद्युतिविद्योती कैलासो राहुवत् । सैन्धवद्युतिवद् विद्योती । पक्षे सिन्धौ भवा सैन्धवा, समुद्रजा द्युतिस्तद्वद् विद्योती तथा। कलितो माधवश्रिया शोभते कैलासकान्तिः राहुवत् । उमाधवो महेश्वरस्तस्य श्रीस्तया कलिता । पक्षे माधवो विष्णुस्तस्य श्रीस्तया कलितो युक्तः तथा ।

वराहरोचितच्छाया यन्मूर्तिः तमोराजिवत् । वरा प्रधाना, हरवदुचिता योग्या, छाया यस्याः सा तथा; यस्येश्वरस्य मूर्तिर्यन्मूर्तिः शोभते । पक्षे वराहः शूकरः, तद्वद् रोचिता शोभिता, छाया कान्तिर्यस्याः सा तथा । वराहरोचितच्छाया इति पाठान्तरं, तदाहारवदुचितच्छाया । पक्षे वराहवत् आ सामस्त्येन रोचितच्छाया तथा । वृषा कपिद्युतिविद्योती कैलासो राहुवत् । वृषाकपिः शिवस्तस्य द्युतिस्तद्वद् विद्योती । पक्षे वृषाकपिः कृष्णस्तस्य द्युतिस्तद्वत् द्योती इत्यादि ।

का.क. जलेभ्यो जन्मशोभाभिः सरोजकुमुदारिभिः ॥५८॥

वृषाकपिप्रभाशोभी सूर्योपलसितद्युतिः ।
सोमप्रभातरङ्गश्रीः सुधातुलसितद्युतिः ॥५९॥

रक्तेत्यादि । हरिवैभवभासुरः । हरिशब्देन रविचन्द्रौ । शुचिशोभाविभूषितः । शुचिशब्देन शुभ्रवर्णो वह्निश्च । यथा—

शुचिः शुद्धे सितेऽनले ।
ग्रीष्माषाढानुपहतेपूपधाशुद्धमन्त्रिणि ।
शृङ्गारे—इत्यनेकार्थः

पुष्करद्युतिरोचितः । पुष्करशब्देन जलकमले । शतपत्रप्रभाशोभी । शतपत्रशब्देन हंसकमले ।

सूर्यवाचकशब्देभ्यः कान्तशब्दः प्रयुज्यते । भानुकान्तततद्युतिः । रक्तपक्षे भानुवत्कान्ता, तथा विस्तीर्णा रुचिर्यस्य । श्वेतपक्षे भानुकान्तः सूर्यकान्तः, तद्वद्रुचिः । अब्जद्युतिमनोहारी । अब्जशब्देन चन्द्रकमले नवहंससमद्युतिः । नवहंसशब्देन बालार्कबालहंसौ । महापद्मांशुकद्युतिः । महापद्मस्य नागस्य अंशुकं वस्त्रं श्वेतम् । रक्तपक्षे कमलकिरणाः । अर्कसोदरदीधितिः । अर्कशब्देन स्फटिकादित्यौ । कमलच्छविभासुरः । कमलशब्देन पङ्कजजले । कीलालच्छविभासुरः । कीलालशब्देन रुधिरजले ।

सुहृद्रत्नानीत्यादि । भानुवाचकशब्देभ्यः सुहृद्वाचकशब्दाः रत्नवाचकशब्दाश्च प्रयुज्यन्ते । रविमित्रप्रभाशोभी ।

श्वेतपक्षे रविमित्रः चन्द्रः । रक्तपक्षे रवेर्मित्ररूपा प्रभा । भानुरत्ननिभद्युतिः । श्वेतपक्षे भानुरत्न सूर्यकान्तः । रक्तपक्षे रविर्मणिश्च ।

वह्निवाचकशब्देभ्यो रत्नवाचकशब्दाः प्रयुज्यन्ते । वह्निरत्नोपमद्युतिः । रक्तपक्षे वह्निश्च रत्नं च, तद्वत् । श्वेतपक्षे वह्नेे रत्नं सूर्यकान्तस्तद्वत् ।

रदवाचकशब्देभ्योंऽशुकवाचिनः शब्दाः प्रयुज्यन्ते । रदांशुकद्युतिद्योती । श्वेतपक्षे रदाश्च अंशुकानि च, तद्वत् द्युतिः । रक्तपक्षे रदांशुकोऽधरः, तद्वत् ।

जलवाचकशब्देभ्यो जन्मशोभावाचकाः शब्दाः प्रयुज्यन्ते । युक्तो जलजशोभया । श्वेतपक्षे जलजाता शोभा । रक्तपक्षे जलजं कमलं, तद्वत् । सरोजवाचकेभ्यः कुमुदवाचकेभ्यश्चारिवाचकशब्दाः प्रयुज्यन्ते । सरोजारिसमप्रभः । रक्तपक्षे सरोजानां अरिरूपा स्पर्धिनी प्रभा यस्य । श्वेतपक्षे सरोजारिश्चन्द्रस्तत्समा । कुमुदारिद्युतिद्योती । श्वेतपक्षे कुमुदानामरिरूपा स्पर्द्धिनी द्युतिर्या तया द्योती । रक्तपक्षे कुमुदारिरादित्यस्तद्वत् द्युतिः ।

वृषेत्यादि—वृषाकपिप्रभाशोभी । वृषाकपिशब्देन शिवानलौ । सूर्योपलसितद्युतिः । सूर्यवदुपलसिता । पक्षे सूर्योपलः सूर्यकान्तः, तद्वत् सिता शुभ्रा । सोमप्रभातरङ्गश्रीः । सोमः प्रशस्योदयः प्रभातस्य रङ्गः, तद्वत् । पक्षे सोमश्चन्द्रः, तस्य प्रभातरङ्गः कान्तिवीची, तद्वत् । सुधातुलसितद्युतिः । सुधावदतुला सिता शुभ्रा । पक्षे सुष्ठु धातुवल्लसिता ।

पीतश्वेतौ गौरद्विजराजकपर्दचन्द्रहंसार्काः ।
शम्भुमहारजतार्जुनहरि, हैमाष्टापदानि कलधौतम् ॥६०॥

हरिगोपत्योरस्तार्क्ष्यः कान्तो रवितश्च बान्धवास्तेभ्यः
वाममहाग्रगदेवादिगरयो विश्वेपिनाकिनोऽपि स्युः ॥६१॥

म.टी. अथ श्वेतरक्तौ[1] यथा—हरीत्यादि सूर्यवाचकशब्देभ्यः कान्तशब्दः प्रयुज्यते । सुहृद्रत्नानीति—भानुवाचकशब्देभ्यो मित्रवाचका रत्नवाचकाश्च शब्दाः प्रयुज्यन्ते । तथा वह्निवाचकशब्देभ्यो रत्नवाचकशब्दाः प्रयुजयन्ते । तथा रदवाचकशब्देभ्यः अंशुवाचकाः शब्दाः प्रयुज्यन्ते । तथा जलवाचकशब्देभ्यो जन्मवाचकाः शोभावाचकाश्च शब्दाः प्रयुज्यन्ते । तथा सरोजवाचकेभ्यः कुमुदवाचकेभ्यश्च शब्देभ्यः अरिवाचकाः शब्दाः प्रयुज्यन्ते इति शेषं सुगमम् । पीतश्वेतावित्यत्र, हरिगोपत्योरिति—हरिगोपतिशब्दाभ्यां पुरतः तार्क्ष्यशब्दः प्रयुज्यते । तथा रविवाचकशब्देभ्यः कान्तशब्दः प्रयुज्यते । तेभ्यो रविवाचकशब्देभ्यो बान्धववाचकशब्दाः प्रयुज्यन्ते । तथा वामशब्दस्य महाशब्दस्य च पुरो यो देवशब्दस्तस्य पुरतो गिरिवाचकाः शब्दाः प्रयुज्यन्ते । तथा विश्वे पिनाकिशब्दात् गिरिवाचकाः शब्दाः प्रयुज्यन्ते इति । शेषं सुगमम् ।

का.क. उच्चकैरजतान्तश्रीर्विधौ वर्णोपमां वहन् ।
सुशोभितारकूटश्रीः स्वर्णस्तोभसितद्युतिः ॥६२॥

मधुद्युति मनोहारी शङ्खकान्तिमनोरमः ।
दहनोत्पलसत्कान्तिर्गाङ्गेयच्छविसम्भ्रमः ॥६३॥

..पीतेत्यादि । गौरद्युतिमनोहारी । गौरशब्देन श्वेतपीते । द्विजराजप्रभाशोभी । द्विजराजशब्देन चन्द्रगरुडौ । कपर्दद्युतिविद्योती । कपर्दशब्देन वराटधूर्जटिजटाजूटौ । चन्द्रद्युतिमनोहरः । चन्द्रशब्देन शशी सुवर्णं च । हंसशोभाप्रशस्यश्रीः । हंसशब्देन रविचक्रवाकौ । अर्कलक्ष्मीमनोहरः । अर्कशब्देन स्फटिकादित्यौ । शम्भुशोभामनोहारी । शम्भ-

१. मूले तु "रक्तश्वेतौ" इति ।

शब्देन शिवब्रह्माणौ । महारजतदीधितिः । पीतपक्षे महारजतं सुवर्णं, तद्वत् । श्वेतपक्षे महती रजतवत् रूप्यवत् दीधितिर्यस्य । अर्जुनप्रभया शोभी । अर्जुनशब्देन तृणश्वेतौ । हरिप्रभामनोहारी । हरिशब्देन चन्द्रः पिङ्गलवर्णश्च । हैमस्तोमप्रभासोमः । पीतपक्षे हैमस्तोमः स्वर्णराशिः । सितपक्षे हिमराशिः । अष्टापदप्रभास्पष्टः । अष्टापदशब्देन सुवर्णशरभौ । कलधौतकलद्युतिः । कलधौतशब्देन रूप्यसुवर्णे ।

हरिगोपत्योरित्यादि । हरिगोपतिशब्दाभ्यां पुरस्ताक्ष्र्यशब्दः प्रयुज्यते । यथा—हरिताक्ष्र्यप्रभाशोभी पीतपक्षे । हरिर्भानुस्ताक्ष्र्यो गरुडस्तद्वत् । श्वेतपक्षे हरेरिन्द्रस्य ताक्ष्र्योऽश्व उच्चैश्श्रवास्तद्वत् । सदागोपतिताक्ष्र्यश्रीः । पीतपक्षे गोपतिर्भानुः, ताक्ष्र्यो गरुडः, तद्वत् । श्वेतपक्षे गोपतिरिन्द्रः, तस्य ताक्ष्र्योऽश्वः, तद्वत् द्युतिः ।

रविवाचकशब्देभ्यः कान्तशब्दः प्रयुज्यते । रविकान्तद्युतिद्योती । पीतपक्षे रविवत्कान्ता द्युतिः । श्वेतपक्षे रविकान्तः सूर्यकान्तस्तद्वत् द्युतिः ।

तेभ्यो रविवाचकशब्देभ्यो बान्धववाचकाः शब्दाः प्रयुज्यन्ते । रविबान्धवदीधितिः । पीतपक्षे रवेर्बान्धवरूपा दीधितिर्यस्य । श्वेतपक्षे रविबान्धवश्चन्द्रः, तद्वत् द्युतिः ।

वामशब्दस्य महाशब्दस्य चाऽग्रे यो देवशब्दः, तस्य पुरतो गिरिवाचिनः शब्दाः प्रयुज्यन्ते । वामदेवगिरिच्छायः । पीतपक्षे वामः प्रधानो देवगिरिर्मेरुः, तद्वत् । श्वेतपक्षे वामदेवः शिवः, तस्य गिरिः कैलासः, तद्वत् । महादेवगिरिद्युतिः । पीतपक्षे महांश्चासौ देवगिरिस्तद्वत् । श्वेतपक्षे महादेवः शिवः, तस्य गिरिः कैलासः, तद्वत् ।

तथा विश्वे पिनाकिशब्दाद्गिरिवाचकाः शब्दाः प्रयुज्यन्ते । विश्वेपिनाकिशैलश्रीः । श्वेतपक्षे विश्वे जगति, पिनाकिशैलः कैलासः, तद्वत् । पीतपक्षे विश्वेऽपि जगत्यपि, नाकिशैलो मेरुः, तद्वत् ।

उच्चकैरित्यादि । उच्चकैरजतान्तश्रीः । रजतवद्रूप्यवदन्ते श्रीः । पक्षे अजो ब्रह्मा, तद्वत्तान्ता श्रीः । विधौ चन्द्रे ब्रह्मणि च । सुशोभितारकूटश्रीः । तारं रूप्यं, तस्य कूटः । पक्षे सुशोभितआरकूटवत् रीतिवत् श्रीः । स्वर्णस्तोमसितद्युतिः । स्वर्णं सुवर्णम् । पक्षे सुष्ठु अर्णः, जलम् ।

मधु इत्यादि । मधुद्युतिमनोहारी । मधु क्षौद्रं दुग्धं च । शङ्खकान्तिमनोरमः । शङ्खः कम्बुः । पक्षे शङ्खो नागः । दहनोपलसत्कान्तिः । दहनवदुपलसन्ती । पक्षे दहनोपलः सूर्यकान्तः, तद्वत् । गाङ्गेयच्छविसम्भ्रमः । गाङ्गेयं सुवर्णम् । पक्षे गङ्गायाः छविः ।

रक्तश्यामौ पुष्करहरिर्विद्रुमनागरङ्गकमलकुजाः ।
उत्पलधनञ्जयवृषाकपिप्रवालानि पङ्कजच्छाया ॥६४॥

कृष्णाद्रत्नानि गुञ्जातः प्राग्रं सिन्दूरभूषणैः ।
द्विषस्तमोसिताब्जेभ्यः पद्मिनीभ्यो दलानि च ॥६५॥

कमलाधिपपद्मेशौ सुरागाहितसूर्यसूः ।
रत्नाकरवरश्रीकाः सदाधिकमलद्युतिः ॥६६॥

सदासिन्दूरमुज्जेता कालेयत्वं वहन् रुचा ।
स्फुटकामाङ्कुशच्छायां कलयन्नलिनश्रियम् ॥६७॥

स्फुटशोभनताम्रश्रीर्विदूरमणिदीधितिः ।
वराहस्वामिधामश्रीः सम्पन्नरवभाभरः ॥६८॥

रक्तेत्यादि । पुष्करद्युतिसुन्दरः । पुष्करशब्देन पद्माकाशौ । हरिशब्देन रविविष्णू । विद्रुमः प्रवालः, विशिष्टो द्रुमश्च । नागरङ्गश्रिया युतः । नागरङ्गो नारिङ्गफलं, तद्वत् । पक्षे नागः सर्पः, तद्वत् रङ्गः प्रभा । कमलं सरोरुहम् । पक्षे को यमः तथा मलञ्च । कुजशब्देन मङ्गलवृक्षौ । उत्पलं नीलाम्बुजम् । पक्षे उत्कृष्टपलवत् । धनञ्जयशब्देन पावकार्जुनौ । वृषाकपिशब्देन कृष्णाग्नी । 'वृषाकपिर्वासुदेवे शिवेऽग्नौ च' ।

प्रवालशब्देन प्रकृष्टकेशा विद्रुमश्च । पङ्कजं कमल, पङ्कतो जाता छाया च ।

कृष्णेत्यादि । कृष्णशब्दाद्रत्नवाचकाः शब्दाः प्रयुज्यन्ते । कृष्णरत्नं वैदूर्यादि । पक्षे कृष्णरत्नं कौस्तुभः ।

गुञ्जावाचकशब्देभ्यः प्राग्रशब्दः प्रयुज्यते । गुञ्जाप्राग्रः । रक्तपक्षे गुञ्जावत्प्राग्रः प्रधानः । कृष्णपक्षे गुञ्जायाः प्राग्रं अग्रं, तद्वत् ।

सिन्दूरवाचकेभ्यो भूषणवाचकाः शब्दाः प्रयुज्यन्ते । सिन्दूरस्य भूषणं, तद्वत् । कृष्णपक्षे सिन्दूरभूषणा गजाः ।

तमोवाचकशब्देभ्यस्तथासिताब्जवाचकशब्देभ्यो दिङ्वाचकाः शब्दाः प्रयुज्यन्ते । तमोद्वेषिप्रभा । तमसो द्वेषिरूपा स्पर्द्धिनी प्रभा । पक्षे तमोद्वेषी रविः, तद्वत् । नीलाम्भोजरिपुप्रभः । नीलाम्भोजस्य रिपुरूपा प्रभा यस्य । पक्षे नीलाम्भोजरिपुः सूर्यः, तद्वत् ।

पद्मिनीवाचकशब्देभ्यो दलवाचकाः शब्दाः प्रयुज्यन्ते । पद्मिनीदलम् । पद्मिनीवल्ल्याः दलं, तद्वत् । पक्षे पद्मिनीदलं पुष्पम् ।

कमलेत्यादि । कमलाधिपपद्मेशशब्दाभ्यां विष्णुरवी । सुराणामगो मेरुः, तद्वदाहितश्रीः । पक्षे सुरा मदिरा, तद्वद्गाहितश्रीः । सूर्योत्पन्ना द्युतिः । पक्षे सूर्यसूः शनिः, तद्वत् । रत्नानामाकरस्तद्वत् । पक्षे रत्नाकरोऽम्बुधिः । अधिकमलवत् । पक्षे अधिको मलवत् ।

सदेत्यादि । असि खड्गं, दूरमत्यर्थम् । पक्षे सिन्दूरम् । कालेयशब्देन कुङ्कुमदैत्यौ । कामाङ्कुशाः नखाः । पक्षे काममत्यर्थं, अङ्कुशः छाया नलिनवत्, कमलवत् । पक्षे अलिनो भृङ्गस्य ।

स्फुटेत्यादि । स्फुटशोभनताम्रवत् । पक्षे स्फुटशोभः नतः आम्रः सहकारः, तद्वत् । विदूरमणिः विदूर्यम् । पक्षे विशेषेण दूरमत्यर्थं मणिः । वराहस्वामी आदिकोलः । पक्षे अहःस्वामी सूर्यः । नखानां विभा । पक्षे सम्पन्ना खवत् व्योमवत्, विभा । श्लोकोत्तीर्णाः--कलभानुमितद्युतिः : श्रीवत्साङ्कद्युतिद्योती । कलङ्कमलवद्वपुर्वहन् । जेतापरमसिन्दूरम् । कृष्णलातः श्रियं वहन् ।

म. टी. रक्तश्यामाविष्यत्र कृष्णाद्रत्नानीति--कृष्णशब्दादग्रतो रत्नवाचकाः शब्दाः प्रयुज्यन्ते । तथा गुञ्जावाचकशब्देभ्यः प्राग्रशब्दः प्रयुज्यते । तथा सिन्दूरवाचकेभ्यो भूषणवाचकाः प्रयुज्यन्ते । तथा तमोवाचकेभ्यो असिताब्जवाचकेभ्यश्च द्विषः-द्वेषिवाचकशब्दाः प्रयुज्यन्ते । पद्मिनीवाचकेभ्यो दलवाचकाः प्रयुज्यन्ते इति । शेषं सुगमम् ।

श्लोकोत्तीर्णाः शब्दाः यथा---कलभानुमितच्छविः नृपप्रतापः तमोवत् । कला मनोज्ञा भानोर्मितच्छविर्यस्य स तथा । पक्षे कलभैरनुमिता छविर्यस्य तत्तथा । श्रीवत्साङ्कद्युतिद्योती नृपप्रतापः तमोवत् । श्रीवत्सं रत्नं, तस्याङ्को मध्यभागस्तस्य द्युतिस्तद्वद् द्योती । शोभा पक्षे श्रीवत्साङ्कः कृष्णस्तस्य द्युतिस्तद्वद् द्योती तथा । कलङ्कमलवत् वपुर्वहन् नृपप्रतापः तमोवत् । कलं मनोज्ञं वपुर्वहन् कमलवत् वपुः रक्तमित्यर्थः । पक्षे कलङ्क श्यामचिन्हं, मलः प्रसिद्धः, तत् वपुः तथा । जेता परमसिंदूरं नृपप्रतापो राहुवत् । परमसिन्दूरं जेतापक्षे परमं असिं खड्गं, जेता अर्थात् कान्त्या । तथा कृष्णलातः श्रियं वहन् नृपप्रतापो राहुवत् । कृष्णलातः गुञ्जातः श्रियम् । पक्षे कृष्णेन लाता गृहीता, या श्रीः शोभा, तां इत्यादि ।

का.क.

पीतश्यामौ लोहोत्तमहरिशम्भुप्रियङ्गुनागजितः ।
अजबभ्रु चन्द्रहासार्जुनवेधोनागरङ्गखद्योताः ॥६९॥
ध्वान्ताहिभ्यो द्विषः कृष्णाच्चाराथ्येभ्योऽम्बरांशुके ।
ताक्ष्योऽर्कतः कचा भीमात् कमलापद्मयोरिनः ॥७०॥
पीतांशुकः कृष्णसर्पं सुपर्णमधुशत्रवः ।
हरिद्रोचितरुग्विद्युत्कान्तप्रियङ्गुलासितौ ॥७१॥
सज्जातरूपशोभिश्रीः सदापिकपिनद्धरुक् ।
हरिन्मणि मधुपीतश्रीयुतौ स्वर्णवच्छविः ॥७२॥

पीतेत्यादि । लोहोत्तमं सुपर्णम् । पक्षे लोहवदुत्तमम् । हरिशब्देन पिङ्गलवर्णः कृष्णवर्णश्च । शम्भुशब्देन विष्णुब्रह्माणौ । प्रियङ्गुशदेन कङ्गुः, फलिनी लता च । नागः सर्पः, तज्जयिनी प्रभा । पक्षे नागजित् गरुडः । एवं नागवाचकशब्देभ्यो जितवाचकशब्दाः प्रयोज्याः । अजो विष्णुर्ब्रह्मा च । बभ्रुः कृष्णो नकुलश्च । चन्द्रहासः खड्गः, सुवर्णप्रकाशश्च । अर्जुनशब्देन फाल्गुनः, तृणं च । वेधा विष्णुर्ब्रह्मा च । सन्नागरङ्गः पूर्ववत् । खद्योतः कीटमणिः, आकाशप्रकाशश्च ।

ध्वान्तेत्यादि । ध्वान्तवाचकशब्देभ्यः सर्पवाचकशब्देभ्यश्च द्वेषिवाचकशब्दाः प्रयुज्यन्ते । ध्वान्तद्वेषिप्रभा । ध्वान्तस्य द्वेषिणी प्रभा । पक्षे ध्वान्तद्वेषी रविः । सर्पशत्रुः । सर्पाणां शत्रुरूपा । पक्षे सर्परिपुर्गरुडः ।

कृष्णवाचकशब्दाच्चीरवाचकाः शब्दाः प्रयुज्यन्ते । कृष्णचीरं नीलवस्त्रम् । पक्षे विष्णोश्चीरं, तद्वत् ।

एभ्यः कृष्णवाचकशब्देभ्योऽम्बरशब्दोंऽशुकशब्दश्च प्रयुज्येते । नारायणाम्बरवरः । नारायणश्च अम्बरं च, तद्वत् । पक्षे विष्णुवस्त्रम् । वासुदेवांशुकः । वासुदेवस्यांशुकाः किरणाः । पक्षे विष्णोरंशुकं वस्त्रम् ।

अर्कवाचकशब्देभ्यस्ताक्ष्यशब्दः प्रयुज्यते । भानुताक्ष्यः । भानोस्ताक्ष्या अश्वाः । पक्षे भानुरर्कः, ताक्ष्यो गरुडश्च ।

भीमशब्दात्कचवाचकाः शब्दाः प्रयुज्यन्ते । भीमकेशः । भीमः पाण्डवः केशाश्च । पक्षे भीमस्य शिवस्य केशाः ।

कमलाशब्दात्पद्मशब्दाच्च इन-ईश-अधिप इति स्वरादिस्वामिशब्दाः प्रयुज्यन्ते । यथा कमलेनः । रविर्विष्णुश्च ।

पीतेत्यादि । पीतं वस्त्रं विष्णुश्च । कृष्णं पत्रं दलम् । कृष्णस्य पत्रं वाहनं, गरुडः । सुष्ठु पर्णं पत्रं, गरुडश्च । मधुशत्रुर्विष्णुः । मधुनो माक्षिकस्य शत्रुरूपाः । हरिद्राया उचिता रुक् । हरिद्वर्णेन रोचिता रुक् । विद्युत्कान्तः । पक्षे विद्युत्कान्तो मेघः । प्रियङ्गुवल्लसिता ज्योतिः । पक्षे प्रियमिष्टं गुडवदासितम् ।

सज्जातेत्यादि । सज्जातरूपवदुपशोभिनी । पक्षे जातरूपं सुवर्णम्, तद्वत् । सदा पिकवत् कोकिलवत् पिनद्धा । पक्षे सदापि कपिवन्मर्कटवन्नद्धा । हरिन्मणिः दिग्रत्नं सूर्यः । पक्षे नीलमणिः । मधुवत्पीतः । पक्षे भ्रमरीतः । स्वर्णवत् काञ्चनवत् छविः । पक्षे सुष्ठु अर्णवः समुद्रः, तद्वत् ।

पीतरक्तौ वसुहरी सुवर्णं हेमकन्दलः ।
गैरिकं पद्मभूकान्तिहंसपादारुणस्तथा ॥७३॥
मित्राणि कोकपद्मेभ्यो गरुडेभ्यश्च बान्धवाः ।
कमलानि तथा भूरिजातरूपसुवर्णतः ॥७४॥
नवीनपतनीयश्रीः सदा धातुश्रियं वहन् ।
विनतासुतलक्ष्मीवानेवमन्यानपि स्मरेत् ॥ ७५॥

पीनेत्यादि। वसुशब्देन रत्नवह्नी। हरिशब्देन रविः पिङ्गलवर्णश्च। सुवर्णशब्देन काञ्चनं, सुष्ठुवर्णं सुवर्णं कुङ्कुमम्। हेमकन्दलः सुवर्णकन्दलः, तद्वत्। रक्तपक्षे हेमकन्दलो विद्रुमः, तद्वत्। गैरिकशब्देन सुवर्णं धातुश्च। पद्मभूः कमलसम्भवा कान्तिः। पक्षे पद्मभूर्ब्रह्मा, तद्वत्। हंसपादं हिङ्गुलम्। पक्षे हंसस्य चरणौ। अरुणो रक्तवर्णो रविश्च।

मित्रेत्यादि। कोकवाचकशब्देभ्यः पद्मवाचकशब्देभ्यश्च मित्रवाचकाः शब्दाः प्रयुज्यन्ते। कोकमित्रम्। कोकस्य चक्रवाकस्य मित्ररूपा। पक्षे कोकमित्रं रविः। पद्मबन्धुः। पद्मस्य बन्धुरूपा। पक्षे पद्मबन्धुः सूर्यः।

गरुडवाचकशब्देभ्यो बान्धववाचकाः शब्दाः प्रयुज्यन्ते। गरुडबान्धवः। गरुडस्य बान्धवरूपः। पक्षे गरुडबान्धवोऽरुणः।

भूरिशब्दाज्जातरूपशब्दात्सुवर्णशब्दाच्च कमलवाचकाः शब्दाः प्रयुज्यन्ते। भूरिपङ्कजं सुवर्णकमलम्। पक्षे भूरि प्रचुरं पङ्कजवत्। जातरूपाम्बुजम्। जातरूपं सुवर्णं, तस्य कमलं, तद्वत्। पक्षे उत्पन्नरूपं यदम्बुजम्। सुवर्णाम्भोजम्। स्वर्णाम्बुजम्। रक्तपक्षे शोभनवर्णं यदम्भोजं, तद्वत्।

नवीनेत्यादि। तपनीयं सुवर्णम्। पक्षे तपनस्य सूर्यस्येयं श्रीः। धातुर्गैरिकं, तद्वत्। पक्षे धातुर्ब्रह्मणः। विनतासुतौ गरुडारुणौ।

एवमनया भङ्ग्याऽन्यानपि शब्दान् स्वबुद्ध्या परिकल्पयेत्॥

विभिन्नवर्णविभिन्नाकारविभिन्नक्रियादीनामुद्दिष्टवस्तूनामभेदप्रतिपत्त्यर्थं शब्दा यथा–

म. टी. अथ पीतश्यामौ इति––ध्वान्तवाचकशब्देभ्यः अहिवाचकशब्देभ्यश्च द्विषोद्वेषिवाचकाः शब्दाः प्रयुज्यन्ते। कृष्णशब्दात् वीरवाचकाः प्रयुज्यन्ते। एभ्यः कृष्णवाचकशब्देभ्यः अम्बरशब्दः अंशुकशब्दश्च प्रयुज्येते। अर्कवाचकेभ्यः तार्क्ष्यशब्दः प्रयुज्यते। भीमशब्दात् कचवाचकाः शब्दाः प्रयुज्यन्ते। कमलाशब्दात् पद्मशब्दाच्च इनादयः स्वरादयः स्वाम्यर्थाः योज्यन्ते इति। शेषं सुगमम्।

अथ भिन्नवर्णाकारक्रियादीनामुद्दिष्टवस्तूनामभेदार्थं शब्दाः यथा–तत्र परमादिशब्दत्रयोदाहरणानि वृत्तितो ज्ञेयानीति तथा दृश्श्वेततयाऽन्वितो मुखः चन्द्रबिम्बवत्। दृशि लोचने या अश्वे तता तयान्वितः। पक्षे दृश्या प्रेक्ष्या या श्वेतता तयान्वितम्। तथा योग्यस्थूलतया शोभी तपस्वी मल्लवत्। योगी योगवान्, अस्थूलतया कृशतया, शोभी। पक्षे योग्या या स्थूलता तया। तथा अन्तरश्वेततां वहन् चक्षुः चन्द्रवत्। अन्तर्मध्ये अश्वेतताम्। पक्षे अन्तरे मध्ये श्वेतताम्। तथा हृद्यश्वेततां बिभ्रच्चन्द्रो दुर्जनवत्। हृद्या मनोज्ञा या श्वेतता ताम्। पक्षे हृदि चित्तेऽश्वेततां अशुभाध्यवसायवत्त्वेन हृदि मलिनत्वात्। तथा रुच्यश्वेतश्रियं वहन् राहुः चन्द्रवत्। रुचिकान्तौ अश्वेतशोभाम्। पक्षे रुच्या मनोज्ञाया श्वेतश्रीस्तां तथा। हार्यश्वेतश्रियं बिभ्रत् राजा कुष्ठिवत्। हारयो मनोज्ञा येऽश्वास्तैरेतश्रियं प्राप्तशोभाम्। पक्षे हार्या हरणयोग्या या श्वेतश्रीस्ताम्। आद्यग्रहणादेतत् तुल्या अन्येऽपि ग्राह्याः। तथा सदा परतरोहारी राजा सुभटवत्। सदा अपरेषां तरो बलं तस्य हारी। पक्षे परं प्रकृष्टं तरो बलं तेन हारी मनोज्ञः। तथा सदा पिनद्धवरांशुकः। उभयथापि मितं पचः सदा निरन्तरं अपरिहितवरवस्त्रः। पक्षे सदाऽपि निरन्तरमपि नद्धानि बद्धानि गोपी [पि]तानीति यावत् प्रधानांशुकानि येन स तथा। नवशोभाविभूषितश्चन्द्रो मुनिवत्। नवा या शोभा तया विभूषितः। पक्षे न वशः स्वेच्छाचारित्वात्, भा शोभा, तया विभूषितस्तथा। सदा सन्नशिवश्रीः कैलासो दुःस्थवत्। आसन्ना शिवस्य श्रीर्यत्र स तथा। पक्षे सन्ना अस्ता शिवश्रीर्यस्माद्येन वा स तथा। नव्याप्तरमया शोभी सुकृती दुस्थवत्। नव्या आप्ता प्राप्ता या रमा तया। पक्षे व्याप्तरमया शोभी न भवतीत्यर्थस्तथा। सदा नूनश्रियं बिभ्रत् सुकृती दुस्थवत्। अनूना पूर्णा या श्रीस्ताम्। पक्षे न इति वितर्के ऊनश्रियं तथा। सदाऽकिञ्चनतां वहन् दरिद्रो मुनिवत्। किञ्च सदा निरन्तरं तां लक्ष्मीं

न वहन् । पक्षे सदा अकिञ्चनतां निर्लोभताम् । एवमनया रीत्या एतत्समानाः शब्दा ज्ञेयाः । तथा सदा ननु भवान्वितः कैलासो मूर्खवत् । ननु निश्चितं ईश्वरान्वितः । पक्षेऽननुभवः अज्ञानं तेनान्वितस्तथा । समरभान्वितो व्यवहारी सुभटवत् । समस्तलक्ष्मीयुतः । पक्षे सङ्ग्रामलक्ष्म्यान्वितस्तथा । शुभसम्पन्नवपू राजी रूपवान् नृपवत् । सुन्दरप्राप्तशरीरशोभा । पक्षे वर्यसम्पदा नवायाप्तः पुरी तया शोभीति ॥छ॥

वपुषा महसांगकेतसमा इति । एतेऽपि च ज्ञेया यथा—वपुषा श्वेततां बिभ्रत् राहुश्चन्द्रवत् । शरीरेणाश्वेततां । पक्षे श्वेततां । एवं यथासम्भवं विशेष्यविशेषणादिकमग्रेऽपि योज्यं । यथा—महसा श्वेततां, अङ्गकेन श्वेततां, देहे श्वेततां, सदा श्वेततां, राजते श्वेततां, दृश्यते श्वेततामित्यादि स्वयमेव बोध्यं ।

का. क. परमविशदस्वदृश्यायोग्यान्तरहृषरुच्यहार्याद्याः ।
अपरापिनद्धनवसन्ना व्याप्तानूनकिञ्चनसमानाः ॥७६॥

ननुसमशुभसम्पन्ना वपुषामहसाङ्गकेन समाः :
देहे सदाप्रभृतयो विराजतेदृश्यते प्रमुखाः ॥७७॥

परमप्रभृतिशब्दानामग्रे वर्णाकारक्रियादिशब्दा यथौचित्यं प्रयोज्याः । यथा—परमस्थूलतायुतः । एकपक्षे परमा प्रकृष्टा, स्थूलता । द्वितीयपक्षे परमतिशयेन, अस्थूलता । विशदश्वेतताशाली । विशदा निर्मला । पक्षे विशन्ती अश्वेतता । स्वचलताशाली । स्वकीया चलता । पक्षे सुष्ठ अचलता । एवं शुभसम्पन्नशब्दं यावत् ज्ञेयम् । अत्र सुरुचिरश्रीमधुर-शोभामधुराद्याः शब्दाः ज्ञेयाः । वपुषाद्याः सकारान्ताः तृतीयैकवचनान्ताः, अङ्गकेनाद्याः अकारान्तास्तृतीयैकवचनान्ताः, देहेप्रमुखाः अकारान्ताः सप्तम्येकवचनान्ताः, सदासर्वदाद्याः, राजतेमुख्याः आत्मनेपदान्ताः क्रियाः ।

स्वकामादिमगुणतां स्वगुणत्वादृते तनौ ।
वहन्नाहितगुणतां गुणत्वात्पटुनो भशम् ॥

सर्वत्र गुणशब्दो वर्णाकारादिवाची । यथा—

स्वकामश्वेततां बिभ्रदादिमस्थूलतां वहन् ।

स्वं कामं अत्यर्थं, श्वेतताम् । पक्षे अश्वेतताम् । स्वकां आदिमां प्रथमां स्थूलताम् । पक्षे अस्थूलतामादि(मा?)-म् । एवं स्वकामादिमशब्दयोः पुरस्थगुणशब्दार्थभावार्थताप्रत्ययान्ता द्वितीयैकवचनान्ताश्च कार्याः ।

चञ्चलत्वादृते देहे । चञ्चलत्वेनादृते । पक्षे ऋते विना, चञ्चलत्वात् । एवं गुणशब्दानां भावार्थत्वप्रत्यान्तानां पञ्चम्येकवचनान्तानां पुरतः ऋतेशब्दः प्रयोज्यः, तदग्रे पुंनपुंसको अकारान्तो देहादिशब्दः सप्तम्येकवचनान्तो विशेष्य-रूपः कार्यः ।

वहन्नाहितकृष्णताम् । आहिता या कृष्णता तां वहन् । ह्रस्वोपधत्वान्नद्वयम् । पक्षे न वहन् । एवं ह्रस्वोपधश-तृजन्तशब्देभ्यः पुरस्थाहितादिशब्दानामग्रे भावप्रत्ययान्तगुणशब्दा द्वितीयैकवचनान्ताः प्रयोज्याः ।

रक्तत्वात्पटुनो भाति । रक्तत्वस्य विशेषणं पटुन इति । पक्षे पटु इति क्रियाविशेषणं, नो निषेधार्थः । एवं त्वप्रत्ययान्तात् पञ्चम्येकवचनान्ताच्च गुणशब्दात् पटुनो बाढं, पटुनो भृशं, पटुनः स्फुटं, पटुनो राजते—इत्यादि शब्दाः प्रयोज्याः ।

स्पन्दनवाहनवासनदर्शन मोहनसदानतनयनाद्याः ।
पृच्छकसम्बोधनतः प्रयोजनोयाबुधजनेन ॥७८॥

एते एवंविधा नान्ता अन्येऽपि । यथा--स्पर्शनसूदनरदनकोपनआयतनमदनछदनजयनबन्धनभवनघटनवर्णन-सज्जन-इत्यादिशब्देभ्यो नकारं विनाप्यर्थे मिलति, सम्बोधनीकृतेभ्यः परतो गुणशब्दाः प्रयोज्याः । यथा–

असौ विभाति वाग्देवीवासनश्वेततान्वितः ।

श्वेतपक्षे नान्तं सम्बोधनम् । द्वितीयपक्षे नकारवर्जितं सम्बोधनम् । एते श्वेतश्यामादिशब्दाः नियतविरुद्धवर्णैक-वाचका उक्ताः ।

अथैकपक्षे नियतवर्णादिवाचकाः, द्वितीयपक्षे सर्ववस्तुवाचकाः कथ्यन्ते । यथा–श्वेतवर्णवाचकाः शब्दाः–
सोमतारभवानन्तसुधामोदितशङ्कराः ।

भास्वत्कान्तसोमकान्तघनसारसदाधिकाः ॥

सोमच्छविमनोहारी । श्वेतपक्षे सोमश्चन्द्रः, तद्वत् । द्वितीयपक्षे सोमा सौम्यरूपा छविः । इदं विशेषणं सर्ववस्तु व्यापी । एवं सर्वशब्देषु ज्ञेयम् ।

अथ कृष्णवर्णशब्दाः—

विश्वरूपाच्युतानन्तश्रीधरः कलभासितः ।
बहुलासिपरपुष्टः सर्वदातिलसद्द्युतिः ॥

अथरक्तवर्णशब्दाः–

नवभास्वत्सुखोद्योतीनालीकाशोकमङ्गलाः ।
विभाप्रभातरङ्गौ च सज्जपावनपावकौ ॥

अथ पीतवर्णशब्दाः–

जातरूपसदापीतकल्याणमधुरोचिताः ।
बहुशोभानुवत्तश्रीः भास्वत्प्रद्योतनावपि ॥

म. टी. अत्रेति परमविशदादि--शब्दानामधिकारे यथा--सुरुचिरं श्रीधवलश्रीरित्यादि । शेषं सुगमम् । स्वकामेति स्वकामादिमशब्दयोरग्रे ता प्रत्ययान्तगुणशब्दा द्वितीयैकवचनान्ताः प्रयोज्याः । तथा त्वप्रत्ययान्तपञ्चम्येकवचनान्तगण-शब्दानामग्रे कृते शब्दः कार्यः । तदग्रे पुल्लिङ्गे सप्तम्येकवचनान्तं विशेष्यं कार्यम् ह्रस्वो पधणतृजंतशब्देभ्यः पुरस्थाहि-तशब्दानां पुरतः द्वितीयैकवचनान्तता, प्रत्ययान्तगुणशब्दा योज्याः । तथा पंचम्येकवचनान्तत्वप्रत्यायन्तगुणशब्दात् पटूनो-भृशमित्यादयः शब्दः योज्याः ।

अथ पूर्वपक्षे नियतवर्णादिवाचका, द्वितीयपक्षे सर्ववस्तुवाचकाः शब्दाः कथ्यन्ते । तत्र श्वेतवर्णशब्दोदाहरणं यथा–सदाधिकद्युतिद्योती चन्द्रः सुकृतिवत् । स प्रसिद्धः, दध्न इयं दाधिका दधिसम्बन्धिनी या द्युतिस्तद्वद् द्योती । पक्षे सदा निरन्तरं, अधिकद्युतिद्योती । अथ कृष्णवर्णशब्दोदाहरणं यथा–विश्वरूपश्रियं बिभ्रत् राहुः कामवत् । विश्वरूपः कृष्णस्तत्सदृशश्रियम् । पक्षे सर्वरूपश्रियम् । एवं सर्वशब्देषु ज्ञेयम् ।

अथररक्तवर्णशब्दोदाहरणं यथा--नवभास्वत्प्रभाशोभि रक्तोत्पलं सुकृतिवत् । नवभास्वान् बालसूर्यस्तस्य प्रभा तद्वत् शोभि [भी] पक्षे न वा भास्वती मनोज्ञ या प्रभा तया शोभी । एवं सर्वशब्देषु ज्ञेयम् ।

अथ पीतवर्णशब्दोदहारणं यथा-- जातरूपश्रियं बिभ्रत् मेरुस्तरुणवत् । जातरूपं सुवर्णं, तस्य तद्वद्वा श्रियम् । पक्ष जाता उत्पन्ना या रूपश्रीस्ताम् । अनया रीत्या सर्वत्र ज्ञेयम् ।

अथाधारशब्दाः—

अहो सुरोचितच्छायः स्वकामरचितस्थितिः ।
स्पष्टाम्बरश्रियं बिभ्रत्तारापथकृतस्थितिः ॥

स्फुरन्नवनिबद्धश्रीः सदा भूतलसद्द्युतिः ।
सदा हि विश्ववल्गुश्रीर्विलसद्वैभवान्वितः ॥

सदासज्जलसल्लक्ष्मीः परमोदकवैभवः ।
कान्तारचितसंस्थानः सदा रामश्रियं वहन् ॥

अथाकारशब्दाः—

वृत्तलक्ष्मीमनोहारी निस्तुलश्रीमनोरमः ।
अहो गौरवसल्लक्ष्मीरलंवरचितस्थितिः ॥

विश्वविस्तीर्णलक्ष्मीकः सकलाभोगभासुरः ।
सुमञ्जुलवसल्लक्ष्मीरूर्मिमद्वैभवान्वितः ॥

म. टी. अथाधारशब्दोदाहरणानि यथा—अहो सुरोचितच्छाय इन्द्रः सुकृतिवत् । सुरेषु उचिता छाया शोभा, यस्य स तथा । पक्षे सु अतिशयेन, रोचिता राजिता, छाया यस्य स तथा । स्वकामरचितस्थितिः इन्द्रो दुःस्थवत् । स्वका स्वकीया, ये अमरा देवास्तेषु चिता व्याप्ता, स्थितिरवस्थानं यस्य स तथा । पक्षे स्वस्य द्रव्यस्य, कामो वाञ्छा, तेन रचिता स्थितिर्यस्य स तथा । स्पष्टाम्बरश्रियं बिभ्रत् सूर्यः पुरुषवत् । स्पष्टा अम्बरे आकाशे, या श्री शोभा, ताम् । पक्षे स्पष्टां प्रकटां, वरश्रियं प्रकृष्टश्रियं तथा । तारापथकृतस्थितिः सूर्यो रूपवत् । तारापथे आकाशे, कृता स्थितिर्येन स तथा । पक्षे तारापथे कनीनिकामार्गे कृता स्थितिर्येन तत्तथा । स्फुरन्नवनिबद्धश्रीः शस्य राशिश्चन्द्रवत् । स्फुरन् दीप्यमानः, तथा अवनौ बद्धा संबद्धा, श्रीर्यस्य स तथा । पक्षे स्फुरन्ती लसन्ती, नवा नवीना, निबद्धा श्रीर्यस्य स तथा । सदाभूतलसद्द्युतिर्मनुष्यो विश्ववत् । भूतले सद्द्युतिर्यस्य स तथा । पक्षे भूतानि पञ्चभूतानि, तेषां लसन्ती द्युतिर्यत्र तत्तथा । सदाहिविश्ववल्गुश्रीः सर्पः पुरुषवत् । अहिविश्वं पातालं, तत्र वल्गुश्रीर्मनोज्ञशोभा यस्य स तथा । पक्षे हीति निश्चितं, विश्वा समस्ता, वल्गुश्रीर्यस्य स तथा । विलसद्वैभवान्वितः सर्पो व्यवहारिवत् । बिले स्वस्थाने, सन् स्फुरन्, वैभवस्तेनान्वितः । पक्षे विलसन् दीप्यमानो, यो वैभवस्तेनान्वितस्तथा । सदा सज्जलसल्लक्ष्मीः कमलो व्यवहारिवत् । सज्जले प्रधानजले विद्यमानलक्ष्मीर्यस्य स तथा । पक्षे सज्जा लसन्ती लक्ष्मीर्यस्य स तथा । परमोदकवैभवः कमलो व्यवहारिवत् । परमः प्रकृष्टः, उदके वैभवो यस्य स तथा । पक्षे परेषां मोदकारी वैभवो यस्य स तथा । कान्तारचितसंस्थानो वृक्षः कामिवत् । कान्तारेचने, चितं व्याप्तं, संस्थानं यस्य स तथा । पक्षे कान्तायां रचितं संस्थानं येन स तथा । सदारामश्रियं वहन् वृक्षो व्यवहारिवत् । सती प्रधाना या आरामे वने, श्रीः शोभा, ताम् । पक्षे सदा सर्वदा, मनोज्ञश्रियं ।

अथाकारशब्दोदाहरणानि यथा—वृत्तलक्ष्मीमनोहारी चन्द्रः साधुवत् । वृत्तलक्ष्मीर्वर्तुलश्रीस्तया मनोहारी । पक्षे वृत्तलक्ष्मीः शीलश्रीस्तया तथा । निस्तलश्रीमनोरमः चन्द्रो व्यवहारिवत् । निस्तलश्रीहारिवत् निस्तलश्रीर्वर्तुलश्री, स्तया मनोज्ञः । पक्षे निस्तला अपरिमिता या श्रीस्तया तथा । अहो गौरवसल्लक्ष्मीः आकाशश्चन्द्रवत् । महत्त्वप्रधानलक्ष्मीः । पक्षे गौरा वसन्ती लक्ष्मीर्यस्य स तथा । अलम्बरचितस्थितिर्वामनः पुरुषवत् । अलम्बा अप्रलम्बा, रचितस्थितिर्यस्य स तथा । पक्षे अलमत्यर्थं, वरा प्रधाना, चिता स्थितिर्यस्य स तथा । विश्वविस्तीर्णलक्ष्मीकः कोदण्डो व्यवहारिवत् । विश्वा सर्वा, विस्तीर्णलक्ष्मीर्यस्य स तथा । पक्षे विश्वे जगति, विस्तीर्णं लक्ष्मीः शोभा यस्य स तथा । सकलाभोगभासुरश्चन्द्रः पुरुषवत् । स प्रसिद्धः, कलाभोगः कलाविस्तारस्तेन भासुरः । पक्षे सकलः समस्त, आ सामस्त्येन, भोगस्तेन भासुरः तथा । सुमञ्जुलवसल्लक्ष्मीः चन्द्रो व्यवहारिवत् । सुमञ्जुला अतिमनोज्ञा, वसन्ती लक्ष्मीर्यस्य

स तथा । पक्षे सुमञ्जुः अतिमनोज्ञो, लवो विलासो, यस्याः एवंविधा सल्लक्ष्मीर्यस्य स तथा । ऊर्मिमद्वैभवान्वितः सर्पः पुरुषवत् । ऊर्मिमान् वक्रो, वैभवस्तेनान्वितः । पक्षे ऊर्मिमद्वैभवः सप्रकाशवैभवस्तेनान्वित इति ।

का. क. अथक्रियादिशब्दाः——

उच्चैस्तरलसल्लक्ष्मीः सुपीवरवसद्द्युतिः ।
सम्पन्नव्याप्तलक्ष्मीकः परकोटिश्रिया युतः ॥

धामभावौ प्रभावश्च विभावश्च यथोचितम् ।
वर्ण्यस्याकारशब्देभ्यः सम्प्रयोज्या मनीषिभिः ॥७९॥

यथा——

स्थूलधाममनोहारी गुरुभावचितस्थितिः ।
स्थूलप्रभावबद्धश्रीरुच्चैर्विभवरोचितः ॥

धाम शब्देन देहस्तेजश्च ।

इति श्रीजिनदत्तसूरि० श्लेषसिद्धिप्रत्ताने तृतीये उद्दिष्टवर्णनस्तबकस्तृतीयः ।

म. टी. अथ क्रियादिशब्दोदाहरणानि यथा——उच्चैस्तरलसल्लक्ष्मीः प्रतिबिम्बितचन्द्रो व्यवहारिवत् । उच्चैरतिशयेन, तरला चञ्चला, लसन्ती लक्ष्मीर्यस्य स तथा । पक्षे उच्चैस्तरीव सल्लक्ष्मीर्यस्य स तथा । सुपीवरवसद्द्युतिः सूर्यो मेघवत् । अतिपुष्टा वसन्ती द्युतिस्य स तथा । पक्षे सुपीवोऽतिपुष्टो, यो रवः शब्दस्तेन सद् द्युतिर्यस्य स तथा । सम्पन्नव्याप्तलक्ष्मीको व्यवहारी चन्द्रवत् । सम्पदा नव्यः सम्पन्नव्यः, आप्ता लक्ष्मीर्येन स आप्तलक्ष्मीकः, पश्चात् पूर्वेण कर्मधारयः । पक्षे सम्पन्ना, व्याप्ता लक्ष्मीर्यस्य स तथा । परकोटिश्रिया युतः पुरुषः कोदण्डवत् । परकोटिः प्रकृष्टोत्कर्षस्तल्लक्ष्म्या युतः । पक्षे परकोटिश्रिया प्रकृष्टाऽग्रभागलक्ष्म्या युतस्तथा ।

धामेति——धामादयः शब्दा आकारशब्देभ्यो मनीषिभिर्योज्या यथा——स्थूलधाममनोहारी पुष्टः सूर्यवत् । स्थूलदेहमनोज्ञः । पक्षे स्थूलतेजो मनोहरस्तथा । गुरुभावचितस्थितिर्मुनिर्मेरुर्वा सूर्यवत् । गुरुभावो महाध्यवसायस्तेन चिता स्थितिर्यस्य स तथा । तथा गुरुभावो गुरुत्वं, तेन चिता स्थितिर्यस्य स तथा । पक्षे गुर्वीया भा प्रभा, तस्या आवो वृद्धिस्तेन चिता व्याप्ता, स्थितिर्यस्य स तथा । स्थूलप्रभावबद्धश्रीः शिवः सूर्यवत् । स्थूलप्रभावेन बद्धा, श्रीर्यस्य स तथा । पक्षे स्थूला या प्रभा तया अवबद्धा श्रीर्यस्य स तथा । उच्चैर्विभावरोचितः शिवः सूर्यवत् । उच्चैरत्यर्थं, विभावः प्रभावः, तेन रोचितः । पक्षे विभा प्रभा, तया अवरोचितो व्याप्तः ॥छ॥

इति श्री तपागच्छाधिनायकपातसाहिश्री अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थादि करमुक्तिकारक भट्टारकश्री ४ । श्रीहीरविजयसूरीश्वरशिष्यपण्डित श्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे श्लेषसिद्धिप्रतानगतोद्दिष्टवर्णनस्तबकोद्योतकरस्तृतीयः प्रसरः ॥छ॥३॥

॥ ३.४ ॥

अथाद्भुतविधिः

का . क. यत्र लिङ्गविभक्तीनां सति भेदे महत्यपि ।
दृश्यते शब्दसादृश्यमिदमद्भुतमुच्यते ॥८०॥

णिनन्तैः स्त्रीकृतैः शब्दैरौसी क्लीबस्त्रियोः पुनः ।
तैरेव रेफपृष्ठस्थैः स्त्रीकर्मबहुता भवेत् ॥८१॥

णिन्प्रत्ययान्ताः शब्दाः—राजिन् भ्राजिन् शालिन्-इत्याद्याः 'स्त्रीलिङ्गेनग्यन्ताः' इति स्त्रीप्रत्ययान्ताः क्रियन्ते, तेषामग्रे रेफादिरागरवप्रमुखाः प्रयोज्याः । एवं नपुंसकलिङ्गे औप्रत्ययान्ताः, स्त्रीलिङ्गे सिप्रत्ययान्ताः, तथा स्त्रीलिङ्ग-कर्मणि शस्प्रत्ययान्ताः णिनन्ताः शब्दाः भवन्ति । यथा—

प्रभावराजिनीरागोल्लासप्रध्वंसिनी रयात् ।
गीर्जिनस्य पदाब्जे वः कुरुतां सुखसम्पदः ॥

वाणीविशेषणे सिः स्त्रियां, पदाब्जविशेषणे औ नपुंसके, सुखसम्पद्विशेषणे कर्मणि स्त्रियां शस् ।

विशेषणपरिक्षिप्तैरग्न्यन्तै रेफपृष्ठगैः ।
द्विस्थद्विपञ्चमीकर्मस्त्रीबहुत्वेऽद्भुताद्भुतम् ॥८२॥

अग्न्यन्तैः इकारान्तैरुकारान्तैः स्थितिपटुतुल्यैर्विशेषणक्षिप्तै रेफपृष्ठस्थै रेफादिरागरवरसमुखशब्दैरद्भुतादभुतं काव्यं भवति । परं द्विस्थउभयपदधातोरग्रे द्विपञ्चमीपञ्चम्याः परस्मैपदद्विवचनान्ताः आत्मनेपदैकवचनान्ताः—कुरुतां तनुतां इत्यादि । एवंविधक्रियायाः कर्मणि स्त्रीलिङ्गबहुत्वयुक्तं विशेषणं क्रियते । यथा—

भवभेदपटूरागध्वान्तभानुस्थिती रयात् ।
प्रभोर्वचश्चयोऽङ्घ्री च कुरुतां वः शिवश्रियः ॥

वचश्चयस्य विशेषणे पटोः स्थितेश्चाग्रे पुंल्लिङ्गे सिः । अङ्घ्र्योर्विशेषणे पुंल्लिङ्गे औः । शिवश्रियः इति कर्म-विशेषणे स्त्रीलिङ्गे शस् ।

तमःस्तोमभिदा चारू रविचन्द्राविवाङ्गिनाम् ।
स्वतुल्यो जिनवाक्पूरस्तनुतां सुखसम्पदः ॥

स्मेरपुष्कररोचिष्णुः राजन्यशतशेखरः ।
कृपाणस्तव हस्तौ च कीर्तिर्वितनुतां श्रियः ॥

म. टी. अथाद्भुतविधिं विवृण्वन्नाह—यत्र लिङ्गेति—पुल्लिङ्गस्त्रीलिङ्गनपुंसकलिङ्गानां स्यादिसप्तविभक्तीनां त्यादि-दशविभक्तीनां च भेदे अन्तरे महत्यपि यत्र रूपसादृश्यं दृश्यते तदद्भुतं वृत्तमुच्यते । णिनन्तैरिति—स्त्रीप्रत्ययान्तीकृतै-र्णिनन्तशब्दैर्नपुंसकलिङ्गे औ, प्रत्ययान्ता क्रियन्ते स्त्री स्त्रीलिङ्गे प्रथमैकवचनसिप्रत्ययान्ताश्च; पुनस्तैः कृतणिनन्तैरग्रस्थ-रेफादिशब्दैः स्त्रीलिङ्गे कर्मणि बहुत्वं भवतीति ।

प्रभावराजिनी रागोल्लासप्रध्वंसिनी रयात्।

गीर्जिनस्य पदाब्जे च कुरुतां सुखसम्पदः ॥१॥

व्याख्या। जिनस्य तीर्थंकृतो, गीर्वाणी, सुखसम्पदः, कुरुतां। ददताङ्गीः कथम्भूता? प्रभावराजिनी प्रभावेन राजते इत्येवंशीला प्रभावराजिनी। अत्र स्त्रीलिङ्गे प्रथमैकवचनं सिः, तस्य "दीर्घङ्याप् व्यञ्जनात् सेः" इति—[हे.व्या. १.४.४५]

म. टी. प्रथमैकवचनं सिः तस्य "दीर्घङ्याप्व्यञ्जनात् स्तैः" इति सूत्रेण लोपः। कुरुतामित्यत्र पञ्चम्या आत्मनेपदैकवचनं, तां पुनः। गीः कथम्भूता? रागोल्लासप्रध्वंसिनी। अत्रापि प्रथमैकवचनं सिः। रयात् वेगात् द्वितीयव्याख्यानं यथा—जिनस्य पदाब्जे पदकमले, सुखसम्पदः कुरुतां। कथम्भूते पदाब्जे? प्रभावराजिनी। अत्र नपुंसकलिङ्गे प्रथमा द्विवचनं। 'औ री' [हे. व्या. १.४.५६] ई आदेशो भवति। कुरुतामित्यत्र पञ्चम्याः परस्मैपदद्विवचनं। तां पुनः पदाब्जे कथम्भूते? रागोल्लासप्रध्वंसिनी। अत्रापि प्रथमा द्विवचनं। औ र तृतीयः। पक्षे सुखसम्पदः। कथम्भूताः? प्रभावराजिनीः। अत्र द्वितीयाबहुवचनं। शस् 'रोरे लुग् दीर्घश्चादिदुत' इति सूत्रेण [हे.व्या. १.४.४२] रलोपे सदृशरूपसिद्धिः। पुनः कथम्भूताः? रागोल्लासप्रध्वंसिनीः पूर्ववत्। इत्यनया रीत्या सर्वत्राऽद्भुतमहाद्भुत काव्यादिषु योजना कार्या। विशेषणपरिक्षिप्तैरिति—अत्राद्भुताऽद्भुदमिति स्थाने प्रत्यन्तरेऽद्भुताद्भुतमिति दृश्यते। परं अद्भुताद्भुतमिति सङ्गच्छते इति। स्मेरपुष्करेति—अत्र कृपाणः कथम्भूतः? स्मेरपुष्कररोचिष्णुः स्मेरं पुष्करं खड्गाग्रं तेन रोचिष्णुः। पुनः हस्तौ कथम्भूतौ? स्मेरपुष्कररोचिष्णू—स्मेरं च तत् पुष्करं कमलं तद्वद् रोचिष्णूः। पुनः कीर्तिः कथम्भूता? स्मेरपुष्कररोचिष्णुः—स्मेरं यत् पुष्करं आकाशं, तत्र रोचिष्णुः समस्तमाकाशं व्याप्तवतीत्यर्थः। पुनः श्रियः कथम्भूताः? स्मेरपुष्कररोचिष्णुः—स्मेरं यत् पुष्करं पद्मं तत्र रोचिष्णुः इति। एजे जसीत्यादि एते शब्दा जसि प्रथमा बहुवचने निष्पन्नाः। एतदुदाहरणानि यथा—शोभितः रवो वनप्रदेशा इव, गायनः शोभितो रवो, यस्य स तथा। पक्षे शोभितास्तरवो यत्र ते तथा। तथा सदारंकुरवः—सदा निरन्तरं, रङ्कोर्मृगस्य रवः। पक्षे सदा अरं अत्यर्थं कुरवः कुरुदेशाः तथा। भीरवः भीतिरवः। पक्षे भीरवः भीरुकाः तथा। अधिकविभवः—अधिको विभवः सम्पद् यस्य स तथा। पक्षे अधिकाश्च ते विभवः स्वामिनश्चाधिकविभवः तथा। विप्रभवः विप्राद्भवः उत्पन्नः। पक्षे विशेषेण प्रभवः स्वामिनः तथा।

आदिशब्दग्रहणात् पश्चादुदाहरणानि यथा—लोलपशवः लोलपः शवः। पक्षे लोलाः पशवः तथा। सदा-लञ्चारवः—सदा निरन्तरं, लञ्चायां रवः। पक्षे सदा अलं अत्यर्थं, चारवो मनोज्ञाः, तथा। बहुरुचिरसाधवः—बह्वी रुचिः कान्तिर्यस्य एवंविधो रसाधवः पृथ्वीपतिः। पक्षे बहवो रुचिराः साधवः तथा। अधिकन्दवः अधिकं यथा स्यात् तथा, दवो दावानलः। पक्षे अधि सामस्त्येन, कन्दवः कान्दविकभाजनविशेषाः।

का.क. एवमन्येऽपि तत्प्रतिबद्धाः शब्दा लिख्यन्ते। यथा—शुचि स्थिति रुचि मञ्जु साधु वल्गु चारु पटु इत्याद्याः अन्यन्ताः। रेफादयः—रवि रश्मि रय रक्षा रक्षः रसा रजः रहः रज्जु रस रथ रमणीय रचित रहित रिपु रिक्त रुचि रुजा रुचिर रोचित रेखा राजीव राजा रोम राग रामा राजी रीति रूप रथी रेवा रोम राम।

विवया: सनान्तसस्वरनिस्वरतृप्रत्ययान्तलीलाभिः।

धातुचतुर्थ्यैकवचः पुरस्थनमलैर्द्रुताद्भुतं भवति ॥८३॥

ये शब्दाः उकारान्ताः इकारान्ताः (च) प्रथमाबहुवचने वान्ता यान्ताः सन्तोऽर्थे मिलन्ति, तै शब्दैरेकत्वबहुत्वयोः साम्यम्। उकारान्ता शब्दा यथा—तरु कुरु भीरु विभु प्रभु इत्यादि। इकारान्ताः शब्दाः यथा—

शुचि रुचि राजि नाभि सुरभि इत्यादि। एसे जसि निष्पन्नाः। यथा—शोभितरवो वनप्रदेशा इव गायनः। एवंशब्दाः—सदारङ्कुरवः, अधिकविभवः, लोलपशवः, सदालङ्चारवः, बहुरुचिरसाधवः, अधिकंदवः। अथ इकारान्ताः शब्दाः—अनेकपशुचयो भूपाला इव देशः। लोपितरुचयः, उच्चक्रोधराजयः, ज्ञातवेदनाभयः, सदासुरभयः, परमतिभयः,

अभिभूमयः, परमखनयः, अयोनयः, अभिभूरयः, भोगिरयः, स्वच्छत्रपालयः, तारकालयः, शुभकेशवलयः इत्यादि शब्दाः रूह्याः ।

सनान्ता इति । ये शब्दाः सान्ता नान्ताश्च त एव सनहीना अकारान्ता अर्थे मिलन्ति, तेषामग्रे प्रथमैकवचनेन एकत्वबहुत्वयो : साम्यम् । यथा—महस् प्रभृतिकाः सान्ताः, सद्मन् प्रभृतिकाः नान्ताः शब्दाः । सहीनो महशब्दः, नहीनः सद्मशब्दः । सती मा लक्ष्मीर्यस्य स सल्लक्ष्मीवाचकः । परमहा रविरिव सत्पुरुषाः । परमशरा देश इव धनुर्धराः । बहुतराः, निबिडतमाः, पुरोगमनाः, बिलसदनाः, बहुधावदनाः, पुरोगच्छदनाः, कृतकदनाः, बहुश्रीमदनाः, बहुस्वस्थानाः, कृतबहुधानाः, परमध्वानाः, रम्यानेकपानाः, विशदध्वनदनाः, परमानाः, बहुधनदानाः, बहुदमनाः, बहुअसमानाः, शोभिता(न ?)नाः, सम्पन्नथानाः, कलितस्वनाः, अधिकवचाः, कलशमनाः, सम्पन्नमनाः, सदयाः, सदम्भाः, स्मरदुच्चैरम्भाः, चरदुच्चैरजाः, बहुस्वर्णाः, प्रगणितवेधाः, इत्यादिशब्दा अन्येऽप्यूह्याः ।

अथ नान्ताः—विलसद्मा नागवर्ग इव पुण्यपुरुषाः । अनुल्लङ्घितसीमा जलधिरिव सत्पुरुषाः । परमेषां नान्तानामग्रे विसर्गलोपार्थं घोषवन्तः स्वराश्च प्रयोज्याः । एषां सान्तनान्तशब्दानामग्रे ये वकारादिकाः शब्दास्त एव वकारं विना स्वरादिकाः । विशिष्ट वर्ण वेला वार्ता अशिष्ट अर्ण एला आर्ताप्रभृयोऽर्थे मिलन्ति ते शब्दाः प्रयोज्याः । पुल्लिङ्गे एकत्वद्वित्वबहुत्वेषु साम्यम् । यथा—परमहावसिष्ठेन राघवा इव दुर्जनाविव सप्तर्षिगणः । परमहागीर्वाणा इव बलदेववलभीनाथाविव नभस्य शुक्लपञ्चमीदिवसः ।

अथ वादिकाः शब्दाः—वनमाली विनायक वनगाहित वर्द्धमान वक वारण वार वक्र वक्रमोदित वासना वीरण विचकिल विलाभोग वर्य वधस्थान वंश वर्जन वालि वालित वीजन वरुण वदन वाम बालानोदित वञ्चन वन्ध वार्य वाल वाल विरूप विभाभोग वधन वन वृषभ वातप वरोचित वस्त्र वह्नि वरं बलं वाहित वासित वृद्ध वृद्धि वृक्ष वासव वसति वसु वायु बाहु विन्दु वारुण वासर वाटिका वाह वाहन वाद्य वेद्य वक्षः वन्धनाशः बर्हिः वेधः वलि वेष इत्यादि ।

म. टी. शोभितरुचयः शोभिनां तरूणां चयः समूहो यत्र । पक्षे शोभिता रुचयः कान्तयो येषां ते तथा । उच्चक्रोधराजय—उत् प्राबल्येन, चक्रं सैन्यं, यत्र स उच्चक्रः, एवंविधो धराजयः पृथ्वीजयः । पक्षे उच्चाः क्रोधराजयः तथा । ज्ञातवेदनाभयः—ज्ञातं वेदनाया भयं येन स तथा । पक्षे ज्ञाता वेदानां नाभिर्मध्यभागो रहस्यं यैस्ते तथा । सदा सुरभयः सदा सुराणां भयं, यथात्र । पक्षे सुरभयो गावः ।

आदिग्रहणादन्यशब्दोदाहरणान्याह—तथा परमतिमयः परा प्रकृष्टाः मतिस्तन्मयः । पक्षे परमास्तिमयो मत्स्या येषां त तथा । अधिभूमयः अधिभूः स्वामी तन्मयः । पक्षे अधि सामस्त्येन, भूमयः पृथिव्यो येषां ते तथा । परमखनयः—पराः प्रकृष्टाः; मखा यागास्तेषां नयः । पक्षे परमाः प्रकृष्टा, खनयो यत्र ते परमखनयः तथा । अयोनयः—अयो लोहं, तस्य नयः । पक्षे नयो नयः, अयो नयः तथा । अधिभूरयः—अधिभूः स्वामी, तस्य रयो वेगः । पक्षे अधि सामस्त्येन, भूरयो बहवः तथा । सच्छत्रपालयः—स प्रसिद्धः, छत्रपस्यालयो गृहम् । पक्षे सच्छत्राणां पालयः तथा । तारकेलयः तारके दैत्यविशेषे लयो ध्यानम् । पक्षे तारा मनोज्ञाः, केलयः क्रीडा येषां ते तथा । शुभकेशवलयः—शुभः कृष्णस्य लयो यस्य । पक्षे शुभाः केशास्तेषां वलयः इत्यादि । परमेति—परमहारविरिव पुण्यपुरुषाः । परा प्रकृष्टाः, महा उत्सवा येषां ते तथा । पक्षे परं महस्तेजो यस्य स तथा । तथा परमशरादेश इव धनुर्धराः—परमाः प्रकृष्टाः शरा बाणा, येषां ते तथा । पक्षे शसयोरैक्यात् परमं प्रकृष्टं सरः तडागो, यत्र स तथा । बहुतराः बहुतरो बलं यस्य स तथा । पक्षे अतिशयेन बहवो बहुतराः तथा । निबिडतमाः तथा—निबिडं तमो ध्वान्तं, यत्र स तथा । पक्षे—अतिशयेन निबिडा निबिडतमाः तथा । पुरोगमनाः—पुरोगं प्रधानं मनो यस्य स तथा । पक्षे पुरोऽग्रे गमनं येषां ते तथा । तथा विलसदनाः—विलसद् अनः शकटं, यस्य स तथा । पक्षे बवयोरैक्यात् बिलमेव सदनं येषां ते तथा । तथा बहुधावदनाः । बहुधावद् अनः शकटं यत्र स तथा । पक्षे बहुधा वदनं मुखं येषां ते तथा । तथा पुरोगच्छदनाः—

पुरोगच्छद् अनः शकटं यस्य स तथा । पक्षे पुरोगानि छदनानि पत्राणि येषां ते तथा । तथा कृतकदनाः—कृतं कुत्सितं, अनः शकटं, येन स तथा । पक्षे कृतं कदनं हननं यैस्ते तथा । इत्यादि स्वयमूह्यं ।

बिलसद्मा इति—बिलसमा नागवर्ग इव पुण्यपुरुषाः विलसन्ती-मा लक्ष्मीर्येषां ते तथा । पक्षे बवयोरैक्यात्, बिलमेव सद्म यस्य स तथा । तथा अनुल्लंघितसीमा जलधिरिव सत्पुरुषाः । अनुल्लङ्घिता सीमा यैस्ते तथा । अत्र सीमाशब्दो आकारान्तः । पक्षे अनुल्लंघिता सीमा येन स तथा । अत्र सीमन् शब्दोऽनंतः । परमेति—परमहावसिष्ठेन राघवा इव दुर्जनाविव । सप्तर्षिगणः[1] कथम्भूतः ? परमहाः परं महस्तेजो यस्य स तथा । केन ? वसिष्ठेन ऋषिणा । राघवाः कथम्भूताः ? परमहाः ? पराः प्रकृष्टाः, महा उत्सवा येषां ते तथा । केन ? वसिष्ठेन ऋषिणा । दुर्जनौ कथम्भूतौ ? परमहौ परः प्रकृष्टो, मह उत्सवो ययोस्तौ तथा । केन ? अशिष्टेनाशुभकर्मणेत्यर्थः । परमहावासवेनेति भाद्रपदसितपञ्चमी दिवसः । कथम्भूतः परमहाः ? परः प्रकृष्टो, मह उत्सवो यस्मिन् स तथा । केन ? वासवेनेन्द्रेण । तथा च इन्द्रमहोत्सववानित्यर्थः । गीर्वाणाः कथम्भूताः ? परमहाः । महशब्दस्याकारान्तत्वात् परो महस्तेजो येषां ते तथा । केन ? वासवेन । बलदेववलभीनाथौ कथम्भूतौ ? परमहौ । परः प्रकृष्टो, मह उत्सवो, ययोस्तौ तथा । केनात्र ? आसवेन मद्येन । तथा परमहावर्जनात् पापानामिति । गाङ्गेयः कथम्भूतः ? परः प्रकृष्टो, मह उत्सवो, यस्य । पाण्डवानां स तथा । कस्मात् ? वर्जनात् । पाण्डवाः कथम्भूताः ? परमहाः । परः प्रकृष्टो, महस्तेजो, येषां ते तथा । कस्मात्श्ववर्जनात् । केषां ? पापानां । शकुनिदुर्योधनौ कथम्भूतौ ? परमत्यर्थं, अहौ—न विद्यते हो हर्षो ययोस्तौ । तथा च विषादवन्तावित्यर्थः । पापानामर्जनान्नरकगामित्वेनेति भावः ।

का. क. सस्वरनिस्वर इति । ये शब्दाः सस्वरा निस्वराश्च भवन्ति तैः प्रथमैकत्वबहुत्वयोः साम्यम् । यथा—द्वार् राज् भ्राज् पङ्केरुह् ईदृश् कीदृश् । काव्यं यथा—

> लोकालोकलसद्विचारविदुरा विस्पष्टनिःश्रेयस–
> द्वाराः सारगुणालयस्त्रिभुवनस्तुत्याङ्घ्रिपङ्केरुहः ।
> शश्वद्विश्वजनीनधर्मविभवो विस्तीर्णकल्याणभा
> आद्योऽन्येऽपि मुदं जनस्य ददतां श्रीतीर्थराजः सदा ।।

नान्तानां शब्दानामग्रे विशेषणतया प्रथमाबहुत्वैकत्वयोः साम्यम् । यथा—विलसद्मानः कायस्थामान इति । तथा सान्तानामप्यर्थे मिलति । यथा—बहूवाश्रितसरसः सुकविप्रबन्ध इव ग्रीष्मपान्थाः ।

तृप्रत्ययान्ता इति—तृच्तृन्प्रत्ययान्तानां शब्दानामग्रे प्रथमैकत्वबहुत्वयोः साम्यम् । शब्दा यथा—सुसम्पन्नयोद्धारः सैन्यनिवेशा इव देशाधिपतिः । सम्पन्नवोद्धारः, सर्वदातारः, बहुधातारः, सज्जपातारः, मृगयातारः, इत्यादि ।

धातुचतुर्थ्येकवच इति । धातोरग्रे चतुर्थी ह्यस्तनीविभक्तेरेकवचनं, तदग्रे नकारादयो मकारादयो वा लकारादयो वा शब्दाः प्रयुज्यन्ते, एकत्वबहुत्वयोः क्रिया भवन्ति । यथा—अभवन्नितान्तं, अराजन् महान्, व्यचरल्लीलया ।।

> न्युपसर्गशब्दपृष्ठगराजीतुल्यैर्विशेषणक्षिप्तैः ।
> अन्ते क्रियाविशेषणसारैः काव्यं महाद्भुतं भवति ।।८४।।

न्युपसर्गाः—निहत निमग्न निरुद्ध इत्यादिका शब्दाः, तेषां पृष्ठस्थितैः राजिराजी, धूलिधूली, पालिपाली इत्यादिशब्दैरन्तेऽपि निकामं नितान्तमित्यादिक्रियाविशेषणसारैः स्त्रीलिङ्गे प्रथमैकवचनेन, पुल्लिङ्गे प्रथमाद्विवचनने, नपुंसकलिङ्गे प्रथमाबहुवचनेन महाद्भुतं काव्यं भवति ।

---

१. "परमहा——————साप्तर्षिगण" इदं वतौ नोपलभ्यते ।

यथा—

छिन्नाघवल्लीनिहताङ्गजन्ममल्लीनिबद्धोरुरुची निकामम् ।
श्रीत्रैशलेयस्य जिनेश्वरस्य शिवाय मूर्तिश्चरणौ वचांसि ॥

शब्दा यथा—नाभी पाली भल्ली भ्रुकुटि चत्वरि धूली व्रतति नीवी जाति राजि रुचि सूचि कुटि कोटि त्रोटि वल्ली मञ्जरी वल्लरी भेरी गोणी चुल्ली ओषधि झल्लरी प्रतोली कदली कटि श्रेणि आवलि आलि, सर्वेऽपि इकारान्ता ईकारान्ताश्च । एवमन्येऽप्यूह्याः । एषामग्रे प्रयोज्याः शब्दाः यथा—निहित निबद्ध नितान्त निकुञ्ज निचित निरुद्ध निश्चित निशित निवासित नियुक्त नियोग इत्यादि ।

अदुरितराजीनिदलितकर्मश्रेणीनिरुद्धरागभरम् ।
मूर्तिः क्रमौ वचांसि च जिनस्य लोके सुखं गातम् ॥

स्फुरितसुभाषितपाली निहतप्रत्यूहसंशयं ब्राह्मया ।
मूर्तिः क्रमौ महांसि प्रभवतमुदितं वरं दातुम् ॥

एकत्वे प्रभवति क्रियासमभिहारो, द्वित्वे बहुत्वे कर्तृपदयोः सम्बोधनम् । वेति द्वित्वे प्रभवतमिति, बहुत्वे प्रभवतेति ।

रुचिराव सुप्रभाव दावपाव विभाव हाव मञ्जुलावेत्यादीनां वान्तानामग्रे आनिबद्धाद्यैः शब्दैर्महाद्भुतं काव्यं भवति । यथा—

सुप्रभावानिबद्धोद्यत्पुण्यभावानियोगतः ।
मूर्तिक्रमौ वचांसि श्रीजिनेन्दोर्जनतुष्टये ॥

अग्न्यन्तानामग्रे—ईरण उरसिकोपि उरूपपभोगेत्यादिशब्दैर्ममहाद्भुतं काव्यं भवति । यथा—

निहतजटायूरक्षस्कन्धौ विद्याश्च तर्जयस्वमपि ।
अयमायातो रामः प्रभवतमुदितं रणं कर्तुम् ॥

जटायुशब्दः सान्त उकारान्तोऽप्यस्ति । रक्षोविशेषणे नपुंसकलिङ्गे प्रथमाया एकवचनम् । स्कन्धयोर्विशेषणे द्वितीयाद्विवचनं पुल्लिङ्गे । स्त्रीलिङ्गे विद्यानां विशेषणे द्वितीयाबहुवचनम् ।

वञ्चितादिशब्दपृष्ठे आकारान्ताः शब्दाः प्रयोज्याः, महाद्भुतं भवति ।

मुखाम्भोजं कुचौ क्रीड़ा सप्रभाव [वा ?] ञ्चितश्रिया ।
राधाया यमुनातीरे विष्णोः सुखसमृद्धये ॥

मुखाम्भोजं सप्रभावं, कुचौ सप्रभौ, अग्रे अञ्चितश्रिया, क्रीडा सप्रभा । रुचिराग्रे वञ्चितश्रिया वंश वञ्चना वङ्ग इत्यादि ।

औसाधितराजितसमपदाग्रगैरवमुखैः शब्दैः ।
भवति तृतीयविभक्तिस्पष्टार्थैरद्भुतं काम्यम् ॥८५॥

औसाधितराजितादिपदानामग्रे स्थितैर्वेणीविचकिलवस्त्रादिभिरवमुखैस्तृतीयाविभक्त्यन्तैः स्त्रीलिङ्गे प्रथमाया एकवचनेन पुल्लिङ्गे प्रथमाद्विवचनेनाद्भुतं भवति । यथा—

हृद्यावलिविलासेन मध्यश्रीरिव योषितः ।

कपोलाविव नागस्य श्रियं गाते भवद्भुजौ ।।

गाङ श्यैङ गतौ । तथा—वनप्रदेशाविव शोभित. वेणीबिलासेन स्त्री । वनपक्षे एणीशब्दः । स्त्रीपक्षे वेणीशब्दः । प्रावृण्मासाविव शोभिताविचकिलमालया स्त्री । राजप्रदेशे हट्ट श्रेणीव शोभितावस्त्रमालाभिर्भटौ। शोभित राजित मण्डित द्योतित इत्यादि, एषामग्रे वनमालिविनायकवदनादिशब्दाः पूर्वं लिखिताः योज्याः ।

स्त्रियामीकारान्तशब्दैः प्रथमाबहुत्वसाधितैरर्थे मिलति एकत्वबहुत्वयोः साम्यम् । यथा—पाल्यः कदल्यः वल्ल्यः मालिन्यः राज्यः सुशोभनार्यः सुशोभनबाल्यः अधिकदर्यः सख्यः मस्यः सत्यः विदितवेद्यः विशदवलभ्यः वार्यः सदर्यः दास्यः सम्पन्नवारुण्य इत्यादि । यथा—वनमिवोल्लासितश्रीकवयो नृपसभाप्रदेशाः । नपुंसके एकवचनम् । पुंसि बहुवचनम् । वैश्वानरा इव तेजोऽनुगतरुचिरवयो गात्रम् । अश्वकुलमिव यः शोभिततरः । प्रबलतमाः सेनाः प्रदोषवत् ।

म. टी. त्वं कथम्भूतं ? निहतजटायुः । अत्र जटायुः शब्दः सान्तस्तेन नपुंसकलिङ्गे प्रथमाया एकवचनेनेष्टरूपसिद्धिः । पुनः स्कन्धौ कथम्भूतौ ? निहतजटायू । विद्याः कथम्भूता ? निहतजटायूः । अत्र जटायुशब्द उकारान्तः । इतीति किं ? हे स्कन्धौ, हे विद्या, हे स्वः, ? युवां, यूयं त्वं च, प्रभवतं प्रभवत् प्रभव । अत्र उदितं मुदितं तमिति प्रसिद्धं यथासम्भवं क्रियाविशेषत्वेन योज्यं । किं कर्तुं ? कर्तुं कं ? कर्मतापन्नं रणम् ।। छ ।।

अवसुखैरिति—वो मुखे येषां ते च सुखा नवसुखा अवसुखा ।

एणी अस्त्रमित्यादि रीत्या वेण्यादिशब्दा ओसाधितराजितादिपदानामग्रे प्रयोज्याः। यथा—यथा—प्रावृण्मासा शोभिताविव किल । मालया स्त्री । अत्र विचकिलशब्देन मल्लिकापुष्पं, तस्य माला, तया शोभिता । काविव ? प्रावृण्मासाविव । तौ कथम्भूतौ ? शोभितौ । कया इव ? मालया इव । किलः कर्दमस्तस्य माला श्रेणिस्तयेत्यर्थः । राजा—प्रदेशेति—भटपक्षे अस्त्रमालाभिः शस्त्रमालाभिः राजप्रदेशहट्टश्रेणिः ।

पक्षे वस्त्रमालाभिरिति । पाल्य इति असौ पाल्यः पालनयोग्यः । पक्षे पालीकल्पो नीरोगः, पक्षे कली । एवं सर्वेऽपि शब्दा ज्ञेयाः । वनमिवोल्लासितश्रीकवय इति राजसभाप्रदेशाः । कथम्भूताः ? उल्लासिता दीप्ता, श्रीर्येषां ते तथा; उल्लासितश्रियः कवयो येषु ते तथा । वनपक्षे सश्रीकानि वयांसि पक्षिणो यत्र तत्तथा । वैश्वानरा इवेति। गात्रं कथम्भूतं ? तेजसा अनुगतं अनुज्ञातं रुचिरं वयो यत्र तत्तथा । अग्नयः कथम्भूताः ? तेजसा अनुगतोऽनुक्तो, रुचियुक्तो रविर्यैस्ते तथा । अश्वकुलमिवेति—यः कथम्भूतः ? अतिशयेन शोभितः शोभिततरः । अश्वकुलं कथम्भूतं ? शोभितं तरो वेगो यस्य तत्तथा । प्रबलेति—सेनाः कथम्भूताः ? अतिशयेन प्रबलाः प्रबलतराः । प्रदोषः कथम्भूतः ? प्रबलं तमो यत्र स तथा । एतदुदाहरणद्वये पुंस्येकत्वं स्त्रियां बहुत्वमित्यनुक्तौऽपि विशेषो ज्ञेयः ।।छ।।

का.क. शोभितादिशब्दानामग्रे निपातनिदाघनिकेतननिचितादिशब्दाः स्थाप्याः । स्त्रीलिङगे एकवचनेन स्त्रीपुंनपुंसकलिङ्गेषु बहुवचनेन साम्यं भवति। स्यात् यथा—शोभिता निखिलविभवेन, मण्डिता निचितदानेन, राजिता निकेतनैः इत्यादि। शोभिता राजिता खण्डिता मण्डित. द्योतितादिशब्दानामग्रे प्रयोज्याः शब्दा यथा—निखिल निधन निरय निदान निधान निपीन निदाघ नियति निकुञ्ज निलय निःश्रेणि निवसन निचित निशान्त।

ईकारोपधाकारोपधनकारान्ताः पीनहीनादिगानमानादयः शब्दा इकारान्ताः क्रियन्ते । नपुंसकलिङगे एकत्वबहुत्वयोः साम्यं भवति। यथा—अधिकपीनि वनानीव कुलम् । विशदहीनि बिलानीव कुलम् । परमहासमीनि वनानीव समुद्रजलम् । तथा परमखगानि वनानीव विप्रकुलम् । स्वच्छगानि बहुवर्णनागानि पुरोगानि परमध्यानि सुसम्पन्नदानि परमदानि बहुधानादानि मञ्जुलयानि पीन हीन मीन पाठीन शालीन अध्वनीन ईशान प्रस्थान इत्यादि।

चाजादानाभारालाहाक्षा एषां चाकारान्तादिशब्दानामग्रे तृतीयैकवचनेन श्लेषः । सदालञ्चयान्वितः । सदारुजयान्वितः पुरोगदयान्वितः । बहुधानयान्वितः । सदादेशनयान्वितः । सदारम्भयान्वितः । बहुधारयान्वितः । स्फुटमहेलयान्वितः । अथ बाह्याद्यः । बाहाशब्दो भुजवाची आकारान्तः । सत्वरक्षयान्वित इत्यादि ।

सनकारान्तैः शब्दैः सिसाधितैः पुंस्त्वनिर्युक्तैः ।
अग्रे क्रियाविशेषणकृतावमुखशब्दतोऽद्भुतं भवति ॥८६॥

महःप्रमुखसान्तशब्दैः सद्मन्प्रमुखनान्तशब्दैरग्रस्थक्रियाविशेषणस्थवरबलवाहिताद्यवमुखपदयुक्तैः अग्रे पुल्लिङ्गे त्रिभिर्वचनैरद्भुतं भवति । यथा परमहावरम् । बिलसद्मावाहितप्रसरम् । अस्यार्थो 'विवया' इति सूत्रे प्राक् सनान्तप्रस्तावात् सविस्तरः प्रोक्तः ।

दीर्घादिनान्तशब्दैः स्त्रियां द्वितीयैकवचनकृतरचनैः ।
अर्थे मिलति च सान्तैः षष्ठीबहुवचनतोऽद्भुतं भवति ॥८७॥

दीर्घादिनान्तशब्दैः स्त्रियां प्रतीचैकवचनेन साधितैरग्रतः स्थिति विभ्रदित्यादिपदस्य ।

तथा सकारान्तशब्दैर्व्यञ्जनान्तैरकारान्तैश्च द्वितीयैकत्वषष्ठीबहुत्वयोः साम्यम् । यथा—सरसां स्थितिं वहन्, परमहसां स्थितिं बिभ्राणः ।

तथा श्लेषविशेषणे पुंसि स्त्रियां च व्यञ्जनान्तानां शब्दानामग्रे जस्शसङसिङसां साम्यम् । रेफनिमित्ते ओसोरपि साम्यम् । यथा गुणमतोरयात् । जस्शसौ मुक्त्वा क्लीबेऽपि यथा—शुभवाचो रसात् ।

तथा—भृत् भृत् वद्रूपा ये अकारान्ता व्यञ्जनान्ताश्च शब्दास्तेषां पुरतः सेरपि साम्यम् । यथा—गुणभृतो रयात् । अकारान्तपक्षे सिः, श्लेषविशेषणे स्त्रियाम् ।

म. टी. निखिलविभवेनेति—निखिलः समस्तः । पक्षेऽखिलं हलादिभिरकृष्टं क्षेत्रादि । अधिकेति—अधिकं पीनाः अधिकपीना विद्यन्ते यत्र तदधिकपानि । पक्षे अधि सामस्त्येन कपयो वानरा येषु तानि । विशदेदि । विशदाश्चहीनाश्च विद्यन्ते यत्र तविशदं । हीतिपक्षे विशन्तः हयो येषु तानि विशदहीनि । परमेति परमहासो येषां ते परमहासाः, परमहासाश्च ते मीनाश्च परमहासमीना, स्ते विद्यन्ते यत्र तत् परमहासमीनि । पक्षे पराः प्रकृष्टाः शसयोरैक्यात् महाशम्यो वृक्षविशेषा विद्यन्ते येषु तानि परमहासमीनि । परमखगानीति—परः प्रकृष्टो, यो मखो यज्ञस्तस्य गानं विद्यते यत्र तत् परमखगानि । पक्षे खगाः पक्षिणः, सुसम्पन्नदानीति । अत्र सुसम्पन्नदानं यस्य तत् सुसम्पन्नदानि । पक्षे सुसम्पदो न दायेषु तानि सुसम्पन्नदानि ॥छ॥

परमहावरमिति—परमहावरं । सूर्य इव, वधूवराविव श्रीमन्तः इति विशेषणविशेष्ययोजना । अत्र प्रथमाया एकवचने महस्शब्दः सन्तस्तेजोवाची, द्वित्वे बहुत्वे च महशब्द उत्सववाची । अदन्तः । अत्रैकत्वबहुत्वपक्षे वरमिति क्रियाविशेषणं, द्वित्वपक्षे च अरं अत्यर्थमिति क्रियाविशेषणं । तथा बिलसद्मा वाहितप्रसरं । धनिनाविव धनिन इव फणी । अत्रैकत्वे बिलमेव सद्म यस्य स तथा । द्वित्वे बहुत्वे च बिलसन्त्यो । मा लक्ष्म्यौ ययोर्येषां वातौ ते वा तथेति विग्रहः । एकत्वबहुत्वपक्षे वाहितप्रसरमिति क्रियाविशेषणम् । द्वित्वपक्षे आहितप्रसरमिति क्रियाविशेषणं ज्ञेयम् ॥छ॥

आकारान्ताद्घोषवति निमित्ते सिजस्शसां पुंस्याकारान्तात् सिजस्टानां पुंस्यकारान्ताज्जसः साम्यम् । यथा—सोमपा जगति । पुंपक्षे आकारान्तः । अकारान्तोऽपि जस्विषयः । अकारान्तविशेषणात् पुंस्त्रियोर्जसः, स्त्रियाँ शसः, तथा घोषवतिनिमित्ते स्त्रियां सेरपि साम्यम् । यथा—धृतगुणा जगति । पुंस्यकारान्तादाकारादौ स्वरे सिङयोः **साम्यम्** । यथा—वृक्ष आस्ते ।

तथा भूतभूद्रूपशब्देभ्यः पुंस्यकारान्तात् ङिङ्योः, पुंस्त्रियोर्व्यञ्जनान्ताज्जस्शसङसिङसां, क्लीबे ङसिङसोराकारादौ स्वरे साम्यम् । यथा—गुणभृत आदरात् ।

अकारान्तविशेषणात् पुंस्यौजसोः, स्त्रियां जस्शसोर्यवलोपस्वरे साम्यम् । यथा—बहुगुणा इह कामम् ।

भृतभ्रूद्रूपशब्देभ्यः स्त्रियां सैलिङ्गत्रये टावचनस्य साम्यम् । यथा गुणभृता, तथाभृतेयम् । एवंरूपेषु चतुर्थी-सप्तम्योरपि । एवमन्येऽपि बहवः प्रकाराः सम्भवन्ति, ते स्वयमूह्याः ।

अथ त्यादिश्लेषः । कुरुतामित्यादिष्वेकत्वद्वित्वयोः, अराजन्नमलेष्वेकत्वबहुत्वयोः, व्यतिभाते इत्यादिष्वेकत्वद्वित्व-बहुत्वानां साम्यम् ।

अथ स्वराणां मिथः श्लेषोपायाः । पूर्वमकारस्यान्यस्वरैः क्रमेण श्लेषो यथा—

ओसि आमि जसि भ्यामि स्वरे गौणतया अआ ।।

ये शब्दा अकारान्ता आकारान्ताश्च पृथगर्थास्ते ओस्यादिभिः श्लिष्टाः स्युः । यथा—रामयोः रामाणां रामाः रामाभ्याम् । रामावगूहनम्, रामाश्लेषः, रामेच्छा, रामेप्सा, रामोद्योतः, रामोढा, रामैजनम्, रामैहिकः, रामौजः, रामौरसः, रामाञ्चनम्, रामेङ्गितम् । उल्लासितरामो लक्ष्मण इव वसन्तः, अत्र समासेन गौणता । शब्दा यथा—राम लक्ष्मण पद्म कमल वाल शाल आधान कल कच्छ तारक अलक मालिक जालिक जप जय मुक्त कान्त प्रिय सित-दक्षिण दोष अञ्जन सून वासन रसन प्रवाल प्रकार प्रवण प्रमद प्रवीण प्रसभ शिव जीव वश धर गोत्र रस स्थल इल क्षम अनन्त धिषण परवश आर्द्र बहुल तार कील सदारम्भ काष्ठ विनत निकष मुह करण घट कक्ष उच्छृङ्खल क्षुद्र हाल विदेह आर निर्वीर विधव निष्कल घाट श्रवणादयः ।

अइ ङ्यग्रस्थरेफेण इनग्रगसमासतः ।।८८।।

अकार—इकारौ सप्तम्येकवचनपुरःस्थरेफादिशब्देन, तथा इन्पुरःस्थसमासेन तथा च्विप्रत्ययेन श्लिष्टौ भवतः । यथा सुबुद्धेरचितस्थितिः। अकारान्तपक्षे सप्तमी, इकारान्तपक्षे पञ्चमी षष्ठी वा । शुद्धबुद्धिशोभितः । अकारान्तपक्षे शुद्धश्चासौ बुद्धश्च शुद्धबुद्धोऽस्यास्ति इति इन् । इन्ननेकस्वरादयः । "सर्वादेर्नित्यमिन्" द्वन्द्वनिन्दितरोगेभ्यः इत्यादिना (हे.व्या. ९.२.५९) इन्प्राप्तिर्ज्ञेया । यथा शुद्धबुद्धीभूतश्रीः । शब्दाः यथा—शुद्ध बुद्ध सिद्ध प्रयत्त नियत मत वल्ल मल्ल रत सुगत जात कान्त नत प्रस्तुत शान्त उन्नत आयत दुर्गत सुरत नवनीत अवध कृत ज्ञात अवन अटन नंद प्रकृत अभिज्ञात हर अर अशन भूत बल ग्रन्थ प्रबोध अनेक पक्षतः आट सदा पद्धत काश सूर दुर्विध दीप्त रिष्ट गुरुतर बार कर कट शाल मुष्ट श्रुत बर्धक इत्यादयः।

अई च्विप्रत्ययाद्गौणौ

अकार-ईकारौ च्विप्रत्ययेन गौणौ श्लिष्टौ भवतः । यथा—महीकृतश्रीः । गौरीभूतस्थितिः । अकारान्तपक्षे च्विः । शब्दा यथा—मह गौरव रसा रवि पञ्च बल्लक सल्लक पांशुल वल्ल मल्ल दर गुरुतम वसुमत तन्त्र वेद बाप सरस अवन बहुतर काल ताल हरिताल कवल ओष्ठ बिम्ब मागध माधव कर्कट करीर अर्जुन कुट कुम्भ वर्द्धन भारत चार सन्नगर नील बाण चण्डभ सदानिभ ऐरावत श्रृङ्ग निष्कुट शम कुश कर्कर मन्थन सदा संमुख कुण्ड तुण्ड परतन्त्र सुमुख कूबर सदाम धोरण वैजयन्त तीर एकाबल असुर आढक सदातुवर पिप्पल—इत्यादयः ।

रेफदृष्टसिना अउ

अकार-उकारौ प्रथमैकवचनस्थरेफादिशब्दैः श्लिष्टौ भवतः । तथा—वटोरम्यः । उकारान्तपक्षे पञ्चमी षष्ठी वा । शब्दा यथा—पट कट रङ्क काक सशङ्क वर चर चार केत कन्द ओतन्त्प दार तर्क वाह शुभ मय बहुतर सदा गोमयद्रु भूरिमाय उ (ओ?) त सदाकार सक्त परमद्य सून प्रभ जराय अवट अन्ध ताल—इत्यादयः ।

म. टी. मागधेति । मागधो मङ्गलपाठकः । पक्षे मागधी पिप्पलि सदानिभेति—सदा निरन्तरं अतिभो बहुशोभः शृङ्गं प्रसिद्धं । पक्षे शृङ्गी वृथा या वृषभे स्वर्णमीनविशेषयोरिति ।।छ।।

पटकटेत्यादि—एते शब्दा अदन्ता लिखिताः । पुनः पटुकटुरं । तु इत्यादिरीत्या उदन्ता अपि ज्ञेयाः । तत्र पटुः पटिष्ठः, कन्दुः स्वेदनिका, ओतुर्मार्जारः । अदन्तपक्षे आ सामस्त्येन, उतं प्रोतमित्यर्थः । तर्कुं कर्त्तनसाधनं त्राक इति प्रसिद्धम् । मयुः तुरङ्गमुखः । अदन्तपक्षे मयः उष्ट्रः । सदोडुः सदा नक्षत्रं । अदन्तपक्षे डलयोरैक्यात् सदोलः । सह दोलया वर्तते यः स सदोलः सदाकारः । पक्षे सदा निरन्तरम् । कारुः परपक्षे परुः पर्वसूनं पुष्पम् । प्रभः प्रकृष्टकान्तिः । पक्षे सूनुप्रभुशब्दौ प्रसिद्धार्थौ । जरायः जरासमागमः । पक्षे जरायुर्गर्भाशयः । अवटो गर्त्ता पक्षे अवटुः । कृकाटिका अन्धः : पक्षे अन्धुः कूपः । शेषं सुगमम् ।।छ।।

का. क. अऊ उवत् कृतक्लीबविशेषणतया तु ऊ ।।८९।।

यथा—अकारान्ताः, उकारान्तास्तथा ऊकारान्ताः पूर्वं क्लीबविशेषणत्वेन उकारान्ताः क्रियन्ते, तत उकारविधिना श्लेषः । यथा—अतिवधोरभ्यतरः प्रकारः क्रूरान्तरारिषु स्वसमानो मुनिमण्डलस्य । ऊकारान्तपक्षे अतिक्रान्ता वधूर्येन मुनिमण्डलेन तिददतिवधु, तस्याऽतिवधोः । शब्दा अकारान्ता उकारान्ता यथा—अगम अलाब यवाग परमन्द अधिभ प्रति पुनर्भू इत्यादयः ।

अए ङौ

अकार-एकारौ सप्तम्येकवचनेन श्लिष्टौ भवतः । एकारान्तशब्दानामबाहुल्यादेकारसहितपूर्वाक्षराः शब्दा अर्थे मिलति ग्राह्याः । यथा—अधिकेवलिसंस्थितिः । परहेरम्बसल्लक्ष्मीः । अकारान्तपक्षे सप्तमी । शब्दा यथा—भेक केवली केलि केतु केश केशव केदार केसर क्रमेलक आदयः ।

दृष्टरेफेण भिसा गौणतया अऐ ।

अकार-ऐकारौ तृतीयाबहुवचनेन पुरःस्थसमासरेफादिशब्दैः श्लिष्टौ भवतः । यथा—सदासन्नैरम्यः । ऐकारान्तानामप्यबाहुल्यादैकारसहितपूर्वाक्षराणामैकाराग्रस्थरेफाणां शब्दानामर्थे मिलति ग्रहणम् । यथा—कैरवभैरवादयः । सिदृष्ट-घोषवद्वार्णैर्न सन्धिः, संहितायां अभावेन विरामविवक्षणाद्विसर्ग एव ।

अ ओ

अकार-ओकारौ प्रथमैकवचनाग्रस्थघोषवत्पूर्वाक्षरवर्यादिशब्दैः श्लिष्टौ भवतः । यथा—नगोवर्यश्रीः । अकारान्त-पक्षे सिः । ओकारान्तानामप्यबाहुल्यादोकारसहितपूर्वाक्षराणां ओकाराग्रे अकारघोषवद्भ्यां युक्तानां शब्दानां ग्रहणम्। यथा—कोरक गोलक कोलक नयोधस्थितिरित्यादौ उकाराग्रे अकारः । कोयष्टिः कोदण्डः कोद्रवः उच्चक्रोधनवस्थिति-कोलसल्लक्ष्मीः पोगण्ड गोधन इत्यादौ ओकाराग्रे घोषवन्तः । पुरोगोद्योतः, अधिकोपगतः इत्यादौ जसिः । पक्षद्वयेऽपि समास उद्योताद्यैः ।

उलीलया अऔ ।।९०।।

अकारान्ता औकारान्ता यदा ते, तदा औकारान्ताः पूर्वं क्लीबविशेषणत्वेन उकारान्ताः क्रियन्ते, तत उविधिना श्लेषः । यथा—अत्यासन्नो रुचिरः स्वतुल्यः कुलस्योदयः । औपक्षे अतिक्रान्ता आ सामस्त्येन सत् नौर्येन कुलेन अत्यासन् नु, तस्यात्यासनोः । एवं द्यौः । एवमन्येऽपि ।

म.टी. वाद्यरिति व आदिर्येषां ते वाद्या, घोषवन्तश्च ते वाद्याश्च घोषवद्वाद्याः; सेदृष्टाः सिदृष्टाः सिदृष्टाश्च ते घोषवद्वाद्याश्च ते, तथा तः सि दृष्टघोषवद्वाद्यैः शब्दैरित्यर्थः । सिपुरो कोषवद्वाद्यैरिति पाठे य सेरग्रे, घोषवद्वाद्यैरित्यर्थः । अत्र 'न सन्धिरिति सूत्रेण (ई. व्या. 1.3.52) संहिताया अभावने विरामविवक्षणाद्विसर्गे एव यथा न गोवर्य श्रीःअत्र नगः पर्वतः वर्यश्रीर्मनोक्षज्ञश्रीः । पक्षे गोवर्य श्रीर्नास्तीत्यर्थः क् उच्चक्रोधनवत् स्थितिरित्यत्र उच्चकः धनवली स्थितिर्यस्य स तथा । पक्षे उच्चा क्रोधनवती स्थितिर्यस्य स तथा कोलसल्लक्ष्मीरित्यत्र कः लसल्लक्ष्मीर्यस्य स तथा । पक्षे कोलोवराहस्तेन सल्लक्ष्मीर्यस्य स तथा पोगण्ड इति पः पवनः; गण्डो गल्लः । पक्षे पोगण्डो विकलाङ्ग इत्यादि स्वयमूह्यम् ।सदारा आटोप इत्यत्र सदा निरन्तरं, अरौ शत्रौ, आटोपः । यलोपपक्षे रैद्रव्यं, शेषं पूर्ववत् । तथा सदा शनै रत इत्यत्र सदा शनौ ग्रहेऽथवाऽशनौ वज्रे, रतो रक्तः ऊकारपक्षे शसयोरैक्यात् स कश्चिज्जनः नाविबोडायां रतो नौ रात इत्यादि सुगमम् ।।छ।।

का. क. गौणत्वे आ अवत्

आकारान्ताः शब्दाः पूर्वमन्यविशेषणत्वेन अकारान्ताः क्रियन्ते, पश्चादकारविधिना सर्वस्वरैः श्लेषः । इकारेण यथा—पुरे प्रचुरशाले रम्यता शरत्केदारस्येव । शालापक्षे सप्तमी । शालिपक्षे पञ्चमी षष्ठी वा । शब्दा यथा—शाला सन्धा विमला प्रहेला हेला बहुलाला परमहाला महाशाला मुक्ता कान्ता कला इत्यादयः । ईकारेण यथा—घटा बहुलाला परमहाला सुरुचिरज्वाला परमहाशाला इत्यादयः । बहुलालीभूतः । उकारेण यथा—मन्या सूना कम्बा वल्गा त्रपा अम्बा मृगया आदयः । धृतत्रपोरम्यः । ऊकारेण यथा—भा प्रतिभा अधिभा, पुनर्भा कच्छादयः । अतिभोरम्यः प्रचारः स्ववृत्त्यधिकवृन्दस्य ।

चिवना आमि ओसि स्वरे इ ई ।

इकार-ईकारौ च्विप्रत्ययेन तथा आम् ओस्भ्यां तथा स्वरैश्च श्लिष्टौ भवतः । यथा—सदावलीभूतः सदावलीनां सदावल्ल्योः सदावलनुगतादयः ।

इउङौ

इकार-उकारौ सप्तम्येकवचनेन श्लिष्टौ भवतः । यथा—विधौ प्रीतिः । शब्दा यथा—अणि हेति कटि तरि सदारि शरारि उच्चारि सदाद्रि प्रभृतयः ।

क्लीबवृत्तित्वे इऊ उविधिना तथा ।।९१।।

इकार-ऊकारौ यदा क्लीबे तदा ऊकारान्ताः क्लीबविशेषणत्वेन उकारान्ताः क्रियन्ते, तत उविधिना श्लेषः यथा—द्वेधापि विशदवधौ कुले ।

इए ङसिङसो रेफे

इकार-एकारौ पञ्चमीषष्ठ्येकवचनेन पुरस्थरेफादिरम्यप्रमुखशब्दैः श्लिष्टौ भवतः । यथा—सदासेरम्यः । एकारान्तशब्दानामभावात्सेशब्दः कल्पितः । सह इनावर्तते इति सेः, सकामः पुरुषः इत्यर्थः । सदासेरभसाटोपः ।

ङौ य्वलोपिस्वरे इऐ ।

एकार-ऐकारौ सप्तम्येकवचनेन यवलोपिस्वरे श्लिष्टौ भवतः । यथा—सदारा आटोपः । अरि रैः ।

सम्बोधनसियोगेन यवलोपिस्वरे इओ ।।९२।।

इकार-ओकारौ सम्बोधनप्रथमैकवचनेन यवलोपिस्वरे श्लिष्टौ भवतः । यथा—कट इह । कटि कट् ।

इ औ ङौ

इकार-औकारौ सप्तम्येकवचनेन श्लिष्टौ भवतः । यथा—सदाशनौ रतः ।

क्लीबवृत्तित्वे ई इवत्

ईकारान्ताः क्लीबविशेषणत्वेन इकारान्ताः क्रियन्ते । तत इवत् सर्वस्वरैः श्लेषः । ईकारोकारेण यथा—स्वीकृतपटौ मित्रे प्रीताः । शब्दा यथा—तनी अपटी कटी वटी सदावटी तरी चरी कारी चारी वारी दारी । ऊकारेण तनी तनू भीभू प्रभृतयः ।

तद्धिया ऊ उ ।

तस्य ईकारस्य धीस्तद्धिस्तथा ऊकारान्ताः क्लीबविशेषणत्वेन उकारान्ताः क्रियन्ते । तत उविधिना सर्वस्वरैः श्लेषः । उकारान्त-ऊकारान्तौ च्विप्रत्ययेन वा श्लिष्टौ । तनु तनू कद्रु कद्रू प्रभृतयः ।

अम्प्रयोगादनुस्वारः

द्वितीयैकवचनेनानुस्वारः श्लेष्यो भवति । यथा—अधिकं बलं वहन्, रुचिराङ्गणश्रियं बिभ्रत्, पुरो गाङ्गेयरुचिं दधत् ।

विसर्गः श्रीसस्सैः पुरः ९३॥

श्रीस्थितिप्रायैः पदैः पुरस्थैर्विसर्गश्लेषो भवति । यथा—परागश्रीः, महस्थितिः । स्यादि-त्यादिविभक्तिश्लेषो, भाषाश्लेषः, प्रकृतिश्लेषोऽपि भङ्गश्लेषोपायेन साध्यः । विभक्तिश्लेषो यथा—भवतिरोहितः । पक्षे-भवेन तिरोहितः । स्यादिपक्षे विभक्तीनामलोपः समासेन लोपो वा क्रियते । भवतः । स्यादिपक्षे तव शिवतो वा । एवं सर्वत्र ज्ञेयम् । भवन्तिरोहिताः । भवसिततश्रीः । भवामिततश्रीः । भवावस्थित्या भवामस्थित्या । राजतिरोहितेत्यादयः । भाषाश्लेषो यथा—किम्पि केवलं पुरवञ्चनं कलिनाधोकधम् । अर्थैक्ये भाषाश्लेषे समसंस्कृतप्राकृतादिशब्दाः प्राकृतलक्षणेन ज्ञेयाः । यथा—सुरभयहरिणनरकुलेत्यादयः ।

प्रकृतिश्लेषो महःस्थित्यादयः । एवमष्टविधोऽपि श्लेषः प्रपञ्चितः ।

श्लेषभेदा यथा—

वर्णपदलिङ्गभाषा प्रकृतिप्रत्ययैस्तथा ।
विभक्तिवचनाभ्यां च श्लेषः सञ्जायतेऽष्टधा ॥९४॥

कलाबयोऽत्र भङ्गोऽभूदाकारेकारवर्णयोः ।
स्वर्गलाभविभाशोभी पदभङ्गसमुद्भवः ॥९५॥

लिङ्गश्लेषे तनुर्नेत्रे ब्राह्म्याः कैरवराजिनी ।
हरउमे सुरमणौ संस्कृतप्राकृतोद्भवः ॥९६॥

दारिद्र्यकृद्रिपौ मित्रे कृकृत्प्रकृतिभङ्गतः ।
गौरीभूतगुणोपेत ईच्विप्रत्ययभङ्गभूः ॥९७॥

त्वमत्रारचयश्चक्रे त्यादिस्यादिविभक्तिजः ।
विलसद्मान इत्यत्र बह्वेकवचनोद्भवः ॥९८॥

वर्णादीनामभङ्गे तु राजा मृदुकरस्थितिः ।
संसारसारमर्थं वये संस्कृतप्राकृतोद्भवः ।।९९।।

म. टी. वर्णेत्यादि – अष्टविधश्लेष उक्तस्तदुदाहरणानि यथा–कलावर्येत्यादि । तत्र कलावर्यः कलाभिर्वर्यः । पक्षे कलौ अर्यः स्वामी कलावर्यः । अयं आकारेकारवर्णश्लेषरूपः प्रथमो भङ्ग १ । स्वर्गलाभविभाशोभी—अत्र स्वर्गस्य लाभः स्वर्गलाभस्तस्य विभा तया शोभी । पक्षे सुष्ठु अर्गला, तद्वदाभा यस्य स स्वर्गलाभस्तस्य या विभा तया शोभी । अयं पदभङ्गश्लेषात्मको द्वितीय भङ्गः २ । ब्राह्याः कैरवराजिनी तनुर्नेत्रे । तनुः कथम्भूता ? कैरववद्राजिनी । स्त्रीलिङ्गे प्रथमैकवचनं । नेत्रे कथम्भूते ? कैरववद् राजिनी । नपुंसकलिङ्गे प्रथमा द्विवचनं । अयं लिङ्गश्लेषरूपस्तृतीयभङ्गः ३ । हरउमे सुरमणो–हे उमे ! हे पार्वती हरः सुरमणः सुभर्ता । इदं संस्कृतभाषया प्राकृतभाषया च हरउ हरतु, मे मम, हे सुर हे देव । मणो मनः, इत्यत्र भवानित्यध्याहार्यम् । अयं संस्कृतप्राकृतभाषाश्लेषात्मकश्चतुर्थो भङ्गः ४ । दारिद्र्यकृद्रिपौ (अ?)मित्रे-रिपौ शत्रौ, दारिद्र्यं करोतीत्येवंशीलः । पक्षे मित्रे सुहृदि दारिद्र्यं क्रिततीत्येवंशीलः अयं कृकृत् प्रकृतिश्लेषरूपः पञ्चमो भङ्गः ५ । गौरीभूतगुणोपेतः उज्जवलीभूतगुणयुक्तः । पक्षे गौरी पार्वती, भूतश्च तयोर्गुणास्तैरुपेतः । अयं ईच्वि प्रत्ययश्लेषात्मको षष्ठो भङ्गः ६ । त्वमत्रारचयश्चक्रे-त्वमित्यव्ययत्वात् त्वया, अत्र शकटे, अरचयः अरकाणां समूहश्चक्रे । पक्षे त्वमत्र चक्रे सैन्ये, अरचयः अकरोः । निवासमिति गम्यम् । अयं स्यादि-श्लेषरूपः सप्तमो भङ्गः ७ । विलसद्मानः विलसन्मानो यस्य स विलसद्मानः । पक्षे बिलसद्मानः सर्पाः । अयं बह्वेकवचनश्लेषात्मकोऽष्टमो भङ्गः ८ । इत्युक्तः सप्रपञ्चः श्लेषप्रपञ्चः ।।छ।।

का. क. यमकोपायमाह—

समानस्वरवर्णानुप्रासतः श्लेषतस्तथा ।
स्याद्वर्णपदपादानामावृत्त्या यमकं द्रुतम् ।।१००।।

अनुप्रासश्लेषोपायाः पूर्वोक्ता एव ।

हेलाविडम्बितहिरण्मयरत्नशृङ्गाः
शृङ्गारभासुररुचः सहचारिकान्ताः ।
कान्तारभूवसतयोऽत्र चरन्ति सारं
सारङ्गचञ्चतदृशो मरुतां महेलाः ।।

भवति वृद्धिकृते कमलागमो जिनमतो न मतो नमतो मम ।
न रतिदामरभूरुहकामधुक् सुरमणीरमणीरमणीयता ।।

वनस्यान्तर्लसत्यत्र रतिभूतरुचारुणः ।
सुरौघः स्त्रीसखो रत्नैरतिभूतरुचारुणः ।।

वक्रोक्तिविरोधाभासप्रश्नोत्तरभेदपुनरुक्ताभासा अपि श्लेषसाध्याः । यथा—

तरणिं पश्य सुश्रोणि नाथ ! कुत्रास्ति नौरिह ।
सवितारं प्रिये वच्मि प्रिय ! दूरेऽधुना पिता ।।

भात्येष मेरुरुचिरोऽपि नमेरुशोभी कृत्स्नामिलामपि वहन्ननिलाभिरामः ।
सव्यालवालमपि चन्दनपादपानां नव्यालवालमभितो वहते समूहम् ।।

मूर्ध्ना वहन्ति के कुम्भौ मुग्धा श्लिष्टा ब्रवीति किम् ।
क्रियते कुञ्जरास्यस्य किमु सम्बोधनं बुधैः ।।

गजानन ।

प्रद्योतनोऽम्बुजानां सविता महसां विकर्तनस्तमसाम् ।
निखिलजगच्चक्षुरसावम्बररत्नं रविर्जयति ।।

म.टी. हेलाविलंघिनेति—हेलया लीलया, विलंघितानि उल्लङ्घितानि, हिरण्मयरत्नशृङ्गाणि याभिस्तास्तथा । शृङ्गारेण भासुरा रुक् कान्तिर्यासां तास्तथा । सहचारिणः कान्ताः पतयो, यासां तास्तथा । कान्तारभुवि वसतिर्यासां तास्तथा । सारङ्गवत् मृगवत्, चञ्चला दृशो लोचनानि, यासां तास्तथा । एवंविधा देवानां महेलाः स्त्रियोऽत्र सारं यथा स्यात् तथा । चरन्तीति भवेति यतः रतिदाः सुखदाः अमरभूरुहकामधुक्, सुरमणीरमण्यः कल्पवृक्ष कामधेनु चिन्तामणि-स्त्रिय, स्ताभिः रमणीयता भवति । अतो जिनं नमतो मम कमलागमो भवति । विवृद्धिकृते संसारवृद्धये न स्यात् कमला-गमः । कथम्भूतः ? नमतः अप्रशस्तः, वनस्येति । अत्र वनस्यान्तर्मध्ये स्त्रीसखः सुरौघो लसति क्रीडति । वनस्य कथंभूतस्य ? रतिभुवः । सुखालया ये तरवो वृक्षास्तैश्चारुणो कथम्भूतः सुधःरौम । स्यनोज्ञ ? रत्नैः कृत्वा अतिभृता अतिशयिता, या रुक् कान्तिस्तया अरुणो रक्त इति । तरणिमिति—हे सुश्रेणि हे सुभगे, तरणिं पश्य इत्युक्ते सा प्राह—इह तरणिर्नौ कुत्रास्ति ? स प्राह—हे प्रिये सवितारं वच्मि । सा प्राह—हे प्रिय सवितृशब्देन पिता उच्यते, स अधुना दूरे भाति । एष मेरुरिति यो मेरुरुचिरः स कथं मेरुशोभी न भवतीति विरोधः । पक्षे नमेरुभिर्वृक्षविशेषैः शोभते इत्येवंशीलो नमेरुशोभी इति विरोधपरिहारः । यः कृत्स्नामिलां वहति स अनिलाभिरामः । कथं न इलाभिरामोऽ-निलाभिराम इति विरोधः । अनिलेन वायुनाऽभिराम इति तत्परिहारः । यः स व्यालबालमपि चन्दनपादपानां समूहं, अव्याल-बालं कथं वहते (ति ?) इति विरोधः । तत्परिहारे च एकत्र व्यालबालैः । सहितं अन्यत्र च नव्यानि यानि आलवालानि, तैः सहितम् । मूर्ध्ना इति । कुम्भौ के वहन्ति ? गजाः । मुग्धा स्त्री पतिनाश्लिष्टा किं ब्रूते ? नन । हस्तिवदनस्य सम्बोधनं किं क्रियते ? हे गजानन ।।छ।।

इति श्रीजिनदत्त० श्लेषसिद्धिप्रताने तृतीये अद्‌भुतस्तबकश्चतुर्थः ।

म. टी. इति श्री तपागच्छाधिनायक ।तसाहि श्री अकब्बर प्रतिबोधदायक श्रीशत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक पुरन्दर भट्टारक श्री हरिविजयसूरीश्वर शिष्य पण्डितश्रीशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे श्लेषसिद्धि प्रतानप्राप्ताद्‌भुतस्तबकोद्योतकश्चतुर्थप्रसरः ।।छ।। ४

॥ ३.५ ॥

अथ चित्रप्रपञ्चः

का . क. स्यात् स्वरव्यञ्जनस्थानगत्याकारनियन्त्रणा ।
च्युतगूढादि वा चित्रं च्युतं तत्र चतुर्विधम् ॥१०१॥
मात्रार्धमात्रयोर्बिन्दुवर्णयोश्च्यवनान्मतम् ।
क्रियाकारकसम्बन्धपादैर्गूढं चतुर्विधम् ॥

स्वरादीनां नियन्त्रणा नियमः । स्वरचित्रं यथा––जय सकलनयकलन, जय मदनमददलन, जय कमलकरचरण, जय समयजनशरण । ह्रस्वैकस्वरः । एवं दीर्घैकस्वरद्वित्र्यादिस्वरो नियमो ज्ञेयः । एकस्वरादिशब्दाः सुप्राप्या इति न दर्शिताः ।

म. टी. अथ चित्रविधिं प्रपञ्चयन्नाह–एकस्वरचित्रं यथा । जयेति––हे सकलनयकलन, त्वं जय इति चतुर्षु पादेषु योज्यम् । सकलाश्च ते नयाश्च, तेषां कलनं ज्ञानं, यस्य स तथा, तस्य सम्बोधनं तथा । मदनस्य कन्दर्पस्य यो मदस्तस्य दलनं यस्मात् स तद्दलनः, तस्य सम्बोधनम् । तथा करौ च चरणौ च करचरणौ । कमलवत् करचरणौ यस्य स तथा, तस्य सम्बोधनं तथा । समयाश्च ते जनाश्च, तेषां शरणं यस्मात् तत् तथा । तस्य सम्बोधनमित्यत्र निलया छन्दः । व्यञ्जनचित्रं वृत्तावेव व्याख्यातमस्तीति न व्याख्यातमिति ।

का. क. व्यञ्जनचित्रं यथा––

ककाकाकङ्ककाङ्काङ्का केकिकेकाकुका ककुप् ।
कौ कं कङ्ककककोकैक काकंकाककककाकुकम् ॥

वर्षावर्णने ककुप् वर्तते । जात्यैकवचनम् । किंभूता ककाकाकङ्ककाङ्काङ्का ? कका लोलाः, काकङ्काः सुखागमना ये काङ्का मेघास्ते, अङ्को लक्ष्म यस्याः सा । ककि लौल्ये, भ्वादिरात्मनेपदी । ककन्ते काकः पचाद्यच्, कं सुखं, तद्धेतुः आकङ्क आगमनं येषां ते काकङ्काः । ककिवकीत्यादिना भ्वादिरात्मनेपदी ककधातुः आङ्पूर्वः । आकङ्कनं आकङ्कः, भावे घञ् । कं जलं, अङ्के उत्सङ्गे येषां ते काङ्काः जलभृतः । पुनः किम्भूता ? केकिकेकाकुका । केकिनो मयूराः, तेषां केकाः ध्वनिविशेषाः, तासां कुका ग्राहिणी । कुक वृक आदाने, भ्वादिरात्मनेपदी । कोकते कुका, नाम्युपधात्कः । कौ कं कङ्कककोकैककाकं, तथा कौ पृथिव्यां, कं जलं, वर्तते । किंभूतम् ? ? कङ्कककोकैककाकं––कङ्ककाश्च कोकाश्च तेषामेकोऽद्वितीयः काको रवो यत्र तत् । कङ्काः पक्षिविशेषाः, स्वार्थे कः । कोकाश्चक्रवाकाः । कायति अर्थमभिधत्ते इति काकः शब्दः । "इणभीपाकाशृत्वर्चिकृदाभारिभ्यः कः" । पुनः किंभूतम् ? काककककाकुकं––काककं च काकुकं च तत् । केन आत्मना, आककं कुटिलगामि । अक अग कुटिलायां गतौ, भ्वादिः परस्मैपदी । अकतीति आककंण्वुल् । काकुर्ध्वनिविशेषः, 'तं करोति' 'अन्यतोऽपि च' इति डः ।

अथैकाक्षरादिशब्दाः कादिक्रमेण लिख्यन्ते । यथा––कु ककुप् काकु केकि कोका ओकः एकाकी किं कः कौ के कं कौ कान् कैः का केकाः कांकेकाः किके किम् के । अकं पापादौ ।

काकं काकसमूहादौ। को ब्रह्मादौ। कं शीर्षादौ। काका काकजङ्घादौ। अङ्को भूषणादौ। एकः सङ्ख्यादौ। कङ्को यमादौ। काको द्विकादौ। कोकश्चक्रादौ। ककुद् राजचिह्नादौ। खमिन्द्रियादौ। खोऽर्कः। आखुर्मूषकादौ। गः गन्धर्वादौ। गं गीते। गौः स्वर्गादौ। अगौ वृक्षादौ। अङ्गं शरीरादौ। इङ्गं इङ्गितादौ। आगो मन्त्वादौ। आगूः प्रतिज्ञायाम्। गङ्गा गाः अङ्गे। घः घण्टीशे। घा किङ्किण्यादौ। अघं दुःखादौ। ओघः प्रवाहादौ। चश्चन्द्रादौ। चञ्चुस्त्रोट्यादौ। चञ्चुः चञ्चत्। चञ्चुप्रत्ययश्चित् उच्च। चोचं वल्कलम्। जो जैत्रादौ। जूर्नभोवागादौ। अजो ब्रह्मादौ। आजिर्युद्धादौ। ओजो बलादौ। अजाः आजुः। टो खे। टं पृथिव्याम्। अट्टो हट्टादौ। आटिः अटः आटः आटन्। डः शिवादौ। इडा बुधाङ्गनादौ। ईडा स्तुतौ। णो निष्फलादौ। ईडा णिग्विाक्षाग्रकीलादौ। अणुर्व्रीह्यादौ। एणः तस्करादौ। ता श्रीः। अन्तः प्रान्तादौ। ईतिः रजन्यादौ। ऊतिः रक्षादौ। एतः आगतादौ। ततं वीणादिवाद्ये। ततो व्याप्तादौ। तातः पित्रादौ। तृट् पिपासादौ। तन्तु त्वक् अपत्यं आतिः। तन्तुः जलजीवविशेषे। अन्तर ओतः प्रोते। ऊतः स्यूते। 'तत्' शब्दः—तौ ते, तं तौ तान्, तैः; ते ताः, तां ते ताः; तत् ते ओतुः। अति अतः एतिः ततिः तान्तः इति। एतौ एते, एतं एतौ एतान्, एतैः एताः, एतां एते एताः, एतत् एतः। थः शैलादौ। अथ अथो। दं पत्न्याम्। दा दानादौ। दृग् नेत्रादौ। अन्दूर्निगडादौ। दिश् इन्दुः वसुदेवे। दोः आदिः। इदम् अदः अदात्, ददे ददौ। धो धनदादौ। धूर्भारादौ। अन्धोऽक्षिहीनादौ। आधिर्मनःपीडादौ। अन्धस् धीः ऊधः अन्धु एधस् एध। धुर् यानमुखादौ। अधः आधिधिक्। नो बन्धादौ। निर्नेतरि। नू स्तुत्याम्। नौस्तर्याम्। अ। अन्नंभक्तादौ। इनः स्वाम्यादौ। उन्नं नः क्लिन्नादौ। ना नो आनन नून्नाना ननु न नो नूनं अनु ऊनः एनं एनां अनेन एनः। पः पवनादौ। पूः पुरादौ। पूः अपूपः आपं पापम्। पपी रविः अपि अप् पम्पा। उप आपत् आपि। उपा निशीथे। वो वरुणादौ। विः पक्ष्यादौ। बिम्बं प्रतिबिम्बादौ। अम्बा अम्बु बिम्बी। बवयोरैक्यमिति बोऽप्यत्र। वः शिवादौ। अविर्मेषादौ। वाक् वचनादौ। विवार अव एव इव वावै आवाम् वः विश् अवाक् वि आविः विः। भः शुक्रादौ। भास् कान्त्यादौ। भं भा भूः भूम् भीः भं भा भोः उभा आभा अभि भुक् इभ भित् भाक् आभिः एभिः भात् अभाः। मः शिवादौ। मा लक्ष्म्यादौ। मास् मासादौ। मूर्बन्धने। आमोऽपक्वादौ। उमा गौर्यादौ। मुत् हर्षादौ। इमौ इमे इमं इमौ इमान् इमैः अमू अमी अमुम् अमून् अमूः। अमा सहार्थे। मा वारणार्थे। मां मे मम अमात्। यो मारुतादौ। यं पशौ। या यानादौ। ययुर्वाहादौ। युध अयस् आयुः आय अये अयम् अयि आये, यः यौ ये, यं यौ यान्, यैः ययोः, याये याः, यां ये याः, यया यत् ये, अयात् अयाम्, ययौ ययुः, इयाय ईयुः। रः स्मरादौ। रीर्भ्रान्तौ। रुः सूर्यादौ। रैः धनादौ। अरोऽष्टादशो जिनः। अरं चक्राङ्गादौ। आरो भौमादौ। आरा चर्मभेदिनी। इरो जलादौ। रुरुर्दैत्यादौ। रुक् शोभादौ। अररः अररिः द्वौ कपाटे। रिरी रीरी द्वौ आरकूटे। रुज् रोरः उरु अरुः उर उरस् रुव राज् अरि अरं अरे रे आरत् आरात् अराः अरौ रुरुः ररे आर आरुः। ल इन्द्राद्रौ। लूर्लवे। लीः श्लेषादौ। अलिर्भृङ्गादौ। आलिः श्रेण्यादौ। आलुः कन्दादौ। इला भूम्यादौ। लीला विलासादौ। लोलश्चलादौ। लोला जिह्वादौ। ईली शस्त्री, उलूलः आलुः करपत्रिका। अलं हरिताले निरर्थे च। लाला अलिन् आलम् वृश्चिकपुच्छदण्डिका, लुलन् ललन् एला अण्डल आलप्रत्ययौ एड आली लाली, एलः अलात् अलुः, ललौ ललुः लले। डलायोरैक्यमिति डोऽप्यत्र ज्ञेयः। शं शुभे। शा सारस्नायाम्। शीशयने। शुर्विधौ। अंशुः किरणादौ। आशा दिगादौ। आशुर्व्रीह्यादौ। ईशः शिवादौ। शशशशी अंशः। आशीः मङ्गलवागादौ। शुक शिशुः। ईशा हलदण्डे। षः श्रेष्ठे। षु गर्भविमोक्षे। उषा निशादौ। उषः सन्ध्यादौ। ईषा। सः परोक्षे। सा लक्ष्म्याम्। सत् अंस असृज् सीमं सत् असु असिः सः सा असौ आसन् आसीत् आसे। हो हस्तादौ। अहिः सर्पादौ। ईहा स्पृहादौ। अहः हाहा हूहू ऊहू ह्रद् अहं इह हे है अहो हं हो अहह ह हाहा आह आहुः। एवमन्येऽप्यूह्याः।

अः कृष्णः आ स्वयम्भूरिः कामः ई श्रीरुगीश्वरः।
ऊ रक्षणे ऋ ॠ ज्ञेये देवदानवमातरौ ॥१०३॥

लृर्देवसूर्लृ वाराही भवेदेविष्णुरैः शिवः ।
उर्वेर्धा ऊरनन्तः स्यादो ब्रह्म परमः शिवः ॥१०४॥

को ब्रह्मात्मप्रकाशार्ककेकिवायुयमाग्निषु ।
कं शीर्षेऽम्सु सुखे कुस्तु भूमौ शल्ये च किं पुनः ॥१०५॥

स्यात् क्षेपनिन्दयोः प्रश्ने वितर्के च खमिन्द्रिये ।
स्वर्गे व्योम्नि नृपे शून्ये सुखे संविदि खो रवौ ॥१०६॥

गस्तु गातरि गन्धर्वे गं गीते गौर्विनायके ।
स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि ॥१०७॥

जलेऽक्षिण घस्तु घण्टीशे घा किङ्किण्यां वधे ध्वनौ ।
ङस्तु भैरवविषयेच्छयोश्चन्द्रश्चन्द्र चौरयोः ॥१०८॥

छः सूर्ये छेदके छन्तु निर्मले जस्तु जेतरि ।
विगते जूर्नभोवाचि पिशाच्यां जवनेऽपि च ॥१०९॥

झो नष्टे गायने चारुवचने घर्घरध्वनौ ।
टं पृथिव्यां करङ्के च टो ध्वनौ ठो महेश्वरे ॥११०॥

शून्ये बृहद्ध्वनौ चन्द्रमण्डले डं शिवे ध्वनौ ।
जापे ढो निर्गुणे शब्दे ढक्कायां णस्तु निष्फले ॥१११॥

ज्ञाने तस्तस्करे क्रोडपुच्छयोस्ता पुनः श्रियाम् ।
थो भीत्राणे महीध्रे दं पत्न्यां दा दातृदानयोः ॥११२॥

छेदे बन्धे च धा गुह्य केशे धातरि धीर्मतौ ।
धूर्भारकम्पचिन्तासु नः पुनर्बन्धबुद्धयोः ॥११३॥

निस्तु नेतरि नुः स्तुत्यां नौस्तर्यां पस्तु पातरि ।
पवने जलपाने च फो झञ्झाऽनिलफेनयोः ॥११४॥

फुस्तु फूत्कारे निष्फलभाषणे बः प्रचेतसि ।
कलशे बिः खण्डजयोर्भमुडौ भोऽलिशुक्रयोः ॥११५॥

भा कान्तौ भूर्भुवि स्थाने भीर्भये मः शिवे विधौ ।
चन्द्रे शिरसि मा माने श्रीमात्रोर्वारणेऽव्ययम् ॥११६॥

मूः पुनर्बन्धने यस्तु मातरिश्वनि यं पशौ ।
यस्तु यातरि खट्वाङ्गे याने लक्ष्म्यां च रो ध्वनौ ॥११७॥

तीक्ष्णे वैश्वानरे काम राः स्वर्णे जलदे धने ।
रीर्भ्रमे रुर्भये सूर्ये ल इन्द्रे चलनेऽपि च ॥११८॥

लूर्लावे ली पुनः श्लेषे वलये वो महेश्वरे ।
वरुणे मारुते च स्यादौपम्ये पुनरव्ययम् ॥११९॥

शं शुभे शा सास्नायां शीः शयने शुर्निशाकरे ।
षः श्रेष्ठे षूः पुनर्गर्भविमोक्षे सः परोक्षके ॥१२०॥

सा लक्ष्म्यां हो निपाते च हस्ते दारुणि शूलिनि ।
क्षः क्षेत्रे रक्षसीत्युक्ता माला प्राक्सूरिसम्मता ।
नाम्नामेकार्थनानार्थैकाक्षराणामियं मया ॥१२१॥ षट्पदी ।

धूर्यानवदने भारे पूः शरीरे पुरे तथा ।
दृग् द्रष्टृदर्शनेऽप्यक्षिण विट्प्रवेशे नृवैश्ययोः ॥१२२॥

तृड् लिप्सायां पिपासायां भाः प्रभावे महस्यपि ।
मास्तु मासे विधौ चैते यक्पादान्तोपयोगिनः ॥१२३॥

अकं दुःखाघयोरंको भूषारूपकलक्ष्मसु ।
चित्रादौ नाटकाद्यंशे स्थाने क्रोडेऽन्तिकागसो ॥१२४॥

एकोऽन्यः केवलः श्रेष्ठः संख्या च परिकीर्त्यते ।
कङ्को यमे लोहपृष्ठे तथा ब्राह्मणलिङ्गिनि ॥१२५॥

काकः पीठे सर्पिणि स्याच्छिरोऽवक्षालने द्विके ।
द्रापमानद्रुभेदेषु काकं काककदम्बके ॥१२६॥

योषितां रतबन्धे च काका तु काकजङ्घका ।
काकोदुम्बरिका काकुमाचिका रक्तिकास्तथा ॥१२७॥

काकोली काकनाशोऽथ कोकश्चक्रे वृकेऽपि च ।
खर्जूरीपादपे भेके स्यादकस्तु महीरुहे ॥१२८॥

शैले सरीसृपे भानावङ्कमङ्कितगात्रयोः ।
उपसर्जनभूते स्यादभ्युपायप्रतीकयोः ॥१२९ ॥

अङ्गानि वृद्धिशेषे स्युरिङ्गं स्यादिङ्गितेऽद्भुते ।
ज्ञानजङ्गमयोश्चाघं दुःखे व्यसनपापयोः ॥१३०॥

ओघः प्रवाहः सङ्घातोऽद्भुतवृत्तपरम्परा ।
उपदेशश्च चञ्चुस्तु त्रोट्यां पञ्चाङ्गुले तथा ॥१३१॥

अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे ।
आजिः क्षणे समक्ष्मायां युध्यट्टोऽट्टालके भृशे ॥१३२॥

चतुष्कभक्तयोर्हट्टे इडेले च बुधस्त्रियाम् ।
गोवाक्स्वर्भूमिनाडीषु तथा स्यादणिराणिवत् ॥१३३॥

अक्षाग्रकीलेऽश्रौ सीमन्यणुव्रीह्यल्पयोः पुनः ।
अन्तः प्रान्ते च पार्श्वे च स्वरूपे निश्चये तथा ॥१३४॥

नाशावयवयोः स्यादीतिरजन्यप्रवासयोः ।
स्यादूतिः स्यूतौ रक्षायामेतः कर्बुर आगते ॥१३५॥

ततं वीणादिवाद्ये स्यात्ततो व्याप्तेऽनिले पृथौ ।
तातोऽनुकम्प्ये जनकेऽन्दूः स्यान्निगडभूषयोः ॥१३६॥

अन्धोऽन्धकारेऽक्षिहीने स्यादादिर्बन्धकाशयोः ।
मनोतौ व्यसनेऽधिष्ठानेऽन्नं स्वसितभक्तयोः ॥१३७॥

इनः स्वामिनि सूर्ये स्यादुन्नं क्लिन्ने दयापरे ।
बिम्बं तु प्रतिबिम्बे स्यान्मण्डले बिम्बकाफले ॥१३८॥

आमोऽपक्वे रोगभेदे रागयोः स्यादुमा पुनः ।
शिवपत्न्यां हरिद्रायां कीर्तिकान्त्यतसीष्वपि ॥१३९॥

ययुर्यज्ञहये वाहे स्यादरोऽष्टादशार्हति ।
भवत्यरं तु चक्राङ्गे शीघ्रशीघ्रगयोरपि ॥१४०॥

आरो रीरी शनिभौमे आरा चर्मप्रभेदिनी ।
इराम्भोवासुराभूषु रुरुर्दैत्यकुरङ्गयोः ॥१४१॥

अलिः सुरापुष्पलिहोरालं तु हरितालके ।
तथा निरर्थके ज्ञेयमालिस्तु विशदाशये ॥१४२॥

अनर्थे सख्यमावल्यां सेनावालुर्गलन्तिका ।
आलुः कन्दे भेलुकेऽपीलोर्वी गीर्वाक् बुधाङ्गनाः ॥१४३॥

लीलाकेलिर्विलासश्च शृङ्गारभावजक्रियाः ।
लोलश्चले सतृष्णे च स्यादीषा हलदण्डके ॥१४४॥

अविर्मेषे रवौ भूमिधरे मूषककम्बले ।
अंशुः सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितौ ॥१४५॥

आशा ककुभि तृष्णायामाशुस्तु व्रीहिशीघ्रयोः ।
ईशः स्वामिनि रुद्रे च स्यादीषा हलदण्डके ॥१४६॥

उषा स्याद्बाणदैत्येन्द्रनन्दिन्यां रजनावपि ।
आगः स्यादेनोवदघे मन्तावाशीर्हितैषणे ॥१४७॥

उरगस्य च दंष्ट्रायामुषःसन्ध्याप्रभातयोः ।
उरो वक्षसि मुख्ये स्यादोजो दीप्तिप्रकाशयोः ॥१४८॥

अवष्टम्भे बले धातुतेजस्योकस्तु सद्मनि ।
ओकस्त्वाश्रयमालेऽहिभुजङ्गे वृत्रवप्रयोः ॥
ईहोद्यमस्पृहेत्येते द्विस्वरैकाक्षरा मताः ॥१४९॥ षट्पदी ।

अथाऽव्ययानि कथ्यन्ते प्राग्वदेव स्वरक्रमात् ।
अः स्वल्पार्थेऽप्यभावेऽपि स्यादा स्मरणवाक्ययोः ॥१५०॥

आङीषदर्थेऽभिव्याप्तौ क्रियायोगेऽवधावपि ।
आ स्यादवधृतिस्मृत्योराः सन्तापप्रकोपयोः ॥१५१॥

इः स्यात् खेदे प्रकोपोक्तावीः क्रोधे दुःखभावने ।
प्रत्यक्षे सन्निधौ चाप्युरोषोक्त्यामन्त्रणार्थयोः ॥१५२॥

उः प्राधान्ये प्रकाशे च प्राबल्यस्वास्थ्यशक्तिषु ।
विभागे बन्धने मोक्षे भावे लोभोर्ध्वकर्मणोः ॥१५३॥

उं प्रश्नेऽङ्गीकृतौ रोषेऽप्यूं प्रश्ने रोषवाचि च ।
क कुत्सावाक्ययोरेऐ हेहैशब्दाविव स्मृतौ ॥१५४॥

आमन्त्रणाह्वानयोरो प्रणवेऽङ्गीकृतावपि ।
ओऔशब्दौ तु होहौवत् हूतौ सम्बोधनेऽपि च ॥१५५॥

कुः पापीयसि कुत्सायामीषदर्थे निवारणे ।
कं सुखे वारिशिरसोः किं प्रश्ने कुत्सनेऽपि च ॥१५६॥

चोऽन्योन्यार्थसमाहारान्वाचयेषु समुच्चये ।
हेतौ पक्षान्तरे तुल्ययोगिताविनियोगयोः ॥१५७॥

पादपूरणेऽवधृतौ तु विशेषेऽत्रधारणे ।
समुच्चये पादपूर्तौ धिक् निर्भर्त्सननिन्दयोः ॥१५८॥

निः स्यात् क्षेपे भृशार्थे च नित्यार्थे दानकर्मणि ।
सन्निधानोपरमयोः संश्रयाश्रयराशिषु ॥१५९॥

मोक्षेऽन्तभावेऽधोभागे बन्धने कौशलेऽपि च ।
नु प्रश्नेऽनुनयेऽतीतार्थे विकल्पवितर्कयोः ॥१६०॥

नञ् निषदर्थे सादृश्ये तद्विरुद्धतदन्ययोः ।
व्यतिक्रमे स्वरूपार्थे निषेधाभावयोरपि ॥१६१॥

वा समुच्चय एवार्थे उपमानविकल्पयोः ।
विशिष्टेऽतीते नानार्थे वै हतौ पादपूरणे ॥१६२॥

शं कल्याणे सुखे संप्रकृष्टार्थसङ्गमार्थयोः ।
शोभनार्थे समार्थे ह सम्बुद्धौ पादपूरणे ॥१६३॥

हा शुग्दुःखविषादेषु हि हेतावधारणे ।
विशेषे पादपूर्तौ च ही विस्मयविषादयोः ॥१६४॥

दुःखहेतौ च हं रोषभाषणेऽनुनयेऽपि च ।
हुं तर्के प्रश्नेऽङ्ग पुनरर्थे सम्बोधने मुदि ॥१६५॥

अति प्रोक्तः प्रकर्षार्थे लङ्घनार्थभृशार्थयोः ।
स्तुतावसंप्रतिक्षेपे आराद् दूरसमीपयोः ॥१६६॥

इति स्वरूपे सान्निध्ये विवक्षानियमे मते ।
हेतौ प्रकारप्रत्यक्षप्रकाशेष्ववधारणे ॥१६७॥

एवमर्थे समाप्ते स्यादुत प्रश्नवितर्कयोः ।
समुच्चये विकल्पे चाऽथोऽथ स्याच्च समुच्चये ॥१६८॥

मङ्गले संशयारम्भाधिकारानन्तरेषु च ।
अन्वादेशे प्रतिज्ञायां प्रश्नसङ्कल्पयोरपि ॥१६९॥

अनुर्लक्षणवीप्सेत्थंभूतभागेषु सन्निधौ ।
सादृश्यायामहीनेषु पश्चादर्थसहार्थयोः ॥१७०॥

नन्वाक्षेपे परिप्रश्ने प्रत्युक्तावधारणे ।
वाक्यारम्भेऽनुनयेऽप्यामन्त्रणानुज्ञयोरपि ॥१७१॥

नाना विनोभयानेकार्थेष्वपस्तेयहर्षयोः ।
अप्रकृष्टे वर्जने च विपर्ययवियोगयोः ॥१७२॥

निर्देशार्थे विकृत्यर्थे विबुधैः परिकीर्त्यते ।
अपिः सम्भावनाशङ्कागर्हणासु समुच्चये ॥१७३॥

प्रश्ने युक्तपदार्थेषु कामचारक्रियासु च ।
उपासन्नेऽधिके हीने सादृश्यप्रतियत्नयोः ॥१७४॥

तद्योगव्याप्तिपूजासु शक्तावारम्भदीनयोः ।
दाक्षिण्याचार्यकरणदोषाख्यानात्ययेषु च ॥१७५॥

अभिर्वीप्सालक्षणयोरित्थंभूताभिमुख्ययोः ।
स्यादमा सन्निधानार्थे सहार्थेऽलं निवारणे ॥१७६॥

अलङ्करणसामर्थ्यपर्याप्तिष्ववधारणे ।
एवंप्रकारेऽङ्गीकारेऽवधारणसमस्तयोः ॥१७७॥

नूनं तर्के निश्चये चाऽपि प्रश्नेऽनुनयेऽपि च ।
अये क्रोधे विषादे च स्मरणे सम्भ्रमे तथा ॥१७८॥

अन्तर्मध्येऽन्ते स्वीकारे ऊर्युररी तथा ।
विस्तारेऽङ्गीकृते चाव वियोगे व्याप्तिशुद्धिषु ॥१७९॥

आलम्बने विज्ञाने स्यादेवौपम्येषदर्थयोः ।
निकारेऽवधारणे स्यादुषा रात्रितदन्तयोः ॥१८०॥

अतः स्यान्निर्देशे पञ्चम्यर्थे हेत्वपदेशयोः ।
इतो विभागे नियमे पञ्चम्यर्थे च कीर्त्यते ॥१८१॥

तत आदौ परिप्रश्ने पञ्चम्यर्थे कथान्तरे ।
अहा धिगर्थे शोके च करुणार्थविषादयोः ॥१८२॥

अह क्षेपे नियोगे चाप्यहो प्रश्नविचारयोः ।

ही ही हास्ये विस्मये स्या-दन्ततोऽवयवे तथा ॥१८३॥

उत्प्रेक्षायां पञ्चम्यर्थे शासनेऽप्यहह: स्मृतः ।

खेदाद्भुतयोरित्युक्तोऽनेकार्थाव्ययसङ्ग्रहः ॥१८४॥

अथैकाक्षरा धातवः—भू सत्तायाम्; पा पाने, दा दाने, शु गतौ, ऋ प्रापणे, । दैप् शोभने, दैव् शोधने, कै गैरे शब्दे, खै खदने, जै सै क्षये, पै शोषणे । उख् ऊखु इखु, ईख, अगु, इगु-गतौ, अञ्च् गतौ । जज जजि युद्धे । अट पट गतौ, उठ् सङ्घाते, इट् मतौ, लोट्ट लोड् उन्मादे । अड प्रयमे, लड विलासे, अड्ड अभियोगे, अत गतौ, अड्ड बन्धने । इदि परमैश्वर्ये, अभ शब्दे, अम मीमृ गतौ । शुच्य अभिषवे, इवि व्याप्तौ, अव गतौ, शश प्लुतगतौ, ईप् उञ्छे । परस्मै भाषा ।

भीङ गतौ, डीङ विहायसा गतौ । उङ इङ शब्दे, कुङ गतौ, रुङ रोषणे च । पूङ पवने, मेङ प्रणिदाने, देङ् पालने । कक लौल्ये, कुक आदाने, कङ्क गतौ, अधि गत्याक्षेपे, इङ् ङुङ् गतौ । इज कुत्सने, अट्ट हिंसाति-

क्रमयोः, एठ विबाधायां, अठ गतौ, दद दाने, एध वृद्धौ, अठ शब्दे, उङ् शब्दे, अय गतौ, वेञ् तन्तुसन्ताने, इष गतिहिंसादर्शनेषु, ईह चेष्टायां, ऊह वितर्के । आत्मने भाषा ।।

णीञ् प्रापणे, हृञ् हरणे, धृङ् धारणे, कृञ् करणे, अङ् पृङ गतौ । अल भूषणपर्याप्तिवारणेषु, झष आदानसंवरणयोः, अस कस गत्यादानयोश्च । उभयतो भाषा ।।

धृण् सृङ् गतौ, वृत् वर्धने, वृत् द्युतादिमव्यात् । आत्मने भाषा ।।

वेञ् तन्तुसन्ताने, वृत् यजादि परस्मैभाषा । अक अग कुटिलायां गतौ, लड जिह्वोन्मथने । परस्मै भाषा । इति भ्वादयः ।

अद भक्षणे, भा दीप्तौ, वा गतिबन्धनयोः, पा रक्षणे, ला आदाने, रा दाने, दाप् लावने, मा माने, इक् स्मरणे, इण् गतौ । वी प्रजनकान्त्यसनखादनेषु । षु प्रसवैश्वर्ययोः, तु गतिहिंसापूरणेषु । यु मिश्रणे, कु शब्दे, अस भुवि, षस सस्ति स्वप्ने । परस्मै भाषा ।।

इङ् अध्ययने, शीङ् स्वप्ने, पूङ् प्राणिगर्भविमोचने, ईड् स्तुतौ, ईर् गतौ कम्पने च । ईश् ऐश्वर्ये, वस् आच्छादने, आङ् शासु इच्छायाम्, आस् उपवेशने, । आत्मने भाषा । इत्यदादयः ।।

हु दानादानयोः, ओहाक् त्यागे, भी भये, पृङ्, पालनपूरणयोः, रुङ् गतौ । परस्मै भाषा ।।

डुदाञ् दाने, डुधाञ् धारणपोषणयोः, भृञ् पोषणे च । उभयतो भाषा । इति जुहोत्यादयः ।।

शो तनूकरणे, दो अवखण्डने, छो छेदने, षोऽन्तकर्मणि, इष गतौ, सूच् निरसने, उच समवाये, वृधु वृद्धौ, असु क्षेपणे । परस्मै भाषा ।।

पूङ् प्राणिप्रसवे, दूङ् परितापे, दीङ् क्षये, धीङ् अनादरे, धीङ् आधारे । मीङ हिंसायां, रीङ श्रवणे, लीङ् श्लेषणे, वीङ् गतौ । एते नव स्वादयः ।।

वृङ् गतौ, अन प्राणने । आत्मने भाषा । इति दिवादयः ।।

षुञ् अभिषवे, षिञ् बन्धने, शिङ् निशामने, मिञ् प्रक्षेपणे, चिञ् चयने, धुञ् कम्पने, कृञ् हिंसायां, वृञ् वरणे, उभयतो भाषा । हि गतौ वृद्धौ च, दूङ् उपतापे, प्रीङ् प्रीतौ, आप्लृ व्याप्तौ । परस्मै भाषा ।।

हिङ् गतिवृद्धयोः । अशू व्याप्तौ । आत्मने भाषा । इति स्वादिः ।।

तुद् व्यथने विभाषितः, धि धारणे, षूद क्षरणे, षू प्रेरणे, णू स्तवने, धू विधूनने । परस्मै भाषा ।।

कुट कुड शब्दे । कुटादिः । धृङ् अनादरे, धृञ् अनवरस्थाने । आत्मने भाषा । इति तुदादिः ।।

अञ्ज् भक्षकान्तिगतिषु । उन्दी क्लेदने । परस्मै भाषा ।

ञिइन्धी दीप्तौ । आत्मने भाषा । इति रुधादिः ।। ऋषी गतौ । उभयतो भाषा । इति तनादिः ।। षिञ् बन्धने । मीङ् हिंसायाम् । दीङ् संवरणे । उभयतो भाषा ।।

रीङ् गतिरेषणयोः । ली श्लेषणे । शृ हिंसायाम् । भृ भरणे, भृ भर्त्सने, द विदारणे । जष्, झष् वयोहानौ । गृ शब्दे, ऋ गतौ, मृड् सुखने, अश् भोजने, इष् आभीक्ष्ण्ये । परस्मै भाषा ।। वृङ् संभक्तौ । आत्मने भाषा । इति क्रियादिः । पृ पूरणे, श्रु श्रवणे, अट् अनादरे, लड् उपसेवायां, ओलड् उत्क्षपणे, ईड् स्तुतौ, भुवो अवकल्पने, अव उत्क्षेपे । अज वीट अन्ह भाषार्थाः । परस्मै भाषा ।।

ली द्रवीकरणे, आप्लृ लम्भने, ईर् क्षेपे, भू प्राप्तावात्मनेपदी । इति चुरादिः ।

निलीना नलिने लोला ललना नलिनानना ।
ललन्नलिननालेलालीनुन्नेनं ललौ न ना ।।द्व्यक्षरः ।

अथ द्व्यक्षराः शब्दाः । यथा—

आलोक कल कीलाल कलङ्क काल अलका काली अलीक एक कुण्डल कला केलि, कला कल कलि काकोल कोल कुल कूल लोक लोकालोक आकुल कङ्काल कलिका कालिका कल्लोल कंकेलि कील किलकिला किलकिल अलीक अलक लङ्का टीका कटक कटकरी कटककूट कोटि कीट कीटिका कण्टिका कुटी कुट्टाक कट्टकं कट्टटं कअट्ट कटक कृत्तिका कृतान्त कान्त कुन्त अङ्कित कौतुक कङ्क कतकी केतक केतकी आकूत आतङ्क कान्ति कृत्त अक्त उक्त मुक्त अर्क कार कारक राका कारिका क्रूर कीर कीर कोरक कारा रङ्कु आकर आकार अङ्कुर करि करीर किरि कर्करक आरक कारु किर अकरोत् कारा अकिरत् नाक कानन कनक आनक अनेक नाकि अनीक अनीकिनी द्यौः द्युः दया दायाद दययादः यदुः देयात् अदायि उदय उदाय आदाय इन्दूदय दिवि देव विदिक् वेद विदुः वेदवाद वन्दे वदिव वदावद दव अम्बुद वद वदेत् अवदत् अववाद विवाद बुद्बुद अमर मरु रामा मार रमा रोम मेरु रुमा आम्र मम मर्म सुर असुर सूर आसार अस्तु सार सौरि सरसा सारस मस्तु अस्त्रु उस्र सर सार सरु सुरा अमृत मृत मातृ तमप्रत्यय तमस् तातमीति मिमित मत अमुतः माति मातु मत्तं मत्त तताम अतमि तेमे लेखा आखण्डल खण्ड खल अखेल अखेलत् अखेलि खेलत् खलु अखिल खिल लेखा सुधा सन्धा सौध सिन्धु साधु असेधत् असेधि ससाध असाधि अनूरु नर नीर नारी विधु वुध विधि वेधाः वन्ध बध वेध बाधा अधावत् अधावि धव वधू सोम मास सम असम सामन् मांस मीमांसा सुम सीमन् सीमा असमत असमि अससामत् तारा उत्तरा तरस् तरु तीर रुत रत रेतस् अनरत् अतारि तेरुः अन्तर तरु इतर अर्ति आर्त अत्र अत्रि अन्त्र आतुर आद आर्द्र रौद्री रौद्र रुद्र इन्दिरा दर दूर दारुदार द्रु अद्रि उदर रोदः अरुदत् अरोदीत् रुरोद अरोद अरोदि आदर उदार इन्दिन्दिर दुरोदर रद कक्षा कक्ष कुक्षि आकाङ्क्षत् अकाङ्क्षि; अक्ष अक्षि इक्षु उक्षन्; धारा धरा धराधर धार; राधा रुधिर रोधस्; धुरन्धर अधरत् अधारि धुर धुरा; रवि अम्बर वीर वारंवारं विवर वार वर वैर वारि; आरवे उर्वी अर्वत् वव्रे वैरि वर रव; अरुण रणरोण अरिणा आरेण अरेणि आरण अर्णः ईरण रणन् रणरण रेणु; ऊणा ऊर्णा अरुणन् अराणीत् अराणि ररांण; भानु नाभि नभस् सन्निभ; पूषा पौष पिपेष पुपोष अतुपत् अपेषि अपोपि; हेलि हलि हल हली हेला; दिन नन्दन नन्दिन दीन दनु; निन्दा नाद दून नदी दान नद निदान निन्दु निनद नाद; इन्दुना निनिन्द ननन्द ननाद नदीन नन्दन ननाद नुनोद; विभा विभव भव भाव विभाव भुवं भुवः भुवाम् भावी वैभव विभु अभवत् अभूत; बभूव अभावि बभूवे; भास अभासि सभा हरिः षोडशार्थः; राहु हरित हर रहः रंह हार होरा हारहूरा आहार हीर अहरहः हारि आरोह आरुरोह अहारि; अर्हः ह्री अर्ह अह्रि; रोचिः रुचिः रुचः; अर्चिः अर्चा चर्च चारु चर्चरी चर चार आचार; चराचर चारु चारी चञ्चुर चीर चोर चिरम् चिरा रुचिर चचार रुरुचे रुचे; अरुचत् अचूचुरत् अरीचरत्; घृणि घृणा; अभीशु शम्भु शुभ शोभा शुशुभे शुशोच शोच शची शुच शौच; धाम मधु अधम इध्म; आधमत् धूम मुधा मेधा ; पाद पादप अपादि पदे पद; वसु वासव संवित आसव सव वास आवास संवास सेवा; वासस् अवसत् उवास; महा महस् मही महिमन् मुमोह मिमेह महान् मोह; हिम हेम होम; तेजस् जाति जाती जित जात तज जन्तु जातु जतु जेता; आतप ततापं तपः तप ताप तेपे पात पेते पपात तप्त पीत पूत अतीतपत् पितृ पौत्र; हेति हति हत हन्त आहुति हुत हित हत आहत; शाप शप शशाप; पशु पाश पशी शम्पा अशपत्; गल गलि गेल गुड गोला गोल गण्ड गल्ल गिल अगलत् अलगत् अगालि लङ्ग लगु लगुड; यशः अ शय शय अशायि शय्या शिश्ये; आलाप लोप लोलुप अलुपत् अलूलुपत् अल पाल पलि लेप पाण्डु पाल फल लुप पीलू; पीडा आपीड; आल-लाप लुलोप लुलुम्प पाल लिपि उलप उडुप उपल उल्लाप; अन्य नय न्याय नयन आनन; योनि यान यून; अयन अन्योन्यम् आनाय आनीय आनिनाय; देश अदिशत् दिशः दश दशा दंश उद्देश आदेश आदिदेश; गीत गति गत उत्तुङ्ग

गन्तु गीता आगन्ता गाति; नट नटन; वाल बाल अबला बला लव अलवत् अलावीत्; वला बूल वली आवलि आलम्ब; वेत्ता वित्त वृत्ति; योगि याग योग गेय गाय अगायत् अगायि; पान पीन आपान अपान आपीन पुनः; ताल लता ताली तालु उत्ताल तल तूल तैल लता तुलित तुला अतुल लाति लातु; पल विल एल वलि वल बल अलीलवत् अलूलवत्; वात वृत्त निवृत्त तावत् एतावता वृत्तान्त वृन्त वेता वाता; धन धेनु निधि निधान इन्धन; उग्र गौर गौरी; रङ्ग राग रोग; अग्र गुरु गार गिरि गिरा; रङ्गत् रङ्ग उरग अङ्गिरस् अगार अङ्गार रोगी रागी आगः अगिरत् अग्रे; मृड मङ्गल मुण्ड मण्ड मौलि माल ललना मल्ल मल्ली अम्ल लोम अमल; मिमील अमिलत्; शिव शिवा शैव विश्व विश विशा आवेश वश वशा वशी अविशत् विवेश; शैव आर्या आर्य अर्य राय ईर्या अरयः ऐयरुः; दिति अदिति; उदन्त दन्त दन्ति दान्त दुत तदा तुन्द; ददि आददति दूत दूति उदात्त दत्त उदेति उदित; ददातु ददाति ददत्ते दत्ते तुदति तुदतु; हव हाव वाहु बाहवि बहु बहिः; वाहा हाव विवाह आहव आहाव अवहत् उवाह; हविः वह्वी वही; ऊहाः शनि निशा अशनिः; ईशान शनैः नाश अनिश शुना शूनः नाश ननाश; कवि कम्बु वक कम्वी अम्बिका; मन्द आमोद मुदा मोद मिमिदे दम मादाः; सायम्, सायम सोऽयम् असूया आय अयसा यस्या अया-स्यन्; दोषा दोष; जीव बीज वाजि जव अजीवत् अजीजवत् जिजीव; आयाम यम याम, मयु मय अमेय आमय, माया; कुहु कुह; माघ मेघ मोघ मघा; शिबिर शरत् शौरि शूर शशि शर; सहस् सहसा सेहा हास हंस सोऽहम् सिंह साहस सेह असह; गगन गान नाग नग अनङ्ग; काश आकाश; कौशिक कुशिक केश कुश; अङ्कुश शशक शकम् शुक कोश अशोक शङ्का शूक; अनन्त, नृत्त नीति नत नति, तेन ततान, तेने आनीत, तनु तन, नूतन नुन्न, नेता नुति; अभ्र भर भार भीरू भूरि भगो; रम्भा आरम्भ; वियत् वयस्, वायु, यव वायु युवन् अवयन् उवाय; घन घनाघन; कुकुल ककुभ कुम्भ भेक कुम्भी; अपाचि चम्पा चम्प; अपचत् अपीपचत्, चाप चम्पू; पर पार पुर-पूर पौर, अपर अपार अरोप पुरी; उदीची उदञ्चत्; जम्भ; अभजत् अभञ्जि अभाजि, भेजे भाज अम्भोज भोज भुज; पवि बापी, अवपत् अपीपवत् उवाप पीवा; अतिभी भूत भीति भित्ति भीता, भाषा अभाषि भूषा भिषक् भीषा; वचस् वाचा वचा वञ्च, अवोचत् उवाच, वीचि वञ्चु वाच; अगमत् गम आगम मागाः; छन्दः आच्छाद उच्छेद अच्छिदत्; धातुः धाता धौत आधौत, अधीते अधीत अधत्त धत्ते धत्तः; कंस सेक कसा, अकसत अकासि; अङ्गज गज जगौ; काम मूक मोक; किमु कामिन् कामुकवाणी वीणा वणिक् वेणी; वाण; सती सीता सूत सुत, सित असित आसित, सन्ति; सन्तु सतत सन्तत, सेतु सोता सात; मेना मेनाक मनाक् मान मुनि मौन; नेमी नमि, नौमि नुमः, नामन्; मेने मीन मनस् मानिन्; जय जाया, जय जेय, अजयत् जीयात्; यज युयोज; सेना सेनानी; सूना; आसन्न आसीन आसन नासा; गुहा गुह हिङ्गु गूह, अगूह अगाहि; चण्डी चण्ड, उच्चण्ड चौड; चल अञ्चल अचल, चेल चोल, चञ्चल, चलाचल, चाचलि चूला, चुल्ला चुल्ली, चञ्चा; अलोच अचलत् अचालीत् चचाल; भङ्गी भृङ्ग; भोग भग भाग भङ्ग भागी, भोगी; जड; जाल लाजा; एवमन्येऽपि ज्ञेयाः।

स्थानमुरः कण्ठादि, तच्चित्रम् । यथा--

नेताऽनन्तनतोऽनन्तः सोऽध्यालासीदिलातले ।
धुतासिदासितोत्तालदनुसूनुर्नुतः सदा[1] ॥

(इति) दन्त्यस्थानम् ।

प्राज्यसत्त्वोर्जितस्फूर्तिवर्यो मर्यादयान्वितः ।
समुद्रवदमुद्रश्रीः सज्जो जयति सज्जनः ॥

अकण्ठ्यः । एवमन्यत् । एते शब्दाः सुप्राप्यत्वान्न दर्शिताः ॥

---

१. पाठ एषः मकरन्दानुसारी ।

गतिर्गतप्रत्यागतगोमूत्रिकातुरगपदपादगतप्रत्यागतार्धगतप्रत्यागतसर्वतोभद्रार्धभ्रमादि । तच्चित्रं यथा—

शूरः स्थिरतरस्फारशरभारधरः पुरः । आरवैरभरस्मैरवीवारहरः परः ।।

गोमूत्रिकाद्वयं पूर्वार्धापरार्धयोः, अथवा आद्यद्वितीययोः, तृतीयचतुर्थयोश्च पादयोरिति द्वौ भेदौ यथा च केषुचित्पुस्तकेषु, एतेन श्लोकेन कपाटबन्धोऽपि भवति । चित्रं तु—

अथ तुरगपदरीत्या श्लोकाक्षराङ्कन्यासः ।

श्रीत्रिंशन्नवत्रिंशतित्रयजिनश्रीकण्ठषड्विंशतीन्दूनाविंशतियुग्मपौपदश-भावैकत्रयोविंशतिः ।

सत्रिंशद्विपसत्कलाभुवनतत्षड्वर्गवर्णांशुमत्सेनापधगुप्तलक्षणस्वररसभागार्कद्विविंशैः शरैः ।।

(इत्येषः) तुरगपदाक्षराङ्कन्यासः ।

व्यक्षरचित्रं यथा—

निलीना नलिने लोला ललना नलिनानना ।
ललन्नलिननालेला लीनुन्नेनं ललौ नत । १ इति व्याख्या ।

ललना स्त्री, इनं स्वामिनं भर्त्तारं, न न ललौ किन्तु ललौ । द्वौ नञौ प्रकृतमर्थं सूचयत इति वचनाज्जग्राहेत्यर्थः । कथम्भूता ललना ? ललंति नलिनतालानि यत्र सा तथा एवम्भूतायाः । इला पृथ्वी, तस्यां आलीभिः सखीभिः नुन्ना प्रेरिता या सा ललन्नलिनता लेलालीनुन्ना । पुनः कथम्भूता ? निलीना लयं प्राप्ता संश्रिता इति यावत् । कस्मिन् ? नलिने कमले । पुनः कथम्भूता ? लोला चपला । पुनः चपला । पुनः कथम्भूता ? नलिनानना कमलवदनेति ।

स्वरव्यञ्जनचित्रमुक्त्वा स्थानचित्रमाह—अष्टौ स्थानानि वर्णानामित्यादि—तत्र दन्त्यस्थानि । वर्णचित्रं यथा-यथा—नेतानंतनतोऽनन्तः सोऽव्यालासीदिलातले । धृतासिदासितोत्तालदनसूनुनुतस्सदा ।।१

व्याख्या——सअनन्तो विष्णुः इलातले पृथ्वीतले, ऽलासीत् विललास, चिक्रीडेति यावत् । स कः ? यः अनन्तनतः अनन्तेन शेषनागेन नतः प्रणतो ऽनन्तनतः, अनन्तैर्वानतः । पुनः कथम्भूतः ? नेता स्वामी । पुनः कथम्भूतः ? धृतेनासिना दासिता दासास्सञ्जाता, उत्ताला उत्कटा, ये दनुजसूनवो दैत्या, स्तैर्नुतः स्तुतः, सदा सर्वकालमिति । अकण्ठ्यवर्णचित्रं यथा——प्राज्य सत्त्वोर्जितेति । क्रव्याख्या——समुद्रवत् कश्चित् सज्जनो जयति । कथम्भूतः ? प्राज्यसत्त्वं प्रचुर साहसमुर्जितं च वलं, तयोः स्फूर्तिस्तया वर्णप्रधानाः । अथवा प्राज्यं यत्सत्त्वं सत्त्वगुणस्तेनोर्जिता या स्फूर्त्तिः तया वर्यः । पुनः कथम्भूतः ? मर्यादया कुलमर्यादया अन्वितो युक्तः । पुनः कथम्भूतः ? समुद्रश्री । न विद्यते ऽमुद्रा वर्यः । पुनः कथम्भूतः ? मर्यादया कुलमर्यादया अन्वितो मुक्तः । पुनः कथम्भूतः ? समुद्रश्री । न विद्यते समुद्रा यस्याः सा अमुद्रा, अपिहिता श्रीर्यस्य स तथा । समुद्रोऽपि प्राज्याः ये सत्त्वा मकरमत्स्यादयस्तेषामूर्जितस्फूर्थितस्तया वर्यः मर्यादाकूलभूः, तयान्वितः । असमुदेति विशेषणं पूर्ववत् । पुनः कथम्भूतः ? सज्जः सज्जीभूत इत्यर्थः । गोमूत्रिकाचित्रं यथा—

शू स्थि त स्फा श भा ध्र पु　　　शू स्थि त स्फा
पूर्वा/अपरार्द्धयो र: र: र: र: र: र: र: र:　　　र: र: र: र
र्यन्त्रकम् आ वै भ स्मै वा वा ह प　　　र्यन्त्रक्रम श भा ध्र पु

आ वै भ स्मै　　　शू ता श ध्र आ भ वा ह
तृतीयचतुर्थपादये र र र: र:१　　　र: र र र: र र र र र:
वी वा ह प　　　स्थि स्फा भा पु वै स्मै वा प

शू स्थि त स्फा श भा ध घ पु आ वै भ भ स्मै वा ह प
र: र र: र रं र र: र: र र र र र र रह र:

शूरः स्थिरतरः स्फारशरभारधरः पुरः अरवैरभरस्मेरवीरवारहरः परः । व्याख्या—युद्धे कश्चित् शूरः सुभटः, शूरः सुभटः, पुरोऽग्रे, स्थिरतरो निश्चलः, वर्त्तते इति संटङ्कः । कथम्भूतः ? स्फारा ये शरा बाणास्तेषां भारस्तं स्फारशरभारधरः । पुनः कथम्भूतः ? आरवैरभरस्मेर वी वारहरः । अरीणां समहः आरं, तस्य वैरं, तस्य भरस्तेन स्मेरा ये वीरवाराः सुभटसमूहास्तान् हरतीति । अत एव पुनःकथम्भूतः ? परः प्रकृष्ट इति पूर्वा अर्धाऽपरार्द्धयोर्गोमूत्रिकाद्वयं । अथवा आद्यद्वितीययोः तृतीयचतुर्थयोश्च पदायोर्गोमूत्रिकाद्वयमिति द्वौ भेदौ । यन्त्रकस्थापना यथा—

अत्र रीत्यन्तरेण गोमूत्रिकाभेदद्वयमपि ज्ञेयं; पुनः रीत्यन्तरेण गोमूत्रिका स्थापना यथा ।।छ।।

चतुर्भिः पादैः क्रमेण चत्वारः पादाः, प्रतिपादमष्टौ अङ्कस्थानानि । श्रीः एकः, जिनाश्चतुर्विंशतिः, श्रीकण्ठा एकादश, इन्दुकलाः षोडश । ऊनाविंशतिरेकोनविंशतिः, पौष दिनान्येकोनत्रिंशत् । भानि सप्तविंशतिः । सत्रिंशदेकत्रिंशत् । सत्कलाः सप्तदश, भुवनानि चतुर्दश, तन्मुख्य एव वर्ण एकविंशतितमः । वर्गवर्णाः पञ्चविंशतिः । सेना अष्टादश, पक्षतिथयः पञ्चदश, लक्षणानि द्वात्रिंशत्, स्वराः सप्त, सभानि अष्टाविंशतिः, सार्कास्त्रयोदश । द्विविंशाः द्वाविंशतिः । शराः पञ्च । शेषं सुगमम् ।

हयपदस्य रीत्यन्त —

हदुयपीहिपैयिदायै पिहादुयादिहीपे । देहैपयुपूहुदयैपायेदैहेदीयपूहु ।।

हयपद इति चत्वारो वर्णाः श्लोकेऽपि चत्वारः पादाः । ततो यथाक्रममेकैकपादं प्रत्येकैकवर्णो ज्ञेयः । स्वरैरक्षरसंख्या ज्ञेया । अ आ इ ई उ ऊ ए ऐ, इत्यष्टस्वराः । श्लोकपादे चाष्टवर्णाः । यथा—हहाहिहीहुहूहेहै, ययायियीयुयूयेयै, पपापिपीपुपूपेपै, ददादिदीदुदूदेदै । अयं श्लोकस्तुरगपदेन कृतो; हदुयपीत्यादि ।।

कारता निजहावेन नवेहाजनितारका । चारुमारपराधीन न धीरा परमा रुचा ।।

म. टी. अथ तुरगपदरीतिमाह—तत्रादौ तुरगपदश्लोकाक्षराङ्कसंख्याकाव्यं यथा—श्री १ त्रिंश ३० नव ९ विंशति २०, त्रयः ३, जिन २४, श्रीकण्ठ ११, षड्विंशति' २६ दूऊ १६ नाविंशति १९, युग्मं २, पौष २९, दश १०, भा २७, वेद ४, त्रयोविंशतिं २३, सत्रिंश ३१, द्विप ८, सत्कला १९ भुवन १४, तत् २१, षड्, ६, वर्गवर्णा २५, शुमत १२, सेना १८, पक्षति १५ लक्षण ३२, स्वर ७, सभा २८, सार्क १३, [द्वि] द्वा विंशैः २२, शरैः ५१ । अस्य चतुर्भिः पादैः क्रमेण तुरगपदश्लोकस्य चत्वारः पादा भवन्ति, प्रतिपादं चाष्टावङ्कस्थानानि ज्ञेयानि । व्याख्या-श्रीरेकः जिनाश्चतुर्विंशतिः, श्रीकण्ठा ईश्वरा एकादश । इन्दुशब्देन इन्दुकलाः, ऊनाविंशतिरेकोनविंशतिः, पौषमासस्य दिनान्येकोनत्रिंशत् । भाशब्देन भानि सप्तविंशतिः सत्रिंशत् एकत्रिंशत् । सशब्देन एकाधिकोऽङ्क उच्यते । सत्कलाः सप्तदश, भुवनानि चतुर्दश, तन्मुख्य एवं वर्णः एकविंशतितमः । अथवा तच्छब्दः पूर्वपरामर्शी, तेन भुवनान्येकविंशतिः । वर्गवर्णाः पञ्चविंशतिः । सेना अष्टादश । स्वराः सप्तऽसभाशब्देन सभानि [भाः ?] अष्टाविंशतिः । सार्काः त्रयोदश, द्विविंशाद्वाविंशतिः, शेषं सुगमम् । इति तुरगपदश्लोकयन्त्रस्योपरितनाङ्कसंज्ञा ।

अथ तस्याऽधस्तनाङ्क संज्ञा यथा—

खा १ द्यौ २ दृव्य २ ग्नि ३ विधु १ शरा ५ स्तना २ ऽश्चः ७ सागरा ४ ऽष्टमः ८ त्रि ३ षष्ठो ६ ध्वय स्त्वब्धिः ४ स्त्र्यं ३ ह्नि २ ख्वा १ ग्नि २ ह्रीरषुः ५ खः १ सप्तमः ७ ।।१।।

ञ्यन्तो ३ ऽब्धि ४ पष्ठ ६ स्त्र्यं ३ म्भोधि ४ स्तुर्या ४ क्षितः २ स्तन २ चन्द्रमाः १ त्रय ३ ऽग्नि रब्धि ४ ख १ मन्वंग्रहि २ खां १ ऽभोधि ४ वंन्हि ३ सायकाः ५ ।।२।।

वेदा ४ ऽश्व ७ द्वि २ वसुः ८ ख्र १ र्त्तुः ६ ल्य ३ श्वः ७ खांतों १ हिं २ षष्ठकः ६ तुर्ये ४ षु ५ द्व्य २ ऽब्धि ४ राद्यं १ हि २ स्त्र्या ३ द्यो १ स्त्य ४ ग्निर्ययोर्गमः ३ ।।

व्याख्या---खादिभिः संख्यावाचिभिः एकादीनि लक्ष्यन्ते। खं च आद्यश्च खाद्यौ। एवं सर्वत्र समासो ज्ञेयः । अत्र समासस्थं पूर्वपदं यन्त्रकपंक्तेर्ग्राहकमुत्तरपदं तु कोष्ठकस्य। ग्राहकमिति ययोर्गम इति ययोरश्वस्य गमः । गमनं पादसञ्चारः पादगतिरित्यर्थः ।

अथानुक्ततुरगपदश्लोको यथा--

सेना लीली लीना नाली लीना नाना नाली लीलीना लीना लीलेना लीना लीली लीना नाना नाली ?

अस्य व्याख्या---अहं नम, डलयोरैक्यात् ईडे । अपि तु स्तौमिकाः कर्मतापन्नाः सेनाः । कथम्भूताः सेनाः ? लीलीलीनाः लीला विद्यते येषां ते लीलितस्तान् ईडते स्तौतीत्येवंशीलः इनः स्वामी । या सुता लीली लीनाः युधि सविलासान् राज्ञः स्तौति, यासु प्रभुरित्यर्थः । अथवा लीलिनो लीलावंतो ये इलिनो राजानस्तेषामिनः स्वामी । याः सुताः पुनः कथम्भूता ? आलीशब्दस्यानर्थवाचकत्वादाल्योऽनर्थास्तासु लीना व भवन्ति । अहं कथम्भूतः ? नानाना-लीलीली नानाविधः रलयोरैक्यात् नार्य, स्ताभिस्सह लीला तद्वान् । पुनः कथम्भूतः ? आलीनो व्याप्तः, अल उद्यम-स्तद्वान्, अनलस इत्यर्थः । पुनः कथम्भूतः ? अरीनामहारयस्तेषामाली श्रेणिस्तस्यालीः श्लेषस्तस्य लो विनाशस्तद्वान् । पुनः कथम्भूतः ? नानाविधानि अनांसि यस्य स तथा । पुनः कथम्भूतः ? तस्य ज्ञानस्य आलीराश्लेषो यस्य स तथा। एवमेव तुरगगतिवत् फलकस्योपरि अक्षराः स्थापनीया इति । तुरगपदयन्त्रकस्थापना यथा--

ना	ली
२	३
११	५
७	३२
२८	२७
१९	१४
१२	२०
२४	४
६	१५
२२	२६
३१	८
१७	१८
२९	५
१०	२३
१३	२३
१३	१६
३०	९

तुरगपदाङ्का

हयपदस्य रीत्यन्तरं यथा वृत्तौ कथितं तथैव ज्ञेयम् । यन्त्रकस्थापना यथा--

१ ह	२० दू	९ य	२० पी	३ हि	२४ पै	११ यि	२६ दा
१६ यैं	१९ पि	२ हा	२९ दु	१० या	२९ दि	४ ही	२३ पे
३१ दे	८ है	१७ प	१४ यु	२१ पु	६ हु	२५ द	१२९
१८ पा	९५ ये	३२ दैं	७ हे	२८ दी	१३ यु	२२ पू	५ हु

गजपदमनुक्तमपि लिख्यते यथा--

किं नाना शं नाकं शन्ते नाशंकते शंकते शं ते तेजः ।।
सेना नाना धीना वा वीरा नाधीवारा धीरा राजन् ।

व्याख्या--वेत्यव्ययं पादपूरणे, धीराः पण्डिताः, नानाविधा अर्थान्तरा, अधीना आयत्ता, येषामेवंविधा वर्तन्ते। हे राजन्, हे शं, तेन हे सुखलक्ष्मीश, यद्ग्रहणेन तद्ग्रहणात् ते धीराः । ते तव तेजः प्रतापं शं सुखकारि [री?] किं न आशङ्कन्ते ? अपि तु आशङ्कन्ते ते । कथम्भूताः ? धीनां वारास्समूहा धीवारा, न विद्यन्ते धीवारा येषां ते अधीवारा, एवंविधा न अज्ञानसमूहवन्तो न भवन्तीत्यर्थः । पुनः कथम्भूताः ? धीराः धियं बुद्धिं राति ददतीति बुद्धिदायका इत्यर्थः । तेजः किंविशिष्टं ? अनाशं नित्यं । पुनः कथम्भूतं ? नाकं न दुःखकारि इति ।

गजपदचित्रस्थापना यथा--

से १	ना ३०	ली ९	ली २०	ली ३	ना २४	ना ११	ली २६
११	२३	१५	२७	४५	३६	४४	३२
ली १६	ना १९	ना २	ना २९	ना १०	ली २७	ली ४	ली २३
१३	२५	१९	३	४६	३४	४२	२१
ना ३१	ली ८	ना १७	ली १४	ले २१	ना ६	ली २५	ना १२
३३	४१	२२	१४	३५	४७	२८	१६
ली १८	ली १५	ली ३२	ना ७	ना २८	ना १३	ना २२	
३७	१	२६	४५	२४	१२	३१	४३
१ से	९ ना	२ ना	१० धी	३ ना	११ वा	४ धा	११ रा
५ ना	२३ धी	६ वा	१४ रा	७ धी	१५ रा	८ रा	१६ जन
१२ किं	२५ ना	१८ ना	२६ शं	१९ ना	२७ कं	२० शं	२८ त
२१ ना	२९ शं	२२ कं	३० ते	२३ शं	३१ ते	२४ ते	३२ नः

आकारः खड्गाकृतिस्त च्चित्रम्

यथा--

का. क. श्लेषार्थोपसङ्गृहीतैरन्त्यादिसदृशाक्षरैः ।
प्रतिलोमानुलोमस्थैः शब्दैश्चित्रसमुद्भवः ।।१८५।।

श्लेषव्युत्पादनस्तबके सङ्गृहीतैः सदृग्व्यञ्जनान्तसदृग्व्यञ्जनादिशब्दैः प्रभाभास्वत्प्रमुखैरत्र चित्रस्तबके संगृहीतैरनुलोमप्रतिलोमशब्दैश्च सवर्ण्याकारचित्राणि सम्भवन्ति ।

सर्वेष्वाकारचित्रेषु वर्णावृत्तिस्तु सन्धिषु ।
लाद्युच्चारे लघ्वलघुप्रयत्ने वबयोरपि ॥१८६॥
संयुक्तयोः सजातीयवर्णयोर्नणयोस्तथा ।
स्वरवर्जितमनयोर्विसर्गाभावभावयोः ॥१८७॥
डलयोश्चविरोधो न यमके श्लेषचित्रयोः ।

गतार्थम् ।

भारतीभक्तगीर्वाणगणस्तुतपदाम्बुजा जाग्रत्कुन्देन्दुमन्दारशरदभ्रसमप्रभा ।
भास्वदम्भोजनिलयानिर्भाग्यजनदुर्लभा भागधेयं भावभृतां तनोतु प्रतिभामयम् ॥

खड्गबन्धः

नभोवननदीपीननलिनाननलोचनम् । न नौमि ननयानूनं ननमितननतं जिनम् ॥

विश्वावबोधाय विरोधबाधकाविपत्तमोजालविकर्तनोर्जिता ।
विधूदयद्धामविशुद्धकीर्तिभा विभान्ति सन्तः सविवेकवैभवाः ॥

वाचं स्मृत्वा यतीन्द्रेण काव्यकल्पलता कृता । तारश्रीरमरेणेयं भावनीया सतां गणैः ॥ परिरधिश्लोकः ।

एवंविधश्लोकैर्बहुचित्रसिद्धिः । शृरेत्यादिपूर्वोक्तगोमूत्रिकासदृशैः श्लोकैर्गोमूत्रिकाद्वयम् ।

एवं बहुचित्रोत्पत्तिश्च । एवं मुरजधनुर्बन्धादयः ।

क्रमाच्चतुर्विधं च्युतम् । यथा—मात्राहीनीकृतेषु वर्णेषु येषां शब्दानामर्थो मिलति तैः शब्दैर्मात्राच्युतं स्यात् । यथा—

दशान्तरावृतान्भावान्कालातीतानपि स्फुटम् । केवलज्ञानतो योगी प्रत्यक्षानिव वीक्षते ॥

देशकालकेवलैः । शब्दा यथा—बाल चार वार पार कोमल केकि अलीक क्रूर भार मार हार कार तार दार पार धार स्फार सार ताल नाल हाल हेलि कृपाण उन्माद तडाक काच प्रवाल प्रहार भारत जाया प्रभृतयः । येषु शब्देस्वर्धमात्राहीनीकृतेष्वप्यर्थो तैरर्धमात्राच्युतं भवति । यथा—

मध्ये सूरिसमं भूरि स्वीकृतानङ्गसङ्गमाः । न लभन्ते नराः शोभां भानीव रविभानुषु ॥

सङ्गमा इत्यत्र ङकारो व्यञ्जनं च्युतं, व्यञ्जनं चार्धमात्रम् ।

ताडकाश्रितशृङ्गारा सारगानचलेक्षणा । आलोकितापि लोकस्य मनो हरति कामिनी ॥

अत्र ताडङ्कसारङ्गेति । शब्दा यथा—स्यन्द, मन्द, मान्द्य भङ्ग सदारङ्ग सम्मद खञ्ज रञ्ज कबन्ध वन्दन नन्दन सम्भ्रम संवर सङ्गर कम्बल जम्बीर चित् अञ्चल करञ्जादयः ।

सानुस्वारवर्णेषु निरनुस्वारीकृतेषु अपि येषां शब्दानामर्थो मिलति तैर्बिन्दुच्युतं स्यात् । यथा—

साहसेनाश्रिता पद्मालयेन जलदात्यये । अर्णवस्याभिसरणे रहो मुञ्चति वाहिनी ॥

अत्र हंसरंह—इत्यत्र बिन्दुः । शब्दा यथा—वंश हंस दंश रंह : प्रभृतयः । मीमांसा पिनाकि कुमार केशव कन्दर्प कलाग्नि कपर्द्दी काकोल जवन जघन चरण गाङ्गेय गौरव केसर चुम्बक नक्षत्र नगर खञ्जन नगरञ्जन प्रभृतयः । अथवा—

नतनाकिमौलिमणिमण्डलीविभाभरभासुराङ्घ्रिसरसीरुहा सताम्

शिवशर्मणे भवतु भारती भृशं दृढजाड्यखण्डनदिनेशभाततिः ॥

अत्र नन्दिनीच्छन्दसि प्रतिपादमाद्याक्षरद्वयपाते रथोद्धतावृत्तेन, तथा-न्त्याक्षरद्वयपाते च भद्रिकावृत्तेन भारती-स्तुतिः । अयं वर्णच्युतप्रकारः छन्दो मर्माणि ज्ञात्वा साधारणशब्दैः साध्यः ।

अथ चतुर्विधं गूढम् । क्रियागूढं भङ्गश्लेषाद्युपायैरेकाक्षरादिकाः क्रियाः प्रयोज्याः । यथा—

यथायथा त्रस्तकुरङ्गनेत्रा प्रिया पुरो मेऽद्य तिरोहितश्रीः ।

महोदधे स्फारतरङ्गभङ्गया तथा तथा प्रेममय मुदाहम् ॥

अत्र मेध्यति दधे च क्रिये । क्रिया यथा—अस्ति स्तः (सन्ति); अस्मि स्वः स्मः । प्राणितिगेहिनः । एवं भवत, यक्षति, प्रभृतिभ्यो रोहितः प्रभृतयः ॥

कर्तृकर्मादिगुप्तानि भङ्गश्लेषेण साधयेत् ॥१८८॥

यथा—

मानकोपभृते पुंसि शाश्वतीं स्थितिमाश्रयेत् ।

शङ्खेभ्यो नान्युयात्कोऽपि देशः प्राप्नोति कङ्कणैः ॥

पूर्वार्धे कर्तृगुप्तं । मा न लक्ष्मीनम् । उत्तरार्धे कर्मगुप्तम् । खेभ्यः

इन्द्रियेभ्यः शं सुखम् । कंकणैः कं सुखम् ।

सम्बन्धगूढमपि भङ्गश्लेषेण साध्यम् । यथा—

बालया पृथ्विगोपाल व्यलोक्यत तयाननम् ।

तदाप्रभृति तां निन्ये स्मरः स्वशरवेध्यताम् ॥

पादगूढे चतुर्थपादवर्णाः पादत्रये क्षेप्याः । यथा—

त्वं दोर्वलादरौ देव सोद्रेकदरशं कुर्क्रत । त्वद्यशोऽरयं मुदं दत्ते. . . . . ॥

अत्र पादत्रये चतुर्थः पादो गुप्तः—

'कुमुदोदरसोदरम्' इति ।

द्वात्रिंशत्कोष्टकेषु श्लोककरणविधिः—

प्राक्कोष्टकेषु न श्लोकाः करणीया विचक्षणैः ।

केवलं प्रश्नवेलायां पादः कार्यो नवो नवः ॥१८९॥

म. टी. पादगतप्रत्यागतचित्रं यथा—का रता निजहावेन नवेहाजनितारका । चारुमारपराधीन न धीरा परमा रुचा ॥१॥

व्याख्या—हे चारुमारपराधीन चारुर्मनोज्ञो, मारः कन्दर्पस्तेन पराधीनः परायत्तस्तस्य सम्बोधनम् । निजहावेन स्वाभिलाषविकारेण, का स्त्री इह भर्तरि रता रक्ता रतोत्सुका तत्परेति यावत् । नवेत्यव्ययस्य निषेधार्थवाचकत्वान्न वाऽजनि, किन्तु सर्वा अपि । का कथम्भूता ? तारका मनोज्ञा । पुनः कथम्भूता ? धीरा गम्भीरा सत्त्ववती वा न । पुनः कथम्भूता ? परमा प्रकृष्टा कया रुचा कान्त्या इति । स्थापना यथा—

ये	ना	धी	वा	रा	जन्	ना	शं	कं	ते	ग
१	२	४	६	८	१६	१८	२६	२२	२८	३२
	३	७	११	१५		१९	२०	२७	२४	
	५	२३		१४		२१	२३		३१	
	९	१०		१२		२५	२९		३०	

पूर्वार्द्धपादाक्षराङ्काः उत्तरार्द्धपादाक्षराङ्काः

अनुलोमपक्षे दिवं दिवा दिवे नाकं। प्रतिलोमपक्षे बन्दिवादिवेदिकं ना इत्यादिकाः शब्दा ज्ञेयाः। लावुच्चारे इति लकारोऽपि द्विधा सानुनासिको निरनुनासिकश्च। संयुक्तयोरिति क्षक्ष्ययोरित्यादिवत्। यदुक्तम्—

क्षक्ष्ययोर्डलयोरैक्यं बवयोः शसयोरपि। भावाभावौ विसर्गाणां श्लेषेऽनुप्रासचित्रके ॥१॥

इति स्वरवर्जितमनयोरिति मकारनकारयोर्न विरोधः। खड्गबन्धचित्रं यथा—

भारती भक्तगीर्वाणगणस्तुतपदाम्बुजा। जाग्रत्कुन्देन्दुमन्दारशरदभ्रसमप्रभा ॥१॥

भास्वदम्भोजनिलया निर्भाग्यजनदुर्लभा। भागधेयं भावभृतां तनोतु प्रतिभामयम् ॥२॥ युग्मम्।

व्याख्या। भारती सरस्वती भावभृतां पुरुषाणां प्रतिभामयं बुद्धिमयं भागधेयं भाग्यं तनोतु। कथम्भूता? भक्ताश्च ते गीर्वाणाश्च, तेषां गणस्तेन स्तुतं पदाम्बुजं यस्याः सा तथा। पुनः कथम्भूता? जाग्रत् उत्फुल्लं, कुन्दं पुष्पं, इन्दुश्चन्द्रः, मन्दारः कल्पवृक्षः, शरदभ्रं शरत्कालीनाकाशं, एतेषां समा प्रभा कान्तिर्यस्याः सा तथा। पुनः कथम्भूता? भास्वच्च तदम्भोजं च भास्वदम्भोजं, तदेव निलयो गृहं यस्याः सा तथा। पुनः कथम्भूता? निर्भाग्यजनानां दुर्लभा इति। स्थापना यथा—

अथाष्टारचक्रबन्धचित्रं यथा—

विश्वावबोधाय विरोधबाधका विपत्तमो जालविकर्तनोर्जिताः।
विधूदयद्धाम विशुद्धकीर्तिभा विभान्ति सन्तः सविवेकवैभवाः ॥१॥

व्या० सन्तो विभान्ति। कथम्भूताः? विरोधस्यावबोधो ज्ञानं तस्य बाधका विरोधबाधकाः। कस्मै? विश्वस्यावबोधो ज्ञानं तस्मै। पुनः कथम्भूता? विपदेव तमो जालं विपत्तमोजालं, तस्य विकर्तनं तस्मिन्नूर्जितं बलं येषां ते। तथा। विधोश्चन्द्रस्योदयद्धामतद्वद् विशुद्धा कीर्त्तिर्भा; येषां ते तथा। पुनः कथम्भूताः? विवेक एव वैभवो विवेकवैभवः; सह विवेकवैभवेन वर्तन्ते ये ते सविवेकवैभवा इति। तत्परिधिश्लोको यथा—

वाचं स्मृत्वा यतीन्द्रेण काव्यकल्पलता कृता। तारश्रीरमरेणेयं भावनीया सतां गणैः ॥२॥

अस्यार्थो निगदसिद्धः। स्थापना यथा ॥छ॥ कमलबन्धचित्रं यथा—

नभोवन नदीपीननलिनाननलोचनम्। न नौमि न नया नूनं नमिं जननतं जिनम् ॥१॥

व्याख्या। नमिमेकविंशजिनं न ननौ मिद्धौ। ननौ प्रकृतमर्थं सूचयत इति वचनान्नौमीत्यर्थः। कथम्भूतं? नभोवन नदीगङ्गा तस्यां यानि पीननलिनानि तद्वदाननलोचने यस्य स तथा। पुनः कथम्भूतं? नया न नूनं नयैर्नैगमादिभिरनूनं पूर्णमित्यर्थः। स्थापना यथा—

द्वितीयं तच्चित्रं यथा—

गणेशोऽङ्गलच्चंगगङ्गा सङ्गगलोरगः। गरभुग्गगनाभोगगतिस्तुङ्गगणानुगः ॥१॥

व्याख्या—प्रमदाः पार्षदागणा इतिवचनात् । गणानामीशो गणेश ईश्वरो वर्तते । कथम्भूतः ? चङ्गा चासौ गङ्गा च चङ्गगङ्गा , गलन्ती चासौ चङ्गगङ्गा च गलच्चङ्गगङ्गा । अङ्गात् गलच्चङ्गगङ्गा अङ्गगलच्चङ्गगङ्गा । तस्य सङ्गो मिलनं यस्य स तथा । गले उरगो यस्य स तथा । अङ्गगलच्चङ्गगङ्गासङ्गश्चासौ गलोरगश्च स तथा । पुनः कथम्भूतः ? गरभुग् गरं विषं भुंक्ते इत्येवंशीलो गरभुग् । पुनः कथम्भूतः ? गगनाभोगगतिः गगनस्याभोगो विस्तार, स्तत्र गतिर्यस्य स तथा । पुनः कथम्भूतः ? तुङ्गगणानुगः तुङ्गा उच्चा ये गणास्ते अनुगाः सेवका यस्येत्यर्थः । स्थापना यथा—

अत्र श्लोकद्वये बहुचित्रसिद्धिर्ज्ञेया । अथ पूर्वोक्तगोमुत्रिकाश्लोकस्य षोडशदलकमलबन्धेन चित्रं, तत्स्थापना यथा । मुरजबन्धचित्रं यथा—

या दमा नवमानन्द पदमाननमानदा । दान मान क्षमानित्य धनमानवमानिता ।।१।।

व्याख्या । दमे नेन्द्रियजयेन न अवमो नंद्यो । नवमः उत्तमो य आनन्दस्तस्य पदं या विद्या वर्तते । विद्यया हि शमसुखलाभः । कथम्भूता ? आननमानदा मुखस्य मानं पूजां ददातीति । निरपभ्रंशभाषणाद् विमुखं पूज्यं भवति । पुनः कथम्भूता ? दानमानक्षमा नित्यं धनमानमानिता । दानमानक्षमा एव । शाश्वतं धनं येषां तैर्मानवैः पुरुषैर्मानिता पूजिता । मानं ज्ञानमिति । मुरजबन्धरीतिर्यथा—पादचतुष्टयेन पङ्क्तिचतुष्टये कृते प्रमादिपादेभ्यः प्रथमाद्यक्षराणि चत्वारि, चतुर्थादिपादेभ्यः पञ्चमादीनि च चत्वार्यक्षराणि गृहीत्वा प्रथमः पादः स्थाप्यः । द्वितीयपादात् प्रथममक्षरं प्रथमपादाद् द्वितीय तृतीये अक्षरे, द्वितीयतृतीयपादाभ्यां चतुर्थे अक्षरे, चतुर्थात् तृतीये द्वितीयेऽक्षरे, तृतीयात् पादात् प्रथममक्षरं च गृहीत्वा द्वितीयः पादः स्थापनीयः । द्वितीयादष्टमं प्रथमात् सप्तम षष्ठे, द्वितीय तृतीयाभ्यां पञ्चमे, चतुर्थाद् षष्ठसप्तमे, तृतीयादष्टममक्षरं च गृहीत्वा तृतीयः पादः स्थाप्यः । चतुर्थादिभ्यः प्रथमादीन्यक्षराणि प्रथमादिपादेभ्यः पञ्चमादीन्यक्षराणि च गृहीत्वा चतुर्थः पादः स्थापनीय इति । स्थापना—

सुरासुरनराधीशनतं यमविधायकम् । नमामि जिननेतारं श्रीदातारं जिनान्तिमम् ।।१।।

व्याख्या । अहं जिनान्तिमं नौमि । जिनेषु अन्तिमो जिनान्तिमस्तं जिनान्तिमं वीरं । कथम्भूतं ? सुराश्चासुराश्च नराश्च तेषामधीशास्तैर्नतः प्रणतस्तं । पुनः कथम्भूतं ? यमस्य नियमस्य विधायकस्तं । पुनः कथम्भूतं ? जिनाः सामान्यकेवलिन, स्तेषां नितान्तं । पुनः कथम्भूतं ? श्रियो लक्ष्म्या दाता तमिति । स्थापना यथा—

वर्धमानयशोवादवर्धमानजिनोत्तम । महानन्दपदस्थायिन् महामहकरो भव ।।१।।

व्याख्या । हे वर्द्धमान ! त्वं महामहकरो भवेति क्रियासम्बन्धः महांश्चासौ मह उत्सवश्च महामहस्तं करोतीति महामहकरः । अत्र महशब्दोऽकारान्तो ज्ञेयः । यशसां वादो यशोवादो, वर्द्धमानो वृद्धिमान् यशोवादो यस्य स तथा, तस्य सम्बोधनं । जिनेषु उत्तमः प्रधानो जिनोत्तमस्तस्य सम्बोधनं तथा । महानन्दपदे मोक्षपदे तिष्ठति इत्येवंशीलो महानन्दपदस्थायी, तस्य सम्बोधनमिति । तत्स्थापना यथा—आदिशब्दाद्बाणादिचित्रं यथा—

दद्यान्मम सुखं वीरो यस्याननमतिप्रभम् । रेजे राजीववन्नित्य दधतो विविधक्षणम् ।।१।।

व्याख्या । स वीरो वीरजिनः सुखं दद्यात् । कस्य ? मम । स कः ? यस्याननं मुखं, राजीववत् कमलवद्, नित्यं सदा, रेजे शुशुभे । कथम्भूतं ? अतिप्रभं-अति अतिशयेन प्रभा कान्तिर्यत्र तत्तथा । तस्य किं कुर्वतः ? दधतः । कं ? कर्मतापन्नं विविधक्षणं विविधोत्सवमिति । शरबन्धचित्रस्थापना यथा—

शुशुभे वीर ते बेरं ततभाः कलधौतरुक् । कलधौतसुमाश्लोक वसुधायां नमस्वर ।।१।।

व्याख्या । हे वीर! ते तव बेरं शरीरं वसुधायां पृथिव्यां शुशुभे ति सण्टङ्कः । कथम्भूतं बेरं? ततभाःकलधौतरुक् । तता विस्तीर्णा भाः कान्तिर्यस्य तत् ततभाः; ततभाश्च तत् कलधौतं च ततभाःकलधौतं; तद्वद् रुक् कान्तिर्यस्य तत् तथा । कलधौत्वं रूप्यं, सुमानि च कुसुमानि तद्वत् श्लोको यशो यस्य स तथा । तस्य सम्बोधनं हे कलधौत सुमश्लोक तथा । नमन्तो नरा मनुष्या यस्य स तथा । तस्य सम्बोधनं हे नमन्नर इति । शंखबन्धचित्रस्थापना यथा—

इत्यादि बहुचित्राणि ग्रन्थान्तरेभ्यो ज्ञेयानीति । क्रमाच्चतुर्विधं च्युतमिति-मात्राच्युतकमर्द्धमात्राच्युतकं बिन्दुच्युतकमेकादिवर्णच्युतकं च । तत्र मात्राच्युतकं यथा—

देशान्तरावृतान् भावान् कालातीतानपि स्फुटम् । केवलज्ञानतो योगी प्रत्यक्षानिव वीक्षते ॥१॥

देशकालकेवलैर्मात्राच्युतकम् । देश इत्येकारच्युतेन काल इत्याकारच्युतेन केवल इत्येकारच्युतेन पूर्वश्लोको यथा—

दशान्तरावृतान् भावान् कालातीतानपि स्फुटम् । केवलज्ञानतो योगी प्रत्यक्षानिव वीक्षते ॥१॥

व्याख्या-योगी भावान् पदार्थान् केवलज्ञानात् प्रत्यक्षानिव वीक्षते । कथम्भूतान्? देशान्तरैरावृतान् । पुनः कथम्भूतान्? कालातीतान् बहुकालभवान् । पक्षे दशान्तरावृतान् अवस्थान्तराच्छादितान्, कलातीतान् कला तैः पञ्चदशभिरिति वचनात् अल्पकालातीतान् । अतः केवलज्ञानकं परमब्रह्म, तस्य बलेन ज्ञायन्ते इति केवलज्ञास्तान् इति । अर्धमात्राच्युतकं यथा—

मध्ये सूरिसभं भूरि स्वीकृतानङ्गसङ्गमाः । न लभन्ते नराः शोभां भातीव रविभानुषु ॥१॥

व्याख्या—पण्डितपर्षदि भूरिस्वीकृतानङ्गसङ्गमा नरा शोभां न लभन्ते न प्राप्नुवन्ति इव । यथा सूर्यकिरणेषु भानि नक्षत्राणि । पक्षे अनङ्ग इत्यत्र व्यञ्जनं चार्द्धमात्रकं । स्वरहीनं व्यञ्जनमिति वचनात् ङकारव्यञ्जनच्युतेन भूरिस्वीकृतानगसङ्गमानरा आ सामस्त्येन, नगसङ्गमः पर्वतसङ्गमः, स्वीकृतो आनगसङ्गमो यैस्ते तथा । भिल्ला अर्थान्मूर्खा इति । बिन्दुच्युतकं यथा—

साहं सेनाश्रिता पद्मालयेन जलदात्यये । अर्णवस्याभिसरणे रंहो मुञ्चति वाहिनी ॥१॥

व्या. वाहिता नदी, अर्णवस्याभिसरणे समुद्रस्य मिलने, जलदात्यये मेघविरामे, च सति रंहो वेगं, मुञ्चति चेत्यध्याहार्यम् । वाहिनी कथम्भूता? सा प्रसिद्धा । पुनः कथम्भूता? हंसेन आश्रिता । हंसेन कथम्भूतेन? पद्मालयेन । पक्षे बिन्दुविहीनत्वेन वाहिनी सेना, रह एकान्तं गुह्यप्रवृत्तिमिति यावत् मुञ्चति । कथम्भूता? आश्रिता । केन? साहसेन सत्त्वेनेति । एकाक्षरच्युतकं यथा पार्वतीतिदानवो देवभाप्रदः दानवोऽसुरो देवभयप्रदः । पक्षे दालोपेन वो देवभीप्रदः । अत्र चतुर्थपादे दाच्युते सप्ताक्षरा भवन्तीति द्व्यक्षरच्युतकं यथा—

नत नाकि मौलिमणिमण्डली विभाभरभासुरांह्रिसरसीरुहा सताम् ।
शिवशर्मणे भवतु भारती भृशं दृढजाड्यखण्डनदिनेशभा ततिः ॥१॥

अत्र सजसा जगौ यदि तदा तु नन्दिनीति नन्दिनीछन्दः । शेषं स्पष्टार्थम् । आद्याक्षरद्वयपाते यथा—

नाकिमौलिमणिमण्डली विभा भासुरांह्रि सरसीरुहा सताम् । शर्मणे भवतु भारती भृशं जाड्यखण्डनदिनेशभाततिः ॥१॥

अत्र रो नराविहरथोद्धतालगाविति रथोद्धताछन्दः । अन्त्याक्षरद्वयपाते यथा—

नतनाकि मौलिमणिमण्डली भरभासुरांह्रि सरसीरुहा । शिवशर्मणे भवतु भारती दृढजाड्यखण्डनदिनेशभा ॥१॥
अत्र रोनरौ भवति भद्रिकेति भद्रिकाछन्दः । भारती स्तुतिः सर्वत्रेति ।

अथ चतुर्विधं गूढमिति क्रियागुप्तम् १ कर्तृकर्मादिगुप्तं २ सम्बन्धगुप्तं ३ पादगुप्तं ४ च । तत्र क्रियागुप्तोदाहरणमाह–यथा यथेति मे मम अद्य ते रोहितश्रीः । पक्षे त्रिमिदाच् स्नेहने मेद्यति स्निह्यति । महोदधेः समुद्रस्य । पक्षे महस्तेजोदधे । द्वयं च सुगमं । पादगुप्तं यथा—

त्वं दोर्बला दरी देव सोद्रेकदरशङ्खकृत् ।

त्वद्य शोरं मुदं दत्ते

इति श्री जिनदत्तसूरिशिष्यपण्डितवर श्रीमदमररचितायां काव्यकल्पलताकविशिक्षावृत्तौ श्लेषसिद्धिप्रताने तृतीये चित्रस्तबकः पञ्चमः सम्पूर्णः । सम्पूर्णश्च श्लेषसिद्धिप्रतानस्तृतीयः ।

अत्र पादत्रये चतुर्थपादो गुप्तो ज्ञेयः । कुमुदोदरसोदरं इति । व्याख्या–अत्रोक्तिद्वयं यथा हे देव! त्वद्यश अरमत्यर्थं, मुदं हर्षं दत्ते । यशः कथम्भूतं? कुमुदोदरसोदरं । हे देव! त्वं दोर्बलात् अरौ सोद्रेको यो दरो भय, तदेव शङ्कुः कीलकस्तं करोतीति सोद्रेकशङ्कुकृत् वर्तसे । वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा । परं चित्रं शब्दस्यालङ्काराः श्लेषोऽर्थस्यापि सोऽन्यस्तु । शेषं सुगमम् ।।छ।।

इति श्री तपागच्छाधिनायक पातसाहि श्रीअकब्बरप्रतिबोधदायक श्रीशत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री४ श्रीहीरविजयसूरीश्वरशिष्य पं. श्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्दे श्लेषसिद्धिप्रतानप्राप्त चित्रस्तबकोद्योतकः पञ्चमप्रसरः समाप्तः, तत्समाप्तौ च समाप्तोऽयं तृतीयश्लेषसिद्धिप्रतानः ।।छ।।

॥ अलङ्काराभ्यासः ॥

॥ ४.१ ॥

अथार्थसिद्धप्रतानश्चतुर्थः ॥

तत्र प्रागलङ्काराभ्यासः—

का. क. उपमाद्यानलंकारानभ्यस्येदर्थसिद्धये ।
हृद्यं साधर्म्यमुपमा सोपमानोपमेययोः ॥ १ ॥

धर्मोपमावाचकयोश्चोक्तौ पूर्णा मता यथा ।
शशीवास्यं मुदं दत्ते लुप्तैकद्वित्रिलोपतः ॥ २ ॥

उपमानस्य लोपे तु रम्यं मुखमिवास्ति नः ।
धर्मलोपे शशीवास्यं लोपे धर्मोपमानयोः ॥ ३ ॥

कुसुमं मालतीतुल्यं न भृङ्गो लभते भ्रमन् ।
धर्मवाद्युपमामानानां लोपे हरिणलोचना ॥ ४ ॥

एकस्मिन्नुपमेये तु बहूपमानयोगतः ।
अभिन्ने वाथ भिन्ने वा धर्मे मालोपमा भवेत् ॥ ५ ॥

अनयेनेव नृपतिर्धाष्ट्र्येनेव कुलाङ्गना ।
कार्पण्येनेव कमला कला गर्वेण दूष्यते ॥ ६ ॥

पीयूषमिव सुस्वादुर्भास्वानिव विबोधकृत् ।
ज्ञानीव तत्त्वनिष्णातः सतां वचनविस्तरः ॥ ७ ॥

यत्र यात्युपमानत्वमुपमेयं यथोत्तरम् ।
सा भिन्नेनाप्यभिन्नेन धर्मेण रस(श)नोपमा ॥ ८ ॥

साधोर्धीवित्तता विद्या विद्यावद्दोषहृत्क्रिया ।
क्रियावत्प्रीतिकृद्वाणी वाणीवत्कीर्तिरुज्ज्वला ॥ ९ ॥

यस्यासीद्विमलं शास्त्रवद्वित्तं वित्तवन्मनः ।
मनोवद्दानं दानवद्यशो विश्वत्रयीमुदे ॥ १० ॥

परिकल्प्योपमेयं तु स्वेच्छया सविशेषणम् ।
सदृशस्योपमानस्य कल्पने कल्पितोपमा ॥ ११ ॥

उपकण्ठस्थवक्षोजयुग्ममस्याः मुखं बभौ ।
सहस्रपत्रं पार्श्वस्थरथाङ्गमिथुनं यथा ॥ १२ ॥

उपमानोपमेयत्वं पर्यायेण द्वयोर्भवेत् ।
उपमेयोपमा मुखवदिन्दुरिन्दुवन्मुखम् ॥ १३ ॥

म. टी. अथार्थसिद्धिप्रताने पूर्वमलङ्काराभ्यासं प्रपञ्चयन्नाह—

उपमेति—उपमानोपमेययोर्हृद्यं मनोहरं, साधर्म्यमुपमोच्यते । सैकादशधा । तत्र धर्मोपमावाचकयोः शब्दयोः प्रतिपादने उपमानोपमेययुक्ता पूर्णोपमा कथ्यते । यथा—'शशीवास्यं मुदं दत्ते' इत्यत्रास्यं मुखं, मुदं हर्ष, दत्ते । क इव ? शशीव चन्द्र इव । यथा शशी मुदं दत्ते तथेदमपि । शशीति उपमानं इवेति पदेनोपमा । आस्यमुपमेयं, मुदामिति पदेन धर्मः । चतुर्णामेकत्र प्रतिपादनं पूर्णोपमेति । २ ।

उपमानोपमेयधर्माणां मध्यादेकस्य द्वयोस्त्रयाणां वा लोपे लुप्तोपमा कथ्यते । तत्रोपमानलोपे यथा–'रम्यं मुखमिवास्ति नः' इत्यत्र नः मुखमिवान्यत् रम्यमस्ति इव । यथा अमुक इत्युपमानाभावादुपमानलुप्तोपमा । धर्मलोपे यथा—शशीवास्यमित्यत्र धर्माभावाद्धर्मलुप्तोपमान् । धर्मोपमानयोर्लोपे यथा—

कुसुमं मालतीतुल्यं न भृङ्गो लभते भ्रमन् ।

इत्यत्र भृङ्गः कुसुमं न लभते न प्राप्नोति । कथम्भूतम् । मालतीतुल्यं मालतीसदृशम् । मालतीकुसुमस्य उपमानस्य लोपात् धर्माभावाच्च द्विलुप्तोपमा ४ । धर्मे वाद्युपमानानां लोपे यथा-हरिणलोचना-हरिणलोचने इव चञ्चले लोचने यस्याः सा, इत्यत्रोपमानैव व धर्माभावात् त्रिलुप्तोपमा ५ । एकस्मिन्नुपमेये बहूपमानयोगादभिन्नधर्मेण भिन्नधर्मेण वा मालोपमा भवेत् यथा—

अनयेनेव नृपता धाष्टर्येनेव कुलाङ्गना ।
कार्पण्येनेव कमला कला गर्वेण दूष्यते ॥१॥

कला गर्वेणाभिमानेन दूष्यते । कला उपमेयं, नृपतादि बहूपमानयुतम् । तत्राभिन्नधर्मेणोपमानानि अनयेनान्यायेन इव । यथा नृपता भूपतित्वं दूष्यते इव । यथा धाष्टर्येन कुलवधू इव । यथा कार्पण्येन कृपणभावेन कमला लक्ष्मी अत्र दूष्यते इति । धर्मोऽभिन्नः सर्वत्रेति ६ । पीयूषमिवेत्यत्र सतामुत्तमानां वचनविस्तर इत्युपमेयम् । तत्र भिन्नधर्मेणोपमानानि यथा । वचनविस्तरः कथम्भूतः ? सुस्वादुः । किमिव ? पीयूषमिव । स्वादुत्वं यथा पीयूषे वचनविस्तरे तथैवास्ति पुनर्वचनविस्तरः । कथम्भूतः ? विबोधकृत् । क इव ? भास्वानिव । पुनः कथम्भूतः ? तत्त्वनिष्णातः । क इव ? ज्ञानीव । अत्रापि सुस्वादुत्वविबोधकर्तृत्वादिभिन्नधर्मा ज्ञेया इति ७ । यत्रोपमेयमुपमानत्वं याति, यथोत्तरं भिन्नधर्मेणाभिन्नधर्मेण वा सा रशनोपमा प्रतिपद्यते । यथा– साधोधीर्विदिति - साधोः सत्पुरुषस्य, विद्या धीवत्तता । विद्या उपमेयं उत्तरपादे उपमानत्वं याति । एवमग्रेऽपि । अत्र भिन्नधर्मेणोपमानानि यथा-विद्यावद्दोषहृत् क्रिया । यथा विद्या दोषहृत् तथा क्रिया क्रियावत् । प्रीतिकृद्वाणी यथा प्रीतिकृत् क्रिया तथा वाणी वाणीवत् कीर्तिरुज्ज्वला, यथा वाणी उज्ज्वला तथा कीर्तिरिति ८ । यस्यासीदिति अभिन्नधर्मेण यस्य राज्ञो वित्तं विमलमासीत् । शास्त्रवत् वित्तवन्मनो विमलं, मनोवद्दानं विमलं, दानवत् यशो विमलं, विश्वत्रयी मुदे हर्षायासीत् ९ तथा । कल्पितोपमा यथा—

उपकण्ठस्थ वक्षोजयुग्ममस्या मुखं बभौ ।
सहस्रपत्रं पार्श्वस्थरथाङ्गमिथुनं यथा ॥१॥

का. क. अथाभ्यासार्थमुपमावाचका उपमानानि धर्माश्च प्रपञ्च्यन्ते—

यथेवत्रेत्यव्ययानि तुल्यमित्रारिवाचिनः ।
प्रतिबिम्बाद्याश्च शब्दा वतिकल्पमुखास्तथा ॥ १४ ॥

तद्धिता ध्वाङ्क्षरावीन्दुमुखीत्याद्याश्च वृत्तयः ।
स्पर्धते जयति द्वेष्ट्यनुकरोत्यादिकाः क्रियाः ॥ १५ ॥

यत्कर्माधिकरणयोराचिः कर्मसमुद्भवः ।
कर्मकर्त्रोर्णमित्याद्या उपमावाचकाः स्मृताः ॥ १६ ॥

राजादीनां शिवब्रह्मविष्णुशेषसुरेश्वरान् ।
सूर्येन्दुजलदोदन्वदग्निसिंहाद्रिहस्तिनः ॥ १७ ॥

भूभूरुहनभोऽम्भोजमरालगरुडानिलान् ।
पुरारामसरोमुख्यान्युपमानानि कल्पयेत् ॥
भजन्ति भावाः सर्वेऽपि भावानामुपमानताम् ॥षट्पदी॥

वेण्याः सर्पासिभृङ्गाल्यः केशपाशस्य चामरः ।
नीलकण्ठकलापोऽपि धम्मिल्लस्य विधुन्तुदः ॥ १९ ॥

सीमन्तस्याध्वदण्डौ च ललाटस्याष्टमीविधुः ।
फलकं च कपोलस्य चन्द्रमा मुकुरस्थलम् ॥ २० ॥

भ्रुवोः खड्गधनुर्यष्टिरेखापल्लववल्लयः ।
दृशोश्चकोरहरिणमदिराः खञ्जनोऽम्बुजम् ॥ २१ ॥

नीलोत्पलं च कुमुदं श्रुतेर्दोला च पाशकः ।
नासाया वंशोऽधोमुखतूणीरशुकचञ्चवः ॥ २२ ॥

तिलप्रसूनदण्डौ चाधरस्य नवपल्लवः ।
बिम्बीफलं प्रवालं च दन्तानां मौक्तिकावलिः ॥ २३ ॥

कुन्ददाडिमबीजानि हीरकाश्च, स्मितस्य तु ।
ज्योत्स्ना पुष्पाणि पीयूषं श्वासस्याम्भोजसौरभम् ॥ २४ ॥

जिह्वायास्त्वञ्चलो दोला वाण्या भृङ्गीपिकीरवौ ।
सुधा मधु च वक्त्रस्य शशी पङ्कजदर्पणौ ॥ २५ ॥

कण्ठस्य कम्बुरंसस्य कुम्भौ, बाह्वोश्च वल्लरी ।
मृणाललहरीशाखापाशाः, पाणिपदस्य तु ॥ २६ ॥

पल्लवोऽम्बुजमङ्गुल्याः पल्लवो, नखपद्धतेः ।
रत्नताराप्रसूनानि, स्तनयोः स्तबकौ घटौ ॥ २७ ॥

कुम्भिकुम्भौ गिरी चक्रौ स्तम्बौ, मध्यस्य वेदिका ।
सिंहशक्ती च, रोमाल्या रेखामृणालवल्लयः ॥ २८ ॥

नाभेरम्भोजमावर्तो ह्रदो विवरकूपकौ ।
त्रिवल्या वीचिसोपाननिश्रेण्यो, जघनस्य तु ॥ २९ ॥
पुलिनं पीठफलके, नितम्बस्य स्थलं पुनः ।
ऊर्वोः कदलिकास्तम्भेभकरौ करभस्तथा ॥ ३० ॥
जङ्घायुगस्य च स्तम्भौ, गतेर्हंसमतङ्गजौ ।
इमान्यन्यानपि स्त्रीभ्य उपमानं यथोचितम् ॥ ३१ ॥

म. टी. तथाऽस्याः कामिन्या मुखं बभौ शुशुभे । कथम्भूतम् ? समीपस्थकुचयुग्मं तथा । कथं ? यथा कमलं बभौ। कथम्भूतं ? पार्श्वस्थचक्रवाकयुगलमिति १० तथा । यत्र उपमानोपमेयत्वं पर्यायेण द्वयोरुपमानोपमेययोर्भवेत् सा उपमेयोपमा प्रतिपाद्यते । यथा-मुखवदिन्दुरिन्दुवन्मुखमित्यादि ११ । यिन्-कर्माधिकरणयोरिति यिन् । क्यान् प्रत्ययकस्य संज्ञा । आयिः व्यङप्रत्ययस्य संज्ञा । तेन कर्माधिकरणयोः क्यान् समायाति । कर्तरि क्यप्रत्ययश्च कर्मकत्रोः । णम् प्रत्यय इत्याद्या उपमानवाचकाः । राजादीनामिति आदिशब्दात् प्रधानपुरोहितसेनानिप्रभृतीनामुपमानानि । शिवः १ ब्रह्मा २ विष्णुः ३ शेषः शेषनागः ४ सुरेश्वरः ५ सूर्यः ६ इन्दु ७ जलदो मेघः ८ उदन्वान् समुद्रः ९ अग्निः १० सिंहः ११ अद्रिः १२ हस्ती १३ भूपृथिवी १४ भूरुहो वृक्षः १५ नभो गगनं १६ अम्भोज कमलं १७ मरालो राजहंसः १८ गरुडः १९ अनिलो वायुः २० पुरं नगरं २१ आरामो नगरासन्नखंडः २२ सरः तडागः २३ इत्यादीनि सुधीः कल्पयेत् । भजन्तीति--एवं सर्वे पदार्थाः पदार्थानामुपमानतामाश्रयन्तीति । मानवा मौलितो वर्ण्या इत्यनुक्रममाह-मस्तकस्योपमानं छत्रं (१) वर्णकुम्भः २ कमलं ३ च । वेण्या उपमानं सर्पः १ असिः खड्ग २ भृंगाली भ्रमरश्रेणि ३ श्च । केशपाशस्योपमानं चामराणि १ मयूरपिच्छसमूहश्च २ धम्मिल्लस्य गुम्फितकेशस्योपमानं राहुः । सीमन्तस्य मार्गः १ दण्डश्च २ । ललाटस्य अष्टमी चन्द्रः १, फलकं पट्टिकं २ च । कपोलस्य चन्द्रमा १ मुकुरो दर्पणः २ स्थलं ३ कनकतुलातलमित्यन्यत्र ४ च । भ्रुवोः खड्ग १ धनुः २ यष्टिः ३ रेखा ४ पल्लवः ५ वल्लि ६ श्च । दृशोः चकोरः १ हरिणः २ मदिरा ३ खंजनः पक्षिविशेषः ४ अम्बुजं ५ नीलोत्पलं ६ कुमुदं च ७ । श्रुतेः कर्णस्य दोला १ पाशको नागपाशकः २ । नासिकायाः वंशो १ अधोमुखतूणीरः बाणस्थानं २ शुकचञ्चुः ३ तिलप्रसूनं ४ दण्ड ५ श्च अश्वमुखमित्यन्यत्र ६ । अधरस्य नवपल्लवः १ बिम्बीफलं २ प्रवालं च ३ । दन्तानांमौक्तिकावलिः १ कुन्दः २ दाडिमबीजानि ३ हीरकाश्च । हासस्य चन्द्रज्योत्स्ना १ पुष्पाणि २ पीयूषं ३ । पुष्पाणीत्यत्र दुग्धं चेति पाठान्तरम् । श्वासस्याम्भोजसौरभं १ । जिह्वायाः वस्त्राञ्चलः १ दोला २ । वाण्या भृङ्गीरवः १ कोकिलारवः २ सुधा ३ मधु च ४ । मुखस्य चन्द्रः चन्द्रबिम्बं १ पंकजं २ दर्पणो दर्पणतलं ३ । कण्ठस्य कम्बुः शंखः १ । अंशस्य कुम्भो घटः । बाह्वोः वल्लरी १ मृणालं कमलनालं २ लहरी सरोवरादिवीचिः ३ । शाखा कल्पवृक्षादि शाखा ४ पाशाः ५ पाणेश्चरणस्य च । पल्लवः १ अम्बुजं २ । अंगुल्याः पल्लवः १ मुद्गशम्बेत्यन्यत्र । नखपद्धतेः रत्नानि १ ताराः २ प्रसूनानि । स्तनयोः स्तबकौ १ घटौ २ हस्तिकुम्भौ ३ पर्वतौ ४ चक्रवाकौ ५ स्तम्बौ धान्यगुच्छौ ६ । मध्यस्य कटीमध्यस्य वेदिका यज्ञवेदिकाद्वयमध्यं १ सिंहः सिंहकटिः २ शक्तिश्च ३ । रोमावल्याः रेखाः १ मृणालं कमलनालं २ वल्लिः ३ । नाभेः अम्भोजं १ आवर्तः २ ह्रदः ३ विवरं ४ कूपकः ५ । त्रिवल्या. वीचिः १ सोपानानि २ निश्रेणिः ३ । जघनस्य योनिमण्डलस्योपरिभागस्य पुलिनं नदीतटं १ पीठं ओट्टलक इति प्रसिद्धं २ फलकं पट्टिकं ३ नितम्बस्य स्थलम् । रजः पुञ्जः ऊर्वोः कदलिकास्तम्भौ १ इभकरौ २ करभो मणिबन्धकनिष्ठिकामध्यं ३ । जंघायुगलस्य स्तम्भौ १ गते हंसः १ हस्ती २ च ।

का. क. पुंसोऽङ्गे तूपमानानां विशेषः कोऽपि कथ्यते ।
स्कन्धस्य वृषरक्ताक्षस्कन्धौ, बाह्वोरहीश्वरः ॥ ३२ ॥

हस्तिहस्तपविस्तम्भार्गलादण्डाश्च वक्षसः ।
शिलाकपाटौ यानस्य प्रमत्तोक्षगतिः पुनः ॥ ३३ ॥

एकैकेनापि धर्मेणोपमानं बहुधा भवेत् ।
धर्मा वर्णक्रियाकाराधाराधेयादयो मताः ॥ ३४ ॥

वर्ण्यस्य राजादेर्वर्णादिमध्यादेकैकेनापि धर्मेण इत्यादिरुपमानमनेकधा भवति । एक एवार्को बहुधोपमानं यथा—

नवार्क इव रक्तोऽयं, तमोभेदी स भानुवत् ।
सद्वृत्तः सवितेवायं, कुले भात्येष खेऽशुवत् ॥

आदित्यवत्प्रतापी सः सद्दिनः स दिनेशवत् ।
वसुभृत्स यथा सूर्यः, स्मेरपद्मः स सूर्यवत् ॥

अभ्यासः स्याद्विभक्तीनामुपमानोपमेययोः ।
उपमावाचकानां च धर्माणां च विपर्ययात् ॥ ३४ ॥

विपर्ययात्सर्वत्र सम्बध्यते । विभक्तिविपर्ययादभ्यासो यथा—

स विपक्षान् प्रचिक्षेप तमःस्तोममिवार्यमा ।
द्विषस्तं नाभियुध्यन्ते ध्वान्तोद्भेदा रविं यथा ॥

रविणेवान्धकाराणि तेन चिक्षिपिरे द्विषः ।
द्रुह्यन्ति दुर्जनास्तस्मै घूका इव दिवाकृते ॥

तत्रसुः शत्रवस्तस्माद् घूका इव दिवाकरात् ।
तपोवद्रिपवस्त्रस्तास्तस्यार्कस्येव तेजसा ।
रवाविवोदिते तत्र शत्रवो ध्वान्तवद्गताः ॥ षट्पदी ।

म. टी. इमान्यपि स्त्रीपुरुषयोरुपमानानि यथोचितं ज्ञेयानि । पुरुषस्योपमानविशेषो यथा—स्कन्धस्य वृषभस्कन्धः १ महिषस्कन्ध २ । बाह्वोः शेषनागः १ हस्तिहस्तः २ पविर्वज्रं ३ स्तम्भः ४ अर्गला ५ दण्डश्च ६ । हृदयस्य पर्वतशिला १ कपाटं २ । यानस्य प्रमत्तवृषभगतिः १ इति । एकैकेनापि धर्मेणोपमानं बहुधा भवेदित्यत्र एक एवार्को बहुधोपमानं यथा । नवार्क इव रक्तोऽयमित्यत्र वर्णधर्मः, तमोभेदीत्यत्र क्रियाधर्मः, सद्वृत्तः सवितेवेयमित्यत्राकारः, धर्मकुले भात्येष खेंशुवदित्यत्राधारधर्मः, सद्दिनः सदिनेशवदित्यत्र सत् प्रधानं दिनं यस्य स तथा । सूर्यः कथम्भूतः ? सद्विद्यमानं दिनं यस्मात् स तथा । वसुभृत् स यथा । सूर्य इत्यत्र वसु द्रव्यम् । पक्षे किरणानि च बिभर्तीति वसुभृत् । स्मेरपद्मः स सूर्यवदित्यत्र पद्मा लक्ष्मीः । पक्षे कमलानीत्येतेषु आधेयधर्मः इत्यादयोऽन्येऽपि ज्ञेयाः । द्रुह्यन्तीति द्रोहं कुर्वन्तीति शेषं सुगमं । धर्माणां विपर्ययाद्यथा कलाभिः सकलाभिस्स इत्यत्र कलामुद्रोविपर्ययोऽर्थभेदश्चिन्तनीयः ।

का. क. उपमानोपमेययोर्विपर्ययाद्यथा, उपमानं यद्भवति तदुपमेयं क्रियते—

विजयी विद्विषोऽजैषीद्भास्वानिव तमोभरम् ।
अध्वंसत रविर्ध्वान्तं विजयी विद्विषो यथा ॥

लुलितालकवल्लीभिर्भासते भामिनीमुखम् ।
ललल्लीनालिमालाभिर्नलिनी नलिनं यथा ॥

प्रफुल्लं पद्मिनीपद्म प्रेङ्खत्षट्पदपङ्क्तिभिः।
कान्तामुखमिवाभाति विलोलालकवल्लिभिः॥

इत्यादि।

उपमावाचकानां विपर्ययाद्यथा——

मुखं भाति यथाम्भोजं भात्यम्बुजमिवाननम्।
अम्भोजं वा मुखं भाति मुखं पद्मनिभं बभौ॥
स्मिताम्भोजसुहृद्वक्त्रं स्मितपद्मद्विषन्मुखम्।
मुखं पद्मप्रतिच्छन्दं मुखं स्मितसरोजवत्॥
मुखं कमलकल्पं तत् पद्मदेश्यं प्रियाननम्।
पद्मदेशीयमास्यं ते भाति पद्ममुखी प्रिया॥
पद्मेन स्पर्धते वक्त्रं पद्मं जयति ते मुखम्।
मुखमम्भोरुहं द्वेष्टि मुखं पद्मानुकारकृत्॥
मित्रीयति मुखं चन्द्रः पद्मीयत्यनिलो मुखे।
पङ्केरुहायते वक्त्रं पङ्केरुहति तन्मुखम्॥
आननं तव पूर्णेन्दुदर्शं पश्यामि भामिनि।

पूर्णेन्दोरिव दर्शनं पूर्वं कर्मणि चोपमाने णम्। पूर्णेन्दुमिव दृष्ट्वेत्यर्थः।

मुखं पूर्णेन्दुविद्योतं सुदति द्योतते तव॥

पूर्णेन्दुनेव द्योतनं पूर्वं कर्तरि च णम्, यथा पूर्णेन्दुना द्योत्यते तथा द्योत्यत इत्यर्थः।

धर्माणां विपर्ययाद्यथा——

कलाभिः सकलाभिः स पूर्णेन्दुरिव भासते।
समुदं सुहृदामिन्दुः कुमुदानामिवाकरोत्॥
स चकार चकोराणामिवेन्दुर्मुदमर्थिनाम्।
भूमीन्द्रोऽभूषयद् भूमिं तमीमिव तमीपतिः॥

तोष्यभेद्याधाराधेयभेदाभिन्ना तथोपमा॥ ३५॥

तोष्यभेदाद्यथा——

स सखीन् तोषयामास चक्रानिव दिवाकरः।
स द्विषः शोषयामास पङ्कानिव पतिस्त्विषाम्॥
अशोभिष्ट स भूपृष्ठे नभसीव नभोमणिः।
कलानां निलयः सोऽभूद्भासां भासां विभुर्यथा॥

तोष्यादिप्रपञ्चनं रूपकाभ्यासे करिष्यते। एवं लुप्तोपमा—मालोपमा—रशनोपमा—उत्पाद्योपमा—कल्पितोपमा ज्ञेयाः।

उपमेयोपमाद्यास्तु यथालक्षणमभ्यसेत्।
उपमायां हि सिद्धायां बह्वलङ्कारसिद्धयः॥ ३६॥

तथाहि—

उपमैव विनेवादि रूपकं वदनं विधुः ।
इयमेकस्योपमानोपमेयत्वे त्वनन्वयः ॥ ३७ ॥
मुखं मुखमिवेयं तु स्मरणं स्मृतियोगतः ।
प्रियामुखस्य सस्मार प्रियः पूर्णेन्दुदर्शनात् ॥ ३८ ॥
ससन्देहस्तु किं योगे किंमुखं किं सुधाकरः ।
इयं नेदं किन्त्वादिकयोगतोऽपह्नुतिर्मता ॥ ३९ ॥
नेदं मुखं शशी किन्तु स्युरपह्नुतिवाचकाः ।
छलाकृतिशरीरार्थमुख्याः शब्दा यथा तथा ॥ ४० ॥
त्रिमार्गामिषतो व्यापत्त्वत्कीर्तिर्जगतां त्रयम् ।
इयं भेदे द्वयोर्व्यतिरेको मुखं शशी समौ ॥ ४१ ॥
आद्यं निर्लाञ्छनमियं प्रतिपत्तुर्भ्रमे भवेत् ।
भ्रान्तिमान् पीडितश्चक्रो मुखं प्रेक्ष्य शशिभ्रमात् ॥४२॥
एवं भवन्त्युपमाया बहुरूपाः प्रवृत्तयः ।
अन्तस्थरूपकोत्प्रेक्षाप्युपमोपक्रमाद्भवेत् ॥ ४३ ॥

यथा—

पल्लवैर्नवरागेव सकटाक्षेव षट्पदैः ।
हसतीव स्मितैः पुष्पैः वसन्तागमने वनी ॥ ४४ ॥
उत्प्रेक्षाद्योतका शङ्के मन्ये नूनमिव ध्रुवम् ।
जाने किलादयो ज्ञेयाः प्रायेणेयं क्रियोद्भवाः ॥ ४५ ॥

म. टी. स चकार चकोराणामित्यत्र मुग्मृषयोर्विपर्ययो ज्ञेयः । स सखीनी[नि] त्यत्र पूर्वार्द्धे तोष्यं अपरार्द्धे भेद्यमिति तोष्य-भेद्ययोरुपमा । अशोभिष्टेत्यत्र पूर्वार्द्धे आधारः, अपरार्द्धे आधेयमित्याधाराधेययोरुपमामुखम् । मुखमिवेत्यत्र अनन्वयालंकारः स्यात् । स च यत्रोपमेयस्य पृथग्भूतमुपमानं नास्ति, किन्तु उपमेयमेवोपमानं क्रियते, तत्र भवति । इयं उपमा इति सर्वत्र कथनीयम् । प्रियामुखस्य सस्मारेत्यत्र स्मरणालंकारः । किं मुखं किं सुधाकर इत्यत्र सन्देहालंकारः । नेदं मुखं शशी किन्तु इत्यत्रापनुत्यलंकारः । मुखं शशीसमं इत्यत्र । व्यतिरेकालंकारो यथा—मुखं शशिसमं, शशीमुखसमं इति । भ्रान्तिमानित्यत्र भ्रान्तिमानलंकारः । पल्लवैर्नवरागेवेत्यत्र अन्तस्थरूपकोत्प्रेक्षालंकारः । वनीवनमित्यादि सुबोधं । कोपपावक-पर्यन्य इत्यत्र पावको भेद्यः पर्यन्यो भेदकः । विवेकाम्भोजभास्कर इत्यत्राम्भोजं तोष्यं भास्करस्तोषक इत्यादि ।

का. क. क्रियाप्रपञ्चनं क्रियास्तबकतो ज्ञेयम् । उपमारूपकयोरनेकालंकारबीजत्वादुपमा पूर्वंप्रपञ्चिता ।

रूपकं प्रपञ्च्यते, यथा, रूपकं चतुर्धा भवति—भेद्यम्, तोष्यम्, आधारम्, आधेयम् ।

वनाद्दवे भवेद्भेद्यं रूपकं तोष्यमम्बुदे ।
भुष्याधारस्तथाऽऽधेयं सिंहे वर्ण्यविशेषतः ॥ ४६ ॥

वनादिति पदं दवे अम्बुदे भुवि सिंहे च योज्यम्।

भेद्यं रूपकं यथा—

ध्वान्ताहिविषनागाब्धिशैलवृक्षधनाग्नयः ।
रक्षःपङ्कादयो भेद्या रूपकोक्त्यारिरूपकैः ।। ४७ ।।

यथा ध्वान्ते रविचन्द्ररत्नदीपकाः, सर्पाणां गरुडनकुलमयूरजाङ्गलीमन्त्रवादिनः, विषस्य नीलकण्ठामृते, हस्तिनां सिंहाङ्कुशवार्यालानस्तम्भादिकाः, समुद्रस्यागस्त्यप्रलयानलवाडवपरशुरामरामाग्नेयबाणतरीसेतुहनूमन्मन्दराद्रयः, गिरीणां वज्रं, वृक्षस्य लतायाश्च दवानलवायुनदीरयहस्तिविद्युत्पातकुठाराः, मेघस्य वातवर्षात्ययौ, अग्नेर्जलमेघौ, रक्षसां रामकृष्णौ, पङ्कस्य शरदागमादित्यतापजलानि। आदिशब्दाद्रवेः राहुमेघागमहेमन्तकालदिनात्ययाः, चन्द्रस्य राहुश्यामपक्षप्रतिपत्प्रभातरविदिनमेघाः, प्रदीपस्य वात्यासर्पदर्शनस्नेहत्रुटिदशाक्षयफूत्कृतिमरुद्वस्त्राञ्चलानिलाः, नदीप्रवाहस्य ग्रीष्मातपः, महिषासुरस्य चण्डी, गजासुरत्रिपुरान्धककामदक्षाध्वरादीनां शिवः, मधुदैत्यचाणूरपूतनाकैटभकंसकेशिमुरराहुहिरण्यकशिपुबाणकालियाहिनरकबलिशिशुपालशाल्वगरुडादीनां विष्णुः, प्रलम्बासुरयमुनाजलादीनां बलदेवः, मृगस्य सिंहव्याघ्रौ, मत्स्यमकरादीनां कैवर्तः, वातापिनोऽगस्तिः, रात्रेः प्रभातं, घूकतारेन्दुदीपौषधीचौरकुमुदचकोरावश्यायजलादीनां रविः, कमलचक्रवाकतमसां चन्द्रः, तूलस्य पवनः, घर्मस्य व्यञ्जनं वायुः, वायुदुग्धदीपमण्डूकानां सर्पः, विन्ध्यस्यागस्त्यः, पद्मस्य हिमवर्षागजाः, हंसानां मेघः, अन्धकारस्य रविः, रवेः राहुः, राहोर्विष्णुः, पङ्कस्यातपः, आतपस्य जलदः, जलस्य वातः, वातस्य सर्पः, सर्पस्य गरुडः, गरुडस्य विष्णुः, वल्ल्याः गजः, गजस्य सिंहः, सिंहस्य शरभः, शरभस्य जलदो हन्ताः।

म. टी. अथ रूपकनिर्वाहविधिरिति येषु पूर्वार्धकृतरूपकं उत्तरार्द्धेन समर्थितमिति निर्वाहविधिः।

अथ भिन्नरूपकविधिरित्यत्र भेद्यादिभ्यो भिन्नमिति।।छ।।

का. क. तोष्यं रूपकं यथा—

वनपद्माब्धिचक्राङ्कचक्रचातकषट्पदाः ।
पिककेकिमुखास्तोष्या रूपके मित्ररूपकैः ।। ४८ ।।

वनानां मेघवसन्तागमकुल्यौषधीशारामिकाः, पद्मस्यादित्यशरद्वसन्ताः, समुद्रस्य चन्द्रग्रीष्मौ, हंसादीनां शरदागमः, चक्रवाकादीनां रविः, चातकानां मेघः, षट्पदानां पद्मं, कोकिलानां वसन्तः, मयूराणां मेघः। मुखशब्दात् चकोरजननेत्रचन्द्रकान्तानां चन्द्रः, घूकताराचौरकुलटौषधिरक्षसां तमस्विनी, सूर्यकान्तदिनकमलिनीनां रविः।

आधाररूपकं यथा—

स्वगुणैर्भूनभोऽम्भोधिनदीवननगादयः ।
रूपकस्थैः स्युराधारा

वनपर्वतादीनां भूराधारः, यथा-गुणकाननभूर्नृपः। तारारविचन्द्रादीनां नभः, यथा—गुणतारानभोदेशः। लक्ष्मीरत्नसुधाफेनविष्णुमत्स्यकल्लोलविद्रुममुक्तामकरादीनां समुद्रः, यथा—सद्गुणश्रीमहोदधिः, गुणरत्नाम्बुधिर्नृप इत्यादि। कमलहंसचक्रवाकादीनां नदी, यथा—गुणाम्भोजमरुत्कुल्या, यशोहंससरोवरं, इत्यादि। द्रुमपर्वतमृगसिंहादीनां वनं, यथा—गुणद्रुमवनं नृपः, मानपर्वतकाननमित्यादि। रत्नवंशनदीसिंहद्रुमादीनां गिरिः, यथा—गुणमाणिक्यरोहणः, कीर्तिगङ्गाहिमाचलः। आदिशब्दाद्गङ्गादेवदारुकस्तूरिकाहिमचमरीमुख्यानां गणानां हिमाद्रिः, गजानां नर्मदाया विन्ध्यः, चन्दनदक्षिणानिलानां मलयाद्रिः, मुक्तानां ताम्रपर्णी, रत्नानां रोहणाद्रिः, देवकल्पद्रुममन्दारपारिजातकहरिचन्दनसन्तानकनन्दनवनचिन्तामणिकामधेन्वैरावणस्वर्णतारादीनां मेरुपर्वतः, अलकामानसशिवगौरीमुख्यानां कैलासः, किञ्जल्कभृङ्गयोः पद्मं, पिकभृङ्गयोः सहकारः, कुसुमपल्लवशाखाफलच्छायापक्षिलतादीनां द्रुमः, देवकल्पद्रुममन्दारपारिजातकहरिचन्दनसन्तानका-

दीनां स्वर्गः, शेषकूर्मपन्नगविषसुधाकुण्डदानवहाटकेश्वरसप्तालगङ्गातमःप्रभृतीनां पातालं, कलशपताकादण्डदेवानां चैत्यम्, वेदवाणीहंसादीनां ब्रह्मा, गरुडलक्ष्मीपाञ्चजन्यचक्रकौस्तुभादीनां विष्णुः, गौरीगङ्गाचन्द्रकलादीनां महेश्वरः, प्रतापद्युति-मुख्यानां रविः, कलाचन्द्रिकासुधादीनां चन्द्रः । अमुना प्रकारेण स्वस्वगुणैः सर्वे पदार्था आधारा भवन्ति ।

रामाद्याः केवलैः क्वचित् ॥ ४६ ॥

रामप्रमुखा केवलैः स्वगुणैः न्यायप्रमुखैराधाराः रूपकं भवन्ति । यथा—न्याये रामः । सन्धायां चाणक्यः । अहङ्कारे रावणः, दुर्योधनश्च । शौर्ये रामसिंहौ । साहसे विक्रमादित्यजीमूतवाहनौ । महसि मार्तण्डः । धीरत्वे रामः । शक्तौ कार्तिकेयः । श्रियां विष्णुः । विद्यायां भार्गवीबृहस्पतिशक्राः । दाने कर्णशिविबलिकल्पद्रुमकामधेनुचिन्तामणयः । शरणे शिविवज्रायुधजीमूतवाहनाः । वाण्यां वाल्मीकिः । शमे रामः । कलासु चन्द्रः । सत्ये युधिष्ठिरहरिश्चन्द्रौ । औचित्ये गुरुः । प्रतिष्ठायामिन्द्रः । दयायां युधिष्ठिरः, जिनेन्द्रश्च । आज्ञायां लङ्केश्वरः । लावण्ये समुद्रः । सौहार्दे सुग्रीवः । गाम्भीर्ये समुद्रः । सौभाग्ये कामः । शोभायामिन्द्रः । उद्यमे रामः । गतौ हंसगजवृषभाः, स्वरे पिकवीणाहंसकेकि-मधुकराः । रूपे कामनलकूबराश्विनेयकुमारपुरूरवोनकुलाः । शमे मुनिः । ब्रह्मव्रते गाङ्गेयस्कन्दशुकहनुमन्नारदाः । ज्योतिषे वराहमिहिरभद्रदेवौ । गणिते श्रीधराचार्यः । नाट्यवेदे भरताचार्यः । गीते तुम्बुरुकिन्नराप्सरसः । नृत्ये हरः । वाद्ये नन्दिः । कवितायां वाल्मीकिव्यासकालिदासाद्याः । वैद्यके धन्वन्तरिः । विषनिग्रहे पीडलिः । दोषनिग्रहे हनूमान् । लक्षणे पाणिनिः । तर्के दिङ्नागधर्मकीर्त्युद्योतकरादयः । छन्दसि पिङ्गलाचार्यः । अश्वहृदयज्ञाने, रसवत्याञ्च नलः । कामशास्त्रे वात्स्यायनः । नीतिशास्त्रे चाणक्यः । पुरुष-स्त्रीलक्षणे समुद्रः । वेदे ब्रह्मा । रसवादे व्याडिनागार्जुनौ । धारावेधे अर्जुनः । धनुषि पिनाकी । वज्रे इन्द्रः । चक्रे विष्णुः । गदायां भीमः । पाशे वरुणः । दण्डे यमः । चन्द्रहासे रावणः । लाङ्गले बलभद्रः । परशौ परशुरामः । वास्तुशास्त्रे विश्वकर्मा । मल्लविद्यायां चाणूरमल्लः । छुरिविद्यायां वेतालभृगु । मायायां विष्णुः । धूर्तत्वे मूलदेवः । परोपकारे जीमूतवाहनः ।

अथ दोषः—कुचङ्क्रमणे उष्ट्रखरशृगालाः । कुस्वरे उष्ट्रमार्जारखरघरट्टकाकघूकटिट्टिभाः । कायकृशत्वे वेतालभृङ्गिरिटी । क्रौर्ये मार्जारः । दम्भे बकः । नीचगमने नदी । चापल्ये मर्कटः । कोपे सर्पः । भीरुत्वे शृगालः । तुच्छत्वे हस्तजलम् । मानादिषु दुर्योधनादीनामुदाहरणम् ।

> माने दुर्योधनः, न्याये रामः, सत्ये युधिष्ठिरः ।
> आज्ञायां लङ्केशः, शक्तौ कार्तिकेयो धराधवः ॥
> वाक्चातुर्ये सुराचार्यो, गम्भीरत्वे सरित्पतिः ।
> मेरुः स्थैर्ये, हरिः शौर्ये, प्रतापे तपनो नृपः ॥

अथवा एभिः सन्धादिकैर्गुणैः सन्धादिगुणवन्तश्चाणक्यादयो जीयन्ते । यथा—

> सन्धानिर्जितचाणक्यो, माननिर्जितरावणः ।
> प्रतापजितमार्तण्डो, राजते पृथिवीपति ॥

आधेयं रूपकं यथा—

> सिंहरत्नसरोऽम्भोजचन्द्रादित्यद्रुमादयः ।
> स्वाधारे रूपकप्रोक्तैः

वनपर्वतगुहादीनां सिंह आधेयम्, यथा—कुलकाननसिंहोऽयम् इत्यादिकं ज्ञेयम् । समुद्रताम्रपर्णीरोहणाद्रिप्रभृतीनां रत्नमाधेयम्, यथा—कुलाम्भोनिधिमाणिक्यम् । भूपर्वतारण्यादीनां सर आधेयम्, यथा—भवारण्ये सुधासरः ।

> वंशपर्वतपीयूष सरोवरमयं नृपः ।
> भूरि स्फुरति संसारमरुभूमिसुधासरः ॥

नदीसरःप्रभृतीनां जलस्थानानामम्भोजमाधेयम् । नीतिस्रोतस्विनीपद्मभूः, राजा राज्यसरोऽम्बुजं इत्यादि । नभोब्धिशिवभालानां चन्द्रादाधेयं, यथा—कुलाकाशे निशानाथो, ज्ञानाब्धौ हिमदीधितिः इत्यादि । आकाशस्य रविराधेय-महीपालकुलाकाशप्रकाशनदिनेश्वरः इत्यादि । धराद्रिवनादीनां वृक्षं आधेयं, यथा—संसारभूमिकल्पद्रुः, कुलाद्रौ देवपादपः, राज्यारामरसालद्रुः इत्यादि ।

आधेयं केवलैः क्वचित् ।। ५० ।।

मौलेः किरीटमाल्यमाणिक्यतिलकादय आधेयम् । अत्र मौलिना केवलेन रूपकरहितेन आधेयं कोटीरादिरूपकं भवति, यथा—भूपालमौलिकोटीरमाल्यमाणिक्यं इति, तथा कुलतिलक इति । वृक्षस्य लतायाञ्च पत्रपुष्पफलशाखामूलकन्दपक्षि-जातिप्रभृतय आधेयम् । पर्वतस्य नदीवृक्षरत्नमृगसिंहपुलिन्दगजकिन्नरादय आधेयम् । नद्याः पद्मभ्रमरहंसचक्रवाक-मत्स्यादय आधेयम् । समुद्रस्य चन्द्रसुधावडवाग्निरत्नशङ्खश्रीमुक्तातरङ्गमत्स्यविद्रुमफेनविष्णुविषादय आधेयम् । चन्द्रस्य ज्योत्स्नाकलाकलङ्कादय आधेयम् । आदित्यस्य तापकिरणादय आधेयम् । आकाशस्य चन्द्रार्कतारागङ्गाप्रभृतय आधेयम् । कामिन्याः सीमन्तकुङ्कुमस्तबकलीलाकमलादर्शकुण्डलकङ्कणकेयूरहारमञ्जीरस्मितकटाक्षधम्मिल्लवेणीकुचमुखकरचक्षुर्ना-सादय आधेयम् । वनस्य सरसीवापिकाहंसचक्रवाकवृक्षपर्वतभ्रमरगजसिंहसहकारादिवृक्षपुष्पस्तबकपुलिन्दकतस्करमृगादय आधेयम् । गजस्य आदर्शसिन्दूरभूषणाङ्कुशवरत्रागुडकोष्टकपताकायोधमुखपटकरकरङ्ककुम्भस्थलदन्तकर्णपादादय आधेयम् । मण्डपस्य कुम्भलतास्तम्भ चन्द्रोदयचन्दनमालामुक्तावचूलपुष्पप्रकारादय आधेयम् । रोहणस्य रत्नान्याधेयम् । कैलासस्य शिवगौरीमानसधनदादय आधेयम् । गृहस्य स्तम्भकपाटद्वारादय आधेयम् ।

अथारोपाश गुणाः—

सन्ध्याहंकृतिशौर्यसाहसमहो धीरत्वशक्तिश्रियो
विद्यादानशरण्यत्राक्शमकला सत्यौचिती भक्तयः ।
न्यायस्थैर्यविवेककीर्तिविनयप्रज्ञाप्रतिष्ठादया-
ज्ञालावण्यसुहृद्गभीरगुरुतासौभाग्यशोभोद्यमाः ।। ५१ ।।
विचाराचारसन्तोषज्ञानधर्मतपःक्षमाः ।
सौजन्यौदार्यवैराग्यब्रह्मचर्यगुणार्जवाः ।। ५२ ।।
उपकारेन्द्रियान्यस्त्रीविरतित्यागसंगमाः
सौम्यमार्दवशौचत्वसत्त्वानि विषयोज्झनम् ।। ५३ ।।

एते सन्धादयो गुणा राजादेर्यथौचित्यं वर्ण्यन्ते ।

अथ दोषाः—

मायाभीदम्भदुष्कर्मलोभशोकमदक्रुधः ।
रागसंसारदौर्जन्यप्रमादाज्ञानमन्मथाः ।। ५४ ।।

एते मायादिका दोषा नीचजनस्य भेदरूपकेण उत्तमस्याऽपि औचित्येन स्थाप्यन्ते । पूर्वोक्ताः सन्धादिका गुणा अपि वैपरीत्येन दोषा भवन्ति ।

अथ रोप्याः शब्दाः, पु(पु ?)न्नपुंसकलिङ्गपदार्थाः

चैत्याङ्गवृक्षगजमेघमृगाङ्कभानुव्योमाग्निसिन्धुहरिदीपकरत्नकुम्भाः ।
चक्राङ्गचातकचकोरमयूरचक्रपुंस्कोकिलावनसरोऽम्बुजमन्दिराणि ।। ५५ ।।

अथ स्त्रीलिङ्गशब्दा रोप्यार्हाः—

ज्योत्स्ना नदी विधुकला सरभी पताका वल्ली वनी कमलिनी दयिता सुधा श्रीः ।
कादम्बिनी सुरभिवृष्टिसुराविमुक्तातारात्करेणुकलिकालहरीकदल्यः ॥ ५६ ॥

एतैः काव्यद्वयपदार्थैरन्यैरपि पूर्वोक्तसन्धाहंकृत्यादिकान्यचतुष्टयोक्ता अन्येऽपि गुणा दोषाश्च नपुंसका नपुंसकैः, पुंल्लिङ्गाः पुंल्लिङ्गैः, स्त्रीलिङ्गैः स्त्रीलिङ्गाः यथौचित्यं भेद्यादिरूपकचतुष्टयविधिना योज्याः । भेद्यं यथा— कोपपावकपर्जन्यः । तोष्यं यथा—विवेकाम्भोजभास्करः । आधारो यथा—गुणरत्नपयोराशिः । आधेयम् यथा— गुणाम्बरनिशाकरः ।

नपुंसकलिङ्गपुंल्लिङ्गशब्दाः शौर्यशमादयः, स्त्रीलिङ्गा रोप्यार्हा भवन्ति ।
यथा—

शौर्यलक्ष्मीलतामेघः शमश्रीकौमुदीविधुः ।
महःशोभाब्जिनीसूर्यो दानस्थितिसुधाम्बुधिः ॥

स्त्रीलिङ्गाः शब्दाः सन्धाहंकृतिप्रभृतयः पुरःस्थितैः प्रपञ्चविस्तारप्रसरप्रायशब्दैर्नपुंसकलिङ्गा रोप्यार्हा भवन्ति ।
यथा—

सन्ध्याविस्तारपाथोधिविधुरेष क्षमापतिः ।
विद्याप्रसरवृक्षाब्दः प्रज्ञोत्कर्षनभोरविः ॥

एतच्चतुर्विधमपि द्विपंक्तिरूपकं भवति । प्रथमं भेद्यं द्विपंक्तिरूपकं यथा—

प्रतिज्ञावाहिनीपूरपरिप्लुतरिपुद्रुमः ।

इदमपि रूपकं वैपरीत्येन यथा—

द्वेषिवृक्षपरिम्लानिप्रतिज्ञावाहिनीरयः ।
प्रतिज्ञाचन्द्रिकापूरम्लानवैरिमुखाम्बुजः ॥
द्वेषिवक्त्राम्बुजद्रोहिप्रतिज्ञाचन्द्रिकारयः ॥

शौर्यदावानलप्लुष्टः द्वेषिकीर्तिलतावनः ।
द्वेषिकीर्तिलताद्रोहिशौर्यदावहुताशनः ॥

धैर्यसूर्यपरिम्लानः वैरिकैरवकाननः ।
वैरिकैरवकान्तारः ग्लानिकृद्धैर्यभास्करः ॥

शमस्रोतस्विनीपूरः शान्तक्रोधहुताशनः ।
क्रोधदावानलच्छेदिशमस्रोतस्विनीरयः ॥

कलाकादम्बिनीशान्तद्विषत्तेजो हुताशनः ।
द्विषत्तेजोदवच्छेदिकलाकादम्बिनीभरः ॥

विद्यास्रोतस्विनीवाहभिन्नवादिमहीरुहः ।
वादिभूरुहविद्रोहिविद्याकूलङ्कषारयः ॥

अथ द्विपंक्तितोष्यरूपकं यथा—

कलाकमलिनीबोधशमवास्मरनायकः ।

इदमपि वैपरीत्येन यथा—

शमभास्करविस्मेरकलाकमलिनीवनः ।।

कलाकादम्बिनीलीलानृत्यज्जनमनःशिखी ।
जनस्वान्तशिखिक्रीडाकलाकादम्बिनीभरः ।।

उल्लासिसत्यजीमूतप्रीतविष्टपचातकः ।
लोल (क ?) चातकसम्प्रीतिकरसत्यपयोधरः

विवेकरजनीनाथसंवर्धितशमाम्बुधिः ।।
शमसागरविस्तारविवेकरजनीकरः ।।

अथ द्विपङ्क्त्याधाररूपकं यथा—

गुणहंसमनोहारिप्रतिज्ञावाहिनीरयः ।
कीर्तिध्वजाञ्चलभ्राजिमानमत्तमतङ्गजः ।।
यशोमौक्तिकविस्तारितारदानपयोनिधिः ।
सत्कीर्तिनर्मदाभ्राजिधैर्यविन्ध्यमहीधरः ।।
प्रतापतपनोद्योतिगुरुशौर्यनभोऽङ्गणः ।
विक्रीडत्कीर्तिशीतांशुतारदानपयोनिधिः ।।
देवभक्तिमरुत्कुल्यापूर्णमानससागरः ।
धैर्यहर्यक्षवर्यश्रीविलसद्गुणकाननः ।।
गुणमुक्तागणश्रेष्ठविवेकतटिनीपतिः ।
कलासुरनदीरम्यस्फारधैर्यहिमाचलः ।।

इदमेव द्विपङ्क्त्याधाररूपकं वैपरीत्येन द्विपङ्क्त्याधेयरूपकं भवति। यथा—

प्रतिज्ञावाहिनीपूरक्रीडद्गुणसितच्छदः ।
अहङ्कारमहाहस्तिक्रीडत्कीर्तिध्वजाञ्चलः ।।
दानपाथोनिधिक्रीडत्यशोमुक्तासमुच्चयः ।
धैर्यविन्ध्याचलोत्सङ्गरङ्गत्सत्कीर्तिनर्मदः ।।
गुरुशौर्याम्बरक्रोडक्रीडत्तेजो दिवाकरः ।
दानरत्नाकरक्रोडविक्रीडत्कीर्तिचन्द्रमाः ।।
स्वान्ताम्बुधिविशद्देवभक्तिदेवनदीरयः ।
गुणकाननविक्रीडत्तारधैर्यमृगाधिपः ।।
विवेकाम्बुधिविक्रीडद्गुणमुक्तासमुच्चयः ।
धैर्यशैलपरिक्रीडत् कीर्तिगङ्गारयो नृपः ।।

अथ त्रिपंक्तिमिश्ररूपकम्। यथा—

सन्ध्यासिन्धुयशोम्भोजक्रीडद्गुणसितच्छदः ।

इद वैपरीत्येन—

गुणहंसमनोहारिसन्धासिन्धुयशोऽम्बुजः ।
शौर्यशैलमहोदावदग्धवैरिमहीरुहः ।
वैरिभूरुहविद्रोहिशौर्यशैलमहानलः ॥
कलावल्लीयशःपुष्पक्रीडद्गुणमधुव्रतः ।
गुणद्विरेफरोचिष्णुकलावल्लीयशःसमः ॥
शमसिन्धुयशोनीरक्रीडद्गुणसरोरुहः ।
गुणपङ्केरुहभ्राजिशमसिन्धुयशोजलः ॥

यथा—

सदौचित्यलताकीर्तिः पुष्पोद्यद्गुणषट्पदः ।
गुणभृङ्गभृतौचित्यवृक्षकीर्तिप्रसूनकः ॥

अथ रूपकनिर्वाहविधिः । यथा—

प्रतिज्ञाचन्द्रिकाचन्द्रः शोभते भूमिवल्लभः ।
यदालोकनमात्रेण म्लानं वैरिमुखाम्बुजैः ॥
मानमातङ्गविन्ध्याद्रिरेष क्षमापालपुङ्गवः ।
कीर्तिर्विजृम्भते यस्य नर्मदाशर्मदायिनी ॥
औचित्यद्रुमकान्तारं भूमिपालो विराजते ।
शौर्यसिंहपरिक्रीडाध्वस्तवैरिमतङ्गजः ॥
धैर्यदन्तावलक्रीडाविन्ध्यविश्वम्भराधरः ।
सत्कीर्तिनर्मदापूरप्लुतक्षोणीतलो नृपः ॥
कलाकल्लोलिनीशैलः सैष राजा विराजते ।
महोमहोषधिज्वालाजालजीर्णा द्विषत्तमाः ॥

अथ भिन्नरूपकविधिः । यथा—

यद्दानकासारसमुद्भवानि भृशं यशःकैरवमण्डलानि ।
गुणावलीकेसरभासुराणि श्रितान्यहो याचकचञ्चरीकैः ॥
सङ्ग्रामपाथोनिधिसम्भवेन भवयशःकैरविणीधवेन ।
लीलापरिस्मेरितदिङ्मुखेन म्लानानि विद्वेषिमुखाम्बुजानि ॥

शेषानलङ्कारान् मत्कृतात् अलङ्कारप्रबोधादवबुध्याऽभ्यसेत् ।

इति श्रीजिनदत्तसूरि० काव्यकल्पलतावृत्तौ चतुर्थे अर्थसिद्धिप्रतानेऽलङ्काराभ्यासस्तबकः प्रथमः ।

म. टी. इति श्रीतपागच्छाधिनायकपातसाहिश्रीअकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री ४ श्रीहीरविजयसूरीश्वरशिष्यपण्डितश्रीशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्देऽर्थसिद्धिप्रतानगतालङ्कारस्तबको द्योतकः प्रथमः प्रसरः ॥छ॥

॥ ४.२ ॥

वर्ण्यार्थोत्पत्तिस्तबकः

अथार्थोत्पत्तिप्रकाराः प्रकाश्यन्ते—

वर्णाकारक्रियाधाराधेयसम्बन्धिबन्धवः ।
सम्पर्किद्वेषिमित्राणि पतिपत्नीशसेवकाः ॥ ५७ ॥

इन्द्रियानन्दभूत्यादिप्रदं तदपहारि च ।
एषामप्यरिमित्रादीत्यादि वर्ण्येऽर्थबीजकम् ॥ ५८ ॥

सर्वेषामेव वस्तूनामेते वर्णादयो भावा एको द्वौ त्र्यादयो वा निश्चिताः । वर्णः शुक्लादिः, आकारश्चतुरस्रादिः, क्रियाश्चलनादिकाः, आधारो वृक्षादेः पृथिव्यादिः, आधेयं पृथिव्यादेर्वृक्षादिः, सम्बन्धिनः पितृपुत्रादयः, बन्धवो भ्रातरः, सम्पर्किणः पार्श्वस्थाः, द्वेषिणो रिपवः, मित्राणि सुहृदः, पतिर्वरयिता, पत्नी भार्या, ईशः स्वामी, सेवका आराधकाः, इन्द्रियानन्दप्रदमेकस्य चक्षुरादेः, सर्वेषां वेन्द्रियाणां प्रीतिप्रदं, भूत्यादिप्रदं लक्ष्मीवस्त्रस्थानतेजःप्रभृतिप्रदं, तदपहारि इन्द्रियानन्दापहारकं भूत्याद्यपहारकं च ।

तथा—एषां वर्णादीनामपि यथासंभवं ये रिपवो मित्रादयः, तेऽपि तथा वर्णाकारक्रियाणां सादृश्यादेव वस्त्वन्तराणि द्विषो मित्राणि च ।

तथा—आधारस्य द्विषो मित्राणि, आधेयस्य द्विषो मित्राणि, सम्बन्धिनां द्विषो मित्राणि, बन्धूनां द्विषो मित्राणि, सम्पर्किणां द्विषो मित्राणि, द्वेषिणां द्विषो मित्राणि, पत्युर्द्विषो मित्राणि, प्रत्युर्द्विषो मित्राणि, पत्न्या द्विषो मित्राणि, स्वामिनां द्विषो मित्राणि, सेवकानां द्विषो मित्राणि, इन्द्रियानन्ददायिनां द्विषो मित्राणि, भूत्याद्यपहारिणां[1] द्विषो मित्राणि ।

आधारादीनामपि सादृश्याद्वस्त्वन्तरैः सह शत्रुत्वं मित्रत्वं च कल्पनीयम् । इत्यादिशब्दाद्वर्ण्यवर्णादिद्वेषिमित्राणां द्वेषिमित्रादि ।

तथा—वर्ण्यस्य शिशिरत्वमुष्णत्वं मधुरत्वं कटुत्वं सुगन्धत्वं, कुरूपत्वं सुरूपत्वं, मधुरध्वनित्वं कठोरध्वनित्वं, सूक्ष्मत्वमित्यादयोऽन्येऽपि भावा वर्ण्यवस्तूनि विविधार्थानामुत्पत्त्यर्थं बीजरूपा जायन्ते । यथा—वर्ण्यो रविस्तस्य पीतो वर्णः, आकारो वृत्तः, क्रियाः प्रकाशनरूपाः, आधारो नभः, आधेयं हस्तकमलादि, सम्बन्धिनो ब्रह्मकाश्यपशनियमुनाद्याः, बन्धवोऽपरे सूर्याः, सम्पर्किणो रथरथ्यारुणवालखिल्यादयः, द्वेषिणो राहुशुक्रशनयोध्वान्तदैत्याश्च, मित्राणि चन्द्रमंगलगुरवः, कमलचक्रकाद्याश्च; रविरेव प्रभाकमलिन्योः पतिः, पत्न्यः प्रभाकमलिनीरत्ना देव्यः, ईशः पितामहत्वात् ब्रह्मा, सेवका भाविनः, इन्द्रियानन्दप्रदा मित्राद्याः, शोभाप्रदाः दिवसाद्याः, इन्द्रियानन्दहरा विपक्षाद्याः, तथा वर्ण्यस्य रवेर्वर्णस्य द्विषो मित्राणि सदृग्वर्णानि, आकारस्य द्विषो मित्राणि सदृगाकाराणि, मित्रस्य कमलस्य द्विषश्चन्द्राद्याः, मित्राणि चक्राद्याः, सम्पर्किणो हंसाद्याः, आधारो जलं, आधेयं भृङ्गाद्याः । एवं परस्परमेकैकस्य भावस्य यथासंभवमपरे भावा निरीक्ष्याः । एवं कमलमित्रद्वेषिणश्चन्द्रादेरपि वर्णादीनि विलोक्यानि ।

१. भूत्यादिदायिनाम्—ला.वृ १. २.

वर्ण्यादिकानामेकेन द्वाभ्यां वा त्र्यादिकैरथ ।
सुधीरुत्पादयेदर्थमौचित्याद्वर्ण्यवस्तुनि ॥ ५९ ॥

वर्ण्यवस्तुनो वर्णाकारादीनां मध्यादेकेन केनापि काभ्याञ्चिद् द्वाभ्यां वा कैश्चित् त्रिभिश्चतुर्भिः पञ्चभिर्वा भावैरर्थः पूर्णतां नेयः ।

वर्णाकारक्रियामुख्यैः सदृशं वस्तु वस्तुनि ।
संयोजयेद्यथौचित्यमुपमारूपकादिभिः ॥ ६० ॥

वर्ण्ये वस्तुनि शुक्लादौ शुक्लादि, चतुरस्रादौ चतुरस्रादि, कम्पनादौ नर्तनादि इत्यादि सदृशान् भावानुपमया, रूपकेण अलङ्कारान्तरैर्वा योजयेत् ।

वर्ण्यादिभिरुपमानीकृतवस्तुप्रथितवर्णमुख्यगुणाः ।
उपमेये सादृश्यात् श्लेषादौचित्यतो योज्याः ॥ ६१ ॥

म. टी. अथार्थोत्पत्तिप्रकारं प्रपञ्चयन्नाह—यद्यपि प्रथमस्तबके सामान्येन वर्णाकारादिप्रतिपादितं, परमत्र **विशेषमाह— सम्बन्धिनः** ब्रह्मकाश्यपोऽन्यत्र सूर्यस्य ब्रह्मा पितामह १, काश्यपः पिता २, शनिः पुत्रः ३, यमुना पुत्री ४ । **आदिशब्दा-** दन्येऽपि ग्राह्याः । अपरे सूर्या इत्यत्रान्ये एकादश सूर्या ग्राह्याः । संपर्किण इत्यत्र सम्पर्किणः समीपवर्तिनः, **रथः स्यन्दनः,** रथ्या अश्वाः, अरुण सारथिः । वालि[ल]खिल्यः ऋषिः । आदिशब्दात् षष्टि ६० सहस्रा ऋषयो ग्राह्याः । **सेवका** भाविन इत्यत्र-भावोऽस्त्येषामिति भाविनः, सूर्यदर्शनकारकाः सूर्यदर्शनमन्तरा भोजनं न कुर्वन्तीत्यर्थः ।

का. क. श्वेतादीनां श्वेतादयः, चतुरस्रादीनां चतुरस्रादयः, आधारपरिवारादीनामाधारपरिवारादय **औचित्यादुपमानं** क्रियन्ते । उपमानीकृतवस्तुनो वर्णादयो गुणाः सादृश्येन श्लेषेण वा उपमेये रोप्यन्ते ।

पूर्ववर्णेभ्यः, तत्रापि प्रथमं शुक्लवर्णादियोत्पत्तये शुक्लपदार्थसङ्ग्रहो यथा—

शुभ्राणि भारतीधर्मशेषेशवरुणेन्दवः ।
चन्द्रप्रभसुविध्याख्यौ जिनेन्द्रौ बलनारदौ ॥
ब्राह्मणानां वर्णो धर्मः पितरश्च कृताच्युतः ।
सत्त्वं कृतयुगं शान्तहास्यवीररसास्तथा ॥ ६२ ॥

शुक्लध्यानं शुक्ललेश्या पुण्यं सिद्धिशिलोशनाः ।
चन्द्रश्चोच्चैःश्रवःशक्रगजज्योत्स्नाशरद्घनाः ॥ ६३ ॥

प्रासादसौधकैलासमन्दारद्रुहिणाद्रयः ।
रम्भागर्भपारिजातलोध्रकक्कोलपादपाः ॥ ६४ ॥

कार्पासकाशकर्पूरकरम्भा रजतं यशः ।
निर्मोकचीरडिण्डीरचन्दनं हसितं हिमम् ॥ ६५ ॥

दधिभक्षणचूर्णास्थिखटिकास्फटिकाभ्रकाः ।
रेणुः केतकखर्जूर्योः कटाक्षा वासभस्मनी ॥ ६६ ॥
मृणालपलिताम्भोदधारेन्दुकरचामराः ।
हारोर्णनाभतन्तूर्मिस्वर्दण्डेभरदा गुणाः ॥ ६७ ॥

सेराहशर्कराशालिदुग्धगङ्गासुधा जलम् ।
निर्झरः पारदो हंसबककैरवकम्बवः ॥ ६८ ॥

लतागृहं पुण्डरीककपालश्वेतकुम्भकाः ।
छत्रसिंहध्वजश्वेतगुञ्जाशुक्तिकपर्दिकाः ॥ ६९ ॥

मुक्ताकुसुमनक्षत्रदन्तस्वेदाम्बुबिन्दवः ।
सूर्येन्दुकान्तकरकसिकताकणसीकराः ॥ ७० ॥

म. टी. शुभ्राणीति-भारती सरस्वती १, धर्मः पुण्यं २, शेष. शेषनागः ३, ईश ईश्वरः ४, वरुणः पश्चिमदिक्स्वामी ५, बलो बलभद्रः, नारदः, ऋषिः । कृतयुगाच्युतः कृतयुगस्य नारायणः । सत्त्वं सत्त्वगुणः, उशनाः शुक्रः चन्द्राश्वः उच्चैश्रवः, इन्द्राश्वः ऐरावणः, चन्द्रज्योत्स्ना शरदः मेघः । सौधं नृपमन्दिरम् । मन्दारद्रुर्मन्दारवृक्षः, हिमाचलः, रम्भागर्भः, कदलीगर्भः पारिजातः कल्पद्रुमः, रोध्रः, लोद्रः, करम्भः करम्बु इति प्रसिद्धः । रजतं रूप्यं, निर्मोकः सर्पकञ्चुकः, चीरं वस्त्रं, डिण्डीरः फेनः, चूर्णः चुंतु इति प्रसिद्धः । अभ्रकः आभूआ इति प्रसिद्धः । केतकः केवडु इति प्रसिद्धः । खर्जूरी वृक्षः, वासः श्रीखण्डवासः । भस्मरक्षा मृणालं, कमलनालम् । पलितं पली इति प्रसिद्धिः । हार इति मुक्ताहारः । ऊर्णनाभः कोलीयावडु इति प्रसिद्धिः । तन्तुः सूत्रतन्तुः, ऊर्मिः कल्लोलः, स्वर्दण्डः स्वर्गस्य दण्डः, स्वर्गदण्डः सेराहः, श्वेताश्वः निर्झरः नीझरण इति प्रसिद्धिः । पारदः पारतः, लतागृहमूर्णनाभगृहं, पुण्डरीकं श्वेतकमलं, कपालं मस्तककर्परं, सूर्यकान्तः इन्दुकान्तः, शीकरावातप्रेरितजलकणाः इति । शेषं स्पष्टम् ।

का. क. मालतीमल्लिकाकुन्दयूथिका कुटजादयः ।

एते भारतीप्रभृतयोऽन्येऽपि श्वेतपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते । उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते ।

यथा—वर्ण्या भारती, तस्या उपमानं गङ्गा, गङ्गायाः शुक्लो वर्णः, परिवारो हंसपद्मानि, आधारो धूर्जटिशिरः, क्रिया पापहारित्वम् । ततो भारती कुन्देन्दुसुन्दरद्युतिः पद्मश्रिया हंससेविता शिवोत्तमाङ्गलालिता गङ्गेव सेवकपापहारिणी जयति ।

यथा—वर्ण्यास्तारकास्तासामुपमानं मुक्तास्तासामाधारोऽब्धिस्ततो नभोऽम्भोधिमध्ये तारा मुक्ता इव ।

यथा—वर्ण्याः काशास्तेषामुपमान हास्यं, हास्यं च प्रियसङ्गतौ भवति, ततो नवहंससमागमे शरद्वध्वा हास्यप्रकाशा इव काशाः ।

यथा—वर्ण्यं हास्यं, तस्योपमानं ज्योत्स्ना, तस्या आधारश्चन्द्रस्ततो मुखचन्द्रस्य ज्योत्स्नेव हास्यश्रीः ।

यथा—वर्ण्यं यशस्तस्योपमानं हास्यं, हास्यस्य हर्षस्ततो रिपुजयहृष्टस्य नृपखड्गस्य हास्यमिव यशः ।

यथा—वर्ण्यं यशस्तस्योपमानं, कर्पूरः, कर्पूराधारः समुद्गकः, परिवारोऽङ्गारस्ततस्त्रैलोक्योदरसमुद्गके यशः कर्पूर इव, तन्मध्ये नभोऽङ्गारलेश. ।

यथा—वर्ण्यास्तारास्तासामुपमानं पुष्पाणि, तेषामाधारो लता, ततस्तमोवल्ल्याः पुष्पाणीव ताराः ।

यथा—वर्ण्यानि पुष्पाणि, तेषामुपमानं स्वेदबिन्दवः, ते सात्त्विकभावाद्धर्माच्च भवन्ति, ततो दक्षिणानिलस्य स्पर्शाद्भृङ्गस्पर्शाद्वसन्तस्मरणाद्वा वल्लीनां स्वेदबिन्दव इव पुष्पाणि, परस्परसंघट्टधर्मादिव आत्मवशं भृङ्गं परवल्लीगतं

दृष्ट्वा कोपादिव वल्लीनां स्वेदबिन्दव इव पुष्पाणि। अथवा पुष्पाणां तारका उपमानं तारकाणामाधार आकाशस्ततो वनाकाशे पुष्पाणि तारका इव। अथवा रवितापत्रस्ताः शीतलवनोपान्तमाश्रितास्तारा इव पुष्पाणि। अथवा स्वोपकारकरान्धकारभ्रान्त्या श्यामलवनमुपाश्रितास्तारा इव पुष्पाणि।

यथा—वर्ण्यः प्रासादः, तस्योपमानं हिमाचलः, तस्य परिवारो गङ्गा, ततः प्रासादो हिमाचलस्तत्र गङ्गेव पताका। यथा—वर्ण्यः प्रासादः, तस्योपमानं धर्मः, ततः प्रासादो धर्मो लोकपातकवैरिणो जित्वा पताकाच्छलान्मौलेरुपरि पटीं चालयति।

अथ कृष्णवर्णादर्थोत्पत्तये कृष्णपदार्थोपसङ्ग्रहो यथा—

कृष्णानि केशव सीरिचीरचन्द्राङ्कराहवः ॥ ७१ ॥
विन्ध्याञ्जनाद्रिसुव्रतनेमिनाथौ जिनेश्वरौ ।
धूमकेतुर्महापद्मानन्तनागौ यमासुरौ ॥ ७२ ॥
सर्पराक्षससूर्याश्वशिवकण्ठघनाशनिः ।
कलिः कलिहरिर्द्वैपायनरामधनञ्जयाः ॥ ७३ ॥
शूद्राणां वर्णो धर्मश्च पितरश्च तमोगुणाः ।
काली देवी द्रुपदजा राजपट्टो विदूरजम् ॥ ७४ ॥
विषाम्बरकुहूशस्त्रागुरुपापतमोनिशाः ।
धूमकज्जलकस्तूरीपङ्का बहुलदुर्दिने ॥ ७५ ॥
मषीमदसुरावार्द्धियमुनासाञ्जनाश्रवः ।
मुद्गमाषतिला मुस्तामरिचे वनशाखिनौ ॥ ७६ ॥
गवलं तालतापिच्छदलेन्दीवरवल्लयः ।
नीली जम्बूफलं गुञ्जामुखाङ्गारौ खलाजिने ॥ ७७ ॥
मारिदुर्वचनालीकखलाः कृत्या कुकीर्तयः ।
मारणध्यानदुर्ध्यानिकृष्णलेश्या विपद्व्यथा ॥ ७८ ॥
कूर्मो वराहखट्वाङ्गमहिषाः पिकषट्पदौ ।
गोलाङ्गूलमुखं हस्ती कण्ठश्चटककेकिनोः ॥ ७९ ॥
काकः पिपीलिका दुर्गापतिः खञ्जनकण्ठिका ।
मकरः कृष्णसारस्तु भिल्लाश्छाया च गोमयम् ॥८०॥
रामारोमावलीनेत्रपक्ष्मभ्रूरोममूर्धजाः ।
रसावद्भुतशृङ्गारौ कटाक्षाक्षिकनीनिका ॥ ८१ ॥

म. टी. अथ कृष्णानीति—केशवो विष्णुः, शीरी चीरं-शीरं हलमस्यास्तीति शीरी बलभद्रस्तस्य वस्त्रम्। चन्द्रलाञ्छनं विन्ध्याद्रि रञ्जनाद्रिश्च। श्यामौ धूमकेतुर्ग्रहविशेषः। महापद्मः पद्मद्रहः। अनन्तनागः शेषनागः, शच्यः इन्द्राण्यः, शनिर्ग्रहविशेषः, कलिः कलियुगः, कलिहरिः, कलियुगः। कृष्णः द्वैपायनः तापसविशेषः। धनञ्जयः अर्जुनः, कालीदेवी कालिका, द्रुपदजा द्रु(द्रौ)पदी, राजपट्टो रत्नविशेषः, विदूरजं वैडूर्यरत्नं, कुहू अमावास्याबहुलः कृष्णपक्षः, दुर्दिनं मेघजं तमः, मदो

गजमदः, सुरा मदिरा, साञ्जनाश्रुः। वनशाखी वनवृक्षः, गवलं महिषशृङ्गं, तालस्तालवृक्षः, तापिच्छस्तमालवृक्षः, दलं पत्रं, इन्दीवरं कृष्णकमलं, नीली गलीति प्रसिद्धा। खलो दुर्जनः, अजिनं चर्मकृत्या, राक्षसी खुंगाहः कृष्णवर्णाश्वः। गोलांगलमुखं वानरमुखम्। चटककण्ठः मयूरकण्ठश्च। दुर्गाधिपतिः देवु इति प्रसिद्धः। कृष्णसारः कालीहार इति प्रसिद्धः। गोमयं छगणं। नेत्रपक्ष्म पांपणि इति प्रसिद्धिः। अक्षिकनीनिका कीकीति प्रसिद्धा। इत्येतेषामुदाहरणानि सुबोधानि।

का. क. एतेऽन्येऽपि कृष्णपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते। उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते। यथा—वर्ण्या स्त्रीवेणी, तस्या उपमानं कृपाणः, कृपाणस्याधारो वीरः, ततो मदनवीरेण भवनिष्फलीकृतपञ्चशरेण स्त्रीवेणीमिषात् कृपाणदण्ड इव प्रगुणीकृतः।

वर्ण्यं तमस्तस्योपमानं कज्जलं, कज्जलाधारो दीपस्तत ओषधीदीपसमुद्भूतैः कज्जलैरिव तमोभिर्मलिना दिशः। अथवा रविवियोगार्तानां दिग्वधूनां साञ्जनाश्रुसलिलानीव तमांसि।

वर्ण्य इन्दुकलङ्कस्तस्योपमानं नीलपद्मं, तस्याधार सरस्ततो नभारण्ये सुधाकरस्तत्र लाञ्छनच्छलादुत्तंसो नीलोत्पलम्। अथवा यामिनीकामिन्या मुखमिव चन्द्रस्तल्लाञ्छनच्छलादुत्तंसो नीलोत्पलम्। अथवा लाञ्छनस्य पापमुपमानं पापस्य दुष्कृतादुत्पत्तिः; ततो रविवियोगार्तपद्मिनीनां लक्ष्मीहरणपातकादिव चन्द्रस्य लाञ्छनच्छलान्मूर्तं पातकमिव दृश्यते। तथा इन्दुकलङ्कस्योपमानं कस्तूरिका, तस्या आधारो रूप्यकच्चोलकं, ततो यामिनीकामिनी स्वमण्डनार्थं चन्द्ररूप्यकच्चोलके लाञ्छनव्याजात्कस्तूरिकापङ्कमिव प्रगुणीचकार। अथवा इन्दुलाञ्छनस्य विषमुपमानं, तत आत्मानं क्रूरस्वभावेन निर्विण्णं भ्रातृस्वभावस्वीकरणाय लाञ्छनच्छलात्कालकूटं चन्द्रमिव सेवते। अथवा यामिन्याः स्वपतेश्चन्द्रस्य चक्षुर्दोषापनयनार्थं लाञ्छनव्याजात्कज्जलाङ्क कृत इव।

वर्ण्यं नीलोत्पलं, तस्योपमानं लाञ्छनं, ततः कामिनीमुखचन्द्रे नीलोत्पलं लाञ्छनमिव।

वर्ण्यो धम्मिलस्तस्योपमानं राहुस्ततः कालवशादिव गतवैरः सुमुखीमुखपार्श्वे चन्द्रभ्रमाद्धम्मिलच्छलेन राहुरिव समागतः।

वर्ण्या श्रीकण्ठकण्ठरुचिः, तस्या उपमानं तमः, ततस्त्वं हे प्रभो, सर्वेषामपि सामान्यप्रभुः, ततः किमस्मद्वैरिणं चन्द्रं शिरसा धत्से इति विज्ञप्तयेऽन्धकारमिव कण्ठरुचिच्छलादीश्वरमाश्रितम्। अथवा कण्ठरुचिच्छलान्निजमुतललाटेन्दुमिलनाय जलधिरिव समागतः। अथवा कण्ठरुचिच्छलाद्गङ्गा स्पर्धयेव यमुना ईश्वरं समागता।

नीलवर्णादर्थोत्पत्तये नीलपदार्थसङ्ग्रहो यथा—

नीलानि बुधकर्कोटौ मल्लिपार्श्वौ जिनेश्वरौ।
बीभत्सरसवायू च नीलको नीलवानरः॥ ८२॥

शुको नीलोत्पलं दूर्वा प्रियङ्गुदलशैवले।
वंशाङ्क(कु?)रो मरकतेन्द्रनीलो रविवाजिनः॥ ८३॥

काचो मुद्गस्तथा नीललेश्या बालतृणादयः।

एतेऽन्येऽपि नीलपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते। उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते। यथा—वर्ण्यः श्रीपार्श्वजिनस्तस्योपमानं नीलोत्पलं, तस्याधारः सरः, ततो यस्य मनःसरसि श्रीपार्श्वो नीलोत्पलीभवति तस्य लक्ष्मीर्न दूरे।

वर्ण्या शुकावली, तस्या उपमानमिन्द्रनीलमणिमाला, ततः शरदि नभोलक्ष्म्या इन्द्रनीलमणिमालेव शुकावली।

रक्तवर्णादर्थोत्पत्तये रक्तपदार्थसङ्ग्रहो यथा—

शोणानि भौमभौमाश्वाः शङ्खतक्षकपन्नगाः ॥ ८४ ॥
पद्मप्रभवासुपूज्यौ जिनेन्द्रौ नवभानुमान् ।
त्रेता त्रेता हरिः क्षत्रवर्णधर्मपितृव्रताः ॥ ८५ ॥
सन्ध्योल्कावह्नयो विद्युताम्रे विद्रुमकुङ्कुमे ।
पद्मरागसुरारक्तचन्दनालक्तकद्रवाः ॥८६॥
दृगन्ताधरजिह्वासृङ्मांससिन्दूरधातवः ।
हिङ्गुलं मधुरत्नानि स्फुलिङ्गा दन्तिबिन्दवः ॥८७॥
नखेन्द्रगोपखद्योताः कुक्कुटस्य शिखा तथा ।
चकोरसारसपारावतकोकिलदृष्टयः ॥८८॥
क्रियाहो, हंसचञ्च्वङ्घ्री शुकमर्कटयोर्मुखम् ।
कुसुम्भकिंशुकाशोकजपाबन्धूकपाटलाः ॥८९॥
पल्लवा दाडिमीपुष्पं बिम्बीकिम्पाकयोः फले ।
गुञ्जा कोकनदं रौद्ररसो रागवदेष्टिकाः ॥९०॥
ताम्बूलरागो मञ्जिष्ठा वज्रक्षतनखक्षते ।
तेजोलेश्या पद्मलेश्या क्रोधः क्रुद्धवपुर्मदः ॥९१॥

म. टी. अथ नीलवर्णपदार्थसङ्ग्रहविशेषमाह—

नीलानीति । तत्र बुधो ग्रहविशेष, कर्कोट सर्पविशेषः, वायुः समीरः, नीलको रत्नविशेषः नीलूओ इति प्रसिद्धिः । शैवालं सेवालं, रविवाजिनः सूर्याश्वाः, इत्यादि स्पष्टम् ।

अथ रक्तपदार्थसङ्ग्रहमाह—

शोणानीति । तत्र भौमो मङ्गलो, भौमाश्चा मङ्गलाश्वाः, शङ्खतक्षकौ सर्पविशेषौ, नवभानुमान् बालसूर्यः, त्रेताहरिः त्रेतायुगकृष्णः, अलक्त एवालक्तको रसः, दृगन्तः लोचनप्रान्तः, असृग् रुधिरं, धातुः गैरिकः, दन्तिबिन्दुः इन्द्रगोपः, कीटकः खद्योतः खजुओ इति प्रसिद्धः । चकोरादीनां लोचनानि क्रियाहः रक्ताश्वः । जपा जासूवृक्ष इति प्रसिद्धिः । बन्धूकः बिफुरीओ वृक्ष इति प्रसिद्धिः । पाटलः पाडलवृक्ष इति प्रसिद्धिः । बिंबी गोल्हीवृक्ष इति प्रसिद्धिः । कोकनदं रक्तोत्पलं, क्रुद्धवपुर्महः क्रोधवच्छरीरतेजः, पक्वफलश्रेणिः इत्यत्रोदाहरणादिकं स्पष्टम् ।

का.क. वश्याकर्षणयोर्ध्यानं सपाकफलमण्डली ।

एतेऽन्येऽपि रक्तपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते । उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते । यथा—वर्ण्याः किंशुकाः, तेषामुपमानं कौसुम्भवासांसि, ततो वसन्तप्रियसमागमे वनस्थल्या निरन्तरस्मेरितकिंशुकश्रेणिमिषेण कौसुम्भवासांसि परिहितानि ।

वर्ण्यो किङ्केलिः, तस्या उपमानमनुरागः, ततो वसन्तानुरक्तया वनलक्ष्म्या किङ्केलिच्छलेन मूर्तोऽनुराग इव प्रकटीचक्रे । अथवा वनश्रियो मुखमण्डनं कुङ्कुमस्तबक इव किङ्केलिः ।

वर्ण्या सन्ध्या, तस्य उपमानं वह्निस्ततः प्राणनाथे रवावस्तंगते दिग्वधूभिरनुराममयाभिः सन्ध्याच्छलेन प्रगुणीकृतो वह्निरिव। अथवा चक्रवाकहृदयेभ्यो विरहाग्निज्वालाकलाप इव सन्ध्याच्छलेन नभोव्यापी बभूव।

वर्ण्या जपा, तस्या उपमानं रत्नानि, ततः शरत्कालेन नवलक्ष्म्या जपाकुसुमच्छलेन रत्नानीव प्रदत्तानि।

वर्ण्यो बालार्कः, तस्योपमानं कुक्कुटशिखा, ततः प्रातःकिरणवृतमूर्तिर्नानावर्णवनपक्षतेरुदयगिरिकुक्कुटस्य शिरःस्थितो रविः शिखाशोभां लभते।

पिङ्गलवर्णादिर्थोत्पत्तये पिङ्गलवर्णपदार्थसङ्ग्रहो यथा—

पीतानि ब्रह्मसूर्येन्दुगरुडेश्वरदृग्जटाः ॥९२॥
पद्मनाभो गुरुर्विष्णोश्चक्रं वीररजोगुणाः।
गिरिजागस्तिरिन्द्राश्वा द्वापरो द्वापराच्युतः ॥९३॥
भयानकरसो वैश्यवर्णधर्मपितृव्रजाः।
ऋषभप्रमुखास्तीर्थकराः षोडशवासराः ॥९४॥
सुराद्रिः काञ्चनं कांस्यं रीतिः किञ्जल्कवल्कले।
परिव्राजकवस्त्राणि हरितालमनःशिले ॥९५॥
हरिद्रा रोचना हीरो गन्धकं दीपचम्पके।
कर्णिकारं सुवर्णाब्जं रम्भाकेतकशालयः ॥९६॥

म.टी. अथ पीतपदार्थसङ्ग्रहविशेषमाह—

पीतानीति। तत्र गुरुः बृहस्पतिः, विष्णोश्चक्रं वस्त्रं च, गिरिजा पार्वती। द्वापरविष्णुः वासरो दिवसः। कांस्य कांसू इति प्रसिद्धम्। रीतिः पित्तल, किञ्जल्कं केसरं, वल्कलं वृक्षछल्लि। तापसवस्त्राणि परिव्राजकवस्त्राणि कर्णिकारो वृक्षः, रथाङ्गः चक्रवाकः, इति सुगमम्।

का.क. हरयो रथाङ्गनामा वानरः सारिकाक्रमौ।

एतेऽन्येऽपि पीतपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते। उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते। यथा—वर्ण्यो रविः, तस्योपमानं कोकः, तस्याधारः सरः, ततो नभःसरोवरे रविश्चक्रवाक इव।

वर्ण्याः कोकाः, तेषामुपमानं परागः, ततः सरसि स्मेरसरसिजपरागस्तबका इव चक्रवाकाः।

वर्ण्यः परागः, तस्योपमानं कुङ्कुमारम्भः, तदाधारो नारीशरीरं, ततः काननलक्ष्म्या वसन्तप्रियागमे परागप्रसरपरिष्वङ्गमिषेण कुङ्कुमलेप इव चक्रे।

वर्ण्यो रविः, तस्योपमानं गरुडः, तस्य क्रिया सर्पवधः, ततस्तिमिरसर्पाणां गरुड इव रविः।

अथ धूसरादिभ्योऽर्थोत्पत्तये धूसरादिपदार्थसङ्ग्रहो यथा—

धूसरा रेणुमण्डूककरभा गृहगोधिका ॥९७॥
गर्दभो मूषको दुर्गाकाककण्ठकपोतकाः।
पुलकोऽहिः शिखिपिच्छाधोभागः करुणो रसः ॥९८॥

दिनपरिवृढपुत्रीगर्भनीलारविन्दप्रसृमरमधुपालीपक्षतिप्रख्यकान्तिः ।
जलशयनशरीरस्फाररोचिः प्रपञ्चच्छुरितसलिलराशिभ्राजमानाङ्गयष्टिः ॥

इति कृष्णः ।

मसृणघुसृणपङ्काभ्यङ्गचञ्चच्चलाक्षीकुचकलशपिधानोद्दामकौसुम्भकान्तिः ।
तरुणतरणिकान्तिव्रातसंसर्गरङ्गत्कमलदलकदम्बप्रायकायप्रभोमिः ॥

अभिनवरविरश्मिद्योतितप्राच्यभूभृत् शिखरलदशोकस्मेरपुष्पोपमानः ।
पतिकृपितमृगाक्षीलोचनप्रान्तरोचिश्छुरितकमलकर्णोत्तंससङ्काशकान्तिः ॥

इति रक्तः ।

मुररिपुपदनिर्यज्जाह्नवीनीरपूरस्नपितगरुडपक्षप्रख्यसंलक्ष्यलक्ष्मीः ।
तरुणकिरणमालिस्फूर्जदंशुप्ररोहस्मितकनकसरोजव्यूहतुल्याङ्गकान्तिः ॥

जलधरनिकुरम्बोद्दामधारानिपातस्नपितकनकशैलस्पर्धिवर्द्धिष्णुकान्तिः ।
तरुणतरमृगाक्षीगण्डरोचिःप्रपञ्चच्छुरितकनककर्णोत्तंससवर्णवर्ण्यः ॥

इति पीतवर्णः ।

सदृशं सदृशेनोपमेयम् । यथा—

अमरनिकरयाञ्चाविस्फुरत्कामधेनुस्तनगलितपयोवद्भारती यस्य रेजे ।
हिमकिरणमयूखव्रातभिन्नेन्दुकान्तप्रसरदमृततुल्या यस्य वाचो विभान्ति ॥

दनुतनुजविपक्षक्षुब्धदुग्धाब्धिगर्भोल्लसदमृतसमाना रेजिरे यस्य वाचः ।
मदनमथनचूडाचन्द्ररोचिष्णुगङ्गालहरिभिरसमाना शोभते यस्य वाणी ॥

कपोतलेश्योर्णनाभः शकुनी कर्बरी तथा ।

वर्ण्या मण्डूकाः, तेषामुपमानं करुणो रसः, तस्याधारो दुःखिनः, ततो वर्षाकाले चलमण्डूकावलिच्छलेन विरहातानां हृदयेभ्य उद्भ्रान्त करुणो रस इव ।

बहुवर्णाः शिखिपिच्छेन्द्रचापश्रीदधिचित्रकाः ॥९९॥

वर्ण्यमिन्द्रधनुः, तस्योपमानं शिखिपिच्छं, तस्याधारो गोपकर्णः, ततः कृष्णमेघस्य गोपालतां प्रपन्नस्य शिखिपिच्छाभरणमिव इन्द्रधनुः ।

उत्कर्षमुपमेयस्य परिकल्पयितुं सुधीः ।
विशेषणैः परिष्कारमुपमानस्य कल्पयेत् ॥१००॥

उपमेयस्य शोभातिशयख्यापनाय कयापि युक्त्या विशेषणैरलङ्कृतमुपमानं कुर्वीत । यथा—

सुरनिकरकराग्रव्यग्रमन्थानशैलक्षुभिततरलदुग्धाम्भोधिकल्लोलकान्तिः ।
हिमकिरणमरीचिव्यूहविभ्राजमानक्षितिधरपतिचूडाजाह्नवी कल्पकान्तिः ॥

तुहिनगिरितनूजानम्रभूतेशचूडागलितगगनगङ्गाधौतबालेन्दुगौरः ।
गिरिशमुकुटचन्द्रज्योतिरुद्योतमानस्फटिकशिखरिचूडास्पर्धमानाङ्गकान्तिः ॥

इति श्वेतवर्णः ।

मुकुटगलितगङ्गानीरकल्लोलमालास्नपितगिरिशकण्ठस्पष्टरुग्देहयष्टिः ।
अभिनवजलवाहव्यूहधाराविशुद्धाञ्जनशिखरिगरीयः शृङ्गचङ्गाङ्गलक्ष्मीः ॥

एवमन्यदपि ।

इति श्रीजिनदत्त० अर्थसिद्धिप्रताने चतुर्थे वर्णस्तबको द्वितीय. ।

म. टी. धूसरा इति-तत्र कुलिकनामा सर्पविशेष. । शिखि पिच्छाधोभागः । शकुनी समलीति प्रसिद्धा । कर्बरी काबरि इति प्रसिद्धा । बहुवर्णा इति-श्रीदो धनदः, चित्रकः चीतरु इति प्रसिद्धः । गोपकर्ण इति-मयूरः, गोपालतां गोपत्वं ।

एवमन्येऽपि शुद्धशुक्लादिवर्णेभ्योऽर्थोत्पत्तिप्रकारा ज्ञेयाः ॥छ॥

इति श्रीतपागच्छाधिनायक पातसाहि श्री अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री५श्री हीरविजयसूरीश्वरशिष्यपण्डित श्रीशुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्देऽर्थसिद्धिप्रतानाकारस्तबको चोत्क द्वितीयप्रसरः ॥छ॥२

॥ ४.३ ॥

अथ आकारार्थोत्पत्तिः

का. क. अथ आकारेभ्यस्तत्रापि प्रथमं चतुरस्राकारादर्थोत्पत्तये चतुरस्राकारपदार्थसङ्ग्रहो यथा—

चतुरस्राणि व्यञ्जनं कुम्भिका च पताकिका ।
चातुरी मञ्चिका सिंहासनं पार्थिवमण्डलम् ॥१०१॥

एतेऽन्येऽपि चतुरस्रपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते । उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते । यथा—वर्ण्यं पार्थिवमण्डलं, तस्योपमानं सिंहासनं, तस्याधेयं राजा, ततः सर्वकार्यकरणक्षमस्य मन्त्राधिराजस्य सिंहासनमिव पार्थिवमण्डलम् ।

प्रलम्बचतुरस्रपदार्थसङ्ग्रहो यथा—

प्रलम्बचतुरस्राणि खट्वा स्थण्डिलतूलिका ।
कपाटपट्टिकापेटापट्टाः फलकपुस्तके ॥१०२॥

इष्टका तिलकं केतुः परः पाणिः प्रसारितः ।
प्रशस्तिपट्टिका शय्या पट्टः शकटमञ्चकाः ॥१०३॥

गवाक्षभारफलकं कटद्वारपटादयः ।

एतेऽन्येऽपि—इत्यादि । वर्ण्यं पुस्तकं, तस्योपमानं मञ्जूषा, सापि रत्नस्थानं, ततो धृतकाव्यरसा मञ्जूषेव पुस्तिका ।

वर्ण्यं तिलकं, तस्योपमानं तूलिका, ततो मदननृपतेर्बालाशरीरसौधोपरि क्रीडार्थं चतुरस्रमुक्तातिलकच्छलेन विशदप्रभाच्छलोत्तरच्छदा तूलिकेव प्रगुणीकृता ।

वर्ण्या तूलिका, तस्या उपमानं चतुरस्रतिलकं, ततो गृहलक्ष्म्याश्चन्दनं तिलकमिव तूलिका ।

वर्ण्यं ललाटफलकं तस्योपमानं प्रशस्तिपट्टिका, ततः कन्दर्पदेवतायतने बालशरीरे कस्तूरिकापत्रवल्लीमिषाक्षरमालिका प्रशस्तिपट्टिकेव ललाटफलकम् ।

वृत्तपदार्थसङ्ग्रहो यथा—

सम्पूर्णगर्भवृत्तानि मुखपद्मेन्दुदर्पणाः ॥१०४॥

कपोलकुण्डले तालसूर्यभाजनगुल्थिकाः ।
झल्लरी कमठः पुण्ड्रं लूना गृहदलस्फुराः ॥१०५॥

म. टी. अथ चतुरस्राद्याकारान् प्रपञ्चयन्नाह—चतुरस्राणीति व्यञ्जनं वातोपकरणं, कुम्भिकास्तम्भाधारपाषाण-कुम्भी, चातुरी चउरीति प्रसिद्धा, पार्थिवमण्डलं चतुर्दिग्राज्यम् । प्रलम्बचतुरस्राणीति स्थंडिल ऋषिशयनस्थानं, तूलिका तलाई इति प्रसिद्धा । पेटा पेटीपट्टः, पाटलकः शय्यापट्टः मेजवट इति प्रसिद्धः । पटो वस्त्रम् । सम्पूर्णगर्भ-वृत्तानीत्यत्र-तालः कांश्य(स्य)तालः, गव्दिका गादीति प्रसिद्धा, कमठः कच्छपः, दलं पत्रं, स्फारा खेटकः, सरावसंपुटः हस्तिकर्णः, कोशिका कोडीउं इति प्रसिद्धा ।

का. क.

छत्रव्यजनचालिन्यो मृदङ्गपुटपूपकाः ।
घरट्टमण्डकौ कन्दुरालवालः सरो मही ॥१०६॥
द्वीपः शरावः कंसालकरिश्रवणकौशिकाः ।
कुलालरथकृष्णानां चक्राणि शाणयन्त्रकः ॥१०७॥
तुला चेलककैवर्तजालावर्तारघट्टकाः ।

एतेऽन्येऽपीत्यादि । वर्ण्यः सूर्यः, तस्योपमानमादर्शः, सोऽपि स्त्रीपार्श्वे भवति, तत पूर्वदिगङ्गनामुखे पद्म-रागपुण्ड्रमिव रविः ।

वर्ण्यश्चन्द्रः, तस्योपमानं छत्रं, तदपि राज्ञो भवति, ततो मदनभूपतेश्छत्रमिव चन्द्रः । अथवा चन्द्रस्योपमानं स्फुरा, सापि सुभटस्य भवति, ततो मदनसुभटस्य स्फुरामण्डलमिव चन्द्रः ।

गम्भीरमध्यवृत्तानि नाभिस्थालीगुहानदाः ॥१०८॥
कुण्डं वाणी श्रुतिः कूपो मुखं गर्भकचोलके ।
घटः कमण्डलुर्ग्रीवा चक्रनाभिरुलूखलः ॥१०९॥
कटाहमणिकौ कुण्डी कम्बुः कुतपपङ्कजे ।
चषकं कुम्भभृङ्गारौ श्रीभाजनाप्यमण्डले ॥११०॥
हारकः सेतिका पल्ली करण्डो धूपवर्तकः ।
कपालकर्परे तुम्बं समुद्गः करको दृतिः ॥१११॥
घण्टा शिरस्कं धत्तूरसुमनोभेरिकाहलाः ।
नालमृणालनलिकाः शरधिर्धमनी घटी ॥११२॥
गर्तापिधानं चङ्गेरी कुम्पिकालोकनालयः ।
तितलेक्षुपेषकृद्यन्त्रं पालकं धूतगर्तिका ॥११३॥

एतेऽन्येऽपीत्यादि । वर्ण्या नाभिः, तस्या उपमानं कूपः, ततः स्तनारघट्टोपरि लुलितरोमालिमालो लावण्य-जलपूर्णः शृङ्गारवनसेचनाय मदनारामिकेण नाभीरूपः कूप इव प्रगुणीकृतः ।

वर्ण्यानि पद्मानि, तेषामुपमानं चषकानि, ततो जलदेवतानां मधुपूर्णानि चषकानीव पद्मानि ।

पिण्डिकाकृतिवृत्तानि गोलस्तबककन्दुकाः ।
कुन्देभकुम्भधम्मिल्लनितम्बस्तनमौलयः ॥११४॥

म. टी. गम्भीरमध्यवृत्तानीत्यत्र--श्रीभाजनं कुंपलु इति प्रसिद्ध, हारकः हारओ इति, मानविशेषभाजनं । सेनिका से इति प्रसिद्धा, पल्ली भिल्लावासः, पालीति मानविशेषभाजनं वा । धूमवर्तकः धूपधाणू इति प्रसिद्धं, कपालं भिक्षुभाजनं, पालकं पालुं इति प्रसिद्धं, दूर्गतिका गबचीति प्रसिद्धा । अथ पिण्डिताकृतिवृत्तानीति पत्र गोलः गोलकः, स्तबको गुच्छः, कन्दः कांदु इति प्रसिद्धः, करोटिः मस्तकास्थिकं कुंदं, वृषभस्कन्ध, घटी घटिका फालंकुशी ।

का. क. दूष्यं वण्टिकमृष्ट्यंसकरोटिककुदण्डकाः ।
राहभ्रूक्षणपिण्डोधः कपिशीर्षघटाः फलम् ॥११५॥
गुल्मं फालं वयःसाररथाङ्गा हंसजाह्नकौ ।
मोदकः कलशस्तुम्बकमण्डलुसमुद्गकाः ॥११६।
नारङ्गचूतकरुणबिल्वजम्बीरदाडिमाः ।
बीजपूरीनालिकेर्यावित्यादिद्रुफलावलिः ॥११७॥

एतेऽन्येऽपीत्यादि । वर्ण्यौ स्तनौ, तयोरुपमानं कुम्भौ, ततः शृङ्गाररसपूर्णौ तटस्थनिष्पन्दलेखाकृतिरोमावलिरम्यौ मुखस्थितचूचुकच्छलेनेन्द्रनीलपिधानौ नार्याः कुम्भाविव कुचौ । नार्याः शृङ्गारवल्लेश्चूचुकच्छलनिलीनभृङ्गौ कुसुमस्तबकाविव कुचौ । रतिप्रीतिभ्यां कामदेवस्य त्रिभुवनराज्याभिषेकाय चूचूकच्छलमुखास्थिताश्वत्थपल्लवौ कनककुम्भाविव कुचौ ।

वर्ण्यश्चन्द्रः, तस्योपमानं हंसः, ततो नभःकासारे ज्योत्स्नाजलसम्भृते लाञ्छनच्छलकलितशैवलल्लरीपल्लवो हंस इव चन्द्रः ।

गर्भप्रकाशवृत्तानि घटीमुकुटकण्ठिकाः ।
ताडपत्रकटकाङ्गदाः कङ्कणमूर्मिका ॥११८॥
हस्तसूत्रं नूपुरदृग्रक्षारक्षार्थकण्डके ।
पुष्पस्रङ्मेखला हारो रुण्डमालाकपर्दकौ ॥११९॥
कट्याः सूत्रगुणौ मौञ्जीजपघर्घरमालिके ।
परिवेषः कुण्डलनाप्राकारपरिखावृतिः ॥१२०॥
कर्णपाशो बाहुपाशो पालिबाह्र्यालिवागुराः ।
घटकण्ठः कृष्टचापं चषालव्योममण्डले ॥१२१॥
दिव्यार्थमण्डलश्रेणीकुण्डलीभूतकुण्डली ।
पर्यस्तिका योगपट्टवल्गोपवीतरश्मयः ॥१२२॥

एतेऽन्येऽपीत्यादि । यथा--वर्ण्यो वप्रः, तस्योपमानं कपर्दः, तस्याधारः शिवः, ततो भुवः शिवमूर्तेः कपिशीर्षमुण्डमालान्वितः कपर्द इव वप्रः ।

वर्ण्यो वप्रः, तस्योपमानं वलयं, तस्याधारो बाहुः, ततो वसुधावध्वा अन्तरोल्लसितनृपसौधबाहुभासितं वलयमिव वप्रः ।

वर्ण्यौ कर्णपाशौ, तयोरुपमानं ज्याकृष्टचापे, ततो मदनयौवनाभ्यां जननयनमनोमृगवेधाय सन्निहितकटाक्षबाणे कर्णद्वयमिषेण धनुषी इव कुण्डलिते ।

सूक्ष्मश्वेतानि वृत्तानि मुक्तामलकतारकाः ।
दाडिमीफलबीजानि दन्तबिन्दुवराटकाः ॥१२३॥
करकाक्षिपयोबिन्दुबुद्बुदस्वेदबिन्दवः ।
प्रसूनं पिटकं पीलुफलं जातीफलं कणाः ॥१२४॥

एतेऽन्येऽपीत्यादि । यथा—वर्ण्याः ताराः, तासामुपमानं मुक्ताः, ता हि समुद्रे शुक्तितः सम्भवन्ति, ततो ज्योत्स्नाम्भःसम्भृतनभोऽम्भोधौ लाञ्छनच्छलस्फुटितमुखचन्द्रशुक्तिकुहरनिःसृताः मुक्ता इव ताराः । अथवा ताराणामुपमानं जलबिन्दवः, ते हि जलाशयादिषु संभवन्ति, ततोऽनवरतभ्रमितश्रान्तस्य रवेः पश्चिमाचलशिखरात् प्रदत्तझम्पावशेन तोयनिधेरुच्छलिता नभसि जलबिन्दव इव ताराः ।

म. टी. अथ गर्भप्रकाशवृत्तानीति-कण्ठिका कांठीति प्रसिद्धाभरणविशेषरूपा, कटको वलयं, अङ्गदानि बाहुरक्षकाः, हस्तसूत्रं हस्तदवरकः, मेखला कटिमेखला, कटिसूत्रं कन्दोरकः, जपमालिका घर्घरमालिका घूघरमालेति प्रसिद्धा, परिवेषः परिधिः, कुण्डलता कुंडालुं इति प्रसिद्धिः । वृतिः वाडि इति प्रसिद्धा, कर्णपाशः कर्णः बाह्यालिः अश्वखेलनभूमिः । वागुरा मृगजालिका, चखा(षा)लः यज्ञस्तंभनुं कडुं इति प्रसिद्धिः । बलगाचओ कडुं इति प्रसिद्धा । उपवीतं यज्ञसूत्रं । सूक्ष्मश्वेतानि वृत्तानीति आमलकः फलं, वराटकाः कपर्दाः, करका घनोपलाः, जातीफलं जायफल नामकं ।

का. क. सूक्ष्मरक्तानि वृत्तानि नखरत्नेभबिन्दवः ।
गुञ्जेन्द्रगोपखद्योताः स्फुलिङ्गक्रुद्धलोचने ।
पूगशोणाश्मबन्धूकबदरीवरयोः फले ॥१२५॥

एतेऽन्येऽपीत्यादि । यथा—वर्ण्या मणयः, तेषामुपमानं रत्नानि, ततो जलधरैर्जलधौ स्फुलिङ्गा इव मणयः ।

वर्ण्या इन्द्रगोपाः, तेषामुपमानं रत्नानि, ततो जलधरैर्जलधेः पीतमरत्नजलैर्जलैः समं वृष्टैः रत्नैरिव इन्द्रगोपैर्भूर्व्याप्ता ।

वर्ण्या खद्योतास्तेषामुपमानं वह्निस्फुलिंगाः ततो घनघटासङ्घट्टशतखण्डितविद्युदग्नेः खण्डलवा इव खद्योताः ।

वर्ण्यानि बन्धुजीवानि, तेषामुपमानं शोणरत्नानि, ततो वनलक्ष्म्याः शरत्कालेन क्लृप्तानि माणिक्याभरणानीव बन्धुजीवकुसुमानि ।

सूक्ष्मश्यामानि वृत्तानि जम्बूभृङ्गकनीनिकाः ।
चूचुकः साञ्जनाश्रेन्द्रनीलौ गुञ्जातसोमुमे ॥१२६॥

एतेऽन्येऽपीत्यादि । यथा-वर्ण्यानि जम्बूफलानि, तेषामुपमानं साञ्जनाश्रुबिन्दवः, ते दुःखात् स्त्रियो भवन्ति, ततः परवल्लीः स्पृशन्तं मारुतकामुकं दृष्ट्वा जम्बूफलतया साञ्जनाश्रूणीव मुक्तानि जम्बूफलानि ।

वर्ण्या भ्रमरी, तस्या उपमानं कनीनिका, सा हि नेत्रे भवति, ततो वसन्तकामुकं पश्यन्त्या माधवीलतया विस्मेरकुसुमनेत्रान्तर्भ्रमरी कनीनिकेव निश्चला ।

वर्ण्यौ चूचुकौ, तयोरुपमानं भृङ्गौ, तावपि कमलाश्रयी भवतः, ततो रतिप्रीतिक्रीडाकमलयोः कुचयोः कृतिस्पदौ भृङ्गाविव चूचूकौ ।

त्रिकोणान्यथ दम्भोलिः शृङ्गाटकदृशौ हलम् ।
स्कन्धपक्षराद्यश्रृङ्गाटौ कामाक्षीवह्निमण्डले ॥१२७॥

करपत्रं निषङ्गाङ्घ्रितलश्रोणिस्थपाणयः ।
क्षुरप्रशृङ्गगोक्षुररोहिणीशकटानि च ॥१२८॥

एतेऽन्येऽपीत्यादि । यथा-वर्ण्यं त्रिकोणतिलकं, तस्योपमानं रोहिणी, ततो नायिकामुखे त्रिकोणमुक्तातिलकच्छलान्निजपतिभ्रमेण रोहिणीव समागता । अथवा स्मरभटेन शिवपराभवादनादृतपुष्पबाणेन बालाया भ्रूधनुः सज्जीकृत्य त्रिकोणतिलकच्छलेन क्षुरप्रायुधमिव प्रगुणीकृतम् । अथवा निरन्तरजनमनोवेधकारिशरपरम्पराक्षेपश्रमार्तेरपनयनायान्तरान्तरा नीरपानमिव कर्तुं नायिकात्रिकोणमुक्तातिलकच्छलात् मदनेन कान्तिजलापूर्णं करपत्र मिव सीमन्तदण्डे लम्बितम् ।

दीर्घाणि वेणीसीमन्तनासिकाबाहवोऽङ्गुलिः ।
रोमाली पृष्ठवंशोरुजङ्घान्त्वनलिकाः शिराः ॥१२९॥
मौर्वी धनुः शरप्रासकृपाणलकुटार्गलाः ।
आषाढमुशलाग्निर्यष्टिमन्थानकध्वजाः ॥१३०॥
वंशयूपतुलापट्टतालद्रुस्तम्भमेढयः ।
स्तूपकूपयशस्तम्भेन्द्रध्वजार्हत्पुरोध्वजाः ॥१३१॥
स्वर्दण्डच्छत्रदण्डोर्मिनिर्मोकाध्वाहिनिम्नगाः ।
मृणालहारशेषस्रग्जटावल्लीद्रुमेक्षवः ॥१३२॥
कुशी प्राजनकं बाहुर्युगदेव कशा झषः ।
हस्तिहस्तरदौ पुच्छं नाडीशृङ्खलकीलिकाः ॥१३३॥
दामशैलूकशूलानि करभो नकुलस्तथा ।
जलूकैर्वाहि कूष्माण्डमृदङ्गा वायुमण्डलम् ॥१३४॥
वर्तनं लेखनी काष्ठकरणं नखभेदनी ।
केतकीदलमञ्जर्यौ नाराचार्केन्दुरश्मयः ॥१३५॥

एतेऽन्येऽपीत्यादि । वर्ण्या वेणी, तस्या उपमानं सर्पः, सोऽपि सुधाकुण्डे भवति, ततस्त्रिनेत्रानलदग्धकुसुमायुधसंजीवनवाक्सुधाकुण्डस्य वदनस्य रक्षाभुजङ्ग इव वेणीदण्डः । अथवा यौवनस्वयज्वना युवतीहृदयकुण्डे सदा दीपितस्य मदनानलस्य निर्गता धूमोर्मिरिव णीवल्लरी ।

वर्ण्या रोमाली, तस्या उपमानं मृणालं, ततः शिवसमरदग्धधनुषः स्मरस्य कृते यौवनेन बालरोमावलीच्छलात् सज्जीकृतो मृणाल धनुर्दण्डः ।

वर्ण्या कृपाणलेखा, तस्या उपमानं यमुना, ततस्त्वदभिहतरणसंमुखनृपतिनिकरै निरन्तरं विध्यमानो मम पिता रविर्विधुरत्वं गतः, ततः कियन्तमपि कालं विलम्बस्वेति विज्ञापनायैव कृपाणच्छलात् यमुना नृपहस्तं गता ।

म. टी. सूक्ष्मरक्तानि वृत्तानीति-पूगः क्रमुकः, शोणाश्म पद्मरागरत्नं, बन्धूकः बन्धुजीवकः, सूक्ष्मश्यामानि वृत्तानीति — अञ्जनसहिताश्रु अतसीपुष्पं । त्रिकोणान्यथेति दम्भोलिर्वज्रं, ईशानदृग् ईश्वरलोचनं । सन्ध्यक्षराणामाद्यवर्ण एकारः । शृङ्गाटः त्रिवटुं इति प्रसिद्धः । कामाख्या देवी, निषङ्गः तूणीरः, अंह्रितलं पादतलं, क्षुरप्रः त्रिकोणबाणः, गोक्षुरः गोरवरुकः, रोहिणीनक्षत्रं शकटाकृतिः । दीर्घाणीति — सीमन्तः

सइंथु इति प्रसिद्धिः । नासिकानक्रं बाहुर्भुजा शिरास्नसोमौर्वा जीवाप्रासः कुन्तः लकुटो दण्डः । अर्गला भोगल इति प्रसिद्धिः, आषाढः तापसदण्डः, मुशलं प्रसिद्धं, अरित्रं आउलु इति प्रसिद्धं, मन्थानकः प्रसिद्धः, यूपः यज्ञस्तम्भः, तुला त्राजूआं इति प्रसिद्धिः, पट्टः पट्टकः, स्तूपः स्वर्दण्डः स्वर्गदण्डकः, निर्मोकः सर्पकञ्चुकः, अध्वा मार्गः, मृणालं कमलनालं, शेषः शेषनागः, स्रग् माला, इक्षुः कुशीकोसि इति प्रसिद्धा । प्राजनं पराणु इति प्रसिद्धिः, धूर्धुरा इति प्रसिद्धिः, युगं प्रसिद्धं, वेत्रं प्रतीहारदण्डः, कशा ताजणु इति प्रसिद्धा । कूष्माण्डः कोहलुं इति प्रसिद्धः । वायुर्मण्डलं प्रसिद्धं ।

वर्त्तनं वतरणुं इति प्रसिद्धं, खेलनी सोगठीति प्रसिद्धा, नखभेदिनी नहरणीति प्रसिद्धा, झषः मत्स्यः, शल्यकः शाहजीवः, पर्वारुः त्रुंसडी इति प्रसिद्धिः । अर्करश्मिः इन्दुरश्मिः, नाराचः सर्वलोहमयबाणः ।

का.क. वक्त्राण्यलकभालभ्रूनखाङ्काङ्घ्रिलालाटिकाः ।
कटाक्षेन्द्रधनुर्विद्युदर्धचन्द्रहलाङ्कुशाः ॥१३६॥
कुञ्चीमित्राङ्गुलीतलपदात्रकन्दुकददण्डका ।
तडागपालिकुद्दालतारणानि सुखासनम् ॥१३७॥
गोपानसी रथी वंशाः शाकच्छेदकखेटके ।
चन्दनमालबालेन्दुकिंशुकेभाङ्गुलीरदाः ॥१३८॥
श्वपुच्छाश्वमुखे शृङ्गचञ्चुवृश्चिककण्टकाः ।
करिदंष्ट्रा मयुग्रीवा सिंहकुक्कुटयोर्नखाः ॥१३९॥
केसरश्चन्द्रको भग्नकङ्कणं फणभृत्फणाः ।
पुरोधः करकौपीने केकिकुक्कुटमञ्जरी ॥१४०॥

एतेऽन्येऽपीत्यादि । यथा—वर्ण्यो बालेन्दुः, तस्योपमानं दात्रं, दात्रेण लवनक्रिया क्रियते, ततो मानिनीमनोभूमिप्ररूढमूलमानलता वितानलवनाय मनोभुवा प्रगुणीकृतं लवित्रमिव बालशशी ।

वर्ण्याः किंशुकाः, तेषामुपमानं कर्तर्यः, ता हि व्याधस्य भवन्ति, ततो मदनव्याधस्य प्रतिकाङ्क्षिनीजनमनोमृगवधादिव रुधिरार्द्राः कर्तर्य इव किंशुकाः ।

वर्ण्या नखाङ्काः, तेषामुपमानं किंशुकानि, ततः कुसुमास्त्रस्य कामिनीवक्षस्यर्धचन्द्रबाणाकृतिकिंशुककुसुमश्रेणीव पतितानि नखक्षतानि ।

वर्ण्यौ भ्रुवौ, तयोरुपमानं मित्राङ्गुल्यौ, ततो बालायाः कामयौवनाभ्यां परस्परमैत्र्याय वक्रीकृते मित्राङ्गुल्याविव भ्रुवौ ।

उच्चभद्रासनं वप्रप्रसादाट्टालकालया ।
सतां मनोरथा हस्तौ हस्तिशाशाशिलोच्चयाः ॥१४१॥

एतेऽन्येऽपीत्यादि । यथा—वर्ण्यः प्रासादः, तस्योपमानं हिमाद्रिः, ततः प्रासादे हिमाद्रौ गङ्गेव पताका ।

वर्ण्यं भद्रासनं तस्योपमानमुदयाद्रिः ततो भद्रासनोदयाद्रौ राजा रविरिव ।

इति श्रीजिनदत्त ० अर्थसिद्धिप्रताने चतुर्थे आकारस्तबकस्तृतीयः ।।

म. टी. वर्णीति-ललाटिका आडि इति प्रसिद्धा । कुञ्जी तालोद्घाटनयन्त्र, मित्राङ्गुलीसहितां लेत्रानी आंगुली इति प्रसिद्धिः । दातरकं दातरडुं इति प्रसिद्धः । कन्दुकदण्डकः गेडीति प्रसिद्धिः । सुखासनं आसनविशेषः, गोपानसी वलभी-च्छादनवक्रकाष्ठं, रथीवंशः वाहिणिना वांस इति प्रसिद्धिः । शाकच्छेदकं चूल्हेत्रुं इति प्रसिद्धिः, खेटद्धं, करिदंष्ट्रा शूकरदंष्ट्रा । मयग्रीवा उष्ट्रग्रीया, केसरः सिंहग्रीवा, केशः चन्द्रकः चांदला इति प्रसिद्धः । उच्चा इति अठालकः[1] प्रसिद्धः, शिलोच्चयः पर्वतः, इत्यादि शेषमुत्तानार्थम् ।।छ।।

इति श्रीतपागच्छाधिनायक पातसाहि श्री अकब्बरप्रतिबोधदायक श्री शत्रु--जयादि तीर्थकरमुक्तिकारक भट्टारक श्री ४ श्री हीरविजयसूरीश्वरशिष्य पं. श्री शुभविजयगणिविरचिते काव्यकल्पलता वृत्तिमकरन्दे/र्थसिद्धि प्रतानप्राप्ता-कारस्तबको श्रोतकस्तृतीयप्रसरः ।।छ।। ३

---

१. अट्टालकः— पा. म.

:: ४.४ ॥

अथ क्रियाभ्योऽर्थोत्पत्तिः

का. क. कथ्यते। यथा—

इष्टप्राप्त्यै रिपूच्छित्त्यै स्पर्धया पूर्वजक्रमात् ।
वर्ण्यवस्तुक्रियाभावैः क्वापि श्लेषकृतस्मितैः ॥१४२॥

तावद्वर्ण्यवस्तुनोऽवश्यमेव क्वापि, चलनावस्थानजल्पनादिका क्रिया भवति, ततस्तस्याः क्रियाया इष्टप्राप्तिः, **रिपूच्छित्तिः**, स्पर्धा, पूर्वजक्रमः—एतानि चत्वारि कारणानि क्वापि श्लेषकृतप्रकाशानि यथौचित्यं योजनीयानि।

इष्टप्राप्तिर्यथा—वर्ण्यो वप्रः, तस्योच्चैर्वर्धनं क्रिया, तस्याः कारणं नभोगङ्गास्नानेन पापापनयनमिष्टं तत्प्राप्तिः **ततः परमातङ्गस्पर्शोद्भवं** मालिन्यमपनेतुमिव वप्रो नभोगंगायां स्नानार्थमुच्चैस्तरां वर्धते स्म।

वर्ण्यं कमलं, तस्य जलवासादितपःक्रिया, तस्याः कारणं कामिनीमुखौपम्येष्टप्राप्तिः, ततः कमलं १ कामिनी **मुखौपम्येष्टप्राप्त्यै** जलान्तराकण्ठमग्नं तपः कुरुते।

वर्ण्यश्चन्द्रः, तस्य शिवशिरःसुरसरित्तीरे निवासः क्रिया, तस्याः कारणं कामिनीमुखौपम्येष्टप्राप्तिः, ततः **सुमुखीमुखौपम्यप्राप्त्यै** स्थाणोः शिरसि स्थायी सुरसरित्तीरे तपस्वी तपःक्षामो निवसति चन्द्रः।

वर्ण्यं यशः, तस्य स्वर्गगमनं क्रिया, तस्याः कारणं निजमित्रैरावतादिमिलनेष्टप्राप्तिः, ततो निजमित्रैरावतोच्चैः-**श्रवोब्रह्महंसशिवशिरोगङ्गाविष्णुपाञ्चजन्यादीनां** मिलनायेव नृपयशः स्वर्गं जगाम।

रिपूच्छित्ति **यथा**—वर्ण्यो वप्रः, तस्य नभोगमनं क्रिया, तस्याः कारणं स्वर्गिस्पर्धिमेरुनगाश्रितरविरिपूच्छित्तिः, ततः स्वःस्पर्धिमेरोराश्रयणशीलं रविमिव भूमौ पातयितुं वप्रो नभोगमनं करोति।

वर्ण्या हंसाः, तेषां सरःश्रयणं क्रिया, ततो निजगतिस्पर्धिनारीवदनमित्राणि कमलानीव छेत्तुं सरः श्रयन्ति हंसाः।

वर्ण्यो रविः, तस्योदयः क्रिया, ततो निजसारथिभ्रातृगरुडरिपुसर्पसोदराणीव तमांसि छेत्तुं रविरुदयं करोति।

अथ स्पर्धा—

वर्ण्यो वप्रः, तस्य नभोगमनं क्रिया, तस्याः कारणं स्पर्धा, ततो विन्ध्यगिरिस्पर्धया तरणिसरणिरोधं कर्तुमना इव **वप्रो** नभो व्याप्नोति।

वर्ण्यं यशः, तस्य दिग्व्यापनं क्रिया, तस्याः कारणं स्पर्धा, ततो निजप्रभास्पर्धि सुधादीधितिस्पर्धयेव नृपयशो **दिक्चक्रमाक्रामति**।

अथ पूर्वजक्रमः—

वर्ण्यो वप्रः, तस्य पूर्वजो गिरिः, ततो निजपूर्वजगिरिक्रमेणेव वप्रोऽपि नभो रुरोध।

वर्ण्या नारीमुखपत्रवल्ली कस्तूरिका, तस्याः पूर्वजो मृगः, ततोऽस्मत्पूर्वजो मृगः चन्द्रं श्रित इति पूर्वजक्रमान्मृगनाभिरपि चन्द्रसोदरं सुमुखीमुखं श्रिता । छ।

एवं सर्ववस्तुषु क्रियामारोप्येष्टप्राप्त्यादिकारणानि योजनीयानि ।

क्रियाभ्योऽर्थोत्पत्तये प्रकारान्तरमाह––

वर्ण्येपह्नुतिवाचकशब्दैरारोपितेषु तुल्येषु
रचितोचितक्रियाणामिष्टप्राप्त्यादिकारणं कल्प्यम् ।।१४३।।

वर्ण्यवस्तुष्वपह्नुतिवाचकैः शब्दैः रूपकोत्प्रेक्षाभ्यां वर्ण्याकारक्रियादिभिः सदृशानि वरवस्तूनि यथौचित्यं क्रियाः कल्पयेत् । ततः प्रकल्पितक्रियायामिष्टप्राप्त्यादीनि कारणानि योजयेत् । यथा––वर्ण्या नारीनखाः, तेषु तुल्यत्वादारोपितास्ताराः, तासां पादलगनं क्रिया, तस्याः कारणं नारीप्रसादनेष्टप्राप्तिः, ततः 'तव मुखस्पर्धापातकेनास्मत्पतिः कलङ्कितः क्षयी नाद्यप्रभृति स्पर्धते' इति नार्याः प्रसादनं कर्तुमिव नखछलार्थैराकृत्यर्थदेहार्थं मुख्यैः शब्दैः वर्णाकारक्रियादिभिः सदृशानि वस्तूनि यथौचित्यमारोपयेत् । ततः कल्पितक्रियाणामिष्टप्राप्त्यादीनि कारणानि योजयेत् । मिषेण चन्द्रदारास्ताराः पादयोर्लग्नाः ।

वर्ण्यश्चन्द्रः, तत्र तत्तुल्यत्वादारोपितं यशः, तस्य त्रिभवने, भ्रमणं क्रिया, तस्याः स्वसंताननिरीक्षणं कारणं, 'ततो मत्समानः कोऽप्यस्ति न वेति' निरीक्षितुमिव पीयूषद्युतिच्छलेन नृपयशो भुवनत्रयं भ्रमति ।

वर्ण्या वेणी, तस्यां तुल्यत्वादारोपितः सर्पः, तस्य नार्या अनुसरणं क्रिया, ततस्तद्वचनस्य सुधया सह मैत्रीमिव कारयितुं सुधाध्यक्षः, सर्पो वेणीमिषेण नार्या अनुचरत्वं करोति । अथवा तस्याः कटाक्षवक्रत्वमिव शिक्षयितुं वेणीमिषेण सर्पो नार्या अनुचरत्वं गतः ।

वर्ण्या दशनद्युतिस्तस्यामारोपिता सुधा, तस्या रामाश्रयणं क्रिया, ततो वचनमाधुर्यमिव शिक्षितुं दशनद्युतिमिषेण सुधा रामाश्रयणं करोति ।

वर्ण्य ऐरावणः, तत्रारोपितं यशः तस्य स्वर्गङ्गाश्रयणं क्रिया, तस्या रिपूच्छित्तिः कारणं, ततः स्वःस्पर्धिनीं स्वर्गङ्गामिव गाहितुमैरावणच्छलेन नृपयशः स्वर्गगां गतम् ।

वर्ण्यौ कुचौ, तयोरारोपितौ चक्रौ, तयोः कान्ताश्रयणं क्रिया, तस्याः कारणं रिपूच्छित्तिः ततो, निजवैरिणश्चन्द्रस्य तन्मुखपार्श्वात् पराभवं कारयितुं कुचच्छलेन चक्रौ नारीमाश्रितौ । 1

अथ स्पर्धा––

वर्ण्या हारमुक्ताः, तास्वारोपितास्ताराः, तासां नारीसमाश्रयणं क्रिया, तस्याः कारणं स्पर्धा, ततः 'अस्मत्सहोदयेन तमसा वेणीमिषादियमाश्रिता' इति स्पर्धयेव हारमुक्ताच्छलेन ताराभिः स्त्री समाश्रिता ।

वर्ण्या शिवशिरःसरित्, तस्यामारोपिता कीर्तिः, तस्याः शिवाश्रयणं क्रिया, तस्याः कारणं स्पर्धा, ततः 'कण्ठरुचिच्छलेन भवद्रिपुकीर्तिः शिवमाश्रिता, इति स्पर्धयेव तव कीर्तिरपि शिरोगङ्गाच्छलेन शिवं श्रिता ।

---

1. नारीं समाश्रितौ--ला 1, ला 2,

अथ पूर्वजक्रमो यथा—

वर्ण्यो वैरिस्त्रीविरहानलः, तत्रारोपितो नृपप्रतापः, तस्य वैरिस्त्रीहृदयप्रवेशः क्रिया, तस्याः कारणं पूर्वजक्रमः, ततोऽ'स्मत्पूर्वजः कृपाणो वैरिहृदयेषु प्रविष्ट' इति कृपाणोद्भवो नृपप्रतापोऽपि विरहानलच्छलेन वैरिस्त्रीहृदयेषु प्रविष्टः।

वर्ण्या वैरिस्त्रीस्तनपाण्डिमा, तत्रारोपितं नृपयशः, तस्य वैरिस्त्रीकुचाश्रयणं क्रिया, तस्याः कारणं पूर्वजक्रमः, ततो 'मत्पूर्वजः कृपाणो रिपुकुम्भिकुम्भेषु विललास' इति कृपाणोद्भवं नृपयशोऽपि रिपुकुम्भकुम्भिसोदरेषु वैरिस्त्री-कुचेषु पाण्डिमच्छलेन विललास।

आरोप्य वर्ण्यवस्तूनां क्रियासु सदृशीः क्रियाः।
तासां रोपितक्रियाणां कल्प्यमुत्पत्तिकारणम् ॥१४४॥

वर्ण्यवस्तूनां क्रियासु कम्पनादिषु नर्तनादिकाः, भ्रमरकूजनादिषु जपनस्तवनाक्रन्दनाशीर्वचनादिकाः क्रिया आरोपयेत्। ततस्तासामारोपितक्रियाणां नर्तनादीनां हर्षादीनि, जपनादीनां श्रेयःप्राप्त्यादीनि कारणानि कल्पनीयानि।

इति श्रीजिनदत्त अर्थसिद्धिप्रताने चतुर्थे क्रियास्तबकश्चतुर्थः।

म. टी. अथ क्रियाभ्योऽर्थोत्पत्तिः इष्टप्राप्त्यै इत्यादि सकलक्रियास्तबकः सुगमोऽस्तीति न व्याख्यातः।

इति श्री तपागच्छाधिनायक. . .चतुर्थः प्रसरः।

॥ ४.५ ॥

अथाधारपरिवारादिभ्योऽर्थोत्पत्तिर्यथाः

का. क. वनगिरिजलभास्वद्वातशीताग्निलोहप्रहरणपरघट्टाभ्येतजन्तूपकारैः ।
सरिदधिगममौनध्याननैश्चल्यमन्त्रानशनसलिलभोगायाचितक्षान्तितप्तैः ॥१४५॥

वर्ण्यवस्तुना निर्जितस्य सदृशस्य वस्तुनो वचनादिभिरमीभिर्भावैः समर्थनीयोऽर्थः ।

यथा—स्त्रीनेत्रजिता मृगा वनं गताः । मध्यजितः सिंहो गिरिगह्वरं प्रविष्टः । मुखजितं कमलं जलदुर्गमगात् । स्थैर्यजिता गिरयो भास्वत्तापवातशीताग्निमुख्यदुःखानि सहन्ते । वक्षोजितः प्रतोलीकपाटो लोहकीलैः कीलितः । मुखजितं कमलं भ्रमरप्रहरणानि सहते, भ्रमरसंघट्टं तितिक्षते । अभ्येत्य हंसादीनां शरीरखण्डैरप्युपकारं कुर्वते । गतिजिता हंसाः शरदधिगमं कुर्वते । दम्भजितो बकः सरित्तटे मौनी ध्यानं कुरुते । तुङ्गत्वजितो मेरुर्लोकादृश्ये स्थाने निश्चलीबभूव । मुखजितं कमलं भ्रमररावैर्मन्त्रान् जपति । नखजितानि रत्नानि गिरौ निराहाराणि तस्थुः । अधरजितानि प्रवालानि जलमध्ये जलाहारतया वर्तन्ते । अङ्गसौकुमार्यजितं शिरीषकुसुमं वनेऽयाचितव्रतं कुरुते । मुखजितं कमलं भ्रमराङ्घ्रिघातैरपक्षतां कुरुते । उदाहरणानि—वर्ण्येन जितपदार्थस्येत्यादिभिरुपायैरर्थः समर्थनीयः ।

लज्जाकोपतपोनाशसेवाक्रन्दास्यकृष्णताः' । रोगात्पाण्डुरता शस्त्री विषकम्पादयो जिते ॥१४६॥

वर्ण्यजितस्य वस्तुनः पराजयपराभवोद्भवा एते लज्जादयो भावा यथौचित्यं योजनीयाः ।

यथा—मुखजितं कमलं लज्जयेव वनं गतम् । कोपतप्तमिव जलाश्रयं ययौ । नद्यामाकण्ठमग्नं जलाहारतया तपस्तनुते । अथवा जलदुर्गे नष्टं शम्भोरम्भोमूर्तेर्वा सेवां करोति । भ्रमररवैराक्रन्दं कुरुते । लीनालिभिः श्याममुखमासीत् । मुखेन समत्वप्रीत्या संभावितं कोकनदमनुरक्तत्वं धत्ते । नेत्रजितं कैरवं दुःखात् पाण्डुरतां गतम् । भृङ्गश्रेणीमिषादुदरे शस्त्रीं क्षिपति । जलान्तर्झम्पां ददौ । भृङ्गमिषाद्वा विषं भक्षयति । एवं यो रक्तपदार्थः सः पदार्थेन जितः कोपादिवारक्तोऽथवा कयाचिद्युक्त्या सानुरागो भणनीयः । यः श्वेतः श्यामश्च स सदृशजितो दुःखादिवोत्पाण्डुरः कृष्णश्च समर्थनीयः ।

वृक्षाङ्गादिजवस्तूनां वनाद्यैः सत्पदादिकम् ।

किञ्चिद्वस्तु वृक्षाङ्गादिमयं, किञ्चिन्मृन्मयं, किञ्चिद्धातुमयं, किञ्चित्पाषाणमयं, किञ्चिच्चर्ममयं, किञ्चित्काष्ठमयमित्यादिवस्तूनां वनवासादितपोभिः शुभस्थानाश्रयशुभाकारशुभवर्णशुभक्रियाशुभपरिवारादीनां प्राप्तिः सम्भाव्या ।

यद् वृक्षाङ्गादिमयं वस्तु तस्यैते भावा विभाव्याः । यत्पूर्वं वृक्षभवे रवितापशीतवातादिकष्टमयाचितव्रतादिभिस्तपस्तप्तं, यन्मूलत्वक्पत्रपुष्पफलच्छायादिभिः सूर्यतापतप्तानां रोगार्तानां भोगार्थिनां मङ्गलार्थिनां मर्त्यानां भृङ्गाणां पक्षिणां चतुष्पदानामुपकृतं तेन सुकृतेन वृक्षाङ्गमयवस्तुनः शुभस्थानादिप्राप्तिः ।

मृन्मये वस्तुन्येते भावाः समर्थनीयाः । यत्पूर्वं कुद्दालपातपदप्रहारयन्त्रबन्धप्रवेशचक्रारोहणभ्रमणपिण्डिकाकाष्ठहस्तकरघातरविकिरणशोषवह्निप्रवेशपरीक्षार्थं शिरःप्रहारादिभिः कष्टमनुभूतं, यत् जनबुभुक्षातृष्णाहरान्नजलाधारतया जनाधारगेहादिहेतुतया लोकोपकारः कृतस्तैः सुकृतैर्मृन्मयवस्तुनो भव्याधारादिकमारोप्यम् ।

धातुमये वस्तुन्येते भावा भावनीयाः । यत्पूर्वं वह्निप्रवेशहस्तपुरघातसन्दंशग्रहणयन्त्रान्तराकर्षणताडनच्छेदनघनप्रहारटङ्किकाघातादि कष्टमनुभूतं, यद्देवतामण्डनतया कान्ताभूषणतया लोकाप्यायकभोजनाद्याधारतया देवदेव्यादियन्त्राद्याकारतया लोकोपकारः कृतस्तैः सुकृतैर्धातुमयवस्तुनः शुभस्थानादिकं सम्भाव्यम् ।

पाषाणमये वस्तुन्येते भावा भाव्याः । यत्पूर्वं टङ्कविदारणघनप्रहारटङ्किकाघातादि कष्टमनुभूतं, यद्धर्मस्थानदेवतादिहेतुतया परोपकारः कृतः, तैः सुकृतैः पाषाणमयवस्तुनः शुभस्थानादिकं सम्भाव्यम् ।

चर्ममयवस्तुन्येते भावाः आरोप्याः । यत्पूर्वं कृत्तिकादिच्छेदनक्षारक्षेपविक्रयचर्मकरपदाघातकम्पिकाच्छेदसूचिकावेधवरकबन्धव्यङ्गप्रहारादिकष्टमनुभूतं, यत्पादत्राणतयोत्तमानां ब्राह्मणाद्युपयोगिकरपत्रादिकतया, पुस्तकाद्यावरणतया, इत्यादिभिः कारणैः परोपकारः कृतः तैः सुकृतैश्चर्ममयवस्तुनः शुभस्थानाद्यूह्यम् ।

कार्पाससूत्रमये वस्तुन्येते भावा भाव्याः । यत्पूर्वं शीतत्रातावग्राचितास्वुपानकर्मकरनखच्छेदविक्रयापवरकान्तरक्षेपलोहोपलकर्षणस्तुलारोहणान्तः सारांकर्षणपिञ्जनघातविदारणयन्त्रारोहतर्कुभ्रम्याकर्षणतन्तुवायकराकर्षणकाष्ठप्रहारविपणिविक्रयादिकष्टमनुभूतं तूलेन, तूलिकादिरूपतया वस्त्रेण, परगुह्याच्छादनदेवतायादिपरिधानादितया लोकशीततापादित्राणादितया परोपकारः कृतः, तैः सुकृतैः कार्पासमयवस्तुनः शुभस्थानादि सम्भाव्यम् ।

एवं सर्ववस्तूनां पूर्वकृतं कष्टं सुकृतं चाऽऽरोप्य भव्यस्थानाश्रयणादिभिरर्थः समर्थनीयः ।

जितस्य सेवा स्वगता छद्मगा प्रतिबिम्बगा ।।१४७।।

जितस्य द्वौ प्रकारौ भवतः—विदेशगमनं, जेतुः सेवाकरणं वा । विदेशगमनं वनादिषु प्रपञ्चितम् ।

सेवा तु त्रिविधा—

स्वगता यथा—भारत्या गतिजितो हंसः पदसेवां चकार। पार्वत्या मध्यजितः सिंहः सेवां कुरुते। छद्मगा यथा—कामिन्या कटाक्षवक्रगतिजितः सर्पो वेणीमिषादनुचरीभूतः । मुखजितश्चन्द्रश्चन्दनवृत्ततिलकच्छद्मना सेवते । प्रतिबिम्बगता यथा—मुखजितश्चन्द्रः कपोलप्रतिबिम्बतयानुप्रवेशं चक्रे । जलमाधुर्यैर्जितश्चन्द्रः प्रतिबिम्बतया सरः सेवते स्म । इत्याद्यूह्यम् ।

सेवासुकृततः श्रेयोऽन्तरप्राप्तिर्द्विषज्जयः ।

यथा—यत् गतिजितो हंसो भारतीपदसेवां चक्रे तेन सुकृतेन तज्जातिरपि मधुरशब्दाऽऽसीत् । मध्यजितः सिंहो यत्पार्वतीपदसेवां चक्रे तेन सुकृतेन स्वजातिराज्यमन्यैरनाक्रमणीयत्वं लेभे । जितया कमलश्रिया कामिनीमुखाश्रयणेन निजरिपुश्चन्द्रोऽपि जीयते स्म । मुखजितचन्द्रेण स्फटिकादर्शच्छद्मना कामिनीमाश्रित्य स्वोदयेऽपि सदा विकासि सश्रीकं करस्थच्छद्मकमलमधःक्रियते, मुकुलीक्रियते च ।

वर्ण्यवस्तुनः स्पर्धापापेन सदृशं वस्तु सदूषणं कल्प्यम् । यथा—मुखस्पर्धि कमलं स्पर्धोद्भवपापैः राजप्रसादविकलं सकण्टकं च जातम् । यशःस्पर्धी चन्द्रः सकलङ्कः क्षयी च जातः ।

सुकृतेऽपि सदोषता । वस्तुनः स्पर्धापातकेन सदृशं वस्तु सुकृतं कुर्वाणमपि सदूषणं स्यात् । यथा—मुखस्पर्धां कुर्वन् चन्द्रो महेश्वरं सेवमानोऽपि सकलङ्कोऽभूत् । मुखस्पर्धोद्भवैः पापैः कमलं हंसद्विजान् शरीरखण्डैरपि प्रीतान् कुर्वाणं सकण्टकं जातम् ।

अथ तपसाऽर्थोत्पत्तिभेदाः—

स्यात्तपः स्वगतं छद्मगतं च प्रतिबिम्बगम् ॥१४८॥

तपोविधिस्त्रिधा—आत्मनैव स्वयं कृतं, सदृशवस्तुच्छद्मना वा कृतं, जलादिषु प्रतिबिम्बतया वा कृतम्। त्रिविधमप्यग्रे उदाहरिष्यते।

वनादिभिस्तपो वर्ण्यजितस्यैतत्कलाप्तये ।

वर्ण्यजितस्य वस्तुनो वर्ण्यशोभाप्राप्तये वर्ण्यजयाय वा वनादिभिस्तपः कल्पनीयम् । स्वगतं यथा—मुखजितं कमलं मुखशोभाप्राप्तये जलवासादितपः कुरुते ।

छद्मगतं यथा—मुखशोभाप्राप्तये चन्द्रो वने लताशाखावलम्बी कुसुमस्तबकच्छलेन तपस्तनुते ।

प्रतिबिम्बगतं यथा—मुखलक्ष्मीलब्धये चन्द्रो रत्नभूमिप्रतिबिम्बतया शैलशिरसि तपस्तनुते ।

एवं सर्वभेदेषु त्रिविधत्वं बोध्यम् ।

तपसा सत्पदावाप्तिः

जितस्य सदृशस्य तपसा वर्ण्यशोभाप्राप्तिः । यथा—यत्कमलेनाकंठजले जलाहारेण तपस्तप्तं तेन नारीमुखसमानता लब्धा । यच्चन्द्रेण वने कुसुमस्तबकच्छलेन तपस्तप्तं तेन स्त्रीमुखलक्ष्मीर्लब्धा । यद् भृङ्गश्रेणिभिः विष्णुपादाम्बुजे कान्तिधारणमिषेण सेवा कृता तेन नारीकटाक्षच्छटोपमा प्राप्ता ।

दुःखादिस्तदनाप्तितः ॥१४९॥

तपसाऽपि वर्ण्यलक्ष्म्या अप्राप्तौ जितं वस्तु दुःखचेष्टितानि कुरुते । यथा–मुखजितं कमलं जलवासादिभिरपि मुखलक्ष्मीं न प्राप, ततः भ्रमररवैराक्रन्दं कुरुते । वेणीजिता भृङ्गश्रेणी वने मकरन्दास्वादमात्राशनाऽपि वेणीसाम्यं न प्राप, ततः साक्रन्दा भ्रमति ।

तेनापि न हि तत्प्राप्तिः ।

जितं वस्तु तपसाऽपि वर्ण्यशोभां न लभते । यथा—कमलं जले आकण्ठमग्नं तपस्तेपे, परं नारीवक्त्रोपमां न प्राप । हंसः सरस्वतीपदसेवां चक्रे, परं नारीगत्युपमां न प्राप ।

महत्प्राप्तिर्न तस्य तु ।

तपसा महतोऽन्यस्य श्रेयसः प्राप्तिर्भवति न पुनर्वर्ण्यशोभाप्राप्तिः । यथा—कमलं जलवासादिभिः श्रीपदं राजहंससेव्यं जातं, न पुनः स्त्रीमुखोपमां लेभे । चन्द्रेण ज्योत्स्नादानैश्चकोरप्रीणनासुकृतैः शिवशिरसि पदं लब्धं, न पुनः स्त्रीमुखोपमानम् ।

तदाप्तौ दुष्कृतं विघ्नः

तपसा वर्ण्यलक्ष्मीप्राप्तौ जितवस्तुनः किञ्चिद्दुष्कृतं विघ्नं कल्पनीयम् । यथा—कमलं शम्भोरम्भोमूर्तेः सेवया मुखोपमामयास्यच्चेन्नित्याश्रितभृङ्गबन्धं नाकरिष्यत् । विष्णुपदसेवासुकृतेन विष्णुपदी, यत्कीर्तितुलनां प्राप्नुयाद्यदि नीचगमनं न कुर्यात् ।

तदवाप्तावपरं शुभम् ॥१५०॥

तपसा वर्ण्यशोभाप्राप्तौ सदृशवस्तुनोऽन्यदपि श्रेयः सम्भाव्यम् । यथा—कमलं जलवासादिभिर्मुखोपमां प्राप्य लक्ष्मीस्थानं राजहंससेव्यं बभूव । जलवासादिभिः पाञ्चजन्यो नारीकण्ठोपमानं प्राप्य लक्ष्मीपतेरपि करारविन्दानुग्राह्यो बभूव ।

श्रेयस्तदाप्तौ दोषेऽपि

तपसा वर्ण्यस्योपमाप्राप्तौ सदृशवस्तुनः सदोषस्यापि श्रेयः कल्पनीयम् । यथा—जलवासादिभिर्मुखोपमां प्राप्तं कमलं सकण्टकमपि देवशिरांस्यधिरोहति । विष्णुपदसेवया गङ्गा यत्कीर्तिसमतां प्राप्य नीचगामिन्यपि शिवशिरःसंश्रयाऽऽसीत् ।

तदाप्तौ नर्तनादिकम् ।

तपसा वर्ण्योपमाप्राप्तौ हर्षेण सदृशवस्तुनो नर्तनादीनि कल्पनीयानि । नर्तनादीन्यमूनि यथा—

नृत्योत्कन्धरता स्मेरगौरवापीडपुष्टता ॥१५१॥
आश्रितातिथिविप्रादिदानं देवादिपूजनम् ।

यथा—जलवासादिना स्त्रीमुखोपमां प्राप्य कमलं वातचलितपत्रैर्नृत्यं रचयति । राज्ञः स्थैर्योपमां प्राप्य मेरुत्कन्धरोऽभूत् । गाम्भीर्योपमां प्राप्य जलधिः सर्वदिक्स्पर्शी बभूव । मतिसमतां प्राप्य बृहस्पतिर्देवगुरुतां गतः । सुकेशीकेशोपमां प्राप्य कलापी शिखामिवापीडं धत्ते । स्थैर्योपमां प्राप्य गिरिः शिरस्थमेघावलिव्याजान्मुकुटं धत्ते । राज्ञः स्थैर्योपमां प्राप्य मेरुः स्थूलोऽभूत् । मुखोपमां प्राप्य चन्द्रः स्वाश्रितचकोरान् स्वेच्छया ज्योत्स्नापानं कारयति । मुखलक्ष्मीं लब्ध्वा कमलं हंसद्विजातिथीन् भृङ्गानाहारदानैः प्रीणयति । मुखोपमां प्राप्य चन्द्रेण स्वकलया शिवपूजा कृता । एवं चले नृत्यं, उच्चे गर्वोत्कन्धरता, विस्तीर्णे स्मेरता, पूज्ये गौरवं, शिरःस्थवस्तुन्यापीडः, स्थूले पुष्टता कल्पनीया । इत्याद्यनेकोल्लेखैरर्थः कल्पनीयः ।

अर्थोत्पत्तये प्रकारान्तरमाह—

द्वेष्यस्याङ्गसुहृद्भङ्गैः

वर्ण्यवस्तुना जितो यः पदार्थस्तस्य वर्ण्यं तावद् द्वेष्यम् । ततो द्वेष्यस्य वर्ण्यस्य यान्यङ्गानि तेषां साम्येन सुहृद्रूपाणि यानि वस्तूनि तेषां जितपार्श्वाद्भङ्गः कल्पनीयः । यथा—नार्या कुचाभ्यां जितः कुम्भी नारीमुखमित्राणि कमलान्युन्मूलयति । नार्या मध्यजितः सिंहो नारीनेत्रमित्राणि मृगकुलानि भिनत्ति ।

अङ्गविद्वेषिपोषणैः ॥१५२॥

द्वेष्यस्याङ्गानां समतया द्वेषिरूपाणि यानि वस्तूनि तेषां जितपदार्थपार्श्वात् पोषः कल्पनीयः ।

यथा—नार्या गतिजितो हस्ती तद्द्वेषिणो भृङ्गान् दानेन पुष्णाति । नारीमुखजितं कमलं तद्गतिस्पर्धिनो हंसान् स्वशरीरखण्डैरपि प्रीणयति । अङ्गमित्रसुहृद्भङ्गैः द्वेष्याङ्गमित्राणां ये सुहृदस्तेषां जितपदार्थपार्श्वाद्भङ्गः कल्पनीयः । यथा नार्या धम्मिल्लजितो राहुर्नारीमुखमित्रकमलसुहृदं रविं पीडयति । राज्ञः यशोजितश्चन्द्रो राजप्रतापमित्ररविमित्राणि चक्रवाकान् कमलानि च पीडयति । अङ्गमित्रारिपोषणैः : द्वेष्याङ्गमित्राणि यानि तेषां ये रिपवस्तेषां जितपदार्थपार्श्वात्पोषणं कार्यम् । राज्ञः प्रतापजितो रविः राजयशोमित्रचन्द्रद्वेषिणः कमलानि सश्रीकानि कुरुते । राज्ञो यशोजितश्चन्द्रो राजप्रतापमित्ररविद्वेषिणः कैरवाणि विकासयति ।

अङ्गद्वेषिसुहृत्पोषैः

द्वेष्याङ्गद्वेषिणां ये सुहृदस्तेषां जितपदार्थपार्श्वात् पोषो विधेयः । यथा––नार्या मुखजितश्चन्द्रः स्त्रीकटाक्षद्वेषिषट्पदश्रेणिप्रीतिदायीनि कैरवाणि विकासयति । नार्या गतिजितो हस्ती स्त्रीमुखद्वेषिकमलोपासकान् भृङ्गान् दानेन[1] पुष्णाति ।

अङ्गद्वेषिद्विषद्वधैः ।

द्वेष्याङ्गद्वेषिणां यानि द्विपद्रूपाणि वस्तूनि, तेषां जितपदार्थपार्श्वाद्वधो विधातव्यः । यथा––नार्या धम्मिल्लजितो राहुः स्त्रीमुखद्वेषिकमलद्वेषिणं, नारीकुचयुग्मद्वेषिचक्रयुगद्वेषिणं वा चन्द्रं पीडयति । नार्या वेणीजिता भृङ्गश्रेणी स्त्रीमुखद्वेषिचन्द्रद्वेषिकमलानि पदाघातैः पराभवति ।

समानवस्तुनः शोभा–

चौर्यान्नाशोऽथ निग्रहः ॥१५३॥

वर्ण्याङ्गसदृशं यद्वस्तु तस्य वर्ण्याङ्गशोभाचौर्यं परिकल्प्य वनादिषु नाशो निग्रहो वा कल्पनीयः । यथा––मृगा नारीनयनशोभां हृत्वा वने नष्टाः । स्त्रीमध्यस्थितं हृत्वा सिंहो गिरिगह्वरे नष्टः । नारीमुखलक्ष्मीहरं कमलमिति राजहंसैः खण्डशः क्रियते । रात्रौ स्त्रीमुखलक्ष्मीं हरति चन्द्र इति प्रातःकालेन छिन्नकरः क्रियते ।

निपानायतनद्रव्यभङ्गप्राकारलङ्घनैः ।
राजवेषासनस्थानविरुद्धादिनिषेवणैः ॥१५४॥

अगम्यगमनापेयपानकाभक्ष्यभक्षणैः ।
अपह्नवाद्भवेद्दिव्यं प्रायश्चित्तं तदन्यतः ॥१५५॥

दिव्यं यथा––

हृत्वापि कान्तिधनमस्य नृपस्य कीर्तेर्दिव्यं सृजन्निव जगत्यपवादभीतः ।
इन्दुः सुधावपुरपि प्रभुरोषधीनामप्येष लक्ष्ममिषसर्पभृतौ न शुद्धः ॥

प्रायश्चित्तकरणं यथा––

समरे यत्करवालः पीत्वा मातङ्गकुम्भकीलालम् ।
अनुतापीव व्रतयति रिपुनृपतीनां यशःक्षीरम् ।

अथ भ्रमप्रकारैरर्थोत्पत्तिर्यथा––

स्वस्थादिभिर्भ्रमात् कार्यप्रवृत्तिः परिकल्प्यते ।

स्वस्थच्छद्मस्थप्रतिबिम्बस्थता पूर्ववत् ।

क्रमाद्यथा––

नलिनानि पानमधुभाजनानितः पिदधाति यः स विधुरेष गोचरः ।
इति रोपणैरिव मधुव्रतैर्धृतं सुदतीमुखं सुरभिचारुमारुतम् ॥

1. 'दानैः पा. बृ.

ताटङ्कामुक्तमुक्तालिच्छलत्तस्तारकाततिः ।
निजभर्तृभ्रमेणेयं भेजे चन्द्रमुखीमुखम् ॥

यत्र वैदूर्यवर्येषु कुट्टिमेषु तमोभ्रमात् ।
प्रतिबिम्बेन तद्भित्यै पतिरापतति त्विषाम् ॥

भ्रमकारिणोऽपि प्रतिबिम्बता यथा---

मणिनद्धेषु यत्सौधाङ्गणेषु प्रतिबिम्बितम् ।
शशाङ्कं कैरवभ्रान्त्या भजन्ते भृङ्गराजयः ॥

कार्यप्रवृत्तिरन्यत्र कारणप्रत्यये भ्रमात् ॥१५६॥

यथा---

एकत्र क्वचिदेव देवसदने सम्प्रेक्ष्य साक्षात्कृतप्रद्योतं तपनीयकुम्भमुदयक्ष्माभृद्गतार्कभ्रमात् ।
आश्लिष्यन्त्यनिश निशास्वपि वियद्गंगारथांगोमिलद्भर्तुभ्रान्तिभृतः पयोगतनिजच्छायाविमुग्धाशयाः ।

कार्यप्रवृत्तौ भ्रमतः साफल्यं जायते क्वचित् ।

यथा---

विधुमणिमयसौधप्राङ्गणे यत्र चन्द्रप्रतिमितिमतिफुल्लत्कैरवभ्रान्तिभाजः ।
असकृदमृतबिन्दुस्यन्दपानेन भृङ्गाः प्रसुमरमकरन्दास्वादसौख्यं लभन्ते ॥

यत्रोन्मुखं चातकवृन्दमभ्रभ्रमेण चैत्योत्थितधूपधूमे ।
वेल्लत्पताकाग्रगृहीतमुक्तनभोनदीबिन्दुभिरेति तृप्तिम् ॥

भ्रमात् कार्यस्य नैष्फल्यं भ्रमः सत्येऽपि वस्तुनि ॥१५७॥

यथा---

आलिङ्ग्योच्चैः सुरगृहशिरःशातकौम्भीयकुम्भान् भर्तृभ्रान्त्या निशि विफलिताः स्वर्गगङ्गारथाङ्ग्यः ।
अर्कालोकादुपगतमपि प्रीतिभाजं रथाङ्गमिथ्याबुद्ध्या सपदि न परीरब्धुमारात् त्वरन्ते ॥

भ्रमात् कार्यस्य नैष्फल्यं सत्येऽप्यकरणं तथा ।

यस्मिंश्चित्रपतत्पतत्रिषु रुषोत्कर्षेण वेश्मान्तरे मार्जारः परिजर्जरोऽजनिजवादाहत्य सत्यभ्रमात् ।
तान् विन्दन्नभिजीवतोऽपि स पुनः प्राग्भंगभावादभिव्यक्तं मुक्तविरोधबोधविषयो लोकैः समालोक्यते ॥

भ्रान्तस्य वस्तुनोऽन्यत्वं जायते भ्रमतोऽन्यतः ॥१५८॥

यथा---

चिक्रंसया कृत्रिमपत्रिपंक्तेः कपोतपालीषु निकेतनानाम् ।
मार्जारमप्यायतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने ॥

भ्रमज्ञातपदार्थस्य पूरणं च भ्रमान्तरात् ।

यथा—

संक्रान्तं प्रतिबिम्बमंबरमणेः शुभ्राश्मवेश्मांगणे यत्र प्रातरयत्नपूर्णकलशभ्रान्तिं विधत्ते तथा ।
कासारप्रसरत्सरोरुहपरीरम्भभ्रमेण भ्रमद् भृङ्गश्रेणिरिहाश्रिता शितिदलभ्रान्तिं यथा कल्पयेत् ॥

नैष्फल्ये भ्रमतः कार्यप्रवृत्तेः साऽथ निश्चयात् ॥१५९॥

यथा—

यत्र स्फुटस्फटिकनद्धगृहाङ्गणेऽर्कं संक्रान्तबिम्बमवलम्ब्य नितम्बिनीभिः ।
व्यर्थप्रयासकरणाच्चरणाग्रसङ्गान्निश्चित्य सत्यकलशोऽति किल प्रवृत्तम् ॥

भ्रान्तस्यापि भ्रमो यः स्याद्विज्ञेयोऽसौ प्रतिभ्रमः ।

यथा—

निद्रान्तेषु वने द्विपः सहचरीवक्षोरुहौ वीक्ष्य यद्युग्येभोन्नतकुम्भविभ्रमभयादार्तं रवं तेनिरे ।
तासु त्रासनिमित्तवित्तिवलितग्रीवासु वेगोल्लसद्वेणीदण्डविलोकनेन यदसिं व्याशङ्क्य मूर्छामगुः ॥

वन्यो हस्ती स्फटिकघटिते भित्तिभागे स्वबिम्बं दृष्ट्वा दूरात्प्रतिगज इति त्वद्द्विषां मन्दिरेषु ।
हत्वा कोपाद्गलितरदनस्तत्पुनर्वीक्षमाणो मन्दंमन्दं स्पृशति करिणीशङ्कया साहसाङ्कः ॥

अन्योन्यभ्रान्तिको भेदो यत्रान्योन्यं द्वयोर्भ्रमः ॥१६०॥

यथा—

जम्बूनां कुसुमोद्गमे नवमधुन्याबद्धपानोत्सवाः कीराः पक्वफलाशया मधुकरीश्चिन्वन्ति मुञ्चन्ति च ।
एतेषामपि जातकिंशुकदलश्रेणीसमानत्विषां पुष्पभ्रान्तिभृतः पतन्ति सहसा चञ्चूषु भृङ्गाङ्गनाः ॥

आरूढाः संक्रमैर्यद्रिपुगृहशिखराण्यूर्ध्वमालोक्य भित्तिव्याघातव्यर्थयत्ना दिवि जलदगजान्नैव हिंसन्ति सिंहाः ।
अश्रान्तं सोऽपि तत्र प्रतिकृतकमृगारातिनित्यावलोकात् जीर्णातङ्को गजेन्द्रः[1] सविधमपि भवन्नैव तेभ्यो बिभेति ॥

इत्याद्यनेकोल्लेखैर्भ्रमादर्थोत्पत्तिः कार्या ।

वस्त्वन्तरक्रियारोपैः

वस्तुनि तद्विरुद्धवस्तुक्रिया चित्रार्थमारोप्यते ।

यथा—

इन्दुमुखी कुमुदाक्षी रम्भोरुः कमलचारुकरचरणा ।
अमृतद्रवलावण्या हृदयगता देवि किं दहसि ॥
धनारिनारीनयनाश्रुनीरैर्यशोलता यस्य विभाति युक्तम् ।
प्रतापवह्निर्ज्वलितो यदेतैर्जगच्चमत्कारकरं तदेतत् ॥
शशिशुक्लाऽपि यत्कीर्तेश्चक्रेऽरिकुलकालिमाम् ।
पङ्काभमपि यन्मित्रौज्ज्वल्यं यद्वैरिदुर्यशः ॥

कार्यारम्भनिवृत्तिभिः ।

१. 'जीर्णातङ्कः सलीलं' पा.वृ-2

कार्यारम्भात्पदार्थस्य केनापि कारणेन निवृत्तिः कल्पनीया । यथा—

भुवं भुजे योऽधित याचकेभ्यो दिक्कुञ्जरान् दातुमना मनस्वी ।
तदेकयुग्यं भजतां प्रभुत्वं न दिक्पतीनां कृपयाऽहस्तान् ॥

उपाध्यायात्प्रभोर्मित्रात् सेवकाज्जातिभावतः ॥१६१॥

सङ्गात्तद्गुणसंक्रान्तिः

यथा—

राजन् दानजितेव सेवनविधिं निस्त्रिंशलेखामिषादेषा कल्पलता प्रकल्प्य नियतं त्वत्पाणिपङ्केरुहान् ।
सङ्कल्पाधिकदानकल्पनकलां वेत्ति स्म तस्माद्द्विषां क्षोणीभोगसुखार्थिनां वितरति स्वर्भोगसौख्यान्यपि ॥

किं त्वया शिक्षितं लक्ष्मि पितुः कल्लोलचापलम् ।
यत् त्वं नैकत्र कुत्रापि स्थिरत्वं प्रतिपद्यसे ॥

एतेभ्योऽपि न सा क्वचित् ।

उपाध्यायादिभ्योऽपि सा तद्गुणसंक्रान्तिर्न स्यात् । यथा—

द्विजधनवर्जितमेतद्भवद्भवे यशसि किं न संक्रान्तम् ।
सुकृतैकवेश्म यस्माद् द्विजराजश्रीर्हृताऽनेन ॥

आहारसदृशोद्गारद्युत्युद्भवविपर्ययैः ॥१६२॥

वस्तुनि औचित्यादाहारसदृशयोरुद्गारदेहवर्णयोरुद्भवः कल्पनीयः । क्वाप्याहारादेतयोर्विपर्ययः कार्यः । क्रमा-
द्यथा—

अतिलौल्यतः कवलयन् मलिनद्युतिकाननं किमपि दाववशिखी ।
बहुभक्षणेन शिति[सित]धूममिषाननुते स्म भोजनवदि्गरणम् ॥

द्विषन्मृगाक्षीनयनाञ्जनानि यदेष नित्यं कवलीकरोति ।
क्षितीश तेनाशनसन्निभैव विभा विभाति स्म भवत्कृपाणे ॥

विपर्ययो यथा—

यद्वदत्यशनसन्निभं तमेवोद्गारमित्यनृतमत्र बभासे ।
गीतकं यदुदगारि सुधावत् पीतसीधुभिरपि प्रमदाभिः ॥

सिच्यमानमपि शत्रुकामिनीकज्जलाविललोचनाश्रुभिः ।
आहृतासितनभोऽपि भासते श्वेतभानुसममेव यद्यशः ॥

पदार्थानां मिथः साम्यं स्यादर्थोत्पत्तिकारणम् ।
अतः सदृशवस्तूनि संगृह्यन्ते कियन्त्यपि ॥१६३॥

वर्णाकारयोः सदृशपदार्था उक्ताः । अपरः प्रकीर्णकः सदृशवस्तुसंग्रहः क्रियते । यथा—

तीक्ष्णानि प्रतिभास्त्राणि कटाक्षाः सूचिका नखाः ।
दात्रशल्लकशूलानि कुठारः क्रकचस्तथा ॥१६४॥

अस्िपत्रद्रुपत्राणि शूलाः प्राजननेमयः ।
करिदंष्ट्रा हलं सिंह नखरा मर्मभिद्वचः ॥१६५॥

कुश्यङ्कुशकुशग्राणि खड्गधारा च हीरकः[1] ।
कर्तरी कनिकाटङ्का विन्धनं नखभेदिनी ॥१६६॥

महत्तमानि दिक्कालज्ञानव्योमेशकेशवाः ।
आरामः सन्मनोबुद्धिसमुद्रारण्यभूमयः ॥१६७॥

शय्योरः पुलिनं श्रोणिः कपाटः क्षेत्रवेश्मनि ।
सूक्ष्माणि केशसूच्यग्रत्रसरेणुरजःकणाः ॥१६८॥

मनः सन्मतिसंसारस्वरूपपरमाणवः ।
माङ्गल्यानि दधिदूर्वाचन्दनाक्षतदीपकाः ॥१६९॥

रसालपिप्पलाशोकपत्राण्यब्जंसुमं फलम् ।
शङ्खः सिद्धार्थकः सिद्धमन्नं मध्वाज्यमामिषम् ॥१७०॥

रूप्यं ताम्रं मणिः स्वर्णं भूषणान्यंशुकानि च ।
व्यञ्जनं चामराश्छत्रं ध्वजो यानेभवाजिनः ॥१७१॥

ताम्बूलं गीतवादित्रगुरुबन्दिद्विजाशिषः ।
सुस्वप्नशकुने हंसचाषखञ्जनबर्हिणः ।
अङ्गनास्फारशृङ्गाररूपा प्रेमवती प्रिया ॥१७२॥

श्रीवत्समत्स्यदर्पणभद्रासनवर्धमानवरकलशाः ।
स्वस्तिकनन्द्यावर्त्ताविष्ट महामङ्गलान्याहुः ॥१७३॥

अमङ्गलानि घूकाहिकपोतशशकैतवः ।
कृकलासो दुःशकुनं दुःस्वप्नं दुरुपश्रुतिः ॥१७४॥

कृतघ्नान्त्यजपाषण्डिपतितारिविलापिनः[2] ।
नग्नच्छिन्नाङ्गरोगार्तदीनब्रह्मादिघातिनः ॥१७५॥

सन्मार्जनी खराजाङ्घ्रिरजो धूमश्चितोद्भवः ।
छाया शाखोटकविभीतकयोर्मञ्चदीपयोः ॥१७६॥

पवित्राणीशबुध्यार्हद्विष्णुब्रह्मार्कतत्कराः ।
पावकाम्भोमरुद्भूमि वेदवाणीयतिद्विजाः ॥१७७॥

---

१ 'कुश्यङ्कुश....हीरकः।' इदं ला१, ला२, मध्ये नास्ति ।
२ 'पतितार्त्त' पा. वृ. २ ।

पुरोधा धेनुरतिथिः सुवर्णं दर्भगोमये ।
सत्यं सतां चरित्राणि पूज्यपादरजःकणाः ॥१७८॥
गङ्गा गोदावरी रेवा यमुना च सरस्वती ।
कामरूपः कुरुक्षेत्रान्तर्वेद्यो कामिपूस्तथा ।
सत्या सीता दमयन्ती द्रौपद्यरुन्धती तपः ॥१७९॥
ब्रह्मचर्यं हरिश्चन्द्रनलरामयुधिष्ठिराः ।
अपवित्राणि रक्तास्थिशकृद्दुश्चरितान्त्यजाः ॥१८०॥
रजस्वला श्मशानोर्वी भस्माङ्गाराः शवानि च ।
कृतघ्नस्वामिविश्वासद्रोहिब्रह्मादिघातिनः ॥१८१॥
शरीरच्युतकेशाद्युच्छिष्टान्नद्धिककुक्कुराः ।
सुखदानि प्रियागीतनृत्यवाद्यादि नाटकम् ॥१८२॥
आरामः सुमनोरामारामाविभ्रमकेलयः ।
सुखशय्या शशी दोला स्वातन्त्र्यं श्रीः सुतोद्भवः ॥१८३॥
नष्टाप्तिः स्वस्पृहालब्धिः वियुक्तप्रियसङ्गमः ।
दाता वित्यान् सुहृद्विद्या स्वर्गः पीयूषमप्सराः ॥१८४॥
धर्मः सद्वचनं सन्तः सन्तोषज्ञानमुक्तयः ।
दुःखदान्याधिनरकौ काराव्याधिविरोधिनः ॥१८५॥
कुभार्या नैःस्व्यकुग्रामवासः कुस्वामिसेवनम् ।
कन्याबहुत्वं वृद्धत्वे पत्न्याः पुत्रस्य वा मृतिः ॥१८६॥
बालत्वे मातृमरणं निवासः परवेश्मनि ।
दुर्लभे नीरसे स्नेहः हीने पररते रतिः ॥१८७॥
पारतन्त्र्यं परासक्ता पत्नी पुत्राश्च दुर्नयाः ।
वर्षाप्रवासो द्वे पत्न्यौ कुभृत्योऽर्धहलं कृपौ
कलङ्को निष्कलङ्कस्य मानिनो मानखण्डना ॥१८८॥
स्थिराणि पृथिवी शैलौ धर्माधर्मौ सतां मनः ।
सती शीलं रणे धीरः प्रतिपन्नं महात्मनाम् ॥१८९॥
अस्थिराणि नदीपूरलहरीबिन्दुबुद्बुदाः ।
विद्युद् धूमस्फुलिङ्गोल्काऽनिला दीपोऽनिलाहतः ॥१९०॥
मत्स्यः कपिध्वजौ सन्ध्या हस्तपुच्छकरश्रुतिः ।
कन्दुकश्चामराश्चक्रं दोला स्त्रीविभवश्रियः ॥१९१॥

निमेषोन्मेषरसनानेत्राङ्गायूंषि यौवनम् ।
स्नेहः शक्रधनुः स्वामिप्रसादस्वप्नदुर्जनाः ॥१९२॥
सवेगान्यनिलेन्द्राश्वमनस्ताक्ष्योऽश्वदृक्शराः ।
नदी विमानहनुमन्तौ मीनोष्ट्रेणपक्षिणः ॥१९३॥
मन्दगानि शनिः पङ्गुर्मुनिर्बालो नितम्बिनी ।
खञ्जनः पुण्यपुरुषो हंसो वृषभहस्तिनौ ॥१९४॥
बलिष्ठानि शिवो विष्णुः स्कन्देन्द्रगरुडानिलाः ।
श्रीरामहनुमद्भीमा बलदेवो बलिः पविः ॥१९५॥
सुदर्शनं सुरा दैत्याः पञ्चास्यः शरभो गजः ।
महावराहदिग्दन्तिशेषकर्मकुलाचलाः ॥१९६॥
पृथुरैरावतश्चक्री सतीस्वान्तं पुराकृतम् ।
प्रतिपन्नं प्रतिज्ञा च महतां स्त्रीजडाग्रहः ॥१९७॥
अबलिष्ठानि रोगार्तबालक्षुधितकातराः ।
बलात्कृतानि कार्याणि नारी पापधनो नृपः ॥१९८॥
क्रूराणि सर्पमार्जारमकरग्रामकूटकाः ।
हर्यक्षदुर्जनश्येनस्तेनप्रत्यन्तवासिनः ॥१९९॥
अक्रूराणि शिशुः साधुर्धार्मिको धर्मनन्दनः ।
सुस्वामिभृत्यमित्राणि तत्त्वज्ञो गौः सुगेहिनी ॥२००॥
मधुरध्वनयो हंसमयूरपिकसारसाः ।
कामिनी कुररः कङ्ककीरपारावतालिनः ॥२०१॥
चातकः ककुहः केतुकिङ्किण्यः घर्घरावली ।
वेदानाहतनादौ च बालादिपदघर्घराः ॥२०२॥
वेणुवीणादिमञ्जीरमेखलाकङ्कणक्वणाः ।
गन्धर्वाप्सरसौ हाहाहूहूतुम्बुरुकिन्नराः ॥२०३॥
गान्धारगायिनो हंसाः केकिनः षड्जकेकिनः ।
कोकिलाः पञ्चमोल्लापाः क्रौञ्चा मध्यमराविणः ॥२०४॥
कलभा निषादरवा धैवतध्वनयो हयाः ।
वृषभा ऋषभारावा विज्ञेया स्वरवेदिभिः ॥२०॥
कठोररटिनो घूकघरट्टकरभाः खराः ।
मण्डूककोलकाकोलकपोताः कुक्करः शिवा ।
कपाटानां खटत्काराः शृङ्खलानिगडारवाः ॥२०६॥ षट्पदी

महाशब्दा घनेन्द्रेभताक्ष्यपक्षाब्धिवीचयः ।
अब्धिमन्थः शिवस्याट्टहासस्तु डमरुध्वनिः ॥२०७॥

सिंहोष्ट्रहनुमद्रक्षःक्ष्वेडासांराविणो रवाः ।
नान्द्यब्धिकृष्णशङ्खौघमल्लदोः स्फालनध्वनिः ॥२०८॥

निर्घातरथघोषज्याटङ्कारो गजवाजिनः ।
भटहक्काः शिखोद्धारः स्फारघर्घरनिर्झराः ॥२०९॥

घण्टाश्चैत्यगजादीनां कन्दरादिप्रतिध्वनिः ।
वीराणां निनदो दूराकारणं रुदितारवाः ॥२१०॥

ततं वीणाप्रभृतिकं तालप्रभृतिकं घनम् ।
वंशादिकं तु सुषिरं विततं मुरजादिकम् ॥२११॥

एतच्चतुर्विधं वाद्यं बन्दी पञ्चारवो मतः ।
नान्दी द्वादशतूर्याणां निर्घोषो नाटकादिषु ॥२१२॥

भम्भा मउन्द मद्दल करडा झल्लर हुडुक्क कंसाला ।
भेरी तिलिमा वंसो सङ्खो पणवो यनाडए नन्दी ॥२१३॥

डक्का ढक्का डमरु अ काहल वुक्क भेरि भाणगं पडहो ।
जुगससंखकरडपोणय मद्दलकंसाभरणनन्दी ॥२१४॥

सुगन्धानि तु कर्पूरकसरीयक्षकर्दमाः ।
वासो मलयजं धूपोऽगुरुर्मीनमदो यशः ॥२१५॥

सुगन्धितैलं स्वर्गद्रुपुष्पाणि कुसुमद्रुतिः ।
पद्मिनीस्त्रीमुखं मेघसिक्तोर्वी ग्रन्थिपर्णकः ॥२१६॥

जातीपत्रं लवङ्गैलाकक्कोलौ जातिकाफलम् ।
तज्जा तमालपत्राणि मद्यं सप्तच्छदो मदः ॥२१७॥

शालयः कुसुमं जाती केतकी बकुलोऽम्बुजम् ।
पाटलाचम्पकौ मल्ली करुणी शतपत्रिका ॥२१८॥

दुर्गन्धानि वपुःस्वेदकुथितान्नादिपूतयः ।
मृतश्वानादिदेहानि पुरीषापानमारुतौ ॥२१९॥

शिशिराणि सज्जनवचः प्रभुःप्रसादेष्टसङ्गसत्सङ्गाः ।
काव्ययशःसन्तोषाः सुधाम्बुहेमन्तहिमकराः करकाः ॥२२०॥

करम्भविभिटमधुक्षीरेक्षुरसशर्कराः ।
रम्भाधारागृहाम्भोजजलार्द्राश्चन्दनद्रवाः ॥२२१॥

उष्णानि तरणिर्वह्निर्वडवः शिवभालदृक् ।
कालाग्निरुद्रगोविन्दचक्रब्रह्मानलास्त्रभाः ॥२२२॥
वज्रं विद्युद्दवो ग्रीष्मः करीषाग्निर्हसन्तिका ।
आधिर्भ्राष्ट्रं ज्वरो घर्मः प्रतापो दुर्वचस्तपः ॥२२३॥
क्षुद्दीपशापदुर्वासःक्रोधवैरिपराभवाः ।
सपत्नीष्टवियोगेष्टकृतावज्ञास्मरज्वराः ॥२२४॥
कोमलान्यङ्गनाङ्गानि शिरीषनवपल्लवाः ।
हंसरोमाणि कदलीस्तम्भाः पट्टांशुकान्यपि ॥२२५॥
कठोराणि शिला शैलो वज्रं दुर्जनमानसम् ।
कुस्वामिभृत्यमित्राणि कुपत्नी शाकिनीमनः ॥२२६॥
लोहं वैरिमनो हस्ती नृहस्ततरुणीस्तनौ ।
कूलघ्नो नालिकेरीङ्गुदीकपित्थफलानि च ॥२२७॥
मधुराणि विदग्धोक्तिकाव्यगीतप्रियाधराः ।
सुधामधुपयोनालिकेरीरसशशित्विषः ॥२२८॥
द्राक्षाम्रदाडिमीरम्भाराजादनफलादिजाः ।
रसाः पुष्परसाः कीर्तिर्गुडखण्डेक्षुशर्कराः ।
सुरा शिखरिणी मस्तु पायसं पानकानि च ॥२२९॥
कटूनि राजिका हिङ्गु तैलं धत्तूरकस्तुहिः ।
विषं तुम्बीफलं निम्बेद्रवारणगुडूचिकाः ॥२३०॥
क्षाराणि लवणं सौवर्चलं सैन्धवटङ्कणे ।
यवक्षारः स्वर्जिका च मूलं लवणवारिधिः ॥२३१॥
अम्लानि बीजपूराणि जम्बीरकरुणाम्लिके ।
आरनालं कपित्थानि लिम्बूकान्यम्लवेतसम् ॥२३२॥
तिक्तानि मरिचं शुण्ठी सूरणं शृङ्गवेरकम् ।
पिप्पली पिप्पलीमूलमजमोदादयस्तथा ॥२३३॥
द्रवाण्यमृतपानीयघृततक्रपयः सुराः ।
तैलाम्लमकरन्देक्षुरसाः शिखरिणी मधुः ॥२३४॥
मषीमदाश्रुरुधिरसूत्रप्रस्वेदपारदाः ।
अवश्यायाम्बुकर्पूरजलचन्द्रोपलद्रवाः ॥२३५॥
तेजस्विनो रविश्चन्द्रतारानिस्वर्णपारदाः ।
नेत्रदन्तनखादर्शरूप्यं कांस्याभ्रके मणिः ॥२३६॥

सूर्येन्दुकान्तखद्योतमुक्ताविद्रुमहीरकाः ।
पद्मरागमरकते वैदूर्ये राजपट्टकः ॥२३७॥

सुरूपा मदनस्कन्दानिरुद्धनलकूबराः ।
अश्विनीपुत्रनकुलनलदेवाः पुरूरवाः ॥२३८॥

दानिनः कामधुक्चिन्तामणिकल्पद्रुमावलिः ।
जीमूतवाहनः कर्णदधीचिशिबिविक्रमाः ॥२३९॥

धन्विनः शिवकृष्णेन्द्रा भार्गवो रामरावणौ ।
पार्थभीष्मकृपद्रोणद्रौणिकर्णाभिमन्यवः ॥२४०॥

आधाराः स्वर्नभोभूदिक् पातालाद्रिवनद्रुमाः ।
नीरग्रामपुरागारप्रासादाः शयनासने ॥२४१॥

पुर्योऽमरावती भोगावती लङ्कालका तथा ।
विदर्भा मिथिलायोध्या कान्यकुब्जं कुशस्थलम् ॥२४२॥

कौशाम्बी त्रिपुरा काशीर्मथुरा हस्तिनापुरम् ।
अवन्ती पाटलिपुत्रं चम्पा द्वारवती गया ॥२४३॥

विदिशा निषधा कोटीवर्षं काञ्ची तमालिनी ।
माहिष्मती भृगुकच्छं काम्पिल्यं वारणावतम् ॥२४४॥

राजानः पृथुमान्धातृधुन्धुमाराः पुरूरवाः ।
हरिश्चन्द्रो भरतश्च कार्तवीर्ययुधिष्ठिरौ ॥२४५॥

मनुः काकुत्स्थसगरौ भगीरथनलौ रघुः ।
अजो दशरथो रामवत्सौ श्रेणिकसम्प्रती ॥२४६॥

विद्वन्नृपाः प्रतिष्ठाने शालिवाहनभूपतिः ।
उज्जयिन्यां विक्रमार्कमुञ्जभोजनरेश्वराः ॥२४७॥

मन्त्रिणः वाक्पतिः शुक्रो जाम्बवान् माल्यवानपि ;
साङ्कलायनकूष्माण्डश्रुतशीलास्तथोद्धवः ।
यौगन्धरायणो मुद्राराक्षसश्चणकात्मजः ॥२४८॥

इति श्रीजिनदत्त० अर्थसिद्धिप्रताने चतुर्थे प्रकीर्णकः पञ्चमः स्तबकः ।

म. टी. अथाधारपरिवारादिभ्योऽर्थोत्पत्तिं विवृण्वन्नाह—

अभ्येत हंसादीनामित्यत्र-सन्मुखागतं हंसादीनामिति लोकाप्यायकभोजनोदकाद्याधार तथेत्यत्राप्यायकं समाधिकारकमिति । कुरुक्षेत्रान्तर्वेद्यौ इति-कुरवोऽत्र क्षयंति स्म कुरुक्षेत्रं तद्द्वादशयोजनावधिगङ्गायमुनयोर्मध्यमन्तर्वेदिरिति । प्रत्यन्तवासिन इत्यत्र-प्रत्यन्तो म्लेच्छमण्डल इति । भम्भामुकुन्दमर्दलेत्यत्रातिपृथुलमुखो ढक्काविशेषः, मुकुन्दमर्दलौ तु मुरजविशेषावेव । केवलमेकतः संकीर्णोऽन्यत्र तु विस्तीर्णो मुकुन्दः । मर्दलस्तूभयतोऽपि समः । करडा इति करटिका । तिमिला इति-तिउल्लिकामरुदेशोतिवल इति प्रसिद्धा । रामलक्ष्मणौ रामरावणाविति, प्रत्यन्तरे इत्यादि सकलोऽपि स्तबक सुबोधः ॥छ॥

इति श्रीतपागच्छाधिनायक पातसाहिश्री ४ अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री ४ श्री हीरविजयसूरीश्वरशिष्यपण्डित श्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्देऽर्थसिद्धिप्रतानप्राप्त कीर्णक स्तबको द्योतकः पञ्चमप्रसरः ५ ॥छ॥

❑

॥ ४.६ ॥

अथ सङ्ख्यातोऽर्थोत्पत्तिः कथ्यते

का.क. औचित्यरचितैः संख्याबन्धबन्धुरितक्रमैः ।
उपमाद्यैरलङ्कारैः सुधीरर्थं समर्थयेत् ॥२४९॥

यदैकसंख्यः पदार्थो विवक्षितः तदैकसंख्या अन्येऽपि पदार्थाः। यदा द्विसंख्यस्तदाऽन्येऽपि द्विसंख्याः। यदा त्रिसंख्यस्तदाऽन्येऽपि त्रिसंख्याः। एवमन्येऽपि तत्तत्संख्याकाः अलङ्कारेण केनापि संकलिताः काव्ये संगृह्यन्ते। उदाहरणानि स्वस्वसंख्यायां दर्शयिष्यन्ते ।

एकादिसंख्यासंग्रहो यथा—

आदित्यमेरुचन्द्रप्रासादा दीपदण्डकलशाश्च ।
खड्गहरनेत्रशेषस्वर्दण्डाङ्गुष्ठहस्तिकराः ॥२५०॥
नासावंशविनायकदन्तपताकामनांसि शक्राश्चः ।
अद्वैतवाद एकैव एवामी सुकविभिर्वर्ण्याः ॥२५१॥

यथा—

एकदन्तो जयत्येकदन्तस्तम्भं दधत्पुरः ।
यो वक्तीव जगद्विघ्नविधाताद्वैतमात्मनः ॥

भुजदृष्टिकर्णपादस्तनसन्ध्यारामलक्ष्मणौ शृङ्गे ।
गजदन्तौ प्रीतिरती गङ्गागौर्यौ विनायकस्कन्दौ ॥२५२॥
पक्षनदीतटरथधुर्यखड्गधाराश्च भरतशत्रुघ्नौ ।
रामसुतौ रविचन्द्रावित्येते द्वन्द्वगा वाच्याः ॥२५३॥

उदाहरणानि—

किं भूचरौ तरणिशीतरुची किमन्यौ रामाच्युतौ किमु गणेशगुहाविहैतौ।
एतौ पुनः किमुदितौ रघुराजपुत्रावित्याकुलैर्नृपकुलैः सहसैव दृष्टौ॥
आश्लिष्यतामथ भुजाविव विक्रमस्य मूर्तौ सभाग्रभुवमेकधनुर्भ्रुवन्तौ।
नत्वा कृते धनुषि सज्जगुणेऽर्जुनेन भीमो मदादिदमुवाच भुवामधीशान्॥

प्रविष्टौ कुरुसैन्येषु द्रुतं भीमघटोत्कचौ।
भक्ष्येषु सममेव द्वौ बालकस्य कराविव॥
पीड्यमाना दृढं ताभ्यां प्रियदोर्भ्यामिव प्रिया।
सिस्वेद च चकम्पे च संमुमोह च सा चमूः॥

भुवनावलिवह्निविद्यासन्ध्यागजजातिशंभुनेत्राणि
त्रिशिरोमौलिदशाक्षेत्रपालफणकालमुनिदण्डाः ।।२५४।।

त्रिफलात्रिशूलपुरुषाः पलाशदलकालिदासकाव्यानि ।
वेदावस्थाः कम्बुग्रीवारेखा त्रिकूटकूटानि ।।२५५।।

हरहृतपुरत्रियामा यामा यज्ञोपवीतसूत्राणि ।
जैने रत्नच्छत्रप्रदक्षिणागुप्तिशल्यानि ।।२५६।।

मुद्राप्रणामगौरवशिवभवमार्गाः शुभेतरालेश्याः ।
सर्वेऽप्यमी त्रिसंख्योपेताः काव्ये निबोद्धव्याः ।।२५७।।

म.टी. अथ संख्यातोऽर्थोत्पत्तिं प्रपञ्चयन्नाह–एकादिसंख्यासङ्ग्रहो यथा–तत्रैकसंख्या । आदित्येति–आदित्यः, चन्द्रः, मेरुः, प्रासादः, दीपः, दण्डः, कलशश्च खड्गः, हरनेत्रं ईश्वरस्य तृतीयं लोचनं, शेषः शेषनागः, स्वर्दण्डः अङ्गुष्ठः, हस्तिकरः नाशावंशः, विनायकदन्तो गणेशदन्तः, पताकामनः शक्राश्वः । उदाहरणं यथा एकदन्तेति–एकदन्तो गणेशो जयति । किं कुर्वन्? दधन् एकदन्तरूपं स्तम्भम् । कथं? पुरोऽग्रे यो वक्ति इव जगद्विघ्नविधाताद्वैतं आत्मनः । द्विसंख्या यथा–भुजे, दृष्टी कर्णौ, पादौ, स्तनौ, सन्ध्ये, रामलक्ष्मणौ, शृङ्गे गजदन्तौ, प्रीतिरती मदनभार्ये, गङ्गागौर्यौ ईश्वरभार्ये, विनायकस्कन्दौ शम्भुपुत्रौ, पक्षौ नदीतटे, रथधुर्यौ, खड्गधारे, भरतशत्रुघ्नौ, रामसुतौ कुशलवौ, रविचन्द्राविति । अत्रोदाहरणानि स्पष्टानि । त्रिसंख्या यथा–भुवनानि स्वर्ग १ मर्त्य २ पातालरूपाणि ३ । वलयस्त्रिवलयं । उदरे रेखात्रयीरूपा इति यावत् । वह्नयः दक्षिणा १ हवनीय २ गार्हपत्यरूपाः ३ । विद्यालक्षण १ साहित्य २ तर्करूपाः ३ । सन्ध्याः प्रभात १ मध्यान्ह २ सायंरूपा ३ । गजजातयः भद्र १ मन्द २ मृगरूपाः ३ । शम्भुनेत्राणि त्रिशिरोमौलयः । त्रिशिरसो धनदस्य मस्तकानि । दशा उत्तम १ मध्यमा २ ऽधमरूपाः । क्षेत्रपालफणाः ३ । कालः शीतो १ ष्ण २ वर्षारूपः ३ । मुनिदण्डाः मनो १ वाक् २ काय ३ रूपाः । त्रिफला प्रसिद्धा । त्रिशूलं । पुरुषा उत्तम १ मध्यमा २ धमरूपाः । पलाशदलानि प्रसिद्धानि । कालिदासकाव्यानि मेघदूत १ कुमारसम्भव २ रघुवंशरूपाणि । वेदाः ऋग् १ यय:(जु:) २ साम ३ रूपाः । अवस्थाः बाल्य १ तारुण्य २ वार्द्धकरूपाः ३ । छद्मस्थत्व १ केवलित्व २ सिद्धत्वरूपाः ३ वा । कम्बुरेखाः शङ्खरेखाः ३ । ग्रीवारेखाः ३ । त्रिकूटकूटानि त्रिकूटपर्वतशिखराणि त्रीणि । हरतपुरा ईश्वरहृता पुरा दैत्यविशेषाः । त्रियामा या यामाः प्रहराः ३ आद्यंतचतुर्घटिकयोर्दिवसमध्ये गणनात् । यज्ञोपवीतसूत्राणि त्रीणि । जैनमते रत्नेत्यादि-तत्र रत्नानि ज्ञान १ दर्शन २ चारित्र ३ रूपाणि । छत्रत्रयं । प्रदक्षिणात्रयं । ३ गुप्तयो मनो १ वाक् २ कायरूपाः । शल्यानि माया १ निदान २ मिथ्यात्वदर्शन ३ रूपाणि । मुद्रात्रयी जिनमुद्रा १ योगमुद्रा २ मुक्ताशुक्तिमुद्रारूपा ३ । प्रणामत्रिकं अञ्जलिबन्ध १ अर्द्धावनत २ पञ्चाङ्ग ३ रूपं । गौरवाणि ऋद्धि १ रस २ सुख ३ रूपाणि । शिवमार्गः ज्ञानर्ग दर्शन १ चारित्ररूपः । भवमा २ राग १ द्वेष २ मोहरूपः ३ । शुभलेश्याः तेजः १ पद्म २ शुक्लरूपा ३ । अशुभलेश्याः कृष्ण १ नील २ कापोत ३ रूपाः । अत्रोदाहरणानि स्पष्टानि ।

का.क. यथा––

कण्ठोऽयमस्या मृदुमध्यतारस्वरत्रयाधार इति त्रिरेखः ।
मुदं ददाति त्रिजगज्जयाय प्रयाणशङ्खो मकरध्वजस्य ।।

किं रोमराजी यमुनातटेऽस्या वलित्रिदण्डीं कलयन्ननङ्गः ।
कस्यापि रूपेण जितस्तपस्वी तमेव जेतुं तनुते तपांसि ।।

शल्येन धारितस्यासेर्धाराद्वितयबिम्बितः ।
त्रिमूर्तिरिव रेजेऽसौ त्रिवेदीवेदिनोऽर्चितुम् ।।

ब्रह्ममुखवेदहरिभुजसुरगजरदवर्णचतुरिकास्तम्भाः ।
सङ्घसमुद्राश्रमघातगोस्तनाश्रमकषायदिशः ॥२५८॥

गजजातियामसेनाङ्गदण्डहस्ता महाजने वणिजः ।
दशरथपुत्रोपाध्यायध्यानकथाभिनयरीतिगोचरणाः ॥२५९॥

माल्यस्तबककराङ्गुलिसंज्ञासुरभेदयोजनक्रोशाः ।
एते सलोकपालाः काव्ये योज्याश्चतुःसंख्याः ॥२६०॥

यथा—

संसारिस्फुटरोषदोषपटलीखेलाय संश्लेषिणो
मार्गानुव्रतमप्रमादरजनीयामान् निकामाक्षयान् ।
संसारोरुपुरप्रधानपुरुषान् व्यामोहकारागृह-
द्वारप्राहरिकान् क्षिपन्ति चतुरः केचित् कषायत्विषः ॥

वृकोदराद्याः सहसा मनस्विनः सहोदरास्तं परिवव्रिरे नृपम् ।
बृहस्तिनो हस्तमिवासुहृद्गणच्छिदानिदानं रणपारदाः रदाः ॥

स्मरबाणपाण्डवेन्द्रियकराङ्गुलीशम्भुमुखमहायज्ञाः ।
विषमव्याकरणाङ्गव्रतवन्हिसु पार्श्वफणिफणाश्चैव ॥२६१॥

परमेष्ठिमहाकाव्यस्थानकतनुवातमृगशिरस्ताराः ।
पञ्चकुलमहाभूत प्रणामपञ्चोत्तरविमानाः ॥२६२॥

महाव्रतमरुद्वृक्षसमितिस्थानकानि च ।
शस्त्रश्रमस्य चैतानि बध्नीयात् पञ्चसंख्या ॥२६३॥

यथा—

पञ्चेषुद्विपभेदपञ्चवदनः पञ्चव्रतस्वस्तरुः
स्वर्णाद्रिः समुदञ्चिपञ्चविषयव्यापारपङ्काशुमान् ।
पञ्चाङ्गस्थितिमुक्तपञ्चमगतिः प्रस्थानपञ्चारव :
सेव्यः पञ्चसमित्यनादिनिलयः पञ्चेन्द्रियाणां जयः ॥

कर्णस्य सूनुर्वृषसेनवीरः शरप्रपातैः परिपीडितायाः ।
पञ्चेन्द्रियाणीव परध्वजिन्या द्राग् द्रौपदेयान् विधुरीचकार ॥

म. टी. चतुःसंख्या यथा–ब्रह्ममुखानि चत्वारि । वेदा ऋग् १. यघु: [जुः] २. साम ३. अथर्व ४. रूपाः । हरिभुजाश्चतस्रः । सुरगजरदो ऐरावणदन्ताः । वर्णाश्चत्वारो ब्राह्मण १. क्षत्रिय २. वैश्य ३. शूद्ररूपा. ४। चतुरिकास्तम्भाः चत्वारः । संघः साधुसाध्वीश्रावक-श्राविकारूपः । समुद्राश्चत्वारः । श्रमघाताः काट १. कडग २. अघोरग ३. पोरग ४. लक्षणाः । खड्गे चत्वारः ते । गोस्तनाः प्रसिद्धाः । आश्रमाः ब्रह्मचारि १. गृहि २. वानप्रस्थ ३. भिक्षुरूपाः ४ । कषायाः क्रोध १. मान २. माया ३. लोभरूपाः ४ । दिशः पूर्वा १. दक्षिणा २. पश्चिमोत्तरारूपाः ३-४. । गजजातयः भद्र १. मन्द २. मृग

३. मिश्राख्याः[1] ४। यामाः प्रहराश्चत्वारः। सेनाङ्गानि गजा १ श्व २. रथ ३. पदातयः ४.। दण्डहस्ताश्चत्वारः चतुर्भिर्हस्तैर्दण्डस्य मीयमानत्वात्। महाजनश्रेष्ठिवणिजश्चत्वारः। दशरथपुत्राः रामलक्ष्मणभरतशत्रुघ्नलक्षणाः। उपायाः सामदानभेददण्डलक्षणाः। ध्यानानि आर्त्त १. रौद्र २. धर्म ३. शुक्ल ४. रूपाणि। कथाः दमयन्ती १. हर्षाख्या २. कादम्बरी ३. वासवदत्ता ४. रूपाः। अभिनयाः सात्त्विक १. कायिक २. वाचिका ३. हार्यरूपाश्चत्वारः। रीतयो वैदर्भी १. पांचाली २. लाटीया ३. गौडीयारूपाः ४.। गोपादाश्चत्वारः। मालास्तबकाश्चत्वारः। कराङ्गुलयश्चतस्त्रः। संज्ञा आहार १. भय २. मैथुन ३. परिग्रहरूपाः४.। सुरभेदाः वैमानिक १. ज्योतिष्क २. व्यन्तर ३. भवनपतिरूपाः४। योजनस्य क्रोशाश्चत्वारः। लोकपालाः सोम १. यम २. वरुण ३. धनद ४. रूपाः। अत्रोदाहरणानि स्पष्टानि।

पञ्चसङ्ख्या यथा–स्मरबाणाः पञ्च उन्माद १. मोहन २. तापन ३. शोषण ४. मारणाख्याः ५.। पाण्डवाः पञ्च-युधिष्ठिर १. भीम २. अर्जुन ३. सहदेव ४. नकुल ५. रूपाः। इन्द्रियाणि पञ्च-श्रोत्र १. चक्षु २. घ्राण ३. रसन ४. स्पर्शनरूपाणि ५.। कराङ्गुलयः साङ्गुष्ठाः पञ्च। शम्भुमुखानि पञ्च। महायज्ञाः पञ्च-देवयज्ञ १. पितृयज्ञ २. ऋषियज्ञ ३. अतिथियज्ञ ४. भूतयज्ञरूपाः४। विषयाः पञ्च पञ्चेन्द्रियग्राह्याः। व्याकरणाङ्गानि सूत्र १. लिङ्ग २. आदि ३. नाममाला ४. उणादि ४. रूपाणि। व्रतवह्नयः पञ्चाग्नितपोरूपाः। सुपार्श्वतीर्थकृतो, लाञ्छनफणिफणाः पञ्च। परमेष्ठिनः अर्हत् १. सिद्ध २. आचार्य ३. उपाध्याय ४. साधु ५. रूपाः। महाकाव्यानि पञ्च-मेघदूत १. कुमारसम्भव २. रघुवंश ३. माघ[2] ४. किरात[3] ५ रूपाणि। स्थानकानि पञ्च। तनुवाताः पञ्च। प्राणा १. प्राण २. समान ३. उदान ४. व्यान ५. रूपाः; अथवा तनूनि शरीराणि तैजस १. कार्मण २. औदारिक ३. वैक्रिय ४. आहारकरूपाणि५। वायवः पञ्च प्राणाख्याः। मृगशिरस्ताराः मृगशिरोनक्षत्रशिरःस्थाः पञ्च, ताराः पञ्च। कुलानि पञ्च लोके पंचउल इति प्रसिद्धिः। महाभूतानि पृथिव्यादीनि पञ्च। प्रणामाः पञ्च।[4] उत्तरविमानाः पञ्च विजय १. वैजयन्त २. जयन्ता ३. ऽपराजित ४. सर्वार्थसिद्धि ५. रूपाः। महाव्रतानि–प्राणातिपात १. मृषावाद २. अदत्तादान ३. मैथुन ४. परिग्रह ५. रूपाणि। मरुद्वृक्षाः–कल्प १. पारिजात २. मन्दार ३. हरिचन्दन ४. सन्तान ५. रूपाः। समितयः पञ्च–ईर्या १. भाषा २. एषणा ३. आदाननिक्षेपा ४. पारिष्ठापनिका ५. रूपाः। स्थानकानि–शस्त्रश्रमस्य आलीढ १. प्रत्यालीढ २. वैशाख ३. मंडल ४. समपाद ५. रूपाणि। अत्रोदाहरणानि स्पष्टानि।

का. क. रसरागवज्रकोणास्त्रिशिरोनेत्रान्तराणि गुणतर्काः।
दर्शनगुहमुखभूखण्डचक्रिणः स्युरिह षट्संख्याः ॥२६४॥[5]

यथा—

यस्योग्रमूर्तेः शरभूर्बभार षड्भिर्गुणैः षण्मुखतां प्रतापः।
यत्कुण्डलानीव विरेजुरुच्चैश्चण्डद्युतां द्वादशमण्डलानि॥

द्वीपरविवाहपातालशक्रवाहमुखदुर्गतिसमुद्राः ।
भयसप्तपर्णपर्णाः गोदावर्यस्त्वमी सप्त ॥२६५॥

---

1. कषायाः :————मिश्राख्याः–इदं पा.म. पुस्तके नास्ति।
2. माघप्रणीतं 'शिशुपालवधम्'।
3. दण्डिप्रणीतं 'किरातार्जुनीयम्'
4. 'प्रणामाः पञ्च' इतीदं पा.म. पुस्तके नास्ति।
5. श्रीपार्श्वचिह्नफणिफणतत्त्वक्षेत्रानलज्वालाः ।
राजाङ्गधान्यभुवनस्वरकुलपर्वतनयाः ससन्ताना ः॥
ला.पा. पुस्तकेषु।

यथा—

त्रैलोक्यालयसप्तनिर्भयभयप्रध्वंसलीलाजय—
स्तम्भा दुस्तरसप्तदुर्गतिपुरद्वारावरोधार्गलाः ।
प्रीतिप्रोक्षितसप्ततत्त्वविटपिप्रोद्भूतनूत्नाङ्कुराः
शीर्षे सप्तभुजङ्गपुङ्गवफणाः पार्श्वप्रभोः पान्तु वः ॥

दिग्देशकुम्भिपालाः कुलपर्वतशम्भुमूर्तिवसवश्च ।
योगाङ्गव्याकरणब्रह्मश्रुत्यहिकुलान्यष्टौ ॥२६६॥

यथा—

अथावनीभारमुरीचकार जयातिरेकप्रवरो जयन्तः ।
गीतं दिगन्तेषु यशो यदीयं श्रोतुं दधेऽष्टश्रुतितां विधाता ॥

भूखण्डकृत्तरावणमुण्डसुधाकुण्डजिनपद्मानि ।
ग्रैवेयसरसव्याघ्रीस्तनगुप्तनिधिग्रहास्तु नवसंख्याः ॥२६७॥

यथा—

ध्याते यत्र नवग्रहार्त्तिरुदयं नायाति तत्त्वानि यो
व्याचख्यौ नव यस्य वाङ्नवसुधाकुण्डत्रपाकारिणी ।
नित्यं यत्पदपद्मयुग्मपुरतः पद्मानि देवा नव ।
व्यातेनुर्नवमो जिनः स जयति श्रीपुष्पदन्तप्रभुः ॥

म. टी. अथ षट्सङ्ख्या यथा—

रसा तिक्त १ कटु २ कषाय ३ आम्ल ४ मधुर ५ लवण ६ रूपाः । रागाः षट्
श्रीरागो१ वसन्तश्च २ पञ्चमो ३ भैरवस्तथा । मेघरागश्च ५ विज्ञेयः षष्ठो नट्टनारायणः ॥१॥

इति । वज्रकोणाः षट् । त्रिशिरो नेत्राणि धनदलोचनानि षट् । अन्तरारयः—काम १ क्रोध २ लोभ ३. मान ४ मद ५. हर्षरूपाः ६ । गुणाः सन्धि १ विग्रह २. यान ३. आसन ४. द्वैध ५. आश्रयरूपाः ६. । तर्कः षट्दर्शनविचार-रूपः । दर्शनानि जैन १. मीमांसक २. बौद्ध ३. सांख्य ४. शैव ५. नास्तिकरूपाणि ६. । गुहमुखानि षण्मुखमुखानि षट् । भूखण्डानि षट्-दक्षिणमध्यमखण्ड १, गङ्गानिष्कुटखण्ड २, सिन्धुनिष्कुटखंड ३, उत्तरमध्यमखण्ड ४, गङ्गानिष्कुटखंड ५, सिन्धुनिष्कुटखण्ड ६, रूपाणि ।

चक्रिणः षट्—मान्धाता १. धुन्धुमारश्च २. हरिश्चन्द्रः ३ पुरूरवः (वाः) ४ ।
भरतः ५. कार्तवीर्यश्च ६. षडेते चक्रवर्तिनः ॥१॥

इति अत्रोदाहरणानिस्पष्टानि ।

सप्तसंख्या यथा-द्वीपाः सप्त-जम्बू १. प्लक्ष २. कुश ३. क्रौंच ४, शाल ५. शाल्मलि ५६. पुष्कर ७. रूपाः । रविवाहाः सूर्याश्वा सप्त । पातालानि सप्त । शक्रवाहमुखानि सप्त । दुर्गतयः सप्त । समुद्राः सप्त-लवण १ क्षीर २.

दधि ३. आज्य ४. सुरा ५ इक्षु ६ स्वादु ७. वारिरूपाः। श्रीपार्श्वनाथस्य लाञ्छनफणिफणाः सप्त। तत्त्वानि सप्त। द्रव्यादीनि क्षेत्राणि सप्त-जिनभवन १. विम्व २. पुस्तक ३. साधु ४. साध्वी ५. श्रावक ६. श्राविका ७. रूपाणि। अनलज्वालाः सप्त यथा भव (वं) ति-हिरण्या। कनका २. रक्ता ३. कृष्णा ४. प्रभा ५ चान्या अतिरिक्ता ६ बहुरूपे ७. ति सप्त। सप्तार्चिषो ज्वालाः। राज्याङ्गानि-स्वामि १. अमात्य २. सुहृत् ३. कोश ४. राष्ट्र ५. दुर्ग ६. बल ७. रूपाणि। धान्यानि-सालि १. यव २. गोधूम ३. मुद्ग ४. वल्ल ५. चणक ६. चपलक ७. रूपाणि। भुवनानि-भूर्लोक १. भुवोर्लोक २. स्वर्लोक ३. महालोक ४. जनलोक ५. तपोलोक ६. सत्यलोक ७. रूपाणि। स्वराः-षड्ज १. ऋषभ २. गान्धार ३. मध्यम ४. पञ्चम ५. धैवत ६. निषध ७रूपाः। कुलपर्वताः सप्त यथा—

महेन्द्रो मलयः सह्य हिमवान् पारियात्रकः। गन्धमादनः सुदायः सप्तैते कुलपर्वताः ॥१॥

इति। नया-नैगम १. सङ्ग्रह २. व्यवहार ३. ऋजुसूत्र ४. शब्द ५. समभिरूढ ६. एवम्भूत ७. रूपाः। सन्ताना: सप्त। भयानि सप्त इहलोकादीनि।

यदुक्तम्—

इह १. परलोआ २. दाण ३. मकम्मा ४. आजीव ५. मरण ६. मसि लोए ७।

इति। सप्तपर्णपर्णानि सप्त। पर्णवृक्षस्य पत्राणि सप्त। गोदावर्यः सप्त। अत्रोदाहरणानि स्पष्टानि।

अथाष्टसंख्या यथा—दिग्देशाः-पूर्वा १. अग्नि २. दक्षिणा ३. नैर्ऋति ४. पश्चिमा ५. वायु ६. उत्तरा ७. ईशान ८ रूपा. अष्टौ दिक्कुम्भिनो दिग्गजाः। अष्टौ ऐरावताद्या.। यदुक्तम्—

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥१॥

दिग्पाला अष्टौ इन्द्राद्याः। यदुक्तम्—

त्रिदिशं तु स्वय इन्द्रा १ ग्नि २ यम ३. नैऋ(र्ऋ)ताः ४।
वरुणो ५. वायु ६. कुबेरा ७. वीशानश्च ८. यथाक्रमम् ॥१॥ इति

कुलपर्वता अष्टौ पूर्वोक्ता मेरुसहिताः। शम्भुमूर्तयः अष्टौ। वसवो देवा अष्टौ। योगाङ्गानि—यम १. नियम २. करण ३. प्राणायाम ४. प्रत्याहार ५. धारणा ६. ध्यान ७. समाधि ८. रूपाणि। व्याकरणान्यष्टौ ब्राह्मादीनि। यदुक्तम्—

ब्राह्ममैशान २. मैन्द्रं च ३. प्राजापत्यं ४. बृहस्पतिम् ५। त्वाष्ट्र ६. मापिशलं ७. चेति पाणिनीय ८. मथाष्टमम् ॥

ब्रह्मश्रुतयः अष्टौ। अहि लानि-अनन्त १. वासुकि २. तक्षक ३. कर्कोट ४. पद्म ५. महापद्म ६. शंख ७. पुत्तलिक ८. रूपाणि अष्टौ। शेषं स्पष्टं।

नव संख्या यथा भूखण्डानि नव-भरत १ किन्नर २. हरित ३. इलावर्त ४. रम्य ५. हरिण्य ६. कुरु ६ भद्रास्य ८. केतुमाल ९. रूपाणि। कृतरावणमुण्डानि छिन्नरावणमस्तकानि नव। सुधाकुण्डानि नव। जिनपद्मानि जिन-पदन्यासकमलानि नव ग्रैवेयकाणि। नव रसाः शृंगार १. हास्य २. करुण ३. रौद्र ४. वीर ५. भयानक ६. वीभत्सा ७. द्भुत ८. शान्तरूपाः ९। व्याघ्रीस्तना नव। गुप्तयो ब्रह्मचर्यगुप्तयो नव। निधानानि नव महापद्मादीनि। यदुक्तम्—

महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च चर्चाश्च निधयो नव ॥१॥

ग्रहाः—चन्द्र १. सूर्य २. मङ्गल ३. बुध ४. बृहस्पति ५. शुक्र ६. शनैश्चर ७. राहु ८. केतु ९. रूपाः। शेषं सुगमम्।

का.क. रावणमुखाङ्गुलीचन्द्रवाहयतिधर्मशम्भुकर्णदिशः ।
अङ्गद्वारावस्थादशाः पुनः संख्यादशैव स्युः ॥२६८॥

यथा—

निजाश्रुनीरैः स्नपिता द्विपद्भिः प्रदीपिता मौलिमणीमृजाभिः ।
दशापि यत्पादनखाः समीयुर्दिशां दशानामपि दर्पणत्वम् ॥

रुद्रास्त्रनेत्राण्यप्यङ्गोपाङ्गानि जिनमतोक्तानि ।
एकादश ध्रुवं स्युस्तथा जिनोपासकप्रतिमाः ॥२६९॥

यथा—

पार्श्वः सोऽस्तु मुदे न तस्य पुलिनः सप्तास्यचूडामणी–
सङ्क्रान्तः किल योऽष्टमूर्तिरजनि स्पष्टाष्टमर्मच्छिदे ।
यद्भक्तं दशदिग्जनप्रजमभित्रातुं तथा सेवितुं
यं यत्पादनखाविशत्तनुरभूदेकादशाङ्गोऽपि सः ॥

गृहनेत्रराशिमासाः संक्रान्त्यादित्यचक्रराजानः ।
चक्रिबृहस्पतिहस्ताः सभासदो द्वादश भवन्ति ॥२७०॥

यथा—

येन द्वादश सद्व्रतानिधिनिना ता द्वादशानुक्रमं भिक्षुणां प्रतिमास्तथा च दधिरे सद्भावतो द्वादश ।
यश्च द्वादशकल्पवासवनिषेव्याङ्घ्रिर्भवे द्वादशोऽङ्गानि द्वादश संजगौ जिनपतिः शान्तिः स वोऽस्तु श्रिये ॥

प्रथमजिनभवाघोषा विश्वेदेवास्त्रयोदश भवेयुः ।

यथा—

आद्यो जिनः पातु जगन्ति यस्त्रयोदशक्रियास्थानविमुक् त्रयोदशे ।
जातो भवेत्तीर्थकरः परं गुणस्थानाद्गुणस्थानमगात् त्रयोदशात् ।

म. टी. दशसंख्या यथा रावणमुखानि दश । अङ्गुलयो हस्ताङ्गुलयो दश । चन्द्रवाहाः चन्द्राश्वा दश । यतिधर्माणः— क्षान्ति १ मार्दव २ आर्जव ३ मुक्ति ४ तपः ५ संयम ६ सत्य ७ शौच ८ आकिञ्चन्य ९ ब्रह्मचर्य १० रूपाः । शम्भुकर्णाः दश । पञ्चमुखत्वात् दिशः प्रागुक्ता अष्टौ, उर्ध्वाधः सहिता दश । अङ्गद्वाराणि शरीररन्ध्राणि दश । कामावस्था दश चिन्ताद्याः । यदुक्तम्—

श्रुत्वेति सचिवो दध्यौ दशावस्था हि कामिनाम् ।
चिन्ता १ च सङ्गमेच्छा २ च निश्वासश्च ३ ज्वरस्तथा ४ ॥

देहे दाहो ५ ऽरुचिश्चान्ने ६ मूर्छा ७ ऽथोन्माद एव च ८ ।
नवम्यां प्राणसन्देहो ९ दशम्यां मुच्यतेऽसुभिः १० ॥२॥

दशादश इत्यादिकं सुगमम् ।

अथैकादशसंख्या यथा–रुद्रा एकादश । तन्नेत्राण्यप्येकादश । अङ्गानि एकादश आचाराङ्गादीनि । यदुक्तम्—

आचराङ्गं सूत्रकृतं स्थानाङ्गं समवाययुक् ।
पञ्चमं भगवत्यङ्गं ज्ञातधर्मकथापि च ॥१॥

उपासकान्तकृदनुत्तरोपपातिका दश ।
प्रश्नव्याकरणं चैव विपाकश्रुतमेव च ॥२॥

उपाङ्गानि एकादश—औपपातिक१ राजप्रश्नीय२ जीवाभिगम३ प्रज्ञापना४ जम्बूद्वीपप्रज्ञप्ति५ सूर्यप्रज्ञप्ति६ चन्द्रप्रज्ञप्ति६ निरयावलिका७ कल्पावतंसिका८ पुष्पिका९ पुष्पचूलिका१० वह्निदशा११ रूपाणि । श्रावकप्रतिमा एकादशदर्शनाद्या । यदुक्तम्—

दंसण१ वय२ सामायिय३ पोसह४ पडिमा५ अबंभ६ सच्चित्ते७। आरंभ८ पेस९ मुद्दिट्ठवज्जए१० समणभूए अ११ ॥१॥ इत्यादि सुगमं ।

द्वादश संख्या यथा—गुहस्य कार्तिकेयस्य नेत्राणि द्वादश । राशयः—मेष१ वृष२ मिथुन३ कर्क४ सिंह५ कन्या६ तुल७ वृश्चिक८ धन९ मकर१० कुम्भ११ मीन१२ रूपाः । मासाः—चैत्र१ वैशाख२ ज्येष्ठ३ आषाढ४ श्रावण५ भाद्रपद६ आश्विन७ कार्त्तिक८ मार्गशीर्ष९ पौष१० माघ११ फाल्गुन१२ रूपाः । सङ्क्रान्तयः मेषाद्या द्वादश । आदित्याः सूर्या द्वादश । चक्रिराजानो द्वादश—भरत१ सगर२ मघवन्३ सनत्कुमार४ शान्ति५ कुन्थु६ अर७ सुभूम८ पद्म९ हरिषेण १० जय११ ब्रह्मदत्त१२ रूपाः । चक्राणि द्वादश चक्रवर्तिनां द्वादशत्वात् । बृहस्पतिहस्ता द्वादश । सभासदो द्वादश-यदुक्तम्—

आग्नेय्यां गणभृत्१ विमानवनिता२ साध्व्य३ स्तथा नैऋतौ ज्योतिर्व्यन्तरभावनेशदयिता३ वायव्यगास्तत्प्रियाः ३। ऐशान्यां च विमानवासिनरनार्यः संश्रिता यत्र तत् जैनास्थानमिदं चतुस्त्रि परिषत् सम्भूषितं पातु वः ।१। इत्यादि सुगमम् ।

अथ त्रयोदशसंख्या यथा—प्रथमजिनभवा त्रयोदश-धन-सार्थवाह१ युगलि२ सौधर्मसुर३ महाबलभूप४ ललिताङ्गदेव५ वज्रजंघनृप६ युग्मि७ सौधर्मसुर८ वैद्य९ अच्युतसुर१० चक्रि११ सर्वार्थसुर१२ नाभिभूरूपाः ।:

अघोषा त्रयोदश—क ख च छ ट ठ त थ प फ शषसरूपा । विश्वे देवाः त्रयोदशेत्यादि सुगमम् ।

का. क. विद्यास्थानस्वरभुवनरत्नपुरुषान्वयस्वप्नाः ॥२७१॥
जीवाजीवोपकरणगुणमार्गणरज्जुसूत्रपूर्वभिदाः ।
कुलकरपिण्डप्रकृतिस्रोतस्विन्यः चतुर्दश तु ॥२७२॥

यथा—

यो गर्भाश्रयणे चतुर्दशशुभस्वप्नाभिसंसूचितो यो जन्माधिगमाच्चतुर्दशमहापूर्वाब्धिपारङ्गमः ।
यज्ज्ञानैकतटे चतुर्दश लसद्रज्जुप्रमाणोपमा लोकाः किंतु चतुर्दशो जिनपतिः सोऽनन्तजित् पातु वः ॥ –

परमा धार्मिकतिथयश्चन्द्रकलाः पञ्चदश भवन्तीह ।

यथा—

तिथिंतिथिं प्रतिस्वर्गिभोग्यैकैककलाधिका ।
कला यस्येशपूजाऽऽसीदेकः श्लाघ्यः स चन्द्रमाः ।

शुक्रार्चिषः शशिकला विद्यादेव्यश्च षोडश भवन्ति ॥२७३॥

यथा—

विधौः कलैका हरमूर्ध्नि भालमस्या वितेने विधिरेकया च ।
इति द्वितीयादिनिशासु दृष्ट्वा वृक्षौ कलास्तस्य चतुर्दशैव ।।

म. टी. अथ चतुर्दशसंख्या यथा—विद्यास्थानानि चतुर्दश । भुवनानि चतुर्दश । रत्नानि चक्र १ छत्र २ दण्ड ३ चर्म ४ खड्ग ५ कामिनी ६ मणि ७ पुरोहित ८ गज ९ तुरग १० सेनानी ११ गाथापति १२ वर्द्धकि १३ स्त्रीरूपाणि १४ । लक्ष्मी १ कौस्तुभ २ पारिजातक ३ सुरा ४ धन्वंतरि ५ चन्द्र ६ कामधेनु ७ इन्द्रगज ८ रम्भादि देवाङ्गना ९ सप्तमुखाश्च १० अमृत ११ हरिधनुः १२ शंख १३ विष १४ रूपाणि वा । पुरुषान्वयाः पुरुषस्य वंशा स्वप्नाः गजवृषभाद्याः । यदुक्तम्—

गय १ वसह २ सीह ३ अभिसेय ४ दाम ५ ससि ६ दिणयरं ७ झयं ८ कुंभं ९ । पउमसर १० सागर ११ विमाणभवण १२ रयणुच्चय १३ सिहिं च १४ ।।१।। जीवभेदाश्चतुर्दश एकेन्द्रियाद्याः । यदुक्तम्—

एगिंदिय सुहुमिहरा सन्निअरपणिंदिया य स विति चउ ।
अपजत्ता पज्जत्ता कमेण चउदस जिअट्ठाणा ।।१।।

अजीवभेदाश्चतुर्दश धर्मास्तिकायाद्याः । यदुक्तम्—

धम्मा १ धम्मा २ गासा ३ तियतियभेया तहेव अद्धा य १० ।
खंधा ११ देस १२ पएसा १३ परमाणू १४ अजीव चउदसहा ।१।

उपकरणानि साधूपकरणानि पात्रादीनि । यदुक्तम्—

पत्तं १ पत्ताबंधो २ पायट्ठवणं च ३ पायकेसरिआ ४ ।
पडलाइं ५ रयत्ताणं ६ गुच्छओ पायनिज्जोगो ७ ।।१।।

तिन्नेवयपच्छागा १० रयहरणं चेव ११ होइ मुहपुत्ती १२ ।
तत्तो अमत्तए खलु चउदसमो चोलपट्टो अ १४ ।२।।

गुणस्थानानि चतुर्दश । यदुक्तम्—

मिच्छे १ सासण २ मीसे ३ अविरय ४ देसे ५ पमत्त ६ अपमत्ते ७ ।
नियट्टि ८ अनियट्टि ९ सुहुम १० वसम ११ खीण १२ सजोगि १३ अजोगि १४ गुणा ।।१।।

मार्गणास्थानानि गत्यादीनि । यदुक्तम्—

गइ १ इंदिए अ २ काए ३ जोए ४ वेए ५ कसाय ६ नाणेसु ७ ।
संजम ८ दंसण ९ लेसा १० भव ११ सम्मे १२ सन्नि १३ आहारे १४ ।।१।।

रज्जवो लोकनालिसत्काश्चतुर्दश । पूर्वाणि उत्पाद १ अग्रायणीय २ वीर्यप्रवाद ३ अस्तिनास्तिप्रवाद ४ ज्ञानप्रवाद ५ सत्यप्रवाद ६ आत्मप्रवाद ७ कर्मप्रवाद ८ प्रत्याख्यानप्रवाद ९ विद्याप्रवाद १० कल्याण ११ प्राणावाय १२ क्रियाविशाल १३ लोकबिन्दुसार १४ रूपाणि । चतुर्दश कुलकराः—सुमति १ प्रतिश्रुति २ सीमंकर ३ सीमंधर ४ क्षेमंकर ५ क्षेमंधर ६ विमलवाहन ७ चक्षुष्मत् ८ यशोमत् ९ अभिचंद्र १० चंद्राभ ११ प्रसेनजित् १२ मरुदेव १३ नाभि १४ रूपाश्चतुर्दश ।

पिण्डप्रकृतयश्चतुर्दश गत्याद्याः । यदुक्तम्––

गइ १ जाइ २ तणु ३ उवंगा ४ बंधण ५ संघायणाणि ६ संघयणा ७ ।
संठाण ८ वन्न ९ गंध ११ फास अणुपुव्वि १३ विहगगइ १४ ॥१॥ इति

स्रोतस्विन्यो––गंगा १ सिन्धु २ रोहितांशा ३ रोहिता ४ हरिकान्ता ५ हरिसलिला ६ शीतोदा ७ सीता ८ नारीकान्ता ९ नरकान्ता १० सुवर्णकूला ११ रूप्यकूला १२ रक्ता १३ रक्तवती १४ रूपाः चतुर्दशेत्यादि सुगमम् ।

अथ पञ्चदशसंख्या यथा––परमा धार्मिकाः पञ्चदश अम्बाद्याः । यदुक्तम्––

अंबे १ अंबरिसी २ चेव सामे ३ सबल त्तियावरे ४ ।
रुद्दो ५ वरुद्दे ६ काले ७ महाकाल त्तियावरे ८ ॥१॥
असी ९ असिपत्ते १० कुंभे ११ वालुय १२ वयरणी तिय १३ ।
खरस्सरे १४ महाघोसे १५ एए पनर साहिया ॥२॥

तिथयः––प्रतिपत् १ द्वितीया २ तृतीया ३ चतुर्थी ४ पंचमी ५ षष्ठी ६ सप्तमी ७ अष्टमी ८ नवमी ९ दशमी १० एकादशी ११ द्वादशी १२ त्रयोदशी १३ चतुर्दशी १४ पूर्णिमा अमावस्यान्यतररूपाः १५ । चन्द्रकलाः पञ्चदशेत्यादि सुगमम् ।

अथ षोडशसंख्या यथा––शुक्रार्चिषः शुक्रकिरणा, षोडश चन्द्रकलाः, षोडश विद्यादेव्यो–रोहिणी १ प्रज्ञप्ती २ वज्रशृङ्खला ३ वज्रांकुशी ४ अप्रतिचक्रा ५ पुरुषदत्ता ६ काली।

का.क सप्तदश संयमाश्चाष्टादश विद्याः पुराणानि ।
द्वीपाः स्मृतयो ज्ञाताध्ययनान्येकोनविंशतिमितानि ॥२७४॥

यथा––

अष्टादशाध्यैष्ट सुधीः स विद्यास्त्वष्टादशद्वीपनृपान् विजिग्ये ।
दधौ च धर्मं स्मृतिभिः पुराणैर्विस्पष्टमष्टादशभिः प्रणीतम् ॥

करशाखाः श्रीभर्तुर्विंशोपकाः सकलजननखाङ्गुल्यः ।
दशकन्धरनेत्रभुजास्तु संख्यया विंशतिर्वाच्याः ॥२७५॥

विंशत्या नयनैर्दोर्भिः विंशत्या दशकन्धरः ।
पश्यन् श्लिष्यन् व्यधाद्ध्वाः सविंशतिगुणं सुखम् ॥

कमलदलरावणाङ्गुलिशतमखमखजलधियोजनानि स्युः ।
शतपत्रपत्रादिमजिनसुतधृतराष्ट्रनृपतिसुताः ॥२७६॥

जपमालामणिहारस्त्रजोऽस्त्रस्क् कीचकाः शतप्रमिताः ।

यथा––

हस्तेन चेदिक्षितिपः शतघ्नीमुदास घात्याः शतमित्यमर्षात् ।
स्थाप्याश्च पञ्चेति महीं महाङ्घ्रिघातेन चक्रेऽङ्गुलिघातचिह्ननाम् ॥

पादाङ्गुलीभिर्युधि केऽपि केऽपि कराङ्गुलीभिः परिचूर्णनीयाः ।
घात्या द्विपोऽमी शतमित्यमर्षान् कृष्णामुनैः पञ्चभिरप्यभाषि ।

अहिपतिमुखगङ्गामुखपङ्कजदलरविकरेन्द्रनेत्राणि ॥२७७॥
विश्वामित्राश्रमवर्षार्जुनभुजसामवेदशाखाश्च ।
पुण्यनरदृष्टचन्द्राः सहस्रसंख्या अमी ज्ञेयाः ॥२७८॥

यथा—

सहस्रपत्रपत्राणां प्रत्येकं स्मेरताकृते ।
सहस्रकरविस्तारं किं सहस्रकरोऽकरोत् ।

एवमत्र ग्रन्थगौरवभयादसङ्कलिता अपि संख्याः काव्योपयोगात् प्रेक्षावद्भिः प्रेक्ष्याः ।
इति श्रीजिनदत्त० अर्थसिद्धिप्रताने चतुर्थे संख्यास्तबकः ...।

म. टी. **महाकाली** ८ गौरी ९ गान्धारी १० सर्वास्त्रमहाज्वाला ११ मानवी १२ वैरोट्या १३ अच्छुप्ता १४ मानसी १५ **महामानसी** १६ रूपाः षोडशेत्यादि सुगमम् ।

सप्तदश संयमा आस्रवाद्याः । यदुक्तम्—

पंचास्रवादि विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः ।
दण्डत्रयविरतिश्च संयम सप्तदशभेदः ॥

अष्टादश विद्याः । अष्टादश पुराणानि, यथा—

ब्राह्मं १म्भोरुहं २ विष्णु ३ वायु ४ भगवत्संज्ञं ५ ततो नारदं ६ मार्कण्डेयमथाग्निदैवतमिति ८ प्रोक्तं भविष्यं ९ तथा । तस्माद् ब्रह्मविवर्त्तसंज्ञमुदितं १० लिङ्गं ११ वराहं १२ स्मृतं स्कान्दं १३ वामनं १४ मत्स्य १५ कूर्मं १६ गरुड१६ ब्रह्माण्डमष्टादशं ॥

अष्टादश द्वीपाः । स्मृतयोऽष्टादश । यथा—

मनु १ अत्रि २ विष्णु ३ हारीत ४ याज्ञवल्क्याः [क्यो] ५ शनों ६ङ्गिराः ७ ।
यमाः ८ पस्तम्ब ९ संवर्त्ताः १० कात्यायनः ११ बृहस्पती १२ ।
पराशरो १३ व्यास १४ शंखलिखितौ १५ दक्ष १६ गौतमौ १७ ।
शतातपवसिष्ठाश्च १८ धर्मशास्त्रप्रयोजकाः ॥२॥

एतेऽष्टादश स्मृतिकर्तारस्तैः कृताः स्मृतयोऽप्यष्टादश, मनुस्मृतिः अत्रिस्मृतिरित्यादि । तत्र शङ्खलिखितौ भ्रातरौ ताभ्यां कृता स्मृतिस्तथा । शतातपवसिष्ठाभ्यां कृता स्मृतिः ।

ज्ञाताध्ययनानि एकोनविंशतिरित्यादि ।

अथ विंशतिसंख्या यथा—करशाखा अङ्गुल्यो विंशतिः । श्रीभर्तुर्लक्ष्मीवतो हस्ताङ्गुलीपर्वसु विंशतिः पक्वा-विंशतिः । सकलजनस्य नखा अङ्गुल्यश्च विंशतिः । दशकन्धरस्य नेत्राणि भूजाश्च विंशतिरित्यादि ।

अथ शतसंख्या यथा—कमलदलानि शतं, रावणाङ्गुलयः शतमिता विंशतिभुजत्वात् । शतमखस्य इन्द्रस्य मखा यज्ञाः, शतं । जलधि योजनानि शतं । शतपत्रीति औषधीविशेषपत्राणि शतं । आदिमजिनस्य वृषभजिनस्य सुता भरताद्याः शतं । धृतराष्ट्रनृपतेः सुता दुर्योधनाद्याः शतं । जपमालामणयः शतं । हारस्य स्त्रजः लोकेसरि इति प्रसिद्धाः शतं । अश्वरुजो रुधिरप्रकोपजा रोगाः शतं । कीचकाः शतं इत्यादि ।

अथ सहस्रसंख्या यथा—अहिपतिमुखानि, गंगामुखानि, पङ्कजलानि, पङ्कजस्य पत्राणि, रविकराः, इन्द्रनेत्राणि विश्वामित्राश्रमवर्षाणि, अर्जुनभुजाः, सामवेदशाखाः, पुण्यनरदृष्टचन्द्राः, एते सहस्त्रमिता इत्यादि ।।छ।।

इति श्रीतपागच्छाधिनायकपातसाहि श्री अकब्बरप्रतिबोधदायक श्री शत्रुञ्जयादितीर्थकरमुक्तिकारक भट्टारक श्री८ श्री हीरविजयसूरीश्वरशिष्यपण्डितश्री शुभविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्देऽर्थसिद्धिप्रतानप्राप्त-संख्यास्तबकोद्योतकः षष्ठ प्रसरः ।।छ।।७

।। अर्हद्भ्यो नमः ।।

प्रथमं परिशिष्टम्

स्वोपज्ञा 'परिमल' टीका

स्वस्ति जयोऽभ्युदयश्च

श्रीशारदां हृदि ध्यात्वा व्याख्यातं परिमलाख्यया । काव्यकल्पलतावृत्तेः किञ्चिद्वच्मि विवेचनम् ।।

वृत्तिकारः काव्यकल्पलतासूत्रे वृत्तिं कर्तुकामो वाङ्मयज्योतिर्विमर्शनपूर्वमभिधेयमाह—

विमृश्य वाङ्मयं ज्योतिरमरेण यतीन्दुना । काव्यकल्पलताख्येयं कविशिक्षा प्रतन्यते ।।

विमृश्य—निःशेषविशेषोल्लेखतया परामृश्य । वाङ्मयं ज्योति—निरन्तरानुशीलनं हि कविशिक्षोन्मीलनं; प्रतन्यते—विस्तारं नीयते, वृत्त्या विस्तार्यते । कल्पलताप्यमरेण देवेन वृद्धिं नीयते, अमर्त्यभूमिप्ररोहणशीलतया तदायत्तत्वात् । यतीन्दुना—यतते यतिः । पदि पठि प्रथि स्थलि हलि वलि वल्लि कटि चटि वटि वधि गाध्यधिवन्दितं; यत्रि वमि वामि कामि छर्दितं; त्रिमन्त्रि खण्डि मण्डि चण्डि पर्यंजि मस्यति वनि ध्वनि मनि गमि नमि ग्रंथि श्रंथि मन्यादिभ्यः इः । यत्नमरणं हि काव्यकरणम् । इन्दुरपि पीयूषमरीचिचयसेवनेन लतोपचयनिबन्धनम् । समुचितेष्टेत्यादि—इह खलु लोके त्रिविधा देवता समुचिता, इष्टा, समुचितेष्टा च । क्वचित् समुचितायाः स्तुतिर्यथा—नीतिकामशास्त्रारम्भे महीपतिमन्मथादेः स्तुतिः । यथा—

देव स जयति श्रीमान् दण्डधारो महीपतिः । यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति ।।

स एष भुवनत्रयप्रथितसंयमः शंकरो ।
बिभर्ति वपुषाऽधुना विरहकातरः कामिनीम् ।
अनेन किल निर्जिता वयमिति प्रियायाः करं ।
करेण परिताडयन् जयति जातहासः स्मरः ।।

क्वचिदिष्टा या, यथा—रघुमहाकाव्यारम्भे —

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।१।। (१.१).

क्वचित् समुचितेष्टा या, यथात्रैवाह । तथाहि-यत् किल काव्यलक्षणं वस्तुप्रस्तुतं पदधिदैवतरूपा भारती समस्तमतसम्मता च । तदुक्तं श्रीमाणिक्यसूरिभिः—

स्तुत्यं तत्रास्ति नूनं न जगति जनता यत्र बाधां विदध्यादन्योन्यस्पर्द्धिनोऽपि त्वयि तु अतिविधौ वादिनो निर्विवादाः ।
यत् तच्चित्रं न किञ्चित् स्फुरति मतिमतां मानसे विश्वमातर्वाक्त्वित्वं येन धत्से सकलनयमयं रूपमर्हन्मुखस्थं ।।१।।

नैगम १, संग्रह २, व्यवहार ३, ऋजुसूत्र ४, समभिरूढ ५, शब्द ७, एवंभूताः सप्त नयाः । अतो ग्रन्थकारस्तन्नमस्कारपूर्वम् ।।छ।।

सद्यो रसास्वादजन्मा-अत्र व्या. सू. ताभ्यां वात् डित् (हे. ५.६०५) । मन्नंताच्च नाम्नो, अन्नंताच्च बहुव्रीहौ, स्त्रियामाप्रत्ययो वा भवति । स च डित ।।छ।। सोदरेति-नासिकोदरौष्ठजंघादन्तकर्णशृङ्गाङ्गगात्रकण्ठादसहनं विद्यमान

पूर्वपदात् । असहनं विद्यमानपूर्वपदेभ्य एभ्यः स्त्रियां ङीर्वा भवति तुङ्गनासिका, कृशोदरी, कृशोदरा वा; बिम्बोष्ठी, वा, इत्यादि । असहनं विद्यमानपूर्वपदादित्येव । सहनासिका, अनासिका विद्यमाननासिका; सोदरा, अनुदरा, विद्यमानोदरा इत्यादि ।

अनुष्टुप् शासनमित्यादि—कार्यकारणयोरभेदाध्यवसायादनुष्टुप्शासनहेतुस्तबकोऽप्यनुष्टुप् शासनम् । छन्दोऽभ्यासहेतुस्तबकोऽपि छन्दोभ्यास इति स्तबकनामानि । रूढयौगिकमिश्राणामाख्यानमाख्या तद्धेतुस्तबकोऽपि । रूढयौगिकमिश्राख्यायौगिकानि च तानि आह्वानानि नामानि च, तेषां मालिका यौगिकाह्वानमालिका यौगिकनाममाला ।छ।।

तुर्ये इत्यादि—अलंकाराभ्यासस्तबकः १ वर्णस्तबकः २ आकृतिराकारस्तबकः ३ क्रियास्तबकः ४ प्रकीर्णस्तबकः ५ संख्यास्तबकः ६ समस्यास्तबकः ७ ।।छ।।

ओजे इत्यादि—ओजे विषमे पादे तुर्याच्च तुर्याद्वर्णात्, यगणजगणवर्जं नगणादिभिः षड्भिर्गणैर्न विपुला न विपुलादयः षड्भेदा भवन्ति । तुर्याद्यगणेन पथ्या वक्त्रं । जगणस्तु समपादयोरेव भवति । आसु न विपुलाद्यासु विषमपादे मन्ददाढ्र्याय प्रायस्तुर्यो गुरुः क्रियते । तथा च श्रीहेमछन्दश्चूडामणौ सर्वासां विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवतीति आम्नायः ।।छ।।

लक्ष्म्या स्वेतदित्यादि—एता न विपुलाद्या जातिपक्षे व्यक्तिपक्षे च स्युः । ततो जातिपक्षे आसु न विपुलाद्यास्वेतत् पूर्वोक्तं लक्ष्म लक्षणं; तयोरप्योजयोः प्रथमतृतीययोः पादयोः स्यात् । व्यक्तिपक्षे त्वेकस्मिन्नेव प्रथमेऽथ चैकस्मिन्नेव तृतीये । एतच्च विपुलादिलक्षणं प्रथमे पथ्या वक्त्रलक्षणं भवति । यथा महाकवीनां प्रयोगाः न विपुलाः ।

जातिपक्षे यथा—

पश्यन्ति देव चरणद्वन्द्वं ये तव भक्तितः । तेषां भवन्ति विपुलाः सद्यः कल्याणसम्पदः ।।

व्यक्तिपक्षे—

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः । तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ।। (रघु.)

तव मन्त्रकृतो मन्त्रैः दूरात् संयमितारिभिः । प्रत्यादिश्यन्त इव मे दृष्टलक्षभिदः शराः : ।। (   )

नविपुला जातिपक्षे यथा—

पादेन हता येन सा जाती लुब्धेन मल्लिका । अलेस्तस्य दैवादहो वदर्योऽपि सुदुर्लभः ।।

व्यक्तिपक्षे—

वन्दे कविं श्रीभारविं लोकसन्तमसच्छिदम् । दिवा दीपा इवाभान्ति यस्याग्रे कवयोऽपरे ।।
लोकवत् प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः । लोकव्यवहारं प्रति सदृशौ बालपण्डितौ[1] ।।१।।

जातिपक्षे भविपुला यथा—

इयं सखे चन्द्रमुखी स्मितज्योत्स्नाऽवभासिनी । इन्दीवराक्षी हृदयं दन्दहीति तथापि मे ।।१।।

व्यक्तिपक्षे यथा—

यस्य प्रभावाद् भुवनं शाश्वते पथि तिष्ठति । देवः स जयति श्रीमान् दण्डधारो महीपतिः ।।१।।

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा । उपस्थितं प्राञ्जलिना विनीतेन गु(ग)रुत्मता ।।१।।

---

१. वाग्भटालङ्कारस्य 'ज्ञानप्रमोदिका' टीकायां प्रति 'लोकव्यवहारं' इति ।

जातिपक्षे रविपुला यथा—

वधूभिः पीनस्तनीभिः तूलीभिः कुङ्कुमेन च। कालागुरुधूपधूमैर्हेमन्ते जयति स्मरः॥

व्यक्तिपक्षे—

महाकविं कालिदासं वन्दे वाग्देवतागुरुम्। यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत्॥

कामिनीभिः सुखं सङ्गः क्रियते पण्डितैरपि। यदि न स्याद् वारिवीचीचञ्चलं हतजीवितम्॥१॥ (शृ.श.)

जातिपक्षे सविपुला यथा—

सर्वातिरिक्तं लावण्यं बिभ्रती चारुविभ्रमा। स्त्रीलोकसृष्टिः सा नूनं निःसामान्यस्य वेधसः॥

व्यक्तिपक्षे—

मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः। षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः॥

अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः। उपस्थितेऽयं कल्याणी नाम्नि कीर्तिर्न एव यत्॥

जातिपक्षे सविपुला यथा—

क्षणविध्वंसिनि काये का चिन्ता मरणे रणे। को हि मन्दः सहसैव स्वल्पेन बहु हारयेत्॥१॥

एवं व्यक्तिपक्षेऽप्यन्वेष्यम्। दृश्यन्ते विपुलाः भेदाः सङ्कीर्णा अप्यमीमिवः। यथा—

क्वचित् कान्ते प्रसरता क्वचिदायत्यनिघ्नता। शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां कुलम्॥१॥

तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्। हिमांशुमाशु ग्रसते तन्मृदिम्नः स्फुटं फलम्॥

इत्यादि स्वबुद्धयाभ्यूह्यम्॥छ॥

वर्णेत्यादि-वर्णछन्दो मात्राछन्दश्च, पद्यं चतुष्पदी, छन्दःपर्यायौ, छन्दोव्यतिरिक्तं गद्यं त्रिकास्त्र्यवयवाः॥छ॥

मस्त्रिगुरुरित्यादि-गणानां प्रस्तारा यथा—पृथ्वीशः १, प्रतापी २, पुण्यधीः ३, द्विषता ४, सौर्येण ५, निजेन ६, संयति ७, जयति ८॥छ॥

नाम्नी(म्ने)त्यादि। द्विकलोदनामा द्विभेदो यथा श्री १ रिह २॥छ॥

त्रिकलस्तन्नामा त्रिभेदो यथा—जिनो १ भाति २ जगति ३॥छ॥

चतुःकलश्चनामा पञ्चभेदो यथा—धीमान् १ वसुधां २ प्रशाधि ३ भूधव ४ धृतनय॥छ॥

पञ्चकलापनामाऽष्टभेदो यथा—प्रकामः १ क्ष्मापते २ विजयसे ३ युद्धेषु ४ विपुलेषु ५ कुलोत्तम ६ सारत ७ सकलकल ८॥छ॥

चतुष्कलः षनामा त्रयोदशभेदो यथा—त्वद्वांछां १ विधुवक्त्रा २ सुलोचना ३ प्रोच्चकुचा ४ घनजघना ५ स्मराकार ६ सौ(शौ)र्यसार ७ नयसमुद्र ८ धैर्याश्रय ९ दृढविक्रम १० कलासदन ११ सकलयति १२ विनयनिलय १३ इति सप्रस्तारभेदाः षण्मात्रागणाः॥छ॥

अर्हादीत्यादि—ह्रादिवर्जिते संयुक्तवर्णे तथा केवलव्यञ्जने पुरः सति पूर्वो लघुर्भवति, यथा—

देवदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शिनम्। ह्रादावित्यत्रादिशब्दात् तव ह्रियेत्यत्र ग्रद्रुभ्रात्रिवर्णानां पूर्ववर्णेषु लघुता। तीव्रप्रयत्नोच्चारे ह्रादावपि प्राग् लघुर्गुरुः। बर्हभारेषु केशान्धा, सुप्तमीन इव ह्रदः॥छ॥

पादान्ते इत्यादि–कतिपयेष्विन्द्रवज्रावसन्ततिलकादिछन्दस्सु पादान्ते लक्षणोक्तगुरोः स्थाने लघुरपि प्रयोज्यते। तस्य च लघोर्गुरुत्वं प्रतिपाद्यते। वंशस्थादिषु पुनः पादान्ते गुरुस्थाने प्रयोजितलघोर्गत्वं न स्यात्। यदाह––

वंशस्थादिचरणान्तनिवेशितस्य गत्वं लघोर्न हि तथा श्रुति शर्मदायि।

श्रोतुर्वसन्ततिलकादिपदान्तवर्ति लोर्गत्वमत्र विहितं विबुधैर्यथावत् ॥छ॥

विशिष्टोऽर्थो वर्णाकारेत्यादि-वर्णनेत्यादिष्वेकं पदार्थमाश्रित्यैकवचनम् सर्वपदार्थापेक्षया तु बहुत्वं ज्ञेयम्।

अथ वर्णे विषमपादसमापादोभयपादगतानि विशेषणानि कान्यपि लिख्यन्ते यथा–––

गौरदीधिति गौरव्यो गौरदीधितिगौरवः।
गौरश्री गौरवप्रत्तपौरचित्रचमत्कृतिः॥

चेतः प्रियश्वेतरुचा श्वेतश्रीश्वेतसः प्रियः।
गौरश्री गौरवप्रत्तपौरचित्रचमत् कृति : ॥

चेतः प्रियश्वेतरुचा श्वेतश्रीश्वेतुसः प्रियः।
श्वेतरोचिश्चयश्वैतश्चमत्कारस्य लक्षणम् ॥

सितज्योतिः स्मितच्छायः सितश्रीविस्मितप्रजः। उल्लासितसितद्योतिर्द्योतिताखिलदिङ्मुखः॥
अभ्रादभ्रप्रभाशोभी भूरिशुभ्रांशुभासुरः। अदभ्रस्वभ्रसंशोभि प्रभाविभ्रमसम्भृतः॥
विष्वग्लक्ष्यवलक्षश्रीर्धवलप्रबलद्युतिः। स्फूर्जदर्जुनवर्यांशुविहारिहरिणप्रभः॥
चण्डपाण्डुरुग्दण्डः पाण्डुप्रोद्दण्डदीधितिः। अवदातद्युतिव्रातः पाण्डुरप्रवरच्छविः॥
श्वेतवर्णः ॥छ॥

अरुणाऽनणुरुक्श्रेणीः किरणैररुणैर्वृतः। अरुणानणुविस्तीर्णकिरणाकीर्णकायभृत् ॥
शोररुक् पूर्णदिक्कोणः पूर्वादिक्कोणशोणरुक्। शोणानणुसमुद्दीर्णविस्तीर्णकिरणोत्करः॥
रक्तव्यक्तविभायुक्तो रक्तप्रव्यक्तकान्तिभृत्। अतिव्यक्तस्फुरद्रक्तरुचिः कविचयाञ्चितः॥
माञ्जिष्ठरुगगरिष्ठश्रीः पाटलद्युतिपाटलः। ताम्रकभ्रतरच्छायो रोहिलोहितदीधितिः॥ रक्तः ॥छ॥

स्मितासितद्युतिस्यूतः सितेतरवरच्छविः। असितद्युतिसन्तानभासमानशरीरभाक् ॥
शितिद्युतिततिस्फीतः शितिदीधितिविस्मृतिः। अम्बराडम्बरालम्बि शितिद्युतिकदम्बकः॥
कृष्णरोचिष्णुरोचिश्रीः कालप्रोत्तालकांतिभृत्। प्रकामश्यामताधामश्यामलद्युतिमण्डलः॥
चञ्चन्मेचकरोचिश्रीः प्रकामं रामधामभृत्। उन्मीलन्नीलरुन्मीलः पलाशच्छविपेशलः॥
हरितस्फुरितच्छाया मनोहारि स्फुरत्प्रभः। कृष्णनीलौ ॥छ॥

रङ्गत् पिङ्गलरङ्गश्रीः पिङ्गलद्युतिमण्डलः। रङ्गत् पिङ्गलतुङ्गत्विट् तरङ्गितदिगन्तरः॥
अङ्गसङ्गिपिशङ्गश्रीः पिशङ्गत्विट्तरङ्गितः। रङ्गत्तुङ्गपिशङ्गत्विट् चङ्गिमाचुम्बिताम्बररविः॥

प्रीतिदस्फीतिपीतश्रीः पीतस्फीतप्रभाकरः ।अतिस्फीतस्फुरत् पीतकान्तिप्रीतमहीतलः ।।
कम्रकद्रुकलासान्द्रः कडारस्फारतारदृक् । हारिहारिद्रसान्द्रश्रीः कपिशच्छविपेशलः ।।
रङ्गत् पिङ्गप्रभाचङ्गो हरिहारिलरप्रभः ।

पीतवर्णः ।

अदभ्रबभ्रुभावार्जी पिञ्जरद्युतिपिञ्जरः । सारसारङ्गरुक्सङ्गः शबलच्छविमण्डलः ।
खेलत्कल्माषरुक् पोषां धूसरप्रसरद्युतिः । धूम्रदीधितिकम्रश्रीर्धूमलोद्धुररुग्वरः ।। मिश्रवर्णः

अथाकारैर्विशेषणानि--

अजस्रचतुरस्रश्रिचतुष्कोणतयाञ्चितम् । चतुरस्रं (च) विदुषां निस्तुलत्वेन मञ्जुलम् ।।
अवृत्तवृत्तताभोगं मण्डलत्वेन मण्डितम् ।।२।। वृत्तम्

अजस्रं त्र्यस्रतामिश्रं (स्रं) त्रिकोणत्वाङ्किताकृतिः । त्रिकोणम् ।

अनर्घ्यं दीर्घताघ्रातमया तत्त्वेन सत्तमम् । अलं प्रलम्बतालम्बि वामावामनतान्वितम् ।।
दीर्घं ४

ह्रस्वत्वभास्वराभोगं लघुभावविभावितम् । कमनीयकामनीयं त्रिभङ्गुरत्वेन बन्धुरम् ।।
वक्रं ६

ऋजुनामञ्जुलच्छायं सरलत्वेन शालितम् ।
ऋजु ७

प्रोल्लासि प्रांशुतोद्भासि चञ्चदुच्चतयाञ्चितम् ।
प्रसृमसुन्नतत्वेन चङ्गतुङ्गत्वसङ्गतम् ।
उच्चं ८

नीचत्वेनोचिताकारं मंथरप्रथितस्थितिः ।
वामवामनताधाम सर्वतः स्वर्वताङ्कितम् ।
नीचं ९

विस्तीर्णतासमाकीर्णं विशालत्वेन शालितम् । प्रथितं पृथुलत्वेन विपुलत्वेन मञ्जुलम् ।।
पृथुलं १०

घनसम्बाधताबन्धं संकटत्वे कुटुम्बितम् ।
संकटं ११

मन्स्थूलतानुकूलत्वपीनत्वादीनदेहभृत् । अतीव पीवराकारं पीवरत्वेन समन्वितम् ।।१२।।
तनुत्वे तनुताकारं क्षुद्रतालङ्कृताकृतिः । भृशं कृशतया शोभि क्षुद्रत्वेन विभूषितम् ।।
सूक्ष्मं

अभीक्ष्णं तीक्ष्णतादीक्षं तीव्रताधृतविग्रहम् ।

तीक्ष्णं १३

सोत्कण्ठकुण्ठताश्लिष्टमतीक्ष्णत्वेन दीक्षितम् ।

कुण्ठम् ।

दीर्घचतुरस्रं लघुचतुरस्रं स्थूलवृत्तं सूक्ष्मवृत्तमित्यादयो मिश्राकाराः ।।छ।।

अथाधारैर्विशेषणानि ।

भूमीतलकलच्छायः पृथिवीप्रथितस्थितिः । वसुन्धरावराधारो धाराधारेण दुर्धरः ।।

भूमी

पातालनिलयोत्तालो रसातलकलस्थितिः । फणाधरपुराधारो वैरोचनपुरोचनः ।।

पातालम् २ ।।

आकाशकलिकावासो गगनाङ्गणसङ्गतः । नभोभोगकृताभोगस्तारापथकृतप्रथः ।।

नभः ३

निसर्गस्वर्गसंसर्गत्रिविष्टपवरिष्टरुक् । ऊर्ध्वलोकधृतालोको नाकसाकल्यकारणम् ।।

स्वर्गः ४

अखर्वपर्वतस्थायी समुद्रोन्मुद्रिताकृतिः । स्फारकान्तारतारश्रीः पत्तनस्थितिसत्तमः ।। इत्याधाराः ।

अथाधेयैर्विशेषणानि ।

पातालं पन्नगोत्तालं महीशैलमहीयसी । वियन्नक्षत्रलक्षाङ्कं स्वर्गानंदनमण्डनः ।।इत्याधेयानि ।।छ।।

अथ क्रियाभिर्विशेषणानि ।

संसृष्टविष्टपो ब्रह्मा विष्णुस्त्रैलोक्यपालकः । हरो विश्वैकसंहर्ता श्रेयः सन्ततिदोऽस्तु वः ।। इत्यादयः क्रियाः ।।

पितृमातृभ्रातृपतिपत्नीपुत्रादिसम्बन्धिनः; स्वामिमित्रपार्श्वस्थवाहनादिसंपर्किणश्च परिवारः । आदिशब्दादुष्णत्वं, शिशिरत्वं; कटुत्वं, मधुरादिरसत्वं; दुर्गन्धत्वं, सुगन्धत्वं; कुरूपत्वं, सुरूपत्वं; लघुत्वं, गुरुत्वं; दूरत्वं, समीपत्वं; कर्कशत्वं, कोमलत्वं; तुच्छत्वं, प्रचुरत्वं; मलिनत्वं, शुद्धत्वं; पराङ्मुखत्वं, सम्मुखत्वं; पुराणत्वं, नवत्वं; अशाश्वतत्वं, शाश्वतत्वं;[1] त्रसत्वं, स्थावरत्वं; निःशब्दत्वं, सशब्दत्वं; पश्चिमत्वं, प्रथमत्वं; वामत्वं, दक्षिणत्वं; पृष्ठस्थत्वं, अग्रस्थत्वं; नियन्त्रितत्वं, उच्छृङ्खलत्वं; चलत्वं, स्थिरत्वं; विलम्बितत्वं, त्वरितत्वं; अतिरिक्तत्वं, पूर्णत्वं; निराकृतित्वं, आर्तत्वं; शत्रुत्वं, मित्रत्वं; मूर्खत्वं,[2] वैदुष्यं; निःस्नेहत्वं, सस्नेहत्वं; दुःखित्वं, सुखित्वं; संसारित्वं मुक्तत्वमित्यादयो भावाः वर्ण्याश्च यथौचित्यं ज्ञेयाः ।।छ।।

पूर्णमिन्दुरित्यादि । 'सितच्छाय' वर्णेन, सद्वृत्त इत्याकारेण, अम्बरभूषणमित्याधारेण, कलाकलापकलितः इत्याश्रेयेन इति । नयनानन्दन इति क्रियाविशेषणम् ।।छ।।

तथा 'तुल्यश्रिये'त्यस्य श्लोकस्यार्थेन कृतानि विशेषणानि यथा वर्णाकारादिभिर्वर्ण्यतुल्यानां पदानां पुरतो योजितार्थपदानि विशेषणानि ।

---

१. पा.प. १, २; दे.प. २. दे.प., पा. प. १, २ ।

कीर्तिः केतककांतास्य स्मेरकैरवसुन्दरा । मल्लिका कुसुमश्रेष्ठा सुरभीकुरुते जगत् ॥
प्रातर्जपासुमप्रायो जाग्रद्बन्धूकबन्धुरः । विद्रुमप्रवलो व्योमतरोः पल्लववद्रविः ॥
हरिद्राभङ्गचङ्गश्रीः चञ्चच्चम्पकचारुकृत् । सुहिरण्यवरेण्यन्ते वपुर्वर्णिनि वर्ण्यते ॥
स्फूर्जद्वैडूर्यवर्यश्रीः सज्जकज्जलमञ्जुलः । गाढं गर्जिति गुञ्जाग्रप्राग्र्यः प्रावृषि वारिदः ॥
चित्तभूचापचारुश्रि(श्रीः) भ्रूयुगं भाति सुभ्रुवः । कुचौ च कुरुतः प्रीतिं कुंभिकुम्भशुभावुभौ ॥

एवमन्येऽपि ।

अथ वर्ण्यतुल्यपदार्थपुरःस्थबन्ध्वर्थपदानि विशेषणानि ।
यत्कीर्तिपूरः कर्पूरक्षोदसोदरतां दधौ । प्रभा प्रभापतेर्भाति प्रातर्बन्धूकबान्धवी ॥
द्विषां षड्जोऽस्य संहर्ता यमबाहुसहोदरः । मुग्धयामध्यमो भाति सिंहोदरसहोदरः ॥
एवमन्यानि वर्ण्यतुल्यपुरःस्थचौरार्थपदानि विशेषणानि ।
गङ्गागौरप्रभाचौरः फणीशद्युतितस्करः । शशांकच्छविलुण्टाकस्तद्यशोराशिराबभौ ॥
वर्ण्यतुल्यपुरस्थिरिष्वर्थपदानि विशेषणानि ।
ऊर्वाग्निप्रत्यवस्थानादावपावकशात्रवः । खररश्मिरिपुःक्ष्मापप्रतापस्तव खेलति ॥
एवमन्यानि वर्ण्यतुल्यपुरःस्थसुहृदर्थपदानि विशेषणानि ।
तुषारांशुः सखीकीर्तिः खररश्मिसुहृन्महः । श्राद्धदेव वयस्योऽसि तस्योर्वी भर्तुराबभौ ॥
एतान्यसमासेनापि । तद्यथा—

मित्रं प्रतापो मित्रस्य यशः शशभृतः सुहृत् । कड्गःक्षोणिपतेस्तस्य कृतान्तस्य सखाऽभवत् ॥

एकस्मिन्नपि वर्ण्ये पृथक् तुल्यपदार्थेभ्यो प्रयोजितैरेभिश्चार्वादिपदैर्विशेषणानि स्युर्यथा–'भवद्यशोभरो भाती'त्यत्र श्लोकद्वये ॥छ॥

युतार्थाः समन्विताद्याः ।

शोणश्रीत्यादि—अत्र पूर्वाह्निद्वये वर्णाकारविशेषणरूपे वर्णाकारपुरःस्थात् श्रीशब्दो लक्ष्मीशदात् संयुतसमन्वितशब्दौ तृतीयां ह्यावाधेयविशेषणरूपे त्वसमासे, त्च्चतुर्थां ह्यावाधारविशेषणरूपकेवलाधेयात् ॥छ॥

श्यामलेत्यादि—अत्र पूर्वाह्नौ समासेन गुणपुरःस्थद्युतिशब्दाद्विभ्राजी, द्वितीयांह्नौ केवलगुणात् समासेन, ततीयां-ह्नोवसमासेन ॥छ॥

तुल्यादमी—अमी पूर्वार्द्धोक्ताः। युतभ्राजिप्रमुखा यथा–चन्द्रश्रीसंयुतेत्यत्र श्लोके । तुल्यात् सदृगर्यो यथा—कैलाश(स)सदृशं रेजे ॥छ॥

तुल्या धिष्णुमुख्याः यथा—'विष्णुशंखांशुजिष्णुभं, इत्यादिपादत्रये । तुल्यात् पूर्वंजितादयो यथा—'जितपार्वण-शीतांशु' श्लोके इत्यस्मिन्ननुष्टुप्शासने । प्रकाशितया विशेषणशिक्षया, सर्वेषु पद्येषु गद्येषु वा विशेषणानि विधेयानि ॥छ॥

इति श्रीवायडगच्छीयश्रीजिनदत्तसूरिशिष्य पण्डित श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि अनुष्टुप्शासनस्तबकोल्लासी छन्दोविशेषणप्रकाशकः प्रथमः प्रसरः ॥छ॥ १६५

अथ छन्दोऽभ्यासस्तबकः। स्वनामाङ्कछन्दःकाव्यानि लिख्यन्ते–अनुष्टुभि सनौ नाद्यात् तुर्यात् स्याद्योक्षराद् वक्त्रम्। गुरूणां सङ्गतिं गत्वा नीचोऽप्युच्चं जयत्युच्चैः।। वक्त्रं तस्याः सरोजश्रीः स्मित्वा चन्द्रं पराजिग्ये।।१।।

पथ्या वक्त्रं भवेत्तुर्यो वर्णाद्ये युग्मपादयोः। वाणी प्रवर्तते तथ्या पथ्या वक्ते विवेकिनः।

किमुन्मीलति पीयूषद्युतेर्मण्डलतो विषम्। उजे तुर्यान्तिभरतमसैर्न विपुलादयः।

अस्या स्फारन् (न?) कबरी स्तनौ न पृथुलोन्नतौ। अपि श्रोणिर्न विपुला स्मरः प्रसुरतु क्व तत्।।छ।।३।८।३

नवाक्षरम्।।

रो नरौ भवति भद्रिका यत्र प्रियस्य परिरम्भणे भद्रिका। भवति चन्द्रिकादावपावकशिखा सखी सा सखी हविरहेहहा।।४।।

रेण जेनरेण कामिनी चञ्चलाब्जचारुलोचना पार्वणेन्दुसोदरानना। कुम्भिकुम्भसन्निभस्तनी कस्य वश्यकृन्न कामिनी।।

दशाक्षरम्।

वेदैर्मत्ता मभसगयुक्ता(ता) एतद्रूपं किमपि निरूप्यम्,–पीयूषोर्मीलवणिमलक्ष्मीः चेत् प्रेम्णासौ विलसविमत्ता।

तन्मे मुक्ति मनसि न युवता मोऽन्यो गो यदि पणवो बार्णैः।[1]

यासां मानससदने मानस्ता ग्राह्याः स्मरनृपते नार्यः। इत्युच्चैः परभृतनादोऽयं विश्रान्तः पटु पणवो भ्रान्तः।।७।।

एकादशाक्षरम्

स्यादिन्द्रवज्रा ततजा गुरू चेत् त्वच्छासनान्नाथ परो नराणाम्।

द्वेषादिदोषद्विपतः क्षिपेक्षः केनेन्द्रवज्रा सुमृता क्रियन्ते।।

क्षोणीविपक्षा गिरयो विपक्षाः ८

उपेन्द्रवज्रा जतजागयुग्मं उपेन्द्रवज्रा युधपद्मयोनि।

पिनाकपाणिप्रमुखैर्यदाज्ञा शिरोभिरूहे मदनो जिनेश।।

सदा सदासत्त्वमगात् त्वदग्रे।।९।।

इन्द्रवज्रोपेन्द्रवज्रयोरन्योन्यांह्रिमीलनं उपजातिर्भवेदिन्द्रवंशा वंशस्थयोरपि।

> उत्फुल्लफुल्लासु सुपल्लवासु लतासु सर्वासु कृतावहेलः।
> अलभ्यसौरभ्यविलोभ्यमानः सदोपजातिभ्रमरः प्रयाति।।१०।।

चतुरंह्रिप्रथमैकैकवर्णविनिमयविधेः स्युरुपजातौ भेदाः चतुर्दश। वर्णप्रस्तारतो न पूर्वान्त्यौ सर्वजातीनां कृता कृताख्यानांह्रिसंकरैः स्वप्रस्तावे परप्रस्तावे वा स्युरुपजातयः। सर्वजातीनां उक्तादीनां परं षडक्षरगायत्र्यादीनामतः परासां द्वादशाक्षरजगत्यन्तानां कृतनामाकृतनामविसदृशप्रस्ताररूपस्वस्वपादानां तुल्यभेदानां परप्रस्तारेण वा सङ्कर उपजातिरिति।* बहुश्रुता त्रिष्टुभः स्वप्रस्तारेण–काम कमाहि किमियं खु दुक्खं छिंदाहि दोसं विणएज्ज रागं।

अकृतनामेन्द्रवज्राभ्यां परजातिप्रस्तारेण यथा––

> युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽथ शाखा।
> माद्रीसुतौ पुष्पफले समृद्धे मूलं च कृष्णो ब्रह्मा च ब्राह्मणाश्च।।

वंशस्थलयग्राहि इन्द्रवज्रा शालिनीभिरित्यादि। रान्नरौ लघुगुरू रथोद्धता। वैतालीयेऽपरान्तिका यत् पृथूद्धरचमू रथोद्धता।

धूलिरंबरविलम्बिनी बभौ शान्तशात्रवमहोग्निवद्वधूद्गीर्ण निश्वसितकीर्तिभस्म तत्।

---

१. 'तन्मे मुक्तिः..........बार्णैः' इदं पा.प. २ मध्ये नास्ति।

* अत्र पा.प. ३ अतीवास्पष्टम्।

स्वागतातुरनभाद्गुरुयुग्मं मञ्जुगुञ्जदलि–
नादमृदूक्तस्वागताकलितकम्पनसम्पत् ।।
श्लिष्यते स्म नवपल्लवरागादा(द्रा)क्षि–
णात्यपवनेन वनश्रीः ।।

वेदैः छिन्ना शालिनी मत्तौगौ
लोलद्दोलाशालिनी कर्णपालिः ।
वक्त्रं प(पु?)ष्णद्भासि चन्द्रोपहासि
स्वर्णच्छायक्लान्तिकृत् कायकान्तिः ।।

किं नामुष्या दृष्टिपीयूषवृष्टिः
उत्थापनीतभजगालयुताः ।
व्यामोहजालमयहालहलैः
मूर्छामुपाश्रितवतो महतीम् ।।
बोधस्य विश्वहृदि तीर्थपते–
रुत्थापिनी जयति सूक्तिसुधा ।।१४।।

तानां त्रयं गोलयग्राहि संज्ञम् ।
चित्तं सदानन्दकन्दे सदात्म–
न्येव प्रलीनं लयग्राहि यस्य ।
क्षीणाश्रयत्वादुपयान्त्यपाया
मोहादयस्तस्य नाशं स्वयं ते ।।१५।।

दोधकमुक्तमिदं भभभाग्गौ, उपचित्रयं चगणचतुष्टयेन, चरमा गुरावुपचित्रा ।

मर्दलनर्दनतं स्तनयित्नौ
कोऽस्तु मदोधकधोकृतिनादैः ।
ज्येष्ठस्वराकं करातपजैत्रै–
र्जीवति यस्य जलैर्जगदेतत् ।।१६।।

ससमालगुरुः विदुषी मता ।[1]
नृप विष्णुपदी मदखण्डने
विदुषी त्रिजगत्यपि जग्मुषी
तव कीर्तिरुपा द्रवति स्म ता
तुरगेन्द्रनगेन्द्रसुरद्विपान् ।।१७।।

लौ जो लघुगुरू यदि मोटनकम् ।
मार्गो न समः स च दूरतरे
ग्रामाऽटनकं तत्र तत्र ततः ।

---

१. समः लगुरुः विदुषी मता । दे.ग. ५

नैकस्य सदेहमधीरतराः
प्राणा प्रिय यान्तु समंत्वयकाः ।।१८।।

स्तौ ल्लौग्वेदै भ्रमरविलसितम्

जात्या जातं कपित्थमपि भवतो
यद्यभ्रान्तं भ्रमरविलसितम् ।
तत्ते चित्ते न किमपि नलिनी
नेयं मल्ली न बकुलावलिका ।।१९।।

द्वादशाक्षरम्—

ख्यातेन्द्रवंशजाततजैरसंयुतैः ।

संरम्भिणः सात्यकिना रणाय
विच्छेदभूरिश्रवसो भवान्भुजम् ।
किं सोमवंशानुगणं तदा तत्
किं चेन्द्रवंशानुगणं कपिध्वजः ।।२०।।

वदन्ति वंशस्थमिदं जतौ जरौ । वसन्तमञ्जरी अभ्रवंशा वेत्यन्ये ।

न संक्रमस्य स्खलनं तथोच्चकैः
गतिः स्ववंशस्थगुणानुरोधतः ।
दधासि नाथः पतनाय विभ्रमं
भवस्य तत्त्वं भुवि वंशपुत्रिका ।।२१।।

द्रुतविलम्बितमाह नभौ भरौ । हरिणप्लुतमिति भरतः ।

द्रुतविलम्बितमध्यमनामभृत्
मुरजमञ्जुलगुञ्जलयोर्जितम् ।
उचितसञ्चितहस्तकचारिता
तनुगतिर्ननु नृत्यति नर्तकी ।।२२।।

इह तोटकमम्बुधिसैः प्रथितम् । मात्रासमकमिदम् ।

जनजीवनदाननिदानजले
जलदेऽभ्युदिते समुदीह शिखिम् ।
मधुरध्वनिभिर्भुवनं मदय—
न्नमितोटकलापकलाकलितः ।।२३।।

चतुर्भिर्यकारैर्भुजङ्गप्रयातम् । अप्रमेयेति भरतः ।

परप्राणनिर्याणगर्जत्प्रमाणा
तवासी कराला सहालाहलेयम् ।
भुजङ्गप्रयातं च जिह्वप्रयातं
हुताशोद्भवस्ते भयायैव भूमौ ।।२४।।

मौ यौ चेद्बाणैर्विश्वदेवी मताऽसौ। चन्द्रकान्तेत्यन्ये।

त्वन्मूर्तिर्देव स्फूर्तिदा विश्वदेवी
त्वत्कान्त्युल्लासः कल्पिताशाप्रकाशः।

त्वद्वृष्टिः पूषन् प्राणिपुष्टिस्तवस्ते
विश्वो व्यापारः कृ(क्लृ?)प्तविश्वोपकारः॥२५॥

म्भौ स्मौ वेदैर्जलधरमाख्यातः। कान्तोत्पीडेत्यन्ये।

प्राणोत्था जलधरमाला व्याप्तं
व्योमालोक्य प्रणुदति यावत् तावत्।

पान्थः प्राप्तो दृढपरिरम्भेणैतावत्
कण्ठप्राप्तो च्छतच्छत तेने स्वस्थान्॥२६॥

नभरा यदि तदा प्रियंवदा। मत्तकोकिलेत्यन्ये।

निरुपमावयवर्चाङ्गसाङ्गिभृत् तरुणिमोर्मि समदानुरागिनी। चतुरतोच्चयपदं प्रियंमा[1] तमोरुसुकृतैरवाप्यते॥२७॥
निगदिता नभयजैः केलहंसाद्रुतपदा, मुखरं चेत्यन्ये[2]

जलधरात् परमहः कलहंसा गुरुस्वरः परिसरत्कलहंसा। शरदभूदिह मदोत्कलहंसा मदयते न तनुते कलहंसा॥२८॥
संगता स्रग्विणीरैश्चतुर्भिर्मता, पद्मिनीति भरतः।

स्मेरमन्दारधिक्कारकारिप्रभा भूपतीन्दोर्भवत्कीर्तयोऽकल्पयन्। सर्वदैवोपकण्ठं लुठन्त्यो दिशः स्रग्विणीर्यततस्ता-स्त्वदेकाश्रयाः॥२९॥

न्भौ ज्रौ यदा तु ललिता भवेत्तदा।

त्वं हंसपक्षयुगले समुज्ज्वलो वाग्मञ्जुला च ललिता च ते गतिः। तत् काञ्चनीयकमलोच्चयाञ्चिते वासस्ततवोचिततमोऽस्तु मानसे॥३०॥

रसैर्जसजसाजलोद्धतगतिः यदीयवलतो दधुः त्वमुदयं तनोषि तटिनीतटान्तदलताम्।
घनं स न घनो घनोऽपि भविता न ते तदुचिता जलोद्धदगतिः॥३१॥

प्रमुदितवदना तु नान्नौ ररौ, चञ्चलाक्षीत्यन्ये, गौरीत्यपरे—
तरलितनयनत्रिभागेन मां प्रमुदितवदना यदा सैक्षत।
किमभवममृतोर्मिमग्नस्तदा किम् शिवसम्पदसम्पदाद्वैतगः॥३२॥

प्रमिताक्षरा सगणतो जसः सैसौचित्रेयम्——
वचनप्रपञ्चरचने चतुराः समदं वदन्ति बहुशास्त्रविदः।
कृतिनां पुनः परमतत्त्वमयी
प्रतिताक्षरा क्षरति वागमृतम्॥३३॥

---

१. 'वदाप्रिय'—दे.प., पा. प. २।
२. 'वेत्यन्ये'—पा. प. १, ला.प.

परिकीर्तितं केकिरवं सयौ स्यौ—

नियतं जने सत्क्रियते सनाथः सकलैरपि न्यक्क्रियते त्वनाथः।
अमृतं घनता घटितप्रियाणां विरहस्पृशां केकिरवं विषधिक् ॥३४॥

त्रयोदशाक्षरम्। त्रिच्छेदे मनजरगैः प्रहर्षणीयम्—

त्वन्मूर्तिर्जननयनप्रहर्ष(षि)णीयं त्वद्रोचिः सुरुचिचकोरचक्रहृद्या।
रम्यन्तेः परमपि किन्तु निन्द्यमेकं यत्प्राणान् हरसि विधो वियोगिनीनाम् ॥३५॥

जतौ जसौ गो भवति मञ्जुभाषिणी।

मुधा मृदूक्तिरुब्धमाभजत्यरण्येषु कुसुमान्तराण्यपि।
इयं त्वदेकाश्रयलया समुज्ज्वला मरालमालासजलमञ्जुभाषिणी ॥३६॥

सजसाजगौ यदि तदानुनन्दिनी कनकप्रभा, जया सुमंगलीति वा केचिदाहुः—

मनीवर्तीति भरतः भवतैवदत्तजलविन्दुनन्दिनी गलिनाञ्चले चलति चातकावलिः।
यदियं तुषारतरा न राजते तव तेन तोयधरा तोयधारणम् ॥३७॥

जससा जगौ यदि तदा कुटजं स्यात्, भ्रमर इत्यन्यः—

परिशीलयन्त्वलिकुलानि शिलिन्ध्रं कुटजं कदम्बकमुरण्डरवंति।
घनसारसौरभभराणि न यावत् कलयन्ति जातिकुसुमानि विकाश(स)म् ॥३८॥

गदितं सुदन्तं सयसाजगौ यदा—

वदने सुदत्याः स्फुटतां प्रपेदिरे प्रकृता सुदन्ता न सखा कथास्वपि।
तदसीमसंशीलितशीलनिर्मला जनतोपदृग्दोषमयोभिता इव ॥३९॥

यमौ रौगः ख्याता षड्यतिश्चन्द्रिणीयं—

चकोराणां चक्रैः सर्वतश्चर्व्यमाणा गणैः स्वर्गस्त्रीणां स्वर्गिरौगीयमानाः।
अपि श्यामाः कामं यामिनीर्भूमिभर्तुर्भवत्कीर्तिः सान्द्रा चन्द्रिणी का न चक्रे ॥४०॥

नसजजगभाग्भ्यः परिकीर्तितः—

गलितसकलेन्द्रियार्थकदर्थनः कलितः परमस्वरूपनिरूपणः।
समुपचितचिन्महश्चयः संश्रयः शिवसुखमयो लयः शमिनामपि ॥४१॥

स्नौ जसौगः स्यान्मत्तमयूरं यदि वेदैः।—

मेघं मत्वौन्नत्यचलं चपलेशं विश्वोत्तंसमानसमीयुः किल हंसाः।
मित्रोद्रेकान् मत्तमयूरध्वनिपूरं कुर्वन् गर्वान्नृत्यसि यत् त्वं तदतत्त्वम् ॥४२॥

ननरयगयुता नु चन्द्रिका ज्ञेया—

रिपुनरपतिनायकाननाब्जश्रीकण्ठहरणत्रितन्द्रमेदिनीचन्द्रः।
प्रभवति तव देव चन्द्रिका सान्द्रीकृतसुकृतिचकोरसम्मदा कीर्तिः ॥४३॥

वृत्तरत्नाकरेऽपि "ननततगुरुभिश्चतुर्भिः"। यथा भारविः—

इह दुरधिगमैः किञ्चिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम्।
अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम्॥४४॥

जभौस्जगा इति रुचिरा चतुर्यतिः।

इदं वपुः स्फुरद्(द्रु)पमाननता नवं वयः स्मरविजयाश्रयः।
सखि इयं सुधारुचिरुचिरा विभावरी विना प्रियं तव निविडं विडम्बना॥४४॥

चतुर्दशाक्षरम्। ख्याता वसन्ततिलका तभजाजगौगः। उद्धर्षिणी सैव तस्य सिंहोद्धता काश्यपस्य।

श्रीमद्वसन्ततिलका त्वकुलानशोकान् कान्ताकटाक्षमुखमसवपदप्रहारैः।
सश्रीकयंति यदि तत्किमुतान्यदाते भक्तिस्तु वर्द्धितवनर्द्धिरियं तवैव॥४५॥

अश्वैर्लक्ष्मीर्मतेयं म्तौ ततो गद्वयं चेत्।

लक्ष्मीमक्षीणरूपां नैपुण्यपण्यैः प्राप्तां पात्रार्पणेनाप्रीणयन् ये प्रवीणाः।
तेषामेषा विशेषा पुष्कलीभूय भूयः सेवां हेवाकमेवायाति जन्मान्तरेऽपि॥४६॥

ननरसलगभृत् स्वरैरपराजिता—

परधनवनितापवादपराङ्मुखाः
परगुणगणनोपकारपरायणाः।
जगति कृतयुगावतारकृतो नराः।
विकलितकला योजयंत्यपराजिताः॥४७॥

म्रौ म्नौ गौ यतिरब्धीशैर्या सेयमलोला चेतश्चेतयवोत्तेवृत्ता।

वृत्तिरलोला लक्ष्मीकलितानां व्यालोके ललितानां तद्विद्या निरवद्या।
कीर्तिस्फूर्तिरनिन्द्या हृद्याश्चीर्बहुना किं सिद्धिः साऽपि पुरस्था॥४८॥

करिमकरभुजानौ म्यौ लगौ सप्तभिः।

घटभवभवना निर्दम्भसंरम्भता कृतपरुपरुषा पाथोधिपानक्षणे।
अहह महजाजलैः पाठीनमीनावली करिमकरभुजा भेजे यतित्वं शुभम्॥४९॥

सोरद्वन्द्वं सलौगौ यतिर्मुनिभिर्जया—

अन्तश्चित्तं प्रवृत्तक्षमार्जवमार्दवाः सन्तः
सन्तोपवतः (न्तः) कपायपराङ्मुखाः।
तत्त्वज्ञानोपपन्नेन्द्रियार्थमनोजयाः।
श्रेयो लक्ष्मीः समुक्ता स्वयं व्रतमेति तान्॥५०॥

मोरो मोयो लगौ चेत् ज्योत्स्ना तुरङ्गैर्यतिः।

इन्दुर्वैलक्ष्यलक्ष्यः सक्षारसारं पयोमृद्वीका मानमृद्वीमाधुर्यवन्ध्यमधु।
पीयूषं निर्मयूषं मन्दप्रभं चन्दनं ज्योत्स्नाऽप्युसैकतुच्छा सूक्तिः सतां चेत्श्रुताः॥५१॥

धृतियतिसान्वयवनजभाजलगा, मणिकटकमित्यन्ये—

बहुलनिरर्गलद्रविणदुर्ललितं तरुणिमनिप्रमत्तललनालुलितम् ।
वपुषि जरामुपेयुषि तथापि कथं हतहृदयाऽधुनाऽपि न धृतिर्ध्रियते ॥५२॥

वेदर्तुभ्यां कुटिलकमिति मान्नौ योगौ । हंसश्येनीत्येके—

दैवं मेऽभूत्कुटिलकमिति भो ना भैषी चित्तेनैतच्चिरमुपचर त्वं च त्वं ।
श्रीदारिद्र्यंप्रवरमवरमर्वा तच्च संकल्पोऽस्य प्रविकलयति विश्वं विश्वम् ॥५३॥

सजसाजलौ गुरुयुतौ च पथ्या शरैः ।
हृदयाश्रयाः सुकृतिनां स्मरन्त्येव ये
गुरुगौरवाद्गुरुजनस्य पथ्या गिरः ।
प्रवीणकृताः प्रगुणतद्गुण श्रेणिभि–
र्वृणते श्रियः स्वयममुं समुत्कण्ठिताः ॥५४॥

पञ्चदशाक्षरम् । वसुयतिरियमुक्ता मालिनी नौ यमौ गः; नान्दीमुखीति भरतः ।

तव परिमलमाला मालिनी मालतीयं
किमपि मधुरमन्द्रारावमिन्दीवरेण ।
मृदुलरपरिरम्भारम्भभाजां चुचुम्बे
त्वरितरमणमन्दं साप्यमुञ्चन्मरन्दं ॥५५॥

ऋषभो भवेत्सजससाययुता यदि स्युः ।
ऋषभप्रभुर्जयति यस्य जटामिषेण निरगात् तमः श्रुतिदरेण सत्त्वदूनम् ।
सितलेश्यया प्रमथिता किमु कृष्णलेश्यया प्रमथिता किमु कृष्णलेश्या ॥५६॥

प्रथमो रसोऽथ नवमेन रसेन नुन्नः ।
वसुपतिरिह चन्द्रोद्योतौ मोररौ ।
शमयति न तमः किं तिग्मद्युतिः किंत्वयं
जनयति नयनानां निध्यायमानोन्धताम् ।
निखिलजगदभाग्यं पीयूषयूषः पुनः
न यदिह तव चन्द्रोद्योतश्चिरं द्योतिते ॥५७॥

वसुविरतियुतानौत्तरा उपमालिनीयं—

वनभुवि मृगयायै भ्रमन्नुपमालिनी
पुलिननलिनसूनुः सकण्ठतपोवने ।
नृपतिरतुलरूपां निरूप्य शकुन्तला
स्मरशबरशराणां ससारशरव्यताम् ॥५८॥

मोमो यो यश्चिद्विच्छिन्नाष्टाभिरेषा तु चित्रा, मण्डूकीचञ्चलेत्यन्ये ।—

विश्वं विष्वक्पीयूषोर्मिप्लावतः प्रीणयन्ती
व्यक्तं मुक्ता क्षोदं क्षोदं रोदः कन्दरे द्योतयन्ती ।

नीतिप्रीते ततः कीर्तिस्तेऽत्र चित्रा[1] ।
चैत्रे चन्द्रस्योच्चैश्चित्राचुम्बितश्चन्द्रिकेव ॥५९॥

तौ भो यश्चौरकलितौ कथितो मृदङ्गकः ।–

रङ्गत् प्रसङ्गरससङ्गमचङ्गमङ्गना
सेयं मृदङ्गरवभङ्गतरङ्गसङ्गतम् ।
रङ्गोदनङ्गनृपमङ्गलमङ्गनाश्रिता
रङ्गेऽत्र चित्रगतिरङ्गतिरङ्गदेवता ॥६०॥

रान्नरौ भरयुतौ निगदन्ति हि सुन्दरं—

त्वन्महोद्भृतभुजौ रिपुभूमिभुजां यशोभारतारपटलीमभिगाल्य भवद्यशः ।
एकमेव नृपपद्मभवः शशिसुन्दरं कुर्वन्तः कतिचनोडुमिषाद्गलितालवाः ॥६१॥

षोडशाक्षरम् । यसौमौत्सौगौ षड्भिर्यतिरिति जयानन्दमेतत्, प्रवरललितमित्यन्ये ।

उदेतीन्दुः प्रमोन्मदकुमुदिनीकेलिकारः
प्रसर्पत् कन्दर्पकत्रिभुवनजयानंदकंदः ।
दिशां हस्तादर्शो जननयनपीयूषसत्रं
रतिक्रीडागारं गगनकमलाकेलिपद्मम् ॥६२॥

म्भौ त्सौ तोगो मदनललिता वेदर्तुविरतिः ।

विस्मेरान्तः करणविलसद्भावैकपिशुनैः
सद्यो माद्यन्मदनजनितानन्तोपकरणैः ।
वारंवारं तरललुलितैर्नेत्रान्तवलनैः ।
केयं बाला मदनललिता प्रोल्लासयति माम् ॥६३॥

म्भौ सतौ तोगः कोमलता वेदैः शरैश्चेद्द्युतिः ।

शंके शिलष्यत्कोमललताबालप्रवालच्छलो—
न्मीलद्रागाः स्मेरकुसुमश्रेणिस्मिताः कम्पिनीः ।
दूरात् प्राप्तश्चन्दनवनस्पन्दोद्भवं सौरभं
बिभ्राणोऽयं दक्षिणमरुन्मन्दप्रचारोऽभवत् ॥६४॥

सप्तदशाक्षरम् । गुहार्स्यैर्विश्रान्तिर्यमनसभलागः शिखरिणी—

रमन्ते हेमन्ते विकुसुमसमग्रांह्रिपततौ
कृतानन्दा कुन्दे किल दिनविनोदाय मधुपाः ।
वसन्ते विस्मेराऽखिलशिखरिणीह क्षणमपि
स्पृशन्त्येते प्रीता न पुनरपरं चम्पकतरोः ॥६५॥

---

१. 'प्रसङ्ग' ला.प., दे.प., पा.प. ।

यतिर्वसुकृता जभौ जसजलाश्च पृथ्वीगुरुः विलंबितगतिरिति भरतः ।

स्थिरेति विबुधा मृषा ननु वदन्ति पृथ्वीमिमा–
मियं भवति तादृशी यदि यदा तदासौ कुतः ।
पराक्रमपरायणान् परमरागपूर्णात्मनः
पतीनपि गतत्रपा त्यजति सेवते चापरान् ।।६६।।

मन्दाक्रान्ता मभनततगा गायतिर्वेदषड्भिः । श्रीधरेति भरतः ।

स्वामीसौम्यैः परिचयपरैः श्रेयसे संश्रितानां
दुष्टैर्जुष्टः प्रभवति पुनः स्पष्टकष्टप्रदायी ।
ज्योतिर्विद्भिः किमुडुपटलीकूरभूपुत्रभास्वत्
मन्दाक्रान्ता क्वचिदपि जगन्मण्डलायाद्रियेत ।।६७।।

नसमरसलागः षड्वेदैर्यतो हरिणी मता । ऋषभललितमित्यन्ये ।

नृप वनगतो द्विट्भूपस्तेऽप्यधात् स्ववधूमिदं
मृदति गतिदृग्मध्यैरेतैर्ध्रुवं विधृताः त्वया ।
वधति विपिनावासं हंसीवरोहरिणीहरिः
बलवति रिपौ श्रेयो रण्याश्रये हि पलायनम् ।।६८।।

भाराक्रान्ता युगरसयतिर्मभौ नरसालगौ—

यत्प्रारब्धप्रधननिगतद्विपश्वचमूभटैः
भाराक्रान्ता सपदि यदधो ममज्जनमेदिनी ।
तन्मन्येऽहं कमठफणभृद्ग्राहकरीश्वरैः—
र्मेतामेतां स्वभुजपरिघे बभार सकम्पिनी ।।६९।।

म्भौ न्मौ य्लौ गोऽश्वनिधिरसैः संकीर्तिता हारिणी—

कान्ताराणां सुकुसुमफला श्रेणिर्मीना हारिणी
क्रीडागारारण्यगिरिदरी पंक्तिर्गतोपक्रमा ।
नेशः पार्श्वं त्यजति वियुतो राज्यो रुचि नान्तिभि–
र्येनैतत्सः स सुहृदिति यं शंसन्ति शत्रुस्त्रियः ।।७०।।

नसभतनसगाः षड्वेदैस्त्रेयतिः पद्ममेतत् ।

उपगतवति स्मेरो मित्रे सद्गुणश्रेणिगर्भः शुभतरभवद्वृत्ताभोगो राजहंसाश्रयो यः ।
श्रयति कमला सोत्कण्ठा तं पश्य तादृक्स्वरूपं निजमनुदिनं सद्मा नेते पद्मथा पद्ममेतत् ।।७१।।

रसयुगयुतौ रोहिण्युक्तान् सौमद्वयं यभौ गुरुः ।—

भुवनमखिलं यस्य प्रेंखद्ग्रीष्मार्कभीष्मातपव्यतिकरद्रुतं जीवयेत्पीयूषपूरैः करैः ।
अमृतमहसस्तस्याप्यासीत् कन्दर्पबाणाहतेव्रणगणमहारोहत्पीडासंरोहिणी रोहिणी ।।७२।।

दिक्पतिवंशपत्रपतितं भरनभनलगाः, वंशदलमित्यन्ये ।--

राजसि वंशपत्रपतितैर्जलदजलकणैर्यन्मौक्तिकसमैः क्षणमिह महितैः ।
किन्तु तवान्तरङ्गमणयः प्रतिदिनमपि यैः बिभ्रति भूपमौलिषु पदं जयसि जगति तैः ।।७३।।

कृतदिग्पतिकातिशायिनी समजभाजगौगः, यादवीत्यन्ये ।—

खलु तामभिलाषुकोऽभवत् रतिपतिर्यदेतां रतिरूपजयातिशायिनीं मृगदृशं(शी)? कृशाङ्गीम् ।
सुभग त्वयि भावमद्भुतं विदधतीं विदग्धां विशिखैः परिताडयत्यसौ गतकृपं कृतार्थः ।।७४।।

अष्टादशाक्षरम् ।

रुद्रैश्छिन्नामरौत्यौरयुगलं च काञ्ची संकीर्तिता ।--वाचालकाञ्चीत्यन्ये ।

रत्युल्लासेऽपि मुक्तश्रमसमुत्साहां नितम्बस्थलीं,
प्रेक्ष्याऽमुष्याः प्रशंसां व्यरचयत् काञ्चीक्वणछद्मना ।
किञ्चास्याः कामयुद्धोत्सवविधौ स्वेदोदबिन्दुच्छलान्
मुक्तापट्टं ललाटे किल मुदाऽबध्नात्मनो भूप्रभुः ।।७५।।

स्तौ न्यौ यो यो चः स्यात्कुसुमितलतावेल्लितो पञ्चषड्भिः–

सर्वाङ्गरङ्गकुसुमितलतावल्लितः काननानां
तानातोद्यत्नाभरणरमणीसङ्गिनः कामिनश्च ।
सञ्जातोल्लासं लसति पवने कम्पसम्पत्परीत्या–
व्याकूजन्मत्तभ्रमररणितैः कूजितं कल्पयन्ति ।।७६।।

वेदैरश्वैः कल्पितयतिरियं चित्रलेखाभिधाना–

कान्तो नित्यं न्यसति मृगमदैः त्वन्मुखे चित्रलेखा
दर्शंदर्श रताः स्फटिकमुकुरे किं मदं यासि मुग्धे ।
प्रेमोत्कर्षश्चेल्लसति रसितस्तस्य चित्ते तदीदृक्
कर्तव्यानां कोऽप्यवसरलवः किं भवेद् भाग्यहीने ।।७७।।

वेदैरश्वैर्मभनययुगैर्गीयते चन्द्रलेखा–

मानं मानं दयहृदयसदावासदानेन मूढे
प्रौढप्रेम्णि प्रणयिनि विनते सीदति त्वं प्रसीद ।
यन्मत्याहं तव सृजसि ततः प्रार्थनां नान्यथा मे
किं च प्राच्यां समुदयति मदोल्लेखिनी चन्द्रलेखा ।।७८।।

म्नौ ञ्जौ चेद्युगतुरगयतिश्चलं परिकीर्तितम्–

आयुर्वायुप्रचयपरिचलध्वजाञ्चलचलम्
चित्तं मत्तद्विपसततनतोन्नतश्रुतिसोदरम् ।

विश्वैश्वर्यं तव जलदतडिल्लिडम्बकलितं
मत्वा तत्त्वाद्विरचय चिरं मनः सुकृतार्जने ।।७९।।

वेदाश्वाभ्यां भमनरयुगैः संजायतेकेश(स)रम् ।–

रक्ताशोके विकसति तिलके चूताङ्कुरे चम्पके
भ्रान्ते भृङ्गे भ्रमरशिरसि सनाना प्रसूनेष्वपि ।
कान्तावक्त्रासवमधुरसं केसरं सेवसे तत्
त्वं शोचेऽप्यसमपरिमलास्वादैरिहोन्माद्यसि ।।८०।।

ननमययुगैरश्वैर्वेदैश्चन्द्रमालेयमुक्ता–

इह रजनिमुखे गौराङ्गीणां चन्द्रशालागतानां
वदनसमुदयैस्तत्कालोद्यच्चन्द्रमालाभ्रमः स्यात् ।
अपि च दिनमुखे चैत्यालीनां शातकुम्भीयकुम्भैः
प्रतिमिततरणिप्रौढोद्योतैरर्कराजीवितर्कः ।।८१।।

ननमतररयुग्वाहै वेदैर्यतिर्ललितं मतं–

निजनिजसुदृशो वेणीदण्डभ्रुवोर्ललितं दृशोः
कुटिलविलसितं दर्शं २ विपक्षनरेश्वराः ।
क्षितिधवभवतश्चण्डं खड्गं धनुर्निशितान् शरान्
समरपरिसरे स्मारं २ भवन्ति गतस्मराः ।।८२।।

म्लौ ज्भौभः सगुणौ दिवाकरो यतौ शार्दूलललितम् ।
स्तुत्यो हस्तिपतिर्हयान् दशशतीमेको जयति यः श्लाघ्यंतत्कुलख्यातिकर्मविदितं शार्दूलललितं ।
तावेतावपि यं निरूप्य निरहङ्कारत्वमटत–
स्त्रैलोक्यस्पृहणीय एव सरभः सोऽयं विजयते ।।८३।।

नसमयया: षड् पञ्चछेदाः कीर्तितानङ्गलेखा–

त्वयि गतवति शाल्वे वनेऽपां नाथ मामत्र चित्रे
मलयपवनः पीयूषद्योतिः कोकिलाकूजितानि ।
विदधति रुजां प्राणत्राणं त्वां विना मे कुतः स्या–
दिति युवतिभिः संप्रेष्यन्ते स्माऽनङ्गलेखाः प्रियेषु ।।८४।।

ननरररदिग्वशाग्रत्रिः स्याद्यतिः, सा निशातारकेत्यन्ये–

नरवर तव शात्रवोर्वीधवानां गतानां गिरौ
गुरुगहनगुहागृहान्तस्तमिश्रै(स्रै)र्निशास्याह्निने ।
अनणुमणिशिरः सहस्रांशुमिश्रैः प्रदीप्तौषधि–
प्रसृमरकिरणैः क्षते ध्वान्तराशौ निशायां दिनं ।।८५।।

एकोनविंशत्यक्षरम्। आदित्यैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्।–

तावच्चित्रकचित्रविक्रमचमत्कारं चिरं चञ्चये–
स्तावत्सूकरसूकरीततिपरीरम्भाय संरम्भयेः।
तावत् प्लाव्यधारणेश्वरमदश्रावैररण्यावनीं
यावद्वः प्रतिकूलमत्र न वने शार्दूलविक्रीडितम्॥८६॥

रमैः षड्भिर्यामो नसरयुगगा मेघविस्फूर्जिताऽसौ–

पुरस्तात् पौरस्त्यः स्फुरितपवनो यक्षतवोल्लासकारी[1]
सुवर्णाभाशम्भोर्दिशि तडिदसौ मेघविस्फूर्जिता यत्।
ततो भीष्मग्रीष्मद्युमणिकिरणापातिसन्तापितायाः
पयःप्लावैः पृथ्व्याः प्रथयसितमां तापशान्तिं समन्तात्॥८७॥

यमौ न्सौ जौ गाश्चेद्रसरसयतिस्तदा मकरन्दिका–

प्रभूताविर्भूताद्भुतपरिमलप्रलोभितचेतसा
रसादभ्रामं भ्रामं किमपि परितो मधुव्रत माधवीम्।
त्वया मन्दं २ मधुरमृदुलं तथा लपितं यथा
परीरंभारम्भे समभवदियं श्रवन्मकरन्दिका॥८८॥

रमतुच्छिन्ना गो मनसततगा छायेयमाभाषिता–

प्रसूनं माऽस्त्वस्मिन् धृतकृमिकुलं स्वाद्यं च माऽभूत् फलं
प्रगल्भावल्लार्थे भजति भुवि यत्पत्रयवलीपात्रताम्।
वयं तस्य ब्रूमो वटविपिनच्छायैव दिव्यं फलं
सपर्त्तौ या तापं नुदति शिशिरे स्फीतं शीतं श्रिते॥८९॥

विंशत्यक्षरम्। विश्रामो वाहवाहैर्भ्रमरमनयतललागोऽन्ते सुवदना।––

यावन्नालोकते मां धृतरणरणका तावद्भवति या
व्यालोके स्मेरनेत्रोत्पलदलनयना दृग्भ्यां पिबति या।
एकान्ते काममुत्पीडितकुचयुगलं श्लिष्यति च या
सा ते च स्वान्तदेशादवतरति कुतः सेयं सुवदना॥९०॥

सभरान्मौ यलयास्त्रयोदश यतौ मत्तेभविक्रीडितम्।

परभूभृद्गुरुवाहिनीषु परितः प्रोन्मूलयन् लीलया
वरवीराननपद्मकाननवतीः पद्मालयाः केलिभूः।
पुलिनोड्डीनशिलीमुखव्यतिकरप्रेंखत्कराडम्बरो
नरनाथः प्रततानदानविकटो मत्तेभविक्रीडितम्॥९१॥

---

१. 'पल्लवोल्लासकारी' ला.प., दे.प., पा.प.।

रसैरश्वैश्छिन्ना यमनततगागश्च शोभा श्रुताऽसौ—
क्षतप्रान्तप्रोताहितनृपतिशिरोमुण्डनं खड्गमुग्रं
दधानः खट्वाङ्गं मणिचितमुकुटार्चिश्छटाभिर्जटालः।
समन्तात् तन्वानस्त्रिभुवनभवनप्लाविनीं कीर्तिगङ्गां
महीनश्रीपीनः समितिनरपतिः शम्भुशोभां बभार ॥९२॥

अश्वैः षड्भिर्विरामो मरभनततगावसौ चित्रमाला—
निर्लक्ष्मेन्दुस्तदंके कमलयुगलं मौक्तिकां नि(ष्प्र)प्रवालं
राहुस्तारावगूढः सरसि च युगां रत्नचित्राग्रपत्रम्।
शैलद्वन्द्वं तरङ्गत्रितयनिलयं न्यग्मुखोच्छौ च रम्भा
स्तम्भावुन्मीलमञ्जद्वयमपि ततः काऽप्यसौ चित्रमाला ॥९३॥

एकविंशत्यक्षरम् विज्ञेया श्र(स्र)ग्धरेयं मरभतनययया वाहवाहैर्यतिश्चेत्—
कान्ता कान्तारराजी मृदुलकिशलया ताम्रकम्राधरोष्ठी
दोलाव्यालोलकर्णा प्रसृमरमधुपश्रेणिचञ्चत्कटाक्षा।
विष्वग् रङ्गत्परागस्मितवसुमन(सः) स्रग्धरालिङ्गितेयम्।
काम्या याम्यानि लेप्ता जनिजनितवपुः कम्पसम्पत्परीता ॥९४॥

सप्तर्षिभिर्विरामस्तरभनजभराः श्रुता नु कथा गतिः—
आस्यं कृतेन्दुहास्यं स्मितकमलकालाविलोपकरौ करौ
विक्षोभितेभकुम्भं द्वयमुरसिजयोः श्रितैणजये दृशौ।
पीयूषदोषदोक्तिर्विदलितवरला विलासकथा गतिः
कान्तिः प्रतप्तकार्तस्वरमदहरणोत्कटा कुटिलभ्रुवः ॥९५॥

नज भजजाजरौ यदि तदा गदिता खलु सिद्धिरेव सा—
जिनपतिपूजको यदि यदि प्रथितार्हतसप्ततत्त्ववित्
सुगुरुपदाश्रितो यदि यदि प्रसृताशयशुद्धवासनः।
महितमहाव्रतो यदि यदि स्वमहः समुपासनामयो
जितविषयेन्द्रियो यदि तदा पुरतस्तव सिद्धिरागता ॥९६॥

द्वाविंशत्यक्षरम्। वसुभिर्वाहैः सतौभो नसरसरगुरवः स्यान्महास्रग्धरेयम्।—
परखड्गोत्क्षिप्तशीर्षप्रकटितपटुहुंकारवक्त्रबन्धे (वक्त्रे प्रबन्धे?)
यानेन[1] युध्द्वा क्षितिपतिरपद् वीरकोटीररत्नम्।
प्रथमं तस्मिन् वरार्थे त्रिदिवमृगदृशः संप्रपातात्र पश्चात्
विजयार्थं निर्जयाणां सुरकुसुममहा स्रग्धराधीश्वरेषु ॥९७॥

---

१. योऽनेन–पा.प., दे.प.।

त्रयोविंशत्यक्षरम्। रौ नरौ नरनरालघुर्गुरूरथो यथा भवति चित्रकं तदा—
कृष्णचित्रक समप्रभेऽभवदसौ सदा स्फुरति मेदिनीपते
त्वद्‌गुणाः प्रगुणयन्त्यनन्तगुणतामनन्तसमविक्रमक्रमः।
नेदृशं यदि तदा कुतस्त्रिभुवने जनाः प्रतिदिनं निजेच्छया
तान् स्वकण्ठतटमण्डनानि जनयन्ति दधति नो नतां पुनः॥९८॥

चतुर्विंशत्यक्षरम्। प्रोक्ताऽसौ विबुधैस्तु विभ्रमगतिर्मासौजसौ तौभरौ च तदा यदा।—
यद्यान्ती पथि सा सविभ्रमगतिर्व्यावृत्तवृन्तारविन्दमुखं
व्यावृत्त्या सकृदीक्ष्यते स्म नयनप्रान्तेन कर्णान्तरप्रसृतेतमाम्।
तत् किं विस्मृतिमेति मे पुनरहं पीयूषपूरैरिव स्नपितस्तदा
सम्प्रत्युल्बणदावविह्निभिरिवोत्तप्तेऽस्मि[1] तत्कारणं किमु कथ्यताम् ॥९९॥

पञ्चविंशत्यक्षरम्। क्रौञ्चपदेयं बाणरवशैलर्भमसभननननगुरुपरिकलिता।
चक्रचकोर क्रौंचपदास्मिन् विकचकमलवनविलसदलिकुला—
निर्झरिणीयम् चित्तहरास्ते बहुलफलकुसुममपि विपिनम्।
एष गिरिश्चेद्वेषि चमूभिर्दुरधिगम इति भयरहितमिह तमिह
स्थेयममेयश्रेयसि पत्नीरिपुरिति निगदति नृप तव नगागः॥१००॥

षड्विंशत्यक्षरम्।
अष्टेशानैश्चेद्विश्रामो ममननननरसलघुगाभुजंगविजृम्भितम्—
दिव्यास्त्रेभ्यो जातं जातैः प्रसृमरदिनकरकिरणैस्तमिस्रकदम्बकम्
राहुव्यूहैर्भास्वद्‌वृन्दं दनुतनुभवरिपुविभुभिर्विधुं तुदवल्गितम्।
वज्रापातैः शैलव्रातं समुदितगरुडसमुदयैर्भुजङ्गविजृम्भितम
मोघीकृत्त्यामोघैः शस्त्रैः दशरथनरपतितनयो जघान दशाननम् ॥१॥ ॥छ॥

अथार्द्धसमं छन्दः
आख्यानकीताद्विषमे तजौगौ समेजजौ तौ जोगयुगं यदि स्यात्।
नैव प्रियोऽधिक्रियतेऽधुना यदि मनस्विनी मानविमानननानाम्।
आख्यानकीयं सखि चन्द्रलेखा दिशं हरेरंकुरितां करोति ॥२॥
आख्यानकी वार्ताहारिकाः।
जतौ जगौ गो विषमे समेतौ योगाविय स्याद्विपरीतपूर्वा।
बभूव द्वैवज्ञततिक्तवारेराख्यानकी संयति यो जयस्य।
कृता त्वया सा विपरीतवृत्तिः स्वीकुर्वता तद्विजयं जिनेश ॥३॥
एतयोरुपजात्यं तर्गितत्वोऽपि विशेषसंज्ञार्थमिहपाठः।
विषमे ससजा गुरुः समे सभरालौ तु तदा प्रबोधिता ॥४॥

---

१. तप्तोऽसि—ला.प.।

न कथंचन नर्ममान्येन्यजद्दयिते याति लघु प्रबोधिता न
मधुनाकलकोकिलारवैः ।
कुरुतेस्मानुनयंस्वयं न किम् ॥
न नरलगुरवो समे समे न ज युगराः परवक्त्रकं भवेत् ।
जिनवर तव सर्वसौख्यदं मुखमवलोकयते सदैव यः ।
स कथमपरवक्त्रमीक्षते बहुधनधान्यसुखाश्रयः श्रिये ॥५॥
एतौ वैतालीयौ भेदौ अयुजितनरया भवन्ति पादेन जजरगाः समके तु पुष्पिताग्रा—
इह मधुसमयोदाः यथायथामी वनतरवः प्रभवन्ति पुष्पिताग्राः ।
कुसुमशरभटस्तथा तथाऽसौ शरविसरैर्विवशीकरोति विश्वम् ॥६॥
विषमे ससजा गुरुः समे स्युः सभरायो यदि मालभारिणी सा ।
नितम्बिनीत्यन्यः सुरभिस्मितसप्तपर्णचूर्णा नवचन्द्रातपचन्दनार्चिताङ्गी ।
नलिनोत्पलमालभारिणीयम् सरिदाकांक्षति राजहंसयोगम् ॥७॥
एतावौपच्छन्दकभेदौ ।

अथ विषमच्छन्दः

प्रथमे पदे सजसलास्तु नसजगुरवो द्वितीयके स्युर्भनजलगुरवास्त्रिमिते सजसा जगौ चरमके तदोद्गता ।
तपनोरुतापतपनेन समुपजनितेव सर्वतः ।
स्वेदसलिलराजिरियं नभसो विभात्युडुपरं परोद्गता ॥८॥

अथ मात्राछन्दः षड्विषमेऽष्टौ समे कलाः किन्तु समे षड्लो न सन्ततः ।
समलोनससं षमेण गौ वैतालीयं ता तुराल्लगौ ।
गोपीनां यन्तिकस्वनैरमृतोर्मिभिरेव भावितान्तरा ।
कमलक्षेत्रेषु नाऽत्र सद्वैतालीयरवैर्मृगावली ।
पर्यन्तेयौं तथैव शेषं त्वौपच्छंदसिकं सुधीभिरुक्तं ।
स्पृहचित्तवृत्तयो वा परमैश्वर्यं वा श्रुतो विनैतान् ।
धनलवलाभेन को न कुर्यादौपच्छंदसिकत्वमीशपार्श्वे ॥१०॥
मात्रा समकप्रकरणात् पद्धतिका । अस्या नामान्तरं पद्धटिका यथा श्रीहेमः ।
वीनौं जेजौ जोलीर्वान्तेऽनुप्रासे पद्धतिका, पद्धटिकेत्यन्यः ।
पद्धटिका षोडशमात्रिकेह पादान्तयमनकयुक्त सुमतिगेहे । विषमे तजोतजनलाः क्रमेन पद्धटिका च गणचतुष्टयेन ।
परधनदारान् परिहर पिधेहि परमर्मपरगुणस्तुति[1] विधेहि । सज्जनपद्धतिमेतां विरचय नित्यं जगति चितसुकृतचयः ॥
यथा धनपालस्य—
नतसुरकिरीटसंघृष्टचरणजयभगवतिभीतजनैकशरणचपलाक्ष ।
शकुनिसंयमनपाशजयविदितजगत्स्थिति सर्गनाश ॥

---

१. परगुणनुति—पा. प., दे. प. ।

अपभ्रंशे भूयांसो चास्याः प्रयोगाः—
उन्निद्दकमलदीहरच्छ कंचणकवाढदढवियड वत्थु ।
सुरवइ सुरिंद करसरलबाहु एक्कंगिण अरिबलु वरइ नाहु ।।छ।।

नांते जनलघुनियमक्लेशः कार्योऽप्योजे जगणनिवेशः ।
स्वेच्छावगणचतुष्टयविदिता पद्धटिकान्या बुधैर्निगदिता ।।

इयमभ्रंशे चतुष्पदीनां मध्यात् तथा च हेमचन्द्रः—
श्रीः पद्धटिका अजादिर्द्वितीयश्चजोलीप्रान्ते प्राकृत पद्धताविह त्वविशेष इति विशेषः ।
यथा—
परगुणगहणसदोस पयासणु महु महुरक्ख रहियमियभासणु ।
उवयारिण पडिकिउ वेरि अणह इयपद्धडी मणोहरसुयणह ।।

अथार्यालक्षणम् ।

यस्यां सप्तचतुष्कलगणा गुरुश्च जगणो न विषमे स्यात् ।
जः षष्ठोऽथ न लघुकौ पूर्वार्द्धे जगुरिमामार्याम् ।।

षष्ठे द्वितीयलात् परकेन्ले मुखलाच्च यदिय पदघट्टना।
अपरार्द्धे पञ्चमके मुखलादिह भवति षष्ठो लः ।।

कलयति कीर्तिस्फूर्तिं सम्पन्निष्पन्नतां द्विषद्विलयं ।
धर्मो वृद्धिं सुधियामार्याचारेण सञ्चरताम् ।।१२।।

षण्मात्र पञ्चचगणा गुरुश्चेद् द्विपदी मता ।
द्वितीयषष्ठौ चगणौ जोम्लौ वा भवतः पुनः ।।
मारेवच्चप हिय नियद इयं परिहिऊण सव्वहा इह हि
समुत्थरंतकुसुमाय रमा ससुहुम्मि अण्णहा ।
परहुअजुवइ गीअ हुलाहल विहलं घलि अचित्तउ
चलसि न दुदइअं पि चम्मीसरं सरनिउरं बव छित्तउ ।।१३।।

षण्मात्रं चत्वारश्च द्विमात्रिकाः ।
यथा—
मयणवियारं समुद्दलहरिवित्थारकारिणी ।
जणआणंदचंदमणि निज्झरसारसारिणी ।।

उच्छलंतलायण्णमयूहावलि ए साहिया
मज्झनयण कुमुयाणमेसा चंदलेहिया ।।१४।।
समे द्वादशविषमे चतुर्दशे तु दोहदकः—
पियहपहारिण पक्केण विसहिदोहया पडंति ।
सन्नद्धउ अवसा भडुअन्नु तुरंगु नर्तति ।।
प्रायोग्रहणात् संस्कृतेऽपि ।

यथा--

मम तावन्मतिमं तदिह किमपि यदस्त्वस्ति तदस्तु।
रमणीभ्यो रमणीयतरमन्यत् किमपि न वस्तु॥

अत्र समपादान्ते गुरुद्वयमित्याम्नायः--

ज्ञेयं वस्तु वदनकं षण्मासश्च गणत्रयम्।
षण्मात्रोजे चगणो जोम्लो वा समत्वे[1] त्वजाः॥

यथा--

मायावि अहविरुद्ध वायवसवं विय लोयहं
परतित्थि अहं असारसत्थसंपाइय मोहहं।
कोप्पत्तिज्जइ सम्मदिट्ठि जह वत्थु इय वयणहं
जिणह मग्गि निच्छलनिहित मरु करुणाभवणहं।

वस्तुमित्यन्ये--

आदौ स्याद्यत्र षण्मात्रश्चगणो गणोज्झितः।
षण्मात्रः पञ्चमात्रोऽन्ते तद्रासावलयं भवेत्।

यथा--

माणुममिल्लि गहिल्लियनिहुई होइ खणु इय उरचंदु पयट्टउ रासावलय खगुः।
दिक्खिसु एहि विनयं णेहिं पइं हलि मयणहलि मयणहय वल्लहि पटहे पडंति॥

भणंति अविणयसय इयं चतुष्पदी वस्तुकं चेत्येके ॥छ॥

पूर्वार्द्धे वाऽपरार्द्धे वा चेद्रसो वलयं भवेत्।
अन्यार्द्धे वस्तु वदनकं संकीर्णं तदा भवेत्।

पूर्वार्द्धे रासावलयेन यथा--सवणनिहीयहीरय हसंत कुण्डलजुयलथूलामल मुत्तावलिमंडिय घणकमल सेयं सुयपंगरण बहुलसिरे दंडरसुज्जल चहु पहुल्ल वियइल्ल फुल्ल फुल्लाविय कुंतला।

अपरार्द्धे रासावलयेन यथा--

अविहडअवरोप्परपरूढगुणगंठि निवद्धउ
अइआरिणि हलि गलइ पेम्मु सरलि मवसलद्धउ।
माणमडप्फरु तुहुं नहुजुत्तु उत्तिमरमणि तिणि
कारणिवारउं वारवारागमणिः ॥छ॥

षण्मात्रश्चतुर्मात्रो द्विमात्रो वदनकं मतम्। यथा--

अज्ज विनयण न गिण्हइ तरलिम अज्ज वि वयणु न मेल्लइ भालिम।
अज्ज वि थणहरभरु न पडिच्छइ तु विमुद्धह दंसणि जगु सुज्झइ॥

केचित् समचतुष्पदीषु षचचदाः संकुलकमिति पठन्ति ॥छ॥

---

१. समके--पा. प. २।

इतः परं द्विपद्योऽधिक्रियन्ते।

कत्यपि ध्रुवाः; द्वौ द्विमात्रौ, चतुर्मात्रौ, द्वौ द्विमात्रौ, लघुस्ततः।
द्वौ द्विमात्रौ चतुर्मात्रौ द्वौ द्विमात्रौ लघुत्रयम्॥
कर्पूरपञ्चदशभिर्मात्राभिरतिभिर्यदि। च स्थाने दद्वयोक्तिस्तु जगणस्य निषेधकृत्॥

यथा——

कप्पूरधवलगुण अज्जिणिय आजम्मु वि नवि चक्कवइ।
पइं कित्तिकाइं उल्लालि करि घल्लिय चउ सायरपरइ॥छ॥

कर्पूर एवान्ते लघुहीनो भवति कुंकुमः।

यथा——

घणसारुमिम्हि कुंकुमवर्थाहि परइ करइ मयनाह वि।
विणु पियइ मिक हसउ निप्फलउं मणु रइकरइ न कत्थवि॥

एतावुल्लासकौ मागधानां, वस्तुवदनकगन्धानां प्रसिद्धाः।

यदाह——

जइ वत्थु आणहे द्वे उल्लाला छंदयम्मि किज्जंति।
दिवढ वंदयछप्पयकथाइं ताइं वुच्चंति।

यथा——

वस्तुवदनकस्य कर्पूरेण।

यथा——

निक्कंदलकयकच्छनलियणिवज्जि अयकयसरसिरि।
निच्चंदणु किउ मलउ तुहिणवज्जिउ किउ हिमगिरि।
निप्पल्लवकिय करिपय नु किंकेल्लि विडवसय।
पत्तचत्तकयवाल कयलिअ कुसुमकयतरुलय।
शिशिरोवयारकिहिपरि अणि वि मुत्ताहलकय भुवण।
ता वि हु तती पभूहह्रां विरह भरि ख सई दाह दारुण विअण।

कुंकुमेन यथा——

गयणुप्परि किं न चडहिं किं न चडहि किं नवि वरि करिहिं दिसिहिं वस्तु।
भुवणत्तयसंतावु हरहि कि न किरि वसुहारसु॥
अंधयारु किं न दलिहि पयडउ जोउ गहिल्लउ।
किं न धरिज्जइ देवि सिरहिसइ हरिसोहिल्लउ॥
कि न तणउ होहि रयणायरह होहि किं न सिरि सायरु।
तुवि चंदनि अविमूहु गोरिय हि कुवि न करइ तुह आयरु॥

रसो वलयस्य कर्पूरेण यथा—

परहुअपंचमसवणसुभगमन्नउं सकिरते भणि।
भणइ न किंपि मुद्धकलहंसगिरा चंदु न दक्खिण सक्कइ।।
जं सा ससिवयणि दप्पणि मुहु न पलोअइ निम्मयनयणि।
वयरिउ मणि मन्नवि कुसुमसरु खीण सा बहु उत्तसइ।
अच्छरिउ रूवु निहि कुसुमसम तुह दंसणु जं अहिलसइ।

कुंकुमेन यथा—

जइक लकइ दीहनयणि खलु केयणिइ कुसुमदलम्मि
भसलु विलसइ तजणु जयती एसुहि हावि मंदुहासउं।
चडइ ता जणु हारय पउमराय संचउ ज्झडइ
जइ तीए महुरमिउभासिणिहि वयणु गुंफु निसुणिज्जइ।।
ता वह करिप्पि जणुअमयरसुकणपण्णपडिपिज्जइ।।

वस्तु वदनकरा सा वलयसंकीर्णस्य कर्पूरेण यथा—

अविहड अपरोप्पर प्परूढगुण गंठिनिबद्धउ अइयारिणि हलि गलिइ पिम्मु।
सरलिमवसलद्धउ माणमडप्परु तुह न कुतु उत्तमरमणि तिलणिवारेउ गमणि।
अह करहि कलहु वल्लहिण सउं इच्छियमयच्छि न पणयमुहुं।
माणिक्किमणसिणि बारिधवलु हेल्लि रिंवल्लि ता जउ तुहु।।

कुंकुमेन यथा—

पंडिगंडयलपुलयपयरपयडण बद्धायरु कंचि वाला वाला विलास बहुलिमगुणनायरु।
दविडदिव्वचंपयचयपरिमलल्हसडउं कुंतलि कुंतलउं दप्प झडप्पण लंपडउ।
मरहट्ठमाणनिद्धा हवय विहववहिंसण सक्कउ कसु करइ न मणि हल्लो हलउ मलयानिलहप्पुलक्कउ।।

रासावलयवस्तुचंदनसंकीर्णकस्य कर्पूरेण यथा—

तरुणि गंडप्पहु पुंछिय तिमिरमसि। उक्कज्झलक्कावडणु डुसहु मा कारउ ससि।
मलयानिलु मय नयणिय कर्पूरकविलिवणु संधुक्कियमयणग्गि सहि इमा।
मलयानिलु मयनयणिधुणिय कर्पूरकविणि लिवणु संधुक्किय मयणग्गि सहि इमा।
तुज्झ तवउ तणु तणुअंगिमरकडहहि पडहि तुज्झ मयण बाणवेयण।
कलहभयमणु माणिवल्लहिण सहुं चडिस सजीवसंसय तुलहा।

कुंकुमेन यथा—

सवणनिहिअहीरय हसंत कुंडलजुयलथूलामलमुत्तावलिमंडियथणकमला।
सेयं सुयपंतुरण वहलसिरिहंडरसुज्जल वहुपहुल्लविअइल्लफुल्ल फुल्लानिअ।

कुंतल तो पयडथाइदंसण जणियखलयणडरभरभारिय अहिसरइ।
चंद सुंदर निसिहिं पइंपियमय अहिसरिआ।

वदनकस्य कर्पूरेण यथा——
किं न फुल्लइ पाडलपरिमल महमहइ किण्ण महेवि अविरला
नवमालिय किं न दलइ पहिल्लय किं न उत्थरइ कुसुमभरिअमल्लिअ
दीहिअ तलाय सरल्लायहिं किं न पभाइहिं पउमणि फुडइ तु वि जाइ
जायगुणसंभरणु झाणु किसलहमणि खुडइ।

कुंकुमेन यथा——
जइ तुहुं मह करयलु उग्गोडइवि वल्लिअ चीरं तुलु अच्छोडवि
माणिणि तुवि पमाउ करिसुम्मुउ पइ पिउ उत्तावलि अम गम्मउ।
जइ किमइवि संचयह पयजुयलु इट्ठ विहिवसिण विहट्टइ
ता तुज्झ मज्झ रवीणउं खरउं किं नर वामोयरि तुट्टइ ।।छ।।

इति श्री वायटीयगच्छीयश्रीजिनदत्तसूरिशिष्य पण्डितश्रीमदमरविरचितस्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि न्यासस्तबकोल्लासी स्वनामाङ्क छन्दःकाव्यकीर्त्तनो नाम द्वितीयः प्रस्तरः।ग्रं. ३८४ ।।छ।।

चतुष्केत्यादि—चतुष्कतद्धिताख्यातकृतां शब्दैरेतद्वृत्युदाहरणैः स्यादीनिः। प्रथमादिसप्तविभक्तीनां एकविंशति-वचनैः साधितनामभिः। त्यादीनि वर्तमानादिदशविभक्तीनां प्रत्येकमष्टादशवचनैः साधितधातुभिः कर्तृकर्मादिकार-कच्छाये विशेषास्तदुद्भवैः मित्यादीनि। स्यादिविभक्तिविशेषाम्त्यादिविभक्तिविशेषाश्च ये तदुद्भवैः स्यादिशब्दाः कर्तृ-कर्मादिविशेषशब्दाः स्यादिविभक्तिविशेषशब्दाश्चतुष्कोक्तत्वाच्चतुष्कशब्दा ज्ञेयाः। तथा त्यादिशब्दास्त्यादिविभक्तिविशेष-शब्दाश्चाख्यातोक्तत्वादाख्यातशब्दाः ज्ञेयाः।परं शिष्याणां क्रमपरिज्ञानाय पृथगुक्ताः ।।छ।।

चतुष्कशब्दा विदितास्तद्धिदितशब्दाः केऽपि लिख्यन्ते। श्रीसिद्धहेमतद्धितान् प्राग्वतःस्त्रीपुंसान्नञ् स्नञ् प्राग्वतो येऽर्थास्तेष्वनिदम्यण् पचादेव स्त्रीशब्दात् पुमत्सशब्दाच्च, यथासंख्यं नञ् स्नञ् प्रत्ययौ भवतः। स्त्रिया अपत्यं स्त्रैणः पौंस्तः स्त्रीणां समूहः स्त्रैणं पौस्तं स्त्रीणामियं स्त्रैणी पौंस्ती स्त्रीणां निमित्त संतोग उत्पातो वा स्त्रैण पोस्तः स्त्रीभ्यो हितं स्त्रैणं पौस्तं ।।छ।। ते त्वा स्त्री शब्दात् पुमत्सशब्दाच्च त्वेव प्रत्ययविषटो भावे यथासंख्यं नञ् स्तञ् प्रत्ययौ वा भवतः। स्त्रिया भावस्त्रणं स्त्रीत्वं स्त्रीता पौंस्तं पुंस्त्वं पुंस्ता पारा बारादीनः। अवारः समुद्रतस्य पारं राजा दन्तादित्वात्। पारा-वारस्तत्र भवो जातो पारावारीणः व्यस्त व्यतस्तान् पारावारशब्दाद्वास्ताद्विपर्यस्ताच्च ईनप्रत्ययो भवति। वारीण अवारीणः अवारपारीणः ।।छ।।

द्युप्राग् पागुदक् प्रतीचो यः दिव्शब्दात् प्राच् अपाच् उदच् प्रत्यच् इत्येतेभ्यश्चाव्ययानव्ययेभ्यो यः प्रत्ययो भवति, दिवि भवं दिव्यं, प्राचि प्राग्वा भवं प्राच्यं, अपाच्यं, उदीच्यं, प्रतीच्यं। दिग्देशवृत्तेः प्रागादेरयं यः कालवृत्तेः त्वव्ययात् परत्वात् सायमित्यादिना तनट्। अनव्ययात्तु वर्षाकालेभ्य इतीकण् प्राक्तनं प्राचिकमित्यादि ।।छ।।

दक्षिणा पश्चात् पुरःमस्त्यण्। अणोऽपवादः। दक्षिणादिक् तस्यां भवो दाक्षिणात्यः। अथवा दक्षिणस्यां दिशि वसति वा दाक्षिणात्यः। प्रथमा सप्तम्या इत्याप्रत्यये दक्षिणा, तत्र भवो दाक्षिणात्यः। पाश्चात्यः पौरस्त्यः पश्चात् पुरःशब्दसाहचर्याद्। दक्षिणा शब्दो अव्ययं वा गृह्यते (गृह्णाति?) ।।छ।।

वा युष्मदस्मदोऽञीनञौ युष्माकास्माकं चास्यैकत्वे तु तवकं ममकं। युष्मदस्मदित्येताभ्यां शेषेऽर्थेऽञ् नञ् प्रत्ययौ वा भवतः। तत्सन्नियोगे तु यथासंख्यं युष्मदस्मदोर्युष्माकास्माकौ। एकत्वविशिष्टे त्वर्थे वर्तमानयोस्तवकममकौ आदेशौ भवतः। प्रत्ययौ प्रति यथासंख्यं नास्ति वचनभेदात् युष्माकमयं युवयोर्वायौष्माकीणः। अस्माकमयमावयोर्वा आस्माकं, आस्माकीनः। पक्षे त्यदादित्वे नयुसंज्ञत्वात्पदीयः युष्मदीयः अस्मदीयः, एकत्वे तु तवकममकम्। तवायं तावकीयः तावकः मामयं (ममायं) मामकः मामकीनः। पक्षे त्वदीयः मदीयः॥छ॥

समानपूर्वलोकोत्तरपदात् समानशब्दपूर्वपदेभ्यो लोकशब्दोत्तरपदेभ्यश्च। इकण् समानग्रामे कृतो भवो वा स समानग्रामिकः, समानदेशिकः। इहलोके कृतो भवो वा ऐहलौकिकः, सार्वलौकिकः,॥छ॥

वर्षाकालेभ्यः—वर्षाशब्दात् कालविशेषवाचिभ्य इकण्, अणोऽपवादः। दोरीयमपि परत्वाद्बाधते। वर्षासु भवो वार्षिकः पूर्ववार्षिकः, अपरवार्षिकः। कालवाचि मासिकः, अर्द्धमासिकः, सांवत्सरिकः, आन्हिकः, दैवसिकः॥छ॥

निशाप्रदोषादिकण्वा-नैशिकः, नैशः, प्रादोषिकः, पूर्वाह्णाऽपराह्णात्तमट्। आभ्यां वा तमट्। वर्षाकालेभ्य इति—नित्यमिकणि प्राप्ते विकल्पस्तेन पक्षे सोऽपि भवति। पूर्वाह्णे जातो भवो वा पूर्वाह्णेतमः, पूर्वाह्णतमः; अपराह्णेतमः, अपराह्णतमः। कालात्तनेत्यादिना वा सप्तम्यालुक्।

पूर्वाह्णे जयी पूर्वाह्णतमः, अपराह्णतमः। अत्र जयनिवाप्ये तत्र व्यवस्थितविभाषाविज्ञानान्नित्यं सप्तम्यालुप्। पक्षे पौर्वाह्णिकः आपराह्णिकः। टकारो ङ्यर्थः, पूर्वाह्णेतनी, अपराह्णेतनी॥छ॥

सायं चिरं प्राह्णे प्रगेऽव्ययात्। एभ्योऽव्ययेभ्यश्च कालवाचिभ्यस्तनट्। साये भवं सायंतनं, चिरे भवं चिरत्तनम्। अत एव निर्देशान्मान्तत्वं निपात्यते। प्राह्णेतनं प्रगेतनम्। अनयोरेकान्तत्वम्। अव्ययदिवातनं, दोषातनं, नक्ततनं, पुनस्तनं प्रातस्तनम्॥छ॥

तं प्रत्यनोर्लोमेपकूलात् तमिति द्वितीयान्तात् प्रति अनु इत्येताभ्यां परो यो लोमशब्दः ईपशब्दः कूलशब्दः तदन्ताद्-वर्तत इत्यर्थः। इकण् प्रत्ययो भवति। प्रतिलोमं च वर्तते प्रातिलोमिकः, आनुलोमिकः, प्रातीपिकः, आन्वीपिकः, प्रातिकूलिकः, आनुकूलिकः॥छ॥

सुस्नातादिभ्यः पृच्छति। सुस्नातादिभ्यो द्वितीयान्तेभ्यः पृच्छत्यर्थे इकण्। सुस्नातं पृच्छति सौस्नातिकः, सौखरात्रिकः, सौखशायिकः, सौखशय्यिकः। सुस्नातादयः प्रयोगगम्याः॥छ॥

सर्वजनाण्ये नञौ अस्मात् तत्र साधौ ण्य ईनञ्प्रत्ययौ। सार्वजन्यः, सार्वजनीनः, पञ्चसर्वजनविश्वाज्जनात् कर्मधारये। एभ्यः पराज्जनशब्दात् कर्मधारये वर्तमानात् तस्मै हिते ईनः ईयापवादः। पञ्चजनेभ्यः पञ्चजनाय वा हितः पञ्चजनीनः। रथकारपञ्चमस्य चातुर्वर्ण्यस्य पञ्चजन इति संज्ञा। एवं सर्वजनीनः विश्वजनीनः॥छ॥

महत्सर्वादि कण्—महतः सर्वाच्च योजनशब्दस्तदन्तात् कर्मधारये। तस्मै हिते इकण्, महते जनाय हितो माहाजनिकः।[1] सर्वस्मै जनाय हितो सार्वजनिकः। एते सर्वजनात् पूर्वेण ईनः। अनेन कणि तु द्वैरूप्यम्॥छ॥

यथा कामान् कामात्यन्तंगामिनि। एभ्यो द्वितीयान्तेभ्यो गामिन्यर्थे ईनः। यथा कामं गामी यथाकामीनः, अनुकामीनः, यथेच्छं गामीत्यर्थः। अत्यन्तं गामी अत्यन्तीनः, भृशं गतेत्यर्थः॥छ॥

सर्वादिः पथ्यंगकर्मपत्रपात्रशरावं प्राप्नोति। सर्वशब्दपूर्वेभ्यः पथि अङ्गकर्मन्। पत्रपात्रशराव इत्येतदन्तेभ्यो द्वितीयान्तेभ्यो व्याप्नोतीत्यर्थे ईनः प्रत्ययो भवति। सर्वपथं व्याप्नोति सर्वपथीनो रथः। सर्वपथान् व्याप्नोति सर्वपथीनमुदकम्। एवं सर्वाङ्गीणस्तापः, सर्वकर्माणः [कर्मी] पुरुषः, सर्वपत्रीणः ओदनः। सर्वादेरिति किं ? पन्थानं व्याप्नोति॥छ॥

---

१. माहजानिकः-सं.प.

पारावारं व्यस्तव्यत्यस्तं च पारावारशब्दात् समस्ताद्व्यस्ताच्च द्वितीयान्तात् गामिन्यर्थे ईनः। पारावारं गामी पारावारीणः, पारीणः, अवारीणः, अवारपारीणः । पूर्वत्र भवार्थे, इह तु गामिन्यर्थे ईन इत्यत्र विशेषः ।।छ।।

प्राण्यङ्गादातोलः; मतुश्च चूडालः जंघालः शिखालः; चूडावान् जंघावान् शिखावान् । प्राण्यङ्गादिति किं ? जङ्घावान् प्रासादः, शिखावान् प्रदीपः । अङ्गग्रहणं किं ? इच्छावान् वासनावान् । कर्णिकाल इत्यत्र कर्णिकाशः । प्राण्यङ्ग-वाचकमित्याहुः ।।छ।।

प्रज्ञापर्णोदकफेनाल्लेभौल्लौ । एभ्यो लइमो मतुश्च-प्रज्ञालुः प्रज्ञिलः प्रज्ञावान्, पर्णलः पर्णिलः पर्णावान, उदकलः उदकिलः उदकवान्, फेनलः फेनिलः फेनवान् ।।छ।।

स्त्रियः पुंसो द्वन्द्वाच्च स्त्रीशब्दात् परो यः पुमस् शब्दस्तदन्तात् द्वन्द्वाच्च कर्मधारयाच्च अन् । स्त्री च पुमांश्च स्त्रीपुंसौ, स्त्रीपुंसः । कर्मधारयात् स्त्री चासौ पुमांश्च स्त्रीपंसः । शिखण्डी स्त्रीपुंसं विद्धि राक्षसं । द्वन्द्वाच्चेति किं ? स्त्रियां पुमान् स्त्रीपुमान् । रूक् सामय्यजुषा धेनून्वनुहवाङमनसाऽहोरात्रं, रात्रिन्दिवं नक्तं दिवाहर्दिवोर्वष्टीवपदष्टीवाक्षिभ्रुवदारग-वाम् । रूक्सामादयो द्वन्द्वा अप्रत्ययान्ता निपात्यन्ते । ऋक् च साम च ऋक् सामाव । ऋक्यजुश्च ऋक् यजुषमधीयन् । धेनुश्च अनड्वांश्च धेन्वानड्वाहौ धेन्वनुडुहा असमाहारार्थं धेन्वनुडुहग्रहणम् । समाहारे तु समाहारद्वन्द्वचवर्गदषहान्त इत्यनेनैव सिद्धम् । वाक् मनश्च वाग्मनसे, अहश्च रात्रिश्च अहोरात्रं, पुण्याविमावहोरात्रौ, रात्रिश्च दिवा च रात्रि-न्दिवं, रात्रिन्दिवानि पश्यति । निपातनात् पूर्वपदस्य मोऽन्तः । नक्तं च दिवा च नक्तंदिवे । अत्रापि मोऽन्तः । अहश्च दिवा च अहर्दिवम् । पर्याययोरपि वीप्सायां द्वन्द्वो निपातनात् । अहरहरित्यर्थः । रात्रिपर्यायोऽत्रान्यतर इत्येके । अह-र्निशमित्यर्थः । ऊरो च अष्टीवन्तौ ऊर्वष्टीवं । निपातनादन्त्यस्वरादिलोपः । पादौ चाष्टीवन्तौ च पदष्टीवं, अत्र पद्भावः । अक्षिणीव भ्रुवौ चाक्षिभ्रुवम् । दाराश्च गावश्च दारगवम् । अत्र निपातनाद्भ्रुव उवादेशोऽक्षिदाराशब्दयोश्च पूर्वनिपातः । द्वन्द्वादित्येव ऋक्, सामवःयस्य ऋक्सामामुग्धः [?] । ऋक्यजुर्यस्य स ऋक्यजुः । धेनोरनड्वान् धेन्वनड्वान् ।।छ ।।

पुरुषायुषद्विस्तावत्रिस्तावम् । एतेऽत्प्रत्ययान्ता निपात्यन्ते । पुरुषस्यायुः पुरुषायुषम् । द्विस्तावती द्विस्तावा, त्रिस्तावती त्रिस्तावा वेदिः । वेद्यामनयोः प्रयोगः । अतीशब्दलोपो निपातनात्–प्रकृष्टौ यावती तावती, त्रिगुणा वा कस्या-ञ्चिद्विकृतौ भवति । विकृतिविकृती, यागविशेषौ । अन्यत्रापि च दृश्यते । द्विस्तावो ऽग्निः त्रिस्तावोऽग्निः ।।छ।।

सप्तत्युत्सुरभेर्गन्धादि गुणे सप्तति उत । सुरभि इत्येतेभ्यः परो यो गन्धशब्दो गुणे वर्तते, तदन्ताद् बहुव्रीहेरित्, शोभनो गन्धो गुणोऽस्य वा सुगन्धिवदनं, पूतिगन्धिकरजं, उद्गन्धिकमलं, सुगन्धिकेसरम् । उत्तरत्रागन्तोर्वाविचनादिह स्वाभाविकादभवति । स्वादिभ्य इति किं ? तीव्रगन्धं हिङ्गु, उग्रगन्धा वचा । गन्धादिति किं ? सुरसः । गुण इति किं? । शोभना गन्धाः कुष्टादयोऽस्य सुगन्ध आपणिकः । इदिति तकार उच्चारणार्थः ।।छ।।

वागन्तौ स्वादिभ्यः पर आगन्तौ । आहार्ये गुणे वर्तते यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरिद्वा, सुगन्धि सुगन्धं वा शरीरं, पूतिगन्धि पूतगन्धं वा जलं, उदगन्धिः उद्गन्धो वा आपणः, सुरभिगन्धिः सुरभिगन्धो वा पवनः ।।छ।।

वाल्ये अल्पेऽर्थे यो गन्धशब्दस्तदन्ताद्बहुव्रीहेरिद्वा । सूपस्य गन्धो मात्राऽस्मिन् सूपगन्धिः सूपगन्धभोजनं, अल्पसूप-मित्यर्थः । माल्यगन्धिः माल्यगन्ध उत्सवः । एवं दधिगन्धि दधिगन्धं भोजनं । असमानाधिकरण्येऽपि उष्ट्रमुखादित्वाद्-बहुव्रीहिः ।।छ।।

वोपमानात् उपमानात् परो यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरिद्वा, उत्पलस्येव गन्धोऽस्य उत्पलगन्धः उत्पलगन्धं वा मुखं । करीषगन्धि करीषगन्धो [न्धं ?] वा शरीरं ।।छ।।

धनुषो धन्वन् धनुःशब्दस्तदन्ताद्बहुव्रीहौ धन्वन्नित्ययमादेशः । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा, पिनाकधन्वा, अजकावधन्वा, गाण्डीवधन्वा । कथं गाण्डीवधनुषः खेभ्यो निश्चकार हुताशन इति ? संज्ञात्वविवक्षायामुत्तरेण विकल्पो भविष्यति । ।।छ।।

वा नाम्नि धनुःशब्दस्य बहुव्रीहौ धन्वन्वा नाम्नि संज्ञायां विषये, शतधन्वा शतधनुः, पुष्पधन्वा, पुष्पधनुः ।।छ।। जायाया जानिः । जायाशब्दस्य बहुव्रीहौ जानेरित्ययमादेशः । युवतिर्जाया यस्य युवजानिः, प्रियजानिः, शोभनजानिः, वधूजानिः अनन्यजानिः ।।छ।।

मतोर्णौ विमाता ष्टेयसौ लुप्, विन्मन् इत्येतयोः प्रत्ययोर्णि इष्टईयस इत्येतेषु प्रत्ययेषु परेषु लुग् भवति । स्रग्विणमाचष्टे-स्रजयति; अयमेषां स्रग्विणामतिशयेन त्वग्वान्, त्वस्रग्वी स्रजिष्ठः । अयमनयोः स्रग्विणोरतिशयेन स्रग्वी स्रजीयान् । त्वगन्तमाचष्टे त्वचयति । अयमेषामतिशयेन त्वग्वान्, त्वचिष्ठः । अयमनयोरतिशयेन त्वग्वान् त्वचीयान् । कुमुद्वन्तमाचष्टे-कुमुदयति, कुमुदिष्टः, कुमुदीयान् ।।छ।।

अल्पयूनोः कन्वा अल्पयुवन् इत्येतयोर्णि इष्ठ ईयस्, इत्येतेषु परेषु कन इत्ययमादेशो भवति । वाकनयति कनिष्ठः कनीयान्; पक्षे अल्पयति, अल्पिष्ठः, अल्पीयान्; यवयति यविष्ठः यवीयान् ।।छ।।

प्रशस्यस्य श्रः । प्रशस्यशब्दस्य णीष्टयेसु परेषु परतश्च, इत्ययमादेशो भवति--श्रयति श्रेष्ठः श्रेयान ।।छ।।

वृद्धस्य च ज्यः । वृद्धशब्दस्य प्रशस्यशब्दस्य च णीणेष्टे यसुषु ज्य इत्ययमादेशः--ज्ययति ज्येष्ठः ज्यायान् । ज्यायानिति पूर्वसूत्रेण विहितज्यादेशात । ईयसोरीकारस्याकारो देशो निपात्यते । अयमनयोरतिशयेन प्रशस्यो वृद्धो वा--ज्यायान ज्यायसी ।।छ।।

बाढान्तिकयोः साधने दौ बाढ अन्तिक इत्येतयोर्णष्टे यसुषु परतो यथासंख्यं साधने दइत्येतावादेशौ भवतः-साधयति साधिष्ठः साधीयान्; नेदयति नेदिष्ट [ष्ठः] नेदीयान ।।छ।।

प्रियस्थिरस्फुरोरुगुरुबहुलतृप्रदीर्घं वृन्दारकस्येयमिति च प्रास्थास्फावरगरवंहत्रपदाघवर्षवृन्दम् । प्रियादीनां यथासम्भवमिमनिणीष्टेयमुषु यथासंख्यं प्रा इत्यादय आदेशा भवन्ति--प्रियस्य प्राप्तिर्यस्य भावः । पृथ्व्यादिभ्यः इमन्वा प्रेमा प्रापयति प्रेष्ठः, प्रेयान्; स्थिरस्य स्थाः स्थिरस्य भावः । वर्णदृढादिभ्यः यस्मिन् वा स्थेमा, स्थापयति, स्थेयान्; शिरस्य स्फा स्फापयति स्फेष्ठः स्फेयान् । उरोर्वमवरयति, वरिष्टः वरीयान् । गुरोर्गरुः, गरिमा, गरयति, गरिष्ठः, गरीयान् । बहुलस्य बंहः बंहिमा बंहयति बंहिष्ठः बंहीयान् । तृपस्य त्रप् त्रपिमा, त्रपयति, त्रपिष्ठः, त्रपीयान् । दीर्घस्य द्राघः, द्राघिमा, द्राघयति, द्राघिष्ठः, द्राघीयान् । वृद्धस्य वर्ष, वर्षिमा, वर्षयति, वर्षिष्ठः, वर्षीयान् । वृन्दारस्य वृन्द वृन्दयति, वृन्दिष्ठः, वृन्दीयान् । स्फिरशब्दस्यावर्णपृथ्व्यादित्वाददृढादित्वाच्च ने मन् प्रत्ययः । वरादीनां मकार उच्चारणार्थः । कश्चिच्च करोत्यर्थे प्राद्यादेशं नेच्छति, तन्मते प्रिययति स्थिरयतीत्यादि ।।छ।।

पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः । पृथ्व्यादीनामृकारस्य मनिणीष्टे यसुषु परतो रशब्द आदेशो भवति । प्रथिमा प्रथयति, प्रथीयान्; म्रदिमा म्रदयति म्रदिष्ठः म्रदीयान्; भ्रशिमा, भ्रशयति, भ्रशिष्ठः, भ्रशीयान् । केचित् वृढशब्दस्यापीच्छन्ति-व्रढिमा, व्रढयति, व्रढिष्ठः, व्रढीयान् । पृथ्व्यादीनामिति किं ? ऋजिमा, ऋजयति, ऋजिष्ठः, ऋजीयान्; कृष्णिमा, कृष्णयति, कृष्णिष्ठः, कृष्णीयान् ।।छ।।

बहोर्णीष्टे भूयान् । बहुशब्दस्य णीष्टयोः परयोर्भूय इत्ययमादेशो भवति । भूभावापवावः-भूयति, भूयिष्ठः । बहोरा-ख्यानं भूयतां णो । केचिद्विकल्पमाहुः--भूययति भूयनं, पक्षे बहयति बहनं । बहोर्णौ भाविनि कश्चिद् भावयति । भूर्लुक्चे-वर्णस्य बहुशब्दस्य ईयसाविमति च । परे भू इत्ययमादेशो भवति । अनयोः श्वेतवर्णस्य लुग्भवति । भूयान्, भूयांसौ, भूयांसः । भूमा, भूऊ, इत्युकार प्रश्लेषादवादेशो न भवति ।।छ।।

स्थूलपूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः । स्थूलादीनां यथासम्भवमिमनिणीष्टे यसुषु च अन्तस्थादेरवयवस्य लुक् । नामितश्च गुणो भवति--स्थूला स्थवयति, स्थविष्ठः, स्थवीयान्; दूर दवयति, दविष्ठः दवीयान्; युवन् यवयति, यविष्ठः, यवीयान्; ह्रस्वः ह्रसिमा ह्रसयति ह्रसिष्ठः ह्रसीयान्; क्षिप्र, क्षेपिम, क्षिपयति, क्षेपिष्ठ क्षेपीयान्; क्षुद्र क्षोदिम,

क्षोदयति, क्षोदिष्ठः क्षोदीयान् । ह्रस्वादिभ्यः पृथ्व्यादित्वादिमन् । केचित् स्थूलदूरयूनां करोत्यर्थे णौ नेच्छंति । स्थूलयति दूरयति युवयति ।।छ।।

अंत्यस्वरादेः तृप्रत्ययस्यान्त्यस्वरादेश्चावयवस्य इमनिणीष्टेयसुषु च परेषु लुग्भवति । कर्तृमतमाचष्टे-कारयति करिष्ठः करीयान् । कर्तारमाचष्टे-कारयति मातयति भ्रातयति इत्यत्र त्वनर्थत्वात् तृशब्दस्य न भवति । पटिमा, पटयति, पटिष्ठः पटीयान्; लघिमा, लघयति, लघिष्ठः, लघीयान् ।।छ।।

नैकस्वरस्य एकस्वरस्य शब्दरूपस्य यान्त्यस्वरादिरवयवस्तस्य इमनीयष्टीयसुषु च परेषु लुग् भवति । स्रग्विण-माचष्टे-स्रजयति, स्रजिष्ठः, स्रजीयान् । एकस्वरस्येति किं ? वसुमन्तमाचष्टे-वसयति, वसिष्ठः, वसीयान् । योगविभागाद-वर्णे वर्णस्येति-लोपस्यापि प्रतिषेधः । श्रेष्ठः श्रेयान् । इति तद्धितशब्दोद्धारः ।।छ।।

अथाख्यातशब्दाः—कर्तरि रुचादिङानुबन्धेभ्यः । रुचादिभ्यो ङानुबन्धेभ्यश्च कर्तर्यभिधेये आत्मनेपदानि भवन्ति—रुच् रोचते, वर्द्धते; शीङ् शेते । चक्षिङ् आचष्टे । वेदे अनुदात्तस्वरेण परस्मैपदिनः, उदात्तेन आत्मनेपदिनः, समाहारेण उभयपदिनो धातवः पठ्यन्ते शर्ववर्ममते रुचे इत्यनुदात्त उपलक्षणम् । तेन रुच प्रकारेभ्य आत्मनेपदं कर्तरि । आदिग्रहणाद् बहुवचनाच्च गणो गृह्यते । तथाहि निर्वेश[1] आत्मनेपदीनि ससम्बन्धः । सर्वत्राभिनिविशते । गणेऽस्मिन् लाक्षणिकोपपदं न ग्राह्यम् । तेन मधुनि विशन्ति भृङ्गाः । परिव्यवेभ्यः क्रीङ्-परिक्रीणते विक्रीणीते; लाक्षणिके वनं बहु विक्रीणाति ।।छ।।

विपराभ्यां जिः-विजयते पराजयते; लाक्षणिके वनं बहु विजयति पराजयति[2] ।।छ।।

आङो दाङनास्यप्रसारणे—अस्यास्य प्रसारविकासे विद्यामादत्ते। उष्ट्रोमुखं व्याददाति प्रसारयतीत्यर्थः; कूलं व्याददाति विकसतीत्यर्थः। आस्यग्रहणात् परमुखप्रसारणत्वादात्मनेपदमेव व्याददते। कीटकाः पतङ्गमुखं आडम्बिना प्रददाति ददाति ।।छ।।

आगमिन् क्षान्तौ क्षान्तिः प्रतिक्षणम्। आगमय स्वगुरून् कञ्चित् कालं प्रतीक्षस्व । आङो नु प्रश्ने। आनुते शृगालः, स्वयमेव उन्मत्तः शब्दायते, आपृच्छते गुरुन् संदेहं, आपृच्छस्व प्रियसखममुम्। आङ् पूर्वः प्रच्छिरत्र सकर्मको ग्राह्यः। समोग पृच्छिसूत्रे प्रच्छिरकर्मक आत्मनेपदीत्यनयोर्विशेषः। आनुपर्यादिभ्यः क्रीड्। समो कूजते। अनुपर्याङ परः क्रीडः। संपूर्वो यमकूजने। अनुक्रीडते, परिक्रीडते, संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः। कूजने संक्रीडन्ति अनांसि, अव्यक्तं शब्दायन्ते। कर्मप्रवचनीयत्वे तु शब्देनात्मनेपदम्। गामनुक्रीडन्ति गोपालाः ।।छ।।

अपस्किर् कृतौ दादिकः। अपस्किरते वृषभो हृष्टः; अपस्किरते कुर्कुटो भिक्षार्थी; अपस्किरते स्वः निवा सार्थी। अपाच्चतुष्पात् पक्षिशुनि हृष्टान्नाश्रयार्थे इति सुट्, सुटं विना अपकिरति ।।छ।।

अङ्गत्यनुकरणे हृञ्, पैत्रिकमश्वा अनुहरन्ते; पितृवद्गच्छन्तीत्यर्थः। गतेरन्यत्र नटो राममनुहरति ।।छ।।

आशिषि नाथः। सर्पिषो नाथते, सर्पिर्मे भूयादित्याशास्ते। नाथ इति सूत्रेण कर्मणि षष्ठी। आशिषीति किं? नृपमनुनाथयति, याचतीत्यर्थः। यद्याशिष्यात्मनेपदं तत् कथमात्मनेपदिषु पाठः। सत्यं रुचादेश्च व्यञ्जनादेरित्यनेन प्रत्ययार्थः नाथनः ।।छ।।

शपथे शप्, मैत्राय शपते। श्लाघहृनुस्थाशपां प्रयोज्य इत्यनेन चतुर्थी व्याशप् उपलम्भते(उपालम्भे?)। मैत्राय शपते मैत्रे गते मृते वा तदनुरूपं चेष्टत इत्यर्थः। अन्यत्र छात्राय शपति आक्रोशतीत्यर्थः ।।छ।।

---

१. निर्विश-ला.प; निवेश-दे.प.
२. विजयते— ला. प. देप.

प्रतिज्ञा निर्णयप्रकाशनेषु स्था १, समवप्रतिभ्यः २, उदो नूर्ध्वचेष्टायां ३, उपान्मंत्रणे ४, पथ्याराधनयोश्च ५, वा लिप्सायां ६, अकर्मकश्च ७, प्रकाशनानिर्णयप्रकाशनेषु स्था प्रतिज्ञानिर्णयेऽथ समवप्रतेः। उदश्चानूर्द्ध्व चेष्टायां, उपपूर्वस्ततः परं १, देवार्चा यां पथकर्तृकसंगममित्रत्वमन्त्रकरणेषु निःकर्मापि च नित्यं। वा लिप्सायां रुचादि स्था २; परपरितोषार्थमात्मनः शरीरदर्शनं प्रकाशने तिष्ठते। यस्य कन्या छात्राय श्लाघ्हनुस्थाशपां चतुर्थी आत्मानं, कन्या रोचयतीत्यर्थः। अभ्युपगमः प्रतिज्ञानित्यं शब्दमातिष्ठते सभ्यादिभिर्निश्चयो निर्णयः। त्वयि तिष्ठते विवादः। संशशयकर्णादिपु तिष्ठते यः। कर्णादीन् सभ्यान् करोतीत्यर्थः। यथा संतिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते, तथा मुक्तावुत्तिष्ठते जनः। अनूरद्ध्व इति किं? आसनादुत्तिष्टति। चेष्टायामिति किं? ग्रामाच्छतमुत्तिष्ठति। तथा देवार्चायां अर्कमुपतिष्ठते। पन्था कर्ता यस्य स पथिककर्तृकः, अयं पन्थाः सृघ्नमुपतिष्ठते। सङ्गम उपश्लेषः, यमुना गङ्गामुपतिष्ठते। मित्रत्वं महामात्रानुपतिष्ठते, मैत्र्या हेतुना फलेन वा साधयतीत्यर्थः। मन्त्रः करणं कारकं यस्यार्थस्य तन्मन्त्रकरणं, तच्च तृतीयान्तं प्रयुज्यते। यथा—ऐन्द्र्या गार्हपत्यमुपतिष्ठते, साविञ्या सूर्यमुपतिष्ठते आराधयतीत्यर्थः। करग्रहणं किम्? गायत्रीमुपतिष्ठते। अकर्मकः भोजनकाल उपतिष्ठते, ज्ञानमस्य ज्ञेयेषूपतिष्ठते सन्निधीयते इत्यर्थः। लिप्सायां वा—भिक्षुको दातृकुलमुपतिष्ठते उपतिष्ठति, वा लभेयमिति ।।छ।।

समो गम्-ऋच्छि-प्रच्छि-सृश्रु वेत्यनिर्द्दशोऽकर्मकाः समोगम्-ऋच्छि-प्रच्छि-सृश्रु वेत्यर्तिदृक्। नृकः स्मृध्यो न चर्करीतौ ऋद्वयं विदादिगः। संगच्छते, कर्मणि तु संगच्छति सुहृदम्। एवमन्येष्वपि कृच्छतुतादि(षु)। समृच्छते, संपृच्छते, संश्रुणुते। नित्यपरस्मैपदि साहचर्याद्विदि जानार्थः। संचित्ते-संचिद्रते न वलयः पलितानि च देहिनाम्। प्रज्ञैव बोध्रीतस्वानां वयः कुत्रोपभुज्यते। संस्वरतो कवादिः। समृच्छते आदादिको जुहोत्यादिः तस्य सम्पृच्छते, संमृच्छते, संपश्यते। स्तृधातोश्च क्रीयते लुकि संसस्वर्तिप्रभृतयः ।।छ।।

उपसर्गादस्य त्यूहौ वा, अस्य त्यूहौ रुचादीव प्रादितोऽकर्मकौ। यन्निदेशादसत्यस्तीत्वाद्यदीनसम्मतौ। निरस्यति निरस्यते; विपर्यस्यति, विपर्यस्यते; समूहति समूहते। सन्ततं तिमिरमिन्दुरुदास्रो यशः। समूहन्निवदिद्विकीर्णं अस्यतेरप्राप्ते ऊहतेश्च, नित्यं प्राप्ते उभयत्र विभाषेयम्। त्वकर्मकामेवेच्छन्ति प्रत्युदाहरन्ति च। निरस्यति शत्रून्, समूहते पदार्थान् ।।छ।।

व्युद्भ्यां तपः, तपः कर्मकश्च, व्युद्भ्यां तपोऽकर्मणि। व्युद्भ्यां तपः स्वाङ्गकर्मा, तपःकर्मानुकेवलः। वितपते, उत्तपते रविः, दीप्यत इत्यर्थः। रोचते, भासते, ज्वलति, दीप्यत, इत्येष्वर्थेषु। तपःकर्मकं स्मरंति स्वांगकर्मा। यथा-तप्यते तपस्तापसः; वितपते, उत्तपते पाणिं, तापयतीत्यर्थः। अस्वाङ्गकर्मा तु पृथ्वीं रविरुत्तपतीति, सन्तापयतीत्यर्थः। यथा वहति प्रापणार्थः, सकर्मकः; ग्रामं भारं वहति। स्पन्दनार्थत्वे कर्मक एव। नदी वहति स्यन्दते। तपःकर्मा यथा—तप्यते तपस्तापसः, तापस्तपः, कर्मत्वात् कर्तरि यण् ।।छ।।

निसंव्युपेभ्यो वाह्वां स्पर्द्धायामाङः। समोवेरुपेतः स्पर्द्धायामाङ्परः पुनः। निह्वयते प्रभृतयो मल्लमाह्वयते स च निह्वयते, संह्वयते, निह्वयते, उपह्वयते, मल्लो मल्लमाह्वयते ।।छ।।

सूचनावक्षेपणे सेचनसाहसप्रतिपन्नकथोपयोगेपु कृञः। अधिः शक्तौ। वेःशब्दः कर्मकः, अकर्मकश्च। सूचनादिषु सप्तस्वधिः शक्तौ, वेः परः पुनः। अकर्मा शब्दकर्मा चान्य से कृञ् स्याद्रुचादिभाक्। सूचनं द्रोहेण परदोषोद्घट्टनं। अयमिदमुपकुरुते अवक्षेपः। कुत्सा दुर्वृत्ता न च कुरुते। सेवने गणिकामुपकुरुते। साहसमविमृश्य प्रवृत्तिः, परदारानुपकुरुते। स्वं मृत्युमभिभाव्य तानभियाति। प्रतियत्नः सन्तोषे गुणान्तराधानं। एधोदकस्योपस्कुरुते[1]। करोतेः प्रतियत्ने वा कर्मणि षष्ठी। प्रकथनं परतप्तिः। जनवादान् प्रकुरुते। उपयोगो धर्मादिषु द्रव्यविनियोजनं। सतामुपकुरुते[2]।

---

१. 'सेवने गणिकामुपकुरुते. . .एधोदकस्योपस्कुरुते' सं.प. १-२ मध्ये पुनरुक्तमिदं ला.प., दे.प. मध्ये नास्ति।

२. 'शतमुपकुरुते' ला.प.।

'भवादृशाश्चेदधिकुर्वते परान्निराश्रयः हन्त हता मनस्विता' । सत्यामपि शक्तौ परानुपेक्षन्त इत्यर्थः । विपूर्वो द्विभेदस्तद्यथा अकर्मकत्वे विकुर्वते । सैन्धवाः साधुदान्ताः, शोभनं वल्गन्तीत्यर्थः । उदनपूर्णाश्छात्रा विकुर्वते, निष्फलं चेष्टन्त इत्यर्थः । शब्दकर्मकत्वे यथा–क्रोष्टा विकुर्वते[1] स्वरान्, नानाशब्दान् जनयतीत्यर्थः । शब्दकर्मेति किं? मृदं विकरोति । नाशवर्जनं किं? विकरोत्यध्यायं, विकरोति शब्दं विनाशयतीत्यर्थः । आसां कृञ् मूलधातुवत् परोक्षायां । ततो यः कृञनुप्रयोज्यः, तस्मात् परोक्षैव निमित्तमस्यां । मूलस्य धातो समुपेक्षयैव पदं न परस्मैप्रमुखं । त्रिसन्ध्यं यथा–ईक्षाञ्चक्रे, ऊहाञ्चक्रे । अफलमथात्मनेपदि धातोरात्मनेपदं । बिभराञ्चकार, जागराञ्चकार । अत्र परस्मैपदि धातोः परस्मैपदमेव बिभराञ्चकार, बिभराञ्चक्रे । अत्रोभयपदि धातोरुभयपदमेव ।।छ।।

पूजोक्षेपोपनयनज्ञानभृतिविगणनव्ययेषु णीञ् । कर्तृस्थामूर्तकर्मकश्च । पूजोक्षेपोपनयनज्ञानभृतित्रिगणनधर्मदाने नीः । कर्तृश्चामूर्ता प्राप्त्यर्थव्याप्योऽपि च रुचादिः । पूजा सन्मानः । नयते विद्वान् शास्त्रार्थे, शास्त्रार्थतत्त्वं युक्तिभिः स्थिरीकृत्य शिष्टबुद्धिं प्रापयतीत्यर्थः । युक्तिभिः स्थापिताः शास्त्रार्थाः पूजिताः स्युः । उत्क्षेपःर्ध्वं नयनं शिशुमुदानयते । उपनयनमाचार्यक्रिया बटुमुपनयते । स्वयमाचार्यो भवनव्रतारोपणाय अध्ययनाय वा बटुं स्वसमीपे आनयति । ज्ञानं प्रमेयनिश्चयः । नयते विद्वान् तत्त्वार्थे तत्त्वं, सम्यक् जानातीत्यर्थः । भृतिः कर्ममूल्यं कर्मकरानुपनयते, मूल्यदानेन हृष्टान् करोतीत्यर्थः । विगणनं ऋणादिशोधनं, मद्राः करं विनयन्ते । राजदेयं भागं कर्षका विशोधयन्तीत्यर्थः । धर्मदानं धर्मार्थे धनव्ययः, शतं सहस्रं विजयते, धर्माय ददातीत्यर्थः । कर्तृस्थे श्रमं विनयन्ते शमयंतीत्यर्थः । विनयन्ते स्म विद्योद्यामधुभिर्विजयश्रमं । कर्तृस्थेति किं? चैत्रो मैत्रस्य मन्युं विनयति । अमूर्तमिति किं ? गडुं विनयति । कर्मेति किं? बुद्धया विनयति । अप्राप्त्यर्थव्याप्त्या इति किं? "शिवमौपयिकीं गरीयसीं फलनिष्पत्तिमदूषितायतिम् । विगणय्य नयन्ति पौरुषं विहिजितक्रोधरया जिगीषवः ।" अत्र प्रापणार्थो नयतिरित्यात्मनेपदं । एवमन्यत्रापि प्रापणान्नयतेरात्मनेपदं न भवति ।।छ।।

वृत्त्युत्साहतायनेश्च कम् । परोपाभ्यां आङो ज्योतिरुद्गमे, वेः पादाभ्यां गतिः । श्लाघनार्थे, प्रोपाभ्यामारम्भे, अनुपसर्गो वा । अप्रतिबन्धोत्साहस्फीतत्वे केवलः परोपाञ्च । आङो ज्योतिषि । वेः श्लाघायां हिंसादिकगतेश्च ।(१) प्रोपादारम्भे क्रमधातुर्नित्यमनुपसर्गो वा । षड्भिर्भेदैरेवंबुधैरभाण्यात्मनेपदभाक्(२) प्रवृत्तिरप्रतिबन्धो जीवनं च । अप्रतिबन्धोऽस्खलनं । शास्त्रेऽस्य क्रमते बुद्धिः न स्खलति । चिक्रंसया कृत्रिमपत्रपंक्तौ उत्साहेऽपीदं घटते । सर्ग उत्साहे, अध्ययनाय क्रमते उत्सहते, तायनं स्फीतता, न्याचिनः श्रियः क्रमन्ते स्फीतीभवन्ति । एष्वेवार्थेषु परोपाभ्यां यथा–पराक्रमते, उपक्रमते, न स्खलति, उत्सहते, स्फीतीभवन्तीत्यर्थः । आङो ज्योतिषि यथा–आक्रमते चन्द्रः सूर्यो वा, उदयते इत्यर्थः । यावत् प्रतापनिधिराक्रमते ननभानुः । ज्योतिरिति किं? धूम आक्रमति । कथं नभः समाक्रामति नष्टवतत्मनिास्थितैकचक्रेण रथेन भास्करः । सत्यं प्राप्त्यर्थोऽत्र विवक्षितो न तूद्गम. । वेगातिश्लाघते यथा–साधु विक्रमते हंसो गजो वा । अन्यत्र गजेन विक्रामति । प्रापाभ्यां यथा–प्रक्रमते उपक्रमते भोक्तुं, अन्यत्र प्रकामं यातीत्यर्थः । अनुपसर्गो वा क्रमते क्रामति ।।छ।।

निह्नवे ज्ञो अकर्मकश्च । सकर्मा फलवत्यनुपसर्गश्च । संप्रतिभ्यामस्मृतौ अननोः समन्तात् ज्ञा धातुः सोपसर्गः सन् निह्नवेऽर्थे सकर्मकः । सम्प्रतेरस्मृतावेव२ । मतनुश्च परे सनि ३ सकर्मानुपसर्गश्च फलवत्त्वे विवक्षते ४ । अविवक्षितकर्मा च । ५ पञ्चधाज्ञात्मने वा तृतीयात्र नांगीकपदी २ । क्रमेणोदाहरणानि-निह्नवे शतमुपजानीते संप्र. शतं सहस्रं वा सञ्जानीते, प्रतिजानीते च । शतेन संजानीते वा, समो वा स्मृतौ । वा तृतीयाऽत्र नाङ्गीकरोतीत्यर्थः । स्मृतौ तु मातुः संजानाति, अननुश्च । धर्मं जिज्ञासते । अतीतसुधर्ममनुजिज्ञासति । कथमौषधस्यानुजिज्ञासते ? सत्यं अकर्मकत्वादात्मनेपदिनः सतः पूर्ववत्सनन्तादित्यात्मनेपदं सकर्मेति गां जानीते । अनुपसर्गादिति किं ? प्रजानाति । फलं तदिति किं ? परस्य गां जानाति, फलविवक्षायां तु स्याद्यथा ।

देवीं वाचमुपासते हि बहवः, सारं तु सारस्वतम् ।
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।

---

१. विकुरुते ला.प. ।

तथा-जाने सख्यास्तव सह मया । तथा-न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् । तथा—

सोपधानां धियं धीराः स्थेयसीं दूषयन्ति ये ।
तत्राऽनिशं निषण्णास्ते जानते जातु न श्रमं ।। माघः ।।

अकर्मकत्वे सर्पिषो जानीते । अज्ञाने ज्ञः षष्ठी । अत्राज्ञानवशेन सर्पिः कर्मभूतमपि संबंधषष्ठ्या ज्ञानया कर्मत्वं त्याजितम् ।।छ।।

दीप्तिज्ञानयत्नोपच्छन्दनेषु च दः । अनोरकर्मकः । विगतौ । व्यक्तं सहोक्तौ तयोर्वा नित्यमिति च फलवत्यपपूर्वान् । वदिरात्मनेपदी स्याद्दशधोपच्छन्दने विमतिदीप्त्योः । कर्मणि सत्यप्यसति च विषये ज्ञानस्य यत् तस्य ५ । अनुतः कर्माभावे ६, फलवत्त्वेऽपाच्च कर्मसंयोगे ७, व्यक्तं सहोक्तौ नित्यं ८, वादे वा नित्यमिति च फले १०/१ । उपच्छंदनशब्देन उपसंभाषणं उपालम्भः उपसांत्वनं सर्वमपि भण्यते। उपसंभाषणे कर्मकरानुपवदते, उपसंभाषणादिभिरानन्दयतीत्यर्थः । उपालम्भे उपसान्त्वने च। कुलभार्यामुपवदते। नानामतिर्विमतिः, धर्मो विवदन्ते, विविधं जल्पन्तीत्यर्थः। दीप्तिर्भासनं, वदते विद्वान्, व्याख्याने वदन् देदीप्यते। ज्ञाने वदतो धीमान् तत्त्वार्थे निःसन्देह इत्यर्थः। यत्न उत्साहः, श्रुते वदते, रणादिकार्येषु वदते, सोत्साहः स्यादित्यर्थः। अनोरुपसर्गात् परः अनुवदते, चैत्रो मैत्रस्य अनु सादृश्ये पश्चादर्थे वा चैत्र इति वदति। चैत्रानन्तरं वदति चेत्यर्थः। फलवत् कर्तर्युपपूर्वाद्यथा—अपवदते प्रतिवादी, वादिनोक्तमनुवदति। स्वजयार्थं अफलवत्त्वे अपवदति, परं निन्दतीत्यर्थः। व्यक्तं सहोक्तौ व्यक्तवाचो रूढ्या मनुष्यादयस्तेषां सहोच्चारणमित्यर्थः। संप्रवदन्ते स्वजयार्थं अफलवत्त्वे अपवदति, परं निन्दतीत्यर्थः। ग्राम्याः सम्भूय भाषन्ते इत्यर्थः। व्यक्तादन्यत्र संप्रवदन्ति शुकाः। शुकसारिकयोर्व्यक्तवाक्कात्वेऽपीच्छन्ति संप्रवदन्ते शुकाः। संप्रवदन्ते सारिकाः। अव्यक्तवाक्त्वे तु संप्रवदन्ति, शकुनयो नानारुतं कुर्वन्तीत्यर्थः। विवादे वा तथा सहोक्त्यर्थव्यक्तवाचोर्विवादे वा स्यादिति व्यक्तवाचां सहोक्तौ विवादरूपायामित्यर्थः। विवदन्ते विवदन्ति वा मौहूर्ताः परस्परप्रतिषेधेन युगपद्विरुद्धं च वदन्तीत्यर्थः। इति फलवत्त्वविवक्षायां वादयते शिशुम् १० ।।छ।।

अवाद्गिरः, समः प्रतिज्ञायां, अवादिगरतोक्त्यादेरवगृणाति तु समो गिरः। प्रतिज्ञायां शतं संगिरतेऽर्थिनि ।।छ।।

किरादिश्रंथिसन्नंताकर्मकर्तृस्थाः दुह अद्यतन्यां स्वरान्तश्च वा । सुनमौ स्वयं किरादीनि । आदिशब्दः प्रकारवचनः, किरति प्रकाराः किरादयः। शिष्टप्रयोगगम्याः स्वभावादन्तर्भूतकारितार्थाः। कर्मकर्तृस्थत्वात् कर्मकर्तृभावः। प्राप्तस्तदपवादः। कर्तर्यात्मनेपदं विधीयते। अवकारयति हस्तिनं हस्तिपकः, अवकिरते हस्ती, स्वयमेव श्रथ्नाति मालां मालिकः, श्रथ्नीते माला: स्वयमेव। एवं ग्रथ्नीते मालां स्वयमेव। चिकीर्षति कटं स्वयं देवदत्तः, चिकीर्षते कटा स्वयमेव। वदुह इति—दुग्धे गौः स्वयमेव। अद्यतन्यां स्वरान्तश्च वेति, अत्रापि कर्मकर्तृस्थ एव। अद्यतन्याविषये यः स्वरान्तो धातुश्चकारेण दुहिरनुकृष्यते कर्मकर्तृस्थो वा रुचादिरित्यर्थः। अकार्षीत् कटं, अकृतकटः स्वयमेव, अकारि कटः स्वयमेव। अलविष्टकेदारः स्वयमेव, अलाविकेदारः स्वयमेव, अदुग्धा गौः स्वयमेव, दुह्यते स्वयमेव। पयो मुञ्चतीत्यर्थः। दुहदिहलिहगुहां सण् विकल्पाः। पक्षे सिजपि नास्तीति। अदोहि गौः स्वयमेव ।।छ।।

सुनमौ स्वयमिति, कर्मकर्तृस्थ इति, निर्वृत्तं स्वयमधिकृत्य कर्तुर्विशेषणम् । स्वयं कर्तरि अनन्यप्रेरिते कर्तरीत्यर्थः । प्रस्तुते गौः स्वयमेव, नमिरन्तर्भूतेत्यर्थः । नमयति दण्डं देवदत्तो, नमते दण्डः स्वयमेव । कर्मवद्भावबाधया यणि तौ न भवतः । स्वयमिति किम् ? प्रस्तौति गौर्दोग्धुः, कौशलेन नमति पल्लवो वा तेन ।।छ।।

समुदाङ्ोऽयममग्रन्थे, फलवति उद्वाहे उपयम्, उपाद्यम् । स्वीकारे आङोयमहृनवे कर्मणि स्वाङ्गकर्मकौ च। अग्रन्थे समुदाङ्ोऽयमफलवत्त्वे रुचादिभाक् । स्वीकारे तूपपूर्वोऽयं आङः स्वाङ्गौ च यमहनौ । संयच्छते व्रीहीन्, उद्यच्छते भारं, आयच्छति वस्त्रम् । ग्रन्थे तु वैद्यश्चिकित्साग्रन्थमुद्यच्छति, ग्रन्थे उद्यति इत्यर्थः । अफलवत्त्वे परस्य वस्त्रं संयच्छति,

उद्यच्छति, आयच्छति । स्वीकार उद्वाहोऽङ्गीकारश्च । कन्यामुपयच्छते, वेश्यामुपयच्छते । उपायंस्त महास्त्राणि; च्विग्रहणात् शाटकानुपयच्छति । नात्र अस्वं स्वं क्रियते इति नात्मनेपदम् । आङः स्वाङ्गे च यमहृनौ आयच्छते, आहते वा पदं; पराङ्गे तु आयच्छति परस्य पादम् । एतावस्कर्मकावपि आयच्छते, आहते ।।छ।।

समो दाण् तृतीया सा, चेच्चतुर्थ्यर्थे संपूर्वो दाण् । तृतीया युक् चतुर्थ्यर्थे तु सा यदि--दास्या संयच्छते कामुकः । दाणः सम्प्रदाने धर्मे आत्मने चेति ।। शदेरनि आत्मनेपद वा नाज्ञेयः, शदेः शीयो निशीयते ।।छ।

आशीरद्यतन्यत्वे करणेष्वेवात्मनेपदं भवति, नान्यत्र [1] । अद्यतन्यत्वे करणो शीर्ष मृङ म्रियतोऽमृत मृषीष्ट चर्करी (च कर्तरि ?) तस्य ममर्त्यन्यो मरिष्यति । मृङो ङानुबन्धत्वो बात्मनेपदे सिद्धे नियमार्थं सूत्रमिदम् । आशीरद्यतन्यान्वि-करणेष्वेवात्मनेपदं भवति नान्यत्र ।।छ/।।

अस्य चात्मनेपदिषु पाठः, ऋङ् व्यायाम इत्यादि ककारान्तधातुप्रस्तावादेव न तत्त्वात्मनेपदार्थ इति ।।छ।।

अशते भुजः अश्यते भुज्यते इत्यशनम् । भावे युट् । ततो अशने भोजने इत्यर्थः । भोगश्चानेकार्थः । ओदनं भुंक्तेऽत्तीत्यर्थः, स्त्रियं भुक्ते श्लिष्यतीत्यर्थः, वस्त्रं परिभुंक्ते परिदधातीत्यर्थः । अस्मिंश्च व्याख्याने 'चन्द्रं गता पद्मगुणान्न भुंक्ते' इति कालिदासोक्तं युक्तमेव । अशन इति किं ? भुनक्ति भुवं भूपाल पालयतीत्यर्थः । कथं अम्बरीषश्च नागौ बुभुजाते चिरं मही । सत्यमात्रोपकारार्थं विवक्षितेन पालनं, तर्हि प्रभुजाति वस्त्रं । भुजो कौटिल्ये इत्यस्यापि धातोः प्राप्तिः सत्यमशनार्थे रौधादिकस्यैव घटते, न तौदादिकस्येति ।।छ।।

समक्ष्णः संक्ष्णुते शस्त्रं ।।छ।।

उदः सकर्मकश्चर् समस्तृतीयायुक्तः । उत्पूर्वाच्चरतेः साप्यादिगरमुच्चरते, गुरोः मार्गमुच्चरते, व्युत्क्रम्य गच्छतीत्यर्थः । ग्रासमुच्चरते, सक्तूमुच्चरते भक्षयतीत्यर्थः । उद इति किं? वारि चरति । साप्यादिति किं? शब्द उच्चरति, धूम उच्चरति ऊर्ध्वं गच्छतीत्यर्थः । संपूर्वश्च तृतीया युग्, व्योम्ना संचरते खगः, अश्वेन संचरन्ते ।।छ।।

श्रृणोऽन्तेऽसन्नन्तादनाज्ञा् प्रतेः श्रुः सन्यप्रादिरप्रत्प्राङ प्रातिदतोऽपि रुचादिभाक् । शुश्रूषते गुरुं शिष्यः स्वसं शुश्रूषते यथा । आशुश्रूषति वाक्यार्थं प्रतिशुश्रूषति श्रुतम् ।।छ।।

स्मृदृशौ सन्नन्तौ स्मृदृशोः सनि, सुस्मूर्षीत धर्मं त्वां दिदृक्षते ।।छ।।

शको जिज्ञासायां भौवादिकः सनन्तः; शक् जिज्ञासायां तुमर्थयुक् । विद्यासु शिक्षते, ज्ञातुं शक्नुयामिति-भावना ।।छ।।

स्वराद्यन्ताद्युपसर्गादयज्ञपात्रे युजिरः प्रादेः स्वरादेश्च स्वरान्ततः पृथग् यज्ञे पृथक्पात्रे स्याद्द्वये, युगपन्न तु । उद्युक्ते यज्ञे, मन्त्रं प्रयुङक्ते, यज्ञे पात्राणि रन्धने प्रयुंक्ते, व्यञ्जनान्तप्रादौ तु संयुनक्ति । अत्र न भवति । युजिर रौधादिकः उभयपदी; दैवादिकः त्वात्मनेपद्येव ।।छ।।

अथ हेत्विसन्ताः, हेतुकर्तुभीस्म्योरिन्; इनुरुचादि बिभेति, स्म्योर्हेतुकर्तृ भये सति करणात् तुभये । तस्यादोषौ अन्तौ भियस्तथा । मुण्डो भाषयते, मुण्डो भीषयते, जटिलो विस्मापयते; स्मिजि क्रीडामिति इत्यात्वं । अत्र कारिते रुचादित्वमेव । आत्वं प्रकरणानन्तरोक्तत्वाद् भावकर्मणोरपि क्रियते । तेन भीषणं, भीषा, भीषि, भूषीति । अङ् विस्माप्यते, विस्मापनम् । युद्धद्वयोरपि हेतुकर्तृत्वे प्रथममिन् तत आत्वं; भावे कप्रत्ययौ पाश्चात्यौ । बिभेते स्तिब्

---

१. पा.प. १ इतीदं पुस्तकं विहाय सर्वेष्वेवेदं प्रायः अशुद्धम् ।

निर्देशात् स्मिङोदनुबन्धाच्चर्करीतादात्वं नवे भाययति, सेष्मापयति । इनन्तादात्मनेपदविधानमफलवदित्यर्थः । इन् रुचादिः स्यादित्यधिकारोऽतः परम् ॥छ॥

प्रलम्भते गृधिवंचयोरिन् । वटुं गर्द्धयते शठं वञ्चयते । प्रलम्भ इति किं ? श्वानं गर्द्धयति प्रलोभयतीत्यर्थः ॥छः॥

पूजाभिभवयोश्च ललातेश्चकारात् प्रलम्भते, दिवादि क्र्यादिलीधातोरर्चाभिभववञ्चने । इतो रुचादिना वक्ष्यमे ाणयोः स्वमते तुला । जटाभिरालापयते पूज्यं, संज्ञापयति पराभवे, श्येनो वर्तिकामुल्लापयते, परिभवतीत्यर्थः प्रलम्भे कः ? त्वामुल्लापयते वञ्चयत इत्यर्थः । अत्रापि प्राग्वदकर्तर्यथाकारः । जटाभिरालापनं तपस्विनः, दैव -क्र्यादिकलीग्रहणात् । वीजा विकलीडूर्द्धवीकरणे इत्यस्यनाकारो नाप्यात्मनेपदं । स्वमते तुलाधातोः प्रयोगा, एते तोश्चात्मनेपदमत्राऽभिधानात् ॥छ॥

अनिकर्मणि कर्तृकर्णिगौङस्मृतौ ।
अनिकर्मण इत्कर्तुरिनन्ताद्धातुतोऽखिलान् ।

अस्मृतौ गम्यमानायामात्मनेपदिता भवेत् । आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयते हस्ती हस्तिपकान् । अत्र हस्ती अनिकर्ता, इति तु कर्ता-एवं पश्यन्ति राजानं भृत्याः, दर्शयते राजा भृत्यान्, भृत्यैर्वद्दिश्यभिवदेरात्मने वा कर्मत्वं । अनिकर्मे किं ? आरोहन्ति हस्तिनं, हस्तिपकाः, आरोहयति हस्तिपकान् महामात्रः, आरोहयन्ति किञ्चित् महामात्रे हस्तिपकाः । प्रथमणिगन्तकर्मणि गन्तकर्तर्यपि मा भूत् । हेत्विनं विना तु गणयति गणं गोपालः । अत्र चौरादिकः स्वार्थमात्रे इन् । अस्मात् पुनर्हेत्विनन्तात् गणयते गणो गोपालकम् । करणस्य कर्तृत्वे तु-पश्यन्ति भृत्याः प्रदीपने, दर्शयति भृत्यान् प्रदीपः । अत्र करणस्य कर्तृत्वं, न पुनः कर्मणः । अननिकर्मकर्तर्यनन्ते तु-लुनाति केदारं चैत्रः, लूयते केदारः स्वयमेव, तं चैत्रः प्रयुंक्ते, लोचयति केदारं चैत्रः । अत्रानिनि केदारः कर्ता । अस्मृताविति किं ? स्मरति वनगुल्मं कोकिलः, स्मरयति च कोकिलं वनगुल्मः ॥छ॥

परिमुहायमायसपा धेट् वदवसदमादरुच नृतः फलवति । मिथ्यायोगेऽभ्यासे कृञ्, मुहः परे रायम आयसः पाचेद्वदवसाः दांदमरुच् नृतां च । इन् स्याद्रुचादिः, कृञ् इत्यमिथ्याभ्यासे । फलं चेद् भवतीह कर्तुः-परिमोह्ये शत्रुं, आयामयते । यमो परिवेषणे, इत्यनेन ह्रस्वः प्राप्नोति । परम्पराभिप्रायेण न भवति-आयासयते, पाययते, शोच्छेति आयायधेट् । धापयते शिशुं, वादयते वाद्यं, वासयते ग्रामं, आदयते चैत्रेण, दमयतेऽश्वं, रोचयते मैत्रेण, नर्तयते नटं । धेट्पिबत्यत्तीनां आहारार्थत्वाच्चाल्पाहारत्वार्थमित्यनेन परस्मैपदप्राप्तौ वचनम् । पा धेटौ, वद्वसौ स्यादिकः । अन्योन्यसाहचर्यान्मिश्या-कृञोऽभ्यासे पदं मिथ्या कारयते, दुष्टं पदं पुनः पुनरुच्चारयति, मिथ्यातोऽन्यत्र पदं साधु कारयति; अभ्यासादन्यत्र सत्कृत्य पदं मिथ्याकारयति ॥छ॥

अथ क्रियाव्यतिहारः-विनिमये वा गतिहिंसाशब्दार्थहसः । विनियमः परावर्तः । स च धातुप्रस्तावात् क्रियाया एव । अन्येन चिकीर्षिताम् क्रियामन्यः करोतीत्यर्थः । व्याक्रियाव्यतिहारो गतिहिंसाशब्दार्थहसोह्वहश्वानन्योन्यायार्थे व्यतिलुनते, व्यतिहरन्ते भारं; व्यतिवहन्ते भारं, संप्रहरन्ते राजानः, संविवहन्ते चाऽग्ने । अगत्यादीति किं ? व्यतिगच्छन्ति, व्यतिहिंसंति, व्यतिजल्पन्ति, व्यतिहसन्ति । ह्वहोर्गत्यर्थत्वात् परस्मैपदं प्राप्नोति । सत्यं नैतौ गत्यर्थौ, किन्तु देशान्तर-प्राप्त्यर्थौ । देशान्तरप्राप्तिश्च गतेः फलम् । ननु गतिः कथं इतरेतरस्य ? व्यतिलुनन्तीत्यादयः । सत्यमितरेतरादिशब्दैरेव क्रियाव्यतिहारः प्रोक्त इति नात्मनेपदं । कथं तर्हि ? देवदत्तस्य धान्यं व्यतिलुनन्ति । सत्यं कारकव्यतिहारोऽयं, न क्रिया-व्यतिहारः प्रोक्त इति नात्मनेपदम् । कथं व्यतिगम्यते ग्रामं सत्यमुक्तः कर्मप्रयोगोऽयम् ॥छ॥

चेक्रीयितान्तात् चेक्रीयितात् कर्तर्यात्मनेपदानि भवन्ति । पा पठ्यते, लोलूयते । अत्रान्तग्रहणाल्लप चेक्रीयितांता-द्भूतपूर्वगत्या प्राप्तमप्यात्मनेपदं न स्यादन्यथा किमन्तग्रहणेन । उक्तं च—

वरीवर्ष्टि यदा देवः सरीसर्ति च मारुतः । नरीनर्ति मयूरोऽपि मरीमर्ति तदाप्रिया ॥

आद्यन्ताच्च आयिप्रत्ययान्तात् कर्तर्यात्मनेपदानि भवन्ति-हंसायते, पयस्यते। अत्राप्यन्तशब्दादायि लोपेनात्मनेपदं—दरिद्रति, घटति ॥छ॥

इनञ् यजादेरुभयम्। इनंताञ्नुबन्धाद्यप्यादेश्चोभयपदं भवति। अत्रेनन्तादित्युक्तेऽपि नार्मेनन्तो न गृह्यते अभिधानात्। तथा चौरिरादिकः स्वार्थेऽनन्तोऽपि न गृह्यते। तत्र परस्मैपदात्मनेपदग्रहणात् किन्तु हेत्विनन्त एव गृह्यते। यथा—कारयति कारयतेऽञ्नुबन्धः। सुनोति सुनुते, कंडूयति कण्डूयते। यथारुच इत्युपलक्षिता अनुदात्ताः सर्वे रुचप्रकाराः आत्मनेपदिनस्तथा। यज इत्युक्ते समाहाराः। सर्वेऽपि यजप्रकाराः उभयपदिनः यजति यजते, पचति पचते।[1] अत्र फलवत् कर्तृप्रतीता चात्मनेपदमफलवति परस्मैपदमयमप्यर्थोऽवगन्तव्य इति मतम्। तथाहि परसूत्राणि। स्वरितञितः कर्त्रभिप्राये क्रियाफले कोऽर्थः ? स्वरितः समाहारश्च अनुबन्धश्च तत्तथा। तस्मादात्मनेपदं कर्तेति तथार्थक्रियारभ्यन्ते यत्क्रियायाः प्रधानभूतं चेत् कर्तारमभिप्रैति; तच्चेत् कर्तुः क्रियावाच्यं फलं भवतीत्यर्थः। यजते पचते कुरुते। गौणफले दक्षिणा चेतनादौ न स्यात्। यजन्ति याजकाः, पचन्ति पाचकाः, कुर्वन्ति कर्मकराः। अत्र कारयितुः पाचयितुमुख्यं फलं, तथा णिचश्च। इनन्तात् फलवत्यात्मनेपदं। यथा-भावयते २ अपाद्वदः ३. अनुपसर्गात् ज्ञः। उभयतः फलवत्यात्मनेपदं यथा—उपवदते, जानीते। परिमुहायमाय सोपाधिद्वदवसदमादरुच नृतः फलवत्यात्मनेपदपदं—परिमोहयते चैत्रमित्यादि। ४. समुदायोऽयममरुग्रंथे फलवत्यात्मनेपदं-संयच्छते व्रीहीन् प्रभृति। ५.पदान्तरगम्ये वा। अनन्तरसूत्रपञ्चकेन यदात्मनेपदमुक्तम्, तत्पदान्तराद् गम्ये फलवति कर्तरि आत्मने परस्मै वा भवति। यथा-स्वं यज्ञं यजते यजति वा। स्वं कटं कुरुते करोति वा। स्वं शिरः कण्डूयते कण्डूयति वा। स्वमश्वं गमयते गमयति वा। स्वं शत्रूमपवदते अपवदति वा। स्वाङ्गं जानीते जानाति वा। स्वं शत्रुं परिमोहयते परिमोहयति वा। स्वान् व्रीहीन् संयच्छते संयच्छति वा। एतत्फलवति कर्तरि परोक्तम्। किन्तु अफलवत् कर्तर्यात्मनेपदं दृश्यते यथा—वृक्षं परिवारयन्ते कण्टकाः, शोषयते व्रीहीनातपः, कण्टकातपयोरत्र न फलं, किन्तु भोक्तुरेव। तथा च तव दर्शनं किं न धत्ते। द्रष्टुः फलमत्र। तथा च मयूरः कमलवनोद्घाटनं कुर्वते। अत्र रश्मीनां न फलं, किंत्वन्येषां। माणवकं ब्रूते। अत्र कर्मणः फलं, मरीचीन् वितनुते। अत्र लोकस्य फलं न रवेः। यतो मरीचिविध्वस्ते तमसि तत् कर्मप्रवर्तनात्। अपदान्तरद्योत्येऽपि दृश्यते। यत्र पदान्तरमृतेऽपि स्वपदादेव फवबत् प्रतीतिस्तत्रापि परस्मैपदमिति। तथा च भारविः—'तनोति शुभ्रं गुणसम्पदा यशः (किरात.१.)' स्वपदादेवात्र कर्तुः फलं। न तु यथारुचप्रकारा अनुदात्ताः धावतः सर्वेऽप्यात्मनेपदिनो भण्यन्ते। तथा यज इत्युक्ते यजादयः समाहारानुबन्धा उभयपदिनो ग्रहीष्यन्ते। किमादिग्रहणेन सत्यं दण्डादिपरिग्रहार्थम्। अत्र सूत्राणि 'डाच् लोहितादेरायै' (हे. व्या. ३.४-३०) वा 'द्युतादिभ्योऽद्यतन्यां वा' (हे. व्या. ९.२, १३५) वृतादेर्वा पञ्चतः स्यसनौ। कृपः श्वस्तन्यां, द्युतादिभ्यव्यूह्योऽद्यतन्यां, स्यसनोर्वृतादिः। कृपस्य सन् श्वस्तनिकाप्रयोगे डाच्। प्रत्ययान्तादलोहित्रादेरायौ विकल्पेन रुचादित्ता स्यात्। अद्य तत पुषादिसूत्रादण्। व्यद्योतिष्ट द्युतादयो द्वाविंशतिद्वर्चादिमध्ये एषामात्मनेपदिनां परस्मैपदमात्मनेपदविकल्पनाद् भवति। स्यसनोर्वृतादेर्यथा—वृतां मध्ये वृत् वृध् स्यन्द् कृप् पञ्च वृतादयः। वक्ष्यन्ति वृतादेरिट्, नस्येसनि परस्मैपदे वर्तिष्यते अवर्त्स्यत्; अवर्तिष्यत, वर्त्स्यन्; वर्तिष्यमाणः, विवृत्सति, विवर्तिषते। एवं कृपः कल्पिष्यति कल्पिष्यते; विक्रुप्स्यति विकल्पिषते; कल्पाप्ताऽसि श्वस्तं सः च कृप्यने वेट्। आत्मने कल्प्तासे कल्पितासे। अथ डाच्—पटपटायति पटपटायते; लोहितादिगणः लोहितायति लोहितायते, इत्यादि ॥छ॥

पूर्ववत्सनंतात् पूर्ववदिति—कोऽर्थः ? धातोः स्वानुबन्धगणपाठप्रत्ययोपपादार्थविशेषसूत्रैर्यथा पदं सनः प्रागुक्तं, तथा सन्नंतादपीति सम्बन्धः। अनुबन्धेन शेते शिशयिषते गणेन एधः। एधते पदिधिषते चेक्रीयितेन लोलूयते लोलूयिषते आप्यं; तेन श्येनायते शिश्येनायिषते; उपपदेन निविशते निविचकृते। अश्वेन संविचरिषते, अर्थेन शास्त्रेऽस्य क्रमते बुद्धिः। विक्रंसते अस्खलनमत्रार्थः। अर्थोपपदाभ्यां द्वयेन-आक्रमते चन्द्रः, आविक्रंसते सूर्यः। यत् पुनः सप्रत्ययधातुनिमित्तं तन्न। निशि शश्यति। मुमूर्षति मृङोऽन्। आशीरद्यतन्यो निमित्तं। अनुबन्धे सत्यपि यद्विशेषविहितं कार्यं तन्नातिदिश्यते।

---

१ ६ यज इत्युक्ते....पचते'—अत्र 'यज' स्थानेसर्वत्र 'जय' इति—पा. प.।

यथा-परानोः कृञ इत्यनेन विशेषतः । परस्मैपदे विहिते सति सतिनात्मनेपदं—पराचिकीर्षति अनुचिकीर्षति । तथा गुपादिनां प्रागप्रयोगेऽपि सत्यर्थविशेषे आत्मनेपदं यथा-जुगुप्सते इत्यादौ गुपोवधे अनिन्दायामित्यादयोऽर्थाः । अत्र सेऽनन्तादन्यत्र स्वेच्छा, यथा—जुगुप्सयति, मीमांसयति ।।छ।।

शेषात् कर्तरि परस्मैपदं । येभ्यो धातुभ्य आत्मनेभाषा उभयतो भाषा इति श्रुतिरस्ति, येषां च रुचादिगणे-नात्मनेपदं विहितमस्ति; तेभ्यो धातुभ्योऽन्यो धातुः शेषः । तस्मात् कर्तरि परस्मैपदं भवति—अतिजुहोति, तुदति, विशति, पुत्रीयति । परातोः कृगः-पराकरोति अनुकरोति । प्रत्यभ्यतिभ्यः क्षिपः-प्रतिक्षिपति, अभिक्षिपति, अतिक्षिपति । प्राद्वहः—प्रवहति । परेर्मृषवहोः-परिमृष्यति, परिवहति । व्योऽपरिभ्यो रमः-विरमति, आरमति, परिरमति । उपात् सकर्म-कादन्तर्भूतेनर्षाद्रमः । देवदत्तमुपरमति, निर्वर्तयतीत्यर्थः । वक्तव्यबलादेषां सिद्धिः । तथा चुरादिभ्यः परस्मैपदिभ्यः परस्मै-पदमेव नात्मनेपदमिति व्याख्यातात् । तथा अणि प्राणिकर्तृकाना(म)ण्यणिगः—आशयति चैत्रं, शते मैत्रः, शाययति मैत्रम् । अनिनवस्थायां प्राण्येव कर्ता । इति प्राणी अप्राणी चेति स्वेच्छा(तः) ३. । अनेन प्राणिकर्तृकादिति किं ? शुष्यन्ति व्रीहयः, शोषयते व्रीहीनातपः । श्लोकः —

परस्मैपदमव्याप्यादित्यनिन प्राणिकर्तृकान् ।
शाययत्याभयत्पारं वुसाप्यात् कारयते कटम् ।।

स्वार्थेऽनन्तात् तु न परस्मैपदं स्याच्चुरादितः । यथा—

'अज्ञाननिद्रानिबिडोपगूढे राजन्यके चेतयते य एकः ।' इति रघुः । चल्याहारार्थेङ् बुध युध कद्रु श्रुनशजूनः । चल्यर्थः—चालनं स्थानान्तराक्रमणं, चलयति कम्पयति आहारार्थः । भोजयति आशयति चैत्रमन्नम् । इङ् अध्येयति, बोधयति, योधयति, प्रावयति, द्रावयति, श्रावयति, नाशयति जनयति पुण्यं । अप्राणिकर्तृकार्थं समकर्मकार्थं प्रवचनं । कथं शिरः कम्पयते युवा । चालनार्थत्वात् परस्मैपदमनेन प्राप्नोति । सत्यं नाऽत्र चालनं स्थानान्तराक्रमणं । किन्तु चमत्कारसूचनं, स्तब्धतामात्रधारणं, अन्तर्विस्मयप्रकाशनमात्रमत्र चालने स्थानान्तराक्रमणे स्यादेव परस्मैपदं ।

यथा—

कम्पयति भुवनमनिशं वीरः सकृदवसरेऽपि विक्रान्तः ।

न खलु धूननमात्रं चालनं किन्तु स्थानान्तरोत्पाटनम् । यथा—

"सुस्थितं दुस्थितं वाऽपि शिवलिङ्गं न चालयेत्"[1] इत्याख्यातशब्दोद्धारः ।

अथ केचित् कृतशब्दा लिख्यन्ते—सत्यागदास्तूनां कारे, सत्यादीनां कारशब्दे परे मोऽन्तो भवति । सत्यंकारः, अगदंकारः, अस्तुंकारः । सत्यमगदनमस्तु, करोति । कर्मण्यनिवृद्धिरनेन सोऽन्तः । अन्यत्राऽपि मकारवर्णागमो दृश्यते । प्रीङ प्रीणाति कश्चित्तं प्रीणन्तमन्य प्रयुंक्ते इति । धूञ प्रीणात्यौर्णः । णत्वं, प्रीणनं, प्रीणः । अलुकारिन्तस्य लोपः लोकस्य प्रीणो लोकंप्रीणः, लोकस्य प्रीणे मोऽन्तः । निपातनाल्लोकं प्रीणः इत्यपि । ख्या. लोकं पृणमध्ये दिनानभ्या-समित्यं इत्येतदन्यपूर्वस्य अभ्यासः-शब्दस्य मोऽन्तः । एवं पृणप्रीणतो इति निर्देशादुभयमपि प्रमाणम् । तथा च पाणिनिरपि 'काकस्य पृणे' इत्युक्तवान् । भद्रंकरणं उज्ज्ञ(ष्णं)करणं, क्रियतेऽनेनेति करणाधीति युट् । अनिगुणः भद्रस्य उष्णस्य करणं । भद्रोष्णयोः करणे मोऽन्तः । मध्यं च तद्दिनं च मध्यंदिनं, (दिन)स्य वा । मध्यस्य दिने मोऽन्तः प्रथमः पादः ।।छ।।

---

१. 'चलयति कम्पयति. . .राक्रमणम्' इदं दे. प. पुस्तके नास्ति ।

भावे भुवः नाम्नि उपपदे भुवो भावे क्यप्भवति । ब्रह्मभूयं गतः ब्रह्मत्वं गत, इत्यर्थः । ब्रह्मणो भवनं, क्यपनेन द्वितीयः पादः[1] । तुंदशोकयोः परिमृजापनुदोः, तुदशोकयोः कर्मणोरुपपदयोः । परिमृजापनुद्भ्यां को भवति ? यथासंख्यं तुन्दं परिमार्ष्टि । तुन्दपरिमृजः अलस एवाभिधीयते; तुन्दपरिमार्जोऽन्यः शोकमुपनुदति शोकापनुदः । आनन्दकर एव शोकापनोदो धर्मकथकः, पक्षे कर्मण्यण् ।।छ।।

फले मलरजः सुग्रहे । एषु कर्मसूपपदेषु ग्रहेरिर्भवति-फलानि गृह्णातीति फले ग्रहिः । सूत्रनिपातनादेत्वं मलग्रहिः, रजोग्रहिः ।।छ।।

आत्मोदरकुक्षिषु भृञः खिः । एषु कर्मसूपपदेषु कृञः खिः भवति आत्मंभरिः, उदरंभरिः, कुक्षिंभरिः, आत्मानमुदरं कुक्षिमेव बिभर्ति ।

व्यञ्जनान्तस्य युस्सुभोरित्यतिदेशबलादात्मनो लिङ्गातनकारलोपः ह्रस्वारुषोर्मोऽन्तः, त्रयोप्युदरिके ।।छ।।

कूलमुद्रजोद्वहोः कूले कर्मण्युपपदे उद्रजोद्वहोः खश भवति-कूलमुद्रजति, कूलमुद्रजा नदी, कूलमुद्वहः समुद्रः; रुजोभङ्गे कूलमुद्रजत्युद्वहति ।।छ।।

वहंलिहं, अभ्रंलिह, परंतपेरमंद्दाश्च । एते खशं वा निपात्यन्ते, वहंलिहो गौः, अभ्रंलिहो वायुः, परं तापयतीति रन्तपः, इरया माद्यति इरंमदः । वहत्यनेनेति वहः स्कन्धवहः । अभ्रंलेढि–अग् प्राप्तौ खशं, तेन परं तापयतीत्यत्र निपातनाद्वि ह्रस्वश्च तथा । द्विषंतप इत्यत्र निपातनात् द्विषं तापयतीति । कृते कृश् प्रभृतिकं स्त्रियां द्विषती तापः, अनिनं द्विषत्तापः, परतापः कर्मण्यन् । चकारात् वातमजन्ति वातमजामृगाः । शुद्धं जहन्ति, श्रद्धं जहामो, खशन्तो निपातः ।।छ।।

सर्वंकरवः खलः, कूलंकषा नदी, अभ्रंकषो गिरिः, करीषं कषा वात्या ।।छ।।

क्षेमप्रियमद्रेष्वग्रे एषु कर्मसूपपदेषु कृञः खः भवति । अण्वक्षेमंकरः क्षेमकारः, प्रियंकरः प्रियकारः, मद्रङ्कर मद्रकारः ।। व्या. क्षेमप्रियमद्रंभद्रात् तेन भद्रंकरः भद्रकारः ।।छ।।

गमश्च नास्त्युपपदे, गमश्च संज्ञायां खः, सुतं गच्छति सुतंगमो मुनिः; भुजाभ्यां गच्छति भुजङ्गमः; मितं गच्छतीति मितंगमो हस्ती; पूर्वं हृदयं गच्छतीति (गच्छन्तीति ?) पूर्वंगमाः पन्थानः, हृदयंगमा वाचः, नभ (भः) सङ्गमः पक्षी । आदन्तोऽपि नभसृशब्दः; जनंगमश्चण्डालः ।।छ।।

अपक्लेशतमसोः क्लेशतमसोः, कर्मणोरुपात्परतो हन्तेर्डो भवति । क्लेशापहः, तमोपहः, दुःखापहः, द्वारापहः वातपित्तकफापहः, विषाग्निदर्पापहः–वातपित्तकफान् विषाग्न्योः वा दर्पमपहन्ति । 'अन्यतोऽपीति' वचनात् क्लेशादेरपात् डो भवति ।।छ।

नग्नपलितप्रियान्धस्थूलसुभगाढ्येष्वभूततद्भावे कृञः ख्युट् करणे । अभूततद्भावेषु वर्तमानेषु नग्नादिषूपपदेषु कृञः ख्युट् भवति । अनग्नो नग्नः क्रियते अनेन । नग्नंकरणं द्यूतम् । एवं पलितंकरणं तैलम् । प्रियंकरणं, शीलं । अन्धंकरणं, शोकः । स्थूलं करणं, दधि । सुभगं करणं रूपं । आढ्यं करणं, वित्तं । अनग्नंकरणमित्यादि । तदन्त-विधिर्नास्तीति । अभूततद्भाव इति किं ? आढ्यं करोति, तैलेन अभ्यंजयतीत्यर्थः ।।छ।।

भुवः खिणुखुकञौ कर्तरि । अभूततद्भावे नग्नादिषूपदेषु भुवः खिष्णुषु कञौ कर्तरि च भवतः । नग्नं भविष्णुः, नग्नं भावुकः; पलितं भविष्णुः, पलितं भावुकः; प्रियं भविष्णुः, प्रियं भावुकः; अन्धं भविष्णुः, अन्धं भावुकः;

---

१. 'भावेभुवः. . .द्वितीयः पादः' इदं दे. प. पुस्तके नास्ति ।

स्थूलं भविष्णुः, स्थूलं भावुकः; सुभगं भविष्णुः सुभगं भावुकः; आढ्यं भविष्णुः, आढ्यं भावुकः; अनग्नं भविष्णुरित्यादि, अनग्नो नग्नो भवतीत्यादि ।।छ।।

दृशेः क्वनिप् । कर्मण्युपपदेऽतीते वर्तमानात् दृशः क्वनिप् भवति । मेरुं दृष्टवान् मेरुदृश्वा । अतीते क्विपादीनां बाधनार्थमिदम् ।।छ।।

सह राज्ञो युधः । सह राज्ञोः कर्मणोरुपपदयोरतीते वर्तमानात् युध्यते; क्वनिप् भवति । सह युद्धते स्म सहयुद्धा, राजानं युद्धते स्म राजयुद्धा । अन्तर्भाविते ऽनर्थः सकर्मकः । राजानं योधितवानित्यर्थः ।।छ।।

कृञश्च सह राज्ञापपदयोरतीते वर्तमानात् कृञः क्वनिप् भवति । सह कृत्वा राजकृत्वा; सह कृतवान्, राजानं कृतवान्; क्वनिपिऽतोतः । तृतीय पादः ।।छ।।

भ्राज्यलं कृञ् भूसहि रुचि वृति वृधि चरि प्रजनापत्रपेतामिष्णु च । पभ्य इष्णु च भवति । तच्छीलादिषु कर्तृषु तृपोऽपवादः । भ्राजिष्णुः अलंकरिष्णुः, अलं भूषणपर्याप्तिवारणेषु ः मण्डने युमपि बाधते—भविष्णुः, सहिष्णुः, रोचिष्णुः, वर्तिष्णुः वर्धिष्णुः चरिष्णुः प्रजनिष्णुः अपत्रपिष्णुः । इनन्तानां छन्दसीत्येके । धारयिष्णुः निराकरिष्णुः इति वक्तव्यम् । भ्राजते, अलङ्करोति, भवति, सहते, रोचते, वर्तते वर्द्धते, चरति, प्रजायते, प्रजजन्ति, अपत्रपते । धारिरिनंतश्चौरादिको हेत्विनन्तो वा—धरन्तं वा, धारे (यं?) माणं वा, प्रयुंक्ते इति, धारयति निराकरोति । एवं शीलादिषु च अनेन गुणः न केवलं तृन् मन्यत्र क्ष्णुति प्राप्तं युमपि बाधते । व्यक्तेराश्रयणादिह ।।छ।।

मदि पति पचा मुचि । उद्युपपदे पभ्य इष्णु च भवति । तच्छीलादिषु पदिरपेऽत्र । उन्मदिष्णुः, उत्पतिष्णुः उत्पदिष्णुः उत्पविष्णुः; उन्माद्यति, उत्पतति, उत्पद्यते, उत्पचतीत्येवंशीलादिरिष्णुरनेन । जिभुवोः स्नुक्, आभ्यां ष्णुक् भवति । तच्छीलादिषु जिष्णुः भूष्णुः जयति भवतीत्येवं न श्रुवर्ण्येति निषेधः । ग्ला म्ना स्था क्षिप विपरिमृजांस्नुः, एभ्यस्तु तच्छीलादिषु—लास्नु, म्लास्नु, स्थास्नु, क्षस्नुः, परिमाक्ष्र्णुः; ग्लायति, म्लायति, तिष्ठति, क्षयति, पचति, परिमार्ष्टीत्येवंशीलादिषु स्नुतेन रतेन गुणेन गुणौ, मार्जो मार्जिषत्वं भुजादित्वात् । षढोः कस्मै निमित्तात् षत्वं त वर्गस्य षट्वर्गात् तस्य बर्गस्य णत्वं उदनुबन्धत्वाद्वेट् ।।छ।।

वृञ भिक्षि लुंटि जल्पि कुटां षाकाः, एभ्यः षाको भवति तच्छीलादिषु । वराकः, वराकी; भिक्षाकः, भिक्षाकी; लुण्टाकः, लुण्टाकी; जल्पाकः, जल्पाकी; कुण्टाकः कुण्टाकी । षकारो न दार्ढ्यर्थः कुट्टश्चुरादिः । वृणोति, वृणाति वा; भिक्षते, लुंटति; जल्पति कुट्टयतीत्येवंशीलादिषुकेनैव । परस्मैपदसाहचर्य्यात् वृञ् संभक्तौ न स्यात् वृञ् वृणीते इत्येवं तृनिवारिता ।।छ।।

दयि पति गृहि स्पृहि श्रद्धा तन्द्रा निद्राभ्य आलुः । एभ्यः आलुर्भवति तच्छीलादिषु दयालुः । पतिगृहिस्पृहिअदन्तापूर्वोश्च्युरादाविनन्ताः । पतयालुः, गृहयालुः, स्पृहयालुः । चेत् धाञ श्रद्धालुः । तन्द्रा इति सूत्रो धातुः तन्द्रालुः । निपूर्वो द्रा निद्रालुः शयालुरिति वक्तव्यम् । कथं हृदयालुः ? हृदयमस्यास्तीति विवक्षायामालुः । तद्धितो रूढितः दयते पातयति, गृहयति, स्पृहयति, श्रद्धाति, तन्द्राति, निद्रातीत्येवमालुरनेन कृतामभिधानलक्षणत्वात् । शेतेरालुर्वक्तव्यः । हृदयं कृपाहृदयाभ्यामालुः । जागरूकः जागरूको भवति, तच्छीलादिषु जागरूकः जागर्तेत्येवं ऊकोऽनेन जागृः । कृतिवचनाद्यणाशिषोऽर्थेगुणः चेक्रीयिता नायजिजपिदशिविदां चेक्रीयितांतानां मेषा मूको भवति तच्छीलादिषु । यायजूकः, जंजपूकः, दंदशूकः, वावदूकः, याजज्यते, दंदश्यते, वावाद्यते-इत्येवं मूकोऽनेनास्य च लोपः, यस्यानमि ।।छ।।

मृजीण्णुशां क्वरप् तच्छीलादिषु । एषां क्वरप् भवति मृत्वरं जित्वरः, इत्वरः, नश्वरः । क्वरप् नदादौ मत्वरी, सरति, सर्सति वा, जयति यज प्रति नश्यतीत्येवं अनेन क्वरपि तोऽन्तः ।।छ।।

गमस्त्वागमः क्वरप् भवति तच्छीलादिषु [१] तकारादेशश्च गत्वरः, गत्वरी, गच्छतीत्येवं क्वरपितादेशः ।।छ।।
चतुर्थः पादः ।।छ।।

नञ्न्याक्रोशे । नञ्युपपदधातोरनि भवति । आक्रोशे गम्यमाने अकरणिस्ते वृषलः भूयात् । एवमजीवनिः । निञ्गीति किम् ? मृतिस्ते वृषल भूयात् । न करणं न जीवनम् । अभिरनेन । मरणं क्तौ मृतिः । पञ्चमः पादः[२] । णम्वाभीक्ष्ण्ये द्विश्च पदं च द्विर्भवति–भोजं भोजं व्रजति, भुक्त्वा भुक्त्वा व्रजति । अभीक्ष्णं भोजनमिति वाक्यम् । आभीक्ष्ण्ये क्रियापदस्य द्विर्वचनम् ।।छ।।

कर्मण्याक्रोशे कृञः खमिञ्, कर्मण्युपपदे कृञः खमिञ् भवति । आक्रोशः आक्रोशोऽपवादारोपणम् । चौरं कारमाक्रोशति । चौरस्य करणं पूर्वं वा खमिञ्, अनेन ह्रस्वो रुषोमोंऽतः । एककर्तृकेति पक्षे ।[३] आक्रोश इति किम् ? साधुकृत्वा स्तौति ।।छ।।

वेलार्थे क्तोपे वेलार्थे कर्मण्युपपदे क्नोपयतेः णम् भवति । वर्षप्रमाणे गम्यमाने वेलक्नोपं वृष्टो देवः । वसुक्नोः पञ्चमः नक्तो पंक्नूयी क्नूयमानं प्रयुंक्ते इति । अंति ह्रीति पोऽन्तो यलोपगुणौ च । चेलस्य वस्त्रस्य वसनस्य, वस्य न स्थाक्तोपनं, यावता णमनेन पूर्वकालविवक्षा । चेलविशेषादपि कम्बलक्नोपं पटीक्नोपं, विशेषसूत्रमत्र गात्रपुरुषान् स्नः । गात्रस्नायं वृष्टो देवः । स्नानं प्रयुंक्ते गात्रस्य, पुरुषस्य स्नापनं णम् ।।छ।।

निमूलसमूलयोः कषानिमूलसमूलयोः कर्मणोरुपपदयोः कषतेर्णिन् भव, निमूलकाषं कषति, समूलकाषं कषति, निमूलं कषतीत्यर्थः । निमूलस्य कषणं णमनेन पक्षे वाक्यव्याप्तिः । कषादिषु तैरेवानुप्रयोग इत्यनेन कषेरनुप्रयोगोऽपि कषः । एवमुत्तरत्रापि । समूले हन्तेः, समूले कर्मण्युपपदे हन्तेर्णिन्[४], भवति । समूलघातं हन्ति, समूलं हन्तीत्यर्थः, समूलस्य हननं हन्ति वा ।।छ।।

करणे करणवाचिन्युपपदेर्हतेर्णम् भवति । पादघातं हन्ति, पादेन हन्तीत्यर्थः । मुष्टिघातं चौरं हन्ति, पादेन मुष्टिना हननं हन्ति वा ।।छ।।

कर्त्रोर्जीवपुरुषयोर्न शिवहिभ्यां[५] णम् यथा–संख्यं । जीवनाशं नष्टः, जीवो नष्ट इत्यर्थः । पुरुषवाहं वहति, पुरुषो वहतीत्यर्थः । जीवो नष्टः, जीवेन नशनं, पुरुषेण वहनं वा । कर्तरीति । कर्त्रोरिति[६] किम् ? जीवेन नष्टः पुरुषेणोढः ।।छ।।

कर्मणि चोपमाने, कर्तरि कर्मणि चोपमाने वा, विनिधातोर्णम् भवति । चूडक इव नष्टः, चूडकनाशं नष्टः । कर्मणि च सुवर्णमिव निहितः, सुवर्णनिधानं निहितः, ओदनपात्रं पक्वः, चूडक इव नष्टः, सुवर्णमिव निहितः, ओदन इव पक्वः; णमनेन ओदन इव पच्यते स्मेति वा । उपमान इति किम् ? चूडको नष्टः, सुवर्णनिहितं कषायादिषु तैरेवानुप्रयोगः । कषायादिषु णमो विषयभूतेषु कषादिभिरनुप्रयोगः कर्तव्यो, नान्यैरिति अनुप्रयोगश्च पूर्वकालतामभिदधात्येव । निमू(र्मू ?) लकाषं कषति । कषादिष्विति किम् ? चेलक्नोपं वृष्टो देवः । षष्ठः पादः ।।छ।।

---

1. 'एषां क्वरप् .... तच्छीलादिषु ।' इदं पा. प. १ पुस्तके नास्ति ।
२. 'एवमजीवनि .... पञ्चमः पादः' इदं पा. प २ पुस्तके नास्ति ।
३. आक्रोश .... पक्षे' इदं पा. प-१, २ पुस्तकयोः नास्ति ।
४. 'र्णन्'–प. दे ।
५. अत्र प. दे. मध्ये विशेषं–"जीवपुरुषयोः कर्त्रोर्न शिवहिभ्यां" इति । तन्नावश्यकम् ।
६. "कर्तरीति किम्"–पा. प. १, २, ३

कर्तृकर्मादिविशेषा यथा—कारकाणि कर्ता, कर्म, करणं, सम्प्रदानकं, अपादानमाधारः षट् स्युः, सम्बन्धश्च सप्तमः[1] ॥१॥

"इति कृच्छब्दोद्धारः स्यादित्यादि शब्दास्तद्धिताख्यातकृच्छशब्दाश्च मत्कृतशब्दसमुच्चयात् ज्ञेयाः ॥छ॥

इति वायटगच्छीय श्रीजिनदत्तसूरिशिष्य श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि छन्दोऽभ्यासस्तबकोल्लासी तद्धिताख्यातकृच्छब्दकीर्तनस्तृतीयः प्रसरः ॥छ॥ ग्रं. ६००

उक्तानुक्ततया द्वेधा कारकाणि भवन्ति षट् ॥
उक्तेषु प्रथमैव स्यादनुक्तेषु क्रमादिमाः ॥२॥
कर्मणि द्वितीया कर्तृकरणयोः तृतीयिका ।
सम्प्रदाने चतुर्थी स्यादपादाने तु पञ्चमी ॥३॥
आधारे सप्तमी सम्बन्धे षष्ठीति विभक्तयः ।
इह संक्षेपतः प्रोक्ता वक्ष्यन्तेऽग्रे सविस्तराः ॥४॥
यः करोति किमप्येष कर्ता स त्रिविधो मतः ।
स्वतन्त्रो हेतुकर्ता च कर्मकर्ता तथापरः ॥५॥
न परैः प्रेर्यते यस्तु स्वतन्त्रो गौः प्रयातिवत् ।
यः पुनः कारयत्यन्यं हेतुकर्ता स कथ्यते ॥६॥
अनेककर्तृके मुख्यं कर्तारं प्रत्ययो वदेत् ।
'भूपतिः सूपकारेण पाचयत्योदनं' यथा ॥७॥
मुख्यस्तु स प्रयोक्ता यश्चेत् प्रयुक्तः स नापरैः ।
यथा चैत्रेण मैत्रेण श्रियं पोषयति प्रभुः ॥८॥
हेतुकर्ता त्वसौ त्रेधा प्रेषकोऽध्येषकः परः ।
तथानुकूल्यभागी च तृतीयः कथितो बुधैः ॥९॥
प्रभुत्वेन प्रयुङ्क्ते यः प्रेषकोऽयं प्रकीर्तितः ।
यथा 'भृत्येन भूपालः कारयत्युल्वणं रणम्' ॥१०॥
सत्कारपूर्वकं यस्तु नियुङ्क्तेऽध्येषकस्तु सः ।
नरः श्रद्धापरः कोऽपि गुरुं भोजयते यथा ॥११॥
न प्रेषते नाऽध्येषते यः स्वानुकूल्यभाग्य (क्तृ य)सौ ।
चेतनाचेतनत्वेन स पुनर्द्विविधो मतः ॥१२॥
चेतनो 'जनकं पुत्रो यथा हर्षयति स्फुटम्'।
अचेतनस्तु 'कारीषोऽग्निरध्यापयति द्विजः' ॥१३॥
स्वव्यापारं यदा कर्ता कर्मण्यारोपयेत् तदा ।
स्यात् कर्मकर्ता 'पच्यन्ते शालयः स्वयमेव तत्' ॥१४॥

---

१. केषुचित्पुस्तकेषु विशेषमिदं, दे.प., पा.प. मध्ये नास्ति

यथाऽनुक्तत्वभेदोऽपि प्रस्तावादिह कथ्यते ।
यथा 'सरस्वती देवी छात्रवृन्देन वन्द्यते' ॥१५॥

यत् क्रियते तत् कर्म स्याद्भेदैश्च तदनेकधा ।
निर्वर्त्यं च विकार्यं च प्राप्यं च त्रेधमिष्यते ॥१६॥

पुनस्त्रिधा भवेदिष्टानिष्टानुभयभेदतः ।
तथैव कथितं कर्म कर्तृकर्म तथापरम् ॥१७॥

यदसज्जायते यच्च जन्मना वा प्रकाशते ।
तन्निवर्त्यं 'करोत्येष कटं सूते सुतं' यथा ॥१८॥

सतो गुणान्तराधानात् प्रकृत्युच्छेदतोऽपि वा ।
संपद्यते* यद् विकृतिं तद्विकार्यं विदुर्बुधाः ॥१९॥

कुण्डलीकुरुते हेमकाष्ठं दहति पावकः ।
क्रियाकृतो विशेषस्तु यत्र नास्ति कदाचन ॥२०॥

तत् प्राप्यं स्यात् यथादित्यं पश्यत्यमललोचनः ।
यदीप्सितं तदिष्टं स्याच्छिशुरत्ति यथौदनम्' ॥२१॥

द्विष्टं यत् प्राप्यते तत् स्यादनिष्टं भुजगादिकम् ।
यथाहि लङ्घयत्यन्धोऽथवा मृद्नाति कण्टकान् ॥२२॥

यत्र नेच्छा न च द्वेषस्तत् स्यादनुभयं यथा ।
'ग्रामं गच्छंस्तरोर्मूलान्युपसर्प' ति मार्गगः ॥२३॥

दुहादीनां प्रयोगे च द्वितीयं कर्म यत् किल ।
'देवेदं कथितं' तच्च यथाऽसौ दोग्धि गां पयः' ॥२४॥

यच्चोपयुज्यमानं पयः प्रभृत्यत्र तद्भवेन्मुख्यम् ।
यत् तन्निमित्तमपरं तद्गौणं गोप्रभृत्येव ॥२५॥

भारादिनीयमानं नीवह्यादेः प्रधानकं कर्म ।
तत्तत्पादावुक्तं न यो ग्रामं यथा भारः ॥२६॥

दुहि याचि रुधि प्रच्छि रुध्भिक्षि ब्रुवि शासि चिन्नर्थकाः ।
नीवह्लिजिमोषिदं डिमोदिकर्षिमंथिहृन्मुखाः ॥२७॥

अपादानादिकविधिं बाधित्वा धातवो ह्यमी ।
द्विकर्मका भवन्तीति कथिताः पूर्वकोविदैः ॥२८॥

कृतकोपं याचति शममविनीतं याचते विनयम् ।
इह याचिरनुनयार्थो भिक्षार्थादस्य तद्भेदः ॥२९॥

---

* प्रपद्यते—दे.प., पा.प १-२ ।

वृद्धि जीवति सत्ताह्लीस्थितिजागरणार्थकाः ।
रुच् क्रीड़ा मृतिभीस्वापदीप्त्यर्थाद्यास्त्वकर्मकाः ॥३०॥

इनः पूर्वं तु यः कर्ता स्यादिनन्तेषु कर्म सः ।
तत्कर्तृकर्मविज्ञेयं पुनरेष्वेव धातुषु ॥३१॥

बोधाहारगतिजल्पार्थनित्या कर्मधातुषु ।
भवत्येतद्यथाचार्यः शिष्यं बोधयति श्रुतम् ॥३२॥

बोधार्थाः सामान्या ज्ञानार्था स्युः यथैव हि ।
तथाऽमी इन्द्रियगम्यार्था अपि दृशघ्रास्पृशश्रुस्मृतुल्याश्च ॥३३॥

'गमयति रमणीं रमणेनात्र' गमिरस्ति भजनार्थः ।
गत्यर्थ एव पार्थं गमयति समरं रमारमणः ॥३४॥

खादि कंदि अदि शब्दा यन्तिह्वनि कर्तृकर्मकाः ।
वाहा सारथिकर्तृत्वे तथा भक्षिरहिंसने ॥३५॥

यथा 'खादयते खाद्यं पुत्रेण प्रीतिमान् पिता' ।
यथा 'वाहयति ग्रामं भारं भृत्येन भूपतिः' ॥३६॥

'सस्यं वाहयति ग्राममुक्षाणं सारथिः' पुनः ।
यथा 'भक्षयति प्रीत्या चैत्रा मैत्रेण मोदकान्' ॥३७॥

पुनर्भक्षयते कोऽपि कीटकान् गृहकुक्कुटः ।
कर्ता हृक्रोरणीनन्ते कर्म वा जयते यथा ॥३८॥

'भारं भृत्येन भृत्यं वा ग्रामं हारयते नरः ।'
कर्तात्मनेपदे दृश्यभिवाद्योः कर्म वा भवेत् ॥३९॥

लोकं लोकेन वात्मानं नृपो दर्शयते यथा ।
'अभिवादयते पूज्यं पुत्रं पुत्रेण वा पिता' ॥४०॥

कैश्चिच्चौरादिकस्याप्यभिवदेः कर्म चेष्यते । षट्पदी ।
वा कर्मत्वमनित्कर्तुरविवक्षितकर्मणाम् ।
'पाचयत्येष मैत्रेयश्चैत्रं चैत्रेण' वा यथा ॥४१॥

त्यादिनाऽथ समासेन तद्धितेन कृता अपि ।
उक्तत्वं कर्मणः 'कुम्भः कुलालौ क्रियते' यथा ॥४२॥

आरूढवानरो वृक्षः शत्यश्च शतिकः पटः ।
शतात्केवलादेतस्मिन् यकौ कृतः कटः तथा ॥
तैरेकस्याथ चाधातोः द्विकर्मिणः ॥४३॥

उभयत्वाप्युक्तत्वं बोधाहारार्थशब्दकर्मवताम् ।
इति सति 'शिष्यो धर्मं शिष्यं वा बोध्यते धर्मः' ॥४४॥

अतिथिर्भोज्यते ओदनमतिथिं वा भोज्यते त्वयोदनकः ।
शिष्यो ग्रन्थं पाठ्यत इति शिष्यो पाठ्यते ग्रन्थः ॥४५॥

गत्यर्था कर्मकाणां स्यादित्युक्तं कर्ममुख्यकम् ।
ग्रामं गम्यः सतैर्मैत्रस्तैर्मित्रो मासमास्यते ॥४६॥

षट्कारकेष्विति प्रोक्तमन्यद्वा वक्ति कर्मजः ।
ग्रामो गम्यः सतैर्मैत्रं तैर्मैत्रं मास आस्यते ॥४७॥

क्रियाविशेषणस्यापि सकर्मा कर्मधातुषु ।
नपुंसकत्वमेकत्वं कर्मकत्वं च युज्यते ॥४८॥

यथा 'स्तोकं पचत्येषा ब्राह्मणी सर्वमत्ति च' ।
'शीघ्रमुत्पद्यते कुम्भः सुखं जीवति गौर्गलिः' ॥४९॥

इत्येतत् प्राप्यं निर्वर्त्यं विकार्यं प्रथमं त्रिधा ।
इष्टानिष्टानुभयभेदैर्नवधा जायते ततः ॥५०॥

प्रधानेतरभेदाभ्यां तदष्टाद्दशधा पुनः ।
इति कर्मप्रपञ्चोऽयं संक्षेपाद्दर्शितो मया ॥५१॥

क्रियते येन करणं तद्बाह्याभ्यन्तरं द्विधा ।
'व्रीहीन् लुनाति दात्रेण' 'मेरुं गच्छति चेतसा' ॥५२॥

कारकान्तरतश्चास्य प्रकर्षो न स्वकक्षया ।
'दात्रैः शस्त्रैः नखैर्वल्यो लूनास्तद्बहुधाऽपि तत्' ॥५३॥

'रुद्राय ददाति पशु'मित्यर्थे कर्मणः करणम् ।
स्यात् कर्मसम्प्रदानं पशुना रुद्रं यजत्येषः ॥५४॥

तथा समविषमयोः कर्मत्वे करणं भवेत् ।
'समेन धावति प्रौढो' 'विषमेन च धावति' ॥५५॥

सम्प्रदानं च यस्मै दित्सा पूजा ग्रहकास्य या ।
अनुमन्तृप्रेरकमपि अनिकर्तृ त्रिधेति तत् ॥५६॥

ददामीति वचः श्रुत्वेत्येवं कुर्वंतु मन्यते ।
इत्थं तदनुमन्तृस्या'द्गुरवे गां ददाति 'वत् ॥५७॥

यद्देहीति भणित्वा च दातारं प्रेरयत्यहो ।
तत्प्रेरकमिति प्रोक्तं 'भिक्षां देहि द्विजाय'वत् ॥५८॥

यन्नानुमन्यते नापि प्रेरयेत् किन्तु मूकवत् ।
भवेत् तदनिराकर्तृ दत्ते देवाय हेमवत् ॥५९॥

राज्ञो दण्डं घ्नतः पृष्टं दत्वे दित्सात्र नास्त्यहो ।
शतं भट्टस्य दत्तेऽत्र नार्चाऽनुग्रहकाम्यया ॥६०॥

सम्प्रदानं तदेव स्यात् त्यागभावयुतं च यत् ।
दीयमानेन संयोगात् स्वामित्वं लभते च यत् ॥६१॥

'रजकस्यांशुकं दत्ते' त्यागाभावोऽत्र विद्यते ।
'भाटकेन गृहं दत्ते' विप्रस्य स्वामितात्र न ॥६२॥

यस्मादपायास्तदपादानं तदचलं चलम् ।
'वृक्षात् पतति पर्णं' च 'धावतोऽश्वात् पपात' च ॥६३॥

स्यादाधारोऽधिकरणं षड्विधकारं तु तद्विदुः ।
वैषयिकौपश्लेषिकमभिव्यापकमेव च ॥६४॥

एकदेशेन वियोगस्तपाश्लेषः समीरितः ।
यथा 'चैत्रः कटे आस्ते' 'गृहे तिष्ठति वा गृही' ॥६५॥

यत्र सर्वाङ्गसंयोगस्तदभिव्यापकं मतम् ।
यथा 'तिलेषु तैलं स्यात्' 'घृतं स्यादृघ्नि' वा यथा ॥६६॥

नैमित्तिकं सामीप्यकमौपचारिकमन्तिमम् ।
विषयोऽनन्यत्रभावो 'दिवि देवाः स्थिता' यथा ॥६७॥

यस्य यत् स्यान्निमित्तं तन्नैमित्तिकमुदाहृतम् ।
'युद्धे सन्नह्यते हन्ति दन्तयो कुञ्जरं' यथा ॥६८॥

समीपमेव सामीप्यं 'गङ्गायां घोष' उन्मदः ।
'आकाशे शकुनिर्याति' 'गुरौ वसति भक्तिमान्' ॥६९॥

भवेद्यदुपचारात्तदौपचारिकमुच्यते ।
'अङ्गुल्यग्रे करिशतंमास्ते' यद्वत् प्रकीर्त्यते ॥७०॥

अस्याऽयमिति सम्बन्धः षष्ठ्युत्पत्तिस्तु सूच्यतः ।
तस्माद्भवन्ति सर्वाणि कारणानि विवक्षया ॥७१॥

एकशतं हि षष्ठ्यर्थाः स्वस्वामित्वादिभेदतः ।
स्वस्वामित्वे यथा 'भूमेः पतिः स्वामी गवामयम्' ॥७२॥

जन्यजनकसम्बन्धो 'जगतः पितरौ' यथा ।
वध्यवधकभावे तु यथा 'कंसस्य हिंसकः' ॥७३॥

भोज्यभोजकभावे तु 'अहेर्भोक्ताऽस्ति बर्हिणः' ।
धार्यधारकभावे च यथा 'छत्रस्य धारकः' ॥७४॥

'जिनो जयति जैनेन' 'क्रियते प्राणिनां दया' ।
'स्नानीयं स्नात्यनेनेति' 'दानीयोऽस्मै तु दीयते' ॥७८॥

'बिभेत्यस्मादसौ भीमः' 'तस्मिन्नास्यत आसनम्' ।
'गोमान् सन्त्यस्य गावो हि' प्रोक्तान्युक्तान्यमून्यहो ॥७६॥

इति श्रीवायटगच्छीयश्रीजिनदत्तसूरिशिष्यपण्डित श्रीमदरविरचिते स्वोपज्ञ-काव्यकल्पलताविवेचने परिमलनाम्नि छन्दोऽभ्यासस्तबकोल्लासी कर्तृकर्मादिविशेषवीक्षणप्रचतुर्थः प्रसरः ॥छ॥ ग्रं. ८५

स्यादिविभक्तिविशेषा यथा——

प्रथमादिविभक्तीनां अथ प्राप्तिः प्रपञ्च्यते ।
विभक्तिः प्रथमा ज्ञेया लिङ्गार्थेऽनधिके बुधैः ।। १ ।।

नैवाधिके द्वितीयादिहेतौ कर्मादिकारके ।
लिङ्गार्थस्तु परिज्ञेयः सामान्येनाभिधेयवान् ।। २ ।।

कुन्ता प्रविशन्तीत्यादावप्युपचारमात्रकार्थेभ्यः ।
द्योतकवाचकलिङ्गार्थेभ्यो प्रथमाऽव्ययेभ्योऽपि ।। ३ ।।

आमन्त्रणे तथा कर्मादिकवद्व्यतिरिक्तके ।
भेदे सति षष्ठी प्राप्तावपि स्यात् प्रथमा स्फुटम् ।। ४ ।।

कर्तुर्व्याप्ये द्वितीयोक्ता तन्निवर्त्यादिसप्तधा ।
मुख्यमुक्तममुख्यं तु दुहादीनां प्रयोगजम् ।। ५ ।।

आशंसायां नाथै रुचादिता तद्वतश्च नान्यः स्यात् ।
कर्मविकल्पेन 'घृतं घृतस्य वा नाथते रोगी' ।। ६ ।।

'घृतं मे भूयादि'त्याशास्ते स्मृतयर्थदयेशां वा कर्मत्वं मातरं स्मरति मातुः ।
एवं 'मातरमध्येति' 'मातुरध्येति बालोऽयम्' ।। ७ ।।

अध्येति ध्यायति उत्कण्ठते स्मृत्यर्थाः दयते सर्पिः सर्पिरीष्टे च ।
मधुनो मधु यत्नज षष्ठी न समस्यते शेषे तदर्थकम् ।। ८ ।।

'षष्ठ्ययत्नाच्छेषे' इति व्या. सूत्रेण अयत्नजे विवक्षामात्रविहिते शेषे सम्बन्धे षष्ठ्याः समासो भवति । यत्नज-षष्ठीविशेषसूत्रजनिता षष्ठी पुनर्न समस्यते । तदर्थं विशेषसूत्रमिदम् । तेन मातुः स्मृतमत्र षष्ठीसमासो न स्यात् ।

कर्मकृञः प्रतियत्ने गम्यमाने विकल्पितम् ।
एधोदकस्यैधोदकमुपस्कुरु यथाविधि ।।९ ।।

रुजार्थे स्याज्जरिसन्तापेर्भावे कर्तरि ध्रुवम् ।
कर्म वा 'चौरं चौरस्य रोगो रुजति निश्चितः' ।।१०।।

'तं श्लेष्मा रुजति' श्लेष्माद्रव्यं भावोऽत्र नो यतः ।
भावरूपा हि कर्तारो व्याधिरोगामयादयः ।।११।।

तमाद्यूनं ज्वरयति सन्तापयति वाऽशनम् ।
जासनाटक्राथपिषो हिंसायां कर्म वा भवेत् ।।१२।।

जासनाटीचुरादी द्वौ घटादिक्रादिरिष्यते ।
'उज्जासयति चौरस्य चौरं वा जगतीपतिः' ।।१३।।

नेः प्रान्निः प्रात् प्रणेर्हन्ते हिंसायां कर्म वा भवेत् ।
'निहन्ति चौरं चौरस्य हन्तिः' प्रानिः प्रतः प्रणेः ।।१४।।

पणायते व्यवहृतेर्यत् क्रियार्थं धनं यत्किल ।
तत्कर्म वा द्वितीयास्मिन् पक्षे सम्बन्धषष्ठिका ॥१५॥

शतं पणायते प्रौढः, शतस्य च पणायते ।
'शतं व्यवहरत्यन्यः' 'शतस्य च धनेश्वरः' ॥१६॥

सोपसर्गदिवो व्याप्यं कोटिं कोटेः प्रदीव्यति ।
दिवः त्वनुपसर्गस्य कोटेर्दीव्यति कर्मवान् ॥१७॥

द्वे संज्ञे दिवकरणस्य युगपद्भवतो ध्रुवम् ।
कर्माख्या करणाख्या वाक्षान् दीव्यति कर्मणि ॥१८॥

करणेऽक्षैर्दीव्यति तद्भिन्नं भिन्नमिदं फलम् ।
अक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्र संज्ञयोः ॥१९॥

द्वयोः फलं तथा ह्यक्षैस्तृतीया करणे भवेत् ।
कर्मत्वे तु फलं चैत्रेणेह कर्मास्ति युक्तितः ॥२०॥

अनित्यत्वे तु[1] यत्कर्म नित्याकर्मकलक्षणात् ।
फलं देवयतेरासीद्यत्[2] परस्मैपदं न हि ॥२२॥

अणिगिप्राणिकर्त्रादि सूत्रेण तदकर्मकात् ।
भणितं युक्तितस्तत्र चैत्रेणेत्यत्र कर्म तु ॥२२॥

अधिशीङ्स्थास आधारः कर्म स्यात् सौधिशेते क्षमाम् ।
उपात्वे धाङ वसाधारः कर्मोपवसति द्रुमम् ॥२३॥

वाभिविशश्चाधारः कर्मसंज्ञा प्रपद्यते ।
ग्रामं सोऽभिनिविष्टोऽद्य ग्रामे वाभिनिविष्टवान् ॥२४॥

कालाध्वभावदेशानामाधारः कर्म वा भवेत् ।
अकर्म धातुसंयोगे कर्मण्युक्तेऽप्यकर्म च ॥२५॥

'मासं क्रोशं च गोदोहं', 'ग्रामं चास्ते पचत्ययम्' ।
अनाप्यो वा सिरविवक्षितकर्मा पचि पुनः ॥२६॥

मासः क्रोशश्च गोदोहो ग्रामश्चैवास्यतेऽथवा ।
मासे क्रोशे च गोदोहो ग्रामे चास्ते तथास्यते ॥२७॥

कारकस्य द्वितीयोक्ताऽधुनोपपदगोच्यते ।
समयानिकषाहाधिगन्तरेणान्तरातिभिः ॥२८॥

---

१. 'अनित्कर्तेति यत्' दे.प, पा.प. १ ।

२. अणिगिप्राणिकर्त्रादि' हे. व्या. ३. ३. १०७।

समयानिकषाग्रामं हा जाल्मं धिक्गुणद्विषम् ।
सन्ध्या स्थाह्विसं रात्रिं चान्तरेणान्तराथवा ॥२९॥

न धर्ममन्तरेण श्रीर्विनार्थोऽप्येष सम्मतः ।
अतिवृद्धं कुरूनमहद्दलं समयेन पश्चिमाम् ।
गतस्तेन पश्चिमान्तां नीतो नीतिपरायणः ॥३०॥ षट्पदी

इति वृद्धं कुरूनिति कुर्विति क्रमेण वृद्धमित्यर्थः ।
हा धिक् द्वौ गर्ह्येऽर्थेऽन्तरान्तरेणौध्वनिनिपातौ द्वौ ।
अन्यत्र निपातात् पुरि न रोधसेऽत्यन्तरायां तु ॥३१॥

हा तात ! धिग् जलोत्पादौ त्वामन्त्यस्य विचक्षणम् ।
बहुवचनादन्यत्रापि द्वितीया भवेत् यथा ॥३२॥

बुभुक्षितं न प्रतिभाति किञ्चिञ्चत् ।

पादाग्रान्मस्तकं यावत् सूत्राद्यावच्च पञ्जिकां ।
यावत् शब्दस्य कालाध्यादिभेदः कस्यचिन्मते ॥३३॥

द्वित्वेऽधोऽध्युपरिभिरिहयुक्तान्नाम्नो द्वितीयका भवति ।
तत्राऽधोऽधो ग्रामं ग्रामा निवसन्ति मदमुदिताः ॥३४॥

सर्वोभयाभिः परिणात(णते) द्वितीये ह सर्वतो ग्रामम् ।
लक्षणवीप्सेत्थंभूतेष्वभिनावद्रुममभि तद्विदस्ति ॥३५॥

लक्षणमस्तीहाहिममभिसमस्त्योषधमिह वीप्सैव ।
साधुर्मातरमभिदेवदत्त इत्थं प्रकारोऽत्र इत्थम्भूतः किञ्चित् प्रकारमापन्नः ॥३६॥

प्रतिपर्यनुभिर्योगे द्वितीयिका भागि लक्षणाद्यर्थो यन्माम् ।
प्रतिपर्यनुतद्देयं शेषं स्वयं ग्राह्यम् ॥३७॥

वृक्षं प्रतिपर्यनु विद्युत्प्रतिपर्यनुतरुं तरुं सेकः । प्रतिपर्यनुजननीमपि साधुरयं लक्षणाद्युदाहार्यः ॥३८॥
हेतुसहार्थे ह्यनुना द्वितीयिका तीर्थमनुजनो मिलितः । भवति सहार्थे पर्वतमनुवसिता राजसेनेति ॥३९॥
पर्वतेन सह सम्बद्धे इत्यर्थः । अनु अव पूर्वखिञ्, बन्धने वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरित्यनेन अवस्य लोपः।

उत्कृष्टेनूपाभ्यां द्वितीयिकानुरविराश्रयो ।
महसां उपकुञ्जरं च बलवानुपार्जनं जगति योद्धारः ॥४०॥

क्रियाविशेषणे कालाध्वनोर्व्याप्तौ द्वितीयिका ।
इष्टेऽल्पं सगुडो मासं क्रोशं वक्रा नदी तथा ॥४१॥

षष्ठी प्राप्ता बकमेरुकस्य कर्मणि द्वितीया स्यात् ।
आगामुकोऽस्ति भद्रं कमेः पुनः कामुको दास्याः ॥४२॥

पण्णिनिनः क्षत्कर्मणि षष्ठी वाधिकारा द्वितीयैव ।
ग्रामं गम्या गमी शतं च दायी कटं कारी ॥४३॥

कर्मविभक्तिरनुक्ताप्युक्तापि च सैव तद्विशेषणतः ।
सर्वविभक्तिष्वेवं कारकशक्तिर्हि यदचिन्त्या ।।४४।।

तृतीया हेतुकर्तृकरणेत्थम्भूतलक्षणा ।
हेतुः स्यात् कारणं ख्यातमित्थम्भूतः प्रकारवान् ।।४५।।

धनैः कुलं कटो कारितैस्तै कुम्भो मृदाकृतः ।
जटाभिस्तापसोऽदर्शि परिव्राट् शिखया पुनः ।।४६।।

इत्थम्भूतस्य तापसस्वरूपं प्रकारमापन्नस्य जटालक्षणम् ।।छ।।

तृतीया सिद्धौ कार्यस्याह्लाकृता पञ्जिकाऽमुना ।
अर्ह्लकेन कृतं छन्दोऽर्ह्लकेनालङ्कृतिः कृता ।।४७।।

पूर्वापरार्थमिश्रार्थ्युनार्थाभुजकलहनिपुणखण्डैः ।
काणश्लक्ष्णाभ्यां च प्रकृतिप्रमुखैश्च गम्यक्रियैः ।।४८।।

मासेन पूर्वविरोधोऽन्येनार्थो मिश्रको गुडैः ।
धान्येनार्थी माषेणोनो न्यूनो वा विकलोऽपि वा ।।४९।।

पुंसाऽनुजोऽसि नाकलहो वाचा निपुणकः खण्डः ।
शङ्कुलया कर्णो गिरिणा चारेणापि श्लक्ष्णः ।।५०।।

प्रकृत्याभिरूपः प्रायेण वैयाकरणकस्तथा ।
गोत्रेण काश्यपो जात्या द्विजात्या (तु?) सुशीलकः ।।५१।।

स्वभावेनाढ्यो निसर्गेण ज्ञवर्णेन (च?) गौररुक् ।
स्पर्शेन शीतो वचसा मृदुस्वादू रसेन च ।।५२।।

सुरूपश्च सुखेनायं विशालोऽप्युरसा तथा ।
दृढो बाहुभ्यामित्याद्यिवेवं खु निखिलेष्वपि ।।५३।।

हेतौ कृति भवत्यादिगम्य (:?) क्रियाव्यपेक्षया ।
करणे कर्तरि चोक्ता तृतीया शास्त्रिकोत्तमैः ।।५४।।

सहार्थे च तृतीयोक्ता सह पुत्रेण सोऽगमत् ।
सहशब्दस्य पर्यायैः सहभावेऽपि चेष्यते ।।५५।।

न्यक्षसाकल्यकार्त्स्न्यानि वयवाश्च सहार्थकाः ।
वृद्धो यूना सुखे नास्तीत्यादयोऽपि सहार्थकाः ।।५६।।

तृतीयाङ्गाद्विकारान्तात् तद्वदाख्या कृतोऽङ्गिनाम् ।
पादेन खञ्जः शिरसा खल्वाटोऽक्ष्णा (च?) काणकः ।।५७।।

तद्वतीं सविकाराङ्गवतीमाख्यां करोति कृपता यैस्तृतीया तैः ।
किङ्कृतं कृतभवत्वलं कृतादिराकृतिगणः पूर्यतामस्तु चात्र तत् ।।५८।।

काले भावाच्च वाधारे तृतीयाधिष्ण्यवाचकात् ।
पुष्ये पुष्येण वाश्नीयात् पायसं भोजनं जनः ॥५९॥

प्रसितोत्सुका च बद्धैर्वाधारे स्यात् तृतीयिका युक्तात् ।
प्रसितः केशैः केशेषु चोत्सुकश्चावबद्धोऽपि ॥६०॥

युक्तात् केशादेः प्रकर्षेण बद्धो नित्यप्रसक्तः ।
व्याप्य द्विद्रोणादेर्वीप्सायां वा तृतीयिका क्रीता
तद्द्विद्रोणं द्विद्रोणं द्विद्रोणं नाथवा धान्यं ॥६१॥

पञ्चकं पञ्चकं पशून् क्रीणाति पञ्चकेन धनी ।
क्रीणाति शतेन हयान् क्रीणाति शतं शतं च हयानाम् ॥६२॥

द्वौ द्वौ द्रोणौ मानं यस्य द्विद्रोणमेव तद्धान्यम् ।
द्विद्रोणं द्विद्रोणं कृत्वा क्रीणाति वित्तेन ॥६३॥

पंच हि संख्या परिमाणमस्य तत्पञ्चकं तदाहो ।
क्रीणाति पशून् सम्प्रति स पञ्चकं पञ्चकं कृत्वा ॥६४॥

कर्मणि कृता द्वितीया ततोऽत्र वीप्सा द्वितीयिका पक्षे ।
वीप्सार्थे तृतीया ततो न वीप्सा तृतीयिका पक्षे[1] ॥६५॥

समोज्ञश्चास्मृतौ वा स्यात् तृतीया कर्मकारके ।
'सञ्जानीते सुतो मात्रा मातरं च वधूवशः' ॥६६॥

सञ्जानीते विस्मरतीत्यर्थः ।
अधर्मः सम्प्रदाने स्यात् तृतीया चात्मनेपदम् ।
दाण्धातोः कामुको दास्याः स्वां श्रियं संप्रयच्छते ॥६७॥

गुणाऽधिकेन युक्ताल्लघुनाम्नस्तृतीयिका ।
अधिका खारी द्रोणेन खार्या द्रोणे लघुर्यतः ॥६८॥

चतुर्थी सम्प्रदाने तद्दानाद्वस्तूपदेशयोः ।
कार्या ख्यातादिकाऽनेकप्रीतिदायि क्रियास्वपि ॥६९॥

निवेद्यतां महाराज सुग्रीवायेत्यादिषु क्रियाभिः ।

प्रेयःसम्प्रदानं–

सम्प्रदानं स्पृहेः कर्म वा कीर्त्यै स्पृहयत्ययं ।
कीर्त्तिं च स्पृहयत्येष प्राणैरपि धनैरपि ॥७०॥

क्रुधि द्रुहेर्ष्याऽसूयार्थैः कोपार्हे सम्प्रदानता ।
कुप्यति क्रुध्यति स्वस्मै शेषैरित्थमुदाहृतिः ॥७१॥

क्रुद्द्रुह्यनुपसर्गत्वे सम्प्रदानस्य योग्यता ।
मैत्राय क्रुध्यति स्वामी चैत्राय द्रुह्यति प्रभुः ॥७२॥

---

१. 'वीप्सार्थे....पक्षे'– इदं पा.प. २ पुस्तके नास्ति ।

सोपसर्गत्वे कर्म नैव, यथा— चैत्रमभिक्रुध्यति, अभिद्रुह्यति ।

चतुर्थी कारकस्येयमितः पदचतुर्थिका ।
भवेच्चतुर्थी तादर्थ्ये प्रतिमायै महाशिला ॥७३॥

रुच्यर्थे च चतुर्थी स्यात् परं प्रीतिस्पृहार्थकैः ।
'किं धर्मो रोचते तुभ्यं' 'मह्यमन्नं च रोचते' ॥७४॥

'कथं श्रीः रोचतेऽन्येषां' 'मुमुक्षूणां न रोचते' ।
अत्र हि प्रतिभात्यर्थे रुचिर्न प्रीतिवांछयोः ॥७५॥

क्लृप्त्यर्थैः साविकारार्थैः 'स्यान्मूत्राय यवागुका' ।
धारेरप्युत्तमर्णात्सा 'पित्रे गां धारयत्यसौ' ॥७६॥

शृणोति नाच प्रत्याङ्भ्यामर्थिनि स्याच्चतुर्थिका ।
प्रतिशृणोति गां देव्यैश्चाशृणोति बलिं तथा ॥७७॥

प्रत्यनुभ्यां गृणातेः स्याच्चतुर्थी पूर्वकर्तरि ।
प्रतिगृणात्याचार्यायेऽनुवाद्यनुगृणाति च ॥७८॥

दैवे निरीक्ष्ये राधीक्षि योगे लिङ्गाच्चतुर्थिका ।
कल्पे शुभाशुभं ज्ञानी राज्ञे राध्यति वीक्ष्यते" ॥७९॥

उत्पातेन ज्ञाप्यमानाच्चतुर्थी स्यात् फलात्पुनः ।
'वाताय कपिला विद्युत् आतपायातिलोहिनी' ॥८०॥

श्लाघ् ह्नु स्थाशपां योज्ये मैत्रादौ स्याच्चतुर्थिका ।
मैत्राय श्लाघते किञ्च शपते तिष्ठते ह्नुते ॥८१॥

तुमर्थे भाववचनाच्चतुर्थी धातुतो भवेत् ।
पक्ष्यामीति व्रजत्यर्थे 'याति पाकाय पक्तये' ॥८२॥

चतुर्थी गम्यतुमाश्वे 'यात्येधेभ्यो वनं जनः' ।
एधान् याति समाहर्तुमित्यर्थोऽत्र विवक्षितः ॥८३॥

स्याद्गम्याद् ग्रामादेश्चतुर्थिका द्वितीयिका पक्षे ।
'याति पुराय पुरं वा' 'यात्यध्वानं गतोऽध्वात्र' ॥८४॥

नैवात्र ग्राम इव गन्तव्योऽवास्ति किं नु गत एव ।
अध्वनि पदेऽपि दत्ते सर्वोऽप्यध्वा गतो ज्ञेयः ॥८५॥

कृतग्रामस्य गन्तेति षष्ठ्येव स्यात् परत्वतः ।
ग्रामं ग्रामाय वा गन्ता द्वौ प्रयोगौ मतान्तरे ॥८६॥

मत्याप्यान्नन्यनावादेः कुत्सा द्योतिपदाद् द्वयम् ।
न त्वां श्वानं शुने मन्ये न तृणं च तृणाय वा ॥८७॥

नौकाकशुकशृगालान्नं नावादिकगणो यमाकृतितः ।
नञ्भावेऽपि हे केचिल्लक्ष्यमिदं दर्शयन्त्येव ॥८८॥

स्यादौ प्रदर्शितमितो विशेषो दर्श्यते कृति ।
तथाहि—द्वितीया बाध्यते षष्ठ्या नृजादौ च चतुर्थिका ॥८९॥

न ते बुणाय मन्ताहं न बुशस्य तथाऽथवा षट्पदी ।
षष्ठी चतुर्थी संयोगे हि ते नव मुखेन च ।
रोगिभ्यो रोगिणामेकं लब्धधनं हि हितं सुखम् ॥९०॥

हितसुखभद्रायुष्यत्क्षेमार्थैश्चतुर्थिका षष्ठ्यौ ।
आशिषि तस्मै तस्य भूयात् सपर्ययेयम् ॥९१॥

हितार्थस्तु हितं पथ्यं सुखार्थः सुखशर्मणी(णि) ।
भद्रार्थो भद्रमद्रे आयुष्यार्थश्चिरजीवितम् ॥९२॥

दीर्घायुः क्षेमार्थः क्षेमं कुशलं च निरामयम् ।
अर्थार्थः कार्यमर्थश्च प्रयोजनमपीरितम् ॥९३॥

परिक्रयणे चतुर्थी च तथैव च तृतीयिका ।
परिक्रीतो मया मासं त्वं शताय शतेन वा ॥९४॥

परिक्रीयते स्थाप्यतेऽमुना नियतकालकम् ।
भृत्या परिक्रयणं तन्मासपायादिवेतनम् ॥९५॥

शतार्थवषट् स्वाहा स्वधा नमः स्वस्ति चतुर्थ्येव ।
शक्तो मल्लो मल्लायेह क्षेमार्थकः स्वस्तिः ।
क्षेमार्थे षष्ठ्यप्युक्तास्ते तद्वर्जनाच्चतुर्थ्यमुना ॥
तुभ्यं स्वस्त्यस्तु यथा षष्ठ्यत्र न दीयते सुधिया ॥९७॥

यत्सहितनमःशब्दो लिङ्गं न चतुर्थिका च तद्योगे ।
धात्वन्तरं परं, नमस्यतिरर्हतमसौ नमस्यति तत् ॥९८॥

लब्धोऽवधिर्यतः शब्दादपैति क्रियया पुनः ।
अमूभ्यपायो विश्लेषस्तेनापादानतावधेः ॥९९॥

स्थिरश्चलोऽवधिः द्वेधा द्विविधादपि पञ्चमी ।
वृक्षात् पतति पर्णं वाश्ववरोश्वा त्वधावत ॥१००॥

निर्दिष्टविषयोपात्तविषयोपेक्षिता क्रिया ।
अपायस्य त्रयो भेदा निर्दिष्टविषयो यथा ॥१॥

'वृक्षात् पर्णं पतत्यत्र' वृक्षो निर्दिष्ट एव हि ।
ग्रामादाययुरित्येवमुपात्तविषयोऽधुना ॥२॥

मेघाद्विद्योतते विद्युदत्र निःसृत्य मेघतः ।
विद्युद्विद्योतते नात्र द्युधातुर्निसृतादृतः ॥३॥

कुशूलात् पतति स्त्रीयमाद्यनाङ्गः पचिस्त्विह ।
पुस्तकाद्च्छुध्यते छात्रो वाचनाङ्गोऽत्र बुध्यते ॥४॥

संपेक्षितक्रियोपायो यथाऽस्मादयमद्भुतः ॥५॥

आढ्याः सांकास्यकेभ्यो वा यथा पाटलिपुत्रकाः ।
एषु धीसङ्गजोपायः शृण्वतः परमप्यमुम् ॥६॥

अधर्मादेर्जुगुप्सादावधर्मात् स जुगुप्सते ।
धर्मात् प्रमाद्यतीत्याद्याः भीतार्थे भयहेतुतः ॥७॥

वने व्याघ्राद् बिभेत्येष चौरादुद्विजतेतराम् ।
अध्ययनादेः पराजेरसोढत्वे विवक्षिते ॥८॥

सोढुं नाध्ययनं शक्नोत्यध्ययनात् पराजयते ।
भूकर्तुश्च प्रभावात् प्रभवति हिमपर्वताद् गङ्गा ॥९॥

योग्यादन्तर्धानस्यान्तर्द्धत्ते ह्युपाध्यायात् ।
जनिकर्तुः करणतो यथा शरो जायते शृङ्गात् ॥१०॥

ईप्सितामीप्सिताभ्यां च पादाभ्यां रक्षणार्थके ।
गां रक्षति यवेभ्यस्तिलेभ्यो निषेधयत्यपि ॥११॥

रक्षति स्वमहिभ्योऽन्धकूपाद् वारयति स्वयम् ।
अपायोऽमीषु सर्वेषु ज्ञेयो धीसङ्गपूर्वकः ॥१२॥

पञ्चमी कारकोक्तेर्या मतास्तु (तातु) पदपञ्चमी ।
आङो वधौ घनोऽवर्षदामेरोरामहार्णवात् ॥१३॥

वर्जने पर्यपाङ्भ्यां योगे चोपाध्यायाज्जगृहे श्रुतम् ।
गम्यल्यपः कर्माधारे सौधात् पीठादपेक्षते ॥१४॥

सौधमारुह्य पीठे चोपविश्येत्यर्थः ।

दिक्शब्दकबहिराराात् प्रभृत्यन्यार्थतारैः दिक् ।
पुरस्तात् प्राच्यामुदीच्यां च वसन्त्यागन्तुका जनाः ॥१६॥

दिशि दृष्टा यतः शब्दाद्दिक्शब्दास्तेन पञ्चमी ।
दिक्शब्देन देशकालादिवृत्तिनाऽपि योगतः ॥१७॥

एतदर्थे हि दिक्शब्दोऽन्यत्र शब्दग्रहः कृतः ।
प्रागुज्जयिन्या गोदः कासमी(श्मी)रे मलयादुदक् ॥१८॥

॥ कालः ॥

पूर्वो ग्रीष्माद् वसन्तः स्याद् ग्रीष्माच्च प्रावृडुत्तरा ।
गम्यमानेऽपि दिक्शब्दे क्रोशाद्वेध्यं स विध्यति ॥१९॥

आमन्त्रय च छात्राणां पूर्वं कायस्य संस्पृशाम् ।
गम्यमानेऽपि दिक्शब्दे क्रोशाद्वेध्यं स विध्यति ।
पत्रसम्बन्धाविव तत्र पञ्चमी ॥२०॥

ग्रामाद्बहिः पुरा दारात् मैत्रादाराच्च भोजनम् ।
आराद्दूरान्तिकार्थोऽत्र तेनोदाहरणद्वयम् ॥२१॥

आरादर्थैरिति सूत्रे विकल्पोऽग्रे भणिष्यते ।
नित्यार्थं ग्रहणं त्वत्राराच्छब्दः केवलस्तथा ॥२२॥

ततःप्रभृति कार्तिक्या आरभ्य ग्रीष्मतुः परम् ।
चुरादेश्चेति मुख्ययेशु गम्यन्तु परतः पदम् ॥२३॥

अन्यो भिन्नो हिरक् पृथक् अर्थान्तरं (र) विलक्षणः ।
व्यतिरिक्त (क्ता) इमे शब्दाः परिवर्त्याः क्रमात् पदान् ॥२४॥

इतरशब्दो नात्रान्यशब्दार्थः किं पुनर्द्वयोः ।
मध्यादेकतरस्यैव परिग्रहार्थको यथा ॥२५॥

इतरो दिवसो रात्रेरितरो माधवो मधोः । षट्पदी
पञ्चमी स्याद्गुणाद्धेतोः शताद्बद्धः शताद्धृतः ।
गुणादप्यस्त्रियां वा स्याज्जाड्याप्रज्जाड्येन बाधितः ॥२६॥

स्त्रियां बुद्धयाग्रणी प्रज्ञयाढ्यो विद्यया दृशः ।
आरादर्थेन वा पञ्चम्या पणादापणस्य वा ॥२७॥

दूरं च विप्रकृष्टं च तथैवासन्नमन्तिकम् ।
आरा सृष्टार्थो यद्दूरे निकटेऽपि च वर्तते ।
आराच्छब्दे केवले तु प्रागुक्ता नित्यपञ्चमी ॥२८॥ षट्पदी

वा पञ्चमीत्वसत्त्वे करणे स्तोकाल्पकृच्छ्रा कतिपयतः ।
मुक्तः स्तोकेनाहं स्तोकाच्चैवं कृच्छ्राद्यैः ॥२९॥

स्तोकेण विषेण हतः पुनर्भवति विषविशेषणत्वेन ।
इह सत्त्ववृत्तिता स्तोकं पचतीह क्रियाविशेषणकम् ॥३०॥

कालाध्वनो ह्यसीमनि सप्तामिका त्वध्वनश्च वा प्रथमा ।
अश्विन्याः कार्तिकी मासे मासे माघाश्व फाल्गुनिकाः ॥३१॥

श्रीगिरेः काकिलाग्रामो योजते योजनं तथा ।
क्रिययोरुभयोर्मध्ये काले वाच्ये तथाध्वनि ॥३२॥

पञ्चमी सप्तमी च स्यादद्य भुक्तो मुनिद्र्यध्वात् ।
द्वयहे वा भोक्ष्यते यद्वाऽत्रस्थः क्षिपति सायकान् ॥
धन्वी विध्यति लक्षाणि क्रोशात्तु क्रोशेऽथवा पुनः ॥३३॥ षट्पदी

लघुनाऽधिकेन युक्तात् पञ्चमिका सप्तमी च गुरुनाम्नः ।
खार्यां अधिको द्रोणः खार्याधिकोऽथवा द्रोणः ॥३४॥

एकाक्यर्थपृथक्नानायोगे पञ्चमिकात्रिकाः ।
नाना चैत्रात् पृथग्मैत्रात् पृथग्नानाऽपि तेन च ॥३५॥

सप्तम्यधिकरणे स्यात् तथा भुजर्थेश्च काल अधिकरणे ।
पक्षे षष्ठी भुङ्क्ते द्विरह्नि भुङ्क्ते द्विरह्नो वा ॥३६॥

मासेत्ति पञ्चकृत्वा मासस्य च पञ्चकृत्व एवात्ति ।
बहुधा दिवसे भुङ्क्ते भुङ्क्ते दिवसस्य बहुधा च ॥३७॥

कुशलायुक्तपदाभ्यामासेवायां च गम्यमानायाम् ।
कुशलो विद्याग्रहणे विद्याग्रहणस्य वा छात्रः ॥३८॥

स्वामीश्वरादिशब्दैर्निजपर्यायवर्जितैर्योगे ।
स्वामी गोषु गवामीश्वरादिकैरेवमन्यैश्च ॥३९॥

वाप्येक्तेन सप्तमिका नित्यं वा वयवमधीती ।
आम्नाती साहित्ये पठति छन्दःसु सर्वेषु ॥४०॥

नक्तादि(दी?)न् जायते यत्र तस्य स्यान्न हि सप्तमी ।
कृतपूर्वी कटं पूर्वशब्दादि(दी?)नत्र वर्तते ॥४१॥

हेतोः कर्माभेदे सप्तमिका दन्तयोर्गजं हन्ति ।
आप्रत्यादौ सति साध्वसाधुयोगे च सप्तमिका ॥४२॥

साधुरसाधुर्मातरि कदापि मैत्रः स्वभाव एवास्य ।
प्रत्यादौ पितरप्रातपितरं परिपितरमन्वभि च ॥४३॥

सप्तम्यप्रत्यादौ सप्तजायां साधुनिपुणि निपुणसंयोगे ।
षष्ठ्यपवादो मातरि निपुणः साधु पितर्येषः ॥४४॥

स्वाम्यर्थेन निजार्थेनाधिनायुक्ताच्च सप्तमी ।
स्वर्गेऽधिवासवे सम्यगधिस्वर्गे च वासवः ॥४५॥

उपेनाधिकिनि स्याश्च सप्तम्यधिकिनिः पदात् ।
उपरवार्यामयं द्रोण उपद्रोणे यमाढकः ॥४६।

ख्यातात् भावादविख्यात भावविद्भानु सप्तमी ।
कालाच्च दुह्यमानासु गतो दुग्धासु वा गतः ॥४७॥

शरत्कालागमे सप्तच्छदः पुष्यन्ति शाखिनः ।
पुष्यत्याम्रो वसन्ते च जातिः प्रावृषि पुष्यति ॥४८॥

भावक्रियायाश्च दोहक्रिया प्रसिद्धा ह्यभिज्ञानम् ।
अजनिगमनक्रियाया आख्याता या यतः प्रकटम् ॥४९॥

इहाप्रसिद्धस्य सप्तच्छदपुष्पोद्गमस्य शरत्कालः ।
प्रसिद्धोऽभूच्चिह्नं तेनेह सप्तमी ॥५०॥

षष्ठी भवति सम्बन्धे स्वस्वामित्वादिके यथा ।
राज्ञो नाश्नीयान्मानुषाणामुपेत्यमुपगोरपि ॥५१॥

अज्ञानार्थस्य ज्ञः करणे षष्ठी धृतस्य जानीते ।
असतां घृतस्य हि घृतज्ञानमिहाज्ञानमेव यतः ॥५२॥

अविवक्षितकर्मत्वात् ज्ञाधातोरिह रुचादितास्य ततः ।
स्यादात्मनेपदं तत्करणविवक्षा घृतस्यापि ॥५३॥

ज्ञानार्थस्य तु जानाति स्वरेण तनयं पिता ।
रिरिष्टा स्तादसंत सादन्तैश्च षष्ठिका ॥५४॥

यथोपरि जलस्याब्जमुपरिष्टात् तरोः खगः ।
परस्तात् तमसो ज्ञानी पुरस्तात् सुधियाः श्रियः ॥५५॥

अधस्तात् शशिनः सूर्यः परः सुकृतिनां सुखम् ।
अस्ति दक्षिणतो ग्रामस्योत्तराद्वा तरङ्गिणी ॥५६॥

भवतश्च भाववृत्तेरनादरे सप्तमीषष्ठ्यौ ।
निर्मोहः प्राव्रजीद्रुदतो लोकस्य रुदति वा लोके ॥५७॥

निर्द्धारणे च षष्ठीसप्तम्यौ क्षत्रियो नृषु नृणां वा ।
सू(शू)रो गोषु गवां वा भवति हि कृष्णा बहुक्षीरा ॥५८॥

षष्ठ्यक्लान्तात् कृतः कर्तर्यासिका भवतो यथा ।
तव स्वापस्तवैवाग्रगामिका च तवासना ॥५९॥

यः कर्तृकर्मषष्ठ्या हेतुस्त्व्यधिकारकृत्यकारणकौ ।
हित्वान्यः कृतकर्तरि षष्ठी स्यात् विकल्पेन ॥६०॥

प्रजानां शासनं श्लाघ्यं राज्ञो राज्ञाथवा भुवि ।
साध्विदं पयसः पानं शिशोर्वा शिशुनाऽथवा ॥६१॥

सूक्तेश्चिकीर्षा चैत्रस्य काष्ठानां भेदिकाद्य(द्य)ते ।
अत्राणकप्रयोगौ स्तस्तत्र कर्तुस्तृतीयिका ॥६२॥

कृत्यकर्तरि वा षष्ठी कटः कार्यस्तव त्वया ।
त्वयैव तव वा ग्रामो गन्तव्यो नाऽपरस्य च ॥६३॥

कृत्यस्य चोभयोर्हेतो षष्ठी कर्तप्ययोर्न हि ।
नया ग्राममजा ग्राम्यैः शतं जेयः शतैस्तथा ॥६४॥

कर्मविषयो यथा—

कृतः कर्मणि षष्ठी स्यादनुक्ते दर्शकः स्थितेः ।
अपां स्रष्टा त्रिलोकस्य ज्ञाता वर्षस्य पूरकः ॥६५॥

पिबस्तोयस्य गोर्दोहो ग्रामस्य गमनं तथा ।
भावेऽपि धात्वर्थकृता स्याद् व्याप्तिस्तत्सकर्मता ।।६६।।

वुण्तृच वहेदर्थे तृच् शो युट् घञ् कर्महेतवः ।
षष्ठी निष्ठाद्यवा (वा ?) धायां व्याप्ये संवृञ्चि वा द्विषः ।।६७।।

चौरं द्विषन् यथा चौरसमूहस्य द्विषन्नपि । षट्पदी

धातोर्द्विकर्मके षष्ठी कर्मणोरुभयोर्न वा ।
सुघ्नं सुघ्नस्य गोर्नेता नेता सुघ्नस्य गां च गौः ।।६८।।

एवं सर्वत्र गां गोश्च पयसो दोग्धा गोः पयसः पयः ।
मुख्ये दुहादे नीवह्योर्गौणी षष्ठी मतान्तरे ।।६९।।

ज्ञानेच्छार्थार्थान्नीच्छील्यादे वर्तमानकाले क्तः ।
आदिगत्यर्था कर्मकधातुभ्यः क्तोऽधिकरणे च ।।७०।।

वर्तमानक्तस्याधारक्तस्य अयं प्रपञ्चः ।
कर्मणि न तृतीया मता राज्ञां राज्ञामिष्टस्तथार्चितः ।।७१।।

इदमोदनस्य भुक्तं सक्तूनां पीतमिदमहेः सुप्तम् ।
इदमासितं तेषामथो विशेषः पुनः क्लीबः ।।७२।।

यः कोऽपि क्तः क्लीबे तत्कर्तरि षष्ठिका तृतीया वा ।
तस्योक्तं तेनोक्तमिसुप्तमिहाहेरिह त्वहिना ।।७३।।*

वर्तमानक्तस्याधारक्तस्यायं प्रपञ्च (षष्ठी न कर्मकर्त्रोर्निष्ठाव्ययवृतुदन्तकि ।
क्वंसौ शंत्रण शानकानैष्यदर्थावुण् खलि खलर्थे च ।।७४।।) श्लोक

निशायां विहितोऽनेन कटो विहितवान कटम् ।
अव्ययेषु कटं कृत्वा पायं पायं प्रयोगतः ।।७५।।

स वाञ्छति कटं कर्तुं तृनि वक्ता परान् गुणान् ।
उदन्तेः प्रत्ययाः सप्त स्फुरिष्णुप्रमुखा यथा ।।७६।।

अलङ्करिष्णु कन्यां स जिष्णुः क्षिप्नुररीन् शरान् ।
क्षुधार्त्तोऽन्नबुभुक्षुश्च धारुर्वत्सोऽस्ति मातरम् ।।७७।।

श्रद्धालुर्धर्मतत्त्वानि त्वं वंदारुः सरस्वतीम् ।
कौ घातान् सासहिस्ताङ्के चक्रिः कुम्भं कटं दधिः ।।७८।।

क्वासौ च पेचि वा तत्तं विद्वान्नत्वं महामनाः ।
शंतृञ्य धीयंस्तत्त्वार्थं रहस्यं धारयन् हृदि ।।७९।।

---

* श्लोकाः ७१, ७२, ७३ दे. प. पुस्तके न सन्ति ।

कटं कुर्वन् करिष्यन्नानशाचक्षाण तद्गुणान् ।
शानडि पचमानाङ्गं काने चक्राण वाटिकाम् ॥८०॥

अत्र श्लोके सम्बोधनत्रयम् ।

एष्यद्बुणि वने गच्छन्ये धानाहृरको जनः ।
खलर्थेनूक्ततैर्वा स्यात् कट ईषत्करः त्वया ॥८१॥

सुज्ञानोऽर्थस्त्वया कर्मषष्ठी प्राप्तौ द्वितीयिका ।
उक्तार्थत्वात् खलर्थेषु प्रथमैव कृता पुनः ॥८२॥

तुल्यार्थैस्तृतीया षष्ठ्यौ तुल्यस्तेन च तस्य च ।
षष्ठी द्वितीये एतेन प्रयोगो यदि नाञ्चते ॥८३॥

ग्रामं ग्रामस्य पूर्वेणाञ्चेः प्राग् प्रत्यगुदगृहात् ।
ऋते द्वितीयापञ्चम्यौ ऋते तस्मादृते च तम् ॥८४॥

विना योगे द्वितीया च तृतीया पञ्चमी तथा ।
तं विना च विना तेन विना तस्मान्न मे रतिः ॥८५॥

दूरार्थादिप्यदूरार्थादिसत्त्वादाङसिद्यमः ।
दूरेण दूराद्दूरे दूरमेवं स्युरदूरतः ॥८६॥

दूरोऽध्वा यमदूरोऽध्वा नात्र किं ङा [दा ?] ङसिद्यमः ।
सत्त्वमत्रास्ति सत्त्वार्थं उक्तत्वात् प्रथमा ततः ॥८७॥

तृतीयाद्या हेत्वर्थे स्युर्यथा धनेन हेतुना ।
धनाय हेतवे हेतोर्धनाद्धेतोर्धनस्य वा ॥८८॥

हेतौ धने च वसति तथा हेत्वर्थसंयुतान् ।
सर्वादेः सर्वा जायन्ते यथा यात्येष पत्तनम् ॥८९॥

को हेतुः कं हेतुं केन हेतुनाऽप्यथ हेतवे ।
कस्मै कस्माद्धेतोः कस्य हेतौ च कुत्र वा ॥९०॥

इति श्रीवायटगच्छीय श्रीजिनदत्तसूरिशिष्यपण्डित श्रीमदमरचन्द्रसूरिविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि छन्दोभ्यासस्तबकोल्लासी स्यादिविशेषनिरीक्षणः पञ्चमः प्रसरः ।छ॥ ग्रन्थाग्रं २२५॥छ॥

अथ त्यादिविभक्तिविशेषाः ।

वर्तमाना सप्तम्याद्या ज्ञेया दशविभक्तयः ।
तासामाद्याश्चतस्रस्तु सार्वधातुकसंज्ञकाः ॥ १ ॥

संत्रानशानमुख्याश्च प्रत्ययाः शानुबन्धिनः ।
काला वर्तमानोऽतीतौ भविष्यन्नित्यमी त्रयः ॥ २ ॥

वर्तमाने वर्तमाना विध्यादौ सप्तमी पुनः ।
पञ्चम्यनुमतौ कालेऽतीते ह्यस्तनिका पुनः ॥ ३ ॥

अद्यतनी परोक्षा च पुनः क्रियातिपत्तिका ।
क्रियातिपतने भूते प्रोक्ता काले भविष्यति ।। ४ ।।

भविष्यन्ती श्वस्तनी चाशीराशीर्वचने सति ।
एवं विभक्तयः कालत्रययोगाद्दशोदिताः ।। ५ ।।

विभक्तीनां च पूर्वार्द्धं परस्मैपदमुच्यते ।
उत्तरार्द्धं तु सर्वासामात्मनेपदमित्यपि ।। ६ ।।

मध्ये द्वयोस्त्रिकं पूर्वं प्रथमः पुरुषो भवेत् ।
द्वितीयं मध्यमः प्रोक्तस्तृतीयं तूत्तमो मतः ।। ७ ।।

त्रिकमध्ये पूर्वं वचनमेकवचनं मतम् ।
द्वितीयं द्विवचनं तृतीयं बहुवचनं मतम् ।। ८ ।।

स्यात् परस्मैपदं कर्तर्येवात्मनेपदं पुनः ।
भावे कर्मणि धातूनामात्मनेपदिनां पुनः ।। ९ ।।

उभयपदिनां चापि कर्तर्यात्मनेपदम् ।
स तौ ते इति विन्यस्ते प्रथमः पुरुषो भवेत् ।।१०।।

त्वं युवां यूयमित्येवं मध्यमः पुरुषः पुनः ।
अहमावां वयं योगे उत्तमः पुरुषः खलु ।। ११ ।।

स्यादेकैव क्रिया यत्र कालो यत्रैक एव तत् ।
युगपद्वचनं तत्र पुरुषाणां परो भवेत् ।। १२ ।।

यथा पचामोऽहं स त्वं स त्वं च पचथो यथा ।

अहं त्वं च पचावश्च युगपद्वचने पुनः ।
पचत्येष पक्ष्यसि त्वमपाक्षमहमोदनम् ।।षट्पदी ।।१३।।

पचत्यसौ पचसि त्वं पचाम्यहमिहाऽपि यत् ।
पुरुषा भिन्नदेशस्थाः सन्ति नैकदेशगाः ।। १४ ।।

स त्वं चाहं च पचति प्रयासि च जयामि च ।
अत्र क्रिया विभिन्ना यत् ततो न पुरुषः परः ।। १५ ।।

वर्तमानो भवेत् कालो विरामसमयावधिः ।
कालो भूतभविष्यन्तौ तस्यै वाद्यन्तयोः स्थितौ ।। १६ ।।

प्रवृत्तो परतश्चैव वृत्ताविरत एव च ।
नित्यप्रवृत्तः सामीप्ये वर्तमानश्चतुर्विधः ।। १७ ।।

वर्तमाने वर्तमाना क्रमेणोदाहृतिस्थितिः ।
नाऽयं खादति मांसानि क्रीडन्तीह कुमारकाः ।। १८ ।।

सन्त्यगाः त्वं कदायातः आगच्छन्नस्मि यामि च ।

अतीते स्म पुरा प्रीतिः दशश्वाद्यागवत्यपि ।
वर्तमानो यथा राजा पृच्छति स्म पुरोहितम् ॥ १९ ॥षट्पदी॥

स्म पुरा धीयते तेन त्विह कथयत्यदः ।
अधीते स्म वटुः शश्वदिति निगदव्ययम् ॥ २० ॥

भूते प्रश्नस्योत्तरोक्तौ न नौ सात्यनशा तृन्न् वर्तमाना त्रयं स्यात् ।
यातं त्वं भो न त्वहं यामि यातं सत्यां वाणीं मां ब्रुवाणं च पश्य ॥ २१ ॥

भूते पृष्ठोक्तौ सत्यं न तुभ्यं च वर्तमाना न सं तृङ् ।
देवदत्त कटं भोः किमकार्षीर्न करोमि भोः ॥ २२ ॥

न कुर्वन्तं न कुर्वाणं मां पश्यावो वदन्नकः ।
ब्रवीम्यहं तु ब्रुवन्तं तु ब्रुवाणं तु पश्य माम् ॥ २३ ॥

परोक्षे चापरोक्षे च भूते भूरादियोगतः ।
वर्तमाना परोक्षा च ह्यस्तन्यद्यतनी तथा ॥ २४ ॥

वसन्तीह पुरस्थोऽत्राभाषते राघवस्तदा ।
ऊषुरत्र पुरस्थोऽत्राबभाषे राघवस्तदा ॥ २५ ॥

पुरा वसन्निह च्छात्रास्तदाभाषत राघवः ।
पुरा वात्सुरिह च्छात्रास्तदाभाषिष्ट राघवः ॥ २६ ॥

पुरा शश्वत्तदा यावदथेतिह्याः पुरादयः ।
अथाह वर्णी विदितो महेश्वरो यावद्गिरः खे मरुतां चरन्ति ॥ २७ ॥

स्यात् पुरा यावतोर्योगे वर्तमाना भविष्यति ।
पुरा भुङ्क्ते यावद्भुङ्क्ते पुरा श्वो भुङ्क्त इत्यपि ॥ २८ ॥

कदा कर्ह्योर्वर्तमाना वा भविष्यत्यसौ कदा ।
भुङ्क्ते भोक्ष्यते भोक्ता कर्हि भुङ्क्ते भोक्ता भोक्ष्यते ।
भूते तु कदा बुभुजे कर्हि वा भुक्तवानयम् ॥ २९ ॥

स्यादितरङ्कत मां तस्य किं मे भविष्यति ।
लिप्सायां वर्तमाना च भविष्यन्ती श्वस्तनी तथा ॥ ३० ॥

कः कतरः कतमो वा भिक्षां ददाति दास्यति दातैवम् ।
लिप्स्याते सिद्धौ द्वौ यो भिक्षां ददाति दास्यति ॥ ३१ ॥

दाता स स्वर्गं सुकृती याता यास्यति याति च । षट्पदी
लिप्स्यमन्नादि तस्मात् सिद्धिः स्वर्गप्राप्त्यादि पञ्चम्यर्थहेतौ ।

पञ्चम्यर्थः प्रेषादिरस्य तु हेतुरुपाध्यायागमनादिस्तत्र भविष्यति ।
वर्तमाना भविष्यन्ती श्वस्तन्यः स्युर्विभक्तयः ॥३२॥षट्पदी॥

प्रैषादिः प्रैषानुज्ञावसराः न्यक्कारपूर्विका प्रेषणा प्रेषः कामचारानुमतिरनुज्ञातम् ।

अवसरः कर्तव्यकालप्राप्तिः उपाध्यायश्चेदागच्छत्यागन्ता वा गमिष्यति ।
अथ त्वं सूत्रमधीष्ठाऽथानुयोगं गृहाण भोः ।। ३३ ।।

ऊर्ध्वं मुहूर्ताद्भवस्तत्रौर्द्धमौहूर्तिके तथा ।
काले भविष्यन्ति पञ्चम्यर्थहेतौ हि विभक्तयः ।।३४ ।।

वर्तमाना सप्तमी भविष्यन्ती श्वस्तनी तथा ।
ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य परं तथा ।। ३५ ।।

मुहूर्तादुपाध्यायश्चेदागच्छत्यागमिष्यति ।
आगता गच्छेदथ तं तर्कमथाधीष्व लक्षणम् ।।३६।।

गम्यगर्हायां जात्वप्योर्वर्तमाना वेद्यथा ।
जातु त्वं भवान् धीमन्नपि तत्र भवान् सखे ।।३७।।

जन्तून् हिंस्ति प्रकटगर्हायां सप्तमी पुनः ।
अपि तत्रभवान् पापं कुर्यात्गर्हामिहेहि धिग् ।।३८।।

तत्सामीप्ये भूतभाविद्विभेदे चैकेकस्मिन् वर्त्तमाना न संतृञ् ।
भूते काले प्रत्यया भौतकालाः पक्षे भाविन्यन्यके भाविकाला ।।३९।।

आयातोऽत्र कदा त्वमेष विषयादायामि विद्धि प्रभो
त्वामायायान्तमुपागमं पुनरहं चायातवानाययौ ।
त्वं यास्यस्यमुतोऽथ यामि यदि वा यान्तं च जानीहि मां
यास्याम्येव नमस्कृतोऽसि भगवान् यालास्म्यविघ्नोऽस्तु वः ।।४०।।

इति वर्त्तमाना व्याप्तिः ।।छ।।

अथ सप्तमी—

का च सम्प्रति विध्याद्यर्थषट्के सप्तमी भवेत् वेद्ये १ ।
विधिर्निमन्त्रणा २ मन्त्रा ३ ऽध्येषण ४ प्रश्न ५ मर्थनम् ६ ।।४१।।

विधिरज्ञातज्ञप्तिः निमन्त्रणे यदनिषेध्यं स्यात् २ ।
आमन्त्रणे यदृच्छा ३ ध्येषणमपि पाठविषयाज्ञा ४ ।।४२।।

संप्रश्नः शास्त्राणामालोचः ५ प्रार्थनं पुनर्याञ्चा ६ ।
षडमी विध्याद्यर्थाः प्रकाशितः सप्तमीसत्काः ।।४३।।

जन्तून्न हिंस्या १ द्विसन्ध्य कुर्यादावश्यकं तथा २ ।
इहाशी न रोचते चेत् शिष्यमध्यापयेत् तथा ४ ।।४४।।

किं नु खलु भो व्याकृतिमधीयीयेत लक्षणम् ।
प्रार्थना मे तर्कमधीयीयोदाहरणावली ६ ।। ४५ ।।

सम्भावलनेऽलमर्थे तदर्थानुक्तौ तु सप्तमी ।
अपि मासमुपवसेत् शक्यं सम्भावनं ह्यदः ।। ४६ ।।

अशंक्यसम्भावनेऽपि भिन्द्यात् शिरसा गिरिम् ।
अलमर्थोक्तौ तु शक्यश्चैत्रो धर्मं करिष्यति ।। ४७ ।।

अश्रद्धामर्षायाः सप्तमी जातु यद्यदा यदौ ।
न श्रद्दधे न क्षमे जात्वत्र भवान् सुरां पिबेत् ।। ४८ ।।

यद्यदा यद्यत्रभवान् सुरां पिबेदिति क्रमात् ।
आशंस्येऽर्थे सप्तमी नाशंसार्थोपपदे सति ।। ४९ ।।

उपाध्यायश्चेदागच्छदागमदागमिष्यति ।
आगन्ता शंसे सम्भावयेऽधीयीय श्रुतं वचः ।। ५० ।।

क्षिप्रा शंस्यार्थीयाः सप्तम्या शंसेरमधीयीय ।
हेतुफलयोरेकोक्तौ सप्तमी वाभविस्यत ।। ५१ ।।

उपासीत यदि गुरून् गच्छेत् शास्त्राम्बुधेस्तटम् ।
यदि गुरूनुपशिष्यते शास्त्रान्तं गमिष्यति ।
गुरोरुपासनं हेतुः शास्त्रान्तगमनं फलम् ।। ५२ ।।

जैनेन्द्रमर्चय विचारय चान्द्रमैन्द्रं विस्तारय प्रकटतां नयपाणिनिन्तम् ।
विश्रान्तमाश्रय पुरस्कुरु धर्मवर्त्म निर्माणमुन्नमय भोजनरेन्द्रकीर्तिम् ।।६१।।

श्रीशाटकीयनमतिं सविधे विधेहि कौमारसारमभिनन्दय दाक्षिणात्यम् ।
इत्यात्मसात्कृतपुरातन शब्दशास्त्रं श्रीहेममाविशति भारतपुस्तकान्तः ।।६२।। युग्मम्

श्री हैमशास्त्रं कर्तु जैनेन्द्रमर्चयति इत्यादिक्रमेण क्रियापदेषु वर्तमानादेया, ततः श्लोकार्थः स्फुटीभवति । इति पञ्चमीव्याप्तिः ।

अवयह्यस्तन्यद्यतन्यौ अन्योऽप्यादुत्थानादन्योऽप्याञ्च ।
संवेशनादहरुभयतोर्द्विरात्रं वा लोकोऽद्यतनो मतः ।।६३।।

भूतेऽनद्यतने ह्यस्तन्यं करोदहरद्य वा ।
ख्याते दृश्येऽनद्यतने ह्यस्तनी न परोक्षिका ।।६४।।

अवन्तीमरुणत् सिद्धाऽख्याते चक्रकटं बटुः ।
अदृश्यैकं स दैन्येशं जघान किल केशवः ।।६५।।

पुनरद्यतने भर्तुरुदगादत्र दीप्तरुक् ।
भूतेऽद्यतनी त्वहार्षीदकार्षीत् प्रमुखा यथा ।।६६।।

अनद्यतनादिविशेषस्या विवक्षणे सति ।
व्यामिश्रेण चाद्यतनी भूतेऽपाम् पयो यथा ।।६७।।

हूणानजैषीज्जैत्रोऽयं तथा रामोऽगमद्वनम् ।
व्यामिश्रेऽद्यह्यो वा भूक्ष्म ह्यत्र न ह्यस्तनी भवेत् ॥६८॥

अन्त्ययामं यावद (दा ?)स्व पूरिरात्रौ वसेद्यव। ।
भूतेऽर्थेऽद्यतनी ह्यस्तन्यपवादो भवेद्यथा ॥६९॥

कश्चित् पप्रच्छ पथिकं किञ्चिज्जागरकष्टितम् ।
क्व भवानुषितः प्राहो द्यामुत्रावान् समित्यसौ ॥७०॥

राश्यन्तयामे मुहूर्तस्वाचेऽपि ह्यस्तनी पुनः ।
अमुत्रावसमित्याह सुप्तो मुहूर्तमेव यः ॥७१॥

माङ्ङ्यद्यतनी सर्वासां विभक्तीनां विबाधिका ।
मा कार्षीन्न्यायं सास्ममाङिह्यस्तन्यद्यतन्यपि ॥७२॥

मा स्म करोत् मा स्म कार्षीर्व्यवधाने तयोरपि ।
मा कार्षीः स्म स्म कार्षीत् मा मा चैत्र स्म वृषा व्यथाम् ।
स्म करोन्मा करोत् स्माद्यं मा चैत्रे स्म करोदिति ॥७३॥ षट्पदी ।

छातोः सन्त्रानसौ माङ्या क्रोशे दातुं प्रक(ल्पि)ते ।
मापचन्मा पचमानो यावज्जीवं स दुष्टधीः ॥७४॥

तथा च माघः—

माजीवन्यः परावज्ञा दुःखदग्धोऽपि जीवति ।
असिद्धे सिद्धवत् संभावनतः प्रत्यौ यथा ॥७५॥ (शिशु. २.४५)

समहै चेत् प्रयत्नोऽभूदुदभूवन् विभूतयः ।
पचेन्मधवोऽवर्षीत् समपत्स्यं न शालयः ॥७६॥

जातश्चायं मुखेन्दुश्चेत् भ्रकुटिप्रणयी पुनः ।
गतं च वसुदेवस्य कुलं नामावशेषताम् ॥७७॥

आशंस्यो वा भूतवच्च सद्वच्च प्रत्यया मताः ।
पक्के यथा प्राप्तमन्ये चेदुपाध्याय आगमत् ॥७८॥

तर्कमेतेऽधीष्म ह्युपाध्यायश्चेदुपागतः ।
एतैस्तर्कोऽधीतश्चेदागच्छत्यधीमहे तदा ॥७९॥

पक्षे वेदा गमिष्यन्त्यागन्ताऽध्येयामहे तथा ।
अध्येतास्महे विज्ञेयानीत्युदाहरणानि च ॥८०॥

इति ह्यस्तन्यद्यतन्योर्व्याप्तिः ।

अथ मागधी—एशेशुपुलिशे, विय्याहले याणदि शुस्तिदे कञ्ञका-वलणं पुञ्ञाहं पुञ्ञा, पञ्ञले 'र-सोर्ल-शौ' (हे-प्रा. 8-4-288) इति सत्त्वं यद्वृत्तिः। मागध्यां रेफस्य दन्त्यसकारस्य चस्थाने यथासंख्यं लकारस्तालव्यशकारश्च भवति । र—नले कले; स-हंशे, शुदं, शोभणं। उभयोः—शालशे, पुलिशे । लहश-वश-नमिल-शुल-शिल-विअलिद-मंदाल-लायिदंहि-युगे ।

वील-यिणे पक्खालदु मम शयलमवय्य-यम्बालं ॥१॥

'अत एत्सौ पुंसि मागध्याम्' (हे. प्रा. 8-4-287) इति एकारः। मागध्यां भाषायां सौ परे अकारस्य एकारो भवति पुंसि पुल्लिङ्गे । एष मेषः—एशे मेशे; एशे पुलिशे। करोमि भदन्त-करोमि भन्ते। एशो एवं सुपुरुषस्थानेषु पुलिशे नवरं 'पुरुषे रोः' (हे. प्रा. 8-1-111) इति रेरो रुकारस्य इत्वं भवति ॥छ॥

विद्याधर—'जद्यां यः' (हे-प्रा-8-4-292) इति यत्वं यद्वृत्तिः। मागध्यां जद्यां स्थाने यो भवति। ज—याणदि, यणवदे, अय्युणे, दुय्यणे, गय्यदि। गुण—वय्यिदे ॥ द्य—मय्यं, अय्य किल विय्याहले आगदे ॥ य—याऽदि, यधाशलूवंद याण-वत्तं। यदि। यस्य यत्वविधानं 'आर्यो जः' (8-2-245) इति बाधनार्थम्। 'खघथधभाम्' (हे प्रा-8-1-187) इति धस्य हत्वं। रसोर्लत्वं अतएत्सावित्येवम्। 'अनादौ शेषा.........'(हे-प्रा- 8-2-89) इत्यादिना द्वित्वं-वज्जाहले॥ छ॥ ज्ञाधातुः। 'ज्ञो जाण-मुणौ' (8-4-9) इति जाणादेशः। जानातेर्जाण गुण इत्यादेशौ भुतः॥ जाणइ, मुणइ। बहुलाधिकारात् क्वचिद्विकल्पः। जाणिअं, णायं; जाणिऊण, णोऊण; जाणणं णाणं। मणइ इति मन्यते। इति स्थानेत्यादीनामाद्यत्रय्यस्योति इचादेशः। 'दिरि चेचोः' (हे-प्रा- 8-4-273) इति इच् स्थाने दिः। 'जद्यां यः' (हे-प्रा-8-4-292) इति जस्य यत्वं-याणदि ॥छ॥

सुस्थितः—'रसोर्लशौ' (हे-प्रा-8-4-288) इति सस्य शत्वम्। 'स्थर्थयोस्तः' (हे-प्रा-8-4-291) इति स्थस्य स्तः यद्वृत्तिः। स्थर्थ इत्येतयोः स्थाने मागध्यां सकाराक्तान्तः तो भवति। स्थ-उवस्तिदे, शुस्तिदे। र्थ—अस्तवदी, शस्तवाहे। 'तोदोनादौ.......'[1] इत्यनेन (हे-प्रा-4-8-260) तस्य दत्वं प्र-सि। 'अत एत्सौ (पुंसि मागध्याम्)' (हे-प्रा- 2-4-389) इति एकारः सुस्थिते (तः ?) ॥छ॥

कन्यकावरणां प्रजा पुण्याहं पुण्याहं पुण्यप्राञ्जलम्। 'सर्वत्र लवरामवन्द्रे' ('हे-प्रा- 8-2-19) इति रलोपः। 'रसोलशौ' (हे-प्रा- 8-4-288) इतिलः। 'न्यण्यज्ञञ्जां ञ्ञः' (हे.प्रा. 8-4-293) इति सर्वेषु ञ्ञ इति यद्वृत्तिः। मागध्यां न्यण्यज्ञञ्ज इत्येतेषां द्विरुक्तो ञो भवति। धनञ्जय—अहिञ्ञकुमाले, अञ्ञादिशं, शामञ्ञगुणे कञ्ञकावलणं। 'य-पुञ्ञवंते अवम्हञ्ञं; पुञ्ञाहं पुञ्ञं। ज्ञफञ्ञाविशाले शव्वञ्ञे, अवञ्ञा। ञ्जअञ्ञली, धणञ्ञए; पञ्ञले ॥छ॥

अथ पैशाची—

कुतुंबकं हितपकं याति, सोताति, सो गुतो। भारिया कसटं सक्कोसंरवो गंतून पव्वतो। कुटुम्बकृपादित्यादिषु शब्देषु आदे उत इत्वं भवति। केवाहटकं। 'टोस्तुर्वा' (हे-प्रा-8-4-411) इति तु यद्वृत्तिः। पैशाच्यां टोः स्थाने तूर्वा भवति। कुतुम्यकं, कुटुम्बकं ॥छ॥

हृदयकं—'स्वार्थे कश्च वा' (हे-प्रा-8-2-164) कप्रत्ययः। 'इत्कृपादौ' (हे-प्रा- 8-1-128) इति इः, यद्वृत्तिः। कृपा इत्यादिशब्देषु 'आदेः' (हे-प्रा- 8-1-39) उत इत्वं भवति। किवा अयं सिद्धं 'रसे एव' (हे-प्रा- 8-1-128) अन्यत्र मट्ठं दिट्ठी, सिट्ठं, गिठी, पिच्छी, भिरू, भिंगो भिगारो, सिंगारो, उञ्चितं। वित-दित्तो; हिअं, वाहित्तं; बिहिओ, विसी, इसी विइण्हो, छिहा, सइ, उक्किट्ठं। 'ददोस्तः' (हे-प्रा-8-4-307) इति टस्य तः यद्वृत्तिः। पैशाच्यां तकार-

---

1. पूर्ण सूत्रं त्विदं—'तोदोनादौ शौरसेन्यामयुक्तस्य'।

टकारयोस्तो भवति । तस्य भगवती, पव्वती, सतं । दस्य-मतन-परवसो, सतनं, तामोतरो पतेसो, वतनकं होतु रमतु । तकारस्यापि नकारविधानमादेशान्तरबाधनं । तेन पताका वेतिसो इत्याद्यपि सिद्धं भवति । सिद्धो–'हृदये यस्य प' (हे-प्रा-8-4-310) इति यस्य पः यद्वृत्ति । पैशाच्यां तां हृदय शब्दे यस्य पो भवति । हितपकं, किंपि किंपि हितपके अत्थं चिन्तयमानी । यादृश तादृशा । यवयं यि इति यत्वं । यादृशादे-र्दुस्तिरिति (हे-प्रा-8-4-319) तिः यद्वृत्तिः । पैशाच्यां यादृश इत्येवमादीनां ह इत्यस्य स्थाने ति इत्यादेशो भवति । यातिसो, तातिसो; केतिसो, एतिसो; भवातिसो, अञ्ञातिसो, युम्हातिसो, अम्हातिसो । 'शषो स' इति (हे-प्रा-8-4-309) सत्वं यद्वृत्तिः । पैशाच्यां शषोः सो भवति । श-सोभति, सोभनं, ससी, सक्को, सङ्खो । षविसमो, किसानो । न कगचजादिषट्शम्यन्तसूत्रोक्तम् (हे-प्रा-8-4-324) इत्यस्य बाधकस्य बाधनार्थोऽयं योगः । 'अतः सेर्डोः' (हे-प्रा- 8-3-2) इति –यति सोभाविसो गुणः । 'णोऽनः' (हे-प्रा-8-4-306) नत्वं यद्वृत्तिः । पैशाच्यां णकारस्य नो भवति । गुन-गन-युत्तो गुनेन ॥छ॥

भार्या कष्टं–'र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित्' (हे-प्र- 8-4-314) इति रियसटौ यद्वृत्तिः । पैशाच्यां र्यस्नष्टां स्थाने यथासंख्यं रिय सिन सट इत्यादेशाः क्वचिद् भवन्ति । भार्या, भारिया; स्नातं, सिनातं; कष्टं, कसटं ॥छ॥

शक्रः शक्तो वा शंखो । 'शषो स' इति सत्वं, 'सर्वत्र लवरा.....'इति (हे-प्रा- 8-2-79) रलोपः । अथवा 'शक्तमुक्तदष्टरुग्णमृदुत्वे को वा' (हे-प्रा- 8-2-2) इति क्तस्य कः, यद्वृत्तिः । एषु संयुक्तस्य को वा भवति -सक्को-सक्को-सत्तो; मुक्को-मुत्तो; डक्को-दत्तो, लुक्को-लुग्गो, माउक्कं-माउत्तणं । 'अनादौ शेषादेशयोर्द्वित्वं' इति कस्य द्वित्वं-सक्को-संखो ॥छ॥

गम् धातुः क्त्वस्थाने 'क्त्वस्तूनः' (हे-प्रा-8-4-312) इति तून यद्वृत्तिः । पैशाच्यां क्त्वाप्रत्ययस्य स्थाने तून इत्यादेशो भवति-गन्तून, रन्तून; हसितून, पठितून; कधितून ॥'मोऽनुस्वारः' (हे-प्रा- 8-1-23) इत्यनुस्वारः गंतून ॥छ॥

पार्वती—'ह्रस्वः संयोगे' (हे-प्रा- 8-1-84) इति ह्रस्वत्वं यद्वृत्तिः । दीर्घस्य यथादर्शनं संयोगे परे ह्रस्वो भवति । आत्, अत्थं, तत्थं, विरहग्गी, आस्यं-अस्सं । इत्-मुणिंदो, तित्थं । उत्–गुरुल्लापाः–गुरुल्लावा, चुण्णो । एत्-नरेन्द्रः—नरिन्दो मिलि ॥छ॥

दिट्ठि क्कत्थणवट्टं उत् अहरुट्ठं नीलुप्पलं । 'सर्वत्र लवरां......' (हे-प्रा-8-2-79) इति रलोपः । आदौ शेषादेशयोः द्वित्वमिति वस्य द्वित्वम् । 'तदोस्तः' (हे-प्रा- 8-4-307) इति तस्यापि तत्वम ॥छ॥

अथापभ्रंशः—

> तरुहे गरिहे जो सो जितच्छम्मुहु संकरु ।
> जहिं तहिं सामिअहो कहाहूंतउ आगवो तरुगिरि ॥ (हे. प्रा. 3-4-342)

पञ्चम्येo 'ङसि-भ्यस्-ङीनां...' (हे- प्रा- 3-4-341) हे हुं हय इति हे हे यद्वृत्तिः । अपभ्रंशे इदुदभ्यां परेषां ङसि भ्यस् ङि इत्येतेषां यथासंख्यं हे हुं हि इत्येते त्रय आदेशा भवन्ति । ङसेर्हे ।

> गिरिहें सिलायलु तरुहें फलु घेप्पइ नीसावंन्नु ।
> घरु मेल्लेप्पिणु माणुसहं तो विन रुच्चइ रन्नु ॥

> भ्यसो हुं ।

> तरुहुं वि वक्कलु फलु मुणि वि परिहणु असणु लहन्ति ।
> सामिहुं एत्तिउ अग्गलउं आयरु भिच्चु गृहन्ति ॥

ङे हिं ।

अह विरल पहाउजिकलिहि धम्मु ।
धम्मु तरु हे गिरिहे ।।छ।।

'यत्तत्......'अन्त्यव्यं0 दलोपः । 'आदेर्योजः' (हे-प्रा-8-1-245) इति यस्य जत्वं, यद्वृत्तिः । पदादेर्यस्य ज भवति-जसो, जमो, जोइ । आर्षे लोपोऽपि यथाख्याते–– अहक्खायं । यथाजात –अहाजाय ।' तदश्च तः सोऽक्लीबे' (हे-प्रा-8-3-86) इति तस्यः सः । अपभ्रंशे पुल्लिङ्गे वर्तमानस्यनाम्नः अकारस्य सौ परेउ कारो वा भवति :

अगलिअ-नेह-निवट्टाइं जोअण लक्खु वि जाउ ।
वरिस-सएण वि जो मिलइ सहि सोक्खहँ सो ठाउ ।।

अन्त्यव्यं0 मिलोपः जसौ ।।छ।।

'कथं-यथा-तथा थादेरेमेमेहेधा डितः' (हे-प्रा-8-4-401) इति डिमादेशः यद्वृत्तिः । अपभ्रंशे कथं यथा तथा इत्येतेषां थादेरवयवस्या प्रत्येकं एम इम इह दूध इत्येते डितश्चाचार आदेशाः भवन्ति ।

केम समप्पउ दुट्ठ दिणु किध रयणी छुडु होइ ।
नववहु-दंसण-लालसउ वहइ मणोरह सोइ ।।1।।

ओ गोरी-मुह-निज्जिअउ वद्दलि लुक्कु मियंकु ।
अन्नु वि जो परिहव्विय-तणु सो किवँ भवँइ निसंकु ।।2।।

बिम्बाहरि तणु रयण-वणु किह ठिउ सिरिआणन्द ।
निरुवम-रसु पिएं पिअवि जणु सेसहो दिण्णी मुद्द ।।3।।

मइ सहि निहुअउँ तेवँ मइं जइ पिउ दिट्ठु सदोसु ।
जेवँ न जाणइ मज्झु मणु पक्खावडिअं तासु ।।4।।

जिवँ जिवँ वङ्किम लोअणहं । तिवँ तिवँ वम्महु अिव-सर ।।

मइं जाणिउ प्रिय विरहिअहं क वि धर होइ विआलि ।
नवर विअंकु विवह तवइ जिह दिणयरु खय-गालि ।।5।।

एवं तिध-जिधावुदाहाति । 'मोनेनुनासिको वो वा' (हे-प्रा-8-4-391) इति सम्यक्त्वादेशः ययोर्वृत्तिः । अप्रभंशेनादौ वर्त्तमानस्यासंयुक्तस्य मकारस्य अनुनासिको वकारो वा भवति । कवँलु-कमलु, भवँरु-भमरु । लाक्षणिकस्यापि । जिवँ, तिवँ, जेवँ, तेवँ । 'षट्-शमी-शाव-सुधा-सप्तपर्णेत्वादेश्छः' (हे प्रा--8-1-265) एषु आदेर्वर्णस्य छो भवति –छट्टो, छट्ठी; छप्पओ, छम्महो; छमी, छावो; छुहा छत्तिवण्णो । 'ङ्यणनो व्यञ्जने' (हे.प्रा. 8-1-27) इति णस्यानुस्वारः यद्-यद्वृत्तिः । ङञणन इत्येतेषां स्थाने व्यञ्जने परे अनुस्वारो भवति । ङ– पङक्तिः पंती; पराङमुखः -परंमुहो । ञ-कञ्चुकः–कंचुओ; लाञ्छनं–लंछणं । ण–षण्मुखः–– छंमुहो; उत्कण्ठा–उक्कंठा । न–संध्यासंझा; विन्ध्यः –विंझो । 'खघथधभाम्' (हे. प्रा. 8-1-189) इति खस्य हः । प्र. 'स्यमोरस्योत्' (हे. प्रा. 8-4-331) इति एकारः यद्वृत्ति ।

दहमुहु भुवण-भयंकरु तोसिअ-संकरु णिग्गउ रह-वरि-चडिअउ ।
चहुमुहु छंमुहु झाएवि एक्कहिं लाइवि णवइ दइवें घडिअउ ।।छ।।

शङ्कर —'शषोः सः' (हे. प्रा. 8-1-260) इति सत्वं। सिशभो रा स्यात् इति उत्वं। 'स्यम्-जस्-शसांलुक्' (हे. प्रा. 8-4-344) इति सिलोपः यद्वृत्तिः। अपभ्रंशे मि अम् जस् शस् इत्येतेषां लोपो भवति। एइ ति घोड़ा एह थलि। अत्र स्यम्जसां लोपः।

जिवँ जिवँ वंकिम लोअणअं णिरु सामलि सिक्खेइ।
तिवँ तिवँ वम्मउ निअय-सर खर-पत्थरि सिक्खेइ ॥

अत्र स्यम्शसां लोपः ॥छ॥

यत्तत् सप्तम्ये 'ङे हिं' (8-4-357) इति हिं यद्वृत्तिः। अपभ्रंशे सर्वादेरकान्तात्परस्य ङे; सप्तम्येकवचनस्य हिं इत्यादेशो भवति।

जहिं कप्पिज्जइ सरिण सरु छिज्जइ खग्गिण खग्गु।
तहिं तेहइ भड-घड-निवहि कन्तु पयासइ मग्गु ॥1॥

एक्कहि अक्खिहिं सावणु अन्नहिं भद्दवउ माहउ महिअल-सत्थरि गण्ड-त्थलें सरउ।
अङ्गिहिं गिम्ह सुहच्छी-तिल-वणि मग्गसिरु, तेहें मुद्धहें मुह-पङ्कइ आवासिउ सिसिरु ॥2॥

हिअडा फुट्टि तडत्ति करि कालक्खेवें काइं।
देक्खउँ हय-विहि कहिं ठवइ पइँ विणु दुक्ख-सयाइं ॥3॥

शेषं पूर्ववत्। जहिं तहिं ॥छ॥

स्वामिन्—'सर्वत्र लवरामचन्द्रे'[1] इति वलोपः अन्त्यव्यञ्जनस्य लोपः[2] 'अ-डड-डुल्लाः स्वार्थिक-क-लुक् च' (हे. प्रा. 8-4-429) इति अः यद्वृत्तिः। अपभ्रंशे नाम्नः परतः स्वार्थे अ डड डुल्ल इत्येते त्रयः प्रत्ययाः भवन्ति तत्संनियोगे स्वार्थे कप्रत्ययस्य लोपश्च।

विरहाणल-जाल-करालि अउ पहिउ पन्थि जं दिट्ठउ।
तं मेलवि सव्वहिं पन्थिअहिं सोजि किअउ अग्गिट्ठउ ॥

डड। महु कन्तहों बे दोसडा। डुल्ल।
एक्क कुडुल्ली पञ्चहिं रुद्धी।

'अवर्णो यश्रुतिः' इति यः। षष्ठ्येकं 'ङसः सुहोस्सवः' (हे. प्रा. 4-338) इति हो, यद्वृत्तिः। अपभ्रंशे अकारात्परस्य ङसः स्थाने सुहो स्सु इति त्रय आदेशा भवन्ति। जोगुण गोवइ अप्पणा पयडा करइ परस्तुसु / तसु हउं कलि-जुगि दुल्लहहो बलि किज्जउं सुअणस्सु ॥सामियहो ॥छ॥

किम् पञ्चम्ये ङसि 'किमः कस्त्रतसोश्च' (हे. प्र. 8-3-71) इति कः, यद्वृत्तिः। किमः को भवति स्यादौ त्रतसोश्च परयोः। को-केन्कं-के-केण। त्र-कत्थ। तस्-कओ, कत्तो, कदो। 'सर्वादेर्ङसेर्हां' (हे. प्रा. 8-4-355) इति हां यद्वृत्तिः। अपभ्रंशे सर्वादेराकारान्तात्परस्य ङसेर्हां इत्यादेशो भवति। जहां होन्तउ आगदो; तहां होन्तउ आगदो। कहां होन्तउ आगदो ॥छ॥

भूधातुः 'भुवेर्हो-हुव हवाः' (हे. प्रा. 8-4-60) इति हो त्रानशा वेष्यति तु सष्यी इति अन् प्रत्ययः। 'शत्रानशः' इति (हे. प्रा. 8-3-181) न्तः। शतृ आनश् इत्येतयोः प्रत्येकं न्त माण इत्येतावादेशौ ॥ भवतः। शतृ-हसन्तो

1. लवरामवन्त' इत्यपि पाठः।
2. 'अन्त्य...लोपर्द इदं पा. प. 2 पुस्तके नास्ति।

हसमाणो । आनश्-वेवन्तो, वेवमाणो ।'अ-डड-डुल्लाः स्वार्थिक-क-लुक् च' (हे. प्रा. 8-4-429) वा इति अः । प्र. सि 'स्यमोरस्योत्' (हे. प्रा. 8-4-331) उः । स्यम्–'जस्-शसोर्लुक्' (हे. प्रा. 8-3-4) इति सलोपः । ङ-ञ-णनो व्यञ्जने इत्यनुस्वारः । होतउ आगततो दोऽनादौ शौरसेन्यामयुक्तस्येति । तस्य दत्तं प्र. सि. 'अतः सेर्डोः' (हे. प्रा. 8-3-2) इति आगदो ।।छ।।

इति सर्वमवदानं भद्रकृत् प्राप्नुयात्, भद्रं अभद्रं चाप्यभद्रकृत् । पुनरभ्यासे विशेषाः प्रकाश्यन्ते-काव्याभ्यासः । स्यादि सदृक्वचनान्तसदृशान्त्यवर्णपदः । अन्तधृततद्धितैकप्रत्ययरमणीयपदपटलः । नानार्थैकार्थसदृशधातुः एकप्रत्ययधातुः । पृथगुपसर्गकधातुरपि धृतसमधिकरणधातुः तुल्यविभक्तिवचनान्तधातुश्च एक-कृत्प्रत्यययुक् । सकलकलासंकुलश्च भवेत् । त्रिभिर्विशेषकम् । आसामन्तरसूत्राणां क्रमात् व्याख्या स्यादीति स्यादिविभक्तीनां सदृक्वचनमेकवचनं वा, द्विवचनं वा बहुवचनं, अन्तो येषां तानि च । तथा सदृशोऽन्त्यो वर्णो येषां तानि पदानि यत्र स तथा काव्याभ्यासः । प्रथमैकवचनेन सदृशान्त्यवर्णैः पदैर्यथा अभिमतशुभकर्मा भिन्नदुष्कर्ममर्मा प्रकटितजिनधर्मा स्मेरिताशेषशर्मा । कनकरुचिरकान्तिः क्लृप्तदारिद्र्यदान्ति वितरतु परशान्तिः ब्राह्मणी ब्रह्मशान्तिः ।। ? ।।

यथा वा—

वैराग्यद्रुममञ्जरीकुचरितग्रन्थिच्छिदा कर्त्तरी
ज्ञानेन्दुद्युतिशर्वरी भयचयाम्भोजप्रभा धूमरी ।
श्रेयः पल्लववल्लरी शुभदिनारम्भध्वनद् झल्लरी
चित्तान्तः समुदित्वरीभयरुजां स्याद्भावना जित्वरी ।।

सप्तम्येकवचनेन यथा—

सर्वाशारुधिदग्धवीरुधिसदा सारङ्गबद्धक्रुधि
क्षामक्ष्मारुहि मन्दमन्मधुलिहि स्वच्छन्दकन्दद्रुहि ।
शुष्यच्छ्रोतसि तप्तभूरिरजसि ज्वालायमानाम्भसि
ग्रीष्मे मासिततार्कतेजसि कथं पान्थ व्रजन् जीवसि ।।

एवं सर्वविभक्तिवचनैः सदृशान्त्यवर्णपदान्यूह्यानि ।।छ।।

अन्त्येति । अन्तो धृतो यस्तद्धितैकस्यैक एव प्रत्ययस्तेन रमणीयं पदपटलं यत्र स तथा

यथा—

पारलौकिकपुण्याप्तैर्द्रविणैरैहलौकिकैः ।
यस्यानुकूलिको धर्मस्तच्छब्दः सार्वलौकिकः ।।

रुण्डमुण्डमयमेव धरित्री पीठमस्त्रमयमेव विहाय ।
रक्तबिन्दुमयमेव तदाशाचक्रवालमकृतैष भुजालः ।।

धर्मध्वंसधरीणमक्रमरसावारीणमापत्प्रथा–
लंकर्माणमशर्मनिर्मितकलापारीणमेकान्ततः ।
सर्वान्नीन मनात्मनीनमनयात्यन्तीनमिष्टे यथा—
कामीनं कुमताध्वनीनमजयन्नक्षीधमक्षेमभा ।।छ।।

नानेति । नानार्था एकार्था वा सदृशा धातवो यत्र स तथा नानार्थाः । सदृशधातवो यथा—

गोपायति क्षितिमिमां चतुरब्धिसीमां धीमानधर्मवचनाच्च जुगुप्सते यः ।

वित्तं न गोपयति यस्तु वनीपकेभ्यो धीरो न गुप्यत महत्यपि कार्यजाते ।। गुप् रक्षणे, गुप धूपः विच्छिपणिपनेरायः । स्वार्थे गोपायति । गोप् गोपनकुत्सनयोः गुप्तिज किद्भ्यः मनिस्वार्थि जगुप्सते । पटपुटीति दण्डकेन गुप् भाषार्थे गोपायति । गुप् गोपनकुत्सनयोः । गुप्तिज किद्भ्यः सनिस्वार्थे जुगप्सते । पटटीति दण्डकेन गुप् भाषार्थे, भु (मु ?) प् गोपायति गुप् व्याकुलत्वे दि. गुप्यति ।

एकार्थाः सदृशधातवो यथा—

धुनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनोति धुवति स्फुटितानि मुक्तम् ।
वायुर्विधूनयति केशरपुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च ।।

धूञ् कम्पने । स्वार्थे धुनोति । धूञ् कम्पने । क्र्या. धुनोति धूपिति धूनने । तुः धुवति । धूञ् कम्पने क्र्या इति धूञ् प्रीणात्योर्णः । विधूनयति, विधूनते, च्वा. धवति । एते सदृशधातवो मत्कृतशब्दसमुच्चयात् ज्ञेयाः —सदृशेति-सदृशाक्षराणि अन्ते येषां ते सदृशाक्षरान्ता धातवो यत्र स तथा । यथा—

क्षोभयन्तौ भिया लोकं लोभन्ततौ च नारदम् ।
शोभयन्तौ दिवं बाणैर्युयुधाते क्रुधा युतौ ।।

एक एव सन्नादिप्रत्ययो येषां ते एकप्रत्यया धातवो यत्र स तथा । यथा—

सर्वज्ञं ज्ञाप्सति, सर्वमीप्सति, दयां धित्सति, दयां धित्सत्यघं मित्सति,
क्रोधं दीत्सति, दानशीलतपसां साफल्यमादित्सति ।
कल्याणोपचयं चिकीर्षति, भवाम्भोधेस्तटं लिप्सति

मुक्तिस्त्रीं परिरिप्सते यदि जनस्तद्भावनां भावयेत् ।। तोयत्यग्निरपि स्रजत्यहिरपि व्याघ्रोऽपि सारङ्गति
व्यालोप्यश्चति पर्वतोऽप्युपलपिक्ष्वेडोऽपि भीयूषति ।

विघ्नोऽप्युत्सवति प्रियत्यरिरपि क्रीडातडागत्यपां नाथोऽपि स्वगृहत्यटव्यपि नृणां शीलप्रभावात् ध्रुवम् ।।छ।।

पृथगिति । पृथग्विभिन्न उपसर्गो यस्य स पृथगुपसर्गः, एक एव धातुर्यस्य तथा ।

यथा—

मन्दं निधेहि चरणौ परिधेहि वासो नीलं पिधेहि वलयावलिमंचलेन ।
मा जल्प साहसि निशारदचन्द्रकान्ता दन्तांशवस्तव सभांसि समापयन्ति ।।
धृतं समं विकरणं समविकरणा धातवो यत्र स तथा ।

यथा—

पापं लुनीहि करुणाकर मां पुनीहि दोषं मुषाण जगदीशमुखं पुषाण ।
चित्तं प्रबोधय विशोधय दर्शनं मे शीलं प्रवर्त्तय निवर्तय कर्मजालम् ।।

तुल्येति-तुल्यं समानं त्यादिविभक्तीनां वचनमेकवचनं वा बहुवचनं वा अन्ते येषां ते तुल्यविभक्तिवचनान्ता धातवो यत्र च तथा ।

अद्राक्षं बहुलान् बहूनभृणवं भूरीन् समस्तानिव
भूयिष्ठान्निरवैषमभ्यतनवं बंहीयसां सङ्गतम् ।
भूयोभिः सममन्ववीदहमहोरात्राणि धात्रा पुनः
सृष्टोऽसि त्वमिव त्वमेव कथमन्येनानुकारिष्यसे ।
तीर्थेष्वस्नामधामत्रितयमवरिवष्याम पुण्यां धरित्री–
मारण्यामस्पृशामभ्यतनुमववत्सेय द्वयं पञ्चवातान ।
आत्मानं व्योमरूपं यदपि निरुपधि प्रण्यदध्ना प्रकामं
एकेति-एकमेव कृतस्तेनाष्टमूर्तिः प्रमदयति दृशो यत्रशोभद्रसूरिः ।।

भुंजीमहि सदा भैक्ष्यं रथ्यावासां वसीमहि
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरः ।।

एते मे कुलकन्यकाप्रणयिनः पातालमूलस्पृशः
सन्त्रासं जनयन्ति विन्ध्यभिदुरा वारां प्रवाहाः पुरः ।

होमान्मूलितनर्त्तितप्रतिहतव्यावर्त्तितप्रेरितत्यक्तस्वीकृतनिह्नुतप्रटितप्रोद्भूततीरद्रुमाः ।।

कालुष्यं जनयन् जडस्य रचयन् धर्मद्रुमोन्मूलनं श्लिश्नन्तीति कृपाक्षमाकमलिनीर्लोभाम्बुधिं वर्द्धयन् ।
मर्यादातटमुद्व्रजन् शुभमनोहंसप्रवासं दिशन् किं न क्लेशकरः परिग्रहनदीपूरः प्रवृद्धिं गतः ।।छ।।

सकलेति—सकलानां लक्षणादीनां कलानां कौशलं यत्र स तथा । लक्षणकौशलं यथा —द्विगुरपि सद्वन्द्वोऽहं गृहे च मे सततमव्ययीभावः ।

तत्पुरुषकर्मधारय येनाहं स्यां बहुव्रीहिः ।।

छन्दःकौशलं यथा—

आश्चर्यं तत्र शार्दूलविक्रीडितमहो महत्
सनाभि यदिदं बाणस्रग्धराभिरधःकृतम् ।।

अलंकारकौशलं यथा—

अल्पप्रभाणां प्रभवत्प्रभोऽधमयोग्यमुच्चैर्मणिपण्डतानाम् ।
वहत्यलंरातत्वयालाकारस्तावानेव तवाङ्गमेतत् ।।

नाटयशास्त्रकौशलं यथा—

आलम्बन् सरसां स्वरूपरचनामानन्दिबिद्गदये भावग्राहिशुभप्रवेशकगुणं गम्भीरगर्भस्थितिः ।
उच्चैर्वृत्तिसपुष्करव्यतिकरं संसारविष्कम्भकं भिद्याद्वो भरतस्य भाषितमिव ध्यातं पयो यामुनम् ।।

अर्थकौशलं यथा मुद्राराक्षसनाटके ।

कामशास्त्रकौशलं यथा—

अधरे बिन्दुः कण्ठे मणिमाला कुचयुगे शशप्लुतकम् । तव सूचयन्ति कुसुमाऽऽयुधशास्त्रपण्डितं रमणम् ।।

तर्कः षट्प्रकारः । तत्रार्हतो यथा—शरीरपरिमाण आत्मा यथाऽन्यथा शरीराफल्यमात्माफल्यं वा । तत् कौशलं यथा—

शरीरमात्रमात्मानं ये वि(व?)दन्ति जयन्ति ते ।
तच्चुम्बनेऽपि सञ्जातः सर्वाङ्गपुलकोऽस्य मे ।।

बौद्धीयो यथा--विवक्षा पूर्वाह्ने हि शब्दास्तामेव विवक्षां सूचयेयुस्तकौशलं यथा--

भवतु विदितं शब्दा वक्तुर्विवक्षितसूचकाः ।
स्मरति (हि) यतः कान्तं कान्ता बलात् परिचुम्बति ।।

ननममममामां स्प्राक्षीन्निषेधपरम् वचो ।
भवति शिथिले मानग्रन्थौ तदेव विधायकम् ।।

लौकायतिको यथा--भूतेभ्यश्चैतन्यं मदशक्तिवत् । तत् कौशलं यथा--

बहुविधमिह साक्षिचिन्तका प्रवदन्त्यन्यमितकलेवरान् ।
अपि समुदिते च चिन्तकाः प्रलयं यान्ति सहैव चिन्तया ।

सांख्यीयो यथा--

नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।।
(गीता 2)

तत्कौशलं यथा--

य एते यज्वानः प्रथितमहसो येऽप्यवनिपाः मृगाक्ष्यो याश्चैताः कृतमपरसंसारकथया ।
अमी ये दृश्यन्ते फलकुसुमनम्राश्च तरवो जगत्येवंरूपा विलसति हृदेषा भगवती ।।

न्यायवैशेषिकीयो यथा--

स किं सामग्रीक ईश्वरः कर्त्तेति पूर्वपक्षः ।
निरतिशयैश्वर्यस्य कर्तृत्वमिति सिद्धान्तः ।।

तत्कौशलं यथा--

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनम् ।
किमाधारो धाता सृजति किमुपादानमिति च।।

दान इति च।

अतर्क्योश्चरायत्तत्वय्यनवस दुःस्थो हतधियः ।
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ।।

आगमश्चाप्तवचनं, तत्रैवागमे कौशलं यथा--

घोरघोरतरातीतब्रह्मविद्याकलातिगः ।
परापरपदव्यापी पायाद्वः परमेश्वरः ।।

बौद्धागमकौशलं यथा--

कलिकलुषकृतानि यानि लोके मयि निपतन्तु विमुच्यतां स लोकः ।
मम हि सुचरितेन सर्वसत्त्वाः परमसुखेन सुखावनीं प्रयान्तु ।।

एवमागमान्तरेष्वपि–अपौरुषेयवचः श्रुतिः। तथा उर्वशीह्यप्सराः पुरुषमैडं चकमे

तत्कौशलं यथा—

चन्द्राद्बुधः समभवत् भगवान्नरेन्द्रमाद्यं पुरूरवसमैडमसौ असूत।
तं चाप्सराः स्मरवती चकमे किमन्यदत्राशी स्मितवशीकृतशक्रचेताः॥

श्रुत्यर्थस्मरणात् स्मृतिर्यथा—

बह्वर्थेष्वभियुक्तेन सर्वत्र व्यपलापिना। सम्भावितैकदेशेन देयं यदभियुज्यते॥ (विक्रम. ४.)

तत्कौशलं यथा—

हंस प्रयच्छ मे कान्तां गतिः त्वस्याः त्वया हृता।
सम्भावितैकदेशेन देयं यदभियुज्यते॥ (विक्रम. ४.)

वेदोपाख्यानोपनिबन्ध्यप्रायं पुराणं यथा—

हिरण्यकशिपुर्दैत्यो यां यो स्मित्वाऽप्युदैक्षत।
भयभ्रान्तैः सुरैश्चक्रे तस्यै तस्य दिशे नमः॥

तत्कौशलं यथा—

स सञ्चरिष्णुर्भुवनत्रयेऽपि यां यदृच्छया शिश्रवदाश्रयः श्रियाम्।
अकारि तस्य मुकुटोपलस्खलत्करस्त्रिसन्ध्यं त्रिदशेश ते नमः॥

पुराणप्रतिप्रद एवेतिहासः। यथा—

न स संकुचितः पन्था येन वाली हतो गतः। समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः॥

तत्कौशलं यथा—

मदं नवैश्वर्यलवेन लम्भितं विसृज्य पूर्वः समयो विमृश्यताम्।
जगज्जियत्सातुरकण्ठगद्धतिर्नवालिनवाहिततप्तिरन्तकः॥

आयुर्वेदशास्त्रकौशलं यथा—

अङ्गे चन्दनपंकपंकजविशच्छैदावलीनां महुः।
तापः शाप इवैष शोषणपटुः कम्पः सखीकम्पनः।
श्वासाः संवृततारहाररुचयः सम्भिन्नचीनांशुका
जातः प्रागतिदानवेदनमहारम्भः स तस्या ज्वरः॥

ज्योतिःशास्त्रकौशलं यथा—

यामालोकयतां कलयतां छायाः समचिन्वतां।
क्लेशः केवलमङ्गुलीर्गणयतां मौहूर्तिकानामयम्।
धन्या सा रजनी तदेव सुदिनं पुण्यः स एव क्षणो
यत्राज्ञातचरः प्रियानयनयोः म (सं.) मानमेति प्रियः॥

धनुर्वेदकौशलं यथा--

आर्यस्यास्त्रघनौघलाघववती सन्धानसम्बन्धिनी
स्थाणुस्थानकसौष्ठवप्रणयिनी चित्रक्रियालङ्कृतिः।
निःस्यन्देन मयातिविस्मयमयी सत्यं स्थितप्रत्यया
संहारे खरदूषणत्रिशिरसामेषैव दृष्टा स्थितिः॥

गजलक्षणकौशलं यथा--

कर्णाभ्यर्णवितीर्णचामरमरुद्विस्तीर्णनिःश्वासवान्
शंखच्छत्रविराजि राज्यविभवे द्वेषी निलीनेक्षणः।
स्मृत्वा राघवकुञ्जरः प्रियतमामेकाकिनीं कानने
स त्यक्तां चिरमुक्तभोगकवलं क्लेशोष्मणा शुष्यति॥

अश्वशास्त्रकौशलं यथा--

आवर्त्तशोभः पृथुसर्वराशिः केनावदातः पवनो सवेगः।
गम्भीरघोषोऽद्रिविमर्दखेदादश्वाकृतिं कर्तुमिवोद्यतोऽब्धिः॥

रत्नपरीक्षाकौशलं यथा--

द्वौ वज्रकर्णौ जगतीपतीनां सद्भिः प्रदिष्टौ ननु सार्वजन्यौ।
यः स्याज्जपाविद्रुमभंगशोणो योऽयं हरिद्रारससन्निकाशः॥

धातुवादकौशलं यथा--

नखदलितहरिद्राभङ्गगौरे शरीरे स्फुरति विरहजन्मा कोऽप्ययं पाण्डुभावः।
बलवति सति यस्मिन् सर्वमावर्त्य हेम्ना रजतमिव मृगाक्ष्याः कल्पितान्यङ्गकानि॥

द्यूतकौशलं यथा--

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते।
इत्थं चेमौ रजनिदिवसौ तोलयन् द्वाविवाक्षौ कालः काल्या सहगहुकलः क्रीडति प्राणिसारे॥

चित्रकौशलं यथा--

अतथ्यान्यपि तथ्यानि दर्शयन्ति विचक्षणाः।
समे निम्नोन्नतानीव चित्रकर्मविदो यथा॥

योगशास्त्रनैपुण्यं यथा--

पृथु शास्त्रकथाकन्था रोमन्थेन वृथाऽत्र किम्।
अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरान्तरम्॥

एवमन्यदपि। सकलकलालोकव्यवहारकौशलसंस्कृता हि प्रतिभा कवीनां काव्यार्थसुधा कामधेनुः। यदाह--

न स शब्दो न तद्वाक्यं न स न्यायो न सा कला। जायते यन्न काव्यांगम् महो भारो गुरुः कवेरिति।

काव्याभ्यासं चतुर्भेदभिन्नच्छायोपजीवनात्॥

पदाद्युपजीवनतो यथौचित्यं सुधीः सजेत्। छायार्थादर्थस्य तदुपजीवनं क्वचित्॥

प्रतिबिम्बतुल्यतया यथा—

ते पान्तु वः पशुपतेरलिनीलभासः कण्ठप्रदेशघटिताः फणिनः स्फुरन्तः।
चन्द्राऽमृताम्बुकणसेकसुखप्ररूढैर्यैरंकुरैरिव विराजति कालकूटः॥

तथा च—

जयन्ति नीलकण्ठस्य नीलाः कण्ठे महाहयः। क्षगलद्गंगाङम्बुसंसिक्तकालकूटाङ्कुरा इव॥

यदाह—

अर्थः स एव सर्वो वाक्यान्तर्विरचनापरं यत्र।
तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात्॥

क्वचिदालेख्यतया तत्रैवाथ यथा—

जयन्ति धवलव्यालाः शम्भोर्जूटावलम्बिनः।
गलद्गंगाम्बुसंसिक्तचन्द्रकुन्दांकुरा इव॥

कियताऽपि यत् संस्कारकर्मणा वस्तुभिन्नवद्भाति।
तत्कथितमर्थचतुरैरालेख्य प्रख्यमिति काव्यं॥

क्वचित् तुल्यदेहितुल्यतया यथा—

अवानादौ कृत्वा भवति तुरगो यावदवधिः पशुर्धन्यस्तावत् प्रतिवसति यो जीवति सुखम्।
अमीषां निर्माणं किमपि तदभूद्गन्धकरिणां वनं च क्षोणीभृद्भवनमथवा येन शरणम्॥

अत्रार्थे—

प्रतिगृहमुपलानामेक एव प्रकारो मुहुरुपकरणत्वादर्थिताः पूजिताश्च।
स्फुरति हतमणीनां किन्तु तद्धाम येन क्षितिपतिभवने वः स्वाकरे वा निवासः॥

यदाह—

विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात्।
तत्तुल्यदेहितुल्यं काव्यं बध्नन्ति सुधियोऽपि॥

क्वचित् परपुरप्रवेशप्रतिमतया यथा—

यस्यारातिनितम्बिनीभिरभितो वीक्ष्यांबरं प्रावृषि
स्फूर्जद्गर्जितनिर्जिताम्बुदरवस्फारोऽभ्रवृन्दाकुलम्।
उत्सृष्टप्रसभाभिषेण न भयस्पष्टप्रमोदाश्रुभिः
किञ्चित् कुञ्चितलोचनाभिरसकृत् घ्राताः कदम्बानिलाः॥

अत्रार्थः—आच्छिद्याप्रयतः कदम्बकुसुमं यस्यारिवारैर्नवं
यात्राभङ्गविधायिनो जलभुवां कालस्य चिह्नं महान्।
हृष्यद्भिः परिचुम्बितं नयनयोः न्यस्तं हृदि स्थापितं
सीमन्ते निहितं कथञ्चन ततः कर्णावतंसीकृतम्॥

यदाह—

मूलैक्यं यत्र भवेत् परिकरबन्धस्तु दूरतोऽनेकः।
तत्पुरपरप्रवेशप्रतिमं काव्यं सुकविभाव्यम् ॥

यथोत्तरममीषां प्राधान्यम् ॥छ॥

पदेति—काव्यन्तरात् पदोपजीवनं यथा—

दूराकृष्टशिलीमुखव्यतिकरान् भो किं किरातानिमा—
नाराध्यावृतपीतलोहितमुखान् किं वा पलाशनिति।

पन्थाः केसरिणं न पश्यत पुरोऽप्येनं च सन्तं वने
मूढाः रक्षत जीवितानि शरणं याते प्रियां देवताम् ॥

यथा च—

मा गाः पान्थ प्रियां मुक्त्वा दूराकृष्टशिलीमुखम्।
स्थितं पन्थानमावृत्य किं किरातं न पश्यसि ॥

आदिशब्दात् पदादीनां उपजीवनं पादोपजीवनं, यथा—

गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा
द्वित्राण्येव पदानि तिष्ठतु भवान् पश्यामि यावत्मुखम्।

संसारे घटिका प्रवाहविगलद्धारा समे जीविते
को जानाति पुनस्त्वया सह मम स्याद्वा न वा सङ्गमः॥

यथा च—

हंहो स्निग्धसखे विवेकबहुभिः प्राप्तोऽसि पुण्यैर्मया
गन्तव्यं कतिचिद्दिनानि भवता नास्मत्सकाशात् क्वचित्।

त्वत्सङ्गेन करोमि जन्ममरणोच्छेदं गृहीतत्वरः
को जानाति पुनस्त्वया सह ममः स्याद्वा न वा सङ्गमः॥

पादद्वयोपजीवनं यथा—

तत्तावदेव शशिनः स्फुरितं महीयो यावन्नतिग्मरुचिमण्डलमभ्युदेति।
अभ्युद्यतेऽथहिमधामनिधौ तु तस्मिन्निन्दोः सिताभ्रसकलस्य च को विशेषः॥

यथा च—

तत्तावदेव शशिनः स्फुरितं मदीयो यावन्न किञ्चिदपि गौरि नरा हसन्ति।
ताभिः पुनर्विहसिताननपंकजाभिरिन्दोः सिताभ्रशकलस्य च को विशेषः॥

पादत्रयोपजीवनं यथा—

अरण्ये निर्जने रात्रावंतर्वेश्मनि साहसे। न्यासापह्नवते चैव दिव्या सम्भवति क्रिया॥

यथा चोत्तरार्धे—

तन्वङ्गी यदि लभ्येत दिव्या सम्भवति क्रिया।

पादचतुष्टयोपजीवने—

परिपूर्णं चौर्यमेवेति न तन्निदर्श्यते।

पदैकदेशोपजीवनं यथा—

नाश्चर्यं यदनाप्तिावस्तप्रीतिरयं मयि।
मांसोपयोगं कुर्वीत कथं क्षुद्रहितो जनः॥

कोपान्मानिनि किं स्फुरस्यतितरां शोभाधरस्तेऽधरः
किं वा चुम्बनकारणाद्दयित नो वायोर्विकारादयम्।

तत्त्वं सुभ्रु सुगन्धिमाहितरसं स्निग्धं भज स्वादरान्
मुग्धे मांसरसं ब्रुवन्निति तया गाढं समालिङ्गितः॥

उभयपजीवनं यथा—

ऊरुद्वन्द्वं सरसकदलीकाण्डसब्रह्मचारी। इति

यथा च—

ऊरुद्वयं कादलिकन्दलयोः सवंशं श्रोणिः शिलाफलकसोदरसन्निवेशा।
वक्षः स्तनद्वितयताडितकुम्भशोभं स ब्रह्मचारिशशिनश्च मुखं मृगाक्ष्याः॥

उक्तयो ह्यर्थान्तरसक्रान्तान् प्रत्यभिज्ञायन्ते स्वदन्ते च। नन्विदमपदेश्यमेव न भवति यदित्थं कथयन्ति।

पुंसः कालातिपातेन चौर्यमन्यद्विलीयते।
अपि पुत्रेषु पौत्रेषु वाक्चौर्यं न विशीर्यते॥१॥

इत्याशंक्याह—यथौचित्यमिति। अयमप्रसिद्ध, प्रसिद्धिमानहं। अयमप्रतिष्ठः, प्रतिष्ठावानहं, अपक्रान्तमिदमस्य संविधानकं प्रक्रान्तं मम। गुडूचीवचनोऽयं, मृद्वीकावचनोऽहं। अनादृतभाषाविशेषोऽयमादृतभाषाविशेषोऽहं। प्रशान्त-ज्ञातृकमिदं देशान्तरकर्तृकमिदं। उत्सन्नमिव बन्धनमूलमिदं। म्लेच्छितकायनिबद्धमिदमित्येवमादिभिः कारणे शब्दहरणार्थ-हरणं चाभिरमेतेत्यवन्तिसुंदरी। आहुश्च—

नास्त्यचौरः कविजनो नास्त्यचौरो वणिग्जनः।
स नन्दति विना वाच्यं यो जानाति निगूहितुम्॥

उत्पादककविः कश्चित् कश्चित्तु परिवर्त्तकः।
आच्छादकस्तथा चान्यस्तथा संवर्गकोऽपरः॥

शब्दार्थोक्तिषु यः पश्येदिह किञ्चन नूतनम्।
उल्लिखेत् किञ्चन प्राच्यं मन्यतां स महाकविः॥छ॥

इति श्रीवायटगच्छीय श्री जिनदत्तसूरि शिष्य पण्डित श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवचने परिमलनाम्नि छन्दोऽभ्यासस्तबकोल्लासी समासाद्यभ्यासप्रकाशनः सप्तमः प्रसरः ग्रं. ४९०।

हत्या माया याञ्चा तृष्णा इच्छा वांछा कांक्षा आशा ।
ईहा लिप्सा भिक्षा लञ्चा सेवा गोष्ठी सीमा मत्री ॥१०॥

आपन्मूर्छा दीक्षा खेला मेघा चर्या यात्रा ईड्या ।
अर्चा पूजा चर्चा ऊकः शाला पथ्या रथ्या वीथी ॥११॥

आली माला राजी लेखा संसत्सेना वीची धारा ।
वेणी वीथी श्रेणी श्रेतः प्रेंखा वन्ध्या प्रेक्षा प्रज्ञा ॥१२॥

श्रेयः प्रेयच्छाया ज्योत्स्ना ज्योतिर्ज्वाला स्पर्धा श्लाघा ।
व्रीडा क्रीडा स्वेच्छा श्रद्धा व्याख्या मूर्तिः स्फूर्जा व्यापत् ॥१३॥

लगौ बृहन्महल्लसद्वसन् मिलत् किल्लत् फुल्लत् ।
चलल्लुलल्लुलच्चरत् सरद्धरत् शुभद्भदत् ॥१४॥

दलद्गलन्नमत्यतद्वृथा सुधा मृषा मनाक् ।
अवगाधः पृथग्विनात्कृते अरे अये अहो ॥१५॥

अथो मिथः पुरः पुरा चिरा चिरं चिराद् बहिः ।
अरं शनैरलं भृशं सदासना पुनर्मुहुः ॥१६॥

स्फुरत् स्फुटत् ज्वलत् भ्रमत् त्रसत् त्रुटत् सखा स्खलत् क्षरत् ।
स्फुटं ध्रुवं स्वयं स्थिरं पुरो दया कृपा घृणा ॥१७॥

सदः सदा घटा चमू विभामहो मृजा यशः ।
कथा भिदा विपत् समित्कलातुला दशा रमा ॥१८॥

जतुस्ततुर्वपुः कथा शिखा वृषा सदृक् सुहृत् ।
स्पृहाद्यथा क्षुधा त्रपा त्वरा प्रभा क्षमा क्रिया ॥१९॥

गोलासारं तारं रुच्चं हृद्यं मुख्यं वामं रामम् ।
अग्र्यं मन्दं सान्द्रं भद्रं पुण्यं धौतं पूतं ॥२०॥

सौम्यं रम्यं काम्यँ धाम्रं कान्तं भव्यं नव्यं वर्यंम् ।
धुर्यं हारी चारु वल्गुः साधुर्मञ्जुर्जात्यः ॥२१॥

पूर्वाद्याद्या अन्त्यो भूरिः सत्यं नित्यं पूर्वं सर्वम् ।
विश्वं कृत्स्नं निम्नं तीव्रं तीक्ष्णं चण्डं चोष्णं काम्यम् ॥२२॥

शुक्लः शुभ्रः पाण्डुर्गौरः शोणो रक्तः पीतः पिङ्ग ।
बभ्रुः कद्रुः कृष्णः कालो नीलो धूम्रः काम्रो लोलः ॥२३॥

धीरो वृद्धो बालो डिम्भः पीनः पीनागाढो बाढः ।
उच्चस्तुङ्गो लम्बो दीर्घः शीर्णस्तूर्णो वक्रो भुग्नः ॥२४॥

ऊनं दूनं लूनं नूनं भग्नं मग्नं लग्नं नग्नः ।
उप्तं नुन्नं क्षुन्नं सन्नं छन्नं भिन्नं खिन्नं छिन्नं ॥२५॥

क्लिन्नं स्विन्नं म्लानं ग्लानं लीनं हीनं दीनं डीनम् ।
कीर्णं तीर्णं जीर्णं शीर्णं चीर्णं दीर्णं रुग्णं भग्नम् ॥२६॥

धूतं भूतं द्रुतं स्यूतं पीतं पीतं सीतं दीतं ।
वीतं क्रीतं भीतं ज्ञातं घ्रातं त्रातं ख्यातं ध्यातम् ॥२७॥

आत्तं नृत्तं कृत्तं वृत्तं मुक्तं भुक्तं त्यक्तं व्यक्तम् ।
रक्तं सिक्तं व्याप्तं व्याप्तं तप्तं सिप्तं क्षिप्तं लिप्तम्। ।२८॥

सुप्तं लुप्तं गुप्तं ध्वस्तं श्रस्तं त्रस्तं ग्रस्तं न्यस्तम् ।
नद्धं बद्धं दग्धं लब्धं स्तब्धं मुग्धं स्निग्धं ॥२९॥

युद्धं रुद्धं क्रुद्धं विद्धं मूढं रूढं गूढं व्यूढम् ।
प्रष्टं दष्टं भ्रष्टं स्पष्टं पिष्टं श्लिष्टं क्लिष्टं द्विष्टम् ॥३०॥

दुष्टं कुष्टं मृष्टं पृष्टं सृष्टं दृष्टं स्पृष्टं वृष्टम् ।
पुष्टं जुष्टं रुष्टं पुष्टं प्लुष्टं रीणं ह्रीणं क्षीणम् ॥३१॥

कुण्ठं वंदश्चेटौ दासौ भृत्यो वश्यः क्षामः श्यामः ।
वामो दुरथः प्रेष्यद्वेष्यौ शौष्यः पोष्यस्तुच्छ स्वल्पो दभ्रो ह्रस्वः ।
कभ्रो नम्रः खर्वो नीचः कुब्जः पङ्गुरक्षुद्रो सीरः स्तन्यग्राम्यौ सूक्ष्मो जिम्हः ॥३३॥

मन्दे तिद्यो मोघः फल्गु रुक्षो लक्षः प्राढ्य प्रौढ । क्षीव स्थूल स्वादु स्निग्ध श्लक्ष्णव्यक्त क्षारां कूरं ॥३४

श्वेतं ख्यातं स्थास्नु स्थायि स्वच्छा स्मेरं प्रोत स्यूतम् ।
प्रांशु व्यूढं स्फारं स्फीतं श्रेष्ठं ज्येष्ठं श्रेष्टं प्रष्टम् ॥३५॥

अन्या जातं व्रातं जातिर्वंशः कोशो गात्रं वर्गः ।
ग्रामः पूगः पुरः पंक्तिः मुञ्जो राजिश्चक्रं सैन्यम् ॥३६॥

आलिः पालिर्जालं यूथं भारो वारः कूटं कोटिः ।
पृथः संघो वेणि श्रेणिर्गुच्छो गुंछः सार्वभौमौ ॥३७॥

ऊर्मिर्वीचि वृन्दं व्यूहं स्कन्धो राशिर्लक्षं पक्षः ।
पूर्त्ति स्फूर्त्ति व्यासन्यासौ रूढिः प्रौढिः स्फाति स्फान्ती ॥३८॥

अंशौ रश्मिर्भानुः कान्ति दीप्ति धाम द्योतद्युम्नौ ।
तुल्यं कल्यं शीलं रूपं प्रक्षं प्रह्वं प्रायं भूतम् ॥३९॥

अङ्गं मूर्त्तिर्गात्रं कायं देहः पिण्डं धर्मो बन्धुः ।
कुल्यं केलिः साम्यं मैत्र्यं शिष्यः शत्रुर्वैरी वैरम् ॥४०॥

द्वेषो रोषः सादः खेदः शोकः कोप क्रोधौ ।
मौर्ख्यं मौढ्यं दैन्यं मोहः कोपः कामो भोगो दण्डः ॥४१॥

गन्धः पाको गर्वो दर्पस्तोको हर्षस्तत्त्वं मानः ।
सामस्त्योऽत्र श्लोकः शीमाभङ्गो नाशः पेषो भेषः ॥४२॥

भ्रंशध्वंसौ भेदच्छेदौ क्ष्वेदश्लेदौ भ्रांतिः श्रान्तिः।
च्युतिस्तम्भौ ग्लानिम्लानि ग्रासत्रासौ भीतिक्षोदः ॥४३॥

आधिव्याधी रोगक्लेशौ ग्राहद्रोही युद्धं राटिः।
आजि विघ्नं घूर्णिर्वेगः क्रोडः स्वापौ पुण्यं भाग्यम् ॥४४॥

प्रेम प्रीति स्नेहश्छन्दा स्वास्थ्यं नर्मज्ञानं सर्गः।
ऋद्धिः वृद्धिः सिद्धिर्बुद्धिः शान्तिः शक्तिः स्वादो भोगः ॥४५॥

मार्गौ वर्त्म प्राणो ऊर्जः शिल्पं गुम्फो वृत्तं भावः।
बीजं हेतुर्योनिर्जन्म स्थानं खानिर्देशो वेश्म ॥४६॥

सौधं धिष्णं धर्म्यं गेहं धामक्षेत्रं भूमिः सद्म। षट्पदी
अत्र तत्राढ्यश्लिष्यै सैष तेनाङ्गनाम च।
असुहं तता तजा तु दुष्टस्तुष्टा गुमंक्षु च ॥४७॥

ललौ कलं शुभं शिवं नवं परं वरं पटु।
सुखं श्रुतं स्मितं स्थिरं प्रियं घनं दृढम् ॥४८॥

अणु सूनु कृशो लश्चरश्चलत्रस श्लथा। उरुर्गुरुः पथुस्ततो विभुः प्रभुः क्षमो मृदुः ॥४९॥

ऋजुर्जस्ज बुधः खरः शरो हरिः सितः शितिः।
अरिः परो रिपुः शठः खलो विटः सखा मतः ॥५०॥

शिशुर्युवा नतो हतः क्षितो जितो हितः सितः। दुतो धुतो हुतो द्रुतश्च्युतो घृतो सृतः द्रुतः ॥५१॥

पुरो रुचि छविस्त्विषि द्युतिर्वृतिः कृतिर्भृति। रविर्मतिः स्थितिर्नुति स्तुति स्मृतिर्दुतिर्धुतिः ॥५२॥

हृतिर्मतिर्वधव्याधौ व्ययः क्षयो जयः भयं। दरं भटो नटः समं निभं सभं भ्रमो भ्रमिः ॥५३॥
तनुर्लिपिर्गुणः पणो कणो लवः श्रमक्लमौ। बलं रणं मृधं ततिर्गणश्च यो भरो व्रजः ॥५४॥

मिषं छलं समयः क्रमो व्रतं रयत्वथि प्लवा। जवो रवस्तरो लयो वलं फलं परः वरः ॥५५॥

हसो मतः कुलं कुटं गृहं सदः खनिर्जनिः। हिमो वहिर्महिः स्फुटं वताप्युत विभु ध्रुवम् ॥५६॥

गोगो गोविक्रीडद्विस्फूर्जत् प्रोन्मीलत् संखेलत् प्रोत्सर्पत् सरङ्गत्।
प्रोन्माद्यद्विक्षुभ्यद्वित्रस्यत् संमुह्यत् स्वल्पी यो वर्षीयो नेदीयो विस्पष्टम् ॥५७॥

सारम्भं साटोपं साराग्यौ मर्मसृक् शुश्रूषा जागर्या मर्यादा आपृच्छा।
वैचित्रा वैदग्धी संध्रीवी सोत्कण्ठं सोत्साहं सानन्दं निर्भत्सा संतर्जा ॥५८॥

कृत्वा यो मा यत्र स्युः स्या त्वलकल्याण लगौ उदं च द्विरं च
द्विराजन् मृरङ्गद्विसर्प द्विमुह्य गरीयो वरीयो दवीयो जवीयः कनीयो लघीयः ॥५९॥

अणीय क्रशीय पुरोगाः प्रतिज्ञा प्रतिष्ठा प्रशंसा जिगीषा अवेक्षा।
अभिक्षा विभूषा मनीषा समीषा पिपासा तितिक्षा चिकित्सा विभर्त्सा ॥६०॥

यदृच्छा जुगुप्सा तिरोधा प्रमीला पुरस्तादधस्तादकस्माददृश्यम्।
अभीक्ष्णं नितान्तं निकामं समन्तादवश्यं प्रकाशं विपश्चिद्वयस्याः ॥६१॥

चतुर्भिर्यकारै र्भुजङ्गप्रयातं गोलगावल्लसद्विस्फुरद्विस्फुटत् प्रस्फुरत प्रोल्लसत् ।
स्वस्तिमद्विलसद्विद्रवत् प्रद्रवत् मत्सरी दुर्मना अग्निमा इदिनरासेमुखी चेतना ।।६२।।

वर्णना धारणा संश्रया स्थापना जागरा भावना वासना अर्चना ।
आसिका याचना वाचना प्रक्रिया सत्क्रिया क्रीडना चर्चरी चिर्भटी ।।६३।।

भूमिका वर्तिनी शालिका विक्रिया भर्त्सनी गर्हना व्रीडना पीडना ।
ताडना वंदना वेदना मार्जना शंसना त्रासना चौरिका हासिका ।।६४।।

आवली मालिका मण्डली राजिका श्रेणिका... धारणी वाहिनी ।
अग्रतः सर्वतः सर्वदा सर्वथा सन्ततं निश्चितं शीघ्रतः क्षिप्रतः ।।६५।।

वेगतः सत्वरं अन्तरं अन्तरे अन्तरा उच्चकैरञ्जसा साम्प्रतम् । षट्पदी
सम्मता स्रग्विणी रैश्चतुर्भिर्मता ललगा उदयद्विलसद्विकसत्सु मिलत्सु ।
ललद्विहसद्विभवत् प्रभवत् प्रसेसत् प्रललत् प्रवर द्विदलद्विगलद्विनमभिपतत् ।।६६।।

प्रणमत् प्रतपत् पुरतः प्रमना अधिभूर्द्विषणा प्रतिभा कमला ।
महिला तुलना समता निभता उपमा प्रतिमा भगिनी सवयाः ।।६७।।

अभिधा सुरवा कुहना करुणा कलिका कणिका पटली परिषत् ।
पृतना ध्वजिनी लहरी रचना घटना पदवीदलना व्यवधा ।।६८।।

अनिशं शनकैरसकृत् समया निकषा सहसा रभसादधुना । षट्पदी
इह तोटकमम्बुधिसैः प्रथितां गो गोलो रोचिष्णुः भ्राजिष्णुः

प्रोत्फुल्लः संफुल्लो व्याकोशो सद्यस्कः प्रत्ययः ।
निस्सीमश्चाश्रुष्यो निष्णातः प्रोल्लासावुद्दामस्वच्छन्दा उन्निद्रः ।।७०।।

विस्तीर्णो नीरन्ध्रः प्रोत्तानः सापेक्षः प्रोद्गाढप्रोल्लाघावूर्द्धजुर्निनिडः ।
अन्यतो मूर्यष्टि द्राघिष्ठावुत्पन्न प्रोन्द्भूतौ सञ्जातो निद्रालुस्तन्द्रालुः ।।७१।।

निद्राणो निर्वाणव्यापन्न प्रक्षीणा मूर्च्छालः सोमालोऽश्लिष्टाऽश्लीलाश्लाघाः ।
ग्रासीणः सामान्यो माञ्जिष्ठः कर्मार कल्मषो विक्षिप्ता व्याधूतो निर्धूतः ।।७२।।

अन्विष्टः संक्लिष्ट व्याकृष्टावुत्सृष्टो निर्मिष्टो वित्रस्तोऽथाग्रस्था व्युत्पन्नः ।
प्रज्ञालो मेधावी चिद्रूपो दोषज्ञो वाचालो जल्पाको जिह्वालाः ।।७३।।

लुम्पाको लम्पाको लुण्टाको जङ्घालो वाहालः श्रद्धालुः पारीणो वर्द्धिष्णुः ।
इर्ष्यालुर्निस्त्रिंशः संकीर्णव्याकीर्णौ संसक्तः संवीतः पाश्चात्यः पौरस्त्यः ।।७४।।

अष्वन्यो गम्भीरो स्ताघास्ताघैकाग्रा एकान्त प्रह्वालावुल्लोलः संनन्वः ।
संरब्धप्रक्षुब्धी संकाशो नीकाशः प्रत्यर्थी विद्वेषो प्रद्वेषौ मात्सर्यम् ।।७५।।

औपम्यं पार्थक्यं सादृश्यं सौहार्द्रं सौन्दर्यं सौहित्यं सौभाग्यं सौरभ्यं ।
सौडीर्यं शौण्डीर्यं प्रागल्भ्यं दाक्षिण्यं नैकट्यं दारिद्र्यं कार्पण्यं कारुण्यं चारित्रम् ।

औत्सुक्यं भैषज्यं प्राचुर्यं चातुर्यं दक्षत्वं धीरत्वं वीरत्वं शूरत्वं ।
अभ्यासा अभ्यग्राभ्यर्णासन्ना आलापः संभाषः प्रत्युत्यूहावुत्पातः ॥७७॥

निर्वातो निर्वादः प्रस्थानं कल्याणं
संग्रामो विक्षेपः संहारः संवर्त्तः ।
आक्रोशव्यत्यासावन्तर्द्धिनिस्तारः प्रध्वंसः प्रच्छेदः प्रक्षेपः प्रम्लानिः ॥७८॥

आहारो निक्षेपः संग्रामो निर्वेदः
संवेगो वैराग्यं संवित्तिः सम्पत्तिः ।

आवर्तः संक्षेपः सन्तोषः पर्याप्तं
निर्वृत्तिस्तूष्णीकं निष्ठीवं मन्दाक्षः ॥७९॥

सन्देहो रोमाञ्चः सम्भोगः संयोगः
संश्लेषो विश्वासः संस्कारः संकल्पः ।
आगारा वासाधारोत्सङ्गात् संस्त्यायः निःश्रेणिः सन्दोहः संपातःसङ्घातः ॥८०॥

सन्तानः सम्भारः प्राग्भारौ सन्दर्भः
कल्लोलः प्रस्ताराबाभोगो विस्तारः ।
व्यापारो रोहेयो माच्छ्रायव्यायामा
उन्मेषोत्कर्षोन्मादाम्नाया आकूतम् ॥८१॥

आचार्याल्हादा मोदानन्दा आवशा
वगोद्रेकाटोपाः संरम्भः संहर्षः ।
निर्बन्धः सम्बन्धस्तत्कालं सद्योऽपि
वेगेन क्षिप्रेणाह्नायैकत्रे वर्ति ॥८२॥

कल्याणं लगौ लो मनोज्ञं वरेण्यं
वरिष्ठं पराद्धर्यं पुरोगं प्रशस्यम् ।
प्रधानम् प्रवेकं प्रवर्हं प्रकृष्टं
प्रवीणं प्रगल्भं प्रवृद्धं विशुद्धं प्रसन्नम् ॥८३॥

उदग्रं यविष्टं दविष्टं गभीरमगाधं प्रतीतं पवित्रं शुभंयुः ।
अजिह्मं प्रबुद्धं नवीनं तनुत्वं विनिद्रं विशुद्धं प्रफुल्लं विकाशि ॥८४॥ भुजङ्गप्रयातम्

समग्रमशेषं समस्तमखण्डं प्रभूतमदभ्रं विशालमपराम् ।
सुगन्धिवलक्षं कडारपिशङ्गे तुषारनिदाघे कदुष्णकवोष्णे ॥८५॥

अहंयु निशातं चरिष्णु भविष्णु पुराणं मरालं शरारु कदर्यम् ।
निकृष्टमवद्यं निखर्वदरिद्रौ कनिष्टभुजिष्यौ विधेयनिधेयौ ॥८६॥

निलीनविलीनौ विलक्षविहस्तौ प्रशान्तमतीतं व्यलीकमलीकम् ।
निरस्तविधूत निरुद्ध . . . पिम(न)द्धनिबद्धप्रलूननिपीताः ॥८७॥

अमुक्तम् ।

अथाग्न्या अभिज्ञो मनीषी विदग्धो वदान्यो महेच्छप्रचण्डामुदारः ।
सहिष्णुस्तितिक्षुः कृपालुर्दयालुः सपत्नो विपक्षो विरोधी जिघांसुः ॥८८॥

अरातिः प्रतीपो जिघित्सुः पिपासुर्विवादो विरोधः प्रयाति प्रयाणम् ।
निरोधो निषेधो निबन्धो निरासो निशुम्भो निषेष प्रपेष प्रमोषाः ॥८९॥

निकारो विडम्बः प्रवासः प्रधानं वियोगो निमेषो नियोगो निदेशः ।
विलापप्रलापौ विषादप्रमादौ निदानं निमित्तं वितर्को विवेकः ॥९०॥ भुजङ्गप्रयातम्

स्वरूपसरूपौ स्वभावसदृक्षौ प्रकाशसमानौ प्रकारसनाभी ।
सहायवयस्यौ सदस्यसतीर्थ्यौ सगर्भ(र्भो)सपिण्डौ स्वभावशरीरे ॥९१॥ अनुक्तम्

विचारो रहस्यं चरित्रं प्रधानं विलम्भो विलासो विभूतिर्विभावः ।
प्रभावप्ररोहप्रधानप्रहासाः प्रबोधप्रपञ्चप्रसारप्रवाहाः ॥९२॥

प्रचारप्रसादप्रहर्षप्रकर्षप्रतापप्रवेशप्रदेशा निवेशः ।
प्रसूतिः प्रवृत्तिः प्रशक्तिः प्रपूतिः प्रयाम प्रमोद प्रकाण्ड प्रचण्डाः ॥९३॥ भुजङ्गप्रयातम्

समूहः समाजे कदम्बकलापे प्रतानविताने निकायगुलंच्छे ।
अनीकातरङ्गप्रबन्धनिबन्धा सदेशसनीडे समीपमुपान्तम् ॥९४॥

निदेशनिवासौ निशान्ता निशाये निकाममजस्रं प्रकाममव्यक्तम् ।
नितान्तमतीव प्रसह्य रवेण क्षणेन जवेन क्रमेण किमुत ॥९५॥ अनुक्तम् ।

उत्ताहचिरेण चिराय चिरस्य उपांशु सदैव सदापि कदापि ॥९६॥ गायत्र्यामनुक्तम् ।

गोललौ भासुरो भासुरं सुन्दरं बंधुरं मंजुलं पेशलं शोभनम् ।
उत्तमं सत्तमं पावनं नूतनं मांसलं तुंदिलं पीवरं पुष्कलम् ॥९७॥ स्रग्विणी

अंशलमायतमुच्छ्रितमुन्नं वंशास्वतमुत्तरमुद्धरमुद्धतम् ।
अद्भुतमुत्कटमुद्भटमुल्बणं निर्मलमग्रिममादिमादिमम् ॥९८॥

प्राञ्जलकोमलनिस्तुषसम्मताः सन्ततिसङ्गतसंहतिसंहताः ।
विस्तृतनिश्चितसुस्थितनिश्चला वल्लितवेपितगर्वितर्तेजिताः ॥९९॥ जगत्यामनुक्तम् ।

त्रासितो नासितो मन्दितो मुद्रितो यन्त्रितो भस्मितश्चूर्णितो घूर्णितः ।
अग्रिमा पण्डितः कोविदो दक्षिणाः कर्मठो निष्ठुरः कर्कशस्तर्कुकः ॥१००॥ स्रग्विणी ।

क्रोधनकोपनरोषणतस्कारा लोलुभलोलुपलंपटलालसाः ।
अस्थिरचञ्चलकम्पनसत्वराः उत्सुकभीषणभैरवदारुणाः ॥

अथ सामान्यशब्दस्तबकः । **श्री संसदमित्यादि रम्यमित्यादि**—अनयोः मद्वन्द्वं गौ विद्युन्माला । सदेत्यादि—जरौ लगौ प्रमाणिका । निःशङ्कमित्यादि—अत्र मद्वन्द्वं सावित्री । प्रौढमित्यादि—अत्र मौ तारा सपदीत्यादि । अत्र स्यन्दनः । नितान्तमित्यादि अत्रापि केशः । उदीच्यादि—अत्रानुक्तम् । सर्वदेत्यादि निश्चितेत्यादि—अनयोः रोमृगी । रे यादवेत्यादि । अत्र पथ्यावक्त्रम् । हिलत्वसवाचि यादि । अत्र प्राभाधिकारयेणेत्यादि गायत्र्यामनुक्तम् । रयादेवेत्यादि । अत्र वक्त्रम् । श्रीरित्यादि ।

अत्र विद्युन्माला। उत्तानेत्यादि शोभाढ्येत्यादि सच्छोभेत्यादित्रिष्वेषु नारी। प्रवरश्लोकमित्यादि—अत्र धनपङ्क्तिः। स्मौ ग्मे गना इत्यादि—अत्र रोगगौ प्रतीतिः। उदञ्चितच्छाय इत्यादि—अत्रोपजातिर्जगत्यामनुक्तैः। समुल्लासितेदित्य विभेत्यादि—अनयोर्वक्त्रम्। सर्वेत्यादि प्रौढेत्यादि—अनयोर्वक्त्रम्। रत्नादित्यादि—अत्र प्रामाणिकाभोभागित्यादि। अत्र सविमला स्फुरेत्यादि—अत्र प्रामाणिका। सर्वदेत्यादि—अत्र स्रग्विणी मञ्जुलस्थितिरित्यादि। अत्र लाविदग्धकः। विमलेत्यादि रुचिरेत्यादि त्रिष्वेष्वनुक्तम्। सुन्दरेत्यादि—अत्र जगत्यामनुक्तम्। रोचिरित्यादि विभवदित्यादि—अनयोः विपुला समयोः पादयोः स्याल्ल सप्तमो, विपुलत्वेऽसौ सैव तस्य चतुर्वलः। दीर्घेत्यादि—दीर्घ एकाक्षरमादि प्रयोज्यमन्तःप्रयोज्यम्। तद्यथा द्विधा—ह्रस्व एकाक्षरमादि प्रयोज्यं, अन्तःप्रयोज्यं चेति द्विधा। अक्षरद्वन्द्वस्य प्रस्तावतो दीर्घौ १, ह्रस्वदीर्घौ २, दीर्घः ह्रस्वौ ३, ह्रस्वौ चेति चतुर्विधत्वं आद्यन्तप्रयोज्यत्वेनाष्टविधत्वम्। मयौ रसौ तजौ भनौ स्युरष्टौ वर्णगणास्त्रिकाः। आद्यन्तप्रयोज्यत्वे नैकैको अपि द्विधा। आदिप्रयोज्यशब्दानामन्त्येस्वब्धाग्प्रादि शब्दप्रयोगादन्त्यप्रयोज्यशब्दाः ज्ञेयाः। एवं क्रमेण सर्वच्छन्दसां सिद्धयर्थमेकाक्षरादिकाः सामान्यशब्दाः सन्तव्याः लिख्यन्ते यथा—

दीर्घह्रस्वाक्षरं द्वन्द्वगणप्रस्तारतः क्रमात्।
कवितावल्लिबीजानि शब्दान्साधारणान्ब्रुवे ॥१॥

गः श्रीससतत्तदुत्तादा श्राद्रागथ भारुचौ भाभृत्।
कृभूवत् मत्पृष् पुष् मृष् द्रुश्रीधीमुदः श्री त्विट् ॥२॥

चुत्कुधह्रीर्लः सुविनिहि च प्रस्थोधकृजगस्वस्थाः।
त्वा गौ ईदृग् दृग् भारचयद्भूयांसि रंगद्युन्तौ ॥३॥

खेलद्बलाद् ह्रुष्यन्नुत्पत्वं वहीव्यभ्राजन्मूर्च्छन्।
लुम्पद्विभ्यन्मीलन्मुह्यन्नश्यच्छीर्यन्नीर्ष्यन्मिश्या ॥४॥

श्रद्धा शश्वश्चित्यं कामं नूनं सत्यं तथ्यं किञ्चित्।
उच्चैर्विष्वक् तूर्णं शीघ्रं दूरे दूरे दूराद्दूरात् ॥५॥

आहो आविर्नाशाभूयः सद्योन्तर्हिष्टयोर्द्वि हंहो।
सम्यक्क्वचित स्पष्टं स्वैरं प्रायः प्रेय स्थेयः श्रेयः ॥६॥

ज्यायः श्रीमत्क्रीडत् प्रेंखत् स्मेरत् प्रोद्यत् स्फूर्जत्प्रोञ्चत्।
ग्लायन् म्लायन् क्लिश्यन् क्षुभ्यन् त्रस्यन् न्यञ्चत् भ्रस्यत् श्च्योतत् ॥७॥

अग्रे आभ राढा सम्पल्लक्ष्मी शोभा लीला हेला।
अर्चिर्वर्चो रोचिः शोचिस्तेजः कीला कक्षामात्रा ॥८॥

आस्था संस्था सञ्चन्निष्ठा ईर्ष्या लज्जा पीडा बद्धा।
बाधा निन्दा गर्हा कुत्सा निद्रा शंका चिन्ता हिंसा ॥९॥

आतुरयद्वदकद्वददीक्षिताः अध्वग पान्थिक बन्धव सज्जनाः।
अग्रजसोदरभस्मरसन्निभाः अन्वय उद्यम कारणजागराः ॥७॥

आश्रमसंश्रव सौहृदसंमदा उत्सवमङ्गलजीवननिष्क्रियाः।
भोजनलक्षण गौरवनिश्चयाः आशयनिर्णयनिर्वृतिवल्लभाः ॥जगत्यामनुक्तम्॥

यौवनं पौरुषं विक्रमः कौतुकं नाटकं दर्शनं चापलं वेपथुः।
अत्ययः संशयः साध्वसं मत्सरः संक्रमः व्युत्क्रमौ सङ्क्रमप्रक्रमौ ॥९॥

संश्रयसंश्रवौ मेलकः कार्मणं विभ्रमः सम्भ्रमो विस्मयः पीडनम् ।
इङ्गितं निष्क्रमो व्यञ्जनं विप्लवः संप्लवो जृम्भणं प्रेषणं प्राञ्चनम् ॥१०॥

रिषणं घूर्णनं श्रंथनं ग्रन्थनं शोचनं चर्चनं वर्जनं तर्जनम् ।
ताडनं पीडनं भर्त्सनं वञ्चनं कल्पनं कर्त्तनं त्रासनं नाशनम् ॥११॥

अर्पणं लम्भनं पर्ययो निर्जयः शासनः सूदनो घातको जित्वरः
आहवो विग्रहः सङ्ग्रहः सङ्करो राजितं मण्डितं शोभितं भासितम् ॥१२॥

एधितं वर्धितं साधितं सन्धितं बाधितं भावितं चेष्टितं वर्मितम् ।
आवृतं संवृतं निर्वृतं संसृतं पूरितं पूजितं निस्तुतं शंसितम् ॥१३॥

आचितं संञ्चितं प्राञ्चितं स्फूर्जितं भ्राजितं द्योतितं क्रीडितं प्रेंखितम् ।
आकुलं संकुलं संकटं संप्लुतं मन्दिरं कुट्टिमं भाजनं काननम् ॥१४॥ स्रग्विणी

आश्रय आकर उत्कर सञ्चयावृच्चयमण्डलपेटकगुच्छकाः ।
आवलिपतिसंहति सन्तति धारणि सारणि सन्निधि अन्तिकम् अनुक्रमम् ।

एधित वर्द्धित साधित सन्धित बाधितं भावितं चेष्टितं व.मतम् ।
द्रागपि किञ्चन कश्चन काचन स्नागपि सम्प्रति थागिह द्रागिह ॥१६॥गायत्र्यामनुक्तम्

ललला रुचिरं प्रवरं मधुरं प्रमुखं प्रगुणं प्रकथं विकथम् ।
अमलं विमलं बहुलं मृदुलं तलिनं सुषमं विशदं सुनयम् ॥१७॥

अधिकं पृथुलं विपुलं विततं विकटं निबिडं विविधं प्रचुरम् ।
अखिलं निखिलं कलिलं तरुणं प्रकटं निशितं त्वरितं स्फुरितम् ॥१८॥

प्रथितं स्तिमितं लुलितं कलितं विधृतं निभृतं हसितं कसितम् ।
क्षुभितं चकितं गणितं मितत विदुतं विधुतं विफलं वितथम् ॥

कपलं पिशनं अनृतं वृजितं[1] हसितं उचितं निचितं भरितं ।
गुणितं स्फुरितं स्फुटितं मुदितं विदितं ॥१९॥

अरुणं धवलं हरितं कपिशं कपिलं शबलं कलुषं मलिनम् ।
असितं मिलितं सरलं शिथिलं तरलं चपलं चटुलं जवनं ॥२०॥

अलसं परुषं कठिनं जरठं विरलं स्थपुटं कुटिलं विषमम् ।
अधमं चरमं कृपणं हसनं स्थविरं लवणं शिशिरं सुरभिः ॥२१॥

दलितं स्खलितं वलितं ललितं तुलितं प्रहितं पिहितं पतितम् ।
विजितं मथितं कथितं मुषितं स्थगितं दरितं प्रथितं स्तिमितं ।
लुलितं कलितं विधृतं निभृतम् हसितं कसितं[2] क्षुभितं चकितं ॥२२॥

गणितं मिमितं विदुतं विधुतं विफलं वितथं कपलं पिशुनम् ।
अनृतं वृजिनं दुरितं पुलिका दहितो भृतकस्तृषितः पथिकः ॥२३॥

---

१. 'क्षुभितं . . . वृजितं' इदं दे.प. मध्ये नास्ति ।
२. 'लुलितं . . . कसितं' इदं दे.प. पुस्तके नास्ति ।

पुरतो विदुरः कुशलो निपुणश्चतुरो मुखरः स्वजनो जननः।
उदयः प्रसरः प्रमदः प्रवणो विषयो विभवश्चरितं सहजः॥२४॥

पटलं निवहो निचयो निकरः प्रकरो विततिः प्रचयः प्रततिः।
स्तवको लहरिः प्रवहः शिबिरं कटकं सविधिर्निकरम्. . .॥२५॥

अजिरं समरं प्रधनः कलहः समितिः सदृशं डमरं निधनम्।
सदनं भवनं निलयः शरणं वसतिः शयनं गहनं विपिनम्॥२६॥

हसनं शमनं कदनं लपनं व्यथनं व्यसनं छदनं . . .।
स्फुटनं स्वदनं विरहो विजयो व्यवधिः प्रणधिः प्रथिमः स्मरणः॥२७॥

अयनं गमनं निगमः समयो नियतिर्नियमः प्रकृतिश्चरमम्।
अवधिर्द्वयसं प्रमितिर्मुकुलं कुसुमं स्तबको मुकुरः कुतुकम्॥२८॥

इह तोटकमम्बुधिसैः प्रथितं-अहह सपदि झटिति कटरि क्वचन किमपि किमन्'
अनिशमनुचरभस उपरिप्रसभ इह हि अपि वदति च॥२९॥

अत्र ह्रियमिति जगुरिह नर्भसैः। एकाक्षराः॥छ॥ एवं त्र्यक्षरा

अथ चतुरक्षराः—

शकः कार्यो माद्गश्चारुदं वल्लीलोत्मीलद्वल्गूबलात्।
उच्चैरञ्चत् हृद्यप्रोद्यत्स्फार स्फार्जत् प्रौढ प्रेंषन्॥३०॥

अभ्युत्तिष्ठच्चाग्रे योज्यो रोचिष्णु श्रीश्चञ्चद्रोचिः।
उद्दामश्रीः संकाशश्री प्रेङ्खल्लक्ष्मी स्फूर्जच्छाया॥३१॥

अनयोर्विद्युन्माला। अथो योगः समुन्मीलत्पटत्सर्पत् परिक्रीडत्.
अभिस्फूर्जत् परप्रेंखनचोंदचत् स्फुटं स्फुर्जत्॥३२॥

पुरो योज्या वरेण्यश्रीर्लसल्लक्ष्मी स्फुरल्लक्ष्मीः।
चरद्रोचिः शुभच्छायो महाज्योतिः प्रसर्पित्विट्॥३३॥

समानश्रीः सदृक्षश्रीः सदृल्लक्ष्मीः सदृक्कान्तिः।
प्रतिच्छाया प्रतिप्रेक्षा महावीथी परप्रज्ञा॥३४॥

एषु वक्त्र

रोगद्योगश्चारुचञ्चच्चङ्गरङ्गद्वल्गुबलात्।
नव्यद्दीव्यद्दीप्रदृप्यत् सा रराजन्मुख्यलेखत्॥३५॥

ज्येष्ठप्रसर्पत् प्राग्रजाग्रचाग्रयोज्या वर्गलक्ष्मीः।
तुल्यालक्ष्मीरानुपूर्वी सुंदरश्रीरंकपाली॥३६॥

सगणो गः
परिसर्पन्नवदीव्यद्विकटोद्यत् अभिचञ्चद्वररङ्गस्फुटत् प्रसपत् प्रकटोद्यतः॥३७॥

पुरतः स्थावरलक्ष्मी वराह लावारिवश्या। परिचर्चा सदृशश्रीरनुकम्पा शुभशोभा॥३८॥

तोगस्तथा मारस्फुरत् हृद्योदयत्कामं चरत्स्वेष्वविताने। अथो जगौ सदोदयत् परिस्फुरत् परिस्फुटन् समुल्लसमुन्मिषत् स्फुरत् स्मितोदयत् ॥३९॥

पुरस्थिता प्रगल्भता प्रसादना पुरस्क्रिया।
उपक्रिया नमस्क्रिया तिरस्क्रिया विडम्बना ॥४०॥

अपत्रपा विचारणा नियोजना वियोजना।
अनीकिनी पताकिनी वरुधिनी परम्परा ॥४१॥

मतल्लिका मनीषिता प्रधानता महायता।
अनारतं निरन्तरं समन्ततः परस्परम् ॥४४॥

चतुर्येषु प्रमाणिका भोगुरश्रोतार चलत्नविहल्लोलमिलत्।
संविहरत् संविकसत् स्फारलसत् प्रौढलसत् ॥४५॥

अग्रगता एकपदी संघटना कोविदता।
आवलिका मण्डलिका धारणिका उत्कलिका ॥४६॥

अनयोर्मणिवकं यैर्भूलगाः---

नगणगौ नवलस दृढामिलत् परिचरत्।
अभिलसद्बहु हसत् प्रविचरत् स्फुटलसत् ॥४७॥

प्रविकसत् प्रविदलत् प्रतिलुलत् पुर इताः।
मधुरता रुचिरता वदुरता प्रवणता ॥४८॥

माल्लोऽप्यत्र सारस्फारश्चञ्चच्चारुरङ्गच्चङ्गौ।
सम्यग्वम्यजाग्रत्प्राग्रौ कामोद्दामदीव्यत्सद्यौ ॥४९॥

लीलोन्मीलहेलोल्लासौ चेतो हारि सज्जोहृद्यौ ॥
दृप्यद्दीप्ति वल्गद्वल्गौ खेलत्कारितकान्तिवान्तौ ॥५०॥

अत्युत्तालं उद्यद्वृद्धः सर्पद्दर्पनव्यसूच्यौ।
अभ्युल्लासि भास्वद्भूरी शोभाभाजि सम्यक्काम्यौ ॥५१॥

पञ्चस्वेषु वितानां प्रेंखत्तारस्मेरोद्दामत् क्रीडन्नव्यच्चङ्गत्तुङ्गाः :
स्फूर्जद्वर्जं स्पष्टं प्रज्टोत्कृष्ट प्राग्रोदग्रा . . .॥५२॥

नानारूपश्रेयो रूपाबग्रे योज्याश्चाकच्छायः।
स्फारश्रीकः प्राप्यच्छायः प्रेक्ष्याप्रेक्षो लक्ष्मीगेहम् ॥५३॥

प्रत्यासन्नः प्रत्याख्यातं प्रत्यावेशः प्रत्याख्यातः।
स्कन्धावारश्चक्राधाराप्रत्याहारावङ्गीकाराः ॥५४॥

त्रिष्वेषु विद्युन्माला—

अन्तर्धीम पश्चात्तापावाविष्कारपारम्पर्यं ।
अन्तेवासि सर्वाङ्गीणोत्तरीकारनीलीरागौ ॥५५॥

अन्नाहारसर्वान्नीन बध्याहारवैमात्रेयौ। अभ्युत्थाननिर्मर्यादौ गेहे नर्दि पिण्डीसूरौ ॥५६॥

अनयोर्वितानं यलावत्र परिभ्राजि समुन्मीलन्नवस्मेराः।
अभिद्योतित्रैरोदंचि समुत्ताल लसल्लीला।

स्फुरत्तारस्फुटोत्सर्पि स्मितस्फारमनोह्वद्याः।
नोहा परिक्षिप्ता ववध्वस्तपराभूतौ ॥५८॥

अधोभूततिरोभूतावबज्ञातपरिग्रस्तौ। अधःक्षिप्तपरिध्वस्तावधिक्षिप्तपरामृष्टौ ॥५९॥

पुरः क्षेप्याः पराचीनः परीणाहः परीणामः। समाहारः समाधानं परिस्कारः परिस्पन्दः ॥६०॥

अभिष्वङ्गः परीरम्भः प्रतिष्टम्भौ समीचीनः। पराचीनं पुरोभागी पुरोगामी. . . ॥६१॥

परायणपरायत्तौ परीहासपरावर्जौ। अवस्कारबलात्कारौ परामर्शपरित्राणौ ॥६२॥

तिरोधाने विपर्यासावपस्मारविसंवदौ। परिच्छन्द यथा जातावलङ्कारश्चतुःशालौ ॥६३॥

अभिव्याप्त उपादान उपक्रोश उपालम्भः। अभिप्राय. . . . उपाध्याय उपाधानः ॥६४॥

एष्वष्टसु वक्त्रं रोललघुश्च तारस्म्यश्चारुराजः कान्तैः कान्ताः।
अभ्युदं विक्रमे रामौ विसर्सर्पित्रर्यधुर्याः ॥६५॥

अत्र जौगगौ च सिंहलेखा—

स्फूर्जदुग्रश्रेष्ठशोभि भ्राजिमञ्जुस्फारशोभाः।
स्वान्तहारी प्रीतिकारी भ्रान्तकान्तप्रौढरूढौ ॥६६॥

अग्रयोज्याः सन्निवेशः सन्निकर्षः सम्प्रदायो। राजमार्गौ भागधेयं नामधेयम् ॥६७॥

अनयोर्वितानं आनुकूल्या चक्रवालावट्टहासविप्रकृष्टौ ।
विप्रलंभविप्रयोगौ विप्रलाभ विप्रलब्धौ ॥६८॥

अन्तराला मध्यमीयौ संप्रहारसंपरायौ । उत्पतिष्णुरुन्मदिष्णु श्वैकतानसंमुखीनौ ॥६९॥

अध्वनीना सायुगीनौ जागरूको वावदूकौ। उत्पतिष्णुरुन्मदिष्णु श्वैकतानसंमुखीनौ ॥६९॥

अध्वनीनसांयुगीनौ जागरूकोवावदूकौ। उत्तमर्णपीठमर्दावाततायि कांदिशीकौ ॥७०॥

संशयालुः किंपचानः प्रत्यनीककुण्ठबुद्धी। स्थूललक्षः मुग्धबोधौ क्षीरकण्ठ शुद्धशुद्धी ॥७१॥

चतुर्थेषु सिंहलेखा—

सलघु च वर कान्तिसमुदं विवरदुग्धौ।
अभिशोभिशुभाशुभौ परिसर्पि चरदग्न्यौ ॥७२॥

अभिचारुरमणीय शुद्धरूपप्रतिशोभा। स्फुटसर्पि स्फुरदिद्ध स्फुरितोऽग्रप्रवरोच्चाः ॥७३॥

अभिनीतसुकुमारावभिभूतपरिलूनौ । अभिदूनपरिदीर्णौ विवकीर्णपरिकीर्णौ ॥७४॥

पुरतस्था परिरम्भाः परिणामो विनियोगः । अपवादः परिवादः परिपाटी अपरिग्राहः ॥७५॥

समवायः समुदायो निकुरम्बः परिभोगः । अवकृष्टप्रतिकृष्टावुपसर्गः परिसर्गः ॥७६॥

परिसर्पो जितकाशी कृतहस्तः कृतकर्मा । परतन्त्रः पतयालुः स्पृहयालुर्हृदयालुः ॥७७॥

अनुकूलमवधानमभिराममुपरङ्गः कमनीयमुपमान मनुहारमनुकासि ॥७८॥

अपहारमुपहारमवतारमधिकारो । उपलम्भमभिलाषमभिजातमुपचारि ॥७९॥

उपजातमवदातमतिमात्रमतिमानि । अनुलाभमनवृत्तिमनुरागमनुषङ्गि ॥८०॥

उपकण्ठमतिपातिमभिमानमभिमानि । उपलापमनुलापमनुतापमुपतापि ॥८१॥

अपराधमवहासमवलेपि. . . . । उपभोगमुपयोगमभियोगमनुयोगि ॥८२॥

एष्वेकादशसु वितानं परिपन्थिनमध्वगं सविषादम् ।
तदनु धृतवादं अनुगामिनमनुयायि नमनुवर्तिनमपि जानीहि ॥८३॥उपगीतिरार्या ।

प्रतिबिम्बप्रतिरूपप्रतिमानप्रतिकूलाः ।
प्रतिलोमप्रतिविशिष्टा व्यवधानप्रणिधानाः ॥८४॥

तालोपि च चञ्चन्नवराजद्दरदृप्तितारौ ।
अत्युद्गरनोभाशुभौ लक्ष्मीनिधि लीलाञ्चितौ ॥८५॥

क्रीडन्नवप्रेङ्खत्परस्फूर्जद्वरप्रीतिप्रदाः ।
अग्रेसरश्चेत्तोहरः साधारणो रङ्गद्गुणः ॥८६॥

अभ्युद्यतमत्युन्नतावत्युज्जवलचञ्चद्रुचौ ।
आविष्कृतमुत्पादितमङ्गीकृतमूरीकृतम् ॥८७॥

आसादितमालिङ्गितमान्दोलितमुन्मूलितम् ।
आविर्हित (विर्हित?)मन्तर्हितमन्वेषितमायोजयेः ॥८८॥

प्रेङ्खोलि (ल्लि)तप्रक्षालितप्रस्थापितप्राघूर्णिताः ।
सन्तापितो निष्कासितः सम्मूर्छितो व्यापादितः ॥८९॥

निर्भर्त्सितः सन्तर्जितः सन्यस्कृतः संगहितः ।
उन्निंदितः सन्तक्षितः सम्प्रेषितः सन्दानितः ॥९०॥

योज्याः पुरो घण्टापथः कौतूहलं विश्राणनम् ।
आयोधनं प्रेङ्खोलनं व्यापादनं निर्वासनम् ॥९१॥

निर्वापनमुल्लासनं सम्भाषणमुच्छृङ्खलम् ।
प (पा?)रिप्लवमुत्कण्ठिताद (दा?)भ्यन्तरमायोजये ॥९२॥

आनन्दाश्रुरोमाञ्चितः कर्णो जपः पाटच्चरः ।
वैर(रा?)ङ्गिको वैहासिकः केलीकिलः सामाजिकः ॥९३॥

वासन्तिको वैज्ञानिक(:?) जैवातृकसैद्धान्तिकाः ।
कुक्षंभरिरात्मंभरिरौर्जस्वलधौरेयकौ ॥९५॥

एकादशोष्वेषु वितानां––

जलावेषो समुज्ज्वलः कलामयोल्लसद्वरः ।
नवोदितो महोन्नतो महाद्युतिः समुद्धरः ॥९६॥

सदाधिकः सदोदितो मनःप्रियो मदप्रदः ।
स्फुरद्वरस्फुटोदिते स्मितोद्धतप्रियङ्करा: ॥९७॥

उदञ्चितं विजृम्भितं निरन्तरं परस्परम् ।
समन्ततः समञ्जसं सुनिश्चितं सनातनम् ॥९८॥

पुरातनं चिरन्तनं यथागतादुपक्रमः ।
परिप्लवं चराचरं चलाचलं.......... ॥

अनाविलादनुत्तरं मनोहरमनोरमौ । विकस्वरमनस्वरं निरङ्कुशं निरर्गलम् ॥
निराकृतादनादृतं तिरस्कृतादुपस्कृतं । विनिर्जितं पराजितं तिरोहितं पलायितम् ॥

पुरस्थितो विचक्षणो विशारदः शिवङ्करः । सहोदरो धुरन्धरः पुरःसरः पुरोगाः (गतः) ॥१॥

अरुंतुद स्तनंधयो भयङ्करो भयानकः । चिकित्सको विदूषको वनीपकः परायणः ॥२॥

अमर्षणो विकत्थनादकिञ्चनः सभाजनः । बुभुक्षितः पिपासितः पराङमुखः पृथग्विधः ॥३॥

अनादरो विसङ्कटादनुत्सा(त्स?)हो नमस्स्यितः । मनीषितं मनोरथः समुच्छ्रयो विपर्ययः ४॥

परिग्रहः परिच्छदः परिस्कृतो निचोलितः । विभावितो विकासितः पराक्रमः पराभवः ॥५॥

प्रभावित[1] प्रकाशितावधिक्रमप्रतिश्रयौ । अति क्षमो निकेतनं कुतूहलप्रयोजने ॥६॥

उपप्लवादुपद्रवादुपक्लमादुपक्षयात् । नियोजनं विधूननं निषूदनं मलीमसः ॥७॥

विमर्शनं समापनं पलायनं निभालनम् । विलोकनं निरीक्षणं प्रवासनं प्रतारणम् ॥८॥

चतुर्दशस्तेषु प्रमाणिका लोभगणाः ।
द्रमा तमोवर्धतमश्चारुतमः सारतरं तारतरं कान्ततरं मंजुतरं ॥९॥

उन्मिषितादुद्घोषितः प्रोल्लसितादुच्छ्वासितं । अभ्युदितादभ्युदितं प्रोल्लसितादत्युचितम् ॥१०॥

संस्फुरितं संमिलितं कान्तिततो दृग्दयितः । स्फारतरः स्मेरतर स्फूर्जदुरुद्योतमयाः ॥११॥

सङ्कलितं सङ्घटितं कण्टकितं संयमितं । कुड्मलितं सङ्कुचितं सन्निहितं संपिहितम् ॥१२॥

---

१. 'प्रभाङ्कित' दे.प., पा.प. १, पा.प. २ ।

अग्रगताः सङ्कलनं सङ्घटनं संवननम्। अध्ययनं पर्यटनं जागरणं संस्मरणम् ॥१३॥

आरभटो विप्रकृतः केलिकिलो जाङ्गुलिकः। अक्षिगतः पल्लवकः कर्मकरो वैकटिकः ॥१४॥

षट्स्वेषु माणवकम्

विदलितवरकरशुभतमनवतताः। उपचितविकसितविलसितविहसिताः ॥१५॥

अविरलविसृमरनिरवधिबहुविधाः। अभिनवसुललितसुरचितसुनिचिताः ॥१६॥

पुर इहपरिमलपरिसरपरिकराः। परिपणपरिचयपरिणतपरिणताः ॥१७॥

परवशवलयितपुलकितकचचिताः। तरलितमुललितनिगडितनियमिताः ॥१८॥

अधिकृतमुपरिलमनसिजपरिवृढान्। सहृदयसमुदयविसरणसहचरान् ॥१९॥

अनुनयमतिशयमभिमुखमवसरं। व्यतिकरमुपगममुपरममुपरतम्।

अनुभवमवयवमनुचरमवयरजम्। प्रतिभयमपचरमनुशयमसहनम्।
अपगममुपशममभिभवपरिभवौ। कवलनमुपमिति मनसि कलयोः ॥१९॥ षट्पदी

चतुर्ष्वेषु शरमिततगुरुयुगिति चलधृतिरियं विशमनं प्रथननं।
प्रशमनं प्रहसनं प्रहरणं प्रकरणं प्रतिमिति प्रतिकृती ॥२०॥

अविरतस्फुटतरस्फुटदुरुस्फुटतमाः। प्रसृमर स्मिततर प्रकटित प्रमुदिताः ॥२१॥ अनयोर्वितानम्

अभ्युपपत्तिसंप्रतिपत्तौ विप्रतिपत्ती अध्यवसायः। साप्त्यपदी
नमभ्यविभावश्चारुविसर्पितं वदुदारी.... ॥२२॥ पङ्क्तावनुक्तम्

उदरम्भरिरतिभर्त्सनमविलम्बितं परिमण्डलमपवारितमपवारणम्।
प्रतिपादनमुररीकृतमुपगूहनं हृदयंगमपरिपंथिकपरिचारकाः ॥२३॥ अतिशक्वर्यामनुक्तम्।

साधारणक्रमाः केऽपि केऽपि लाक्षणिकक्रमाः। शब्दा एवं बुधैर्ज्ञेयाः काव्यावन्धस्य सिद्धये ॥२२॥

इति श्री वायटगच्छीय श्री जिनदत्तसूरिशिष्य पण्डित श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलता वृत्तिविवेचने पारमलनाम्नि सामान्य शब्दस्तबकोल्लासी साधारणशब्दनिर्धारणोऽष्टमः प्रसरः। ग्रंथाग्रं ३१५

अथ वादस्तबकः। जल्पामीत्यादि—

काव्यैर्नवैः प्रजल्पामि कल्पामितयशस्ततिः।
त्वया सार्द्धं कृतस्पर्द्धं वादसादरनादभृत् ॥१॥

अरे त्वया समं ब्रूमो भ्रमोटनपरायणाः।
तत्कालकल्पितैः काव्यैः काव्यकल्पद्रुमा वयम् ॥

वदामि दामितोद्दामवादिवृन्दो मदोद्धतः।
पद्यैर्मधुरता ह्य(ह्ल)घैरनवद्यैस्त्वया समम् ॥३॥

त्वया समं वदिष्यामि श्यामिताशेषशात्रवः।
श्लोकैः शान्तमनाः शोकैः श्लोकैः शुक्लीकृताम्बरः ॥४॥

छन्दोऽन्तरैरपि—

काव्यैरनल्पैरमृतोर्मिकल्पैः जल्पामि कल्पामितकीर्तिपूर्तिः ।
सार्धं कृतस्पर्धमहं त्वयाद्य माद्यन् मनोवादि जनोपमर्दी ॥६॥

सूरीत्यादि—

मयि जल्पति जल्पाकेऽनल्पाकलितकौतुकम् ।
न कोऽपि कुरुते सूरिर्भूरिर्वाक्पूरितं मुखम् ॥७॥

ऊरीकृतं न सूरीणां मुखैर्बूरीकृतं वचः ।
युक्तियुक्तं किमप्युक्तं चेन्मया चिन्मयात्मना ॥८॥

युक्त्यानया लिखितान्यन्यान्यप्यनुप्रासपदानि योजनीयानि ॥छ॥

प्रशंसेत्यादि—

प्रशस्यः पर्जन्यो भुवनजनवाजीवनसृजां सुधांशुर्धिष्ण्यानां पवनपथरत्नं द्युतिमताम् ।
गिरीणां स्वर्णाद्रिर्मणिसमुदयानां सुरमणिद्रुमाणां कल्पद्रुः स्व(सु?)कविनिवहानामहमहो ॥९॥

इतरेषामपि वर्ण्यानामुत्कर्षायोपमानान्येतानि कल्पनीयानि । यथा—

पीयूषमौषधिषु शाखिषु कल्पशाखी चिन्तामणिर्मणिषु धेनुषु कामधेनुः ।
ध्यानं तपःसु सुकृतेषु कृपाव्रतेषु ब्रह्मव्रतं क्षितिपतिस्त्वमुरीकरोतु ॥१०॥

एवं—

वृषोविषाणप्रहृतीस्तनोत्यहो जयेच्छया जम्भनिशुम्भकुम्भिनः ।
मया समं तत्त्वमतत्त्ववित्तमो सुधाकृतोन्मादविवादसादरः ॥११॥

एवं बाहुभ्यामित्यादि ।

त्वयाब्धेरारब्धं करचरणचारेण तरणं करेणोपक्रान्तं स्थगनकरणं चाम्बरमणेः ।

१ "हस्तप्रस्तलडनेन हि कृतः"
"सिंहः स्वाङ्घ्रि" इति वृत्तौ ।

शिरोऽग्रेण स्वर्णाचलदलनमङ्गीकृतमदे मदोग्रेण ध्याता यदिह मम वादेन समता ॥१२॥

एवं जलविलोडनमित्यादि

वदामो यद्दामोदरपदसरिद्वीचिपटल-
प्रगल्भाभिर्वाग्भिर्भवति मतिहीने सति पुनः ।
तदन्धाग्रे नृत्यं बधिरपुरुषैर्मन्त्रकरणं
दृषत्पेषोत्कर्षो गगनहननं मुष्टिनिवहैः ॥१३॥

एवं सिकताकणेत्यादि—

प्रारेभे सिकताकणाशनमिदं प्रोद्दामदावानल-
ज्वालालिङ्गनमुग्ररोषतरलव्यालावलीखेलनम् ।
संतप्तत्रपुपानकर्म भवता यद्विश्वविश्वम्भरा
विद्वद्वन्द्यपदद्वयस्य मम भो वादोक्तिरङ्गीकृता ॥१४॥

पक्षीन्द्रपक्षैरवतंसकांक्षा स्वर्दन्तिदन्तैः सितकुण्डलाशा ।
गजास्यकुम्भस्थलमौक्तिकौघैर्ये हारस्पृहामद्ययमीहसे यत् ॥१५॥

गर्वं हस्तेत्यादि—

हस्तप्रस्तुततताडनेन जनितः कृष्णाहिरुद्यत्फणः
सिंहः स्वांह्लिम हाप्रहारविधिना सुप्तः सुखं बोधितः ।
वातस्याभिमुखं स्थितेन भवता दावाग्निरुज्ज्वालितो
वादोन्मादवशंवदेन यदहं साटोपकोपः कृतः ॥१६॥

कुलादिप्रश्ने यथा—

जातिः सातिशया तव स्फुरति का श्रीसङ्कुलं किं कुलं
देशः क्लेशनिवेशलेशरहितः कः सुन्दरं किं पुरम् ।
शास्त्रे कुत्र पवित्रतामतिरिति प्रौढिप्ररूढैर्गिरां
भारैः सारतरं विशारद वद प्रीत्यै मम दोन्मदः ॥१७॥

त्वं किं लक्षणदक्षिणोऽसि किमु वा साहित्यसौहित्यभृत्
छन्दःकन्दलितोऽसि किमुतालङ्कारतारस्थितिः ।
किं वा तर्हि वितर्ककर्कशमनाः किं ज्ञानविज्ञानवान्
यज्जानासि सभाजनेऽद्य तदहो सर्वं सगर्वं वद ॥१८॥

स्वशास्त्राध्ययनप्रथायां यथा—

सर्वव्याकरणार्णवान्तरपरिक्षोभोद्यमै निर्मला
छन्दः प्रावणोच्छ्रितात्पविविद्यालङ्कारतारप्रभा ।
षट्तर्कीमकरन्दसङ्गसुरभिः स्फूर्जत्कलाशालिनी
काप्येषा मम शेमुखीसुमनसां स्वान्तानि हन्तुं क्षमा ॥१९॥

अनेकोल्लेखैरिति ।

अग्रे यस्य न कोऽपि रोपितपदो विद्वान् परप्रातिभ—
प्रौढिं प्राभृतकीं करोति निभृतं भानोरिवोद्धुर्व्रजः ।
सोऽहं मोहतमः प्ररोहदमताप्रागल्भ्यसम्यस्फुरद्
वाग्दीप्तिप्रसरप्रकाशितसुहृद्वृन्दारवृन्दारघुः ॥२०॥

इति श्री वायटीय श्री जिनदत्तसूरि शिष्यपण्डित श्रीमदमरचन्द्रविरचिते स्वोप काव्य कल्पलतावृत्तिविवेचन परिमलनाम्नि वादस्तबकोल्लासी वादकाव्यानुवादो नवमः प्रसरः ॥ग्रन्थ ४५॥

अथ वर्ण्यस्तबक अश्वे भक्तिर्वेनेन्द्दयाः । अश्व इभ ऋतुः इन सूर्य इन्दुश्चन्द्रस्तयोरुदयः ।
पुष्पखेलः, पुष्पावचयः, अम्बरेतो, जलकेलिः नृपे विद्या

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च भूपतेः ।
विद्याः सांख्यादिदर्शनं ज्ञानमान्वीक्षिकी मता ॥१॥

वेदाश्चतुर्मिताः शिक्षा कल्पो व्याकरणं तथा।
छन्दोविचितिर्ज्योतिर्निरुक्तं षडङ्ग्यसौ ॥२॥
धर्मशास्त्रपुराणा(णे)तिहासमीमांसयान्विताः।
एवं चतुर्दशविद्यास्थानानि गदिता त्रयी ॥३॥

यथा नैषधे—

अधीति बोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दश स्वयम् ॥४॥ (नै.)
गन्धर्वायुर्धनुर्वेदैरर्थशास्त्रसमन्वितैः। विद्याः स्थानान्यष्टादश कथयन्ति तु केचन ॥५॥
ऋग्वेदादायुर्वेदोऽभूद्धनुर्वेदो यजुर्भवः। गान्धर्वं सामवेदोत्थमर्थशास्त्रमथर्वतः ॥६॥

यथा नैषधे एव—

अमुष्य विद्यारसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग् जयश्रियम् ॥७॥ (नै.)
वार्ता: कृषिः पाशुपाल्यं वणिज्या च प्रकीर्तिता। दण्डनीतिश्च भूपतेः . . . . . .
विद्याः सांख्यादि दर्शनज्ञानमान्वीक्षिकी मता ॥८॥
वेदाश्चतुर्मिताः शिक्षा कल्पो व्याकरणं तथा यथा दोषं दण्डं प्राणनं पुनः।
आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ। वार्त्तया धनवृद्धिः स्याद्दण्डनीतेर्नयो नयौ ॥९॥
नय इति नीति शास्त्रोक्तो राजव्यवहारो नयः। सन्धिविग्रहयानासनद्वैधीभावसं याः ॥११॥
शिरोऽग्रेण स्वर्णाचलदलनमङ्गीकृतमहो
मयाग्रेण ध्याता यदिह मम वादेन समता ॥१२॥

एवं जलविलोडनमित्यादि—

वदामो यद्दामोदरपदसरिद्वीचिपटल—
प्रगल्भाभिर्वाग्भिर्भवति मतिहीने सति पुनः।
तदन्धाग्रे नृत्यं बधिरपुरुषैर्मन्त्रकरणं
पृषत्पेषोत्कर्षो गगनहननं मुष्टिनिवहैः ॥१३॥

एवं सिकताकणेत्यादि—

प्रारेभे सिकताकणाशनमिमं प्रोद्दामदावानल—
ज्वालालिङ्गनमुग्ररोषतरलव्यालावलीखेलनम्।
संतप्तत्रपुपानकर्म भवता यद्विश्वविश्वम्भरा
विद्वद्वन्द्यपदद्वयस्यमसमं भो वागोक्तिरङ्गीकृता ॥१४॥

एवं शेषेत्यादि—

पक्षीन्द्रपक्षैरवतंसक्षः स्वर्दन्तिदन्तैः सितकुण्डलाशा।
गजास्यकुम्भस्थलमौक्तिकौघैं हरिस्पृहा मय्यमीहसे यत् ॥१५॥

---

१. "हस्तप्रस्तरताडनेन ।ह कृतः" इति वृत्तौ।
२. "सिंहः स्वाङ्गाग्र" इति वृत्तौ।

षड् गुणा नृपतेर्दाने युद्धे धर्मेऽत्र धीरता। लब्धे राज्ये पौरजनपदयोर्द्वानामनुग्रहः ॥1॥

गुप्तिरक्षणेऽप्रमादः (1-2) तुलामानभाण्डवृद्धिः 3 अर्थव्यवस्थापनं च सम्यग्यथोचितप्रवृत्तिः, अनुचितनिवृत्तिः६, प्रकृति सत्करणं चेति, 7 सप्त प्रशमनानि। महाभारते सभापर्वाणि नारदोक्तं-चिदध्यायाल्लिख्यन्ते यथा—

क्वचिदात्मानमन्वीक्ष्य परीक्ष्य जयतां वरः।
तथा संधाय कर्माणि भारताष्टो निषेवसे ॥

कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनं। खन्या करकरादानं शून्यानां च निवेशनम् ॥

अष्टौ कर्माणि अथवा रक्षायव्य श्रवणपूर्व पौरकार्यदर्शनम् 1 अध्यक्षदर्शनं, 2 प्रतिगृहस्थानानि, 3 भोजनं, 4 मन्त्र, 5 विहार, 6 हस्त्यश्वायर्वेददर्शनं, 7 युद्धसाधनदर्शनं 8 क्वचित् प्रकृतयः सप्तमलुब्धा भरतोत्तम। आद्यास्तथा व्यसनिनस्तनुरक्ताश्च सर्वतः। दुर्गाध्यक्षो धनाध्यक्षः कर्माध्यक्षश्चमूपतिः। पूतः पुरोधा दैवज्ञः सप्तप्रकृतयः स्मृताः। क्वचिदष्टादशान्येषु स्वपक्षे दश पञ्च च। त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि भारत।

मन्त्रिपुरोहितसेनापतियुवराजदौवारिक अंतःपुराधिकृतप्रशास्तृ समाहर्तृ सन्निधातृ प्रदेष्टृ नायक पौरव्यावहारिक कार्मान्तिक मन्त्रपर्षत् अध्यक्षदण्डदुर्गतं तन्त्रपाल आटविकपराश्रिताष्टादशतीर्थानि देवीजननी कंसुकीमालिक शय्यापालक स्पर्शाध्यक्ष सांवत्सरिकभिषक् जलवाहक ताम्बूलवाहकश्चाचार्य अङ्गरक्षकस्थानचिंतकर छत्रधर विलासिन्यश्चेति स्वपक्षे पञ्चदश तीर्थानि त्रिभिस्त्रिभिः एकः संस्थानकः अपरः संचारकः अन्यो निषेधकः नास्तिक्यमनुमतं क्रोधः प्रमादो दीर्घ दर्शनं ज्ञानावतामालस्यं क्षिप्तचित्तता। एकं चिन्तन मर्थानामनर्थज्ञैश्च चिन्तन श्चितानांमनारम्भौ मन्त्रस्यापरिरक्षणं। मंगल्यस्याप्रयोगोऽयं प्रसङ्गविषयेषु च। कच्चित्वं वर्जयिष्ये(ष्यै1) तान् राजदोषान्नराधिपः अरिमित्रमरेर्मित्र मित्र मित्रमतःपरं। तथारिमित्रमित्रं च विजिगीषोः पुरा नृपाः। पार्ष्णिग्राहः स्मृतः पश्चादाक्रंदस्तदनंतरम् ॥ असारावनयोश्चैव विजिगीषोश्च पृष्ठतः। अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वन्धे। मण्डलाद्वहिरेतेषामुदासीनो बलाधिकः ॥ अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः। व्याक्रन्दस्यासारः। 40 पार्ष्णिग्राही सारः। 30 आक्रन्दः। 20 पार्ष्णिग्राहः 1 पश्चात् विजिगीषुः पुरः अरिः। 10 मित्रं 20 अरिमित्रं 30 मित्रमित्र 40 अरिमित्रमित्र 50 विजिगीषोर्वामदक्षिणपक्षयोरुदासीनमध्यमौ। विजिगीषोरात्मव्यतिरिक्ता एते एकादश राजानः। कोशो जनपदो दुर्गो दण्डामात्य इत्यपि स्वपक्षे पञ्चदश तीर्थानि ॥छ॥

मृगायाक्षाः स्त्रियः पानं वाक् पारुष्यार्थदूषणे। दण्डपारुष्यमित्येतत् ज्ञेयं व्यसनसप्तकम् ॥छ॥
शक्तिरिति-मन्त्रशक्तिर्ज्ञानबलं कोशदण्डबलं पुनः। प्रभुशक्तिर्विक्रमोजश्चोत्साहशक्तिरीश्वरे ॥
दण्डो गजरथाश्व पत्तिलक्षणं चतुरङ्गसैन्यबलमिति। षड्विधं बलमेतद्वैराज्ञो मूलाः क्रमागताः।
भृतकानि योगिन सुभृत्याः सामान्यसेवकाः, श्रेणयो जयनशालेश्याद्या मित्राणि बन्धवः।
भिल्लाद्या आटविकास्तु जिगीषोर्विजयप्रदाः। एकैकेभरथात्रयश्वापत्तिः पञ्चपदातिकाः॥
सेना बलासुखं गुल्मो वाहिनी पृतना चमूः। अनीकिनीचपात्रः स्यादिभाद्यै स्त्रिगुणैः क्रमात्।
अनीकि दशभिः पुनरक्षौहिणी मता। स्यात् सेनाक्षौहिणी नाम खागौष्टकः द्विकैर्गजैः॥

रथैश्वघ्नैः पञ्चघ्नैश्च पदातिभिः। खङ्गादिशस्त्राणीति-शस्त्रं चतुर्विधमक्तं द्विपाणियन्त्रमुक्तं शक्तिः शरादिकम् अमुक्तं शस्त्रिकादि स्यात् षष्ठ्याद्यं तु द्वयात्मकम्।

षट्त्रिंशदायुधानि चापबाणः १ नरा चक्षुरप्रतद्वला, अर्द्धं चन्द्रतीरी प्रभृतयो बाणभेदाः। खड्ग खेट २ तरवारि कोइलंबुरीप्रभृतयः खड्गानुगाः, लगुड ३ भिण्डिमाल ४ कुन्त ५ मुद्गर, ६ परशु, ७ सर्वला, ८ तोमरा, ९ शङ्कु,

१० त्रिशूल, ११ शक्ति, १२ पट्टिशं, १३ दुस्फोटः, १४ इथ्रुम, १५ चक्र, १६ पाश, १७ अंकुश, १८ दण्ड, १९ गदा, २० वज्र, २१ खट्वाङ्ग, २२ हल २३ मुशल, २४ कर्त्तरी, २५ भल्ल, २६ गुलिका, २७ डाड, २८ मक्षिका, २९ मुषाण्डि, ३० रिटि, ३१ कणयं(पं?) ३२ कम्पनं, ३३ गोमुख, ३४ वत्सदन्त, ३५ गोफणि, ३६ अरिपराजय इति। अन्तरायोंतरङ्गा बाह्याश्च कामक्रोधलोभमानमदहर्षाः। क्षितीशानामन्तरङ्गोऽरिषड्वर्गः। दुरभिनिवेशामोक्षो युक्तोक्ताग्रहणं वा मानः। कुलबलैश्वर्यविद्याभिरात्माहङ्कारकरणं परप्रकर्षनिबन्धनं वा मदः। यो विधेयत्वमात्रेण तुष्टो व्यभिचरेन्न हि प्राणद्रव्याभिमानेषु, स धर्मविजयी नृपः प्राणस्यार्थमानस्योपद्यानतेना मही तु यः वाञ्छत्यसुर विजयी स राजा निन्दितत्वासौ।।छ।।

गुणौघा इति। अलङ्काराभ्यासस्तबके गुणसङ्कल्पनाकाव्यं—

सन्ध्याहङ्कृति सौ(शौ)र्यसाहसमहधीरत्वशक्तिश्रियो।
विद्यादानशरण्यकवाक् शमकलासत्यौ चितीभक्तयः।

न्यायस्थैर्य विवेककीर्त्तिविनयप्रज्ञाप्रतिष्ठादया—
शालावण्यसुहृद्गभीरगुरुतासौभाग्यसेद्यमाः।।

कलाः द्वासप्तीतिर्यथा—लक्षण 1 साहित्यनिरीक्षण, 2 तर्क, 3 सिद्धान्तसम्पर्क, 4 लिखित, 5 गणि, 6 गीति, 7 नृत्य, 8 वाद्य, 9 विनोद, 10 अष्टादशलिपिभेद, 11 सन्देहपरिच्छेदा, 12 वास्तुशास्त्र, 13 वैद्यकशास्त्र, 14 ज्योतिःशास्त्र, 15 नीतिशास्त्र, 16 शकुनविचार, 17 स्वप्नविचार, 18 मन्त्रवाद, 19 रसवाद, 20 गन्धवाद, 21 तन्त्रवाद, 22 धातुवाद, 23 सत्य 24 अश्वलक्षण, 25 गजलक्षण, 26 पुरुषस्त्रीलक्षण 27 रत्नपरीक्षा, 28 बलीवर्दादिनिर्णय, 29 खड्गादिनिर्णयः, 30 लेपकर्म, 31 चित्रकर्म, 32 तन्तुवायकर्म, 33 शुचिकर्म, 34 उपलोत्कीरण 35 काष्ठोत्कीरण, 36 दन्तघटना, 37 सुवर्णादिघटनं, 38 मुष्टिभेद, 39 पत्रच्छेद, 40 इन्द्रजालज्ञान, 41 क्रियाकालज्ञान, 42 शृङ्गारकरणं 43 जलतरण, 44 रन्धन, 45 केशबन्धन, 46 कथाकथन, 47 पुष्पग्रथनं, 48 युद्ध, 49, नियुद्ध, 50 कृषिकर्म, 51 नियोगधर्म, 52 मर्द्दनश(क)र्म, 53 वचनमर्म, 54 आरामरोपण, 55 आकारगोपन, 56 सुरभिवस्तुकरण, 57 अदृश्यसंचरण, 58 सकलदेशवेष, 59 अशेषभाषाविशेष, 60 नव्यकाव्यलव 61 सम्यग्हस्तलाघव, 62 दण्डलक्षण, 63 परिचित्तोपलक्षण, 64 द्यूतभेद, 65 दर्शनप्रतिभेद, 66 रणचर्या, 67 रथचर्या, 68 वस्तुविचार, 69 देशाचार, 70 रसायनसंचन, 71 कालवंचन, 72 धर्मध्यानं, 73 योगज्ञानं 74 ।।छ।।

रूपवर्णनमिति-त्रिषुविपुलोगंभीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः सप्तसु रक्तो राजा पंचसु सूक्ष्मश्च दीर्घश्च।

ललाटं वदनं वक्षस्त्रितयं विपुलं वरम्।
गम्भीरं, त्रितयं नाभिः स्वरः सत्त्वं प्रशस्यते।।

नाशा(सा) ग्रीवा नखाः कक्षाः स्तनमुखान्युन्नतानि षट्।
कण्ठो जङ्घायुगं पृष्ठं लिङ्गं ह्रस्वचतुष्टयम्।

रक्तान्यक्ष्यं तथाप्यंह्रि जिह्वातालुनखाधराः।
सप्तपञ्च सूक्ष्माणि त्वग् नखकेशाङ्गुलीरदाः।

पञ्च दीर्घाणि स्तनदृग्मध्यदोर्नासिकाहनुः।
त्रयस्त्रिंशत्तमं त्वेषु सत्त्वं द्वात्रिंशतोऽधिकं।

ऊरुजठरकं वक्षो बाहुपृष्ठं शिरस्तथा।
अष्टाङ्गानि पुनः शेषाण्युपाङ्गानि विदुर्बुधाः।।छ।।

महामात्ये इति। अत्रापि नयादयो राजवत् ज्ञेयाः। उक्तं चास्मद्गुरुभिः श्रीजिनदत्तसूरिभिर्विवेकविलासे।
स्वामिभक्तो महोत्साहः कृतज्ञो धार्मिकः शुचिः।
अकर्कशः कुलीनश्च स्मृतिज्ञः सत्यभाषकः।
विनीतः स्थूललक्षश्चाव्यसनी वृद्धसेवकः।
अक्षुद्रः सत्त्वसम्पन्नः प्राज्ञः शूरोऽचिरक्रियः।
राज्ञा परीक्षितः सर्वोपधासु निजदेशजैः।
राजार्थस्वार्थलोकार्थकारको निःस्पृहः शमी ॥
अमोघवचनः कल्पः पालिताशेषदर्शनः।
पात्रौचित्येन सर्वत्र नियोजितपदक्रमः ॥
आन्वीक्षिकीत्रयीवार्त्तादण्डनीतिकृतश्रमः।
क्रमागतो वणिक्पुत्रः सव्यो मन्त्री न चाऽपरः।

पञ्चभिः कुलकम् ॥ तथा च महाभारते सभापर्वणि क्वचिदध्याये—

अमात्या—नुपधातीतपितृपैतामहान् शुचीन्।
श्रेष्ठान् श्रेष्ठेषु कश्चित्त्वं नियोजयसि कर्मसु।
धर्मोपधा-अर्थोपधा-कामोपधा भयोपधातुसु निव्यूढः ॥छ॥

पुरोहिते स्मृतिरिति।

मन्व 1 त्रि 2 विष्णु 3 हारीत 4 याज्ञवल्क्य(ल्क्यो) 5 शनों 6 गिरा.
7 यमा 8 पशु च 9 संवर्त्ता 10 कात्यायन 11 बृहस्पती 12
पराम(श)र 13 व्यास 14 शङ्खलिखिता 15 दक्ष 16 गौतमौ
17 शातातपो वशिष्ट(सिष्ठ)श्च 18 धर्मशास्त्रप्रयोजकाः।

श(शा)तातपो वशिष्ट(सिष्ठ)स्तत्कृतिः। तथा शङ्खलिखितौ भ्रातरौ ताभ्यां कृता स्मृतिः एवं अष्टादशास्मृतिकर्त्तारः ॥छ॥

ब्राह्मण्यं वाण्यं च वैष्णव्यं शैवं भागवतं तथा।
स्कांदं त्रयोदशं तेषां वामनं च चतुर्दशम् ॥
कौर्म्यं पञ्चदशं तद्वत् षोडशं मत्स्यनिर्मितम्।
सप्तदशं गारुडं च ब्रह्माण्डं च तथापरम् ॥
अष्टादश पुराणानि स्मृतानि मुनिभि पुरा ॥

तथा च सोमनीत्यां पुरोहितमुदितदिकुलशीलं षडङ्गे वेदे दैवे निमित्ते दण्नीत्यां चाभिविनीतमापदां दैवीनां मानुषीणां च प्रतिकर्त्तारं कुर्वीत। दैवे ज्योतिःशास्त्रे निमित्ते उत्पादनदर्शने। तथा च शुक्रः—

दिव्यान्तरिक्षभौमानां उत्पातानां प्रशान्तये।
तथा सर्वापदां चैव कार्यो भूपैः पुरोहितः ॥

अमानुषोऽग्निरवर्षमतिवर्षं मरकः, शस्योपघाते जन्तूत्सर्गो व्याधिर्भूतपिशाचशाकिनीसर्पव्यालमूषकाः क्षभिश्चेत्यापदः। अमानुषोऽग्निविद्युत्पातः, मरकः प्रचुरजनमृत्युः, शस्योपिघातः, शलभादिभिः जन्तूत्सर्गो मानुषपरित्यागो विक्रयो वा—एता जनस्यापदो दैविका मानुष्यश्च।[1] दैविकाग्राहवैषम्याज्जाताः मानुष्यः शत्रुप्रभृतिभ्यो जाताः—

१. "जन्तूत्सर्गो ....मानुष्यः" इदं पा.प. १ पुस्तके नास्ति।

हुताशनो जलं व्याधिर्दुर्भिक्षं मरकस्तथा।
इति पञ्चविधं दैवं व्यसनं मानुषं परम्॥ ॥छ॥

देव्यमिति—वेणीधम्मिलादीनामुपमानान्यलङ्काराभ्यासस्तबकतो ज्ञेयानि मन्त्रीपुरोहितसैन्येष्वपि राजवर्णनोक्ता गुणा औचित्यतो वर्ण्याः। देशे इति—खन्यः खान्यो वज्रादीनां, द्रव्याणि नाणकाणि, पण्यं वणिग्व्यवहारः; धान्यान्यनेकप्रकाराणि, आकरा लवणादीनामुत्पत्तिस्थानानि। दुर्गाणि जलगिरिवनदुर्गादीनि। उक्तं च "अन्योन्यरक्षाखन्याकरद्रव्यहस्तिवनवान्, नातिवृद्धनातिहीनग्रामश्च बहुसारविचित्रधान्यहिरण्योपपत्तिरदेवमातृकः पशुमनुष्यहितः। श्रेणिशूद्रकर्षकप्राय इति जनपदस्य गुणाः। जनपदो देशस्तस्यैते गुणाः।"पूर्वोक्तो यस्मिन् देशोऽन्योन्यरक्षा भवति (तत्र); परस्परं लोका रक्षन्ति बहवः। सारा उक्त(त्त) मा पदार्था यत्र। अदेवमातृकोऽरि(?) घट्टबहुलः। पशवश्चतुष्पदास्तेषामनुकूलसुखावहः। श्रेणयः कुलानि, वर्णा म्लेच्छलुब्धकबहुलाः। स्वल्पासस्योत्पत्तिस्तरुफलाधार इति देशदोषाः॥छ॥

मन्त्रेति—कार्याणामारम्भोपायः १, पुरुषद्रव्यसम्पत् २, देशकालविभागः ३, विनिपातप्रतीकारः ४, कार्यसिद्धिश्चेति (५) पञ्चाङ्गा मन्त्रशक्तिः। षाड्गुण्योपाया पूर्वं कथिताः। भूमिहिरण्यमित्राणां तिस्रः सिद्धयः। स्थानवृद्धिक्षयलक्षणास्त्रय उपायाः। स्थानं अनपचया वृद्धिः चयरहिता(:) तु साक्षयः। अश्वेति—

उच्चैःश्रवा रवेरथ्यारेवं तेऽश्वस्य पूर्वजाः।
पुरा सर्पकृता युद्धे छिन्नांह्रेरपि सर्पणम्॥

चित्रज्ञत्वं[1] हृद्वनावर्ती श्रीवक्षकी हयः।
पञ्चभद्रस्तु हृत्पुष्टमुखपार्श्वे तु पुष्पितः॥

पुच्छो(च्छौ) ग. खुरकेशास्यै सितैः स्यादष्टमङ्गलः।
धोरितं वल्गितं प्लुत्युत्तेजितोत्तिरितानि च।
गतयः पञ्चधाराख्यास्तुरङ्गाणां क्रमादिमाः॥

[2]तत्र धोरित्तकं धौर्य धोरणं धोरित्तं च यत्।
वभ्रुकङ्कशिखिक्रोडगतिवद्वल्गि[3] तं पुनः॥

अग्रे कायसमुल्लासाकुञ्चितास्यं (च) सत्त्रिकम्।
प्लुतं तु लङ्घनं पक्षीमृगगत्या तु हारकम्॥

उत्तेजितं रेजित्य[4] स्यान्मा(म)ध्यवेगेन या गतिः।
उत्तरे समुपकण्ठमास्कन्दिकमित्यतः॥
उत्प्लुत्येत्प्लुत्यगमनं कोपादेवाखिलैः पदैः॥

गजे इति—

गजः परपुरोन्मर्द्दीनर्द्दीलक्ष्मीनिकेतनम्।
कान्ताकुचाभकुम्भश्रीस्तरुशैलादिभेदकृत्॥

---

१. 'वित्तज्ञत्वं' सं.प. १, सं.प. २
२. 'धोरणाधोरितं' पा.प. १, पा.प. २
३. 'गतिवल्गलितं' पा.प. १, पा.प. २
४. 'रेचितं' सं.प. १, सं.प. २, दे.प. १

विपरीतरसज्ञावान् सलिलान्तरमैथुनम् ।
रणं कृद्बाह्यदन्ताभ्यां भोक्ता मध्यरदैः पुनः ॥
दिग्गजाः पूर्वजास्तस्य धरोद्धरणतत्पराः ।
दन्तैः श्रीकङ्कणादीनि सविलासा गतिस्तथा ॥
सेतुबन्धे जले सर्वे विनोदास्तैर्वचो विना ।
यदाकारं मुखे कृत्वा विघ्नहृस्ता विनायकः ॥
पञ्चवर्षो भवेद्बालः पोतः स्याद्दशवा(ब)षिकः ।
विष्को विंशतिवर्षः स्यात्कलभस्त्रिंशदब्दकः ॥
प्रेरणाऽस्य पदाङ्गुष्ठ युग हक्ताँ कुशासनैः ।
दन्तांह्रिपुच्छशुण्डाभिर्भवत्यष्टायुधो गजः ॥
मार्गा(स्ते?) त्रिविधास्त्रयप्रणिधयस्तिस्रो यतः प्रक्रियाः
स्त्रीणां प्रस्फुटमासनानि पुरतः पञ्चैव पश्चात् पुनः ।
षड् भेदाङ्कुशचारणागतिगतो भेदः पुनः पञ्चधा
स्यादारोहणमष्टधा दशविधः प्रोक्तोऽवतारक्रमः ॥छ॥

सुरमावित्यादि––वसन्तादि सर्वर्तुस्वरूणमग्रे प्रपञ्चयिष्यामि (म.?)।

विवाह इत्यादि––अष्टौ विवाहाः ।

वर्णानां संस्कारार्थं प्रकीर्तिता ।
ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्तथैव च ॥
आर्षश्चैव तु दैवश्च गान्धर्वोऽथासुरस्तथा।
राक्षसोऽनन्तरस्तस्मात् पैशाचश्चाष्टमः स्मृतः ॥
सकृदाहूय कन्यां तु ब्राह्मो दद्यात् स्वलंकृताम् ।
सह धर्मं चरेत् त्यक्त्वा प्राजापत्योऽभिधीयते ॥
यस्तु गोमिथुनं दद्यात् विवाहे त्वार्षं उच्यते ।
अन्तर्वेद्यां तु दैवः स्यात् ऋत्विजे कर्म कुर्वते ॥
इच्छन्तीमिच्छतः प्राहुर्गन्धर्वो नाम पञ्चमः ॥
विवाहस्त्वासुरो ज्ञेयः शुल्कस्य व्यवहारतः ॥
प्रसह्य हरणादुक्तो विवाहो राक्षसस्तथा ।
सुप्तप्रमत्तोपगमात् पैशाचः चाष्टमोऽधमः ॥
अथ पुत्रभेदाः श्च-औरसः क्षेत्रजश्चैव दत्तः
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥
पौनर्भवोऽपविद्धश्च लब्धः क्रीतः कृतस्तथा ।
स्वयं चोपपगतः पुत्रा द्वादशैते उदाहृताः ॥
औरसो यः स्वयं जातः प्रतिबिम्बमिवात्मनः ।
क्लीब्येत्यंतव्यसनिनिपत्यौ तस्याज्ञया तु यां ॥

भार्या नरान्तरात् पुत्रं जनयेत् क्षेत्रजस्तु स ।
परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ ।
पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः ॥
मातृपितृभ्यां यो दत्तः स दत्तः परिकीर्तितः ।
मित्रपुत्रं शिष्यपुत्रं कृत्रिमं प्राहुरुत्तमाः ॥
कन्याजातस्तु कानीनः सगर्भोढः सहोढकः ।
बाह्यतः स्वयमानीतः सोपविद्धः प्रगीयते ॥
न ज्ञायते गृहे केन जातस्त्विति स गूढकः ।
मूल्यगृहीते क्रीतः स्यात् विधिवत् स पुनर्भवः ॥
दत्वैकस्य च या कन्या हृत्वाऽन्यस्य प्रदीयते ।
तज्जातस्तनयो ज्ञेयो लोके पौनर्भवस्तु सः ॥
दुर्भिक्षे व्यसने वापि येनात्मा विनिवेदितः ।
स स्वयंदत्त इत्युक्तस्तथाऽन्यत्कारणान्तरैः ॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
भवन्ति सप्तमादूर्द्ध सगोत्रा ज्ञातयः पुनः ॥

अथान्ये द्वादश ज्ञेयास्तनया मिश्रजातयः ॥
द्विजाज्जातः क्षत्रियायां मूर्द्धावसिक्त इत्यसौ ॥
वैश्यायां पुनरम्बष्टः शूद्र्यां पारशवो मतः ।
क्षत्रान्माहिष्यो वैश्यायां ४ मुद्ग दस्तु शूद्रयोषिति ॥
शूद्रो द्विजस्त्रियां ६ वैश्यात् शूद्रायां करणः पुनः ।
मागधः क्षत्रियायां स्यात् ८ वैदेहिको द्विजस्त्रियाम् ॥९॥
शूद्रायायोगवो वैश्यां १० क्षत्ता क्षत्रिययोषिति । ११
सुरते सात्त्विका इति स्वेदवेपथु रोमाञ्चस्वरभेदविवर्णता
स्तम्भाश्रुप्रलया श्चैतेऽष्टौ भावाः सात्त्विका मताः ॥छ॥

कीर्त्या तरति सारस्य स्वरूपमथ किञ्चन ।
जातीरवस्थाप्रकृतीः सत्त्वानि स्त्रीषु लक्षयेत् ॥

अथ जातयः ।

पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
स्त्री चतुर्द्धोत्तमाद्याथ हीना स्यादुत्तरोत्तरा ॥
पद्मिनी पद्मवदना पद्मभस्मरमन्दिरा ।
पद्मकुड्मलमृद्वङ्गी पद्मगन्धवरोदका ॥
क्वचित् कुवलयच्छाया काचिच्चम्पकचारुरुक् ।
श्रीफलाभकुचा तन्वी सुवेषा हरिणेक्षणा ॥

त्रिवली तरङ्गमध्या स्निग्धश्यामलकुन्तला ।
बिम्बोष्ठी हंसगमना तिलपुष्पाभनासिका ।।

मधुगन्धा प्रियालापा सलज्जा सुकृतैकधीः ।
शुक्लपुष्पांशुकरता मानिनी लघुभोजना ।।

पञ्चभिः कुलकं ।

चित्रिणी चित्रवीरादिरक्ता चञ्चललोचना ।
नातिदीर्घा नातिखर्वा कंबकण्ठी कृशाङ्गिका ।।

काकस्वरा काकजंघा विशालजघनस्थला ।
उन्नतोष्ठी शुभगतिः समुन्नतपयोधरा ।।

अल्पलोमान्तर्मृद्वल्पसङ्गं तद्घनवर्तुलम् ।
मधुसौरभ्यरत्यम्बु संबिभ्राणा स्मरालया ।।

बाह्यसंभोगनिरता मधुरस्वल्पभोजना ।
गीतनृत्यादिकसलकलाकौशलशालिनी ।।

चतुर्भिः कलापकम्

शङ्खिनी शङ्खदशना कोपना कर्कशाशया ।
दीर्घप्रसृतनासोरुनयनामिषगन्धभृत् ।।

शिशिराङ्गी दीर्घनिम्नबहुलोमस्मरालया ।
प्रायशः पित्तला मूल्यक्षारगंधि स्मरोदका ।।

सम्प्रयोगकृतानल्पनखाङ्कारासभस्वरा
किञ्चिदुत्तप्तदेहे यामल्पबहुभोजना ।।त्रिभिर्विशेषकम् ।।

हस्तिनी हस्तिगमना सा हस्तिमदगन्धभृत् ।
सुमध्या स्थूलदशना समदा गद्गदस्वना ।

वक्रस्थूलाङ्गुलीकांह्रिर्लघुपीवरकन्धरा ।
क्रूरचेष्टातिस्थूला कपिलकेशभृत् ।

विस्तीर्णोन्नतवक्षोजा कटुप्रायकषायभुग् ।
प्रयोगे दुक्खसाध्येभ मद्यगन्धरतोदका ।।

वादित्रगीतसंप्रीता ह्रस्वोरुभ्रुजा. . . . तनुंमयुताम्यअन्तर्विशालमदनालया ।।चतुर्भिः कलापकम् ।

पद्मिनी पद्मासनेन चित्रिणी भागरेण च ।
शङ्खिनी वेणुदारितपदेन प्रमदं व्रजेत् ।। हरि

हस्तिनी तु स्कन्धपादयुगलेन प्रहृष्यति ।।
चित्रिणी प्रथमे यामे द्वितीये हस्तिनीं पुनः ।

तृतीये शङ्खिनीं तुर्ये पद्मिनीं रमयेद्बुधः ।।
एतन्नन्दिकेश्वरीयं गोणिकापुत्रकीयं मतम् ।।छ।।

अथवात्स्यायनीयं मतं—

मृग्यश्च हस्तिनी चैव त्रिविधा कामिनी भवेत् ।
शशोवृषतुरङ्गश्च कामुकोऽपि त्रिधा मतः ॥

षडष्ट वाङ्गुलानि स्यान्नाड्यब्जमुकुलाकृतिः ।
यद्योनौ सा मृगी तादृग्मानलिङ्गः पुमान् शशः ॥

यस्य सैव नवदशैकादिशाप्यङ्गुलानि तु ।
सा भवेदडवा तादृग्मानलिङ्गः पुमान् वृषः ॥

यस्याः सैव द्वादशादीन्यङ्गुलानि भवेत्त् सा ।
हस्तिनी तादृक्प्रमाणलिङ्गः तुरङ्गः पुमान् ॥

हरिणीशशयोः संगं वडवावृषयोरपि ।
हस्तिनीहयर्योश्चैव मतं समरतं त्रयम् ॥

मृगीं वृषं च वडवाहयमुच्चरतं द्वयम् ।
नीचं द्वयं च वडवाशशकं हस्तिनी वृषभ् ॥

अत्युच्चमतिनीचं च मृग्यश्च हस्तिनीशशम् ।
इति प्रमाणभेदेन नवधा कीर्तितं रतम् ॥

इति जातयः ।

अथावस्थाः—

बाला षोडशभि र्वर्षैस्त्रिंशता यौवनोन्मिदा ।
पञ्चपञ्चाशता मध्या वृद्धा नारी ततः परम् ॥

बाला खेलनकैः काले दत्तैर्वन्यफलाशनैः ।
मोदते यौवनस्था तु वस्त्रालङ्कारणादिभिः ॥

हृष्येन्मध्यवयाः प्रौढवयाः प्रौढरतक्रीडासु कौशलैः ।
वृद्धा तु मधुरालापैर्गौरवेण च रज्यते ।
श्लथा दीर्घतनुः कृष्णा निम्नकक्षाक्षियोगिनी ॥

घना स्थूलाखर्वा गौरी व्यूकक्षा सदा रता ।
संकीर्णलक्षणा मध्या स्यात्तासां सहजं त्विदम् ॥

बालाघना पुरन्ध्रीया सा स्याद्बाह्यरतप्रिया ।
प्रौढ़ाघना तु या सा स्यादाभ्यन्तरतस्पृहा ॥

प्रौढदीर्घा कृशा कृष्णा मृदुः शीघ्रद्रुतिश्च सा ।
गौरवर्णा तु या बाला ह्रस्वा च स्याच्चिरंद्रुतिः ॥

बाह्यान्ते च भवेत्प्रीतिः प्रायो बाह्यकृते रते ।
यौवनस्था समा मध्या श्यामवर्णा तु याभवेत् ॥

एषोभयरतिप्रीतिर्नमृद्वी न दृढाङ्गका ।
निम्नकक्षान्तराला या प्रदीर्घस्तनचूचुका ॥

एते दीर्घह्रस्वौ द्वे च तथा तनुतरोदरी ।
गौराङ्गी पूर्वमालिङ्गेत् कृष्णा याश्लिष्यतेऽपरा: ।।
श्यामा या घर्षयेद्योनि कर्मकुर्यात्ततोऽपरम् ।

इत्यवस्था: ।

अथ प्रकृतयः—

वातला तनुशीतोष्णरुक्षांगी बहुभाषिणी ।
विद्विष्टशिशिरा सूक्ष्मदन्तरोमतरेक्षणा ।।
बहुभुक् मधुरस्निग्धलवणाम्लोष्णकांक्षिणा ।
चलनेत्रगतिः स्नेहमतिर्भ्रमणतत्परा ।।
दग्धस्थाणू धूसराभा प्रियोद्यानातिकोपना ।
गोजिह्वा कर्कशा रोमगुह्या स्यात् कठिना रतौ ।।त्रिभिर्विशेषकम् ।।
प्रहारैः कर्कशालापैः गाढदन्तनखक्षतैः ।
सुगाढाधरदशनैर्जघनस्तनपीडनैः ।।
गाढालिङ्गनचुम्बनं केशग्रहसीत्कृतैः ।
वातलाया रतं कृत्वा पूर्यते हृदयस्पृहा ।।युग्मम् ।।
पित्तला गौरी कृष्णा वा श्लथमांसाभिमानिनी ।
आताम्ररसना नेत्रपाणिपादनखाधरा ।।
कषायतिक्तमधुररसभुक् शिशिरप्रिया ।
प्राज्ञा कपिलकोमलस्वल्पलोमशिरोरुहा ।।
अल्पापत्यरतिर्लोला शुचिराश्रितवत्सला ।
कटुगन्धि बहुस्वेदा व्यक्तास्थिग्रन्थिगुल्फका ।।
सरसा परितप्लाङ्गी प्रियमाल्यविलेपना ।
अत्युष्णशिथिलगुह्या जायते सुरते मृदुः ।।

।।चतुर्भिः कलापकम्।।

पित्तलप्रकृतेर्मानं प्रणयं वीक्षणं तथा ।
विलासान्विविधान् हास्यं रुदनं श्लज्वलं मृजेत् ।।
आश्लेषाधरदशनपातदन्तनखक्षतम् ।
चुम्बनं मुहुः कुर्वीत शिशिरं च विलेपनम् ।।
श्लष्मला स्वविभक्तांगी विस्तीर्णा वयबाल्पभुक् ।
बृहत्पक्ष्मलस्निग्धाक्षी समस्निग्धनखद्विजा ।।
दूर्वानीलोत्पलश्यामो गूढास्थिग्रन्थिगुल्फभाक् ।
सत्रपा सत्यमधुरभाषिणी क्षमयान्विता ।।
दानशीलदयायुक्ता भक्ता देवान् गुरून् प्रति ।
स्निग्धस्नेहरताभिज्ञा सुभगाक्षुस्तृषासहा ।।

साधारणरतिक्रीडा न मृदुर्नेह द्रा रतौ।
मृदुमांसलशीतलगुह्या निद्राप्रिया भवेत् ॥

।।चतुर्भिः कलापकम् ।।

श्लेष्मप्रकृतेः कुर्यात्सद्भावप्रेमविस्मयम्।
सानन्दं मधुरं सत्यं वचनं च सदा वदेत् ॥

चुम्बनालिङ्गनाघातनखदन्तक्षतानि च।
साधारणानि कुर्वीत शीतमुष्णान्वितं तथा ॥

इति प्रकृतयः।

अथ सत्त्वानि—

देवसत्त्वा प्रसन्ना स्यात्कायोऽस्याः सुरभिर्मृदुः।
नृसत्त्वा सरला दक्षा नोपवासैश्च खिद्यते ॥

नागसत्त्वा भ्रान्तिशीला बहु श्वसिति जृम्भते।
यक्षसत्त्वा त्रपाहीना कोपनोद्यानकेलिधीः ॥

सा तु गन्धर्वसत्त्वा या कलासु कुशलाशया।
अरोषादित्यत्रेषस्रक्गन्धसंगीतकप्रिया ॥

पिशाचसत्त्वा निर्मानां मद्यमांसाधनल्पभुक्।
काकसत्त्वा विलोलाक्षी सोद्वेगात्यशनार्तिभाक् ॥

कपिसत्त्वा चलस्वान्ता नखदन्तरणप्रिया।
खरसत्त्वा विराधातसक्ता विप्रियवाग्रता ॥

इति सत्त्वानि।

प्राधान्यं प्रकृतेर्जात्यादिषु तत्त्वं त्विदं पुनः।
श्यामश्लेष्मप्रकृतिका मृगी वा वडवाथवा ॥

नरगन्धर्वगीर्वाणयक्षसत्त्वाथ बालिका।
नव्यसम्भावितारुण्या रहस्यं कामिनां परम् ॥

नव्यज्वरवती नृत्तश्लथाङ्गी मार्गविक्लवा।
मासैकप्रसवा नारी काम्या षण्मासगर्भिणी ॥छ॥

अथानुरक्तस्त्रीलक्षणानि—

प्रियं प्रेक्ष्य महान् हर्षो मुखनेत्रप्रसन्नता।
अपूर्णं सास्मितं गुप्तं सततं वा विलोकनम् ॥

हस्ताङ्घ्रिहृन्मुखे स्वेदः कम्पाङ्गे गद्गदं वचः।
नाभीपार्श्ववलिश्रोणिः स्तनमण्डलदर्शनम् ॥

नीवीस्रंसनजृम्भाङ्गभङ्गोष्ठस्पन्दनानि च।
कण्डूयनं श्रवणयो रोमाञ्चः कचमोक्षणम् ॥

सुलभा प्रार्थना बालचुम्बनालिङ्गनानि च।
सखीकण्ठग्रहः श्वासावासः संयमनं मुहुः॥
दर्शनं हस्तमुद्राणां भ्रूविक्षेपः प्रियं वचः।
अङ्गुलीस्फोटनं स्वीयपाणिना स्तनपीडनम्॥
नखैर्विलिखनं भूमेस्तृणच्छेदो रहः स्पृशा।
व्याजा कुतोऽपि तस्यान्ते चिरं संश्रयति स्थितिम्॥
मा पश्यत्विति यत्किंचित् व्याहरत्युच्चकैस्तथा॥
कासितं वा करोत्युच्चैः किंचिद् वीक्ष्यान्तिके हसेत्॥
सदा पश्यति यत्रासौ तत्र व्याजकथाः सृजेत्।
न दत्ते दर्शनं तस्यानलङ्कारान् कदाचन॥
पुष्पादिभिर्निहन्त्येनं सख्याः श्रोणिं स्पृशत्यपि।
समं तत्परिवारेण प्रीतिद्यूतं कथां सृजते।
कति नार्यः प्रिया कास्य तल्लोकमिति पृच्छति॥
शय्यासने स्वयं याति गुह्यस्पर्शे प्रहृष्यति।
प्राक् चुबति तथा श्लिष्येत्तद्वाक्यान्यनुवर्त्तते॥
सखीनां पुरतो वक्ति परोक्षे तद्गुणावलीम्।
श्रुत्वा हृष्यति तद्वार्त्तां प्रीता पृच्छेत् पुनः पुनः॥
तस्या द्वेषिणिविद्वेषं मित्रे प्रीतिं करोत्यलम्।
तद्याते दुर्मनस्का स्याद्दह्यते विरहाग्निना॥
तद्दुःखे दुःखिनी तस्य सुखे च सुखिनी भवेत्।
नित्यं प्रेषयते तस्मै पदार्थानतिशोभनान्॥
भावानुरक्तां जानीयाच्चिह्नैरेभिर्नितम्बिनीम्।
रसिको रमयेन्नारीं रागवाननुरागिणीम्॥
निपुणा वर्जयत्येव दूरतः परिवर्जितम्।

उक्तं च—

एतत्कामफलं लोके यद्द्वयोरेकचित्तता।
अन्यचित्तकृतः कामः शवयोरिव सङ्गमः॥छ॥

अथ विरक्तस्त्रीलक्षणानि।

पश्यत्यभिमुखं नैव संयोगेऽतीव सीदति।
असौम्यनेत्रवदना स्पृष्टाङ्गा निधुनोति च॥
करोत्युक्ता कथाभङ्गं दृष्टा वदति निष्ठुरम्॥
नान्यासक्त्या करोतीत्थं तस्मात्मानं च नेच्छति॥
अस्थाने कुरुते कोपं वदनं मार्ष्टि चुम्बिता।
वराङ्गं छादयेत् स्पर्शे रते क्लेदमुपैति न॥

शेते पराङ्मुखी पूर्वं पश्चादुत्तिष्ठते पुनः ।
कृतं न मन्यते किञ्चिद् ष्कृतं च प्रघुष्यति ॥
विक्षेपवचनं ब्रातेदोषान् वक्ति सखीपुरः ।
व्यसने मुदमाप्नोति प्रवासे तु प्रहृष्यति ॥
अमित्रैस्तनुते प्रीतिं मित्रैर्द्वेषमुपेत्यलम् ।
विरक्ता लक्षणैरेभिर्लक्ष्या योषिद्विचक्षणैः ॥छा॥

त्रिप्रकारं रतं ज्ञेयं बाह्यमाभ्यन्तरं तथा ।
बाह्यमालिङ्गनाद्यं स्यात् द्वादशालिङ्गनानि च ॥
स्पष्टकं विद्धकं चैव तथा मृष्टकपीडिते ।
लतावेष्टितवृक्षाधिरूढे तिलतन्दुलम् ॥
क्षीरनीरोरूपगूढे च जघनालिङ्गनं तथा ।
वक्षोजालिङ्गनं लालाटिकं च द्वादशं मतम् ॥
अजातरत्यो स्याद्भावबोधायाद्यं चतुष्टयम् ।
स्पष्टकं व्याजतः स्पर्शो मार्गे सम्मुखयोर्मिथः ॥
नरं यद्गृह्णती किञ्चिदुपविष्टमथ बोधितम् ।
विध्येत्स्तनाभ्यां तां सोऽपि गाढं गृह्णाति विद्धकां ॥
यदुत्सवादौ ध्वान्ते वा गच्छतोरङ्गसङ्गमः ।
तदुद्धृष्टं तदेव स्यात् पीडितं कुड्यपीडनात् ॥
आपूरत्या रागवृद्धयै स्युरष्टालिङ्गनानि तु ।
अधिकृत्य स्थित कान्तां तत्राद्यालिङ्गनद्वयम् ॥
कण्ठालं विभुजा कान्तं वेष्टयन्ती लतेव यत् ।
नमयित्वा मुखं चुम्बेत् तल्लतावेष्टितं मतम् ॥
प्रियाह्रिमह्णैकेन तदूरुमपरेण च ।
आक्रम्यैकं भुजं कृत्वा तत्पृष्टेऽन्य तदंशगम् ॥
चुम्बनार्त्ता ससीत्कारं यत्र वाच्छन्ति वल्लभा ।
प्रियं वृक्षमिवारोढुं तत्स्याद्वृक्षादिरूढकम् ॥
सुप्तोपविष्टसंश्लेषप्रकाराः षट् भवन्ति तु ।
मिथुनं यत्र पार्श्वस्थं स्पर्द्धयैव भुजादिभिः ।/
मिथेऽङ्के लीयते बाढं तद्भावेतिलतन्दुलम् ।
अंके तल्पे वाभिमुखं स्थित यन्मिथुनं मिथः ॥
आश्लेषाद्विशती बाङ्गं क्षीरनीरं वदन्ति तत् ।
निजोरुद्वन्द्वसंदेशात् प्रियोरुद्वन्द्वपीडनम् ॥
प्रियेण क्रियते यत्र तत् स्यादूरूपगूढकं ।
जघनेन प्रिया यत्र निष्पीड्य जघनं प्रियां ॥

आरोहे चुम्बनादीच्छुर्जघनालिङ्गनं तु तत् ।
प्रियोरसि स्तनौ न्यस्य तत्रैवावेशयेत् पुनः ॥
सर्वाङ्गस्य भरं यत्र तत्स्तनालिङ्गनं मतम् ।
आस्यमास्येद् दृशोऽन्यस्य दृश्यौ श्लिष्यति वल्लभा ॥
ललाटेन ललाटं यत् ज्ञेयं लालाटिकं तु तत् ।

इत्यालिङ्गनानि ।

भालनेत्रकपोलौष्ठनासिकाग्रमुखान्तरम् ।
कण्ठस्तनावुरश्चेति चुम्बनस्थानकानि तु ।
तथा कर्णाटलाटानां कक्षा नाभ्यूरुसन्धयः ॥

इति चुम्बनानि ।

ओष्ठौ शिरः स्तनौ वक्षो नाभिर्मदनमन्दिरम् ।
स्मरस्य स्थानकान्यष्टौ स्पर्शनीयानि कामिना ॥
भ्रूतालुनेत्रकर्णौष्ठं मध्यनासाग्रचूचुके[65] । पार्श्वं हि दन्तमूले च जिह्वाग्रे भ्रमणं सृजेत् ॥

इति स्पर्शना—

पार्श्वद्वये स्तनतटे कण्ठे वक्षसि कक्षयोः / नाभौ बस्तितटे पृष्ठे स्फिक् पिण्डजघनोरुषु ॥
नखक्षतानि देयानि कुशलैः स्मरदीप्तये । अङ्गुष्ठाग्रेण संल्लेखैर्घटनारिवलैः ॥
हृत्वोरं ते स्तनौष्ठेषु स्पष्टमन्ते कृतध्वनिः । अव्यक्तरेखं रोमाञ्चकारिच्छुरितकं तु तत् ॥
कन्धराकुचकण्ठेषु नखाङ्क कुटिलो बुधैः । देयः स त्वर्द्धचन्द्राख्यः कामशास्त्रविदां मतः ॥
उभावभिमुखौ तौ तु मण्डलं मुनिनोदितम् । तच्च योज्यमूरुसन्धेभगमूर्ध्नि कुकुन्दरे ॥
रेखाकारो नखाङ्को यः सा रेखा वितुदुना मता । स्थानेषु सकलेष्वस्य नातिदीर्घं प्रयोजनम् ॥
सैव वक्राग्रतो रेखा स्यात् व्याघ्रनखं तु तत् । नखास्थानेषु सर्वेषु तत्प्रयुंजीत कामुकः ॥
कुचोपरि चलाक्षीणां या रेखा पञ्चभिर्नखैः । चूचुकाभिमुखं कृत्वा मयूरपदकं हि तत् ॥
नखक्षतानि क्लृप्तानि पञ्चासन्नानि कामिनाम् । कान्तानां चूचुकद्वन्द्वे शशकप्लुतकं तु तत् ॥
नखक्षतानि चोत्पलपत्राकाराणि योषितां । कांचीमार्गेऽथ कुचयोस्तत् स्यादुत्पलपत्रकं ॥
प्रवसन् कुचनोर्वोः कामी कुर्वीत सुभ्रुवां । नखलेखास्त्रिचतुरस्तद्धि योगार्त्तियापकाः ॥

इति नखक्षानि ।

पक्षोपरि गण्डयुगे भाले कण्ठधरौष्ठयोः । वक्षसि स्तनयोः कक्षान्तरे दन्तक्षतं सृजेत् ॥
रक्तत्वमात्रलथं यन्मूढकं तद्रदक्षतं । तदेव शेषसंयुक्तं मुचुनकमुदाहृतम् ॥
दन्तद्वयाग्रदशनात्कृतद्विन्दु बिन्दुसन्निभः । कपोलेऽधरमध्ये च द्वयमेतत् प्रयोजयेत ॥

---

६५. 'चूचके'—दे. प. ।
६६. जिह्वाग्रभमणं—सं, प. २, सं. प. २ ।

न बहिर्नास्त्यंता दन्तैरशस्त्रधीर्दशेन्त् । धत्ते यत्तः पराशोभामीषल्लक्ष्यकृत हितम् ॥
दशनोष्ठैस्तु संयुक्तैरभ्यासाद्गण्डयोः कृतम् । प्रवालमणिरूपं यत् प्रवालमणिरेव सः ॥
मणिमालावद्दशनद्वन्द्वाग्रोत्थाक्षतावलिः । मणिमाला गलत्कक्षा सवंक्षणोरुषु सोचिता ॥
दन्तक्षतानां बिन्दवाकाराणां मालिका भवेत् । सा बिन्दुमाला वक्षोजकक्षालातोरुवंक्षणे ॥
यत् खण्डाभ्रवद्दन्ताग्रलेख्यं विषमकूटयुक् । स्तनयोर्मण्डलाकारं मतं खण्डाभ्रकं तु तत् ॥
दीर्घास्ताम्रान्तरा बह्वोरेखा दन्तक्षतोद्भवाः । वराहचर्चितं प्राहुस्तन्नारीस्तनमण्डलम् ॥
नवसङ्गे प्रकोपान्ते प्रवासे पुनरागमे । योज्यं वा मदमत्तासु कर्मदन्तनखोद्भवम् ॥

इति दशनरतक्षतानि । इति बाह्यरतानि ।

यथासाम्यं यथायोगं बाह्यं कृत्वाऽखिलं रतम् । प्रिया याः प्राप्तभावायास्ततो नीवीं विमोक्षयेत ।
अतः शास्त्रान्तरे ज्ञेयं नरैराभ्यन्तरं रतम् । अत्रैवावसरे कुर्यात् स्त्रीणां प्रहणनं नरः ॥
समङ्कोचितावहस्ताभ्यां कामी प्रसृतकेन च । मुष्टिच्छ्यसरलैश्च स्त्रीणां प्रहणनं सृजेत् ॥
सकुञ्चितं सकुञ्चिताखिलाङ्गुलिकरेण तु । अवहस्तो हस्तपृष्ठं किञ्चन प्रसृतांगुलिः ॥
(तत्:) प्राहुः प्रसृतं प्राज्ञा समो हस्तः प्रसारितः । मुष्टिर्मनीषिभिः प्रोक्त पाणि सं पि ॥
साच्छटा मध्यमाङ्गुल्या ताडनं यद्विधीयते । सरलः सरलीभूत सर्वाङ्गुलिधरः करः ॥
मौलिभालं कपोलौ च वक्षोजद्वितयान्तरम् । पृष्ठं जघनभागश्च स्थानं प्रहणनस्य तु ॥
कामिना क्रियमाणे तु तस्मिन् प्रहणनं तदा । कुर्वीत कान्ता सीत्कारं हिल्कृतिं तथा ॥
पूत्कृतं श्वसितं व्याजरुदितानि च कूजितम् । निवारणालमर्थाश्च मोक्षार्थान् विविधान् (र) तान् ॥
युग्मं कामुकोऽपि ततः कुर्यात् पारापतशुकार (त्र?)वान् । षडंहितहंसहारीतखकोकिला खकारवान् ॥
सँकोचितेन तां मूर्ध्नि विवदन्ती तु ताडयन् । मनोहराणि कुर्वीत कूजितादीनि साऽपि तत् ॥
अवहस्तेन प्रहरेत् कामीकुचयुगान्तरे । हिल्कारप्रभृतीन् शब्दान् तत्र कुर्वीत कामिनी ॥
दाक्षिणात्याःकुरङ्गाक्षाः(क्ष्याः) कन्दर्पोद्दाममानसाः । पाषाणगोलकाद्यैश्च ताडनीया हृदन्तरे ॥
जघनस्थलपार्श्वे स्त्री ताडया प्रसृतकेन वा । पृष्ठे क्रोडोपविष्टाया मुष्टिना प्रहरेत् पुनः ॥
छटया ताडयेद्भाले सरलेन कपोलयोः । कूजिते कूजितं कुर्याद्रुदिते रुदितं पुमान् ॥
यदा मृद्वी मृगाक्षी स्याद्दृढः कामी तदा हृदि । ध्यायेत् तस्या गुणान् प्रीतिमात्मनो मार्दवेच्छया ॥
अथाऽन्यस्या स्त्रियो देहे सौंदर्यवरविभ्रमान् । स्मारं स्मारं रताभिज्ञः कुर्यान्मार्दवमात्मनः ॥
दृढः स्यात् पर्वतोद्याननद्यादिध्यानतः सुधीः । वानरं वा स्मरेद्दक्षः शाखि शाखावलम्बितम् ॥
इत्थमन्यमनस्कत्वाद्भवेत् कामी चिरं दृढः । इत्थं कुर्यात् तथा कामी द्रुतिसौख्यं समं यथा ॥
एवं गाढानुरक्ता स्त्री नेतरं नरमिच्छति । या श्र (स्र?) स्तावयवा त्यक्तलज्जा संमीलितेक्षणा ॥
लीनाङ्गे कामिनः संकोचिताङ्गी कूणितानना । ध्यानस्थेव विषण्णेव चिरं संमूर्च्छितेव च ।
स्थिरा च स्मारशीघ्रज्ञैर्ज्ञेया वृत्तेतिसङ्गता । युग्मम् ।
रदैः खादति हस्ताग्र धुनाति स्वेदमुद्वहेत् । न ददाति समुत्थानं वचो ब्रूते च निष्ठुरम् ॥
सकोपा हन्ति पादेन विलुम्पति नखैः प्रियम् । रतावसाने या नारी स्मरतृप्ता न सा ध्रुवम् ॥युग्मं

पुनरेव ततस्तस्या बाह्यान्तरतक्रमैः। अनुरागी रताभिज्ञः कुर्वीतोपक्रमं युवा ॥
इत्थमुक्तप्रकारेण दम्पत्योः रममाणयोः। भावसम्भावितस्नेहो वृद्धिमाप्नोत्यहर्निशम् ॥
इत्याभ्यन्तररतं वात्स्यायनप्रभृतिशास्त्रपरम्पराभ्यः काव्योपकारकरणं रतिसारमेतत् ॥
श्री वायटीयगणभृज्जिनदत्तसूरिशिष्याग्रणीरमरचन्द्रमुनिर्लिलेख ॥

इति श्री वायटगच्छीय श्रीजिनदत्तसूरिशिष्यपण्डित श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलता वृत्तिविवचने परिमलनाम्नि वर्ण्यस्तबकोल्लासो राजादिवर्ण्य स्वभावविभावनो दशमः प्रसरः ॥
अन्यत् पुरुषस्त्रीलक्षण गजलक्षणमश्वलक्षणं रत्नपरीक्षादिकं च मृत्कववकलाकलापाद् विज्ञेयम्। अत्र ग्रथ ३६५ ।छ॥

अथ कविसमयः। आर्षं परम्परायतमशास्त्रीयमलौकिकम्। बध्नन्ति कथयोऽयं स कवीनां समयो मतः।
प्रमाणं कविसमयो वस्तुवृत्तिस्तु न क्वचित्।
असतोऽपीत्यादि।

जात्यादेः जातिद्रव्यगुणक्रियादिः। जात्यादेरसतोऽपि निबन्धेन, जात्यादेः सतोऽप्यनिबन्धेन, जात्यादेर्नियमेनातिप्रसक्तस्यावधारणेन ॥छ॥

रत्नादीत्यादि—

आदिशब्दात् सुवर्णादिवत्। तत्र पर्वते रत्नानि यथा—

नीलाश्मरस्मि(श्मि)पटलानि सहेभमुक्तसीत्कारशीकरविसृञ्जि तटान्तरेषु।
आलोकयन्ति सरलीकृतकण्ठनाला सानन्दमम्बुदधियात्रा मयूरनार्य्यः ॥

सुवर्णं यथा—

नागावासश्चित्रपोताभिरामः स्वर्णस्फातिव्याप्तदिक्चक्रवालः।
साम्यात् सख्यं जग्मिवानम्बुराशेरेष ख्यातस्तेन जीमूतभर्तुः ॥

जलाशयमावहं यथा—

आसीदस्ति भविष्यतीह च जनो धन्यो धनी धार्मिको
यः श्रीकेशववत् करिष्यति पुनः श्रीमत्कुडङ्गेश्वरम्।
हेलादोलितहंससारसजलक्रेंकारसम्मूर्च्छितै—
रित्याघोषयतीव तत्रवनदी यच्चेष्टितं वीचिभिः ॥

नभो नद्यां जलगजा यथा—

तन्मदाघ्रदृशामगोचरः सांद्रमंदमुरजस्वनस्पृशा।
सौरमौरजिकराजयो यथुर्वारिवारणगणाऽस्य गर्जिषु ॥

नदीषु पद्मानि यथा—

दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥
(मेघ.पू.)

---

६९. 'सुपर्णादयश्च' पा.प. १।

नीलोत्पलानी यथा—

गगनगमनलीलारम्भितान्[1] स्वेदबिन्दून् मृदुभिरनिलचारैः खेचराणां हरन्तीं ।
कुवलयवनकान्त्या जाह्नवीं सोऽभिपश्यत् दिनपतिसुतयेव व्यक्तदत्ताऽङ्कपालीम् ।

एवं कुमुदाद्य(न्य?)पि।

तिमिरेत्यादि। तिमिरस्य मुष्टिग्राह्यता यथा—

तन्तुलग्ना इव ककुभः क्ष्मावलयचरणचारमात्रमिव।
चालिकदध्नीं[2] मुष्टिं मुष्टिग्राह्यं तमः कुरुते ॥

सूचिभेद्यं यथा—

पिहिते कारागारे तमसि च सूचीमुखाग्रदुर्भेद्ये।
मयि च निमीलितनेत्रे तथापि कान्ताननं व्यक्तम् ॥

ज्योत्स्ना अञ्जलिग्राह्यतादि यथा—

शङ्खद्रावितकेतकोरदलवः श्रोतःश्रियं बिभ्रती। येऽयं मौक्तिकदामगुम्फनविधेर्योग्यच्छविः प्रागभूत्।
औत्सुक्याकलशीभिरञ्जलिपुटैर्ग्राह्या मृणालाङ्कुरैः पातव्या(च)शशिन्यमुग्धविभवे सा वर्त्तते चन्द्रिका॥

शुक्लत्वेत्यादि। यशसो शौक्ल्यं यथा—

तमः स्तोकोऽपि नाग्रे श्वसितमविकलं चक्षुषां सैव वृत्ति-
मध्ये क्षीराब्धिमग्नाः स्फुटमथ च वयं कोऽयमीदृक् प्रकारः।
इत्थं दिग्भित्तिरोधः क्षतविसरतया मांसलत्वाद्यशोभिः
स्तोकावस्थानदुस्थैस्त्रिजगति धवले विस्मयं ते मृगाक्ष्यः॥

हास्यस्य यथा—

अट्टहासच्छलेनास्याद्यस्यफेनौघपाण्डुराः। जगत्क्षय इवापीताः क्षरन्ति क्षीरसागराः॥

दुष्कीर्त्तेः कार्ष्ण्यं यथा—

प्रसरन्ति कीर्त्तयस्ते तव च रिपूणामकीर्त्तयो युगपत्।
कुवलयदलसञ्चलिताः प्रतिदिशमिव मालतीमालाः।

हत्वोरं ते स्तनौष्ठेषु स्पष्टमन्ते कृतध्वनिः। अव्यक्तरेखं रोमाञ्चकारिच्छुरितकं तु तत् ॥

पापस्य यथा—

उत्खातनिर्मलकृपाणमयूखलेखाश्यामाचिता तनुरभूद्दशकन्धरस्य।
सद्यः प्रकोपकृतकेशववंशनाशसंकल्पसंजनितपापमलीमसेव ॥

प्रतापे रक्तौष्ठता यथा—

यदरिद्विषां कवलयन्महो महद्द्वियदङ्गणे कवलमाद्यमक्षिपत्।
तमहो महोत्साभहिमच्छविच्छला अधुना पलाययति कालवायसः।

---

१. 'लम्भितान्' सं १, सं २
२. 'चालक'—पा. १

क्रोधस्य रक्तत्वं यथा—

स्थानकुट्टिमतलप्रतिबिम्बितेन कोपप्रभाप्रसरणाटलविग्रहेण।
भीमेन मूर्छितरसातलकुक्षिभाजां भूमिश्चचाल चलतादिरवर्तिनि वै ॥

अनुरागस्य रक्तत्वं यथा—

गुणानुरागमिश्रेण यशसा तव सर्पता।
दिग्वधूनां मुखे जातमकस्मादर्धकुङ्कुमम् ॥

विभावर्यामित्यादि—चक्रवाकमिथुनस्य भिन्नतयाऽऽश्रयणं यथा—

संक्षिप्तायामवनोम्तत्पाल्लीनां तनयता पयःपूरम्।
रथचरणाह्वयवयसां किं नोपकृतं निदाघेन ॥

ज्योत्स्नापानं चकोराणां यथा—

एतास्ता मलयोपकण्ठसरितामेणाक्षिरोधो भुवः
चापाभ्यासनिकेतनं भगवतः प्रेयो मनोजन्मनः।

यो सुश्यामनिशासु पीततमसो मुक्तामयश्चन्द्रिकाः
पीयन्ते विवृतो च चञ्चुविचलत्कण्ठं चकोराङ्गनाः ॥१

वसन्तेत्यादि। वसन्ते मालतीपुष्पस्यानिबन्धो यथा—

यद्यपि चन्दनविटपी विधिना फलकुसुमवर्जितो विहितः
निजवपुषैव परेषां तथापि सन्तापमपहरति ॥

फलस्य शोकेऽप्यनिबन्धो यथा—

ददृशाते जनैस्तत्र यात्रायां सकुतूहलैः।
शीरास्त्रपुण्डरीकाक्षौ पक्षाविव सितासितौ ॥

मासिर सम। जोत्स्ना पक्षयोरुभयोरपि।
तत्रैकशुक्लतां यातो यशः पुण्यैरवाप्यते ॥छ॥

कामीत्यादि, रहितत्वेत्यादि कामिदन्तानां कुन्दकुड्मलानां च रक्तत्वस्यानिबन्धो यथा—

प्रियङ्गुश्याममम्भोधिपुरन्ध्री स्तनमण्डलम्।
अलंकर्तुमिव स्वच्छाः सूते मौक्तिकसम्पदः ॥

सरोजमुकुलानां हरितत्वस्यानिबन्धो यथा—

उद्दण्डोदरपुण्डरीकमुकुलभ्रान्तिस्पृशा दंष्ट्रया
मग्नां लावणसैन्धवेऽम्भसि महीमुद्यच्छतो हेलया।

तत्कालाकुलदेवदानवनुतैरुत्तालकोलाहलं
शौरेरादि वराहलीलमवतादभ्रंलिहाना वपुः ॥

---

१. 'संक्षिप्ताय....चकोराङ्गनाः' इदं दे.प. पुस्तके नास्ति

दिवा नीलोत्पलानां विकाश(स)स्यातिनिर्बन्धो यथा—

आलिख्य पत्रमसितागुरुणाभिरामं रामामुखेक्षणसभाजितचन्द्रबिम्बे ।
जातः पुनर्विकसनाऽवसरो यमस्य त्यक्ता सखी कुवलयं श्रवणे चकार ॥

दिवा से(शे)फालिकाकुसुमानां विस्रंसस्यानिबन्धो यथा—

त्वद्विप्रयोगो किरणैस्तथोग्रैर्दग्धास्मि कृत्स्नं दिवसा सवित्रा ।
इतीव दुःखे शशिने गदन्ती से(शे)फालिका रोदिति पुष्पबाष्पैः ॥

मुक्तेत्यादि। ताम्रपर्ण्यामिव मौक्तिकानि यथा—

कामं भवन्तु सरितो भुवि सुप्रतिष्ठा स्वादूनि सन्ति सलिलानि च शुक्तयश्च ।
एतां विहाय वरवर्णिनि ताम्रपर्णी नान्यत्र संभवति मौक्तिककामधेनुः ॥

समुद्रेष्वेव मकरा यथा—

ग...ाहार नयतो गहत्वं स्वनाममुद्राङ्कितमम्बुराशिम् ।

हिमवानेव भूर्जोत्पत्तिपदं यथा—

न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधर सुन्दरीणामनङ्ग लेखक्रिययोपयोगः ॥

मलय एव चन्दनस्थान यथा—

तापापहारचतुरो नागावासः सुरप्रियः ।
नान्यत्र मलयादद्रेर्दृश्यते चन्दनद्रुमः[1] ॥छ॥

सामान्येत्यादि। मेघानां कृष्णतैव यथा—

मेघश्यामेन रामेण पूतवेदिर्विमानराट् । मध्ये महेन्द्रनीलेन रत्नराशिरिवाबभौ ॥

रत्नानां शोणितैव यथा—

सांयात्रिकैरविरतोपहृतानि कूटैः श्यामासु तीरवनराजिषु सम्भृतानि ।
रत्नानि ते दर्धात कञ्चिदिहायताक्षि मेघोदरोदित दिनाधिप बिम्बशाकाम् ॥

पुष्पाणां शुक्लतैव यथा—

पुष्पप्रवालोपहिते यदि स्यात् मुक्ताफले वा स्फुटविद्रुमस्थम् ।
ततो कुर्याद्विशदस्य तस्य ताम्रौष्टपर्यस्त रुचः स्मितस्य ॥(कुमार. १.४४)

तथेत्यादि। कोकिलरुतं वसन्त एव यथा—

वसन्ते शीतभीतेन कोकिलेन वने रुतम् ।
अन्तर्जलगताः पद्माः श्रोतुकामा इवोत्थिताः ॥

---

१. 'तापापहार....चन्दनद्रुमः' दे. पुस्तके श्लोक एषः
'मेघानां कृष्णतेवयथा—'इत्यस्यानन्तरं पुनरुक्तम् ।
दायादवर्गेषु परिस्फुरत्सु दंष्ट्रावलेपो मकरस्य वन्द्यः ।

मयूरनृत्तगीते च वर्षास्वेव यथा––

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः।
कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि॥

नीलेत्यादि। नीलकृष्णयोरैक्यं यथा––

नदीं तूर्णं कार्ष्ण्यप्रसृतपुलिनां दाक्षिणात्याङ्गनाभिः।
समुत्तीर्णो वर्णानुभयतटचला वद्धवानीरहारम्।
तटे सह्यस्योच्चैः स्वसलिलनिवहो भाति नीलः स यस्याः।
प्रियस्याश्लेषीति लुलित इव घनः केशपाशः सुकेश्याः॥

हरितकृष्णयोरैक्य यथा–––

मरकतसदृशां च यामुनस्फटिकशिलाविमलं च जाह्नवम्।
तदुभयमुदकं पुनातुवः हरिहरयोरिव सङ्गतं वपुः॥

श्यामकृष्णयोरैक्यं यथा––

एतत्सुन्दरि नन्दनं शशिमणिस्निग्धालबालद्रुम-
मन्दाकिन्यभिषिक्तमौक्तिकशिले मेरोस्तटे नन्दति।
यत्र श्यामनिशासु मुञ्चति मिलन्मन्दप्रदोषानिला–
मुद्दामासरयोषितामभिरतं कल्पद्रुमश्चन्द्रिकाम्॥

पीतरक्तयोरैक्यं यथा––

लेखया विमलविद्रुमभासा सन्ततं तिमिरमिन्दुरुदासे।
दंष्ट्रया कनकभङ्गपिशङ्गया मण्डलं भुव इवादिवराहः॥

शुक्लगौरयोरैक्यं यथा–––

कैलाश (स) गौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम्।
अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भतुल्यम्। (रघु. २)

नागसर्पयोरैक्यं यथा–––

हे नागराज बटुमस्य नितम्बभागं भोगेन गाढमभिवेष्टय मन्दराद्रेः।
सोढा विषह्यविषवाहनयोगलीलापर्यंकबन्धनविधेस्तव कोऽतिभारः॥छ॥

महार्णवेत्यादि। महार्णवसागरयोरैक्यं यथा–––

रङ्गत्तरङ्गभ्रूभङ्गैस्तर्जयन्तीमिवापगाः।
स ददर्श पुरो गंगां सप्तसागरवल्लभाम्॥

क्षीरक्षारसमुद्रयोरैक्यं यथा–––

शेतां हरिर्भवतु रत्नमनन्तलक्ष्मीप्रसूतिरिति नो विवदामहे हो।
हा ह ह हुं रसपथास्तृषितस्य जन्तोः किंत्वस्ति कूपपयसः समारोर्जलधेः॥

कमलासम्पदोरैक्यं यथा–––

दोर्मञ्जीरितमन्दरेण जलधेरुत्थापितायां स्वयं
यां भूत्वा कमठः पुराणककुदन्यस्तामुदस्तम्भयत्।

तां लक्ष्मीं पुरुषोत्तमः पुनरसौ लीलाञ्चितभ्रूलता—
निर्देशैः समवीविशत् प्रणयिनां गेहेषु दोष्णि क्षितिम् ॥

कामध्वजे मकरमत्स्ययोरैक्यं यथा—

चाप पुष्पमयं गृहाण मकरः केतुः समुच्छ्रीयतां
चेतो लक्ष्यभिदश्च पञ्चविशिखा पाणौ पुनः सन्तु ते ।
दग्धा क्वापि तवाकृतिप्रतिकृतः कामोऽसि किं गूहसे
रूपं दर्शय नात्र शंकरभयं सर्वे वयं वैष्णवाः ॥

यथा च—

मीनध्वजः स्वमसि नो न च पुष्पधन्वा केलिप्रकाश तव मन्मथता तथापि ।
इत्थं त्वया विरहितस्य मयोपलब्धा कान्ताजनस्य जननाथ चिरं विलापाः ॥

यथा वा—

आपातमारुतविलोडितसिन्धुनाथो ह्यक्कोरभीतपरिवर्तितमत्स्यचिह्नम् ।
उल्लङ्घ्य यादवमहोदधिभीमबेलां द्रोणाचलं पवनसूनुरिहाद्धरामि ॥

द्वादशानामित्यादि । नारायणेत्यादि । द्वादशानामर्थादित्यानामैक्यं यथा—

यस्याऽधोधस्तथोपर्युपरि निरवधि भ्राम्यतो विश्वमश्वै—
रावृत्तालानि लीलां रचयति रचतो मण्डलं चन्द्रधाम्नः ।
सोऽव्यादुत्तप्तकार्तस्वरसरलशरस्पर्द्धिभिर्धामदण्डैः
उद्दण्डैः प्रापयन्त्यः प्रचुरतमतमः स्तोमसस्तं समस्तम् ॥

समुद्रात्रिनेत्रोत्पन्नयोरैक्यं यथा—

विद्या विश्वसृजो युगादिगुरवः स्वायम्भुवाः सप्त ये
तत्रात्रिर्दिवसं दधे नयनजं ज्योतिः स चन्द्रोऽभवत् ।
एका यस्य शिखण्डमण्डनमणिर्देवस्य शम्भोः कला
शेषाभ्योऽमृतमाप्नुवंति च सदा स्वाहासुधा(स्वधा)जीविनः ॥

तथा च—

यदिन्दोरन्वेति व्यसनमुदयं वा निधिरपा-
मुपाधिस्तत्रायं जयति जनिकर्तृः प्रकृतिता ।
अयं कः सम्बन्धो यदनुहरते तस्य कुमुदं
विशुद्धाः शुद्धानां ध्रुवमनभिसंधिप्रणयिनः ॥

शशैणसोरैक्यं यथा—

दोर्भञ्जीरितमन्दरेण इत्यादि । यथा च—

येन स्वस्त(स्थ?)मनोभवेन वलिजित्कायः पुरा स्त्रीकृतो
यो गङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रः प्रियः ।

यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः ।
सो व्यादिष्टभुजङ्गहारवलयः त्वं सर्वदोमाधवः ॥

दानवासुरदैत्यानामैक्यं यथा—

जयन्ति वाणाः सुरमौलिलालिताः दशास्यचूडामणिचक्रचुम्बिनः ।
सुरा सुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बकपादपांश(स)वः ॥

यथा च—

तं शंबरासुरशराहतशल्यभारकेयूररत्नकिरणारुणबाहुदण्डम् ।
पानांसलग्नदयिताकुचपत्रभंङ्गं मीनध्वजं जितजगत्त्रितयंजयेत् कः ॥

यथा च । आसीद्दैत्यो हयग्रीव इति । यथा च—

हयग्रीवं प्रति–दानवाधिपते भूयो भूयोऽथ किं न नीयते सहायतां कृतान्तस्य क्षयाभिप्रायसिद्धिषु ॥

यथा च—

महासुरसमाजेऽस्मिन्न चैकोऽप्यस्ति सोऽसुरः ।
यस्य नाशं निनिष्णेषनीराजितमुरःस्थलम् ॥

एवमन्येऽपि भेदा अभ्यूह्याः ॥छ॥

स्त्रीणामित्यादि– शुक्लता यथा—

तिष्ठन्त्या जनसंकुलेऽपि सुदृशा सायं गृहप्राङ्गणे
तद्द्वारं मयि निःसहालसतनौ वीक्षा मृदुः प्रेङ्खते ।

ह्रीनाम्ना नयनैव लोलभरल निःश्वस्य तत्रान्तरे
प्रेमार्द्रा शशिखण्डपीडिममुषो मुक्ताः कटाक्षच्छदाः ॥

श्यामता यथा—

अथ पथि गमयित्वा रम्यक्लृप्तोपकार्ये कतिचिदवनिपालः शर्वरीः शर्वकल्प ।
पुरमविशदयोध्यां मैथिलीदर्शनीनां कुवलयितगवाक्षां लोचनैरङ्गनानाम् ॥

कृष्णता यथा—

पादन्यासक्वणितरसनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।

वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू–
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्॥ (मेघदूत-पूर्व)

शुक्लश्यामता यथा—

अदृश्यन्त पुरस्तेन खेलाः खञ्जनपङ्क्तयः । अस्मर्यन्त(वि)निश्वस्य प्रियानयनविभ्रमाः ॥

शुक्लकृष्णता यथा—

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणाम् ।

कुन्दक्षेपानुगमधुकरश्रीमुखामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतुहलानाम् ॥ (मेघदूत-पूर्व)

बहित्यादि। शिवचन्द्रस्य बालत्वं यथा—

मालायमानामरसिन्धुहंसं कोटीरवल्लीकुसुमं भवस्य।
दाक्षायणीविभ्रमदर्पणश्रीर्बालेन्दुखण्डं भवतः पुनातु ॥

कामस्य मूर्तत्वं यथा—

अयं स भुवनत्रयप्रथितसंयमः शङ्करो
बिभर्ति वपुषाऽधुना विरहकातरः कामिनीं
अनेन किल निर्जिता वयमिति प्रियायाः करं
करेण परिताडयन् जयति जातहासः स्मरः ॥

अमूर्तत्वं यथा—

धनुर्माला मौर्वीक्वणदलिकुलं लक्ष्यमबलामनोभेद्यं शब्दप्रभृतय इमे पञ्च विशिखाः।
इयान् जेतुं यस्य त्रिभुवनमनङ्गस्य विभवः स वः कामान् कामो दिशतु दयितापाङ्गवसतिः ॥छ॥

इतिश्री वायटगच्छीय श्रीजिनदत्तसूरिशिष्यपण्डित श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि वर्ण्यस्तबकोल्लासो कविसमयकीर्तन एकादशः प्रसरः ॥छ॥ग्रंथ: १८०॥

देवेत्यादि।

देवाः स्युरर्हद्ब्रह्मेश विष्णु बुद्धाग्निमन्मुखाः।
देव्यः सरस्वतीलक्ष्मीगौरीप्रभृतयः श्रुताः ॥

चतुर्विंशतिरर्हन्तस्तत्राद्यो वृषभः प्रभुः।
द्वितीयोऽस्त्वजितस्वामी तृतीयः सम्भवाभिधः ॥

अभिनन्दनश्चतुर्थः पञ्चमः सुमतिः प्रभुः।
षष्ठ पद्मप्रभनामा सुपार्श्वः सप्तमः पुनः ॥

अष्टमश्चन्द्रप्रभश्च नवम सुविधिः प्रभुः।
दशमः शीतलस्त्वेकादशः श्रेयांस तीर्थकृत् ॥

द्वादशो वासुपूज्यो च विमलस्तु त्रयोदशः।
अनन्तश्चतुर्दशश्च धर्मः पञ्चदशस्ततः ॥

षोडशः शान्तिनाथस्तु कुन्थुः सप्तदशः पुनः।
अरनाथोऽष्टादशोऽथ मल्लिरेकोनविंशकः ॥

सुव्रतो विंशतितमः त्वेकविंशो नमिः प्रभुः।
द्वाविंशो नेमिनाथस्त्रयोविंशः पार्श्वतीर्थकृत् ॥

चतुर्विंशो महावीरः सर्वेऽष्टादशभिस्त्वमी।
दोषैर्मुक्तश्चतुस्त्रिंशन्मितैरतिशयैर्युताः ॥

परिक्षीणाऽष्टकर्माणः प्राप्तानन्तचतुष्टयाः।
चतुर्विधस्यसङ्घस्य सन्तु कल्याणकारिणः ॥

तप्तकाञ्चनमनाभिमरीचिनाभिभूपतनुभूवृषभाङ्कः ।
श्रेयसेऽस्तु वृषभो मरुदेवी कुक्षिवारिजपिलासमरालः ॥ १ ॥

सङ्कशानुपरितप्तसुवर्णव्यावर्ण्यमूर्त्तिरजितो गजराजकेतुः ।
कर्मावलीभिरजितो जितशत्रु गोत्रजन्मा तनोतु विजयातनयो नयं वः ॥ २ ॥

सेनाङ्गजन्मा विजितान्तरारिसेनो जितारिक्षितिपस्य सूनुः ।
तुरङ्गलक्ष्मा कनकाभलक्ष्मी[1] श्रीसम्भवः शंभवतां तनोतु ॥३॥

बिभ्राणो धृतकपिलाञ्छनं शरीरं स्वर्णश्रीशुचिरुचिसंवरस्य सूनुः ।
सिद्धार्था तनुजनिरातनोतु नित्यं सिद्धि वो मुदमभिनन्दनो जिनेशः ॥४॥

क्रौञ्चाञ्चितः संसृति तापमेघो मेघाङ्गजन्मा सुमतिर्जिनेन्द्रः ।
स्वर्णच्छविर्यच्छतु मङ्गलानि श्रीमङ्गलाकुक्षिसरः सरोजम् ॥५॥

धरावनीशप्रभवः प्रभावः सीमासु सीमातनुजो जिनेन्द्रः ।
पद्मप्रभः पद्मसुहृन्मरीचिपद्मध्वजो वः शिवतातिरस्तु ॥६॥

श्रीप्रतिष्ठनृपवंशावतंसः स्वस्तिकाङ्करुचिरो दुरितं वः ।
श्रीसुपार्श्वविभुरस्य तु पृथ्वीनन्दनः कनकनन्दनमूर्त्तिः ॥७॥

श्रीलक्ष्मणा तनूभवो भवतामगण्यनैपुण्यपुण्यमहसे महसेनसूनुः ।
चन्द्रप्रभो जिनविभुर्भवतादतन्द्रचन्द्रप्रभाद्भुतरुचिः सितकान्तिकेतुः ॥८॥

शुभ्रश्रीर्मकरमाधतलांछनेन प्राजिष्णुः सुविधिरयं जिनाधिनाथः ।
श्रीरामाजनिरनिशं ददातु शं वः सुग्रीवक्षितिपतिवंशतल्लहंसः ॥९॥

श्रीवच्छलाञ्छिततनुर्नवकर्णिकारव्यक्ता कारणमयूष समुच्छ्रयो वः ।
श्रेयो दृढं दृढरथन्वयमौलिनन्दी नन्दासुतः सृजतु शीतलराजहंस ॥१०॥

श्रीविष्णुकुक्षिसरसीरुहराजहंसः श्रीविष्णुभूपकुलकाननकल्पशाखी ।
श्रेयां स तीर्थपतिरस्तु सुखायखड्गिलक्ष्मा विकासिनवचम्पककान्तिसम्पत् ॥११॥

जयातनूजो वसुपूज्यसूनुः श्री वासुपूज्यः सुरराजपूज्यः ।
लुनातु कर्माणि लुलायलक्ष्मा युष्माकमब्जोदरसोदरश्रीः ॥१२॥

तारुण्यचारुतराणि प्रवरां वराहचिह्नं दधत्तनुमयं विमलो जिनेन्द्रः ।
श्यामासुतः सुकृतवर्मधरः कुकर्ममर्म छिनत्तु कृतवर्म नरेन्द्रसूनुः ॥१३॥

श्येनकेतुरघकुञ्जरसिंहः सिंहसेनतनयः कनकाभः ।
सोमकोमलयशाः सुयशाभूर्यच्छतायुखमनं तमनन्तः ॥१४॥

दुरिततिमिरभानुर्भानुसूनुर्व्रतकव्रतति वितर्तितवृक्ष. सुव्रता कुक्षिजन्मा ।
भवगिरिगुरुवज्रं वज्रकेतुः सुवर्णद्युतिरुदयतु धर्मे धर्म तीर्थंकरो वः ॥१५॥

पणकेतुरचिरातनुजन्मा विश्वासेन कुलमन्दिरदीपः ।
रोचनारुचिवरोचितकान्तिः शान्तिरस्तु भव भवशान्तिकरो वः ॥१६॥

---

१. कनकासलक्ष्मीः'–दे.प., पा. प. १; पा.प.ब२ ।

सूरान्वयव्योमविकाशसोमः श्रीकुन्थुनाथः कनकोज्ज्वलश्रीः।
श्रीकुक्षिवल्लीनवपुष्पगुच्छः छिनत्तु दुःखं छगलांछनो वः ॥१७॥
धामबिभ्रदतिगोपति नन्द्यावर्तकेतुररतीर्थकरो वः।
श्रीसुदर्शनसुतोऽवतु देवसंभवो भवतु कुम्भलाञ्छनः ॥१९॥

धाराधरस्पर्द्धितनुप्रभौर्मिकूर्माङ्कितः श्रीमुनिसुव्रतो वः।
सुमित्रपुत्रोऽस्य तु पापतापछद्मानि पद्मोदरपद्महंसः ॥२०॥

नीलोत्पलाङ्कितततनुर्विजयावनीश वंशावतंसरुचिरः स्फुटहाटकश्रीः।
संसारभीरुजनवज्रवप्रो विप्राजनिर्नमिजिनो व्रजिन भिनत्तु ॥२१॥

स्वामी समुद्रविजयान्वयकैरवैकचन्द्रः समुद्रविजयाद्भुत देहदीप्तिः।
शङ्खाङ्कितो भवतु संसृतिवल्लिनेमिर्नेमिः शिवा तनुभवो भवतां शिवाय।२२॥

सेव्यः शश्वत् त्रिदशनिवहेरश्वसेनान्ववायव्योमांसेरीकरणतरणिः पन्नगाधीशकेतुः।
पार्श्वस्वामी मरकतमणिः स्पर्द्धि वर्द्धिष्णुधामा वामासूनुर्भवतु भवतां मोहविद्रोहहेतुः ॥२३॥

श्रीसिद्धार्थभवो विभाविसन्दोहसन्देहकृद्देहश्रीस्त्रिशलाङ्गजस्त्रिजगती चैतन्यचिन्तामणिः।
आनन्दादमरस्तुतांह्रिकमलः श्रीवीरतीर्थङ्करः कल्याणप्रचयं प्रपञ्चयतु वः पञ्चाननाङ्कः प्रभुः ॥२४॥

इति श्रीजिनेन्द्रस्वरूपम् ॥छ॥

अथ जिनशासनदेव्यः।

छत्राकारफणत्रयः फणधरो यस्याः शिरोदेशभाक्
यद्दोर्दण्डयुगे फणामणिधरौ भोगीश्वरौ तिष्ठतु।
पत्नी श्रीधरणाभिधस्य भुजगेन्द्रस्येन्द्रनीलप्रभा
वैरोट्या मम षड्गखेटक करा देव्यस्तु रक्षाकरी ॥१॥

जात्यस्वर्णसवर्णवर्णरुचिरापात्रास्मिताम्भोरुह—

व्यग्रा वामकरद्वयांकुशलफलव्याप्तान्यहस्तद्वयं[1]

देवी कुर्कुटसर्पसर्पितगतिः पार्श्वप्रभोः शासनाधिष्ठात्री जिनसेवकेषु विपदं पद्मावती— ॥२॥

चक्रेश्वरीश्रितवरप्रदबाणचक्रपाशाढ्यदक्षिणभुजाकनकाभकान्तिः।
देवी सुपर्णगमना धृतचापवज्रचक्राङ्कुशापरभुजा भुवन पुनातु ॥३॥
बिभ्रती पुत्रमेकैकं करे कट्यां च तत्कृते। आम्रलुब्धी कराग्रे वा पातु वः सिंहवाहना ॥४॥
जीयात् कटीतटकराग्रधृतक्षुधार्त्त वत्साम्ब्रविभाकरशुभङ्करसूनुहेतोः।
सद्योविलोकसफलाम्रफलावलम्बि लुम्बीकदम्बपरिचुम्बितपाणिरम्बा ॥छ॥

अथ ब्रह्मा।

ब्रह्मा गीतचतुर्वेदश्चतुर्वक्त्रो हिरण्यरुक्।
ब्रह्मसूत्री हंसरार्थो जगत्कर्ता चतुर्भुजः ॥

---

१. पा.प. १ मध्ये श्लोकान्ते 'कुशफलव्याप्तान्यहस्तद्वया' इति पुनरुक्तं न समीचीनम्।

अस्य पत्न्यौ तु सावित्रीगायत्र्यौ भारतीसुता।
विष्णुनाभ्यम्बुजे जन्माश्रयावृद्धर्वदिगीशता॥

भारती शुभ्रभा हंसवाहना कमलासना।
चतुःपाणिस्थपद्माक्षसूत्रवीणाकमण्डलुः॥

चार्विद्यमहानिधिः पिशुनं कण्ठकनालजं धातुः।
वक्त्राम्भोजचतुष्टयमुद्दामरजोगुणं जयति॥

आसन्ने दयिताधरव्यतिकरे स्मेराणि लब्धे पुनः
सन्तुष्टानि मलीमसानि चलिते याते विषण्णानि च।

चुम्बन्त्या वदनानि वल्लभतया चत्वारि पर्यायतः
सावित्र्या विहितप्रदक्षिणविधिर्दीर्घो विधिः पातु वः॥

इति ब्रह्मा। अथेशः—

शिवे जटा शिरोगङ्गा चन्द्रभालेक्षणामला। विषश्यामलकण्ठत्वमाधारो भस्मगौरता॥

अङ्कोऽस्ति फणभृद्भूषा नृत्तं वृषभयानता। वासुकिमुण्डमाला च भूषा कण्ठकपर्दयोः॥

कल्पान्तकालनृत्तत्वं सर्वत्वसंहारकारिता। गौरी विवाहक्रीडेर्ष्यापदपातरतादयः॥

यथा ममैव।

मौलि स्वर्गधुनी जलाक्षिशिखिनोर्भालाग्रपीयूषरुक्
पीयूषद्रवकण्ठहालहलयोर्भूषास्थियोषाङ्गयोः।

आकिञ्चन्यजगत्त्रयेश्वरतयोर्यत्र स्थितिद्वेषिणो—
रप्यन्योन्यमबाधमेव विभवे तस्मै नमः शम्भवे॥

यथा ममैव।

गङ्गाम्भः सुभगोत्तमाङ्गसरसी शम्भोर्जटाली महा-
पालीमण्डलमण्डनोत्फणफणिश्रेणिद्रुसांद्राभितः॥

कल्याणव्रततीः प्रतानयतु वो यस्यां कुमारस्सरं
स्तोतुं बालीकृतमुण्डदामखुरलीकेलिश्रमे खेलति॥

इत्यादि। शिवस्य पञ्च मुखानि, नव शक्तयोऽष्टौ मूर्त्तयो, दशाऽव्ययानि। यदुक्तादिः—

पञ्चवक्त्रो नवशक्तिरष्टमूर्ति र्दशाव्ययः। सद्योजातवामदेवाघोरतत्पुरुषाः पुनः॥

ईशानस्य वक्त्राणि वामाद्यास्तस्य शक्तयः। वामा ज्येष्ठा शिवा रौद्री चित्रोन्मादकरामुखा।

काली कलेवरा भूतदमनी वनदेवताः। सूर्याचन्द्रमसौ वह्निरापोभूमिर्नभोमरुत्॥

यजमानश्चतस्याष्टौ मूर्त्तयो मातृकाश्च ताः। ज्ञानं वैराग्यमैश्वर्यं तपः, सत्यं क्षमा धृतिः॥

---

१. 'प्रमथा'—स.प. १, २।

स्रष्टृत्वमात्मारम्भोधोऽप्यधिष्ठा तु(तृ?) त्वमित्यपि। अव्ययानि दशैतानि तस्मिन् तिष्ठन्ति शङ्करे।।
अष्टौ महासिद्धयस्तु स्मृता भगवतस्त्विमाः। अणिमा महिमा प्राप्तिः प्राकाम्यं लघिमापि च।।
ईशित्वं च वशित्वं च यत्र कामावसायिता। अणोर्भावो अणिमा महानपि भवत्यणुः।।
महतो भावो महिमा अल्पोऽपि नागनगरस्थगनपरिमाणो भवति।
प्रापणं प्राप्तिः। सर्वे भावाः सन्निहिता भवन्ति तस्याः।

तद्यथा—

भूमिष्ठ एवांगुल्या चन्द्रमसं स्पृशति। प्रकृष्टः कामोऽस्य प्रकामः, तद्भावः प्राकाम्यं, इच्छानभिघातः। नास्य भूतस्वरूपैर्भूम्यादिभिरिच्छाऽभिहन्यते। भूमानुन्मज्जति मज्जति यथोदके। लघोर्भावो लघिमा, महानपि लघुर्भूत्वा इषीकतूल इवाकाशे विहरति। ईष्टे इत्येवंशील ईशी, ईशिनो भाव ईशित्वं, तेषां भूतभौतिकानां विजितमूलप्रकृतिः। स नय मीत्पादो, यो विनाशः, यच्च यथाऽवयवस्थानं, तेषामीष्टे। वशिनो भावो वशित्वं, भूतानि पृथिव्यादीनि, भौतिकानि गोघटादीनि। तेषु वशी स्वतन्त्रो भवति। ते त्वां त्वद्वश्यस्तत्कारणतन्मात्रपृथिव्यादिपरमाणु वशीकारात्तत्कार्यवशीकारः। तेन तानि यथा–अवस्थापयति यथाऽवतिष्ठन्त इत्यर्थः। यत्र कामस्तत्रावश्यतीत्येवंशीलो यत्र कामावसायी, तद्भावस्तत्ता सत्यसंकल्पता, विजितगुणार्थतत्त्वो हि यद्यदर्थतया सङ्कल्पयति तत्तस्मै प्रयोजनाय कल्पते विषमप्यमृतकार्ये भोजयन् जीवयी(य)ति ।।छ।। शिवो गजपूषपुरानङ्गकालान्धकसखा सुहृत्। गजा सुहृत् गजा सुरहंतृत्वात्। पूषा सुहृत् दक्षाध्वर-ध्वंसने हि महेश्वरेण पूर्णोदता पातिताः।

यद्वामनपुराणे—

ततः क्रोधाभिभूतेन पूष्णो वेगेन शम्भुना।
मुष्टिनाहत्य दशनाः पातिता धरणीतले।।

पुरा सुहृत् शंभोराग्नेयबाणेन त्रिपुरस्य पुष्टत्वात्। अनङ्गसुहृत्, शम्भोस्तृतीयेनाग्निना कामस्य दग्धत्वात्। कालासुहृत्, दक्षमखध्वंसे यमस्य जितत्वात्। अन्धकासुहृत्, अन्धकोटिसमरे शूलिना शूलेन प्रोतः। मखासुहृत्, दक्षस्य हि मखे महेश्वरेण विध्वंसितः।।छ।।

ब्राह्म्याद्यास्तु चर्चिकान्ता शूलिन सप्त मातरः।

ब्रह्मण इयं ब्राह्मी ब्रह्माणीति शिवप्रसिद्धमो आद्याया सांताब्राह्माद्याः शम्भौ परिकरभूतं यदुक्तम्। कथिताद्या, ब्रह्माणी, सिद्धिर्माहेश्वरी, वैष्णवी, वाराही, चामुण्डामातर सप्त। गणानु प्रथमाः पारिषदाः कूष्माण्डकादयः। तत्र कूष्माण्डकेकलिकिलो गणपतिप्रियः।

भृङ्गी वर्मी भाङ्गिरीटौ पुनर्भृङ्गिवर्म्मी भृङ्गिरिटिः सलः।
महाकालः पुनर्बाणो भूतबाहुर्वृषाणकः।
नदीश्वरः पुनर्नदी द्वारपालौ च तावुभौ।
वीरभद्रस्तु वीराजो हेरुकश्च कृतालकः।।
अथ चण्डो महाचंडः कूष्माण्डी कंकणप्रियः।
मज्जनान्मज्जनौ छागछागमेषौ महाघसः।।

---

१. 'दर्पणं चार्पणं' द.प.,पा.प. १, २. अनेनछन्दोभङ्गः जायति।

महाकपालः आलातः संतापनविलेपनौ।
महाकपाल ऐलाव्ज शङ्खवर्णः खरस्वरः॥
उक्ता माली महाजंभः श्वेतपादः खराण्डकः।
गोपालो ग्रामणी मालुः घण्टाकर्णकरंधमौ॥
कपाली जम्भको लिम्पः स्थूणाकर्णाविकर्णको।
लम्बकर्णो महाशीर्षो हस्तिकर्ण प्रमर्दनः॥
ज्वालाकर्णो भ्रमभ्रमः सहृतेः क्षेमकः पुलः।
भीषको ग्राहकः सम्भो वीभण्डो मकरानन:॥
पिशानाशी महाकुम्भो नखारिहरिलोचनः।
कूणकच्छो महाजानुः कोष्टकोटिः शिवंकरः॥
वेतालो लोमवेतालः तामसः सुमहाकपिः।
उत्तुङ्गो गृध्रजम्बूकः क्ष्ण्डानककालानकौ॥
छर्मग्रीवाजलोन्मादो ज्वालावक्त्रो विहुंडनः।
हृदयोद्वर्ततः पाण्डुश्चान्दिरित्यादयोऽपरः॥
सद्योजातो वामदेवो घोरस्तत्पुरुषस्तथा।
ईशानो मृत्युञ्जयच विजयः किरणाक्षकः॥
अघोरास्त्रोद्यश्रीकण्ठो ब्रह्मदेव इति क्रमात्।
रुद्रा एकादश प्रोक्ताः द्वादशस्तु सदाशिवः॥छ॥
गौर्यां शिवानुरागस्तदुपेक्षा, तत्कृते तपः।
तेन प्रेमपरीक्षा, तत्प्रेमक्रीडा रतोत्सवाः।
सिंहवाहनता शम्भुदेहार्द्धहरणस्थितिः॥
मनस्तालाऽभिधः सिंहः सख्यौश्च विजयाजये।
अक्षसूत्राभयाम्भोजकमण्डलुसमन्वितान्॥
बिभ्राणा चतुरः पाणीन् गौरीदेवी सुरार्चिता।
वरदाभयदौ द्वौ तु पाशाङ्कुशकृतौ करौ॥
दधाना त्रिपुरा देवी वन्दिता त्रिदशेश्वरैः।
खेटासिशूलखट्वाङ्गशस्तहस्त चतुष्टया॥
रक्तांशुका सुवर्णाभा वंद्या त्रिपुरभैरवी।
अक्षिसूत्रं तथा दंडं श्वेतचामरशङ्ककौ॥
चतुःकरेषु बिभ्राणा तोतिला विपनाशिनी।
चामुण्डा क्रूररूपोग्रनाशिकातिकृशोदरी॥

---

२. 'भविष्यति', दे.प., पा.प. १, २।

जाग्राल्लसितकपिलकेशा रक्तविलोचना।
विनीलवर्णा निर्मांसशरीरा शवबाहना॥
व्याघ्रचर्मपरीधाना जङ्घालम्बितघण्टिका।
आविष्कृतदन्तदंष्ट्रांतरालस्थांगुलीनखा॥
कपालमाला वेष्टितमौलिः षोडशबाहुभृत्।
शूलखेटधनुर्बाणान् पाशमङ्कुशघण्टिके॥
दर्पणं चाष्टभिर्हस्तैर्वज्रदण्डं कुठारकम्।
शङ्खं चक्रं गदां शक्तिं मुद्गरं बिभ्रती परम्॥
मार्जारकर्णिकाचर्ममुण्डाकुण्डलिमण्डली। पञ्चभिः कुलकम्।
कमत्यंत्तिप्रलये जगच्चामुण्डा चण्डमुण्डदैत्ययोर्मारणाद्वा। यदाह—
यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वामुपागता।
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि॥
मार्जारवत् कर्णावस्याः सा(तु?) मार्जारकर्णिका॥
चर्ममुण्डेऽस्याश्चर्ममुण्डा॥छ॥

चण्डिका शूलभिन्नैका ह्विक्रांतमहिषासुरा। तत्तद्भावानि वर्ण्यानि देवी रूपाण्यनेकशः॥

चर्ममुण्डेऽस्याश्चर्ममुण्डा॥छ॥

चण्डिका शूलभिन्नैका ह्विक्रांतमहिषासुरा। तत्तद्भावानि वर्ण्यानि देवी रूपाण्यनेकशः॥
भविष्योत्तरान्न च दुर्गानामानि।

आद्या तावन्मालक्ष्मीर्नंदा क्षेमङ्करी तथा।
शिबद्वती महारुण्डा भ्रामरी चन्द्रमण्डला॥

रेवतीहरसिद्धिश्च नवैता दुर्गसंज्ञिताः॥
स्यात् त्र्यक्षो मूषकारूढो व्यालयज्ञोपवीतवान्।

गजाननश्चतुर्बाहुरेकदन्तो विनायकः॥
अधः रिपूमूर्द्धे च स्वदन्त दक्षिणे करे॥

अधो मोदकमूर्द्धे च वामे सविभ्रदुत्पलम्।
गजास्ये मदभृङ्गक....खुधनेता।

सिद्धिबुद्धी प्रि... कार्यारम्भेषु स्मृतिपूजने॥
गुहोत्पादितदन्तत्वादेको दक्षिणो दन्तोऽस्य एकदन्तः विगते नाय....नियन्ता यस्य विनायकः।

यद्वामनपुराणे—
नायकेन मया देवि विनोद्भूतोऽपि पुत्रकः।
यस्मा.... तन्नाम्ना भविष्यति विनायकः॥छ॥

षड्वक्त्रो द्वादशकरः कुमारः केकिवाहनः।
शरशक्तिखड्गाङ्कुशदण्डाक्षसूत्रधारिणः॥
षट्दक्षिणान् करान् बिभ्रद्वामान् पुनरलंकृतान्।
शृंगीधनुः पाशखेटैर्वरदंशुकमण्डलुम्॥
तारकासुरजैतृत्वं प्रमथा नामधीशिता॥
अन्धकासुरेहि महेश्वरा क्रौञ्चमध्ये प्रणष्टे क्रौंचाद्रिरनेन दारित इति प्रसिद्धिः। इतीश्वरः॥८॥

अथ विष्णुः।

विष्णुश्चतुर्भुजः श्यामो लक्ष्मीशः कौस्थभाङ्कितः।
शङ्खचक्रगदाशार्ङ्गपाणिर्गरुडवाहनः॥
सनन्दकोऽम्बुधौ शेषशयनो विश्वपालकः।
गोपीविलासकृत् क्लृप्तगोवर्द्धनधरोद्धृतिः॥
धरोद्धारकरो दैत्यहन्ता दशावतारकृत्।
मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः॥
रामो रामश्च कृष्णश्च बुद्ध कल्की च ते दश।
विष्णोर्नवशक्तयः यद् व्याडिः—

आधारा वैष्णवी सूक्ष्मा लक्ष्मीः पुष्टिर्निरञ्जना।
जीवनी मोहनी माया कृष्णस्य नव शक्तयः॥
विष्णोर्वध्या यौगिकनाममालास्तबके ज्ञेयाः।
वियत्पुच्छोच्छालोच्छलितजलगर्भं निधि—
रपामपां नाथः पाथःपृषतलवदुस्थो वियदभूत्।
अभूद्ह्रस्वोर्नौर्वा दिनपतिरभूद्विदहन—
श्चलत्काये यस्मिन् स जयति हरिर्मीनवपुषा॥१॥
निष्प्रत्यूहमनल्पकल्पचकितस्त्रैलोक्यरक्षागुरुः
क्रीडाकर्मकलेवरः स भगवान् दिश्यादमन्दां मुदम्।
कल्पान्तोदधिमध्यमज्जनरसा दादर्ध्यतः संलुठन्
पृष्ठे यस्य बभूव सैकतकणच्छायं धरित्रीतलम्॥२॥
पातु श्रीस्तनपत्रभंगमकरो मुद्राङ्कितोरस्थलो
देवः सर्वजगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः।
क्रीडाक्रोडवनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भू—
र्भाति स्म प्रलयाब्धिपल्वलतलोऽब्वातैकमुस्ताकृतिः॥३॥
चटच्चटिति चर्मणिच्छमिति चोच्छलच्छोणिते
धगद्धगिति मेदसि स्फुतरवोऽस्थनिस्थागिति।
पुनातु भवतो हरेरमरवैरिराजोरसि
क्वणत्करजपंजरक्रकचकाषजन्मानलः॥४॥

किं छत्रं किन्तु रत्नं तिलकमथ तथा कुण्डलं कौस्तुभो वा
चक्रं वा वारिजं चेत्यमरयुवतिभिर्यद्बलिद्वेषि देहे।
ऊर्द्ध मौली ललाटे श्रवसि हृदि करे नाभिदेशे च दृष्टं
पायात्तद्वोऽर्कबिम्बं स च दनुजरिपुर्वर्द्धमानः क्रमेण।।५।।

दिग्मातङ्गघटाद्विरुक्तचतुरा घाटा मही साध्यते
सिद्धा साऽपि वदन्त एव हि वयं हर्षेण रोमांचिताः।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मात् प्रादुरभूत्तथाद्भुतमिदं तत्रैव वास्तं गतं।।६।।

रेफव्यञ्जनता जता तव तवाकारप्रकर्षः स्वरेऽ
प्यन्यस्यापि विकार विस्फुरति ते वर्गाक्षरेष्वादिमा।
यः सम्भूय निगद्यते रघुकुलालङ्कारदीपाङ्कुरो
देवः क्षोणिसुतापयोधरतटी शृङ्गारहारो हरिः।।७।।

आरम्भे हरिमण्डलभ्रमकृतैरान्दोलनैर्विस्मितं
म्लानं बाहुलतोपपीडनभयात्प्रोल्लासने भूभृतः।
दत्ताः कृष्णकराग्रशायिनि मठो(हो?) श्रेयांसि पुष्णन्तु वो
गोपीभिर्भुजवल्लिकंकणझणत्कारोत्करास्तालिकाः।।८।।

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरानुरञ्जनमिमं त्राताऽपि नो रक्षसि।
मिथ्या कारुणिकोऽसि निर्घृणतरः त्वत्तः कुतोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः।।९।।

लक्ष्मीश्चन्द्रेभकुम्भासिविष्टरः कमलाश्रयाः।
फला भयाम्बुजद्वन्द्वयुतपाणिचतुष्टया।।छ।।

स्मरे तपस्विशत्रुत्वं जगत्त्रितयजैत्रता
रतिक्रीडा शिवभङ्गः स्त्रीविलासमुमासुता।।

वसन्तोऽस्य सुहृद्बाणा पंचावस्थाः पुनर्दश-उन्मादनो मोहनश्च तापनः शोषणस्तथा।
मारणश्चेत्यमी बाणाः पञ्चबाणस्य कीर्तिताः।।

अभिलाषोऽथ चिन्ता स्यात् स्मृतिश्च गुणकीर्त्तने।
उद्वेगोऽथ प्रलापः स्यादुन्मादो व्याधिरेव च।।
जडता मरणं चैता दशावस्था मनोभुवः।।छ।।

अथ बुद्धः।

बुद्धे परमकारुण्यं मारसैनिकजैत्रता।
भवपञ्जरनिर्भेदः परार्थे प्राणदायिता।।

कामेनाकृष्य चापं हतपटुपटहावल्गिभिर्मारवीरैः
भ्रूभङ्गोत्कम्पजृम्भास्मितकलितदृशा दिव्यनारीजनेन।

सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद्वासवेन
ध्यायन् बोधेरवाप्तौ न चलति इति वः पातु दृष्टो मुनीन्द्रः ।।

आत्मा नास्ति पुनर्भवोऽस्ति सफलं कर्मास्ति कर्तां विना
गन्ता नास्ति शिवाय वास्ति गमनं बन्धोऽस्ति बद्धो न च ।

इत्येवं गहनेऽपि यस्य न मुनेर्व्याहन्यते शासनं
खद्योतैरिव भास्करस्य महिमा बुद्धः स सोऽव्यात् जिनः ।।

पञ्चज्ञानः षडभिज्ञो दशार्हो दशभूमिगः ।
चतुस्त्रिंशज्जातकज्ञो दशपारमिताधरः ।।
द्वादशाख्यो दशस्त्रिकालः सुगतो मतः ।।

पञ्चानां विज्ञानवेदनासंज्ञासंस्काररूपलक्षणानां स्कन्धानां ज्ञानमस्य पञ्चज्ञानः । दिव्यं चक्षुर्दिव्यं श्रोत्रं पूर्वनिवासानुस्मृति परचित्तज्ञानं आश्रवक्षयः सिद्धिश्चेति षोडशाभिज्ञानस्य षडभिज्ञः । दशभूमीबलानि पारमिता वार्हति दशार्हः । दशभूमीर्गच्छति दशभूमिगः । यद् व्याडिः—

भूमयस्तु प्रमुदिता विमला च प्रभाकरी । अर्चिष्मती सुदुर्जयाभिमुखी च दुरङ्गमा । अचला साधुमती च धर्ममेघेति च क्रमात् ।।

चतुस्त्रिंशतं जातकानि व्याघ्रीप्रभृतीनि जानाति चतुस्त्रिंशज्जातकज्ञः । यद्व्याडिः—

जातकानि पुनर्व्याघ्री शिबिः श्रेष्ठीविशोविशम् ।
हंसो विश्वम्भरिः शक्रो मैत्रीबलसुपारगौ ।।
अपुत्रो ब्राह्मणः कुम्भः कल्माषः पिण्डिजातकम् ।
अधिगुह्य श्रेष्ठिजातं दमयन्ती महाकपिः ।।
बोधिर्ब्रह्मा महाबोधिर्वानरः शरभोरुकः ।
क्षान्ति वादी च हस्ती च कुडयाश्वेत्येवमादयः ।।

दश पारमिता प्रज्ञा धरति दश पारमिताधरः । यद्व्याडिः—

दश पारमिता[1] तारा वृन्दा च जिनशक्तयः ।
मारीचीवत् दुर्वासा मारीची वज्रकाल्यपि ।।

द्वादशाक्षीण्यस्य द्वादशाक्षः, दशबलानि दानशीलक्षान्तिवीर्यध्याना शान्तिबलोपायप्रणिधानं ज्ञानलक्षणान्यस्य दशबलः, त्रय कायानिर्माणाद्या अस्य त्रिकायः ।

बुद्धाः स्युः सप्तविपश्चां पूर्वः शिखी द्वितीयकः ।
तृतीयो विश्वस्तस्तुर्यः ककुच्छन्दोऽथ कांचनः ।
पञ्चमः काश्यपः षष्ठः शाक्यसिंहस्तु सप्तमः ।।
शाक्यस्य जननी माया पिता शुद्धोदनो नृपः ।
देवदत्ता प्रजा सूर्यवंशत्वं गौतमोऽन्वयः ।।

---

१. 'पारमिता तारमिता' इतीदं पा.प.२ पुस्तके, तन्न समीचीनम् ।

वज्रपाश. . . .ब्जांका मन्यहस्तचतुष्टयः ।
अङ्कुशोत्पलचापांकसंतर्जनान्यपाणियुक् ।।
रक्तवर्ण्यचतुर्वक्त्रा शोभमानाऽष्टभिर्भुजैः ।
तारादेवी सुरा बुद्धशासनदेवता युग्मं ।। इति बुद्धः ।।छ।।

अथादित्यप्रमुखा ग्रहाः—

रक्तवासा रथारूढः श्वेतपद्मोपरि स्थितः । सदा स्मेराब्जभृत्पाणिर्द्वन्द्वेऽर्कः कनकद्युति ।।
सूर्योऽरुणतारविमणिचक्रास्त्वजपथिकलोचनप्रीतिः ।
तारेन्दुदीपकौषधिधूकतमश्चौरकुमुदकुलटातिः ।।
एकचक्रः शङ्खमालीनामा खररुचेरथः ।।
रथ्यास्तु सप्त यः सप्तनीलासूचोरुणः पुनः ।
नीलनाभो वराभीरो राजकेलिर्मनोजवः ।।
वातवित्तश्चिंतिते शोभनो यानौ हयो रवेः ।
खे. सिंहो गृहं मेष उच्च नीचं पुनस्थला ।।
कुङ्कुमरक्तपुष्पाणि पूजायां परिकल्पते ।
खेर्हरिहरब्रह्मध्येयो मध्यपरः पुमान् ।।
इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः ।
इति रविः

सोमः श्वेतः शशारूढः ससरोजकरद्वयः ।
सुधारुचिर्दशास्वश्च श्वेताश्वः कृत्तिकाभवः ।।
दशसंख्या अश्वा अस्य दशाश्वः । यद् व्याडिः
अश्वास्तु दशचन्द्रस्य यमश्चन्द्रमनावृषः ।
सप्तधातुर्हयो वाजी हंसो व्योममृगो नर : ।।
अर्वाञ्चाथ चन्द्रमनः स्थाने स्त्रि त्रिघना क्वचित् ।
सप्तधातोः पुनःस्थाने सहिरण्योऽस्ति कुत्रचित् ।।
इन्दोः कर्कागृहं नीचैर्मालिरुच्चं वृषः पुनः ।
शंखप्रस्थो रथोऽर्चायां श्वेतपुष्पाणि चन्दनम् ।।
गन्धलोमेषमारूढः प्रवालप्रतिमद्युतिः ।
दण्डं कमण्डलुं चैव संबिभ्राणः करद्वये ।।
नेवाचिरुत्तराषाढा भवरक्ततनुः न कं ।
रोच्चनांतकर्कनीचो मेषवृश्चिकमन्दिरः ।
पूजास्य रक्तकुसुमैः कुंकुमेन च कल्पते ।।छ।।
योगासनेन सम्भोगी बुधः सिंहासनस्थितः ।
कन्योच्चो मीननीचश्च कन्यामिथुनकेतनः ।।

पञ्चार्चिः शुकपिच्छाभो धनिष्ठा भूर्बुधोऽस्य तु ।
पूजायां श्वेतपुष्पाणि कुकुंमं नीलपत्रिका ॥
हंसारूढो गुरुः पाणिद्वयस्थाक्षकमण्डलुः ।
स्याद्द्वादशार्चिरुत्तरफाल्गुनीभूः सुवर्णरुक् ॥
कर्कोच्चो मकरनीचो धनुर्मीनगृहोऽस्य तु ।
नाभिघोषो रथोऽर्चायां श्वेतपुष्पाणि चन्दनम् ॥छ॥
शुक्रस्तु दर्दुरारूढो गोक्षीरप्रतिवीररुक् ।
करद्वितयविस्फूर्जदक्षस्तत्र कमण्डलुः ॥
मीनोच्चकन्यकानीचशुक्रो वृषतुलागृहः ।
षोडशार्चिर्मघा जूम्वदशाघोषो रथोऽस्य तु ॥
श्रीखण्डश्वेतपुष्पाणि रभयेच्च तदर्चतोः ॥
शनिर्महिषमारूढो दंष्ट्रारो द्रुतराननः ।
कृष्णकान्तिः करद्वन्द्वक्रीडद्दण्डे कमण्डलुः ॥
शनैश्चरो नीलवासाः सप्तार्चीं रेवतीभवः ।
तुलोच्चा मेष नीचोऽस्यात् कुम्भमकरौ गृहम् ॥
तदीयपूजने तैलं नीलीपत्रं च कल्पयेत् ॥छ॥
राजा वर्तमेनिभो राहुरर्द्धाङ्गकुण्डमध्यगः ।
मिथुनोद्यो धनुर्नीचो तावत्कन्यानिकेतनः ॥
भरणी जुतीलपर्वा वर्णरक्तः सुमार्जनः ॥छ॥
सर्पपुच्छाकृतिः केतुधूम्रोऽश्लेषा समुद्भवः ।
चतुः समः पञ्चवर्णः पञ्चपर्वः करसंपुटी ॥

॥ इति ग्रहाः ॥

अथ दिक्पालाः—

दिगीशा इन्द्राग्नियमा नैऋतो वरुणोऽनिलः ।
कुबेरः शंकरो नागा ब्रह्मा पूर्वादितः क्रमात् ॥
इन्द्रः सुवर्णवर्णांगो गजारूढः सहस्ररुक् ॥
वरदाद्यद्वज्राङ्कुशबीजपूरचतुष्करः ।
इन्द्रस्य मातापितरावदितिः कश्यपो मुनिः ।
मुनेः पुलोमस्तनया पौलोमीवल्लभा पुनः ।
पुत्रो जयन्तो जायन्ती पुत्रीसूतस्तु मालिः ॥
देवनन्दी प्रतीहारो हाहामुख्याश्च गायनाः ।
उच्चैःश्रवा हयो हस्ती त्वैरावतः सितावुभौ ॥

धिगारथहया वज्रं रोहितं धनुरायुधे ।
अमरावतीपूः परिषत्सुधर्मार्कसमप्रभा ।
नन्दीसरः केलिसरो नन्दनं केलिकाननम् ॥

प्रासादस्तु वैजयन्तो वैजयन्तो ध्वजोऽपि च ॥
अग्निः सप्तशिखो मेषमारूढः कपिलो वहन् ॥

करान् वरदं शक्त्या व्यंस मृणालकमण्डलू ।
स्वाहा प्रियाऽस्य पवनः सुहृत्तेजोऽवनीसभा ॥

भवति हिरण्या कनका रक्ता कृष्णा वसुप्रभा चान्या ।
अतिरक्ता बहुरूपेति सप्तसप्तार्चिषो जिह्वा ॥

यमो महिषमारूढः कृष्णः पाणिचतुष्टये ।
बिभ्राणः कुर्कुटं दण्डं लेखनीं पुस्तकं तथा ॥

यमस्य जननी संज्ञा पितार्को यमुना स्वसा ।
धर्मोर्णा धर्मपत्नी च प्रतीहारश्च वैध्यतः ॥

दासौ चण्डमहाचण्डौ चित्रगुप्तश्च लेखकः ।
साभास्यतैजसी ख्याता पुरी संयमनी पुनः ॥

नैऋतं स्वा(श्वा)नमारूढः श्यामो दंष्ट्रालवक्त्रवान् ।
कर्त्तिका सकेशशिरः खट्वा खेटकिभिः करैः ॥

रक्षोऽस्य निकसा माता सभा कृष्णाङ्गनामताऽभिधा ॥छ॥

वरुणो मकरारूढो विचित्राङ्गो वहन् करान् ।
गदानिधिहुतौ द्वौ द्वौमातुलिंङ्गांकुशांकितौ ॥

केशासौकाः शिवसुहृत् पिङ्गलैकविलोचनः ।
यक्षेशस्त्रिशिरास्तस्य जनको विश्रवा मुनिः ॥

बृहस्पतिसुता माता तनयो नलकूबरः ।
विमानं पुष्पकं पुर्यलका सभा ससि(शशि) प्रभा ॥

क्रीडावनं चैत्ररथं केलीसरस्तु मानसं ।
किन्नराणां धनानां च निधीनामप्यधीशिता ॥

महापद्मश्च पद्मश्च शङ्खौ मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च चर्चाश्च निधयो नव ।

जैनसमयेऽपि नैसर्पाद्या निधयः । यदुक्तं त्रिषष्टिशलाकापुरुषचरिते श्रीहेमसूरिभिः–

नैसर्पः पाण्डुकश्चापि पिङ्गलः सर्वरत्नकः ।
तेषामेवाभिधानैस्तु तदधिष्ठायका सुराः ।
पल्योपमायुषो नागकुमारास्तन्निवासिनः ॥छ॥

शंकरो वृषभारूढः श्वेतवर्णः करैर्युतः ।
त्रिशूलवरदव्यालबीजपूरकराजिभि ः ॥छ॥

नागस्वरूपमग्रे कथयिष्यते—

ब्रह्माकरैर्धृताक्षिस्रक् श्रक्कमण्डलपुस्तकैः ।
अधोक्षस्रजमूर्द्धे च श्रुतं सव्येतरे करे ।।
अधः कमण्डलुं सव्ये विभ्रदूर्द्धेव पुस्तकम् ।
इति दिग्पालाः ।।छ।।
शक्रेण धनदेनापि सभा सास्था स्वयंकृता ।
यमप्रचेतसोर्विश्वकर्मणा निर्मिते सभे ।।
सर्वे महर्षयो देवा गन्धर्वाः शक्रसंसदि ।
पृथुरामययात्यादिनरेंद्रयमसंसदि ।
वचयक्षाप्सरो रक्षो गन्धर्वाः श्रीदसंसदि ।[1]
वेदा महर्षयो वाणी शास्त्राणि ब्रह्मसंसदि ।।
जयति परापश्यन्ती मध्यमिका वैखरीति संज्ञाभिः ।
विहितः विविधप्रपञ्चं विश्वमयं वाङ्मयं ज्योतिः ।।
परा केवलिविद्रूषा पश्यन्तीच्छामया मता ।
मध्यमा बुद्धिसंस्था तु शब्दरूपा तु वैखरी ।।
या सा मित्रावरुणसदनादुच्चरन्तीं त्रिषष्टिं
वर्णानन्तःप्रकटकरणैः प्राणसङ्गप्रसूतान् ।
तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां ।
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ।।[2]

कुण्डलिन्या वामदक्षिणविभागे संतिष्ठमान इडापिङ्गलीभिधानसोमसूर्ययोः सङ्गमान्, दीर्घाश्चाष्टौ ह्रस्वाः पञ्चयमा नव व्यञ्मनानि त्रयस्त्रिंशत् त्रिषष्ठिर्वर्णजातयः । तृकारबाह्यसंसिध्यक्षरा अष्टौ दीर्घाः आ ई उ ऊ ए ओ औ इत्यष्टौ दीर्घाः। एतावुच्चारविशेषा प्लुताः अ इ उ ऊ इति, पञ्चह्रस्वाः यरलवाङञणनमा एते नव सयोगाम् यमा भवन्ति । यथा—कय कया क क्के क्ल क्ला इत्यादि । क ख ग घ ङेत्यदि त्रयस्त्रिशत् व्यञ्जनानि । एवं वर्णाः त्रिषष्टिः ।।छ।।

अथ नागाः—

कृष्णस्यावतरश्चतुर्भुजधरः प्रोल्लासिपीताम्बरः
श्यामः पद्मशिराः सुपर्णगमनो व्यूढाखिलक्ष्मीभरः ।
विप्रः सप्तफणास्य सूत्ररसुधो वायव्यहालाहलः
कां आं मस्तकहृन्मणिस्त्रिभुवनं पायादनन्तो रविः ।।
सव्यासव्यकरस्थदण्डकलशः शुक्लांशुकः शुक्लरुक्
नीलाम्भोजशिराः सहस्रफणभृत् गण्डं शिरोहृन्मणिः ।
नागेन्द्राग्निविषो मरालगमनो ब्रह्मावरः (सः?) शशी
सत्सिंहासनमाश्रितो विजयते श्री वासुकिः क्षत्रियः ।।

१. 'वचयक्षा........श्रीदसंसदि' इदं पा. प. [२] पुस्तके नास्ति ।
२. 'प्रपेदे'—दे. प ।

चोंजं मौलिहृदोर्मणी प्रकलयन् सन्मस्तकस्वस्तिक–
स्तर्जन्या रिपुतर्जनो वृषगतिर्निश्शेषदोषापहाः ।

रक्ताङ्गस्त्रिफणारुणाम्बरधरो रुद्रावतारस्थिति–
र्वैश्यो मङ्गल एष पार्थिवशिषोर्वीरोऽव्वतात् तक्षकः ।। ३।।

शूद्रो कुञ्जरवाहनो द्विभुजवान् पीतांशुकस्फीतिमान्
नीलो वारुणकालकूटकलितः स्फूर्जत्फणापञ्चकः ।
रेखाणां त्रितयेन लाञ्छिततनुर्जियां मणी धारयन्
मौलौ वक्षसि रक्षतु त्रिजगतीं कर्कोटनागो बुधः ।।४।।

चंचच्चन्द्रकबिन्दुपञ्चकशिराः शुक्लाम्बरः स्वर्णरुक्
शूद्रः सप्तफणस्तुरङ्गमगमनो माहेन्द्रहालाहलः ।
पाणिद्वन्द्वधृतारविन्दकलशोभिक्षामणी मस्तके
वक्षस्याकलयन् प्रपालयतु वः श्रीपद्मनागो गुरुः ।।५।।

वैश्यः श्यामवपुर्वलक्षवसनो मौलिस्त्रिशूलांकितः
चञ्चत् पञ्चफणाञ्चितांशिषिगतिर्विभ्रत्फणं वारुणम् ।
शुक्रः पाणियुगस्थकम्बुकलशः स्थामां दधानः शिरो
हृद्देशस्थमणी प्रयच्छतु महापद्मो महासम्पदम् ।।६।।

रक्तः क्षत्रियगोत्रजो वशफणः कुन्दावदाताम्बरः
प्रेंखद्वह्निविषः शिरोहृदययोर्घण्टामणीं द्योतयन् ।
शौरिः स्यन्दनवाहनः शशिकलाश्रीवःकंकण्ठस्थलो
हस्तद्वन्द्वनिवेशिशंखकलशः शंखः सुरायास्तु वः ।।

विप्रः सप्तफणो भुजद्वययुतः खण्डेन्दुलक्ष्म्यान्वितः
खेलन्मांसलधूमधूमलविभो वायव्यहालाहलः ।।
खेला मस्तकहृन्मणिस्थितिशुभः स्वर्भानुवेलोदयो
नागःश्री धुलिको विनीलवसनः पद्मासनः पातु वः ।।

क्षेत्रपालेषु रूपाणि नानारूपाणि कीर्तयेत् ।
शिरःफणिफणावाल्यं नृत्तोंह्रिधुर्घुरारवः ।।

द्वादशार्कविसंगोष्ठी विश्वेदेवास्त्रयोदशः ।
षट्त्रिंशत् तृषिताश्चैव षष्ठिराभास्वरा अपि ।।

षट्त्रिंशदधिके माहाराजिकाश्च शते उभे ।
रुद्रा एकादशैकोनपञ्चाशद्वायवोऽपि च ।।

चतुर्दश तु वैकुण्ठाः सुशर्माणः पुनर्दश ।
साध्याश्च द्वादशेत्याद्या विज्ञेया गणदेवताः ।।७।।

अथाप्सरसः व्याडिकृतोत्पलिनीमध्यात् ।

अथ ब्रह्मणोऽग्निकुण्डात् समुत्पन्ना प्रभावती ।
वेदितलाद्वेदिवती यमात् पुनः सुलोचना ॥
उर्वशी तु हरेः सव्यमूरुं भित्त्वा विनिर्गता ।
रम्भा तु ब्रह्मणो वक्त्रात् चित्रलेखा तु तत्करात् ॥
शिरसस्तु महाचित्रा स्मृता काकलिका तु सा ।
मारीची शूचिका चैव विद्युत्पर्णा तिलोत्तमा ।'
अद्रिका लक्षणा क्षेमा दिव्या रामभनोरमा ।
हेमा सुगन्धा सुवपुः सुबाह्वः सुव्रता सिता ॥
सारद्वती पुण्डरीका सुरमा सूनृतापि च ।
सुवाता कोमला हंसपादी च सुमुखीति च ॥
मेनका सहजन्या च पर्णिनी पुञ्जिका स्थला ।
ऋतुस्थला घृताची च विस्वास्वाचीत्यप्सरस्त्रियः ॥
विद्याधराप्सरसो यक्षरक्षो गन्धर्वकिन्नराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥
ऋषयः सत्यवचसः ते च सप्तविधाः स्मृताः ॥
यथा ब्रह्मर्षिदेवर्षिमहर्षिपरमर्षयः ।
काण्डर्षि(श्च) श्रुतर्षिश्च राजर्षिश्च क्रमाद्वराः ॥
ब्रह्मर्षयो वशि(सि)ष्ठाद्या ब्रह्मणो मानसाः सुताः ।
देवर्षयो याज्ञवल्क्यपतंजलकचादयः ॥
महर्षयश्च व्यासाद्या भेनाद्या परमर्षय ।
काण्डर्षयो जैमिनाद्याः सुश्रुताद्याः श्रुतर्षयः ॥
ऋतुपर्णदिवोद्दामादयो राजर्षयो मताः।
स्वायम्भुवमन्वन्तरे सप्तर्षय एते-
मरीचिरत्र्यांगिरसौ पुलस्त्यः पुलस्त्यः क्रतुः ॥
वसिष्ठश्च महातेजाः सप्तमः परिकीर्तितः ।
वैवस्वतमन्वन्तरे वर्तमान सप्त महर्षयो यथा—
अग्निर्वसिष्ठो भगवान् जमदग्निश्च काश्यपः ।
गौतमोऽथ भरद्वाजो विश्वामित्रस्तु सप्तमः ॥
पुलस्त्यस्यैलविलयां पुत्रोऽभूद्विश्रवो मुनिः ।
पतसस्तु तस्य पत्न्यो ज्येष्ठा बृहस्पतेः सुताः ॥
मध्यमे माल्यवत्पुत्र्यौ कनिष्ठा मालिनः सुताः ।
ज्येष्ठाऽसूत सुतं ज्येष्ठं कुबेरं वरवर्णिनी ॥

पुष्पोत्कटी तु सुषुवे मध्यमा राक्षसानिमान्।
महोदरं प्रहस्तं च महापार्श्वं खरं क्रमात्॥

मध्यमायास्तु नाकायास्त्रिशरादूषणो ऽपि च।
विद्युज्जिह्वश्च तनयास्तेषामार्षटिका स्वसा॥

कैकसी तु कनिष्ठा या सा रावणमजीजनत्।
स एव राक्षसपतिर्दशग्रीवो हि रावणः॥

चतुःष्पाद्विंशतिभुजो लंकेशो मानमन्दरः।
रावणस्य भ्रातरौ द्वौ कुम्भकर्ण बि(वि)भीषणौ॥

सू(शू)र्पणखा ऽस्य भगिनी सू(शू)र्पी सू(शू)र्पणखी च सा।
मन्दोदरी च भार्या ऽस्य मयास्यतनया च सा॥

अथेन्द्रजिन्मेघनादः स च रावणनन्दनः।
पुत्रस्तु वज्रबालायां कुम्भकर्णस्य दुर्मदः॥

विभीषणस्य तु सुतो धर्मज्ञायां दुरासदः।
सुन्दपुत्रस्तु मारीचः सुबाहुस्तूपसुन्दजः॥

ताडका नु सुन्दपत्नी मारीचजननी च सा।
प्रहस्तस्तु प्रतीहारः सेनापतिरलम्बुषः॥

सुतोऽस्य विश्ववलनो मन्त्रिणौ शुकमारणौ।
अशोकवनिकोद्यानं क्रीडाभूम्यमरावती॥

चन्द्रहासः कृपाणोऽस्य सन्नाहस्तु विलोचकः।
सन्दानिका तुंबरिली क्रीडासरस्तु जालकम्॥

अथ जैनसमयोक्तं देवरूपं।

देवाश्चतुर्धा भवनपतयो व्यन्तरास्तथा।
ज्योतिष्का वैमानिकाश्च दशधा भवनाधिपाः॥

आसुरा नागास्तडितः सुपर्णा वह्न्योऽनलाः।
स्तनिताब्धिद्वीपदिशः कुमारान्ता दशाप्यमी॥

असुरकुमारास्तडित्कुमाराः, नागकुमाराः, सुपर्णकुमारा, अग्निकुमारा, वायुकुमारा, स्तनितकुमारा, उदधिकुमारा, द्वीपकुमारा, दिक्कुमारा इत्येते पाताले रत्नमयभवनवासिनः कुमारवन्मर्त्यलोके क्रीडाकारिणः॥छ॥

व्यन्तराः पिशाचभूतयक्षराक्षसकिन्नराः।
किंपुरुषाः महोरगाः गन्धर्वाश्चाष्टधेत्यमी॥

एते विविधेषु शैलकन्दरान्तरवनविवरादिषु प्रतिवसन्ति। ज्योतिष्काः पञ्चविधेन्द्वर्कग्रहनक्षत्रतारकाः। वैमानिका द्वादशधा स्वस्वकल्पाभिधानतः। कल्पा सौधर्मईशानस्तथा सनत्कुमारकः॥

माहेन्द्रब्रह्मलान्तकशुक्रश्च सहस्रारकः।

इत्यत्र अह्लादिसंयुक्ते वर्णे व्यञ्जने चाग्रगे लगुर्हरिति ह्रस्व न गुरुत्वम्। द्वादशकल्पो परिनवधा ग्रैवेयकास्तु पञ्चधा स्युस्तनुत्तराः। ग्रैवेयकानि नवविमानानि तत्रभवाः। जयविजयजयन्तवे(वै)जयन्तसर्वार्थसिद्धिविमानानि पञ्चानुत्तर विमानानि, तत्र भवाः। अनुत्तरविमानो परिमुक्तिशिला, तत्र मुक्तात्मनां स्थानम्।।ठ।।

"निकायभेदतो देवा भवन्त्येवं चतुर्विधाः। एवमुक्तप्रकारेण देवा भवनपत्यादयश्चतुर्विधाः निकायभेदात्; निकायो निवास उत्पादनस्थानं, तद्भेदात्। तथाहि—भवनपतयोऽशीतिसहस्राधिकयोजनलक्षपिण्डायां रत्नप्रभायामूर्ध्वमधश्च योजनसहस्रमेकैकमपहाय मध्येऽष्टसुयोजनशतेषु जन्म प्रतिलाभन्ते। ज्योतिष्कास्तु समतलाद्भूभागात् सप्तशतानि नवत्य धिकानि योजनानामारुह्य दशोत्तरयोजनशतपिण्डे नभोदेशे लोकान्तात् किञ्चित् न्यूने जन्म गृह्णन्ति। वैमानिका रज्जु-मध्यर्धमधिरुह्यामुतः सौधर्मादिषु कल्पेषु सर्वार्थसिद्धिपर्यवसनिषूत्पद्यन्ते। तदेवमुत्पादनिवासभेदाच्चतुर्विधा देवाः। स्वधामसूत्पन्नाः भवनपत्यादयोऽन्यत्र लवजलधिमन्दरवर्षधराह्रिद्रुमगहनप्रभृतिषु वसन्ति। उक्तस्थानव्यतिरेकेणान्यत्रैषा-मुत्पादो जन्म नास्तीति निवासार्थः संतार्थो वा निकायशब्दः।।छ।।

देवस्वरूपमुक्त्वा देवप्रतिबद्धदशनविचारे क्रमोऽस्मद्गुरुश्री जिनदत्तसूरिविरचितश्रीविवेकविलासतो लिख्यते। यथा—

जैनं मैमांसकं बौद्धं सांख्यं शैवं च नास्तिकम्।
स्वस्वतर्कविभेदेन जानीयाद्दर्शनानि षट्।।१।।

अथ जैनम्।

अर्हन्देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः।
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्तनी।। २ ।।

स्याद्वादश्च प्रमाणे द्वे प्रत्यक्षं च परोक्षकम्।
नित्यानित्यं जगत्सर्वं तत्त्वानि नव सप्त वा।। ३ ।।

जीवाजीवौ पुण्यपापे आश्रवः संवरोऽपि च।
बन्धो निर्जरणं मुक्तिरेषां व्याख्याधुनोच्यते।। ४ ।।

चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः।
सत्कर्मपुद्गलः पुण्यं पापं तस्य विपर्ययः।। ५ ।।

आश्रवः कर्मसम्बन्धः कर्मरोधस्तु संवरः।
कर्मणां बन्धनाद्बन्धो निर्जरा तद्वियोजनम्।। ६ ।।

अष्टकर्मक्षयान्मोक्षो अन्तर्भावश्च कैश्चन।
पुण्यस्य संवरे पापस्याश्रवे क्रियते पुनः।। ७ ।।

लब्धानन्तचतुष्कस्य लोकाग्रस्थस्य चात्मनः।
क्षीणाष्टकर्मणो मुक्तिर्निव्यावृत्तिजिनोदिता।। ८ ।।

सरजोहरणा भैक्ष्यभुजालम्बितमूर्धजाः।
श्वेताम्बराः क्षमाशीला निःसंगा जैनसाधवः।। ९ ।।

लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः।
ऊर्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः।।

भुक्तेन केवली न स्त्री मोक्षमेति दिगम्बराः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सह।।

इति जैनम्।

अथ मं(मी)मांसकं—

मीमांसको द्विधा कर्म ब्रह्म मीमांसकत्वतः।
वेदान्ती मन्यते ब्रह्म कर्म भट्टप्रभाकरौ॥

प्रत्यक्षमनुमानं च वेदाश्चोपमया सह।
अर्थापत्तिरभावश्च भ(ट्टोऽथ षट्)प्रमाण्यसौ॥

प्रभाकरमते पञ्चैतान्येवाभाववर्जनात्।
अद्वैतवादी वेदांती प्रमाणं तु यथा तथा॥

सर्वमेतदिदं ब्रह्म वेदान्तेऽद्वैतवादिना।
आत्मन्येव लयो मुक्तिर्वेदान्तिकमते मता॥

अकुकर्मा भद्रकर्मा शूद्रत्वादिविवर्जकः।
ब्रह्मसूत्री द्विजो भट्टो गृहस्थाश्रमसंश्रितः॥

भगवन्नामधेयाश्च द्विजा वेदान्तदर्शने।
विप्रगेहे भुजस्त्यक्तोपवीता ब्रह्मवादिनः॥

चत्वारो भगवद्भेदाः कुटीचरबहूदकौ
हंसः परमहंसश्चाधिकोऽमीषु परःपरः॥ इति मीमांसकमतम्

अथ बौद्धः—

बौद्धानां सुगतो देवो विश्वं च क्षणभंगुरम्।
आर्य सत्वा(त्याख्य)या सत्त्वचतुष्टयमिदं क्रमात्॥

दुःखमायतनं चैव ततः समुदयो मतः।
मार्गस्येत्य(त)स्य च व्याख्या क्रमेण श्रूयतां मतः(ता)॥

दुःखं संसारिणां स्कन्धास्ते च पञ्च प्रकीर्तिताः।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥

अथायतनानि—

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्।
धर्मायतनमेतानि द्वादशायतनानि तु॥

अथ समुदयः।

रागादीनां गणो यस्मात् समुदेति नृणां हृदि।
आत्मात्मीयस्थभावाख्यः स स्यात् समुदयः पुनः॥

अथ मार्गः—

क्षणिकाः सर्वसंस्कारा इति या वासना स्थिरा।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते॥

प्रत्यक्षमनुमानं च प्रमाणद्वितयं तथा।
चतुःप्रास्थानिका बौद्धाः ख्याता वैभाषिकादयः॥

अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते।
सौत्रांतिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः॥

आकारसहिता बुद्धिर्योगाचारस्य सम्मता।
केवलां संविदं स्वस्थां मध्यमा पुनः.... ॥

रागादिज्ञानसन्तानवासनोच्छेदसम्भवा।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता॥

कृत्तिः कमण्डलुः मौण्ड्यं चीरं पूर्वाह्णभोजनम् ।
संघेरक्ताम्बरत्वं च शिश्रेयो बौद्धभिक्षुभिः ॥२९॥

अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणेष्यते
प्रत्यक्षो बाह्यवस्तुविषयः सौत्रान्तिकैराश्रिताः ।
योगाचारमतानुगैरभिहिता साकारबुद्धिः परा ॥

आकारबुद्धिरेवास्ते न परमाणुर्न परमानुर्भिनिष्पन्नं किमपि च, किन्तु घटाकारः पटाकार एव सत्यः। घटाकारं पटाकारं मे ज्ञानमुत्पन्नं तस्मात् घटेन पटेन वा भाव्यं नीलाकारं मे ज्ञानमुत्पन्नं तस्मान्नीलेन वस्तुना बहिर्भाव्यम् । तस्माद्बाह्यपरमाणुप्रभृतिकं किमपि नास्ति आकारबुद्धिरेव। ३ स्वच्छां परां संविदं सद्बुद्धिः कथ्यते। सा एव तिष्ठति पुनर्ग्राह्यं ग्राहको वा तिष्ठति यद्ग्राह्यं ग्राहको वा तत्सर्वं बुद्धिपरिणतिस्तस्मात् सैव तिष्ठति। कोऽर्थः ज्ञानसन्तानमेव तिष्ठतीत्यर्थः। एते चत्वारोऽपि परस्परघातका मध्यमा नास्तिकप्रायाः इति बौद्धम् ॥छ॥

अथ सांख्यं—

सांख्ये देवः शिवः कैश्चिन्मतो नारायणः परः ।
उभयोः सर्वमप्यन्यत्तत् प्रभृतिकं समम् ॥३०॥

सांख्याः(ख्यानां) स्युर्गुणाः सत्त्व रजस्तम इति त्रयः ।
सौम्यावस्था भवत्येषां त्रयाणां प्रकृतिः पुनः ॥

प्रकृतेः स्यान्महांस्तावदहंकारस्ततोऽपि च ।
पञ्च बुद्धीन्द्रियाणि स्युश्चक्षुरादीनि पञ्च च ।
कर्मेन्द्रियाणि वाक्यानि चरणोपस्थपायवः ।
(एतेषां पञ्च) तन्मात्राः शब्दो रूपं रसस्तथा ॥

स्पर्शो गन्धोऽपि तेभ्यः स्यात् पृथ्व्याद्यं भूतपञ्चकम् ।
इयं प्रकृतिरेतस्याः परस्तु पुरुषो मतः ॥

पञ्चविंशतितत्त्वीयं नित्यं सांख्यमते जगत् ॥

प्रमाणत्रितयं चात्र प्रत्यक्षमनुमानतः ।
यदैव जायते भेदः प्रकृतेः पुरुषस्य च ॥

मुक्तिरुक्ता तदा सांख्यैः ख्यातिः सैव तु भण्यते ।
सांख्यः शिखी जटी मुण्डी कषायाद्यम्बरोऽपि च ॥
वेषे नास्त्येव[1] सांख्यस्य पुनस्तत्त्वे महाग्रहः ॥ इति सांख्यमतम् ३१

१. 'वेषेऽनास्थैव' पा. प. २।

अथ शैवं—

शिवस्य दर्शने तर्कावुभौ न्यायविशेषकौ। न्याये षोडशतत्त्वी स्यात् षट्तत्त्वी च विशेषके॥ अन्योन्यतत्त्वान्तर्भावात् द्वयोर्भेदोऽस्ति नास्ति वा। द्वयोरपि शिवो देवो नित्यः सृष्ट्यादिकारकः॥ नैयायिकानां चत्वारि प्रमाणानि भवन्ति च। प्रत्यक्षमागमोऽन्यच्चानुमानमुपमाऽपि च॥४०॥

अथ तत्त्वानि—

प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम्।
दृष्टान्तोऽप्यथ सिद्धान्तावयवौ तर्कनिर्णयौ॥
वादस्तर्कौ वितण्डा च हेत्वाभासाश्छलानि च।
जातयो निग्रहस्थानानीति तत्त्वानि षोडश॥

अथ वैशेषिकम्—

वैशेषिकमते तावत्प्रमाणत्रितयं भवेत्।
प्रत्यक्षमनुमानं च तार्त्तीयैकस्तथागमः।
द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्॥
समवायश्च षट्तर्का तद्व्याख्यानमथोच्यते।
द्रव्यं नवविधं प्रोक्तं पृथिवीजलवह्नयः॥
पवनो गगनं कालो दिगात्मा मन इत्यपि।
नित्यानित्यानि चत्वारि कार्यकारणभावतः॥
पवनो गगनः काल दिगात्मा मन इत्यपि।
मनो दिक्काल आत्माऽथ व्योमानित्यानि पञ्च तु॥

अथ गुणाः—

स्पर्शो रूप रसो गन्धः संख्या च परिमाणकम्।
पृथक्त्वमथ संयोगविभागौ च परत्वकम्॥
अपरत्वं बुद्धिसौख्ये दुःखोत्थद्वेषयत्नकौ।
धर्माधर्मौ च संस्कारा गरुत्वं द्रव इत्यपि॥
स्नेहः शब्दो गुणा एवं विंशतिश्चतुरन्विताः।
अथ कर्माणि वक्ष्यामः प्रत्येकमभिधानतः॥
उत्क्षेपणावक्षेपणात् कुञ्चनं च प्रसारणम्।
गमनानीति कर्माणि पञ्चोक्तानि तदागमे॥
सामान्यं भवति द्वेधा परं चैवापरं तथा।
परमाणुषु वर्त्तन्ते विशेषा नित्यवृत्तयः॥

सामान्यविशेषौ।

भवेदयुतसिद्धानामाधाराधेयवर्त्मनाम्।
सम्बन्धः समवायाख्य इह प्रत्ययहेतुकः॥

विषयेन्द्रियबुद्धीनां वपुषः सुखदुःखयोः ।
अभावादात्मसंस्थानं मुक्तिर्नैयायिकैर्मता ॥

चतुर्विंशतिर्वैशेषिकगुणान्तर्गुणा नव ।
गुणाः[1] बुद्ध्यादयस्तदुच्छेदो मुक्तिर्वैशेषिकी तु सा ॥

आधारभस्मकौपीनजटायज्ञोपवीतिनः ।
मन्त्राचारादिभेदेन चतुर्धा स्युस्तपस्विनः ॥

शैवाः पाशुपताश्चैव महाव्रतधरास्तथा ।
तुर्याः कालमुखा मुख्या भेदा एते तपस्विनाम् ॥

इति शैवम् । अथ नास्तिकम्—

पञ्चभूतात्मकं वस्तु प्रत्यक्षं च प्रमाणकम् ।
नास्तिकस्य मते नान्यदात्मामुत्र शुभाशुभम् ॥

प्रत्यक्षमविसंवादि ज्ञानमिन्द्रियगोचरम् ।
लिङ्गतोऽनुमितिर्धूमादिव वह्नेरिव स्थितम् ॥

अनुमानं यथापूर्वशेषसामान्यतो यथा ।
वृष्टेः सस्यं नदीपूरा वृष्टिरस्तात्प्रवेगीतिः ॥

ख्यातः सामान्यतः साध्यसाधनं चोपमा यथा ।
स्यादवद्गवयः स्यात् सान्नादि द्वित्वमुभयोरपि ॥६०॥

आगमश्चाप्तवचनं स च कस्यापि कोऽपि च ।
वाच्याप्रतीतौ तत्सिद्धौ प्रोक्तार्थापत्तिरुत्तमैः ॥

पीनोऽह्नि नास्ति रात्रावत्यर्थतो यथा । पञ्चप्रमाणसामर्थ्ये वस्तुसिद्धिरभावतः ॥स्थापितं वादिभि स्वं स्वं मतं तत्त्वप्रमाणतः । तत्त्वं. . . . न प्रमाणं तत्त्वसाधकम् ॥६३॥

पञ्चावयवमनुमानं प्रतिज्ञा हेतुः दृष्टान्त उपनयः निगमः । एते पञ्चावयवा हेतुर्व्याप्तिः षष्ठी । वन्हिमानयं पर्वत प्रतिज्ञा, १ धूमवत्त्वात् हेतुः, यो यो धूमवान् स स वन्हिमान् हेतुर्व्याप्तिः, यथा महानसप्रदेशः दृष्टान्तः, धूमवांश्चायमुपनयः तस्माद्वन्हिमान्निगमः ॥छ॥

त्रिरूपाल्लिङ्गाल्लिङ्गिनि ज्ञानमनुमानं इति हेतुस्त्रिरूपः । त्रैरूप्यं पुनः पक्षधर्मत्वं, सपक्षे सत्वं, विपक्षे चाऽसत्त्वमेव असिद्धानैकान्तिकविरुद्धा हेत्वाभासाः । आर्हतः स्याद्वादवादी शून्यवादी च सौगतः ।

सांख्यः स्यात्कापिलः त्वक्षपादो नैयायिकः पुनः ॥
औलूक्यो वैशेषिकस्तु बार्हस्पत्यस्तु नास्तिकः ।
लोकान्तिकश्चार्वाकश्चैते षडपि तार्किकाः (स्मृताः ?)
क्रमेण व्याख्या—

अर्हत् देवताऽस्य सौगतो बौद्धोऽपि । पञ्चविंशतितत्त्वानां संख्यानं संख्या, तदधिकृतं शास्त्रं सांख्यं, तद्वेत्त्यधीते वा सांख्यः । कपिलेन कृतो ग्रन्थः कापिलः । तं वेत्त्यधीते वा कापिलः । कपिलस्यायमिति वा । अक्षस्तृतीये नेत्रं

१. 'गुणा' इत्येष शब्दोऽनावश्यकः छन्दोभङ्गकारकश्च ।

पादे अस्य अक्षपादः २ अक्षपादस्यायमक्षपादः न्यायः पञ्चावयववाक्यादि, तं वेत्त्यधीते वा नैयायिकः । न्यायादित्वा-दित्वादिकण् (हे. व्या. ६.२.११८)। यु: पदान्तादित्ये कारागमः योगोऽपि योगः, प्रत्याहारादिस्तं वेत्त्यधीते वा योगस्ताद्वेत्यधीते इत्यण् । उलूकस्यापत्यमिव तज्जन्यत्वादौलूक्यं शास्त्रं, उलूकवेषधारिणा महेश्वरेण प्रणीतमिति प्रसिद्धिः । गर्गादिशब्यञ् तत्र । साधुरौलुक्यः । नित्यद्रव्यवृत्तयोऽन्त्याविशषास्ते प्रयोजनमस्य वैशेषिक शास्त्र तद्वत्यधीते वा ।[१] योगस्तद्वेत्त्यधीते (हे. व्या.–६.२.११९) इत्यण् । उलूकस्यापत्य मिव तज्जन्यत्वादौलूक्यं शास्त्रं उलूकवेषधारिणा महेश्वरेण प्रणीतमिति प्रसिद्धिः । गर्गादिर्वाय्यञ् । तत्रासाधुरौलूक्यः । नित्यद्रव्यवृत्तयोऽन्त्याविशेषास्ते प्रयोजनमस्या वैशेषिकं शास्त्रं, तान्वेत्त्यधीते वा वैशेषिकः । बृहपतिना कृतं बार्हस्पत्यं शास्त्रं, तत्र साधुर्बार्हस्पत्यः बृहस्पतेरयं शिष्य इति वा । अनिदमीति ञ्यः (हे. व्या. ६.१.१५) । नास्ति पुण्यं पापमिति नास्तिकः लोकेष्वायतं लोकायतं बृहस्पति प्रती(णी?) तं शास्त्रं तद्वेत्यधीते लोकायतिकः । न्यायादिभ्यादिकत्वा (हे. व्या. ६.२.११८) याज्ञिक्यौष्ट्रिकेति निपात-नाल्लोकायतिकोऽपि । चर्वत्यात्मानं चार्वाकः, मवाक् श्यामाकेति (हे. ५.३९) आनिपात्यते ।।छ।।

उपसंहारमाह—

एते आर्हतादयः । तर्कप्रयोजनमेषां तार्किकाः ।।छ।।

इति वायटगच्छीय श्री जिनदत्तसूरि पण्डित श्रीमदमरविरिचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनामिम्न वर्ण्यस्तबकोल्लासी देवदेवीस्वरूप निरूपणो द्वादश प्रसरः ।। ग्रं. ६००

नाय(यि)कानायकक्रममिति ।
प्रकृतिस्त्रेधा, पुंनार्योरुत्तमा मध्यमाधमा ।
उत्तमा केवलगुणा, मध्यमा गुणदोषभाक् ।।
दोषमध्यधमा तत्राधमप्रकृतयोऽनुगाः ।
विदूषकविटश्चेट्यादयो नायकयोः पुनः ।।
भवत्यक्षमप्रकृति (तिः) मध्यमप्रकृतिस्तथा ।
कथाव्यापी सर्वगुणालङ्कृतो नायकः पुनः ।।

कथाव्यापी सर्वगुणो नेतृत्वादिगुणान्वितः ।
वक्ष्यमाणशोभाप्रयुक्तश्च नेतृत्वादि गुणबाहुल्यान्मध्यमप्रकृतिरपि सर्वगुणः । नेतृत्वगुणाश्चैते धनिकोक्ताः[२]—

नेता विनीतो मधुरस्त्यागी दक्षः प्रियवदः । रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ।। बुद्ध्युत्साहस्मृतिप्रज्ञाकला मानसमन्वितः । शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ।। (दशरूपक २.१.२) नयति व्याप्नोति इति वृत्तफलं चेति नायकः ।।छ।।

शोभाविलासललितस्थैर्योदार्यगभीरता ।
माधुर्यतेजसी चाष्टौ सत्त्वजा नायके गुणाः ।।

अष्टावित्युयुक्तपरिगणनं न तु संख्यानियमोऽन्येषामपि संभवात् । सत्वं देहविकारस्तस्माज्जातः । क्रमेण लक्षणं यथा—

शोभादाक्ष्यघृणास्पर्द्धाशौर्योत्साहप्रबोधिकाः ।
यतः शरीरविकाराद्दाक्ष्यादि प्रबुध्यते सा शोभेत्यर्थः ।

---

१. 'योगस्तद्वे........त्यधीत वा' इदं दे. पुस्तके नास्ति ।

२. वस्तुतस्तु 'दशरूपके' धनंजयोक्ताः (२.१–२)

दाक्ष्यं यथा---

स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो
रामस्य त्रिपुरान्तकृद्दिविषदां तेजोभिरिद्धं धनुः ।
शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डक---
स्तस्मिन्नाहित एव गर्जितगुणं कृष्टं च भग्नं च तत् ।। (महावीरचरित्रे)

घृणावीवार्थजुगुप्सा ।

उत्तालताडकोत्पातदर्शनेऽप्यप्रकम्पितः ।
प्रयुक्तस्तत्प्रमाथाय स्त्रैणेन विचिकित्सति ।। (महावीरचरिते)

स्पर्धा अधिकेन सह साम्याधिक्याभिलाषो यथा---

एषां पश्य पुरस्तटीमिव किल क्रीडाकिरातो हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः ।
इत्याकर्ण्य कथा(था) द्रुतं हिमनिधावद्रौ सुभद्रापते---
र्मन्दमन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम्

शौर्यं यथा---

अन्त्रैः स्वैरपि संयताग्र्यचरणो मूर्छाविरामक्षणो
स्वाधीनव्रणितांगशस्त्रसचिवो रोमोद्‌गमं वर्मयन् ।
भग्नानुद्वलयन्निजान्यभया नाधर्षयन्निष्ठुरं
धन्यो धाम जयश्रियः पृथुरणस्तम्भे पताकायते ।[1]

उत्साहो यथा---

मूर्ध्ना जाम्बवतोऽभिवाद्य चरणावापृच्छय सेनापती--
नाश्वस्याश्रुमुखान्मुहुः प्रियसखान् प्रेष्यान् समादिश्य च ।
आरम्भं जगृहे महेन्द्रशिखरादम्भोनिधेर्लंघने---
रंहास्ते रघुनाथपादरजसामुच्चैः स्मरन्मारुतिः ।।छ

विलासो दृग्गतीधीरे वचः सहचरस्मितं ।
दृक्कृतत्रिलोका वक्त्रा धीरी(रा)गतिर्वृषवद्गन्धे भवेत् । यथा---

दृष्टिस्तृणीकृतजगत्त्रय(सत्त्व)सारा ।
धीरोद्धता नमयतीव गतिर्धरित्र्याम् ।[2]
कौमारकेऽपि गिरिवद्‌गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव ।। (उत्तररामचरित)

मृदु शृंगारि चेष्टा या सा पुनर्ललितं मतम् ।

---

१. दशरूपकटीकायां कैश्चित्पाठभेदैः सह ।

२. मूले तु 'नमयती व गतिर्धरित्रीं' इति ।

मृदुर्गर्हारहिता शृङ्गारिणी शृङ्गाररसजनिता चेष्टा । वचःकायव्यापृतिर्यथा—

कश्चित् कराभ्यामुपगूढनाल–
मालोलपत्राभिहितद्विरेफम् ।
रजोभिरन्तः परिवेषबंधि
लीलारविन्दं भ्रमयाञ्चकार ।।

विघ्नेऽप्यचलनं स्थैर्यमारब्धात् कर्मणोऽखिलात् ।
अवचलनं दार्ढ्यं अखिलाच्छुभादशुभादपि ।।

यथा यथा समारंभे दैवात् सिद्धिन(र्न) गच्छति ।
तथा तथाऽधिकोत्साहो धीराणां हृदि वर्तते ।।

औदार्यं दानमभ्युपपत्तिः संभाषणं जने । दानमाजीवितादेरभ्युपपत्तिः, परित्राणार्थिनोऽङ्गीकरणं, संभाषणं प्रियालापो जने स्वकीये परकीये वा ।

दानं यथा—

शिरोमुखैः स्पन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवैव तावत् किं भक्षणं त्वं विरतो गरुत्मन् ।।

अभ्युपपत्तिर्यथा—

एते वयममी दाराः कन्येयं कुलजीवितं । ब्रूत येनात्र वः कार्यमनास्थो बाह्यवस्तुषु ।।

संभाषणं यथा—

उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरुः
शौर्यं यत् तु न तद्गिरां पथि न तु व्यक्तं हि तत्कर्मभिः ।[1]
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः
सत्यं ब्रह्मतपो निधिर्भगवतः किं वा न लोकोत्तरम् ।।छ।। (महावीरचरिते)

गाम्भीर्यं कोपहर्षादिविकारानुपलम्भकृत् ।

यन्माहात्म्यात् क्रोधानन्दादीनां मुखरागनेत्रविकासादयो विकारा नोपलभ्यन्ते । तन्निर्विकारदेहस्वरूपं गाम्भीर्यं । आदिशब्दाद्भयशोकादिग्रहः । यथा—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ।।छ।।

माधुर्यं मधुरा चेष्टा क्षोभहेतौ महत्यपि ।

अनुल्बणत्वं मधुरा चेष्टा परिकरबन्धस्मश्रुकेशसमारचनवस्त्रावलोकनादिलक्षणो विकारः क्षोभः सत्त्वचलनं । तस्य हेतौ युद्धनियुद्धव्यायामादौ विकारानुपलम्भात् मृदुविकारोपलब्धिरन्यो ऽतिगाम्भीर्यादित्यन्माधुर्यं यथा—

कपोले जानक्याः परिकलभदन्तद्युतिमुषि–
स्मरस्मेरं गण्डोड्डमरपुलकं वक्त्रकमलं ।

---

१. मूले तु 'वीर्यं यत्तु न तद्गिरां पथि ननु व्यक्तं हि तत्कर्मभिः ।' इति ।

मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं दृढयति रघूणां परिवृढः ।।छ।।

परक्षेपाद्यसहनं तेजः, प्राणात्ययेऽपि हि पराच्छत्रोर्न तु गुरोर्मित्रादेर्वा क्षेपस्तिरस्कारस्तस्य। आदिशब्दाद्दैन्यावज्ञादेरसहनं प्राणात्यये हि प्राणात्ययमप्यङ्गीकृते(त्ये)त्यर्थः। तेनासहिष्णुत्वमक्षमा, न तु देशकालावस्थाद्यपेक्षया नीत्या च सहनपूर्वकं नियतिनमिति यथा—

ब्रूत नूतनकूष्माण्डफलानां के भवन्त्यमी।
अङ्गुलीदर्शनाद्येन न जीवन्ति मनस्विनः।।

स धीरोदात्तललितशान्तोद्धतश्चतुर्विधः। स नायकः। धीरशब्दः प्रत्येकं योज्यः। धीरोदात्तधीरललित धीरशांतधीरोद्धता इति। अकालरत्वं धीरशब्दस्यार्थः सर्वत्र समान एव ।।छ।।

दक्षिणो धृष्टोऽनुकूलः शठश्चेति चतुर्विधः।।
एकैकोऽयं नायकस्य भेदाः स्युरिति षोडश।।

धीरोदात्तादीनां लक्षणं यथा—

गूढगर्वः स्थिरो धीरः क्षमावानविकत्थनः।
दृढव्रतो महासत्त्वो धीरोदात्तः स रामवत्।।

गूढगर्वो विनयच्छन्नावलेपः। स्थिरो विमृश्यकारी। धीरो महाव्यसनेऽप्यकातरः। अवि.... नात्मश्लाघापरः दृढव्रतोऽङ्गीकृतनिर्वाहकः। महासत्त्वः क्रोधशोकाद्ये(द्य)नभिभूतान्तसत्त्वः—

सुखी मृदुः, कलासक्तः शृङ्गारी, चिन्तयोज्झितः।

विज्ञेयो धीरललितो नलवद्वत्सरा... सुखी सोग(राग?) प्रवणो, मृदुरक्रूराचारः। कलासु गीताद्यास्वासक्तः। शृङ्गारप्रधानो मन्त्रिणः राज्यभारत्वाच्चिन्तारहितः।।छ।।

विनयी निरहङ्कारः कृपावान् सनयः शमी।

धीरशान्तो यथा—

विनयी गुरुः जनाद्यनुलंघीत्वात्... निरहङ्कारः सर्वथाऽप्यनवलेपः। धीरोदात्तस्तु विनयच्छन्नावलेप इति भेदः। मालतीमाधवे माधवः।

अविलिप्तश्चलो रौद्रः शूरो मायी विकत्थनः।
मत्सरी छद्मवान् धीरोद्धतो रावणवत् मतः।।

अविलिप्तः शौर्यादिमदवानव(ब)लोऽनवस्थितो, रौद्रश्चण्डः, मन्त्रादिव(ब)लेनाविद्यावान् नवस्तुप्रकाशको, मायी विकत्थनः, स्वप्रशंसी मत्सरी, असहतः छद्मवञ्चनमात्रम्।।छ।।

देवा धीरोद्धता धीरोदात्ताः सैन्येशमन्त्रिणः।
धीरशान्ता वणिग्विप्रा राजानः स्युश्चतुर्विधाः।।

अयं च नियमो देवादीनां[1] मर्त्यापेक्षया शिवादीनामुदात्तानां, ब्रह्मादीनां शान्तानामापदर्शनात्। राजान इति क्षत्रियजातिः। बहुवचनाद् व्यक्तिभेदेन चतुःस्वभावो, नाटकस्य नेता, कस्यां व्यक्तौ। एकत्र प्राधान्येन स्वभावचतुष्कस्य वर्णयितुमशक्यत्वादिति। प्रधाननायकस्य वानियमो, गौणनेतृणां तु स्वभावान्तरमपि.....वत्यामेन निबध्यते।

---

१. 'देवानां' पा.प. १।

अथ नायकस्य शृङ्गारित्वेऽस्थाभेदाः।
ज्येष्टा(ष्ठा)यामपि सप्रेम दक्षिणो वत्सराजवत्।

कनिष्ट(ष्ठा)यां रक्तो ज्येष्ठा(या)मपि मानदाक्षिण्यशीलत्वाद्दक्षिणो यथा—

प्रसीदत्यालोके किमपि किमपि प्रेमगुरवो
रतक्रीडाः कोऽपि प्रतिदिनमपूर्वोऽस्य विनयः।
सविश्रम्भः कश्चित् कथयति च किञ्चित् परिजनो
न चाहं प्रत्येमि प्रियसखि किमप्यस्य दयितम् ॥

व्यक्तापराधवान् धृष्टो यथा—

लाक्षालक्ष्मललाटपट्टमभितः[1] केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागः परः।
दृष्ट्वा कोपविधायिमण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशश्वासाः समाप्तिं गताः ॥ (. श. ६०)

एकभार्योऽनुकूलः स्याज्जानकीदयितो यथा—

इयं गेहे लक्ष्मीरियमृतवर्त्ति नयनयो[2]
रसावस्याः स्पर्शो वपुषि वहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ (उतररामचरित २.३२)

शिवो गूढापराधवान् यथा—

दृष्ट्वैकासनसङ्गते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकप्रेमोल्लसन्मानसा–
मन्तर्हासवलत्कपोलफलकां धूर्त्तोऽपरां चुम्बति ॥छ॥ (अमरुशतक)

अथ नायकविजये प्रतिनायकस्य लक्षणं–

लुब्धो धीरोद्धतः पापी व्यसनी प्रतिनायकः।
दशास्यदुर्योधनवद्रासधर्मतनूजयोः ॥छ॥

अथ नायिकालक्षणम्—

नायिका तद्गुणा स्वान्या सामान्या त्रिविधा मता।
तद्गुणा यथोक्त सम्भविनायकगुणयोगिनी। सा च स्वीया परकीया साधारणा चेति त्रिधा।

अथ स्त्रीलक्षणम्—

स्वेनोढा शीलादिमती स्वा रामस्येव जानकी।
आदिग्रहणाल्लज्जात्यावगृहाचारचातुर्यादिपरिग्रहः ॥

---

१. 'लक्ष्मललाटपट्टमभि' इदं पाप १ पुस्तके नास्ति।
२. मूलेतु '.....रियममृत......इति

शील यथा—

कुलबालियाए पेच्छह जोव्वणलायण्णविब्भमविलासा।
पवसंति व्व पवसिएवे पतिव्व पएव रमदंते ॥

आर्जवं यथा—

हसियमवियारसुद्धभमिय विरहियविलाससच्छायं।
भणियमवियारसुद्धं धन्नाण करे कलत्ताणा ॥छ॥

मुग्धा मध्या प्रगल्भेति स्वकीया त्रिविधा भवेत्।
मुग्धारोहद्वयःकामा रतिकामाल्पकोपभाक् ॥

रोहद्वर्द्धमानं वयो यौवनं कामश्च यस्याः सुरते वामशीलानभिज्ञत्वादत एवैषदीर्ष्याकोपौ सुरतोपाय प्रसाधन[1]। रोहद्यौवना यथा—

दोर्मूलावधिसूत्रितस्तनभरः स्निह्यत्कटाक्षे दृशौ
किञ्चित्ताण्डवपण्डिते स्मितसुधासिक्तोक्ति(ते?) भ्रूलते।

चेतः कन्दलितस्मरव्यतिकरैर्लावण्यमङ्गैर्धृतं
तन्वङ्ग्यास्तरुणिम्नि सर्पति शनैरन्यैव काचिद्गतिः ॥

रोहत्कामा यथा—

दृष्टिः सालसतां बिभर्ति न शिशुक्रीडासु बद्धादरो
श्रोत्रे प्रेषयति प्रवर्त्तितसखीसम्भोगवार्तास्वपि।

पुंसामङ्कमुपेतशङ्कमधुना नारोहति प्राक् यथा
बाला नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः ॥ (सु.र.भा.)

रतवामा यथा—

व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका। सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः। (कुमारसंभव–८.२)

मृदुकोपा यथा—

प्रथमजनिते बालामंतर्विकारमजानतीं।
कितव चरितेधांके विनम्रभुजैव सा ॥

चिबुकामलिकं चोन्नम्योच्चैरकृत्रिमविभ्रमा।
नयनसलिलस्यन्दिन्योष्ठे रुदत्यपि चुम्बिता ॥

एवमन्ये लज्जा——गतिबन्धना मुग्धा—व्यवहारा निबन्धनीयाः। यथा—उदितोरुसादमतिवेपथु मत्सदृशो ऽभिभर्तृ विधुरं त्रयोपयो वपुरतिशयशंसि पुरः प्रतिपत्तिमूढमपि बाढमभूत् ॥

आरूढयौवनानङ्गा मध्या मूर्छंति मोहना।

---

१. 'विद्धि मते' पा. ५.१

आरूढयौवना यथा—

तरन्तीवाङ्गानि स्खलदमललावण्यजलधौ
प्रथिम्नः प्रागल्भ्यं स्तनजघनमुन्मुद्रयति च।
दृशो लीलारम्भाः स्फुटमपवदं ते सरलता—
महो सारङ्गाक्ष्यास्तरुणिमनि गाढः परिचयः॥

आरूढकामा यथा—

स्मरनवनदीपूरेणोढाः पुनर्गुरुसेतुभिः
यदपि विधृतास्तिष्ठन्त्याराद्पूर्णमनोरथाः।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानी तं पिबन्ति रसं प्रियाः॥

मूर्छांतरता यथा—

तावच्चिय रइ समए महिलाणं विब्भमा विरायंति।
जाव न नवकुवलयदलसच्छायं मालयंति नयणाइं॥

एवमन्येऽपि व्रीडानपहृताः स्वयमनभियोगकारिणो व्यवहाराः स्युर्यथा—

स्वेदाम्भः कणिकाञ्चितेऽपि वदने जातेऽपि रोमोद्गमे
विश्रम्भेऽपि गुरौ पयोधरभरोत्कम्पेऽपि वृद्धिं गते।
दुर्वारस्मरनिर्भरेऽपि हृदये नैवाभियुक्तः प्रियः
तत्त्वंयो हृतकेशकर्षणघनाश्लेषामृते लुब्धया॥छ॥

प्रगल्भा प्रौढयौवनकामा, स्पर्शेऽप्यचेतना प्रकृष्टकामत्वात् प्रियेण स्पृष्टाऽप्येषा चैतन्यं मुञ्चति।

प्रौढयौवना यथा—

नितम्बो मन्दत्वं जनयति गुरुत्वाद्द्रुतगते—
र्महत्वादुद्वृत्तस्तनकलशभारः श्रमयति।
विकासिन्या कान्त्या प्रकटयति रूपं मुखशशी
ममाङ्गानीमानि प्रसहमभिसार हि रिपवः॥

प्रौढकामा यथा—

न जाने संमुखायाते प्रियाणि वदति प्रिये।
सर्वाण्यङ्गानि मे यान्ति नेत्रतासुखकर्णताम्॥

स्पर्शेऽप्यचेतना यथा—

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनात्
तद्वासः श्लथमेखलागुणधृतं किञ्चिन्नितम्बे स्थितं।
एतावत् सखि वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः
कोऽसौ कास्मि रतं नु किं कथमिति स्वल्पाऽपि मे न स्मृतिः॥ (अमरुशतके १०१)

एवमन्येऽपि परित्यक्तह्रीयन्त्रणावैदग्ध्यप्रागल्भ्यप्रायाः प्रगल्भा व्यवहारा ज्ञेयाः। यथा—

उद्धर्तोर्निर्भृतमेकमनेकैच्छेदवन्मृगदशामविरामैः।
श्रु(श्रू)यते स्म मणितं कलकाञ्चीनूपुरध्वनिभिरक्षतमेव ॥

धीराधीराऽधीरामध्या प्रौढाप्युभे त्रिधा। धीरामध्या, धीराधीरा मध्या, अधीरामध्या। एवं प्रौढाऽपि त्रेधाः ॥छ॥

पोढाऽपि ज्येष्ठा कनिष्ठाभेदा द्वादशधा मताः।
मुग्धैकरूपा प्रागूढा ज्येष्ठा पश्चात् कनिष्ठिका ॥

अथ धीरामध्यानां क्रोधचेष्टा यथा—

तिस्रः सोत्प्रासवक्रोक्त्या तथैव धृतबाष्पया।
वाक्यरूपेण क्रोधिन्यो धीरामध्यादिकाः क्रमात् ॥

सोत्प्रासवक्रोक्त्यामवाप्य या धीरामध्या यथा—

धिग् मां किं समुपेत्य चुम्बसि बलान्निर्लज्ज लज्जा क्व ते
वस्त्रान्तं शठ मुञ्च मुञ्च शपथैः किं धूर्त्तत्तिबाधिसे।
खिन्नाहं तव रात्रिजागरतया तामेव याच प्रियां
निर्माल्योज्झितमुष्यदामनिकरे का षट्पदानां रतिः ॥छ॥

उपचारो बहिच्छाभ्यां धीरा प्रौढप्रियं प्रति। धीरोढादासीत्यतोऽथवाऽऽनुकूल्यतः ॥

अधीरा प्रौढा संतर्जनाघाताभ्यां क्रुधं सृजेत्। धीरा प्रौढा सोपचारा यथा—

एकत्रासनसङ्गतिः परिहृता प्रत्युद्गता दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥

(अमरुशतके १८)

धीरा प्रौढा सा बहिच्छा यथा—

वरं भ्रूभङ्गास्ते प्रकटितगुरुक्रोधविभवा
वरं सोपालम्भाः प्रणयमधुरा गद्गदगिरः।
वरं मानाटोपः प्रसभजनितानादरविधि-
र्निगूढान्तःकोपा कठिनहृदये संवृतिरियम् ॥

वीरा धीरा प्रौढोदासीना यथा—

आयस्ता कलहं पुरेव कुरुते न स्रंसते वाससो
भग्नभ्रूरतिखण्ड्यमानमधरं धत्ते न केशग्रहे।
अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने
तन्व्या शिक्षित एष संप्रति कुतः कोपप्रकारोऽपरः ॥ (अ.श.–१०६)

धीराधीरा प्रौढानुकूला यथा—

यत्पाणिर्न निवारितो निवसनग्रन्थिं समुद्ग्रन्थयन्
भ्रूभेदो न कृतो मनागपि सुदुर्यत्खंड्यमानेऽधरे।

यन्निःशङ्कमिहार्पितं वपुरहो पत्युः समालिङ्गने
मानिन्या कथितोनुकूलविधिना तेनैव मन्युर्महान् ।।

अधीरा प्रौढा संतर्जने यथा—

तथाऽभूदस्माकं प्रथममविभिन्ना तनुरियं
ततो न त्वं प्रेयानहमपि हताशा प्रियतमा।
इदानीं त्वं नाथो वयमपि कलत्रं किमपरं
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम् ।।

अधीरा प्ररूढा साघाता यथा—

कोपात् कोमलबाहुलोललतिकापाशेन बद्ध्वा दृढं
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः।
भूयोऽप्येवमिति स्खलत् किल गिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ।।छ।। (अ.श. ९)

अथान्यस्त्रीलक्षणम्—

अन्या परोढानूढा च परोढा नाधिकारिणी।
रसेऽङ्गिनि ह्यनूढा तु दुष्यंतस्य शकुन्तला ।।

उढेत्युपलक्षणम्। अवरुद्धाऽपि परस्त्रीत्युच्यते। परोढा यथा—

दृष्टिं हे प्रतिवेशिनि क्षणमिहाऽप्यस्मिन् गृहे दास्यसि
प्रेयो नाऽस्य शिशोः पिताद्य विरसाः कौपीरपः पास्यसि ।
एकाकिन्यपि यामि तद्वरमितः श्रोतस्तमालाकुलं
नीरन्ध्राः पुनरुल्लिखन्तु जठरच्छेदानलग्रन्थयः ।।

इयं तु प्रधाने रसे नोपकारिणीति न प्रपञ्चिता कन्या तु पित्राद्यायत्तत्वादनूढापि परस्त्री यथा—

दृष्टिः शैशवमण्डना प्रतिकलं प्रागल्भ्यमभ्यस्यते
पूर्वाकारपुरस्तथाऽपि कुचयोः शोभां नवामीहते ।
नादत्ते गुरुतां तथाऽप्युपचित। भोगा नितम्बस्थली
तन्व्याः स्वीकृतमन्मथं विजयते तत्रैकपेयं वपुः ।।छ।।

अथ सामान्यालक्षणम्। सामान्या गणिका देवदत्तेव मूलदेववत्। यथा—

गाढालिङ्गनपीडितस्तनतटं स्विद्यत्कपोलस्थलं ।
संदष्टाधरमुक्तसीत्कृतलसद्भ्रान्तभ्रूनृत्यत्करम् ।
चाटुप्रायवचो विचित्रभणितं घातैरुतैश्चाकिलं
वेश्यानां धृतिधामपुष्पधनुषः प्राप्नोति धन्यो रतम् ।। (शृ. ति. १.१२७)

अथ स्वपरस्त्रीणामष्टावस्थाः स्वाधीनकान्ताप्रोषिता भर्तृकाखण्डितास्तथा ।
कलहान्तरिता वासकसज्जोत्कण्ठिताऽपि च
विप्रलब्धाभिसारिकेत्यष्टावस्थाः स्वयोषिताम् ।।
यस्या रतिगुणाकृष्टो रचयन्मदनादिकम् ।

नैवोज्झति पतिः पार्श्वं स्वाधीनपतिका हि ॥ यथा—

मा गर्वमुद्वह कपोलतले चकास्ति कान्ता स्वहस्तलिखिता मम मञ्जरीति ।
अन्याऽपि किं सखि न भाजनमीदृशानां । वैरी न चेद्भवति वेपथुरन्तरायः ॥ (सुभाषितरत्नकोश)

यद्भर्ता प्रोषितः कार्यात् सा स्यात् प्रोषितभर्तृका । यथा—

आदृष्टिप्रसरात् प्रियस्य पदवीमुद्वीक्ष्यतेविस्मयात्
विश्रान्तेषु पतिष्वहः परिणतौ ध्वान्ते समुत्सर्पति ।
दत्त्वैकसश्रुवा गृहं प्रतिपदं पान्थस्त्रियोऽस्मिन् क्षणे
मा भूदागत इत्यमंदवलितग्रीवं पुनर्वीक्षितम् ॥छ॥ (. श. ९६)

यत्पतिः प्रातरायाति नारीनखपदांकितः ।
जागरारुणनेत्रस्तां खण्डितं पण्डिता विदुः ॥

यथा—

नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम् ॥
प्रतिदिशमपरस्त्रीसङ्गशंशी (सी) विसर्प-
न्नवपरिमलगन्धः केन शक्यो वरीतुम् ॥

अनु नेतरि विलेशे निरास्ते मन्युनाशया ।
सङ्गसौख्ये नान्तरिता कलहान्तरि ता तु सा ॥

यथा—

निःश्वासा वदनं दहंति हृदयं निर्मूलमुन्मथ्यते
निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिनं रुद्यते ।
अङ्गे शोषमुपैति पादपतितः प्रेयांस्तथोपेक्षितः
सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः ।(————)

कलहान्तरितायामीर्ष्यया कलहपूर्वकपरस्परमसंयोगाभिलाषः । खण्डिता तु प्रियसमागममर्थिनी कलहाभावात् । किं त्वन्यासङ्गिनि प्रिये ईर्ष्यामात्रवतीति विशेषः ॥छ॥

परिपाट्यां फलार्थे वा नवे प्रसव एव वा
दुःखे चैव प्रमोदे च षडेते वासका स्मृताः ॥
उचिते वासके स्त्रीणामृतुकालेऽथवा बुधैः ।
द्वेष्यानामपि चेष्टानां कर्त्तव्यमुपसर्पणम् ॥
नीत्येति वासके सज्जीकृताङ्गसुरतालया ।
याऽसौ वासकसज्जा स्यात् प्रियमार्गविलोकिनी ॥

यथा—

तल्पकल्पनविधेरनन्तरं भर्तृमार्गमवलोकते मुहुः ।
दर्पणे क्षणमुदीक्षते वपुर्हर्षभूषणमनिंद्यभूषणा ॥छ॥

स्ववशे(ऽ)नागते कान्ते तदनागमकारणम् ।
व्याकुला चिंतयेद्या सा विरहोत्कण्ठिता मता ।।छ।।

यथा—

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृत्
यो मां नेच्छति नागतश्च हहहा कोऽयंविधेः प्रक्रमः ।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे ।
वावृत्तविवृ(त)त्तनव्यतिकरा नाप्नोति निद्रां निशि ।।

विरहोत्कण्ठितायां प्रियागमनमचिरादवश्यम्भावि परस्परकलहश्चनास्तीति खण्डिता कलहान्तरिता विप्रलब्धाभ्यो भिन्नेयम् ।।छ।।

दूत्या स्वयं वा संकेतं कृत्वा केनापि हेतुना ।
प्रियेऽनागते दुःस्थगया विप्रलब्धां वदन्ति ताम् ।।

यथा—

यत्संकेतगृहं प्रियस्य कथितं संप्रेक्ष्य दूतीं स्वयं तच्छून्यं सुचिरं निषेव्य स्वदृशा पश्चातु भग्नाशया ।
स्थानोपासनसूचनाय विगलत्सान्द्रा जनैरश्रुतिः भूमावक्षरमालिकेव लिखिता दीर्घा रुदत्या शनैः ।।
विप्रलब्धायां नान्यस्त्र्याशक्तिरिति खण्डिताया भिन्नासौ ।।छ।।

या स्नेहादभिसरत्यभिसारयति या प्रियम् ।
आक्रान्ता मदकामाभ्यां तां वदन्त्यभिसारिकाम् ।।

यथा—

उरसि निहितस्तारो हारः कृता जघने घने ।
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।
प्रियमभिसरस्येवं मुग्धत्वमाहितडिण्डिमा
किमपरमितस्त्रासोत्कम्पा दिशः समुदीक्षसे ।।

तथा—

नवमेऽवगच्छति यथा लघुतां करुणां यथा च कुरुते स मयि ।
निपुणं तथैनमधिगम्य वदेरभिदूतिका चिदिति संदिदिशे ।।छ।।

अन्यस्त्री स्याद्विरहोत्का विप्रलब्धाभिसारिका ।

अन्यस्त्रियौ कन्योढे संकेतात् पूर्वं विरहोत्कण्ठिते । पश्चाद् विदूषकादिना सहाकादिना सहावभिसारिरत्यावभिसारिका । कुतोऽपि कारणात् संकेतस्थानमप्राप्ते नायके विप्रलब्धे इति व्यवस्थितैवानयोरिति ।।छ।।

ईर्ष्याहेतुः सपत्नी तु विज्ञेया प्रतिनायिका ।।छ।।

अथासां सहायिन्यः

सखी धात्री नटी दासी प्रतिवेश्या कुमारिका ।
लिङ्गिनी शिल्पिनी कारुः स्वयंदूत्यो मृगीदृशाम् ।।

शिल्पिनी चित्रकरादि स्त्री कारुरजकीप्रभृतिः । तत्र सखी यथा—

सव्वं जाणइ दट्ठुं सरिसंमि जणंमि जुज्जपराउ ।
मरउ न तुमं भणिस्सं मरणं पि सलाहणिज्जं से ।।

स्वयंदूती यथ.——

महुएहिं किं व वालय हरसनिय वाउ जइ विसेसिचयं ।
साहेभि कस्स सुंदर गामो दूरे अहं इक्का इत्याद्यूह्यम् ।।छ।।

सत्त्वजा विंशतिः स्त्रीणामलंकारास्तु यौवने

संवेदनरूपात् प्रसृतं यत्ततोऽन्यद्देहधर्मत्वेऽनवस्थितम् । सत्त्वं यदाह-देहात्मकं भवेत् सत्त्वमिति । ततो जाता सत्त्वजाः राजस तामस स (श) रीरेष्वसम्भवात् चण्डालीनामपि रूपलावण्यसम्पदो दृश्यन्ते, न तु चेष्टालंकाराः । तासां भवंत उत्तमतामेव सूचयन्ति । अलंकारा देहमात्रनिष्ठाः न तु चित्तवृत्ति-रूपाः । ते ह्युत्तमप्रकृतीनां वनितानां यौवने वपुषि भूषाहेतवः । प्रादुर्भूत दृश्यन्ते बाल्येऽनुद्भिन्नाः, वार्द्धके तिरोभूताः । एते च तारुण्य (तरुण) स्त्रीणामेव प्राधान्यतोऽलंकाराः, पुंसां तूत्साहादयो मुख्यतोऽलंकाराः । तेन सर्वेष्वपि नायकभेदेषु धीरत्वं विशेषणतयोक्तम् । भावादयस्तु पुंसां उत्साहाद्या तथोदिता एव भवन्ति ते गौणाः । भावादीनां विंशतिसंख्यात्वमात्रोद्दिष्टभेदापेक्षयाऽपरथा यौवने वनितालंकाराणामनन्तत्वं ।।छ।।

एषां व्यक्तिर्यथा (व्याप्तिर्यथा सं.प. १,२)

त्रयोऽङ्गजा भावहावहेला स्वाभाविका दश ।
लीलादयस्त्वमी सर्वे क्रियारूपास्त्रयोदश ।।

पुंभोगे सप्त शोभाद्या गुणात्मानस्त्वन्यजाः । तत्राद्यास्त्रयोऽङ्गाद्यौनोद्वाधरशालिनः । प्रियदृष्टि व (वं) स्त्रमाल्यादि-बाह्यवस्तुनिमित्तरहिताद्गात्रमात्रा । अतिसत्वोद्बुद्धेन प्राग्जन्माभ्यस्तरस्त्वमात्रेण जायन्त इत्यंगजाः । एतेऽल्पबहुभूयो विकारात्मजाः । यद्यपि–'देहात्मकं भवेत्सत्त्वं सत्त्वाद्भावः समुत्थितः । भावात् समुत्थितो हावो भावाद्धेला समुत्थिता ।' इति भरतवचनक्रमणैषां हेतुभावस्तथापि परम्परया तीव्रतमसत्त्वस्याङ्गस्यैव कारणत्वादङ्गजा इत्युच्यन्ते । एवं च परस्पर समुत्थितत्वेऽप्यमीषामङ्गजत्वमेव । तथाहि–कुमारीशरीरे प्रौढतमकुमार्यान्तर्गतहेलामलोका न हावोद्भवो भावश्चेदु ल्लसितपूर्वः । अन्यथा तु भावस्यैवोद्भवः । एवं भावेऽपि दृष्टो हावो हेला वा । यदा तु हावावस्थोद्भिन्न पूर्वापरत्र च हेला दृश्यते, तदा हेला एव इह हावाद्धावो भावाद्भाव इति वाच्यम् । एवं परकीयभावादिश्रवणात् सरस-काव्यादेरपि हेलादीना प्रयोगो भवति इति मन्तव्यम् । एतदन्योन्यसमुत्थितत्वं भरतवचनं त्वेकपिण्डापेक्षवत्संवाहनीय-मिति । परे देशत्वाद्यतनजन्मसमुचितविभववशाः स्फुटीभावा इति भावानुविद्धे देहे स्वसमात्प्रतिलक्षणाद्भावात् प्रियोप-भोगानुपभोगयोर्जायन्ते । तथा कस्याश्चिन्नायिकायाः कश्चिदेव स्वभावबलाद्भवति । अन्यस्यात्व (स्त्व?) यः । कस्याश्चित् द्वौ त्रयः । इत्याद्यतोऽपि स्वाभाविका भावहावहे लास्ते सर्व एव सर्वास्वेव सत्त्वादिकास्ततमाङ्गनास्तु भवन्ति । एवमङ्गजाः स्वाभाविकाश्च मिलितास्त्रयोदशा (शो?) ऽपि क्रियारूपा स्त्रीचेष्टात्मकाः । ततः परे सप्त पुरुष भोगे सति यत्तमन्तः-परिस्पन्दं विना गुणस्वभावा देहधर्मरूपा भवंति । पूर्वे तु क्रियायत्नजाः । इच्छारि (हि?) तो यत्नस्ततो देहक्रियेति पदार्थविदः । अतोऽन्ये सप्त यत्र (त्न) जाः ।

अथ भावादीनां प्रत्येकशो लक्षणं । भावो वाचादिवैचित्र्यं चिन्हं रत्युत्तमत्वयोः । वाचाभादिशब्दोत्तरपादादीनां वैचित्र्यं हृद्योऽल्पो विकारः तथा तरति भावस्य पामरनायिकावैलक्षण्येनोत्तमप्रकृतिकत्वस्य च निश्चयहेतुर्भावभूतं वागादि वैचित्र्यमुपलभ्योद्बुद्धोऽयमन्तःकामप्रदीपोऽस्य, इ (त्यु?) त्तमप्रकृतिश्च नायिकेयमिति सहृदयस्य निश्चयो भवतीति । यथा—

दृष्टिः मालसतां बिभर्ति न शिशुक्रीडासु बद्धादरा
श्रोत्रं प्रेषयति प्रवर्त्तिप्रसरसंभोगवार्तास्वपि।
पुंसामङ्कमुपेतशङ्कमधुना नारोहति प्राग्यथा
बाला नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः ।।छ।। (अ.श.)

हावो नेत्रादिविकृतं सशृङ्गारमसन्ततं। नेत्रयोरादिशब्दात् चिबुकग्रीवादेश्च सातिशयो विकारः। शृङ्गारोचित उद्भिद्योद्भिद्यविश्रांतिमत्वेनासन्ततो हाव इति। यथा—

स्मितं किंचिन्मुग्धं तरलमधुरो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः।
गतानामारम्भः किश(स)लयितलीलापरिकरः
स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः ।।छ।। (——)

हेलावदेवाविच्छिन्नं यौवनोल्लासशालिनी। तदेव नेत्रादिविकृतं सातिशयमविच्छिन्नं निरन्तरं प्रसरणशीलं सशृङ्गारं समुचितविभावविशेषोपग्रहविरहादनियतविषयप्रबुद्धरतिभावसमन्वितं हेला। अत्र तारुण्योत्कर्षो यथा(था)—

तरन्तीवाङ्गानि स्खलदमललावण्यजलधौ
प्रथिम्नः प्रागल्भ्यं स्तनजघनमुन्मुद्रयति च।
दृशो लीलारम्भाः स्फुटमपवदन्ते सरलतां
अहो सारङ्गाक्ष्यास्तरुणिम्नि(मनि)गाढः परिचयः ।।छ।।

अत्र ह्यन्तर्गतरतिप्रबोधमात्रमुक्तं त(त्वा?)भिलाषशृङ्गार इति मन्तव्यम्। तदेव ब्राह्मणस्योपनयनमिव भविष्यत्पुरुषार्थसद्भपीठबन्धत्वेन योषितामाभनन्ति। लीलादयो दश स्वाभाविकाः। विशिष्टविभावलाभे सविषयत्वेन स्फुटीभूतां(तायां) रतौ(तौ)तदुपबृंहणकृतादेवाविकारा—लीलाविलासविच्छित्तिविभ्रमबिब्बोककिलि(ल) किञ्चितमोट्टायित कुट्टमितं ललितविहृतनामानः। क्रमादेषां लक्षणं यथा—

लीलाप्रेम्णैव धात्रेषचेष्टानुकृतिरीशितुः। धियं गतानां वागादीनां प्रियप्रीत्यतिशयेन न तूद्धर्वदूकृत्येणात्मनि सशृङ्गारं योजनं। अनुकृति लीला यथा—

जं जं करेमि जं जं जंपसे जह तुह तुमं नियंसेसि।
तं तमणु सिक्खिरीअदियहो दीहो न संबुडइ ।।छ।।

विलासः प्रियवीक्ष्यादिस्थानयानादिचारुता।
तात्कालिकः सातिशयो विशेषो यथा——

अत्रान्तरे किमपि वाग्विभवातिवृत्त
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः।
तद्भूरिसात्त्विकविकारविशेषरम्य—
माचार्यकं विजयमन्मथमाविरासीत् (मा.मा.) ।।छ।।

विच्छित्तिः सौभाग्यशोभाकृद्गर्वादित्यवेषता, सौभाग्यं गर्वादल्पा या कल्परचना प्रकृष्टा सौभाग्यादिगुणा शोभाकारिणी विच्छित्तिः। यथा—

सहि पिच्छकच्छकर्ण ऊरुजाया वाहस्स गव्विरी भमइ।
मुत्तहेलरयपसाहणा सा मज्झे सवत्तीण ।।छ।।
बिब्बोको ऽवज्ञ सौभाग्यगर्वादिष्टोऽपि वस्तुनि।

अवज्ञानादरो यथा—

निर्विभुज्य दशनच्छन्दं ततो ऽर्वं भर्तुरवधीरणा परा। शैलराजतनया समीपगामाललाप विजयामहेतुकम् ।। विभ्रमो रागादिना वाग्वपुर्भूषा विपर्ययः। रागः प्रियतमं प्रत्येव बहुमानः। आदिशब्दान्मदहर्षादिपरिग्रहः। मदो मदाकृतश्चित्तोल्लासोहर्षसौभाग्यगर्वः। वचनादीनामन्यथा(भि)निवेशो विपर्ययो विभ्रमः। अन्यथावक्तव्येऽन्यथाभाषणं। हस्तेनादातव्ये पादेनादानं रसनायाः कण्ठे निवेशनं।

यथा—

चकार काचित् सितचन्दनाङ्कै काञ्चीकलापं स्तनभारपृष्ठे।
प्रियं प्रति प्रेषितचित्तवृत्तिर्नितम्बबिम्बे च बबन्ध हारम् ।। (   )

किलकिञ्चितकं गर्वदुःखश्रमभयं क्रुधा रुदितस्मितहसितकम्पेच्छनावसंकरभाग्यगर्वाद्वारंवारं गर्वादीनां संकीर्णतया योषिता यत्करणं तत् किलकिञ्चितं। यथा—

रतिक्रीडाद्यूते कथमपि समासाद्य समयं
मया लब्धे तस्याः क्वणितकलकंठाधर्मधरे।
कृतभ्रूभङ्गासौ प्रकटितविलक्ष्यार्द्धरुदित—
स्मितक्रुद्धोद्भ्रान्तं पुनरपि विदध्यान्मयि रुषम् ।। (   )
प्रियस्य दर्शनं श्रुत्यमृतुकारिषु रागतः।
तद्भावभावनोद्भूतचेष्टा मोट्टायितं मतम् ।।

तद्भावभावनं तन्मयत्वं तेनोद्भूता या चेष्टा लीलादिका सा मदनांगपर्यन्ताङ्गमोटनात् मोट्टायितं यथा—

स्मेरदधधुर्निमित्तं गूढमत्येतुमस्याः
सुभग तव कथायां प्रस्तुतायां सखीभिः।
हरति विनतपृष्ठोदग्रपीनस्तनाया
स्ततवलयितबाहुर्जृम्भितैः सङ्गभङ्गैः।।छ।।   (   )
कुट्टमितं कुचौष्ठादिग्रहादिषु मृषा क्रुधा। आदिशब्दान्न(स्त) नकरादिग्रहः।
प्रियतमेन कचादिषु गृह्यमाणाया अन्तःप्रमोदेऽपि व्यलीककोपकरणं कुट्टमितं। यथा—
ईषन्मीलितलोललोचनयुगं व्यावर्तितभ्रूलतं
संदष्टाधरवेदनाप्रलपितं मामेति मन्दाक्षरम्।
तन्वंग्याः सुरतावसानसमये दृष्टं मया तन्मुखं
स्वेदार्द्रीकृतपाण्डुगण्डफलकं तत् केन विस्मार्यते।।छ।।
ललितं सुकुमारोऽङ्गसञ्चारः कारणोज्झितः।

अङ्गानां हस्तपादभ्रूनेत्राधरादीनां सञ्चारो व्यापारः। सुकुमारोऽतिमनोहरो, द्रष्टव्यं विना दृष्टिक्षेपो, पाह्यांकृते हस्तादिव्यापृतिरित्येवं निष्कारणो ललितं लोचनस्यांचलेन।

विन्यस्यन्ती चरणकमले लीलया स्वैरपातैः।
निःसङ्गीतं प्रथमवयसा नर्तिता पङ्कजाक्षी॥

विहृतं व्याजादितो यज्जल्पकालेऽप्यजल्पनं। व्याजो ह्रीमौग्ध्यान्यचित्तत्वादिप्रस्थापनाशयः, आदिग्रहणान्मौग्ध्य-लज्जादिग्रहः। ततो भाषणस्योचिते समयेऽपि लज्जादिप्रकाशननिमित्तमभाषणं विहृतं। यथा—

पत्युः शिरश्चन्द्रकलामनेन स्पृशेऽति सख्या परिहासपूर्वम्।
सा रंजयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान॥ (कुमार. ७.१९)

केचिद् बाल्य-यौवन-साधारणविहारविशेषं क्रीडितं क्रीडितमेव च प्रियतमविषयं केलिं वालंकारावाहुः। यथा—

मन्दाकिनी सैकतवेदिकाभिः
सा कंदुकैः कृत्रिमपुत्रकैश्च॥
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये॥ (कुमार. १.२९)

व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल कौसुमं रजः।
पयोधरेणोरसि काचिदुन्मना
प्रियं जघानोन्नतपीवरस्तनी॥

अथ सप्तयत्न(त्न?)जाः शोभाकान्तिदीप्तिमाधुर्यधैर्यौदार्यप्रागल्भ्यनामानोऽलङ्काराः। क्रमेण लक्षणम्॥छ॥

शोभा कान्तिश्च दीप्तिश्च प्रियभोगोपबृंहणम्।
रूपयौवनलावण्यैः श्रीर्मन्दा मध्यमा द्रुता॥

तेषामेव रूपलावण्यादीनां पुरुषेणोपभुज्यमानायां य श्रीरङ्गच्छायाविशेषः सा छाया मन्दावस्था शोभा, मध्यावस्था कान्तिस्तीव्रावस्था दीप्तिः।

शोभा यथा—

करकिश(स)लयं धूत्वा (धृत्वा) विमार्गनिवाससी
क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति।
स्थगयति मुहुः पत्युर्नेत्रे विहस्य समाकुला
सुरतविरतौ रम्या तन्वी मुहुर्मुहुरीक्षते॥

कान्तिर्यथा—

उत्तिष्ठन्त्या रतान्तेरुरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकवरीभारमंसं वहन्त्या।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य तन्वीं नीतवपुरलसद्बाहुलक्ष्म्याः पुनातु॥

दीप्तिर्यथा—

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलां
कांचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्बुनः सीकरैः।

तन्त्यायत् सुरतांतकान्तनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु विचारय किं हरिहरस्कन्दादिभिर्दैव तैः ।। (शृ.श.)

माधुर्यं क्रोधामर्षेर्ष्यादिजतातेऽपि सोम (सौम्य?) ता। यथा–व्रीडादिलालित्ये सोम(सौम्य) ता तथा प्रीतक्रोधादि भवभा(मा)पि सौम(म्य?) ता माधुर्यं। आदिशब्दाद् भयशोकादिपरिग्रहो यथा—

कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः
शिरस्याज्ञा न्यस्ता प्रतिवचनमत्यानतिमति।
न दृष्टेः शैथिल्यं मिलितमिति चेतो दहति मां
निगूढान्तःकोपा कठिनहृदये संवृतिरियम् ।।छा।। ( )

धैर्यं स्यादचापलत्वमविकत्थनता। यथा चापल्यानुपहतत्वमनात्मगुणाख्यानं च धैर्यं यथा—

ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किं वा मृत्योः परेण विधास्यति।
मम तु दयितः श्लाघ्यास्तातो जनन्यमलान्वया।
कुलममलिनं न त्वेवार्य(यं) जनो न च जीवितम् ।।

औदार्यं प्रश्रयः, कोपो कोपे उपलक्षणं। कोपामर्षेर्ष्याद्यवस्थास्वपि विनयादिकस्यापरित्याग औदार्यम्। माधुर्यमाकारविकृतिरित्यनयोर्विशेषो यथा—

भ्रूभङ्गेन सहोद्गतेऽपि वदनं नीतं परां नम्रता–
मीषन्मां प्रतिभेदकारि हसितं नोक्तं वचो निष्ठुरं।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं
क्रोधश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः ।।

प्रागल्भ्यं रतकौशलं रते कामफलादौ-यदाह
अन्यदाभूषणं पुंसः शमो लज्जेव योषितः।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ।।

मनः क्षोभपूर्वकोऽङ्गसादः। साध्वसं तदा भावप्रागल्भ्यं यथा—

आशु लंघि तवहतीऽष्टकाग्रे नीतिमर्द्धमुकुलीकृतदृष्ट्या रक्तवैणीकहताधरतन्त्रीमण्डलक्वणितचारुभुक्तयो। एते यत्नमन्तरेण पुरुषोपभोगनिष्पन्नाः स्त्रीणां सप्त गुणा इति।

इति श्री वायटगच्छीयपण्डित श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि त्रयोदशः प्रसरः।। ग्रन्थाग्रं ४०० ।।

स्वभावात् सर्वजीवानामिति। अपद द्विपदचतुष्पदषट्पदाष्टापदामिपदानां केषाञ्चन
कांश्चिद्भावनाक्रमाद्ब्रूमः ।। १ ।।
अपदो भुजगस्तस्य श्यामता वक्रसमर्पणम्
फूत्कारो वेणितुल्यत्वं दृक्श्रुतित्वं द्विजिह्वता ।। २ ।।
शिरोमणिशिवक्षेत्रपालादीना शिरःस्थितं ।
बिलवासोऽनिलाशित्वं तार्क्ष्यबर्हिणरवाद्यता ।। ३ ।।

निर्मोका नादसुरभिप्रसूने प्रियता विषं ।
शिवे भूषाकरः क्षोणीधारकः पूर्वजोऽस्य च ।।४।।

द्विपदा देवता मर्त्याः पक्षिणश्च प्रकीर्तितम् ।
स्वरूपं देवमर्त्यानां पक्षिणो गरुडादयः ।। ५ ।।

तार्क्ष्ये विष्णोर्ध्वजे स्थायी वाहनं च हिरण्यरुक् ।
इन्द्रजेता सुधाहर्ता सर्पा सीमातृदास्यहृत् ।। ६ ।।

गरुडस्य राजधानी कूटशाल्मलिपर्वतः ।
उल्वतीदयिता पुत्रः सुमुखः पक्षिराजता ।। ७ ।।

सुपर्णकाश्यपौ मातापितरौ वरुणोऽग्रजः ।
हंसशुक्लतनुस्ताम्र मुखांह्रिर्मधुरारवः ।
लीलागतिः सरः कुल्याः पद्मसेवी मृणालभुक् ।। ८ ।।

वर्षासु मानसस्थायी क्षीरनीरविवेककृत् । पूर्वजोऽस्य ब्रह्म ब्राह्मी तोतलालां च वाहनम् ।। ९ ।।

केकी केकारवो वर्षा तृप्तवान् सशिरः शिखः ।
स्त्रीकेशपाशसंकाशकलापा हिडिभुगस्य तु ।।१०।।

पिच्छं छत्रतया श्रीमन्मौलिस्थायि विषादिहृत् ।
धर्मभिद्व्यजनीभूतं पूर्वजस्कन्दवाहनम् ।। ११।।

कोकिला स्त्रीवचश्चारुरवामदपरा मधौ ।
सहकारवनावास श्यामलारुणलोचना ।।

चक्रद्वयं दिवा योगिनक्तं विरहदुःखभाक् ।
मिथः स्निग्धं सुवर्णाभं नारीकुचयुगोपमम् ।।१३।।

चकोरश्चन्द्रिकास्वादी रक्ताक्षः स्त्रीदृशासमः ।
स्थावरं विषमे तेन दृष्टं मन्दयायते क्षणात् ।।१४।।

शुको मनुष्यवाग्नीलो रक्तास्यः श्यामकण्ठकः ।
सारिकामर्त्यवाक् श्यामा क्रीडार्थं पञ्जरे द्वयम् ।।१५।।

पारापतः सदा कामी रक्ताक्षः कलकूजितः ।
दूरतोऽपि प्रियास्थानवेदी दीर्घतरस्वरः ।।१६।।

खञ्जनः कामिनी नेत्राकारश्चारुगतारवः ।
दृश्यं सरद्यदृश्यश्च ग्रीष्मे कल्याणदर्शिनः ।।१७।।

चातकोऽब्दपयो बिन्दुजीवनो गलरन्ध्रवान् ।
ताम्रचूडो निशाप्रान्तध्वानी स्वज्ञातियुद्धकृत् ।।१८।।

खद्योतो मेघतिमिरोद्योति वह्निकणाकृतिः ।
बलाकाश्याममेघान्तचारिणी शुक्लदीधितिः ।।१९।।

काकोऽतिशंकनो धृष्टो[1] बलिभोज्यैकलोचनः ।
भोजी विसक्तः वर्गेषु गूढस्त्रीसङ्गमस्तथा ॥२०॥
सीतोपद्रवकृद्रामक्षिप्तशस्त्रहृतैकदृक् ।
प्रियागमनसंसूचि शब्दकृद्वनिताप्रियः ॥२१॥
भारुण्डस्तित्तिरो दुर्गाकपोतश्चटको बकः ।
कर्करीपिङ्गलोलूकशकुन्याटिमुखा इति ॥२२॥
चतुष्पादागजाद्यास्त्र प्रोक्ता हस्ती तथा प्रियः ।
वृषभो विश्वजीवातुः कर्षणे मुख्यकारणम् ॥२३॥
शृङ्गोत्खातनदीकूलः सर्वभारधुरन्धरः ।
सविलासगतिश्चास्य पूर्वजः शिववाहनम् ॥२४॥
धनुर्विश्वंभरा मूर्तिर्मुग्धा सर्वसुराश्रया ।[2]
विश्वायुर्दधिदुग्धादिहेतुर्विश्वनतार्चितः ॥२५॥
देवस्नानीयदुग्धादिः पवित्रमूत्रगोमया ।
पूर्वजा कामधुक् यस्या सा सर्वर्षिभिरादृता ॥२६॥
महिषोऽरुणदृक् लोकहेतोः सलिलवाहकः ।
श्यामलो बलवानस्य पूर्वजो यमवाहनम् ॥२७॥
महिषी प्राज्यदुग्धाद्यहेतुर्जीवितविष्टपा ।
छागो यज्ञेषु वध्योऽस्य पूर्वजो वह्निवाहनम् ॥२८॥
छागी बहुप्रसूरोगहृद्दुग्धा मुखजीवना ।
ऊर्णाचर्मशुकं पूतं योग्यं देवार्चनादिषु ॥२९॥
विवाहादिषु मङ्गल्यपूर्णा(र्णः?) कङ्कणमीरीतिम् ।
उष्ट्रो निश्वानसृत्पृष्टो भारवाही त्वरागतिः ॥३०॥
वेसरः खरचारोऽश्वरावः मध्ये च मध्यगः ।
जननी वधकृद्यन्मा सबलो भरवाहकः ॥३१॥
खराश्वोविकरः शश्वदारूढः भारवाहकः ।
भस्मतैललवणकृच्छ्रप्रमुखाग्रसुखजीवितिः ॥३२॥
एतल्लिन्दुरसः पीतो बालानां रोगहारकः ।
एतस्य पूर्वजा रथ्या रावणस्यासुरे शितुः ॥३३॥
स्वा(श्वा)नः पार्पाद्धिकृत् सूरो लघुनिद्रः सुचेतनः ।
स्वामिभक्तः पूर्वजोऽस्य क्षेत्रपालस्य वाहनम् ॥३४॥
मार्जारः श्यामलः क्रूरो पिङ्गाक्षो मूषकादनः ।
मूषको बिलवासस्थो राजादिवसनादिभित् ॥३५॥

---

१. 'हृष्टो' पा.प. १
२. 'सर्वसुराश्रया' इत्यस्यानन्तरं 'विश्वसुराश्रया' इति पा.प. १ मध्ये विशेषम् ।

कोमलाङ्गः पूर्वजोऽस्य गणाधिपतिवाहनम् ।
तज्जातीयस्य सुरभैः सेव्योंगोवयतस्तथा ।।३६।।
सिंहः शुक्लवपुः क्रूरारुणाक्षः कुम्भिकुम्भभित् ।
सद्यः स्वहतमांसादी मृगेन्द्रः वनमण्डलम् ।।३७।।
गर्जत्यब्दे समुत्पाती चर्षिणैकतरस्तथा ।
तनुमध्यः पूर्वजोऽस्य पार्वत्या वाहनं तथा ।।३८।।
हरि(हिर)ण्यकशिपोर्याते रूपार्द्धं विष्णुरादधौ ।
मृगस्तृणादनो नारीनेत्रोपमानलोचनः ।।३९।।
पूर्वजोऽस्य स्थितश्चन्द्रे वाहनं मरुतस्तथा ।
कस्तूरीजन्म यज्जातिर्योनि भोग्यस्त्वगस्य च ।।४०।।
वराहः क्षोणिभृद्दंष्ट्रः शूरः पङ्कस्थितिप्रियः ।
एतद्रूपेण कृष्णेन दंष्ट्राग्रेणोधृता मही ।।४१।।
वानरो वृक्षशाखाभ्यः शाखान्तरगतिप्रियः ।
पूर्वजैरस्य बद्धोऽब्धिर्दशग्रीववधोद्यमे ।।४२।।
श्रीरामस्य प्रियाप्राप्तिहेयभिस्तैरजायत ।
एते सुग्रीवहनुमन्मुख्या दोषापहारिणः ।।४३।।
शृगालो बुद्धिमान् भीरु क्षेत्रसस्यादनो निशि ।
पुरा पुनि(नः?) प्रबोधाय तद्रूपं हरिणा धृतम् ।।४४।।
चित्रकश्चित्रकायश्रीर्महार्घत्वग्भयोज्झितः ।
मकरः क्रूरहृद्दंष्ट्री मत्स्यो मंगल्यदर्शनः ।।४५।।
पूर्वजावेतयोर्जातौ पुष्पायुधरथध्वजौ ।
मत्स्यरूपेण कृष्णेन ब्रह्मा स्याद्वेदहारिणम् ।।४६।।
पुरा शंखासुरं हत्वा पुनर्वेदाः समुद्धृताः ।
कूर्मो वृत्ताकृतिस्पृष्टकठोरः कमलोदरः ।।४७।।
पुरा समुद्धृता धात्री कूर्मरूपेण विष्णुना ।
षट्पदो भ्रमरः श्यामः पुष्पलिट् मञ्जुगुञ्जितः ।।४८।।
भृङ्गश्रेणी स्मरधनुर्मौर्वी स्त्रीवेणुसंनिभाः ।
सरलोऽष्टपदस्तस्य पृष्ठस्थास्याच्चतुष्पदी ।।४९।।
यो हत्वा हस्तिनं स्कन्धे समर्थो वहति स्थितिम् ।
कर्णशृगालीखर्जूरमुख्याः स्युरमिता ह्ययः ।।५०।।
जीवानां जीवभावानां बहुत्वात् कथ्यते कियत् ।
दशानयास्त्वयं प्राज्ञैरन्यदप्युह्यमादरात् ।।५१।।

इति श्री वायटगच्छीयश्रीजिनदत्तसूरिशिष्यपण्डितश्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि वर्ण्यस्तबकोल्लासी स्वभावविभावनश्चतुर्दशः प्रसरः ।।ग्रं. ४२५।

व्यवस्थां देशकालयोरिति।

चित्रार्थदर्शितां तत्त्वे देशकालज्ञता कवः।
अतो देशस्य कालस्य व्यवस्था कथ्यते क्रमात् ॥१॥
जगद्युगपद्देशोऽपि हि देशः प्रकीर्तितः।
केप्याहुः देवा पृथिव्याप्तमेकं जगत् किल।

यथा—

हलम्मगुबलस्यैकोनड्वान् हरस्य गलां गलम्
क्रमपरिमिता भूमिर्विष्णोर्नगौर्न च लाङ्गलम्।
प्रभवति कृषिर्नचाप्येषा द्वितीयगवं विना
जगति सकलेनेदृग् दृष्टं दरिद्रकुटुम्बकम् ॥
दिवः पृथिव्यौ जगती द्वे च केचन केऽपि च।
स्वर्गमर्त्यपातालानां भेदास्त्रीणि जगन्ति तु ॥

क्रमाद्यथा—

रुणद्धि रोदसी चास्य यावत् कीर्तिरनश्वरी। तावत् किलायमध्यास्ते सुकृतैर्वैबुधं पदम् ॥
त्वामेव देवा पातालमाशानां त्वं निबन्धनम्। त्वं चामरमरुभूमिरेको लोकत्रयात्मकः ॥

एतानौ बभूर्भुवः स्वरिति केऽप्यपरे पुनः। यथा—

नमस्त्रिभुवनाभोगवृत्तिभोगभरादिव।
नागनाथांकपर्यङ्कशायिने शार्ङ्गधन्विने ॥

महर्जनतपः सत्यमित्येतैः सप्त तानि तु। यथा—

संस्तंभिनी पृथु नितम्बतटे धरित्र्याः
संवाहिनी जलमुचां चलकेतुहस्तैः।
हर्षस्य सप्तभुवनप्रथितोरुकीर्त्तिः
प्रासाद पंक्तिरियमुच्छिखरा विभाति ॥
अन्ये तु सप्तभिर्वायुस्कन्धैस्तानि चतुर्दश यथा—
निरवधिराश्रयं च यस्य स्थितमनुवर्तितकौतुकप्रपञ्च।
प्रथम इव भवान् सत्कर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकं दः ॥
पातालो सप्तभिः सार्द्धं तान्येके त्वेकविंशति। यथा—
हरहास हरावास हरहारनिभप्रभाः।
कीर्तयस्तव लिम्पन्तु भुवनान्येकविंशतिम् ॥
सहजविवक्षैकयतिविशेषविवक्षा त्वनेकयति।
इत्युपपन्नं निखिलं कविषु मनाशेषभेदेषु ॥छ॥
तेषु भूलोको भूस्तस्यां महीद्वीपाश्च सप्त तु।
सर्वमध्ये जम्बूद्वीपस्त्रप्लक्षोऽथ शाल्मलः ॥

अतः कुशस्ततः क्रौञ्चस्ततः शोकोऽथ पुष्करः। बाह्यबाह्यक्रमादेषां माण्डलीभिः स्थितिः स्थिता ॥
परीत्यैतान् स्थिताः सप्तार्णवाः पूर्वस्तु लावणः।
रससीधुसर्पिर्दधिदुग्धस्वादुजलाः परे। प्रकामके लवणाब्धिकपित्रीनंबुधीन् परे।
चतुरः केऽपि सप्तान्ये प्राहुः सर्वमतः कविः ॥

द्वीपान्यष्टादशानां क्षितिरपि नवर्तिविसृता स्वाङ्कखण्डे
रेकाम्भोधिर्दिगंतप्रशमरसलिल प्राज्यमेतत् सुराज्यं।
कस्मिन्नप्याद्रिकेलिव्यतिकरविजयोपार्जितवीरवर्यैः
पर्याप्तं मे न दायस्तदिदमिति धिया वेधसे यश्चुकोप ॥

आकम्पितक्षितिभृजा महता निकामं
हेलाभिभूतजलधित्रितये न यस्य।
वीर्येण संहतिभिदा विहितोन्नतेन
कल्पान्तकालविसृतः पवनो न चक्रे ॥

चतुःसमुद्रोर्मिरचितैकावलीं लतां
मरुमप्यद्रिमुल्लंघ्य यस्य क्वापि गतं यशः ॥

अगस्त्यचुलको क्षिप्तसप्तवारिधिवारिणि।
मुहूर्तं केशवेनापि तरता पूरतायितम् ॥

मरुगिरिवरो जम्बूद्वीपमध्येऽस्ति कांञ्चनं।
आवासः सर्वदेवानां मूर्तः सर्वौपधीपदम् ॥

आद्यो वर्षधरो मेरुर्भद्राश्वं यस्य पूर्वतः।
पश्चिमे केतुमालं तन्मध्ये क्षेत्रमिलाभृतम्।
उत्तरेण पुनर्मेरु त्रयोऽमी वर्षपर्वताः। नीलः श्वेतशृङ्गमाश्ववर्षाण्येतानि रम्यकम्।[1]
हिरण्मयं कुरवश्चोत्तराः स्युस्त्रीणि च क्रमात्।
दक्षिणेन निषिधो हेमकूटोहिमवांस्त्रयः ॥

हरिर्वर्षं किंपुरुषं भारतं त्रीणि च क्रमात्।
तत्रेदं भारतं वर्षमन्त्यं भेदानपास्य तु ॥

इन्द्रद्वीपः कसेरुमास्ताम्रपर्णो गभस्तिमान्।
नगद्वीपस्तथा सौम्यो गन्धर्वो वरुणोऽपि च ॥

कुमारीद्वीपः प्रत्येकं सहस्रं योजनान्यमी।
जलं पञ्चशती पञ्चशती स्थलमिति स्थितिः ॥

दक्षिणादम्बुधेर्याविद्धिमवन्तममी स्थिताः।
परस्परमगम्यास्ते स सम्राट् योजयत्यमून् ॥

कुमारी पुरात् प्रभृतिर्यावृबिन्दुसरोऽवधिः।
योजनानां दशशती तत्क्षेत्रं चक्रवर्तिनः ॥

---

१. "नीलः श्वेत.....च क्रमात्।" इदं दे.प. पुस्तके नास्ति।

रामारत्नं मणिर्भार्या निधिरश्वो गजस्तथा।
एतानि सप्त रत्नानि सर्वेषां चक्रवर्तिनाम्।

कुमारीद्वीपे चामुष्मिन् कथ्यन्ते कुलपर्वताः।
विंध्यश्च पारियात्रश्च शुक्तिमानृक्षपर्वतः।
महेन्द्रसह्यमलयाः सप्तैते कुलपर्वताः॥

मलयाद्रिविशेषास्तु चत्वारः परिकीर्तिताः।
एलालवङ्गकक्कोलजातीचन्दनशाखिनाम्॥

मरिचानां च जन्मोर्वी प्रथमो मलयाचलः।
द्वितीयो मलये ताम्रपर्णीमौक्तिककामधुक्॥

अन्वत्युपत्यकान्तं च पुनीते कुम्भभूर्मुनिः।
स निधिः सर्वरत्नानां तत्र स्युर्विद्रुमद्रुमाः॥

मुक्ताफलानामुत्पत्तिस्तत्र वंशेषु जायते।
कर्पूरतरवस्तत्र सिंहनादैः स्फुटन्ति च॥

तृतीयो मलयः सर्वत्रिदशानां विलासभूः।
सतृणाग्रैर्मुनेः स्थानं सदा पुष्पफलद्रुमः॥

चतुर्थो मलयस्तत्र चित्रस्वर्णमयी मही।
राजधानी रावणस्य लंकालङ्कारतां गता॥

भवत्येभ्यश्चतुर्भ्योऽपि वसन्ते दक्षिणानिलः।
ब्रह्मावर्त्तः सरस्वत्या दृपद्वत्याश्च मध्यतः॥

ब्रह्मवेदिः कुरुक्षेत्रं पञ्चारामह्रदान्तरं।
धर्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधिः॥

पूर्वापरयोरम्बुध्यो हिमवद्विंध्ययोरपि।
अन्तरमार्यावर्तास्मिंश्चयर्वर्णाश्रमस्थितिः।

यद्वधाडिः—

आसमुद्राच्च वै पूर्वादासमुद्राच्च पश्चिमात्।
हिमवद्विन्ध्ययोर्मध्यमार्यावर्त्तं विदुर्बुधाः॥[1]

तत्रत्यो व्यवहारो हि प्रायेण कविसम्मतः।
वाराणस्याः पुरतोऽस्मिन् पूर्वदेशः प्रकीर्त्यते॥

देशास्तत्राङ्गकलिङ्गौ कोशलास्तोसलोत्करौ।
मगधा मुद्गरकोविदेहनेपालपुन्ड्रका॥

तथा दुर्दरनेपालकामरूपमुखाः स्मृताः।
नद्यो गङ्गाकरतोयाकपिमाप्रमुखाः पुनः॥

---

१. श्लोक एषः मनुस्मृतौ २.२२।

नदी शोणलोहितारत्यौ लवली ग्रन्थिपर्णकः ।
अगुरुद्राक्षाकस्तूरीमुख्यान्यत्रोद्भवन्ति च ॥
महिष्मत्यास्तु परतः कथितो दक्षिणापथः ।
महाराष्ट्रमाहिमकाश्मकवैदर्भकुन्तलाः ॥
क्रथ कैशिकसूपरिकाञ्चिकारकेरलाः ।
पुरला वानवासकः सिंहलौ चोडदण्डकौ ॥
पालमञ्जरसह्यश्रीपर्वताद्यास्तु पर्वताः ।
रेवा तापी पयोष्णी गोदावरी भैमरथ्यपि ॥
वेणी च कृष्णवेणी च तुङ्गभद्रोपलावती ।
वञ्जरा ताम्रपर्णी च रावणगङ्गादयस्तथा ॥
नद्योऽत्र मलयोत्पत्या तदुत्पत्तिः पुरोदिता ।
परतो देवसभाया पश्चाद्देशश्च निश्चितः ॥
देशास्तत्र देवसभसुराष्ट्रकविशेषकाः ।
पत्रत्राणा भृगुकच्छकच्छीयौनर्तकार्बुदाः ॥
ब्राह्मणी वाहयवनादयश्चात्र तु पर्वताः ।
गोवर्द्धनो गिरिर्नगरदेवसभमाल्यकाः ॥
शिखरार्बुदमुख्याश्च नद्योऽप्यत्र सरस्वती ।
महीश्च श्वभ्रमती चात्र घ्नीहिडम्बादयस्तथा ॥
करीरपीलुगग्गरखर्जूरकरभादयः ।
जायतेऽत्र पृशदकात्परतस्तूत्तरापथः ॥
शककेकयबोक्काणा हूणवानायुजावपि ।
काम्बोजा बाल्हीकवल्हवीलुम्पाककुलूतकौ ॥
कीरन्त गुणतुर्वीर तुरुष्कहरदूरका ।
बर्वारोरमवाद्याश्च देशास्तत्राथ पर्वताः ॥
हिमालयजालन्धरा विन्द्रकीलकविन्दकौ ।
चन्द्राचलादयश्चाथ गंगासिन्धुसरस्वती ॥
शतद्रुश्चन्द्रभागा च यमुना वैरावती तथा ।
वितस्ता विपाशाकुल्हवेदिकाद्याश्च निम्नगाः ।
द्राक्षाकुंकुमचमरी जिनसौवीरवाजिनः ।
श्रोताञ्जनं च वैडूर्यं सरला देवदारवः ॥
सैन्धवानि तथैतानि सम्भवन्त्युत्तरापथे ।
तेषां मध्ये मध्यदेश इति व्यवहृतिर्यथा ॥
हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि ।
प्रत्यगेव प्रयोगाच्च मध्यदेशः स कीर्त्यते[१] ॥

---

१. श्लोक एषः मनुस्मतौ २.२१ ।

मध्यदेशे त्रयो देशाः पर्वताः सरितस्तथा ।
द्रव्योत्पत्तिस्तत्प्रसिद्धिः सिद्धमित्यत्र नोदितम् ॥

द्वीपान्तराणां ये देशाः सरितः पर्वतास्तथा ।
नातिप्रयोज्या कविभिरतिगाढं न चिन्तिताः ॥

गङ्गा यमुनयोर्विनसन प्रयोगयोरपि ।
अन्तरमन्तर्वेदी या दिश स्युस्तदपेक्षया ॥

प्राच्येण विप्रतीहैयुदीची चतस्रो दिशः किल ।
तथा चतसृष्वपि दिक्षु रणे द्विषतः प्रति ॥

येन चित्रचरितेन विहितमपूर्वमदक्षिणमपश्चिममनुत्तरं कर्मके । दंडयाग्नेयी याम्यानैऋती वारुणी तथा । वायव्यकौबेर्यैशानी चाष्टौ दिशः । इन्दादिन्दुः यथा—

पक्तं द्वे च दृशौ द्वे त्रिजगति गदितान्यक्षजास्यैश्चतुर्भि र्भूतानां पञ्चमं यान्यलमृतुसु तथा षट्सु नानाविधानि।
युष्माकं तानि सप्तत्रिदशमुनि तु तान्यष्टदिग्भाञ्जि भानो यान्त्यपराह्ने नवत्वं दश दधतु शिवं दीधितीनां शतानि ॥

ब्राह्मी नागीया द्वे ताभ्यां सार्द्धं दशदिशोऽपरो यथा—

दश दिक्कूटपर्यन्तसीमसँकट भूमिके ।
विषमो स्थूललक्षमस्य ब्रह्माण्डग्रामके स्थितिः ॥

चित्रास्वात्यन्तरे प्राची प्रतीची तत्प्रमाणतः ।
ध्रुवेणोदीचीविजया प्राची तदनुसारतः ॥

विदिशोऽन्तरेषु ब्राह्मी ऊर्ध्वं नागी त्वधःस्थिता ।
कवीनां दिग्व्यवहारो द्विधा प्राक् सिद्ध एव च ।
विशिष्टस्थानकावधिसाध्योऽन्यः सप्रपञ्चकः ॥

तत्त्वप्राक्सिद्धे प्राची—

द्वित्रैर्व्योम्नि पुराणमौक्तिकमणिच्छायैः स्थितं तारकै-
र्यो(र्ज्यो) त्स्नापानभरालसेन वपुषा सुप्तश्च कोशं गताः ।
यातोऽस्ताचलचूलमुद्रसमधुच्छत्रच्छविश्चन्द्रमाः
प्राचीमालविडाललोचनरुचां जाताच (त?) पत्रं ककुप्द ।

दक्षिणा—

दक्षिणो दक्षिणामाशां यियासात्साधिकं बभौ ।
जिहासु दक्षिणामाशां भगवानिह भास्करः ॥

पश्चिमा—

पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे विवस्वता ।
दीर्घया प्रतिमया सरोम्भसा तापनीयमिव सेतुबन्धनं ।

उत्तरा—

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः (कुमार-१.१)
विशिष्टस्थानावधौ तु दिग्विभागे पूर्वपश्चिमौ ॥७४॥

यथा—

यावदसि हे चरत मङ्गलगात्रं नव पूर्वेण चन्दनगिरेरुत पश्चिमेन नोचेन्निरन्तरधराधर (ज) सेतु पूति-
माकल्पमेष न विरंस्यति वा वियोगः ॥

दक्षिणोत्तरौ यथा—

कान्त्या पुरो दक्षिणदिग्विभागे
तथोत्तरस्यां दिशि वारिराशेः ।

कर्णान्तचक्रीकृतपुष्पचापे—
रत्या समं साधु वसत्यनङ्गः ॥

उत्तरादप्युत्तरदिगभिधानमनुत्तरदाप्युत्तरदिगभिधानं च तयोः प्रथमं—

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यंसुरपतिधनुश्चारुणा तोरणेन ।

यस्योद्याने कृतकतनयः कान्तया वर्द्धितो मे
हस्तप्राप्यस्तवकविनतो बालमन्दारवृक्षः ॥ (मेघदूते)

द्वितीयं—

मह्याद्रेरुत्तरे भागे यत्र गोदावरी नदी ।
पृथिव्या हिमकृत्स्नायां स प्रदेशो मनोरमः ॥

एवं दिगन्तरेऽपि दिग्देशान्द्रियादीनां यः क्रमस्तं तथैव चानिबध्नीयात्, साधारणं तूभयत्र प्रकल्पयेत्। लोक-प्रसिद्धितः प्राच्यादिकानि वर्णनिश्चयः ।

तत्र प्राच्येषु श्यामत्वं दक्षिणादिषु कृष्णता—

श्यामेष्वङ्गेषु गौडीनां सूत्रहीरैः कहारिषु ।
चक्रीकृत्य धनुः पौष्पमाभङ्गो वल्गुवल्गतिः ॥

दक्षिणादिषु कृष्णता यथा—

इदं भासां भर्तुर्द्रुतकनकगोलप्रतिकृतिः ।
क्रमान्मन्दज्योतिर्गलति नभसो बिम्बवलयम् ।

अथैष प्राचीतः सरति मुरलीगण्डमलिन-
स्तरुच्छायावक्रैस्तबकित इव ध्वान्तविसरः ॥

पाश्चात्येषु पाण्डुत्वं यथा—

शारवामेरुं मधुकवलनाकेलिलोलेक्षणानां
　　भृङ्गस्त्रीणां बकुलमुकुलं कुन्तलीभावमेति ।
किञ्चेदानीं यवनतरुणीपाण्डुगण्डस्थलीभ्यः
　　कान्तिस्तोकं रचयति पदं नागवल्लीदलेषु ॥

उदीच्येषु तु गौरता यथा—

पुष्पैः सम्प्रति काञ्चनारतरवः प्रत्यङ्गमालिङ्गिता
वाल्हीकीदशनव्रणारुणतलैः पत्रैरशोकोऽर्चितः ।
जातं चम्पकमप्युदीच्यललनालावण्यचौरक्षमं
माञ्जिष्ठौ मुकुलैश्च पाटलितरोरन्यैव काचिल्लिपिः ॥

यथा वा कृष्णत्वं यथा—

युधिष्ठिरक्रोधवह्नेः कुरुवंशैकदाहिनः ।
पाञ्चालीं ददृशुः सर्वे कृष्णाधूमशिखामिवः ॥

एवं श्यामोऽपि न कविमार्गे कृष्णश्यामयोः पाण्डुगौरयोर्वा महान्विशेषः इति । गौरो यथा—

तव नवनवनीतपिण्डगौरे प्रतिफलदुत्तरकोशलेन्द्रपुत्रि
अवगतमलिके मृगांकबिम्बं मृगमदपत्रनिभेन लाञ्छनेन ॥

पूर्वदेशराजपुत्र्यादीनां गौरत्वपाण्डुते यथा—

कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरं गण्डोड्डमरपुलकं वक्त्रकमलम् ।
मुहुः श्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटाग्रन्थिं द्रढयति रघूणां परिदृढः ॥

यथा वा—

तासां माधवपत्नीनां सर्वासां चन्द्रवर्चसाम् ।
शब्दविद्येव विद्यानां मध्ये जज्वाल रुक्मिणी ॥

यथासम्भवमभ्यूह्यमित्यन्यदपि कोविदैः ।
जिनागमोक्तरीत्या (तु?) कथ्यते देशसंस्थितिः ॥

द्वीप आद्यो जम्बूद्वीपो लवणाम्बुधिवेष्टितः ।
द्वीपोऽथ धातुकीखंडः कालोदोदधिरनावृतः ॥

द्वीपोऽथ पुष्करावारो वृतस्तन्नामवर्द्धितः ।
शैलोऽस्ति पुष्करद्वीपो मानुषो (तु) यथोत्तरः ॥

तदेतन्मानुषं क्षेत्रं सार्द्धद्वीपद्वयं मतम् ।
जम्बूद्वीपप्रतिष्ठानि सप्तक्षेत्राणि तेषु तु ॥

मध्यक्षेत्रं विदेहाख्यं देवोत्तरकुरून् इह ।
तद्गर्भे नाभिरूपस्तु मेरुः स्वर्णमयो गिरिः ॥

हरिवर्षं हैमवतं भरतं चास्य दक्षिणे ।
रम्यकेऽरण्यकेवैरावते चोत्तरेऽस्य तु ॥

धातुकीखण्ड पुष्करवरद्वीपार्द्धीपार्द्धके तथा ।
क्षेत्राणि द्विगुणानि स्युः तान्यैरावतनामभिः ॥

पञ्चभिस्तु विदेहांशैर्देवोत्तरकुरुद्वयैः ।
मर्त्यक्षेत्राण्येव पञ्चचत्वारिंशद् भवन्ति हि ।।
तेषु पञ्च भरतानि पञ्चैरावतान्यपि ।
कुर्वन्विताविदेहांश्च पञ्चैताः कर्मभूमयः ।।
त्रिंशत् क्षेत्राणि शेषाणि कथिता भोगभूमयः ।
उत्पद्यन्ते यतोऽमीषु मर्त्या युगलधर्मिणः ।।
वर्षवर्षधराद्यंकं भरतक्षेत्रतस्तु ते ।
हिमवान् महाहिमवान् निषेधो नीलरुक्मिणौ ।।
शिखरी चेति षट् जम्बूद्वीपेऽमी वर्षपर्वता ।
द्विगुणाः स्युरिति ज्ञेया त्रिंशद्वर्षधराद्रयः ।
एवं पञ्चमङ्ख्याः स्युः शातकौम्भमहीधरा ।।छ।।

इति श्रीवायटगच्छीय श्री जिनदत्तसूरिशिष्य पण्डितश्रीमदमरचन्द्रविरचते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि **वण्यस्तबकोल्लासी** देशव्यवस्थास्थापकः पञ्चदशः सरः ।।छ।। ग्रं. १४५

त्रुटयादिभेदभिन्नः स्यात् कालस्तद्व्यक्तिरुच्यते ।
स्वस्थे नरे सुखासीने यावत् स्पंदति लोचनम् ।। १ ।।
तस्य त्रिंशत्तमो भागः त्रुटिरित्यभिधीयते ।
त्रिंशत्त्रुटिनिमेषस्तैः काष्ठा सदाशपञ्चभिः ।। २ ।।
त्रिंशत्काष्ठाः कलास्ताभिर्मुहूर्तस्त्रिंशता मता ।
त्रिंशता तैरहोरात्रो मतान्तरमथोच्यते ।। ३ ।।
अष्टादश निमेषाः स्युः काष्ठा काष्ठद्वयं लवः ।
कला तैः पञ्चदशभिर्लेशस्तद्द्वितयेन च ।। ४ ।।
क्षणस्तैः पञ्चदशभिः षट् क्षणा घटिकाः पुनः ।
मुहूर्तस्तद्द्वये नाहोरात्रैस्तैस्त्रिंशता भवेत् ।। ५ ।।
पक्षस्तैः पञ्चदशभिर्मासः पक्षद्वयेन च ।
द्वौ मासावृतुः षडेव षड्भिः संवत्सरश्च तैः ।। ६ ।।
दिवसानां वृद्धिहेतुः शिशिराद्युत्तरायनम् ।
रजनीनां वृद्धिहेतुर्वर्षादिर्दक्षिणायनम् ।। ७ ।।
समे राञ्यहनी स्यातां चैत्राश्वयुजमासयोः ।
युसहिमरजन्याद्द्वयेनो(न) वत्सरो मतः ।। ८ ।।
दैवज्ञानां सर्वत्रादिर्लोकानां श्रावणादिकः ।
नभो नभस्यश्च वर्षास्तत्र श्यामोन्नता घनाः ।। ९ ।।
विद्युदिन्द्रधनुर्गर्जि दुर्दिनं वृष्टिबुद्बुदौ ।
तापदावरजः शान्तिर्नदीपूरः सरोभृतिः ।।१०।।

जलवाहत्वरा झंझावातो विरहिदुःसहः।
हरेः समुद्रशयनं भार्केन्दूनामदृश्यता ॥११॥

यतिवारभूपयात्रा व्यवसायोपसंहृतिः।
हंसप्रवासोऽब्जनाशः पक्षिणां नीडकल्पना ॥१२॥

गृहान् प्रति पथिकानां प्रस्थानं पाथयोपिताम्।
प्रियमार्गेक्षणं पान्थं विहिरण्योविहस्तता ॥१३॥

पथिकप्रेषितायोगो निशीथे स्वैरिणी गतिः।
दग्धोर्थरसुगन्धत्वं धाराधौता गिरिद्रुमाः ॥१४॥

भूमेः शाड्वलशालत्वं मार्गाः पङ्काम्बुदुस्तराः।
कल्पापोल्लासनं नृत्यं मदः केकाश्च केकिनाम् ॥१५॥

मयूरीणां बलाकानां भुजङ्गीनां सगर्भता।
बलाकानां च सञ्चारो बकानां पादसंस्थितिः ॥१६॥

मृगकंकचकोराहिमंगुचातकसम्मतं।
रक्ताङ्गा इन्द्रगोपाश्च खद्योतो दुर्द (दर्दु?) रारवः ॥१७॥

चतुःसमेन कस्तूरीगर्भितेनाङ्गलेपनम्।
तुंगहर्म्याग्रशय्या च केशेष्वगुरुधूपनम् ॥१८॥

करिणीभिः केलियात्रा जम्बूश्यामफलोद्गमः।
कदम्बोऽरुणरेणुश्च शिलिध्रं पाटलिप्रभात् ॥१९॥

केतकी कुटजजाती यूथिका श्वेतपुष्पिका।
शल्लकीनागवल्ल्योः पुष्पप्रसवोऽर्जुनमञ्जरी ॥२०॥

वंशांकुराश्वनिचुलशालनीपधवोद्गमाः।
वृहलोत्कर्षणं वाद्धिसंकोचे रेल्लुकारवाः ॥२१॥

पाश्चात्यो वा पौरस्त्यो वाऽनिलो मतः, यथा—

प्रावृष्यम्भोभृताम्भोदेभरनिर्भरमम्बरम्।
कदम्बकुसुमामोदो वायवो वान्ति दारुणाः ॥२२॥

यथा च—

पौरस्त्यस्तोयदर्त्तो पवन इव पतत्पावकस्येव धूमो
विश्वस्येवादिसर्गः प्रणव इव परं पावनं वेदराशेः।
सन्ध्यानृत्तोत्सवेच्छोरिव मदनरिपोर्नन्दिनान्दी निनादः
सौख्याण्यग्रे सुखं वो वितरय वनिता तदनास्यन्दनस्याः ॥२५॥

ईष ऊर्जः शरत्तत्र मेघखण्डेषु शुक्लता।
शुक्तिमुक्ता सगर्भत्वं बकामीनानुयायिनः ॥

तटे कूर्मप्रचारश्च मार्गवाहोपशा(शां) तता।
रथवारक्षमा क्षोणी व्यवसायोऽप्यतथ: ॥

महानवम्यं शस्त्रेभतुरङ्गभटपूजनम्।
दीपालिकाविलासाश्च प्रयाणप्रवणा नृपा: ॥

कृष्णावबोधाः केदारे पक्वशालिविनम्रता ॥३०॥
सस्यानां पाकपिङ्गत्वं मधुरेक्षुवणोच्छ्रया: ।
शालिरक्षक: गोपीनां गीतनृत्तादिविभ्रमः ॥

श्यामकोमलकैर्चा(श्चा) रुनीवारादिकपक्वता ।
कृषीवलानां गेहाग्रे शालिक्षोदादिकोद्यमा: ॥

कुररचमरक्रौञ्चचक्रकादम्बसारसा: ।
कारण्डवशुकहस्तिमदग्धसितं रजः ॥

असने कुसुमं स्वर्णदर्णशोणपरागभृत् ।
तत्राकारपत्रपुष्पो बाणः सेफलिकासुमां ॥

अगस्तिषु श्वेतवक्रपुष्पं सौगन्धिकोद्भवः ।
अनियतदिक्को वायु: कवीनां सम्मता यथा ॥

से(शे)फालीकलिकाकोशकषायामोदिनोऽनिलाः ।
उषस्यु बभ्रुराकृष्टे जलावश्यायसीकराः ॥ ४०॥

सहः सहस्यो हेमन्तस्तस्मिन् गुरुतरा निशा ।
दिनान्यल्पानि प्रालेयैर्भानुतारेंदुमन्दता ॥

जलानां हिमपिण्डत्वं पीडा पथिकयोषिताम् ।
कुंकुमोद्वर्त्तनं रक्तवसनानि हसन्तिका ॥

सुगन्धतैला कबरी शय्या च सदनान्तरे ।
निशारतक्षमान्योदनानि सरसं दधि ॥

स्त्रीणां स्तनोरसोष्मत्वं निबिडालिङ्गनानि च ।
गोधूमयवप्ररोहा लवली मुकुलाकुला ॥

लवङ्गफलिनीवल्यो: प्रसूनं श्यामरेणुभृत् ।
पुंड्रकाणां श्वेतपर्णभृतां माधुर्यमन्तरा ॥

कृष्णेक्षूणां परिपाको रोध्रः शुभरजो भरः ।
कर्कंधुनागरङ्गीणामरुणाफलमण्डली ॥

मुचुकुंदन्तकोद्भेदा: सर्षपकन्दलीशमी ।
धान्यविपाकाश्च पथं पथ्यं तैलबलान्यपि ॥

श्वेतप्रसूनभृत्कुन्दः पुन्नागप्रसवोदय: ।
सर्पदर्पक्षयो व्याघ्रीप्रसूतिर्भृङ्गमौनता ॥

बर्हिणो बर्हनिर्मुक्ता व्योमयात्रानपक्षिणाम् ।
उदीच्यो वा पाश्चात्यो वा पवनस्तुहिनावहः ॥

यथा—

लंपाकीनां किरन्तश्चिकुरविरचनां रल्लकान् लासयन्त–
श्चुम्बन्तश्चन्द्रभागं विचितसुमनसः कुर्कुमान कम्पयन्तः ।
एतैकस्तूरिकैणप्रणयसुरभयो वल्लभा वाल्हवीनां
कैलूतीकेलिकाराः परिचयितहिमं वायवो वान्त्युदीच्याः ॥

यथा वा—

भञ्जन् भूर्जद्रुमालिस्तुहिनगिरितटेषद्गतत्वातकरालो
रेवाम्भः स्थलवीचीचयचकितचलत्वालकं व्याधुनानाः ।
पाश्चात्यो वाति वेगात द्रुततुहिनशिलाशी (सी)करासारवर्षं
मातङ्गक्षुण्णसांद्रश्रुतसरलसरत्सारसासी समीरः ॥५५॥

तपस्तपस्यौ शिशिरः सहेमंतसमक्रमः ।
विशेषोऽयं तु सिद्धार्थपाको मरुवकोद्गमः ॥

धृतबाष्पानि तोयानि जनवक्त्रातापाणि च प्रगे ।
वराहमहिषप्रीतिर्मतंगमृगतत्ता ॥

जलानि मूलसलीनमीनान्युत्तरमारुतैः ।
नालावशेष्यब्जानि दुर्भगाः केलिवापिकाः ॥

वितता गुरुधर्मोस्मिन्धूपने वासवेश्मनि ।
स्थूलतूलपटे तल्पे तरुणी घुसृणाञ्चिता ॥

येषां तेषामिहाथामवर्ती कुतः—

मधुमाधवौ वसन्तस्तत्र कोकिलषट्पदाः ।
सारिकाशुकहारीतदात्यूहाश्च मदस्पृशः ॥

दृक्रक्तता कोकिलानां क्रौञ्चानां मदविच्युतिः ।
दिनवृद्धिर्निशाहानिर्भास्करस्योत्तरायनम् ॥

कोकिलभ्रमरारावा स्मरस्यैकातपत्रता ।
स्त्रीणां विलासादोलाश्च गौरीगानं स्मरार्चनम् ॥

कौसुम्भं वासः सीमन्ते सिन्दूरो मानहायनः ।
प्रोषितानां प्रणयिषूत्कण्ठा संदेशदेशनं ॥

वृक्षवल्लीषु पुष्पाणि कोकिला पञ्चमध्वनिः ।
सहकारेषु मंजर्यो माधवी श्वेतपुष्पभृत् ॥

बकुलाक्षी च तरुणी स्वरागंडूषदोहदः ।
रक्ताशोको नीलाशोकः स्वर्णशोकस्त्रिधाऽप्यसौ ॥

रक्तपुष्पः समञ्जीरस्त्रीपदाघातदोहदः ।
श्वेतपुष्पः कुरु(र)बकः स्त्रीकुचाश्लेषदोहदः ॥
तिलकः श्वेतमञ्जरीकः स्त्रीकटाक्षदोहदः ।
कुष्यकः स्फारकर्पूरधूपधूमोर्मिदोहदः ॥
सिन्दूरवासितं पुष्पं मञ्जरी पाटलारुणा ।
लकुचं श्वेतपीतं च किंशुको रक्तपुष्पकः ॥
कर्णिकारं स्वर्णवर्णं कांचनारं च पाटलं ।
चम्पकः पीतपुष्पश्च खर्जूरी श्वेतरेणुभृत् ॥
श्वेतप्रसूनकलिते मल्लिका नवमल्लिके ।
करुणः श्वेतकुसुमो रक्तपुष्पश्च दाडिमः । कोविदारसिंदूवाररौहीतकमधूककाः ॥७१॥
आताम्रैककिकंरातौ प्रियालो मंजरीयुतः । कुमुदोत्पलपद्मानि नालिकेरी प्रसूनवाक् ॥७२॥
गोलिकाकार कुसुमः कदम्बकदलीवनं । शोभाञ्जनकः पुष्पेषु पूजां दमनकोच्चयैः ॥७३॥
हिन्तालतालतालीषु पुष्पाणि पुष्परेणवः । चंद्रस्योज्ज्वलता पुष्पावचयो जलकेलयः ॥७४॥
पूगे पुष्पं वेणिबन्धो माधवी मुकुलेक्षणात् । लाभः प्राक्कोकिलानादकथनाद्दक्षिणानिलः ॥७५॥

यथा—

चुम्बन् लँकावनालीर्मुहुरलकलता लासयन् केरलीनां
मन्ध्री धम्मिल्लबन्धान् सपदि शिथिलयन् वेल्लयन्नागवल्ली ।
उद्दामं दाक्षिणात्यो मलितमलयजः सारथिर्मीनकेतोः
प्राप्तः सीमंतिनीनां मधुसमयसुहृत् मानचौरः समीरः ॥

ग्रीष्मशुक्रशुची तत्र शिरीषश्यामरेणवः ।
पुष्पाणि स्वर्णकेतक्यां धातुकी प्रसवोद्गमः ॥
नालिकेरीषु पूगीषु खर्जूरी कदलीषु च ।
पनसेषु प्रियालेषु रसालेषु फलोद्गमः ॥
कायमानेषु मध्याह्ननिद्रापानकसक्तवः ।
मृणालहारा वस्त्राणि सुसूक्ष्माणि सितानि च ॥
ताम्बूलमार्द्रक्रमुकं तालवृन्तोदबिन्दवः ।
धारायंत्रा जलार्द्रस्त्रीकुचाश्लेषसुखोत्सवः ॥
निशासु कौमुदी सैव चन्दनद्रववर्चना ।
कदलीदलतल्पानि पाटलामल्लिकास्रजः ॥
रात्रिशेषे च सुरतं सौधाग्रे शयनस्थितिः ।
नदीहृदसरःशोषः .....पांशुपर्वताः ॥
चण्डांश्च चण्डातातो यत् कथनं मृगतृष्णिका ।
जलार्द्राशयनं कूपाः मरघट्टघटीघटाः ॥

प्रपाप्रपाः पुरन्ध्रीणां पान्थेषु प्रेमविभ्रमाः ।
समुद्रवृद्धिः कूपाम्बुस्त्रीवक्षोजेषु शीतता ॥

कामिनीनां चन्दनाक्तमुक्तालंकारधारणं ।
सोऽयं प्रगेषु मार्गेषु संचारो जलकेलयः ॥

लोलजिह्वा मृगीपंकाभ्यक्ताः कोलेभसैरिभाः ।
सरभाणां करभाणां रासभाणां मदोद्भवाः ॥

करवीरकरीरेषु पुष्पिताः स्थूलभ्रमयः ।
पक्वपीलुफलश्रेणीचारीणां निनदा वने ॥

उदभ्रांतता नदाम्बूनां मन्यदर्भांकुरोद्गमः ।
भवत्यनिशनिदिक्को नैऋतो वात्र मारुतः ॥

यथा च —

वात्या चक्रकचुम्बिताम्बरभुवः स्थूला रजोदण्डकाः
संग्रथ्नंति भविष्यदभ्रपटलस्थूणाविटंकं नभः ।

खिञ्चान्यन्मृगतृष्णिकाम्बुविसरैः पात्राणि वातार्णसां
साभ्रूनामिह सूचयन्ति दिवसेष्वागामिनां सम्पदम् ॥९८॥

तथा च—

सोऽयं करैस्तपति वह्निमयैरिवार्कः ।
साङ्गारविस्तरमयेन धरा समग्रा ।

वायुः कुकूलमिव वर्षति नैऋतश्च ।
कार्शानवैरिव शरैर्मदनश्च हन्ति ॥

ऋतुश्चतुर्विधः सन्धिबाल्यप्रौढ्यनुवृत्तितः ।
ऋतुद्वयान्तरं सन्धिः शैशवं प्रथमोद्गमः ॥

प्रौढिः प्रकर्षः पूर्वर्तुलिङ्गं यदनुवर्तते ।
पुष्पादिलिङ्गानुवृत्तिः सा ज्ञेया काव्यलोकतः ॥

शिशिरवसन्तयोः सन्धिर्यथा—

च्युतसुमनसः कुन्दाः पुष्पोदगमेष्वलसा द्रुमा
मनसि च गिरं ग्रथ्नन्तीमे किरंति न कोकिलाः ।

अथ च सवितुः शीतोल्लासं लुनन्ति मरीचयो
नवजरठतामालम्बंते क्लमोदयवाधिनी ॥

वसन्तशैशवं यथा—

गर्भग्रन्थिषु वीरुधां सुमनसो मध्येंकुरं पल्लवा–
वांछामात्रपरिग्रहः पिकवधूकण्ठोदरे पञ्चमः ।

किञ्च—

त्रीणि जगन्ति जिष्णुदिवसैर्द्वित्रैर्मनोजन्मनो
देवस्यापि चिरोज्झितं यदि भवेदभ्यासवश्यं धनुः ॥१०१॥

वसन्तप्रौढिर्यथा—

साम्यं सम्प्रति सेवते विचकिलं षाण्मासिकैर्मौक्तिकैः
कान्तिं कर्षति काञ्चनारकुसुमं मांजिष्ठधौतात्पटात् ।
हूणीनां कुरुते मधूकमुकुलं लावण्यलुण्टाकतां
लाटीनामिभिनिभं चकास्ति च पतद्वृत्ता यतः केश(स)रम् ॥

शिशिरानुवृत्तिर्यथा वसन्ते—

मेरुबकदमनकपून्नागपुष्पलिङ्गानुवृत्तिभिः सुरभिः ।
रचनीयश्चित्रश्रीः किञ्चित् कुन्दानुवृत्त्या व्रते ॥ यथा—
गेहे वाहीकयूनां वहति दमनको मञ्जरीकर्णपूरा–
न्नुन्मादः पामरीणां मरुति मरुबकामोदिनी व्यक्तिमेति ।
सद्योभङ्गानुसारस्रुतसुरभिशिराशीकरः साहकारः
सर्व्यस्रम्भःसरावे रचयति च रसोरेचकी चक्रपाणिः ॥

यथा—

कुन्दे मन्दस्तमाले मुकुलिनि विकलः कातरः किं किराते
रक्ताशोके सशोकस्थिरमतिविभवे चंपके कुञ्चिताक्षः ।
पांथः खेदालसोऽपि श्रमण कटुरचच्चक्रमभ्येति धुन्वन्
सोत्कण्ठः षट्पदानां नवमधुपटलीलंपटं कर्पटेन ॥

विचकिलकेशरपाटलिचम्पकपुष्पानुवृत्ता या ग्रीष्मे तत्र चतुर्हिनर्तुभवं मरुबकमपि केचिदिच्छन्ति ।

अभिनवकुशसूचिस्पर्द्धि कर्णे शिरीषं
मरुबकपरिवारं पाटलादामकण्ठे॥
स तु सरसजलार्द्रोन्मीलितः सुन्दरीणां
दिनपरिणतिजन्मा कोऽपि वेषश्चकास्ति ॥

ग्रीष्मसमये विकासी कथितो धूलीकदम्ब इति लोके जलधरसमयप्राप्तौ समयपञ्चधाराकदम्ब स्यात् ।

यथा—

धूलीकदम्बपरिधूसरदिग्मु(ङमु)खस्य
रक्तच्छटास्वरशरासनमण्डनस्य ।
दीप्तायुधा शनिमुचो ननु नीलकण्ठ
नोत्कण्ठसे सदनवारिधरागमस्य ॥ ( )

वर्षासु ग्रीष्म लिङ्गाब्जानुवृत्तिः कविसंमता। यथा—

खंच(चा?)स्ते कलविंककण्ठमलिनं कादम्बिनीकम्बलं
चर्चा पारयतीव दर्दुरकुलं कोलाहलैरुन्मदम्।
गन्धं मुञ्चति सिक्तलाजसदृशं वर्षेण दग्धा स्थली
दुर्लक्ष्योऽपि विभाव्यते कमलिनीहासेन भासांपतिः। (   )

जलसम्भवजायमना जाति यां कर्दमेन कथयन्ति।
सा शरदि महोत्सविनी गन्धाधितषट्पदा भवति॥

यथा—

स्थूलावश्यायबिंदुद्युतिदलितवृहात् कारकग्रन्थिभाजो
जात्या जालं लतानां बहलपरिमलप्लावितानां जजृम्भे।
नानाहंसोपधानं सपदि जलनिधिश्वोपसर्पा परस्य
ज्योत्स्ना शुक्लोपधानं शयनमिव शशी नागभोगांकमम्भः॥ (   )

स्तोकानुवृत्ति केतक्याः शरदीच्छन्ति केचन।

यथा—

असूच्यत शरत्कालः केतकीधूलिकेसरैः।
पश्चातान्नैः नवाघातश्चरणैरिव वासरैः॥

शरद्भवानामनुवृत्तिरत्र बाणासनानां सकुरंटकानां।
हेमन्तवक्त्रे यदि दृश्यतेऽपि न दृश्यते बन्धविधिः कवीनां॥

हेमन्तशिशिरे य सर्वानुवृत्तिरैक्यतः॥

एवं कविप्रमिदव्यान्यदप्यूह्यं कविभिः स्वयम्। शोभाधोगन्धरसैः फलार्चनायां च गमनमुपयोगि पोढा दर्शितमेतत् स्यात् सप्तमसनुपयोगि तथा—

यौगिकनाममालास्तबके—

उद्दिश्येति। इह यौगिकनाममालायाम्॥छ॥

शब्द इति—यत्रैकवचनं तत्र स एक एवोक्तिः शब्दः। यत्र तु बहुवचनं मुख्य-मुख्यादि प्रभृत्यर्थाः शब्दास्तत्रोक्तशब्दसदृशार्थाः। बहवोऽपरेऽपि शब्दाः ज्ञेयाः॥छ॥

स्वर्गे इति—सप्तम्यन्तमुद्देशवचनम्।

सुरेभ्य इति—पञ्चम्यन्तम्। पूर्वपदं गेहानीति प्रथमान्तं पुरः पदम्। एवमग्रेऽपि सर्वत्र—सुरगेहं, सुरसद्म, त्रिदशावासः, अमर्त्यभुवनं, देवलोक इत्यादयः॥छ॥

देवे इति—द्युभ्यः स्वर्गवाचिनामभ्यः। सदः आदिशब्दात् तदर्थाः सद्मादयः, द्युसदः

अथ शब्दसिद्धिप्रतानः। तत्र रूढयौगिकमिश्राख्यास्तबको गतार्थः।

यौगिकनाममालास्तबके—उद्दिश्येति। इह यौगिकनाममालायाम्॥छ॥

शब्द इति—यत्रैकवचनं तत्र एक एवोक्तः शब्दः। यत्र तु बहुवचनं मुख्यमुख्यादिप्रभृत्यर्थाः शब्दास्तत्रोक्तशब्दसदृशार्थाः। बहवोऽपरेऽपि शब्दाः ज्ञेयाः॥छ॥

स्वर्गे इति—सप्तम्यन्तमुद्देश्यवचनम्। सुरेभ्य इति—पञ्चम्यन्तम्। पूर्वपदं गेहानीति प्रथमान्तं पुरः पदम्। एवमग्रेऽपि सर्वत्र। सुरगेहं, सुरसद्म, त्रिदशावासः, अमर्त्यभुवनं देवलोके इत्यादयः।।छ।। देवे इति—द्युभ्यः स्वर्गवाचिनामभ्यः। सदः आदिशब्दात् तदर्थाः सद्मादयः, द्युसदः, द्युसद्मानः।

यत्प्राचिमासे कुसुमं नु बद्धम् तदुत्तरे तालफलं विधेयम्।
तदग्रिमे प्रौढितरं च कार्यं तदग्रिमे पाकपरिष्कृतं च।।

द्रुमोद्भावानां विधिरेष दृष्टो वल्लीभवानां न महाननेहाः।
तेषां द्विमासावधिरेव कार्यः पुष्पे फले पाकविधौ च कालः।।

अन्तर्व्याजं बहिर्व्याजं बाह्यान्तर्व्याजमेव च।
सर्वव्याजं बहुव्याजं निर्व्याजं च तथा फलम्।।

लकुचाद्यन्तर्व्याजं तथा बहिर्व्याजमत्र मोचादि।
आम्राद्युभयव्याजं सर्वव्याजं च ककुभादि।।

पनसादि बहुव्याजं नीलकपित्थादि भवति निर्व्याजम्।
सकलफलानां षोढा ज्ञातव्य कविभिरिति भेदः।।

एकद्वित्र्यादिमार्गेण सामस्त्येनाथवा ऋतून्।
प्रबन्धेषु निबध्नीयात् क्रमेण व्युत्क्रमेण च।।

इतिश्री वायटगच्छीय श्रीजिनदत्तसूरिशिष्यपण्डित श्रीमदमरचन्द्रविरचिते स्वोपज्ञकाव्यकल्पलतावृत्तिविवेचने परिमलनाम्नि वर्णस्तबकोल्लासी व्यवस्थापकः षोडशः प्रसरः।।छ।। ग्रन्थाग्रं १४५।।

स्वर्गसदः, स्वर्गालयः इत्यादि। सुधेति—चगादयः स्वधादिभिः प्रत्येकं सम्बध्यन्ते। तेन सुधाभुजः, सुधाशनाः, स्वाहाभुजः, स्वाहाशनाः, अमृताशना, अमृतान्धस इत्यादयः। दानवे इति—दानवद्विषः, दानवारयः, दैत्यद्विषः, दनुजद्विषोऽसुरादयः। अत्र नाको विद्यते येषामिति स्वामिसम्बन्धान्नाकिनः स्वर्गिणः, त्रिदिवाधीशा इत्यादयः। अदिति द्यां अदिता, तस्या अपत्यानि आदितेयाः, आदित्या, अदितिजा, इत्यादयः। तेषां विमानो यानमिति सम्बन्धाद्विमानयानाः, वैमानिका, विमानिन इत्यादयः।।छ।।

विमाने देवयानं, सुरयानमित्यादि।।छ।।

अमृतदेवतामन्धोऽन्नभोज्यमाहार इति यावत्। देवान्धो, देवान्नं, देवभोज्यं, देवाहार इत्यादि।।छ।।

सूर्येति सहस्रेति—रुच्यर्थशब्दाः सहस्रादिभिः सम्प्रत्येकं सम्बध्यन्ते। सहस्ररुचिः, सहस्रांशुः, दशशतरश्मिः; उष्णरुचिः, उष्णरश्मिः, शीतेतररश्मिः; खररुचिः, खररश्मिः, तीक्ष्णरश्मिरित्यादि।।छ।।

चक्रवाकेति—चक्रवाकबन्धुः, चक्रबन्धुः, रथाङ्गसुहृत्, अब्जबन्धुः, अब्जसुहृत्; पद्मबन्धुः, कमलसुहृत्; दिवसबन्धुः, दिनबन्धुः, दिनसुहृत्, इत्यादयः। ध्वान्तेति—ध्वान्तरिपुः, ध्वान्तारातिः, तिमिररिपुरित्यादि। गो इति—गोपतिः, द्युतिपतिः, त्विषामीशः; दिवसेनः, दिनेनः, दिनपतिः; पद्मिनीनः, पद्मिनीपतिः। ग्रहेनः, ग्रहाधीशः, ग्रहपतिरित्यादयः। प्रभेति—प्रभादिसप्तभ्य करः, प्रभाकरप्रभृतयो दिवाकरादयौगिकत्वात्। दिनकृत् वासरकृदादयः। नभो इति—नभोरत्नं, नभोमणिः; व्योमरत्नं, गगनमणिरित्यादयः। दिनरत्नं, दिवसरत्नं; दिनमणिः, दिवसमणिः इत्यादयः। गगनेति—गगनध्वजः, गगनकेतुः; नभोध्वजः, नभःकेतनः; इत्यादयः। गगनाध्वगः, गगनपान्थः; द्युसद्मानः; स्वर्गसादः; स्वर्गालयाः इत्यादयः। सुधेति—चुगादयः स्वधादिभिः प्रत्येकं सम्बध्यन्ते। तेन सुधाभुजः, सुधाशनाः, स्वाहाभुजः, स्वाहाशनाः,

अमृताशनाः, अमृतान्धस इत्यादयः। **दानवे इति**—दानवद्विषः, दानवारयः; दैत्यद्विषः, दनुजद्विषोऽसुरादयः। अत्र नाको विद्यते येषामिति स्वस्वामिसम्बन्धान्नाकिनः स्वर्गिणः, त्रिदिवाधीशा इत्यादयः। अदितिर्या अदिता, तस्या अपत्यानि आदितेयाः, आदित्या, अदितिजा, इत्यादयः। तेषां विमानो यानमिति सम्बन्धाद्विमानयानाः, वैमानिका, विमानिन इत्यादयः ॥छ॥

विमाने देवयानं, सुरयानमिति ॥छ॥

अमृतदेवतामन्धोऽन्नभोज्यमाहार इति यावत्। देवान्धो, देवान्नं, देवभोज्यं, देवाहार इत्यादि ॥छ॥

सूर्ये इति–सहस्रेति—रुच्यर्थशब्दाः सहस्रादिभिः सम्प्रत्येकं सम्बध्यन्ते। सहस्ररुचिः, सहस्रांशुः, दशशतरस्मिः (श्मिः); उष्णरुचिः, शीतेतररश्मिः, खररुचिः, खररश्मिः, तीक्ष्णरश्मिरित्यादि ॥छ॥

चक्रवाकेति—चक्रवाकबन्धुः, चक्रबन्धुः, रथाङ्गसुहृत्; अब्जबन्धुः, अब्जसुहृत्; पद्मबन्धुः, कमलसुहृत्; दिवसबन्धुर्दिनबन्धुः दिनसुहृत् इत्यादयः। **ध्वान्तेति**—ध्वान्तरिपुः ध्वान्तारातिः तिमिररिपुरित्यादि। **गो इति**—गोपतिः, द्युतिपतिः, त्विषामीशः; दिवसेनः, दिनेनः, दिनपतिः; पद्मिनीनः, पद्मिनीपतिः; ग्रहेनः, ग्रहाधीशः, ग्रहपतिरित्यादयः। **प्रभेति**–प्रभादिसप्तभ्यः करः, प्रभाकरप्रभृतयो दिवाकराद् यौगिकत्वात्। दिनकृत्, वासरकृदादयः। **नभोइति**—नभोरत्नं, नभोमणिः, व्योमरत्नं, गगनमणिरित्यादयः। दिनरत्नं, दिवसरत्नं; दिनमणिः, दिवसमणिः इत्यादयः। **गगनेति**—गगनध्वजः, गगनकेतुः; नभोध्वजः, नभःकेतन इत्यादयः। गगनाध्वगः, गगनपान्थः, नभोध्वगः, नभःपान्थ इत्यादयः। **सप्ताश्वेरिति**—सप्ताश्वः, सप्तसप्तिः, अश्वयुक्सप्ति, विषमसप्तिरित्यादयः। अत्र भास्वान् अयौगिकत्वात् अंशुमान्, अंशुमाली, किरणमालीत्यादि। यमुनाजनकः कृतान्तजनको यौगिकत्वात् कालिन्दिसूः, यमसूरित्यादयः। अब्जहस्तः, अंशुहस्तो यौगिकत्वात् पद्मपाणिः गभस्तिपाणिरित्यादयः; अरुणसारथिः अरुणसूत इत्यादयः ॥छ॥ **अरुणे इति**—अर्कसारथिः रविसूत इत्यादयः **वैनतेति**—विनतासूनुः, वैनतेय इत्यादयः। **गरुडेति**—गरुडाग्रजः पक्षिराजाग्रज इत्यादयः ॥छ॥

जैवातृके इति—जीवत्यनेन अमृतवर्षित्वाज्जगदिति जैवातृकः। जीवे रात्रिको जैवरातृको जैवचेत्यातृकः चन्द्रः। कुमुदि इति—कुमुदबन्धुः, कुमुदबांधवः, कैरवबन्धुः, कैरववान्धवः। सुहृदपि बन्धुप्रायत्वात्[1] बन्धुरेवेति। **कैरवसुहृदित्यादि–शशादित्यादि**–शशभृत्, कलाभृच्छायाभृत्, मृगभृत्, शशधरः, कलानिधिः, छायाङ्क, मृगलाञ्छन इत्यादयः। **तारेति**-तारेनः, निशेनः, कुमुदिनीनः, द्विजेनः, तारकपतिः, कुमुद्वतीशः, कैरविणीवल्लभः, ज्योत्स्नेशः, द्विजपतिः, द्विजराज इत्यादयः। **औषधीति**—औषधीप्रियः, दक्षजाप्रियः, रोहिणीप्रियः, औषधीपतिः, दाक्षायणीकामुकः, रोहिणीप्राणेश इत्यादयः। सुधेति भाद्युतयः–सुधाद्युतिः, श्वेतद्युतिः, हिमद्युतिः, अमृतांशुः, शितरोचिः, शीतरश्मिरित्यादयः। **निशेति**–निशामणिः, निशाकरः, रजनीरत्नं, रजनीकरः; क्षपदपि, निशाकृदपि, इत्यादयः। अत्र दशवाजी, दशाश्वः, श्वेतवाजी, श्वेताश्व इत्यादयः। अमृतसूः, सुधासूरित्यादयः; अत्रिदृग्जः अत्रिनेत्रः प्रसूः इत्यादयः ॥छ॥

इन्द्रेति सहस्रेति–सहस्रनेत्रः, सहस्राक्षः, दशशतनेत्र, इत्यादयः। **शतेति**–शतक्रतुतः, शतमन्युः, शतमख इत्यादयः। **वज्रेति**–वज्रपाणिः, पविलक्ष्मा, वज्राङ्कः, वज्रीत्यादयः। **केशवेति**–केशवाग्रजः मुकुन्दाग्रजन्मा इत्यादयः। **त्रिदिवेति**–त्रिदिवपतिः, स्वःपुरीपतिः, सुधर्मापतिः, सुरपतिः, पौलोमीपतिः, पूर्वदिक्पतिः, अप्सरःपतिः, स्वर्नाथः, अमरावतीशः, सुधर्माधिपः, वि(त्रि)दशेश्वरः, शचीप्रियः, प्राचीशः, अप्सरःस्वामीत्यादयः। **जम्भेति**—जम्भजित्, पाकशासनः, बलसूदनः, वृत्तारिः, पुलोमरिपुः, नमुचिद्वेषी, अद्रिभिदादयः। **जयन्तेति**—जयन्तजनकः, जयन्तपितेत्यादयोऽत्र। मेघवाहनो घनवाहन इत्याद्यर्थः ॥छ॥

---

१. 'बन्धुप्रादात्वात्' इति पा.प.२ मध्ये विशेषम्।' बन्धुप्रादात् पा.प. १ मध्ये।

वह्नाविति-धूमेति—धूमध्वजः, धूमकेतन इत्यादयः। **हव्येति**-हव्यभुक्, हविर्भुक्, हुतभुक्, हव्याशनः, हविरशन इत्यादयः। **ज्वालेति**—ज्वालाजिह्वः, सप्तजिह्वः, मन्त्रजिह्वः, अर्चिजिह्वः, अश्वत्थजिह्व इत्यादयः। सप्तार्चिः, सप्तज्वालः, विषमार्चिरित्यादयः। **स्वाहेति**—स्वाहावल्लभः, स्वाहाप्रियः, अग्नायीनायक इत्यादयः। अत्रछागरथो मेषरथ इत्यादयः ।।छ।।

यमेति दंडि(डे)ति—दण्डास्त्रः, दण्डायुध इत्यादयः। महिषेति–महिषध्वजः, महिषवाहनः, लुलायलाञ्छनः इत्यादयः। **कालिन्दीति**—कालिन्दीसोदरः, यमुनासहोदर, इत्यादयः। **धूमोर्णेति**–धूमोर्णप्रियः, धूमोर्णावल्लभ, इत्यादयः। **दक्षिणेति**—दक्षिणेशपतिः, प्रेतपतिः, पितृपतिः, याम्येशः पिशाचेशः, पितृप्रभुरित्यादयः। सूर्याङ्गजः सूरसूत इत्यादयः ।।छ।।

रक्षसीति-रजनीति—रजनीचरः, निशाचरः, रात्रिञ्चर इत्यादयः। **निकसेति**—निकसासुतः, निकसाङ्गजः, नैकसेय इत्यादयः। **क्रव्येति**—क्रव्यभुक्, क्रव्यादः, पलाद, इत्यादयः ।।छ।।

वरुणेति-याद इति—यादःपतिः, जलपतिः, अपांनाथः, यादोनाथ, इत्यादयः। **पाशेति**–पाशास्त्रः, पाशायुधः, पाशी, पाशिपाणिरित्यादयः। अत्रार्णवमन्दिरः समुद्रालय इत्यादयः। **वायाविति–नित्यगतिः**, सततगतिः, सदागतिरित्यादयः। **आश्वेति**—आश्वगः आश्वगतिः ।।छ।।

श्रीदे इति-शर्वेभ्य इति—शर्वसखः श्रीकण्ठसख इत्यादयः। **तत्पुत्रेति**—तत्पुत्रो नलकूवरः, नलकूबरजनकः, कूबरपितेत्यादयः। **निधानेति**—निधानस्वामी, यक्षस्वामी, किन्नरस्वामी, धनस्वामी, निधीश्वरः, निधानेशः, गुह्यकाधिपः, किन्नरेशः इत्यादयः। **अलकेति**—अलकापतिः, चैत्ररथःस्वामी पुष्पकेश इत्यादयः ।।छ।।

शिवे इति-त्रीति—त्रिदृक् ललाटे नेत्रयोगादेकदृक्। अर्द्धनारीश्वरमूर्तै महेश्वराङ्गस्य एकदृक्त्वात्। भालदृक्-भाललोचन, एकनेत्रः, अयुग्लोचनः, ललाटनयन इत्यादयः। **वृषेति**—वृषध्वजः,[1] वृषभध्वजः, वृषलांछन, इत्यादयः। **दिग्भ्य इति**—दिग्वासाः दिगम्बर इत्यादयः **श्यामेति**—श्यामकण्ठः, नीलकण्ठः, नीलग्रीव इत्यादयः। **कालेति**—कालप्रतिपन्थी, पुरादिगजासुहृत, पुरद्वेषी, अन्धकारातिः, कामद्वेषी, भवभित्कालान्तक पुरान्तकः, गजासुरद्वेषी, पूषदन्तहरः, अन्धकरिपुः, स्मरारिः, दक्षाध्वरध्वंसकः इत्यादयः। पशोरिति-पशुपतिः, गणपतिः, भूतपतिः, गौरीपतिः, पशुनाथः, प्रमथस्वामी, भूतेशः, गिरिजावल्लभ इत्यादयः। **शूलादिरर्यादि**—शूलभृत्, खट्वांगभृत्, गंगाभृत्, भुजङ्गभृत्, इन्दुभृत्, पिनाकभृत्, कपालभृत्, कर्बदभृत्, शूलीः, **खट्वांगधरः**ः, गङ्गाधरः, उरगभूषणः, शशिमण्डनः, पिनाकपाणिः, कपाली, कपर्दीत्यादयः। अत्र घनवाहेन मेघवाहन इत्यादयः। कृत्तिवासा गजाजिनसंख्यानत्वात् चर्मवसन इत्यादयः ।।छ।।

गौर्यामिति-महिषेभ्य इति—महिषमथनी, लुलायभृत्, शुम्भभित्, निशुम्भभिदित्यादयः ।।छ।।

भवेभ्य इति—भवप्रिया, शिवल्लभा इत्यादयः। **मेनेत्यादि** मेनासुता, हिमाद्रिसुता, अद्रिमेनाङ्गजा, प्रालेयाचलनन्दिनी, गिरिजा इत्यादयः। अत्र दाक्षायणी, दक्षजा, दक्षतनयेत्यादयः सिंहेभ्यो यानानि सिंहयानसिंहवाहनेत्यादयः। स्कन्देभ्यो जनन्यः स्कन्दजननी विषमेत्यादयः। कृष्णेभ्यो मैनाकाद्भगिन्यः कृष्णभगिनी नन्दपुत्रीत्वात्, विष्णुस्वसेत्यादयः, मैनाकस्वसा, हिमाद्रिपुत्रीत्वात्, विष्णुस्वसेत्यादयः, मैनाकभगिनीत्यादयः ।।छ।।

हेरम्बेति—गणपतिः, गणेशः, विघ्नेशः, विघ्नराजः, प्रमथाधिप इत्यादयः। **एकेति**—एकशब्दाग्रतोरदा योज्याः एकरदः, एकदन्तः। गुहोत्पाटितदन्तत्वेदको दक्षिणो दन्तोऽस्य एकदशन इत्यादयः। **मूषकेति**–मूषकवाहनः आखुर(थ)रथा, आषुग इत्यादयः। **गजेति**–गजवदनः, गजास्यः कुञ्जरानन इत्यादयः। अत्र परशुपाणिः, परशुधर इत्यादयः। **स्कन्द इति–शिखीति**—शिखिध्वजः, शिखिवाहनः, मयूरवाहन, इत्यादयः। **शक्तीति**–शक्तिपाणिः, शक्तिधरः, शक्तिभृदित्यादयः। **शरेति**–शरभूः, अग्निभूः, अग्निजन्मा, वह्निजन्मेत्यादयः। **क्रौंचेति**—क्रौञ्चाद्रिभृत्, क्रौञ्चारिः। अंधकासुरे हि महेश्वरा-

---

१. 'वृषध्वज.' इति पा.प.१ पुस्तके नास्ति।

क्रौञ्चाद्रिमध्ये प्रणष्टोऽनेन क्रौञ्चो दारित इति प्रसिद्धिः। **क्रौञ्चदारण** इत्यादयः। तारकद्विट्, तारकारिः, तारकान्तक, इत्यादयः। **गङ्गेति**––गङ्गासुतः, उमासुतः, कृत्तिकासुतः, गाङ्गेयः, पार्वतीनन्दनः, कार्तिकेय, बाहुलेय, इत्यादयः। **षडिति**–षण्मुखः, षडास्यः, षड्वदन इत्यादयः॥

ब्रह्मेति–आत्मेति––आत्मभूः, पद्मभूः, नाभिभूः, आत्मयोनिः, कमलयोनिः, नाभिजन्मेत्यादयः **सरोजेति**–सरोजासनः, कमलासनः, पद्मविष्टर इत्यादयः **हंसेति**–हंसवाहनः, श्वेतपक्षिरथः इत्यादयः। अत्राष्टभ्यः श्रुतयः–अष्टश्रुतिः, अष्टश्रवण इत्यादयः। चतुर्भ्यो मुखानि चतुर्मुखः चतुरानन इत्यादयः। जगद्भ्यः कर्त्तारः जगत्कर्ता, विश्वसृडित्यादयः॥छ॥

ब्राह्म्यमिति–ब्रह्मेति––ब्रह्मनन्दिनी, ब्रह्मसुता, ब्राह्मी, विरंचितनयेत्यादयः। **वाचनेति**––वचनाधिदेवता वागीश्वरीत्यादयः। अत्र शास्त्रेभ्योऽधिदेव्यः शास्त्रादधिदेवी श्रुतदेवतेत्यादयः॥छ॥

विष्णाविति,[1] **श्रीभ्यो इति**––श्रीपतिः, लक्ष्मीवल्लभ, कमलाप्रिय, इत्यादयः। **वार्द्धीति**–वार्द्धिशयनः, समुद्रवाय इत्यादयः। इन्द्रेति तु इन्द्रावरजः, शक्रानुजः, वासवावरज इत्यादयः। इन्द्रमातुरदितेर्गर्भे बलिनिग्रहार्थं वामनरूपेणोत्पन्नत्वाज्जन्माधः। दीप्तिनिर्जितविरोचनादय विरोचमसु‸ादभीप्सतः। आत्मभूरवरजाखिलप्रजः स्वर्पतेरवरजत्वमाययौ। **वैनतेय इति**––वैनतेयवाहनः, सौपर्णेयधानः, गरुडगामीत्यादयः **दैत्येति**–दैत्यारिः, दानवरिपुः, असुरद्वेषीत्यादयः। **पुराणेति**–पुराणपुरुषः, यज्ञपुरुषः पुरातनपुमान् क्रतुपुरुषइत्यादयः। **शार्ङ्गेति**–शार्ङ्गभृत् चक्रभृत् गदाभृत् शङ्खभृत् श्रीवत्सभृत् शार्ङ्गी चक्रपाणिः गदाधर कौमोदकीलक्ष्मा शङ्खपाणि, श्रीवत्साङ्क इत्यादयः। **तार्क्षेति**––तार्क्ष्यध्वजः, गरुडाङ्कः, गरुडकेतुरित्यादयः। **देवकीति**––देवकीपुत्रः, देवकीनन्दन, इत्यादयः। **चतुरिति**––चतुःशब्दस्य पुरोऽग्रतो भुजा चतुर्भुजः, चतुर्बाहुरित्यादयः। **गोपेभ्य इति**––गोपप्रभुः गोपालस्वामी, गोपेश इत्यादयः। **पीतेति**––पीतवसनः, पीताम्बरः, पिङ्गवासा, इत्यादयः। कालियेत्यादिके पानीये आलयो यस्य कालियः। पृषोदरादित्वात् कालियारिः, कालियदमनः, कालनेमिहरः, चाणूरसूदनः, धेनुकध्वंसी, मधुमथनः, पूतनाभूषणः, साल्वरिपुः, कंसजित्। यमलरूपावर्जुनवृक्षौ यमलार्जुनौ, यमलार्जुनभञ्जनः। केशा विद्यन्तेऽस्य केशी, केशिहा, शिशुपालनिषूदः, हयग्रीवहन्ता राहुमूर्द्धहरः, कैटभारातिः, सुरभित्, शकटखण्डनः, बलिबन्धनः, द्विविदद्वेषी, नरकान्तकः, हिरण्यकशिपुदारणः, मंदमर्दनः, बाणजेता, अरिष्टपेषी। एतेभ्यस्त्रयोविंशति षष्ठेभ्यः पुरस्थरित्यर्थशब्दैर्विष्णुनामानि भवन्ति॥छ॥

रुक्मिणीत्यादि––रुक्मिणीप्रियः, सत्यभामावल्लभः, राधाधव इत्यादयः। अत्र जलेभ्यः शयः जले शेते, जलेशय, जलशय इत्यादि; तोयशय नीरशय इत्यादयः॥छ॥

रामेति मुशलेति––मुशलास्त्रः, शीरास्त्रः, मुशली, हली, मुशलपाणिरित्यादयः। **कृष्णेति**–कृष्णाग्रजः, इत्यादयः **रुक्मीत्यादि**––रुक्मिभित्, प्रलम्बभित्, यमुनाभित्, रुक्मिदारणः, प्रलम्बघ्नः, कालिन्दीकर्षण इत्यादयः। **नीलेति**––नीलवसनः, नीलाम्बर, इत्यादयः॥छ॥

लक्ष्म्यामिति–कृष्णेति––कृष्णप्रिया हरिवल्लभेत्यादयः। **पद्मेति**––पद्मवासाः, कमलवासेत्यादयः। **क्षीरेति**––क्षीराब्धिपुत्री, क्षीरोदतनया, दुग्धाम्भोनिधिसुता, अब्धिसुता, उदधिपुत्रीत्यादयः॥छ॥

कामेति–विषमेति––विषमास्त्रो, विषमायुधः, पञ्चेषुत्वात्। **श्रीति**–श्रीपुत्रः, श्रीनन्दनः, लक्ष्मीसुत इत्यादयः, रुक्मिण्या श्रियोऽवतारत्वात्। **रतीति**–रतिप्रियः, रतिजीवितेश, इत्यादयः। **मध्विति** मधुसुहृत्, मधुसखः, चैत्रसुहृदित्यादयः। **मीनेति**–मीनध्वजः, मकरध्वजः, झषकेतनः, मकरकेतुरित्यादयः। **अनिरुद्धेति**–अनिरुद्धपिता, उषेशजनक इत्यादयः। **शंबरेति**–शम्बरभित्, सूर्पकभित्, सूर्पकारातिरित्यादयः। पञ्चशरः, पञ्चेषुः, पञ्चबाणः, विषमेषुः, अयुग्बाणः

---

१. 'विष्णाविति....समुद्रवाय इत्यादयः'–इदं पा.प. १ पुस्तके नास्ति।

इत्यादयः। **पुष्पेति–**पुष्पकेतनः, पुष्पध्वज, इत्यादय :। मृणालेति–मृणालधनुः, मृणालधन्वा, मृणालचाप इत्यादयः। **पुष्पेति–**पुष्पबाणः। पुष्पास्त्र, पुष्पधनुः; कुसुमेषुः, कुसुमायुधः, कुसुमचाप, इत्यादयः। इषुचापयोः सत्यप्यस्त्रत्वे भेदेन ग्रहणं, लोके तथाव्यवहारात्। **शृङ्गारेत्यादि–**–शृङ्गारयोनिः, आत्मयोनिः, सङ्कल्पयोनिः, चित्तयोनिः; शृङ्गारजन्मा, आत्मभूः, स्मृतिभूः, मनोभव इत्यादयः। अत्र हृन्मनोभ्यांशयः हृच्छयः, मनसिशय इत्यादयः।।छ।।

तार्क्ष्येइति–अरुणेति––अरुणावरजः, रविसुतानुज, इत्यादयः। **विष्णुभ्य इति**––विष्णुवाहनः, कृष्णयानमित्यादयः। **पक्षीति–**पक्षिनाथः, विहगपतिरित्यादयः। वज्रीति–वज्रभित्, इन्द्रजिदित्यादयः।

दैत्येति–दितेरिति––दितिपुत्रः, दितिसूनुः, दैत्यः, दानवः, दितिजः, दनुज, इत्यादयः। **देवेति–**देवरिपुः, सुरारिरित्यादयः।।छ।।

पृथिव्यामिति–अब्धीति–––अब्धिनेमी, अब्धिमेखला, अब्धिवसना, जलधिनेमिः, समुद्रकांचिः, सागराम्बरा इत्यादय :। **अत्र शैलेभ्य** आधारः शैलाधाराः, पर्वताधारेत्यादयः। **शैले इति–भूभ्य इति–**भूधरः, भूध्रः क्षितिधरः, क्षितिध्रः, भूभृदित्यादयः।।छ।।

उदयाद्राविति––उदयगिरिः, पूर्वगिरिः, उदयाद्रिः, प्राचीपर्वत, इत्यादयः। **अस्ताद्राविति**––अस्तनगः, प्रत्यग्नगः, अस्ताद्रिः, पश्चिमाचलः, परमाचलः इत्यादयः।।छ।।

हिमाद्राविति–उदगित्यादि–––उदगद्रिः, हिमाद्रिः, उत्तराचलः, तुषाराचलः, प्रालेयशैल इत्यादयः। **अद्रिभ्य इति**––अद्रिपतिः, नगाधिपः, शैलराज इत्यादयः। **मेनकेति–**मेनकाप्रियः, मेनकावल्लभ इत्यादयः। **पार्वतीति–पावतीति**–––पार्वतीगुरुः, **गौरीगुरुरित्यादयोऽत्र गौरीभ्यो** जनका(क) गौरीजनकः पार्वतीपितेत्यादयः। हिमेभ्य आलय हिमालयः, प्रालेयालय इत्यादयः।।छ।।

मलये इति–दक्षिणेति–––दक्षिणशैलः दक्षिणाचलः, याम्याद्रिरित्यादयः। अत्र चन्दनेभ्योऽद्रिः चन्दनाद्रिः, श्रीखण्डाचल इत्यादयः। **कैलासेति स्फटिकेति**––स्फटिकनगः, स्फटिकाद्रिरित्यादयः। अत्र धनदेभ्य आवास, धनदावासः, गुह्यकेन्द्रावास इत्यादयः। हरेभ्यो गिरयः हरगिरिः, हराद्रिः, शिवशैल, इत्यादयः।।छ।।

मेराविति–स्वर्गीत्यादि–––स्वर्गिभूधरः, स्वर्गपर्वतः, सुवर्णाद्रिः, सुरशैलः त्रिदिवगिरिः, कनकाचल इत्यादयः। **सूर्येभ्य इति**––अत्रोद्देश्य वचनमपि यौगिकशब्दार्थे, पृथग् विभक्ति कृ(कृत?)त्वेनोपन्यासात् सूर्यकान्त, रविकान्त इत्यादयः **सूर्येति**––सूर्यरत्नं, सूर्योपलः, अग्निरत्नं, दहनोपलः, रविमणिः, सूर्याश्मा(श्मा), ज्वलनमणिः, ज्वलनाश्मेत्यादयः।।छ।।

चन्द्रेभ्य इति––अत्राप्युद्देश्यवचनं यौगिकशब्दार्थत्वार्थत्वसमासेनोपन्यासात् चन्द्रकान्तः, शशिकान्त, इन्दुकान्त इत्यादयः, **चन्द्रेति**––चन्द्रमणि, शशिरत्नं, चन्द्रोपलश्चन्द्राश्मे(श्मे)त्यादयः। **अब्धाविति–नदीभ्य इति**––नद्यधिपः, वार्यधिपः, श्रो(स्रो)तोधिपः, यादोधिपः, नदीपतिः, धुनीधवः, पयःपतिः, पाथोनाथः, श्रो(स्रो)तोधीशः, यादःपतिरित्यादयः। **अद्भ्य इति**–––अपांनिधिः, जलधिः, जलाशयः, पयोराशिः, वारिनिधिः, नीरनिधिः, नीराशयः, तोयराशिः, वार्धिरित्यादयः। **दुग्धादेरिति**–––दुग्धार्णवः, क्षीरोदधिः, लवणार्णवः, दधिवारिधिः, घृतसमुद्रः, सुरावारिधिः, इक्षुनीरधिः, स्वादुजलधिरिति सप्तार्णवाः।

यदाहुः––

लवणक्षीरदध्याज्यसुरेक्षुस्वादुवारयः।

तथा चोक्तं––

लवणो रसमयः सुरोदकः सर्पिषोधिजलः पयःपयाः।
स्वादुवारिरुदधिश्च सप्तमस्तान् परीत्य त इमे व्यवस्थिताः।।छ।।

गङ्गायामिति सिद्धेत्यादि—सिद्धनिम्नगा, स्वर्गनदी, स्वर्गितटिनी, नभोनदी, सिद्धधुनी, स्वर्गापगा, त्रिदशतरङ्गिणी, व्योमस्रो(स्रो)तस्विनीत्यादयः। **जह्नोरिति**—जह्नुपुत्री, जाह्नवी, जह्नुभवेत्यादयः। अत्राश्वः सुराभ्रेभ्यो वापी, स्वर्वापी, सुरवापी अभ्रवापीत्यादयः ॥छ॥

कालिन्द्यामिति—कालिन्दाद्रेरियं कालिन्दी कलिन्दसुता कलिन्दतनयेत्यादयः। **अर्कादिति**—अर्कसुता, सूर्याङ्गजेत्यादयः। **कृतान्तेति**—कृतान्तभगिनी, यमस्वसेत्यादयः ॥छ॥

रेवायामिति-किमेकलेति—मेकलाद्रेर्जातत्वान्मेकलाद्रिजा, मेकलकन्यापीत्यादयः ॥छ॥

चन्द्रेभ्य इति—चन्द्रतनया, इन्दुजा सोमसुतेत्यादयः ॥छ॥

ताप्यामिति-तपनेति—तपनतनूद्भवा, तपनात्मजा, तपननन्दिनीत्यादयः। **अब्जे इति-जलेभ्य इत्यादि**—जलजन्म, जलजं, जलरुक्, जलरुहं; सरोजन्म, सरोजसरुट्, सरोरुहं; पंकजन्म, पंकजं, पंकरुट्, पंकेरुहं, नीरजन्म, वारिजं, तोयरुहं पयोरुहं; सरसीरुहमित्यादयः ॥छ॥

भृङ्गेति पुष्पेति—पुष्पलिट् मधुपः, मधुव्रतः, प्रसूनलिट्, इत्यादयः। **षडेति**-षडंह्रिः, षट्पदः षट्चरण इत्यादयः॥छ॥

सर्पेति-वातेति—वाताशनः, पवनाशः, वायुभूमित्यादयः। द्वीति-द्विरसनं, द्विजिह्व इत्यादयः। **दृग्भ्य इति**-दृक्श्रुतिः, चक्षुःश्रवा, इत्यादयः। **विषेभ्य** इत्यादि-विषधरः, फणधरः विषभृत्, फणभृदित्यादयः। अत्र गूढाद्ंह्रयः गूढपात्, गूढचरणः ॥छ॥

मयूरेति-नीलकण्ठः नीलग्रीवः, श्यामकण्ठ, इत्यादयः। **भुजगेति**-भुजगभुक्, सर्पाशन इत्यादयः। **जलदेभ्य** इति जलदसुहृत् मेघसुहृदित्यादयः। **वृक्षे इति-क्ष्माभ्य इति**-क्ष्माजः, क्ष्मारुट्, क्ष्मारुहभुजः, क्षोणिरुट्, क्षितिरुह इत्यादयः ॥छ॥

जलवाहे इति-जलवाहः, जलमुक्, जलदः, जलधरः, नीरवाहः, तोयमुक्, वारिमुक्, पयोधर, इत्यादयः ॥छ॥

एवमिति निगदसिद्धिः ॥छ॥

सूत्रोत्तीर्णाः केचिदन्येऽपि यौगिकशब्दा लिख्यंते। यथा—मङ्गले पृथ्विभ्यः पुत्रा पृथ्वीपुत्रः धरणीसुतः कुजः, भौमः, महेय इत्यादयः ॥छ॥

बुधे चन्द्रेभ्यः सुताः चन्द्रसुताः, चन्द्राङ्गजाः, चान्द्रमासायनिः। सौम्यः पिताऽपि सोमो देवतास्य रोहिण्याः सुत रोहिणीसुतः, रोहिणीनन्दनः, रौहिण्णेय, इत्यादय। सुरवः सुरगुरुः, त्रिदशाचार्य, इत्यादयः। सुरेभ्यो मन्त्रिणः सुरमन्त्री विबुधामात्य इत्यादयः ॥छ॥

शुक्रे दैतेभ्यो गुरवो मन्त्रिश्च दैत्यगुरुर्दानवाचार्यः, असुरममंत्री, दनुजामात्य, इत्यादयः ॥छ॥

करके मेघेभ्यो ग्रावाणः मेघग्रावा, जलदाश्मा, इत्यादयः। अप्सरः सुस्वर्गेभ्यश्च स्वर्गिभ्यश्च वध्वोनार्यो गणिकाश्च स्वर्गवध्वः, स्वर्गिवध्व, सुरवध्वः, सुरनार्यः; स्वर्नार्यः, स्वःस्त्रियः स्वर्गिनार्यः, सुरस्त्रियः, स्वर्गणिका, स्वर्वेश्या, सुरवेश्या, इत्यादयः ॥छ॥

दवे वनेऽग्नयः दवाग्निः, दववह्निः, काननाग्निरित्यादयः। अनिरुद्धे ऋक्षात् ध्वजाः ऋक्षेनामा मृगो ध्वजोऽकश्चिह्नमस्य ऋष्यध्वजः, ऋष्याकं, ऋष्यकेतुरित्यादयः। उषायाः प्रिया उषा बाणसुता, तस्याः प्रियः उषाप्रियः, उषेशः, उषारमण इत्यादयः ॥छ॥

नक्तं अनृतमयौ असत्यं सत्येतरवत् ॥छ॥

विदुषी मनीषी यो० धीमान् मतिमान् बुद्धिमानित्यादयः ॥छ॥

प्रवीणे कृतकर्मा यो कृतकृत्यः, कृतार्थः कृती च ।।छ।।
हरिद्रायां रात्रि नामानि रजनी, निशि(शे)त्यादयः।।छ।।
निम्ने परात्तं आयत्तवशा धीमांच्छादवन्तः ।।छ।।
मृतेकथानामालेखा यशोभ्यः शेषः ।।छ।।

विरंतसि दुरन्तविभ्यो मनाः दुर्मनाः, अन्तर्मन विमानः। निकारे परापर्यभिभ्यो भवः। लेखके अक्षराच्चणजीविकः चञ्चवः। सहायो नो जीविगामिचरवः। पदातो पुरोऽग्रेभ्यः सरपुरस्तो गननामिगाः। वेश्यायां पणपणेभ्योऽङ्गनास्तेना-चात्मनोऽङ्गेभ्यश्च भृभवः जन्मादयः। स एव स्त्रीत्वे दुहिताः भ्रातृव्ये भ्रातृव्यसुताः, भागिनेयस्वसृभ्यः सुताः पौत्रपुत्रेभ्यः सुताः, एवं पितृष्वसृमातृष्व(स्व)सृभ्यः सुताः ।।छ।।

उच्चैःश्रवसि देवेभ्योऽश्वाः केशरीपुरः प्रियाः श्मशाने प्रेतात् परेतात् पितृतः सद्मानि च वनानि च। कौमुद्यामिदुभ्यो रुचः, विद्युति अचिरक्षणाभ्यां प्रभा। प्रभाते निशाभ्योऽत्ययः, प्रदोषे रजनीभ्यो मुखं, सन्ध्यायां दिनेभ्योऽन्तावसानादि, ध्वान्ते समवान्धेभ्यस्तमसं, अवश्यायो निशाभ्यो जलानि। बहुले कृष्णेभ्यः पक्षः, दर्शे सूर्येन्दुभ्यः सङ्गमः, अर्हति तीर्थादधिपः करः, कृच्च जिनादीशा ।।छ।।

नृपे पृथ्वीमनुजप्रजा विश्वदेशेभ्यः पतयः। तथा पृथिव्यादिभ्यः—
पाता गोपायिता, गोप्ता, त्राता, भोक्ता, च शासिता।
नाथाधिपः परिवृढो भर्त्रेशः प्रभुरीश्वरः।
इन इन्द्रो विभुः, स्वामी, राजा, राट्पतिरीश्वरः ।।छ।।

रामेरघोर्दशरथात् कौश(स)ल्यायाः सुताः। जानक्याः प्रियाः जानक्यां प्रियाः जानक्यां जनकात् धरणीभ्यः सुताः, लक्ष्मणे सुमित्रायाः सुताः। रावणे रक्षोभ्यो लंकायाः पतयो मन्दोदरीतः प्रियाः। दशास्यकण्ठः मेघनादे शक्रेभ्यो जितः मन्दोदरीतः सुताः ।।छ।।

युधिष्ठिरे धर्मात् सुकृतात् तपसः सत्यात् सुताः शल्यादरयः। भीमे वायुभ्यः सुताः हिडम्बककिर्मीरकीचकेभ्यो-रिपवः। हिडम्बायाः अर्जुने शक्रेभ्यः सुताः, कपिभ्यो हनुमानान्वजाः, सुभद्राया उलूप्याश्चित्रांगदायाः प्रियाः। नचातकवच कालिकेयमूकासुरकर्णेभ्यो रिपवः ।।छ।।

कृष्णायां पाञ्चालात् द्रुपदात्, यज्ञसेनात् नन्दिन्यः पाण्डवेभ्यः प्रियाः। भीष्मे जान्तनोर्गङ्गाभ्यो नदीभ्य सुता विप्रद्रष्टभ्यः सुरः। अग्रद्विशब्दाभ्यंजन्मजजातयः सांयात्रिके पातेभवणिक्केशेषु शिरोभ्यो जजि हुलत्वे हस्तपक्षपलाशकलाप-भारोच्चायाः अधरे दन्तेभ्यो वेराणिच्छेद अस्तेनायोरसि चक्षउतरस्तोजः। कक्षायां भुजेभ्यो मूलं चुबुके सृनेभ्यो मुखानि, स्वगुणैरुपमानैश्च सुंदरादिपदैरपि लियन्ते स्त्रियोऽङ्गानि क्रियाश्चाप्यभिधाकृतेः अंगानां क्रियाणां च स्वेचते गुणाश्च तैस्तद्वाचिभिः शब्दैरित्यर्थः। अउस्वशब्दोपादानान्तरलादीनां गुणानां नामसाधारण।ामहा। तेन सुंदरत्वा-दीनां गुणत्वेऽपि साधारणत्वात् सुन्दरादिपदैरिति पृथग् निर्देशः। उपमीयते एभिक पमानानि मृगलोचनादीनि तैः सुन्दर-आदिर्येषां तानि सुन्दरादीनि पदानि, तैश्च एतैस्त्रिभिरङ्गेभ्य वा लोचनादीनि क्रियागमनमादयश्च स्त्रिया अभिधाकृते अभिधानयोजनाय विशेष्यन्ते, विशेषेण युक्तानि क्रियन्ते स्वगुणाविशेषितैरङ्गैर्नामानि यथा—अलसमीक्षण माली सौम्याः अलसेक्षणा अत्रेक्षणलक्षणाया क्रियाया अलसत्वमसाधारणः स्वकीयो गुणः एव, मधुरवचना, ललितगमनेत्यादयः। उपमानविशेषितैरङ्गैर्नामानि यथा—मृगाक्षिणी इव अक्षिणी अस्या मृगाक्षी, उष्ट्रमुखादित्वादुपमानवाचिशब्दस्य बहुव्रीहौ लोपः अत्र मृगाक्षिलक्षणेनोपमानेनेक्षक्षणमङ्गं विशेषित(तं) एवं सर्वत्र इन्दुवन् मुखमस्या इन्दुमखी कमलानना ।।छ।।

'अधरे.....नायो' .....इदं पा.प., पुस्तके नास्ति।
अत्रपर्यन्तमेव प्पा. प. पुस्तकमपलभ्यते, अपूर्णं चास्ति।

परिशिष्टम्–२

कारिकाक्रमः